15821
SL no. 012610

ताण्ड्यमहाब्राह्मणम्।

सायणाचार्य्यविरचितवेदार्थप्रकाशनामधेय-

भाष्यसहितम्।

श्रीमदानन्दचन्द्रवेदान्तवागीशेन

परिशोधितं॥

त्रयोदशाध्यायावधि समाप्तिपर्यन्त-

उत्तरोभागः।

कलिकाता राजधान्यां

नूतनसंस्कृतयन्त्रे गणेशयन्त्रे रामायणयन्त्रे च

मुद्रितः।

संवत् १९३० । खृ १८७४ ।

विज्ञापनम् ।

अस्य पूर्व्वस्मिन् भागे द्वादशाध्यायपर्य्यन्तो ग्रन्थोगतस्तस्य विज्ञापनप्रकरणे ग्रन्थसमुदायस्य प्रतिपाद्यादिविषयउक्तोऽतोऽत्र तस्य पुनरुक्तेः प्रयोजनाभावः । अस्मिन्नुत्तरभागे तु त्रयोदशाध्यायमारभ्य पञ्चविंशाध्यायपर्य्यन्तो ग्रन्थशेषो वर्त्तते अतः केवलमत्र स्थानामध्यायानामध्ये कस्मिन् किं विषयो वर्त्तते तदभिधीयते । तत्र प्रथमतस्त्रयोदशाध्याये तावत् स्तोमलक्षणादिविधानं, चतुर्दशे तु छन्दोमस्तोमलक्षणैः, पञ्चदशे अष्टाचत्वारिंशस्तोमलक्षणैः, षोड़शे अग्निष्टोमविकृतयः, सप्तदशे व्रात्यस्तोमाद्यग्निहोत्रसमाप्तिः, अष्टादशे उपहव्य ऋतपेय शुनाशीर्य्य वैश्यस्तोम तीव्रसुत वाजपेय राजसूयविधिः, ऊनविंशे क्रतुद्वन्द्वविधानं, विंशे अहीनादि कल्पनं, एकविंशे गर्गत्रिरात्रशेष चतूरात्र पञ्चरात्र सत्र वर्णनं, द्वाविंशे षड्रात्राद्येकादशरात्रपर्य्यन्त सत्र वर्णनं, त्रयोविंशे द्वादशरात्रादि द्वात्रिंशद्रात्र क्रतु वर्णनं, चतुर्व्विंशे त्रयस्त्रिंशद्रात्रमारभ्य संवत्सर पर्य्यन्तानि सत्राणि, पञ्चविंशाध्याये तु आदित्यपृष्ठायनादि सहस्र संवत्सरसत्रान्तोनिरूपित इति ।

माघ १७८५ शक ।



श्रीगणेशाय नमः ।

ताण्ड्यमहाब्राह्मणं।

त्रयोदशोऽध्यायः ।

—०()०—

अथ प्रथमः खण्डः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं ॥

इत्थं व्यूढद्वादशाहमध्यवर्त्तिनो दशरात्रस्यादितश्चतुर्णामङ्गां स्तोमकॢप्तिः प्रदर्शिता अथ पञ्चमस्याङ्गः स्तोमकॢप्तिं विधातुकामः तावद्वहिष्पवमानस्याद्यं स्तोत्रीयं ऋचं दर्शयति ।

गोवित् पवस्व वसुविद्धिरण्यविदिति पञ्चमस्याङ्गः प्रतिपद्यवति ॥ १ ॥

प्रतिपद्यते प्रारभ्यते अनयेति प्रतिपत् यद्यप्यत्र प्रतिपदिति एकैव ऋक् प्रतीयते तथापि ऋचस्सूक्तानामादिग्रहणेन विधिरनादेश इति परिभाषितत्वात् एतदादिकस्तृच एव ग्राह्यः अयं ऋचः पञ्चमस्याङ्गः प्राकरणिकस्य तिरोवस्तोमस्य यदाद्यं बहिष्पवमानस्तोत्रं तस्य प्रारम्भे कार्य इत्यर्थः ॥ १ ॥

अस्मिन्नहनि अस्य ऋचस्य सङ्गतिमाह।

गोविद्वा एतद्वसुविद्धिरण्यविद्यच्छक्वर्य्यः ॥२॥

स्तोमः अस्मिन्नहनि स्तोतुः पृष्ठस्तोत्रशक्वर्य्यः स्तोत्रीया अत एतत् पञ्चममहः शाक्वरं शक्वर्य्य इति यत् एतद्गोविद्देवगवान् लम्भकं तथा हिरण्यवित् द्विविधं हिरण्यं रजतं सुवर्णञ्च तस्य लम्भकं तथा वसुवित् अनेकेषामपि वसूनां मणिमुक्तादीनां धनानां लम्भकं तस्मादेतैः पदैः शक्वर्य्य एव पशुशब्दसामान्यादुच्यन्ते तास्व पञ्चमेऽहनि सङ्गता इति तद्वा गोवित् इत्यादिलिङ्गवतस्तृचस्य तेनाङ्गा सङ्गतिः ॥ २ ॥

ननु शक्वरीणाङ्गत्वं हिरण्यादिलम्भकत्वमिति तत्राह।

पशवः शक्वर्य्यः सर्व्वं पशुभिर्विन्दते ॥ ३ ॥

शक्वर्य्यः पशवः पशुरूपाः पशुत्वञ्चोपपादयिष्यामः पशुभिरुपेक्षितं सर्व्वं धनं विन्दते पुरुषो लभत इति प्रसिद्धं तस्मात् शक्वरीणां गवादिलम्भकत्वमुपपन्नं ॥ ३ ॥

अथास्मिन् ऋचे लिङ्गान्तरं प्रदर्श्यानुगुण्यमाह।

त्वꣳ सुवीरो असि सोम विश्वविदित्येष वाव सुवीरो यस्य पशवस्तदेव तदभिवदति ॥ ४ ॥

त्वं सुवीर इति अस्मिन् ऋचे सुवीरशब्दो दृश्यते यजमानस्य पशवः वसुभूता एष एव सुवीरः शोभनवीर्य्यवान् पञ्चमस्याङ्गो-

ऽनुष्ठातुश्च पशवो भवन्ति शक्करीणां पशवात्मकत्वात् यदेतदृचः-सम्बन्धि पशुमत्त्वं तदेव तत् सुवीरशब्दोपेतं मन्त्रवाक्यमभिवदति अभिलक्ष्य प्रतिपादयति ॥ ४ ॥

अथ लिङ्गान्तरं प्रदर्श्य सङ्गतिमाह ।

तास्ते क्षरन्तु मधुमद्घृतम्पय इति मधुमद्घृतं पयः पशवः क्षरन्ति तदेव तदभिवदति ॥ ५ ॥

तथा तस्मिन् ऋचे तास्ते क्षरन्त्विति पादः श्रूयते पशवश्च मधुमत् माधुर्यवत् घृतं क्षरणशीलं पयः क्षरन्ति स्रावयन्ति पशवश्च शक्वर्य इत्यृक्तं ताश्च पञ्चमेऽहनि सङ्गता इति तन्मन्त्र-वाक्यं तदेव तदभिवदति ॥ ५ ॥

अथानुरूपाख्यं द्वितीयं ऋचं विधत्ते ।

पवमानस्य विश्वविदित्यनुरूपा भवति ॥ ६ ॥

अयमनुरूपाख्यो वह्निष्पवमानस्य द्वितीयस्तृच इत्यर्थः ॥६॥

विश्वविदित्यस्य पदस्य तात्पर्यं दर्शयन्नङ्गा सङ्गतिमाह ।

विश्वमेव तद्वित्तमभिवदति विश्वꣳ हि पशुभि-र्विन्दते ॥ ७ ॥

तद्विश्वविदिति पदं विश्वं सर्वमेव वित्तं भोगसाधनमभि-वदति विश्वञ्च तद्वित्तं वेदनीयं लभनीयमिति व्युत्पत्त्या शक्वर्या-

त्मकैः पशुभिश्च विश्वं सर्वं वित्तं विन्दते लभते हि हेतौ हि यस्मादेवं तस्मादेव तत्कालेऽहनि अयं ऋचः सङ्गत इत्यर्थः ॥ ७ ॥

अथ पादान्तरमनूद्यानुगुण्यं दर्शयति।

प्रते सर्गा असृक्षतेति सृष्टानीव ह्येतर्ह्यहानि ॥ ८

असृक्षतेति भूतकालसम्बन्ध्ययं लेट् सृष्टैर्भूतकालः सम्बद्धः प्रतीयते एतर्हि एतस्मिन् काले अहानि च सृष्टानीव हि अनुष्ठानेनोत्पादितान्येव खलु अतः पूर्वेषां चतुर्णामृचां निष्पन्नत्वात् तस्मादस्मिन्नहनि भूतकालसम्बन्धिसृष्टिलिङ्गकऋचो योग्यइत्यर्थः ॥ ८ ॥

पूर्वेष्वहःस्विव अनुरूपद्वितीयऋचस्य संज्ञां ब्रुवन् तद्देदनफलस्य प्रतिपादयन् प्रथमद्वितीयौ ऋचौ संयुज्य विशिष्टफलहेतुतामाह।

पूर्वमु चैव तद्रूपमपरेण रूपेणानुवदति यत्पूर्वꣳ रूपमपरेण रूपेणानुवदति तदनुरूपस्यानुरूपत्वमनुरूप एनं पुत्रो जायते य एवं वेद स्तोत्रीयानुरूपौ ऋचौ भवतः प्राणापानानामवरुध्यै ॥ ९ ॥

एतत् पूर्वमेव व्याख्यातं ॥ ९ ॥

अथ तस्यापि बहिष्पवमानस्य स्तोत्रीयानुरूपऋद्वयादूर्ध्वं सप्तर्चद्वयं विधत्ते।

सप्तर्चौ भवतश्छन्दसां धृत्यै ॥ १० ॥

एकं सप्तर्चं प्रथमं सूक्तं प्रसोमासो अधत्विषुरिति द्वितीयं सप्तर्चं सूक्तं प्रकविरिति एतौ सप्तर्चौ कार्यौ तत् छन्दसां गायत्र्यादीनां सप्तसंख्यानां धृत्यै धारणाय भवति ॥ १०

अथ सप्तर्चद्वयादूर्ध्वं चतुर्ऋचं विधत्ते ।

चतुर्ऋचोभवति प्रतिष्ठायै ॥ ११ ॥

चतस्र ऋचो यस्मिन् असौ चतुर्ऋचः पदं वयं न इत्यादीनां चतसृणामृचां सद्यो भवतीत्यर्थः तच्च चतुर्ऋचस्य करणं प्रतिष्ठायै ॥ ११ ॥

अथ चतुर्ऋचादूर्ध्वं यास्ते धामानमधुश्चुत इति तृचसूक्तं विधत्ते।

तृच उत्तमो भवति येनैव प्राणान प्रयन्ति तमभ्युद्यन्ति त्रिणव एव स्तोमो भवति प्रतिष्ठायै पुष्ट्यै त्रिवृद्वा एष पुष्टः ॥ १२ ॥

त्रीण्यृचान्नवकानि यस्मिन् स त्रिणवः स एव स्तोमोऽस्य बर्हिष्यमानस्य स्तोत्रस्य भवति प्रतिष्ठायै प्रतिष्ठार्थं त्रयाणां नवकानां पादत्रयसाम्यात् पादत्रययुक्तस्य फलकादेर्लोके प्रतिष्ठानदर्शनात् त्रिणवस्य प्रतिष्ठाहेतुत्वं तथा पुष्ट्यै पुष्टिरभिवृद्धिः तत्प्राप्तिस्त्र्यायं त्रिणवस्तोमश्चत एतत् त्रिवृद्वै सनवकात्मक-

त्रिवृत्स्तोम एव खलु पुष्टः त्रिरभ्यासेनाभिवृद्धः एष त्रिणवस्तोमाख्यो भवति अतः त्रिणवस्य पुष्ट्यात्मकत्वात् पुष्टिहेतुत्वमिति ॥ १२ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य
प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

अथ प्रथमस्याज्यस्तोत्रस्य स्तोत्रीयं ऋचं दर्शयति ।

तव श्रियो वर्ष्यस्येव विद्युत इत्याग्नेयमाज्यं भवति ॥ १ ॥

तव श्रिय इति ऋचः आग्नेयमग्निदैवत्यमाज्यं आज्यस्तोत्रं भवति ॥ १ ॥

तस्य ऋचस्य पञ्चमेनाक्षरा सङ्गतिमाह ।

श्रीर्वै पशवः श्रीः शक्वर्यस्तदेव तदभिवदति ॥२॥

श्रीर्वै सम्पद्रूपा एव पशवः लोके हि पशुमान् श्रीमानिति व्यपदिश्यते अतः शक्वर्योऽपि श्रीः श्रीरूपाः ताश्च पञ्चमेनाक्षरा सम्पद्वा अतः श्रिय इति श्रीशब्देन युक्तं मन्त्रवाक्यस्य पञ्चमेनाक्षरा सम्बद्धं शक्वर्य्यइति तत् यदेवाभिवदति ॥ २ ॥

अथ लिङ्गान्तरमनूद्यानुगुण्यमाह ।

अग्नेश्चिकित्त उषसामिवेतय ईतीतानीव ह्येत-र्ह्यहानीत्याते यतन्ते रथ्यो यथा पृथगित्येव ह्येतर्ह्य-हानि यतन्ते ॥ ३ ॥

आतेयतन्त इति अस्मिन् पदे दृश्यते वलीप्रयत्न इति धातुः एतर्ह्येतस्मिन् काले अहानि प्रथमद्वितीयादीन्यनुष्ठितान्यहानि एव आ इव आयतनं इति फलमभिलक्ष्य प्रयतन्त इव प्रयतमानानीव भवन्ति यस्मादुपसृष्टयतिधातुयुक्तसृचोऽस्मिन्नहनि विनियोगानुगुण इत्यर्थः ॥ ३ ॥

अथ द्वितीयस्याज्यस्य स्तोत्रीयं ऋचं दर्शयति ।

पुरूरुणाचिद्ध्यस्यवो ननं वां वरुणेति मैत्रावरुणं यद्वै यज्ञस्य दुरिष्टं तद्वरुणो गृह्णाति तदेव तद्वयजति ॥ ४ ॥

पुरूरुणेति ऋचः मैत्रावरुणं मित्रावरुणदेवताकं द्वितीयमाज्यस्तोत्रं भवति एवं वरुणस्य देवस्य प्रकाशनद्वारा तदेव यत् यज्ञसम्बन्धि दुरिष्टन्तद्वयजति निरस्यति ॥ ४ ॥

अथ तृतीयमाज्यस्तोत्रं दर्शयति ।

उत्तिष्ठन्नोजसा सहेत्यैन्द्रं ॥ ५ ॥

उत्तिष्ठन्निति ऋचस्यैन्द्रं इन्द्रदेवत्यं तृतीयमाज्यस्तोत्रं भवति ॥ ५ ॥

अथैतस्य उत्तिष्ठन्नित्यादिपदत्रयस्य तात्पर्यं दर्शयन् सङ्गतिमाह ।

पञ्च वा ऋतव उत्यानस्य रूपमोजसा सहेत्योजसैव वीर्य्येण सहोत्तिष्ठन्ति ॥ ६ ॥

अस्मिन् पादे उत्तिष्ठन्विति पदेन उत्थानं उद्गत्यावस्थानं प्रतीयते तस्य चोत्थानस्य च सन्ध्याद्याः पञ्चर्त्तवः रूपं ऋतुविशेषे हि सर्व्वमोषधिवनस्पत्यादिकं उद्गच्छत्युत्तिष्ठति अत उत्थानं षष्ठन्नाद्यृतुपञ्चकं तस्मादस्याङ्गःपञ्चमत्वेन पञ्चसंख्यायोगात् तत्प्रतिपादकेनोत्तिष्ठन्विति पदेन युक्तस्तृचोऽस्मिन्नहनि सङ्गतः अपि च ओजसा सहेत्यपि स च दृश्यते ततश्च ओजसैव बलात्मनैव वीर्य्येण सहोत्तिष्ठन्ति उत्थिताः सर्वेभ्योऽधिकाभवन्ति ॥ ६ ॥

अथ चतुर्थमाज्यस्तोत्रं दर्शयति ।

इन्द्राग्नो युवामिम इति राथन्तरमैन्द्राग्नं ॥ ७ ॥

इन्द्राग्नोयुवामिम इति तृचोराथन्तरं रथन्तरसाम्नः सम्बन्धि ऐन्द्राग्नं इन्द्राग्निदेवताकं चतुर्थमाज्यस्तोत्रं भवति कथमस्य रथन्तरसम्बन्ध उच्यते इन्द्राग्नी आगतं सुतमिति राथन्तरेऽहनि चतुर्थमाज्यं तत्र चेन्द्राग्नी इति सम्बोधनेनाभिमुखीकृत्य आगमनं सोमपानञ्च तयोः प्रार्थ्यते अस्मिन् तृचेऽपि तादृश एवार्थः इति अर्थसामान्यात् अस्यापि राथन्तरत्वं ॥ ७ ॥

नन्वेतत् शाक्करपृष्ठं पञ्चमम: न रथन्तरपृष्ठं कुतोऽस्मिन्नहनि राथन्तरस्येन्द्राग्नस्य सङ्गतिरिति तत्राह।

रथन्तरमेतत्परोक्षं यच्छाक्वर्यो राथन्तरमेव तद्रूपन्निर्द्योतयति स्तोमः॥ ८॥

यच्छाक्वर्यः शाक्करं साम एतत्परोक्षं परोक्षेण रूपान्तरेण वर्त्तमानं रथन्तरं रथन्तरादुत्पन्नत्वात् तदुत्पत्तिश्चैतरेयके समाम्नाता दृहच्च वा दूरमग्रे रथन्तरमिति प्रक्रम्य वैराजवैरूपयोः सृष्टिमुक्त्वा ते द्वे भूत्वा दृहच्च वैराजञ्च रथन्तरञ्च वैरूपञ्चान्यमन्येतां तदूरन्तरं गर्भमधत्त तच्छाक्करमसृजतेति तस्माद्रथन्तरमेव रथन्तरसम्बन्धेव तद्रूपं निर्द्योतयति प्रकाशयति स्तोमश्च तेषु चतुर्ष्वाज्येषु पूर्व्वोक्त एव त्रिणवः कार्य्यः वहिष्पवमानादीनां पञ्चानां प्रातःसवनिकानामेषां स्तोत्राणां इत्थं स्तुस्तोत्रीया एव विहिता प्राकृतमेव गायत्रसामसु गातव्यं अन्यस्यानुपदेशादिति बोद्धव्यम्॥ ८॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य
द्वितीयः खण्डः।

अथ तृतीयः खण्डः।

अथ माध्यन्दिनस्य पवमानस्य त्रयः स्तोत्रीयास्तृचाः तत्र प्रथमं दर्शयति।

अर्षासोमद्युमत्तम इति विष्णुमत्यो गायत्र्यो भवन्ति॥ १॥

सोमा अर्षन्तु विष्णव इति दर्शनाच्छन्दोन्यायेन अर्षा सोमेत्याद्यास्तिस्रोऽपि विष्णुमत्यं गायत्रश्चोभयं स्तोत्रीयो गायत्रीछन्दस्का एता माध्यन्दिनस्य पवमानस्याद्या भवन्ति॥ १॥

विष्णुमत्यं गायत्रश्चोभयं स्तौति।

ब्रह्म वै गायत्री यज्ञो विष्णुर्ब्रह्मण्येव तद्यज्ञं प्रतिष्ठापयति॥ २॥

ब्रह्म ब्राह्मणजातिरेव गायत्री प्रजापतेर्मुखात्स्तोत्पत्तेः यज्ञश्च विष्णुर्व्यापनशीलत्वाद्विष्णुशब्दाभिधेयस्तत्तथा सति गायत्रीस्तोत्रीयाः कुर्वन् ब्रह्मणि ब्राह्मणजातावेव यज्ञं प्रतिष्ठापयति॥ २॥

अथ ऋचान्तरं तस्य पवमानस्य दर्शयति।

सोम उष्माणस्तोतृभिरिति सिमानां रूपꣳ स्वेनैवैतास्तद्रूपेण समर्द्धयति॥ ३॥

सोम उष्माण इति ऋचः स्तोत्रीयः माध्यन्दिनपवमानस्य तस्मिंश्च आनूपे गोमान् गोभिरक्षा इति गावः प्रतीयन्ते तच्च सिमानां शक्वरीणामस्मिन्नहनि पशुभूतानां रूपं तासां पशवः

त्मकत्वात् पशवः शक्वर्य इति ह्याम्नातं तत्तस्मात्तेन स्वकीयेनैव रूपेण एताः सिमाः शक्वरीः समर्द्धयति समृद्धाः करोति ॥ ३ ॥

अथ ऋचान्तरं विधत्ते।

यत्सोमचित्वमुक्थ्यामिति गायत्राः सत्यस्त्रिष्टुभो-रूपेण तस्मात् त्रिष्टुभां लोके क्रियन्ते ॥ ४ ॥

यत्सोमचित्वमिति माध्यन्दिनपवमानस्यान्त्यस्तृचो भवति तत्रत्या ऋचो गायत्यक्षरसंख्यया गायत्रीछन्दस्काः सत्यो भवन्त्यस्त्रैष्टुभेनैव रूपेण वृषणशब्दयोगात् त्रिष्टुभो भवन्ति यस्मादेवं तस्मात्त्रैष्टुभां लोके स्थाने क्रियन्ते स्तोत्रीयात्वेन विधीयन्ते प्रकृतौ हि माध्यन्दिनपवमानस्यान्त्यस्य त्रिष्टुप्स्थानत्वं ॥ ४ ॥

अथ अर्षा सोम द्युमत्तम इति विहिते प्रथमे ऋचे पूर्ववद्गायत्रं साम विधाय तद्विनियोक्तव्यताप्रतिपादकं ब्राह्मणमाति-दिशति।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ ५ ॥

गतमेतत् ॥ ५ ॥

अथास्मिन् ऋचे सामान्तरं विधत्ते।

यज्ञायज्ञीयं भवति पशवो वै यज्ञायज्ञीयं पशूनामवरुध्यै ॥ ६ ॥

यज्ञायज्ञीयं साम गायत्र्यानन्तरं अस्मिन्नेव ऋचे गातव्यं तच्च

यज्ञवं पशवो वै पशव एतत्साधनत्वात् तस्माद्यज्ञमानं पशूनामवरुध्या अवरोधनाय प्राप्तौ भवति ॥ ६ ॥

अथास्य साम्नो गाने सान्तत्यं विधत्ते।

सन्ततं गायति यज्ञस्य सन्तत्यै ॥ ७ ॥

सन्ततमविच्छिन्नं गायति यज्ञस्य सन्तानार्थं सामान्तरेषु हि प्रत्यृचं प्रस्तावादिभक्तिपञ्चकस्य सम्पूर्णस्य साम्नो गानात् विच्छेदो भवति अत तु प्रथमायामेव प्रस्तावभक्तिं कृत्वा उत्तरयोः प्रस्तावभक्तिमकृत्वा गानात् साम्नः सान्तत्यं भवति उत्तरयोः प्रस्तावभक्तिलोपार्थमत्र योनिभूते साम्नि तत्र यज्ञस्य गानं दूतरथा सामान्तरवदेकस्यामेकगानं स्यात् एतच्च सूत्रकृता सन्तनिचोद्यमानमेकैकस्यां सर्वमित्यादिना प्रपञ्चितं सन्ततं गायतीति च भक्तिलोपदर्शनादिति च वदता सूत्रकृता यज्ञसन्तनिनोरुत्तरयोः प्रस्तावभक्तिलोप एवाभिप्रेत इति अयमेवार्थो गम्यते ॥ ७ ॥

अथास्य साम्नः सम्बन्धिनीडाविभक्तिमनूद्याङ्गा सङ्गतिमाह।

अध्यर्धेडं तथाह्येतस्याङ्गोरूपं ॥ ८ ॥

इट् इडेत्येवं रूपा अध्यर्धेडा यस्मिन् तदध्यर्धेडं एतत् यज्ञवं तथा हि तादृशमेव खल्वेतस्य पञ्चमस्याङ्गो रूपं अध्यर्धेडं पञ्चमस्येति ङो इडाविभक्तिरनुक्रान्ता ॥ ८ ॥

अथास्मिन्नेव तृचे पुनरावृत्ते सामान्तरं विधत्ते।

शाकलं भवति ॥ ९ ॥

शाकलाख्यं ऋषी सोमेत्यस्मिन्नेवावृत्ते तृचे गेयं ॥ ९ ॥

तदेतत्प्रतिष्ठाहेतुरिति स्तौति।

एतेन वै शकलः पञ्चमेऽहनि प्रत्यतिष्ठत्प्रतिति-ष्ठति शाकलेन तुष्टुवानः ॥ १० ॥

एतेन खलु एतेन साम्ना पुरा शकलऋषिः दाशरात्रिके पञ्चमेऽहनि प्रत्यतिष्ठत् अनेन साम्ना स्तुवा पुत्रपश्वादिभिः प्रतिष्ठितोऽभवत् तस्मादिदानीन्तनोऽपि शाकलेन स्तुवन् प्रतिष्ठां लभते ॥ १० ॥

अथास्मिंस्तृचे पुनरावृत्ते पुनः सामान्तरं विधत्ते।

वार्शं भवति ॥ ११ ॥

वृशेन दृष्टं साम वार्शं ऋषी सोमेत्यस्मिन्नेव तृचे स्तोतव्यं ॥ ११

अथोक्तऋषिसम्बन्धं तदाख्यायिकया प्रदर्शयन् सर्व्वकाम-प्राप्तिसाधनतयैतत् स्तौति।

वृशो वै जानन्त्यारुणस्य वैधात्वस्यैक्ष्वाकस्य पुरो-हित आसीत्स ऐक्ष्वाकोऽधावयत् ब्राह्मणकुमारꣳ

रथेन व्यच्छिनत्त्स पुरोहितमब्रवीत्तव मा पुरोधा-यामिदमीदृगुपागादिति तमेतेन साम्ना समैरयत्त-द्व स तर्ह्यकामयत काममनि साम वार्ष्णं काममवै-तेनावरुन्धे ॥ १२ ॥

विजानस्य पुत्रो दृशो नाम कश्चिदृषिः स ऐक्ष्वाकस्य इक्ष्वा-कुकुलजस्य त्रैधात्वस्य त्रिधातुः पुत्रस्य व्यरुणस्य एतन्नाम्नो राज्ञः पुरोहितः पुरोधा आसीत् स च ऐक्ष्वाको राजा रथवा-हनाश्वानधावयत् शीघ्रं गमयत् पथो मध्ये व्यवस्थितं कञ्चि-द्ब्राह्मणकुमारं ब्राह्मणपुत्रं रथेन रथावयवेन चक्रेण व्यच्छि-नत् विच्छिन्नावयवमकरोत् स कुमारः पुरोहितं दृशमब्रवीत् तव पुरोधायां पौरोहित्ये वर्त्तमाने मां इदानीं ईदृक् एवं रूपं हिंसनं उपागात् प्राप्नोदिति एवमुक्तवन्तं एतेन वार्ष्णेन साम्ना समैरयत् सङ्गतावयवमकरोत् तद्व तत् खलु तर्हि तस्मिन् काले स ऋषिरकामयत यस्मादेवं तस्माद्वार्ष्णं साम काम-मनि कामप्रदं अतोऽनेन स्तुवन् एतेन साम्ना अभिलषितं सर्व-मेव काममेति कामयितव्यं फलं अवरुन्धे लभते ॥ १२ ॥

अस्मिन् साम्नि अध्यर्द्धोपास्याने इडानादेश इति सूत्रकार-रेण अध्यर्द्धेडा आदिश्यत इत्युक्तं तस्मात् सिद्धवत् अस्मिन्नहनि अनुरूपं दर्शयति ।

अध्यर्द्धेडं तथाह्येतस्माद्रूपं ॥ १३ ॥

उपास्थाने आदिष्ट इट् इडेति एवं ब्रूयात् अध्यर्धा इडा यस्य तत्तथोक्तं तथा खल्वेतस्य पञ्चमस्याङ्गो रूपं प्रागुक्तं ॥१३॥

अथान्यस्मिन् ऋचे सामान्तरं विधत्ते।

मानवं भवति ॥ १४ ॥

मनुना दृष्टं साम मानवन्तत् सोम उष्वाणः सोतृभिरिति विवक्षिते ऋचे गातव्यं ॥ १४ ॥

अथैतत् स्तौति।

एतेन वै मनुः प्रजातिं भूमानमगच्छत्प्रजायते बह्वृर्भवति मानवेन तुष्टुवानः ॥ १५ ॥

एतेन खलु साम्ना पुरा मनुः प्रजातिं प्रजोत्पत्तिभूमानं अतिप्रयेन बह्वृत्वञ्चागच्छत् तस्मादद्यतनोऽपि मानवेनानेन साम्ना स्तुवन् प्रजायते पुत्रपौत्रेणोत्पद्यते ततो बह्वृपुत्रादिभिरनेकविधश्च भवति ॥ १५ ॥

अथास्मिन्नेव ऋचे पुनरादृत्ते सामान्तरं विधत्ते।

आनूपं भवति ॥ १६ ॥

आनूपेन दृष्टं सामानूपं तत्सोम उष्वाण इति ऋचे गेयं भवति ॥ १६ ॥

अथैतत्प्रशंसति स्तौति।

एतेन वै वध्र्यश्व आनूपः पशूनां भूमानमाप्नुत पशूनां भूमानमश्नुत आनूपेन तुष्टुवानः ॥ १७ ॥

आनूपो अनूपस्य पुत्रः वध्र्यश्वाख्य ऋषिरेतेन साम्ना पुरा पशूनां भूमानं बहुलत्वं आप्नुत प्राप्नोत्। अतोऽद्यतनोऽप्यानूपेन स्तुवन् पशूनां बहुलत्वं प्राप्नोति ॥ १७ ॥

अथाश्विंस्तुचे सामान्तरं विधत्ते।

वाम्नं भवति ॥ १८ ॥

वम्नेण दृष्टं साम वाम्नं तत् सोम उष्माण इत्याश्विंस्तुचे आहृत्ते गेयं ॥ १८ ॥

अथ संज्ञयैवैतत्साम प्रशस्तं तेन चास्त्र एव प्रशंसा कृता भवतीत्याह।

सामार्षेयेण प्रशस्तं यं वै गां यमश्वं यं पुरुषं प्रशंसन्ति वाम इति तं प्रशंस्यन्यहरेवैतेन प्रशंसन्ति ॥ १९ ॥

एतत्साम आर्षेयेण ऋषिसम्बन्धेन प्रशस्तं श्रेष्ठं लोके यं गां यमश्वं यं पुरुषं प्रशंसन्ति स्तुवन्ति लौकिकाः तं वाम इति स्त्रैष्ण्यवाचकेन वामशब्देन प्रशंसन्ति तस्मादिदं साम रेफविकृत-वामशब्दाभिधेयत्वात् प्रशस्तं अनेन साम्ना अहरेव दाशरात्रिकं पञ्चममिदमहरेव प्रशंसन्ति ॥ १९ ॥

आम्नाने ह्यर्ङ्गोपास्याने पूर्ववदादिष्टामध्यर्ङ्डां सिद्धवदनूद्य ब्रह्म सारूप्यं दर्शयति।

अध्यर्ङ्डं तथा ह्येतस्याह्नो रूपं ॥ २० ॥

गतमेतत् ॥ २० ॥

अथास्मिन्नेव हृचे गेयं सामान्तरं दर्शयति।

त्रिणिधनमाग्नेयं भवति प्रतिष्ठायै ॥ २१ ॥

त्रीणि निधनानि यस्य तत्त्रिणिधनमाग्नेयं अग्निसम्बन्धि एतत् संज्ञं साम सोम उष्णाग इति हृचे गेयं तच्च निधनतयवत्त्वेन त्रित्वसंख्यायोगात् प्रतिष्ठायै प्रतिष्ठानाय साम्नेनावस्थानाय भवति लोकेऽपि त्रिपदाः फलकादयः प्रतिष्ठिता दृश्यन्ते तानि त्रीणि निधनानि यस्य साम्नो योन्यां प्रसोम देव वीतय इत्यस्यां प्रदर्शयति आ ३ १ उवा २ ३ णा २ ३ ४ सा नह्वा ३ १ उवा २ ३ ऋ २ ३ ४ ताम् ॥ २१ ॥

अथोक्तमग्निसम्बन्धं प्रदर्शयन् तेजोब्रह्मवर्चसप्रापकत्वेनैतत्साम प्रशंसति।

अग्निः सृष्टो नोददीप्यत तं प्रजापतिरेतेन साम्नोपाधमत् स उददीप्यत दीप्तिश्च वा एतत्साम ब्रह्मवर्चसञ्च दीप्तिञ्चैवैतेन ब्रह्मवर्चसञ्चावरुन्धे ॥ २२ ॥

15821

अग्निः प्रजापतेर्मुखात् सृष्ट उत्यन्नः नोददीप्यत ऊर्ङ् नाज्वलत् तमग्निं प्रजापतिः स्रष्टा एतेन साम्ना साधनेन उपाधमत् वायुना प्राज्वलत् धमा शब्दाग्निसंयोगयोरिति धातुः सोऽग्निरुददीप्यत ऊर्ङ्दीप्तोऽभूत् तस्मादेतत्साम दीप्तिसाधनत्वाद्दीप्त्यात्मकं तथा ब्रह्मवर्चसञ्च अतएतेन दीप्तिब्रह्मवर्चसोभयरूपेण साम्ना यजमानः दीप्तिं शरीरतेजञ्चैव ब्रह्मवर्चसं श्रुताध्ययनादिजन्यब्राह्मतेजश्चावरुन्धे प्राप्नोति ॥ २२ ॥

अथ यत् सोमचित्तमिति विहिते ऋचे गातव्यं साम दर्शयति।

शैशवं भवति ॥ २३ ॥

शिशुना दृष्टं साम शैशवं तद्यत् सोम चित्तमिति ऋचे गातव्यं ॥ २३ ॥

अथैतत्साम यज्ञहेतुरिति विवक्षुस्तदर्थमाख्यायिकामाह।

शिशुर्वा आङ्गिरसो मन्त्रकृतां मन्त्रकृदासीत् स पितॄन् पुत्रका इत्यामन्त्रयत तं पितरोऽब्रुवन्नधर्म्मङ्करोषि यो नः पितॄन् सतः पुत्रका इत्यामन्त्रयस इति सोऽब्रवीदहं वाव पितास्मि यो मन्त्रकृदस्मीति ते देवेष्वप्रुच्छन्त ते देवा अब्रुवन्नेष वाव पिता यो

मन्त्रकृदिति तदै स उदजयदुज्जयति शैशवेन तुष्टुवानः ॥ २४ ॥

शिशुर्नामाङ्गिरसः अङ्गिरोगोत्र ऋषिः मन्त्रकृतां मन्त्रस्य कर्तॄणां तथा महात्मनान्तर्हितानाम्मन्त्राणां द्रष्टॄणाम्मध्ये मन्त्रकृत् मन्त्रस्य कर्त्ता अतिशयेन मन्त्रस्य द्रष्टासीत् स च विद्यातिशयेन हृष्टः सन् पितॄन् स्वकीयान् इत्यामन्त्रयत पुत्रा एव पुत्रका इत आगच्छतेति आमन्त्रणमात्मानं कृतवान् एवमामन्त्रणानन्तरं शिशुं पितरोऽब्रवन् कथमिति हे शिशो त्वमधर्म्ममत्यर्थं करोषि यत् त्वं पितॄन् तव पितृभूतान् सतो भवतः नोऽस्मान् पुत्रका इति वैपरीत्येनामन्त्रयस इति एवं तैरुक्तः सन् स पुनरब्रवीत् अहं वाव अहमेव युष्माकं पिताऽस्मि भवामि योऽहं मन्त्रकृन्मन्त्रकर्त्ता द्रष्टास्मीति अतः सोऽहमेव पितास्मीति एवं परस्परं विवदमानाः ते देवेष्वपृच्छन्त विवादनिर्णेतृषु देवेषु सत्सु प्रश्नं कृतवन्तः अस्माकम्मध्ये कोवा पिता के पुत्रा इत्येवं पृच्छामानास्ते देवाः युष्माकम्मध्ये यो मन्त्रकृत् एष एव पिता अन्ये पुत्रा इति तत्ततोऽनन्तरं स आङ्गिरसः शिशुरुदजयत् उत्कर्षेण जितवान् तस्मादद्यतनोऽपि शैशवेन साम्ना स्तुवन् उज्जयति उत्कृष्टञ्जयति ॥ २४ ॥

अथाधारभूतानामृचां छन्दःसंख्याद्वारेण प्रशंसति।

गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥ २५ ॥

गायत्रीषु त्रिपदासु यत् सोमचित्रमित्याद्यासु शैशवेन स्तुवन्ति तत्प्रतिष्ठायै प्रतिष्ठानाय ब्रह्मवर्चसाय च भवति गायत्र्यास्त्रिपात्त्वेन प्रतिष्ठितत्वात् तेजोरूपतया ब्रह्मवर्चसहेतुत्वाच्च अस्य पवमानस्तोत्रस्य आद्यस्तृचो गायत्रत्वात् प्राणसंस्तुतः त्रिवृद्वै प्राणा इति हि ब्राह्मणं तथा येनैव प्राणेन प्रयन्ति पवमानस्तोत्रं प्रारभन्ते तमेव प्राणमभिलक्ष्य उद्यन्ति तत् स्तोत्रं परिसमापयन्ति ॥ २५ ॥

अथैतावाद्यन्तौ तृचौ गायत्र्यौ कथं माध्यन्दिनसवने सङ्गच्छेते त्रैष्टुभं माध्यन्दिनं सवनमित्याशङ्क्यायमाह।

तृषखत्योगायत्र्यो भवन्ति तदु चैष्टुभाद्रूपान्नयन्ति स्तोमः ॥ २६ ॥

एताऋचः द्वैगता गायत्र्यो तृषखत्यो विष्णुशब्दयुक्ता भवन्ति विष्णुश्चेन्द्रस्यानुजः त्रिष्टुभा सह जातत्वादिन्द्रस्त्रैष्टुभः अतस्त्रिष्टुपसम्बन्धिनो रूपान्नयन्ति नापगच्छन्ति त्रैष्टुभेन रूपेण योगात् त्रिष्टुभ एवेमा भवन्तीत्यर्थः एवन्नवसु सामसूक्तप्रकारेण प्रत्येकं तृचे क्रियमाणेषु यस्त्रिणवः स्तोमो निष्पद्यते स एव माध्यन्दिनपवमानस्य स्तोमः कार्यः ॥ २६ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य
तृतीयः खण्डः।

अथ चतुर्थः खण्डः ।

अथ होतुः पृष्ठस्तोत्रनिर्वर्त्तकं शाक्वरसाम विधित्सुस्तस्य संज्ञाचतुष्टयं प्रदर्श्य निर्व्यक्ति ।

इन्द्रः प्रजापतिमुपाधावद्वृत्रꣳहनानीति तस्मा-एतच्छन्दोभ्य इन्द्रियं वीर्य्यं निर्माय प्रायच्छदेतेन शक्नुहीति तच्छक्वरीणाꣳ शक्वरीत्वꣳ सीमानमभि-नत्तत्सिमाम ह्वामकरोत्तन्महा मह्वान् दोष आसीत् तन्महानाम्नाः ॥ १॥

वृत्रमावरकमसुरं हनानि हन्यामीति वदन् इन्द्रः पुरा प्रजापतिमुपाधावत् उपागमत् तस्मा इन्द्राय प्रजापतिः एत-च्छक्यर्थात्मकमिन्द्रियं बलं वीर्य्यं वृत्रहननक्षमं सामर्थ्यं छन्दोभ्यः गायत्र्यादिभ्यः सकाशात् निर्माय सारत्वेनादाय प्रायच्छत् दत्त-वान् एतेन वीर्य्येण वृत्रं हन्तुं शक्नुहि शक्तो भवेति वदन् यस्मा-च्छक्नुहीति प्रजापतिरवोचत् तस्माच्छक्वरीणां शक्वरीत्वं शक्त्यु-त्पादकत्वात् शक्वर्य्य इति नाम सम्पन्नं आधाराधेययोरभेद-विवक्षया शक्वरीशब्देन बहुवचनान्तेन शक्वरीषु गातव्यं साम-वोच्यते आधारबहुत्वाद्बहुवचनं एवं प्रजापतिना दत्ते वीर्य्ये सति तेन सीमानं वृत्रासुरस्य शिरसो मध्यदेशमभिनत् इन्द्रो विदारितवान् तत्तस्मात्सीम्नोभेदकत्वात् सिमा इति शक्वर्य्य

उच्यन्ते ततः सौम्नो भेदनानन्तरं मङ्क्त्यनुकरणशब्दोऽयं एवं रूपं शब्दमकरोत् तत्तस्मादेतासां मङ्क्ता इति नाम सम्पन्नं ततो महान् घोषः शब्दआसीत् तन्महानाम्न्य इति संज्ञा आसां जाता एतच्च संज्ञाचतुष्टयं आर्षेयेण प्रदर्शितं ऐन्द्रो महानाम्नयः प्रजापतेर्वा विष्णोर्वा विश्वामित्रस्य वासिमा वा मङ्क्ता वा शक्वर्योवेति एवमेतं शाक्करं साम होतुः पृष्ठतया कार्यमिति विधिरुन्नेतव्यः ॥ १ ॥

अथैतस्याधारभूताः शक्करीः पादसंख्यया स्तौति।

दिशः पञ्चपदा दाधार्त्तून् षट्पदा छन्दाꣳसि सप्तपदा पुरुषं द्विपदा ॥ २ ॥

इदमवगन्तव्यं महानाम्नीनामृचां तिसृणां शक्करीणामृचां प्रत्येकं त्रयोदशपदा अभिधीयन्ते अतः प्रत्यृचमादितो द्वौ द्वौ पादौ मिलित्वा एकैकाद्विपदा शक्वर्या बहिर्भूता ततस्त्रयः पादाः मिलिता शचीनामित्याद्याः सप्ताक्षराः शाक्कराः ततः स्वर्न्नाशुरिति व्यूहेन पञ्चाक्षरः पादः धातुसंज्ञकः ततः प्रचेतन प्रचेतयेति पादो वत्ससंज्ञकः एतावपि पादौ शक्वर्या बहिर्भूतौ स्तोमवत् प्रयोज्यौ अथेन्द्रद्युम्नायन इति ऊर्ध्वसंज्ञकः पादः शाक्करः तत एवाङ्गिशक्र इति पञ्चाक्षरः पादः पुरुषसंज्ञको ऽशाक्करः रायेवाजाय वज्रिन्न इत्याद्यास्त्रयः पादाः शक्कराः अथायाहि पिब मत्स्वेत्यध्यास्यनामकः पादः एवं प्रथमायाम-

धीतास्त्रयोदशपादाः तत्र शक्वर्य्यो अवयवभूताः सप्त अन्ये त्र-
याकराः स्तोमवच्छक्करीशेषतया प्रयोज्या इति प्रथमा शक्करी
सप्तपदा जाता एवमुत्तरयोरपि शाक्कराशाक्करविभागो ज्ञातव्यः
तदुक्तं सूत्रकारेण महानाम्नीः प्रकृत्य तासां प्रथमद्वितीये पादे
द्विपदास्त्रीणि शक्कराणि धातुर्वत्स ऊधस्यच्छाक्करं पुरुष-
स्त्रीणि शाक्कराण्यङ्गास्येति पदान्युत्तमामनुद्ध्यासेति तिसृणां
शक्करीणामादित एकैका द्विपदा ततस्त्रयः शाक्कराः पादा-
स्ततो धातुर्वत्स औधस्येत्येतत् संज्ञकास्त्रयःपादास्त्रय औधः
संज्ञः पादः शाक्करस्ततः पुरुषसंज्ञक एकः पादोऽशाक्करस्तत-
स्त्रयः पादाः शाक्कराः ततोऽध्यास्यास्त्येकपदा उत्तमायान्तु शूरो
यो गोषु गच्छति सखासु शेवो अध्वयुरिति द्वावध्यासाविति
सूत्रार्थः अत्र निदानकारः अथैतासु महानाम्नीषु विप्रति-
पादयन्नीदं शाक्करमिदमशाक्करमित्यशाक्करी प्रथमा द्विपदा
शक्कराणि त्रीणि पदानि धातुरशाक्करः पञ्चाक्षरः स एष
कृतः कृतो भवति वत्सोऽशाक्करोऽष्टाक्षरः ऊधः शाक्करम-
ष्टाक्षरं पुरुषोऽशाक्करः पञ्चाक्षरः शाक्कराण्येव त्रीणि पराणि
पदानि अध्यास अशाक्करोऽष्टाक्षर इति नन्वेवमेतास्विस्रोऽपि
शक्वर्य्यः सप्तपदा जाताः कथं पञ्चपदा षट्पदेति व्यवहारः
उच्यते प्रातिलोम्येनेयं स्तुतिः द्वितीयासम्बन्धो सनः स्पर्धद-
तिद्विष इत्यध्यासात् पूर्व्वमाम्नातोऽन्यः पादः उत्तमायां शक्वर्य्यां
द्विपदाया ऊर्द्धं द्विरभ्यस्यते अतस्तत्पादद्वयं पुनःपुनराम्नातं
भवेदिति कृत्वा अवशिष्टशाक्करपादपञ्चकाभिप्रायेण सा तृतीया

शक्करी पञ्चपदा भवति तथा प्रथमायाः शक्वर्याः अध्यासात् पूर्वभावी मण्डिष्ठ वज्जिन् ऋज्रस इति योऽयमन्त्यः पादः स एव द्वितीयाया शक्वर्या द्विपदाया ऊर्द्धं पुनरास्नायत इति तदतिरिक्तपदषट्काभिप्रायेण द्वितीया शक्करी षट्पदा भवति तदुक्तं निदाने प्रतिलोमं वदन्ति पदतश्चिद्रोहो भविष्यतीति सप्तपदा प्रथमा शक्करी षट् पदा द्वितीया यद्धि प्रथमायामुत्तमं पदं तत् द्वितीयायाः प्रथमं प्रगायसाधुष्टमिति पञ्चपदोत्तमा यत् द्वितीयाया उत्तमं तृतीयायाः प्रथमञ्च द्वितीयश्चेति अक्षरार्थस्तु येयं पञ्चपदा तृतीया शक्करी सा प्राच्याद्याः मध्यान्ताः पञ्चदिशोदाधार धारयति या षट्पदा शक्करी द्वितीया सा वसन्तादीन् षड्तून् धारयति सप्तपदा प्रथमा शक्करी गायत्र्यादीनि सप्त छन्दांसि धारयति तिसृष्वपि शक्करीषु या प्रथमा द्विपदा सा पादद्वययुक्तं पुरुषं धारयतीति ॥ २ ॥

अथैताः शक्करीः प्रकारान्तरेण स्तौति।

द्योपशाः षण्णुता भवन्ति तस्माद् द्योपशाः पशवः ॥ ३ ॥

अस्य स्तोत्रस्य त्रिणवस्तोमकत्वात् सप्तविंशतिः स्तोत्रीयाः एवास्त्रेवेत्यादीनि पुरीषपदानि पञ्च एवं द्वात्रिंशत्सम्पद्यन्ते तदिदमुच्यते द्योपशाः संस्तुता भवन्तीति, संस्तुताः सहस्तुताः विराट्सम्पत्तेरूर्द्धं द्वे उपशे अतिरिक्ते यासां ता द्योपशाः

भवन्ति यस्माद्वोरूपाणां शक्करीणामेवं रूपता तस्मात् पशवो गवाद्या द्व्योपशा द्विशृङ्गा आसन् ॥ ३ ॥

अथ प्रकारान्तरेण स्तौति।

दूडे अभितोऽथकारं तस्माच्छृङ्गे तीक्ष्णीयसी स्तूपात् ॥ ४ ॥

प्रथमायां स्तोत्रीयायामिन्द्राग्नी आयन इष इति पादं तिरावर्त्य प्रथमोत्तमयोरुपरि इडा शब्दोऽभिहितो गीयते मध्यमेऽथकारः एवमुत्तरयोरपि इन्द्रोविदेतमुस्रहि पूर्वीः शविष्ठ शस्यत इति पदयोस्तदेतत् स्तूयते अथकारमथा इति शब्दमभितः पार्श्वयोरिडे इडाशब्दौ भवतः तत्र चाथशब्दोऽस्मान्नः इडाशब्दो दीर्घान्तो यस्मादेवं तस्मात् स्तूपात् स्तूपः शृङ्गयोर्मध्यः संहितो देशः तस्मात् सकाशात् शृङ्गे तीक्ष्णीयसी अतिशयेन तीक्ष्णा द्राघीयसी सूक्ष्माग्रे भवतः ॥ ४ ॥

द्विपदाद्योऽशाकराः प्रागनुक्रान्ताः तासां गानं विधत्ते।

उपक्षुद्रा गायति तस्मादुपक्षुद्राः पशवः ॥ ५ ॥

उप शक्करीणां समीपे वर्त्तमाना क्षुद्राः शक्करा अल्पपरिमाणास्तदङ्गभूता ऋच उपक्षुद्रास्ता गायति गायेत् यस्मादेवं रूपाणां शक्करीणामेवं रूपता तस्मात्पशवो गवाद्या अप्युपक्षुद्राः समीपवर्त्तिलघुदेहवत्त्वादिसुताः ॥ ५ ॥

अथैतद्गाने गुणं विधत्ते।

असंश्लिष्टा गायति तस्मादसंश्लिष्टाः पशवः ॥ ६ ॥

शक्करीरशक्करीश्च असंश्लिष्टा विच्छिन्ना गायति गायेत् यस्मात् गवादिरूपाः वक्तव्योऽशक्कर्यश्चासंश्लिष्टाः तस्मात् पशवोऽप्यसंश्लिष्टाः स्वभावतः स्वेच्छाचारिणः ॥ ६ ॥

अथ शाक्कराशाक्करपादव्यतिषङ्गेण यच्छक्करीणान्नानात्वन्तत् स्तौति।

नानारूपा गायति तस्मान्नानारूपाः पशवः ॥७॥

स्पष्टोऽर्थः ॥ ७ ॥

अथ शक्करीणाङ्गानसमये उदघोषञ्जनयङ्गिर्गातव्यमिति विधातुमभिप्रेत्याह।

आपो वै क्षीररसा आसꣳस्ते देवाः पापवसीयसादबिभयुर्यदप उपनिधाय स्तुवते पापवसीयसो विधृत्यै ॥ ८ ॥

आपश्च खलु पुरा क्षीररसाः क्षीरस्य पयसो रस इव रसो माधुर्यं यासां तथाविधा आसन् तथा सति स्वभाववैपरीत्यदर्शनात् पूर्वोक्ता देवाः पापवसीयसात् पापं निकृष्टं वसीयः श्रेष्ठमुभयोः सांकर्य्यादबिभयुः भीता अभवन् एवञ्च अवकाशिः

सहिता अप उपनिधाय समीपे स्थापयित्वा शक्वरीभिः स्तुवत इति यत्तत्पापवसीयसः पापस्य निकृष्टस्य वसीयस उत्कृष्टस्य च विष्टत्यै विधारणाय असाङ्कर्येण स्थापनाय भवति उक्तं स्तुवतः कृता अपः सावका उपनिधाय महानाम्नीभिः स्तुवीरन्योयः सामाङ्गं ब्रूयात् स उदघोषञ्जनयेदिति ॥ ८ ॥

एतद्देदनं प्रशंसति।

विष्टतिः पापवसीयसो भवति यएवं वेद ॥ ९ ॥

स्पष्टोऽर्थः ॥ ९ ॥

अथास्य साम्नः काम्यानि निधनानि प्रदर्श्य स्तौति।

गायत्रमयनं भवति ब्रह्मवर्चसकामस्य स्वर्णिधनम्मधुनामुष्मिल्लोक उपतिष्ठते त्रैष्टुभमयनं भवत्योजस्कामस्याथकारणिधनमाज्येनामुष्मिँल्लोक उपतिष्ठते जागतमयनं भवति पशुकामस्येडानिधनं पयसामुष्मिँल्लोक उपतिष्ठते ॥ १० ॥

गायत्रं गायत्र्याः सम्बन्धि अयनं गमनं अनुष्ठानं भवति कस्य ब्रह्मवर्चसं कामयमानस्य यजमानस्य किं तद्गायत्र्याः सम्बन्ध्ययनं स्वरिति निधनस्य करणं एवं कुर्वन् स्वर्गलोके मधुना माक्षिकेन उपतिष्ठते तिष्ठते; सङ्कल्पिकरण आत्मने पदं.

सङ्गच्छत इत्यर्थः तथा ओजस्कामस्य बलकामस्य यजमानस्य त्रिष्टुभं त्रिष्टुप्सम्बन्ध्ययनं भवति किं तदथकारणिधनं अथेति निधनस्य करणं त्रैष्टुभमयनमेव उक्तवान् अमुष्मिन् लोके आज्येनोपतिष्ठते गङ्गच्छते तथा पशुकामस्य यजमानस्य जागतं जगत्याः सम्बन्ध्ययनं भवति किं तज्जागतमयनमिडानिधनमिडेति शब्दस्य निधनत्वेन करणं इडायाः पशुरूपत्वादमुष्मिन् लोके पयसा उपतिष्ठते इडानिधनं पयसा यजमानः क्षीरेण सङ्गच्छते ॥ १० ॥

अथैतासां प्रस्तावोद्गानयोः क्षिप्रत्वं विधातुमाह।

अञ्जसार्य्योमाल्यः शक्करीः प्रारौत्सीदिति ह्येवाचालम्मम्पारिजानतꣳ रजनः कौणेयो यद्येताः प्रतिष्ठापꣳ शक्ष्यतीत्येतद्वा एतासामञ्जꣳ एतत्प्रतिष्ठिता य आभिः क्षिप्रं प्रस्तुत्य क्षिप्रमुद्गायति ॥ ११ ॥

माल्य इति गोत्रनिर्देशः एवम्भूतो आर्य्यो नाम ऋषिः अञ्जसा आजोवेन शीघ्रं शक्करीः प्रारौत्सीत् प्रकर्षेणाहृतवान् इति निर्देशात् खलु कौणेयः कुणेः पुत्रो रजनः पारिजानतं परिजानतोऽपत्यं अलम्मं एतत्संज्ञमृषिं प्रत्युवाच उक्तवान् तस्मात्प्रियाय उच्यते एताः शक्करीः प्रतिष्ठापं प्रतिष्ठापयितुं यदि शक्ष्यति शक्तो भविष्यति तच्चैव कर्त्तव्यमिति प्ररोहुरभिप्रायः एतत् एषः एतासां शक्करीणां कर्म्मणि षष्ठी एताः वक्करीरञ्जयति

गमयति स्पष्टीकरोति वा अञ्जव्यक्तिरपगतिषु तथा प्रतिष्ठिता अनपायाञ्च करोति एष इत्युक्तं कोऽसावेष इति तदुच्यते य आभिः शक्करीभिः क्षिप्रं शीघ्रं प्रस्तुत्य प्रस्तावभागं उद्गार्य क्षिप्रं शीघ्रमुद्गायति उद्गानं करोति प्रस्तुत्येति पूर्वकालतामात्रे क्त्वाप्रत्ययः ॥ ११ ॥

एवाक्षोवेत्यादीनि पञ्चपुरीषपदानि तेषां गानं विधत्ते।

शक्करीभिः स्तुत्वा पुरीषेण स्तुवते ॥ १२ ॥

शक्करीभिः शाक्करेण साम्ना स्तुत्वाऽनन्तरं पुरीषेण सामान्याभिप्रायमेकवचनं पुरीषैः पुरीषपदैः स्तुवते स्तुवोरन् ॥ १२ ॥

तदेतत्प्रशंसति।

पशवो वै शक्वर्य्यो गोष्ठः पुरीषं गोष्ठमेव तत् पशुभ्यः पर्य्यस्यन्ति तमेवैनान् प्रवर्त्तयन्त्यविस्रंसाय ॥ १३ ॥

या एताः शक्वर्य्यस्ताः पशवो वै गोरूपा एव तद्दाक्षकैरिति शब्दैर्बद्धभिः उपेतत्वात्तद्वा वत्ससंज्ञकेन ऊधःसंज्ञकेन च पादद्वयेन योगात् शक्वर्य्यः पशवः ऊधसा वत्सेन च युक्ताः खलु पशवो लोके उपलभ्यन्ते यदेतत्पुरीषं पुरीषपदं एतद्गोष्ठः गवामवस्थानप्रदेशः तत्तथा सति गोष्ठमेव तत्पशुभ्यः पर्य्यस्यन्ति

परितः क्षिपन्ति निर्मिमते तमेव गोष्ठदेशं प्रत्येनान् पशून् प्रवर्त्तयन्ति अविस्रंसाय विस्रंसनाभावाय अविनाशायेत्यर्थः ॥१३॥

मैत्रावरुणशस्त्रं प्राकृतमेवेत्यभिप्रेत्य ब्रह्मणः शस्त्रस्य स्तोस्तोयं तृचं दर्शयति।

इन्द्रो मदाय वावृधे शवसे वृत्रहन्तम। तं ह्येतर्हि ॥ १४ ॥

इन्द्रो मदाय वावृध इति तृतीयस्य शस्त्रस्तोतीयो भवति तत्र वावृध इति भूतकालवाचिलिङ्गो वृधिधातुः श्रूयते एतर्ह्येतस्मिन् काले पञ्चमस्याङ्गोऽनुष्ठानसमये अवर्द्धन्त हि यजमानाः समृद्धा अभवन् अतो भूतकालविषयतद्बोधप्रतिपादकशब्दोपेतस्तृचः सङ्गत इत्यर्थः ॥ १४ ॥

अथ तस्मिन् तृचे गेयं साम विधत्ते।

तासु बार्हद्गिरं ॥ १५ ॥

बृहद्गिरेरिदं बार्हद्गिरं एतदाख्यं साम तासु इन्द्रो मदायेत्याद्यासु भवति ॥ १५ ॥

अथ विकल्पितं स्तोतीयसामान्तरं विशिष्टं विदधाति।

स्वादोरित्था विषूवत इति विषुवान् वै पञ्चममहस्तासु रायोवाजीयं ॥ १६ ॥

स्वादोरित्थेत्येतौ तृचौ ब्रह्मसामस्तोतियः कार्य्यः

यदेतद्गवामयनस्य पञ्चममहः एष विषुवान् यथा गवामयनस्य पञ्चभूतयोः षण्मासयोर्मध्ये वर्त्तमानमहः पञ्चदशस्तोमात् विषुवानित्युच्यते तथेदं पञ्चममहरपि द्वादशाहस्य क्रतोः पूर्व्वभागस्य षट्कस्यावसाने वर्त्तमानत्वेन मध्यवर्त्तित्वात् विषुवानित्याख्यायते तस्माद्विषुवच्छब्दयुक्तस्तृचः सम्बन्धार्ह इत्यर्थः तासु विषुवच्छब्दयुक्तासु स्वादोरित्येतादिषु रायोवाजीयं रायोवाजो नाम कश्चित्तत्सम्बन्धिसाम गातव्यं ॥ १६ ॥

अथ कामनाभेदे ब्रह्मसामतया विधित्सुराह ।

इन्द्रो यतीन् सालावृकेभ्यः प्रायच्छत्तेषां त्रय उदशिष्यन्त पृथुरश्मिर्बृहद्भिरीरायोवाजस्तेऽब्रुवन् कोन इमान् पुत्रान् भरिष्यतीत्यहमितीन्द्रोऽब्रवीत्तानधिनिधाय परिचार्य्य चरन् वर्द्धयंस्तान् वर्द्धयित्वाब्रवीत् कुमारका वरान् वृणीध्वमिति, त्वमस्माञ्जह्यमित्यब्रवीत् पृथुरश्मिस्तस्मा एतेन पार्थरश्मेन त्वं प्रायच्छत् त्वत्काम एतेन स्तुवीत त्वत्स्येवास्य प्रकाशो भवति, ब्रह्मवर्चसमस्माञ्जह्यमित्यब्रवीद् बृहद्भिरिस्तस्मा एतेन बार्हद्भिरेण ब्रह्मवर्चसं प्रायच्छद् ब्रह्मवर्चसकाम एतेन स्तुवीत ब्रह्मवर्चसी भवति, पशून् मह्यमित्यब्रवीद्रायोवाजस्तस्मा एतेन रायो-

बाजीयेन पशून् प्रायच्छत् पशुकाम एतेन स्तुवीत पशुमान् भवति ॥ १७ ॥

पुरा खल्विन्द्रो यतीन् एतल्लक्षणकान् यज्ञविरोधिजनान् सालावृकेयेभ्यः सालावृक्याः पुत्रेभ्यः क्रोष्टुभ्यः प्रायच्छत् भक्षणार्थं दत्तवान् तेषां यतीनामग्रे त्रय उदशिष्यन्त अवशिष्यन्त अवशिष्टाः सालावृकैरभक्षिता आसन् के तु ते पृथुरश्मिर्बृहद्गिरी रायोवाज इति अवशिष्टा एवमब्रुवन् कः नोऽस्मानिमान् पुत्रात्मना स्वीकृतान् कृत्वा भरिष्यति पोषयिष्यतीति एवमुक्ते अहं वः युष्माकं पोषकोऽस्मीतीन्द्रोऽब्रवीत् अथ तान् पृथुरश्म्यादीनधिनिधाय रथे आरोप्य वर्धयन् पोषयन् पर्यचरन् परिचर्यां कृतवान् एवं वर्धयित्वा पुनरब्रवीत् हे कुमारकाः मम पुत्रभूताः वरान् वृणीध्वं याचध्वमिति तत्र पृथुरश्मिः मह्यं क्षत्रं बलमस्त्वित्यब्रवीत् अवृणीत ततस्तस्मै पृथुरश्मये एतेन पार्थुरश्मेन साम्ना क्षत्रं बलं प्रायच्छदिन्द्रो दत्तवान् तस्मादद्यतनोऽपि क्षत्रकाम एतेन पार्थुरश्मेन ब्रह्मसाम्ना स्तुवीत अथ तद्देवनफलं अस्य वेदितुः क्षत्रस्य क्षत्रजातेरिव प्रकाशः कीर्त्तिर्भवति प्रतिष्ठितश्च भवति य एवं ब्राह्मणार्थं जानाति, अथ बृहद्गिरिः ब्रह्मवर्चसं ब्राह्मं तेजो मह्यमस्त्विति अब्रवीत् अयाचत ततस्तस्मै बृहद्गिरये एतेन बार्हद्गिरेण साम्ना ब्रह्मवर्चसं प्रायच्छदिन्द्रः प्रादात् तस्माद् ब्रह्मवर्चसकामः ब्रह्मवर्चसं कामयमानो यजमान एतेन बार्हद्गिरेण स्तुवीत स ब्रह्मवर्चसी

भवति, अथ रायोराजः मह्यं पशून् देहीत्यब्रवीत् ततस्तस्मै रायोवाजीय एतेन रायोवाजीयेन साम्ना पशून् प्रायच्छत् दत्तवान् तस्मात् पशुकामो यजमान एतेन रायोवाजीयेन स्तुवीत स पशुमान् बह्वपशुको भवति ॥ १७ ॥

अथैतत्साम कर्त्तृविशेषे व्यवस्थापयति ।

पार्थुरश्मꣳ राजन्याय ब्रह्मसाम कुर्य्यात् बार्हद्गिरं ब्राह्मणाय रायोवाजीयं वैश्याय स्वेनैवैनाꣳ स्तद्रूपेण समर्द्धयति स्तोमः ॥ १८ ॥

राजन्याय क्षत्रियाय पार्थुरश्मं ब्रह्मसाम कुर्य्यात् एवमुत्तरत्रापि योजना क्षत्रियस्य हि स्वकीयं रूपं क्षत्रं ब्राह्मणस्य ब्रह्मवर्चसं वैश्यस्य पशवः पाशुपाल्यं एतानि त्रीणि सामानि एतत्त्रितयसाधनानीत्युक्तं तत्तथा च स्वेन स्वकीयेन नियतेनैव रूपेण एतान् समर्द्धयति समृद्धान् करोति अच्छावाकपृष्ठस्तोत्रमपि प्राकृतमेवेत्यवगन्तव्यं एतेषु च त्रिष्वपि पृष्ठस्तोत्रेषु पूर्व्वोक्तलिङ्गाव एव स्तोमः कार्य्यः ॥ १८ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य

चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

अथार्भवपवमानस्याद्यं ऋचं दर्शयति ।

असाव्यंशुर्मदायेति गायत्री भवति मदवद्वै रसवत्तृतीयसवनम्मदमेव तद्रसं दधाति ॥ १ ॥

असाव्यंशुरिति गायत्री गायत्रपवमानस्याद्यस्तृचो भवति शिष्टं सिद्धं ॥ १ ॥

अथ ऋचान्तरं विधत्ते ।

अभिद्युम्नं बृहद्यश इत्यभीति रथन्तरस्य रूपं बृहदिति बृहत उभयोः सह रूपमुपैत्युभौ हि वर्णावेतदृचः ॥ २ ॥

अभिद्युम्नमिति द्वितीयस्तृचः कार्य्यः अभित्वा शूरनोनुम इति रथन्तरयोनावभिशब्ददर्शनात् अभीतिशब्दो रथन्तरस्य साम्नो रूपं बृहदिति शब्दो बृहत्साम्नोवाचकत्वात्तस्य बृहतो रूपं तथा चोभयोर्बृहद्रथन्तरयोरूपमभिद्युम्नं बृहदिति सहोपैति सहितमुपगच्छति एतत्सङ्गमनमृचः उभौ हि वर्णावुभयवर्णात्मकमेव बार्हताच्चतुर्थादक्षरानन्तर्यात् शाक्करस्य रथन्तरप्रभवतया रथन्तरसम्बन्धाच्च ॥ २ ॥

अथान्यं ऋचं विधत्ते ।

प्राणाशिशुर्मह्नोनामिति सिमानाꣳ रूपम्मह्यो हि सिमाः स्वेनैवैनास्तद्रूपेण समर्द्धयति ॥ ३ ॥

प्राणाशिशुरिति तृतीयस्तृचस्तञ्च सिमानां शक्करीणां रूपं कृतः मह्यो महत्यो हि सिमाः शक्कर्य्यस्तत्तथा च प्राणाशिशुर्महोनामिति शक्कर्य्यभिधायकेन महीशब्देन योगात् स्वेन स्वकीयेनैव रूपेण एताः सिमाः समर्द्धयति सम्पन्नाः करोति ॥ ३ ॥

अथ तृचान्तरं विधत्ते।

पवस्व वाजसातय इति वैष्णव्योऽनुष्टुभो भवन्ति ॥४

वैष्णव्या विष्णुशब्दयुक्ता अनुष्टुपश्छन्दस्काः पवस्वेत्याद्याश्चिस्रः स्तोतीया भवन्ति इन्द्राय सोम विष्णव इति विष्णुशब्दयोगादिमा वैष्णव्यः ॥ ४ ॥

तदेतत्प्रशंसति।

यज्ञो वै विष्णुर्यदत्र नापि क्रियते तद्विष्णुना यज्ञेनापिकरोति ॥ ५ ॥

अत्र विष्णुशब्देन व्यापको यज्ञ एवाभिप्रेतः तथा चात्रास्मिन्नहनि यन्नापि क्रियते अपिगतं प्राप्तं न क्रियते नानुष्ठीयते तद्यज्ञेन यज्ञात्मना विष्णुना अपिकरोति संपूर्णं करोति ॥ ५ ॥

अथ तृचान्तरं विधत्ते।

इन्दुर्वाजी पवते गोन्यादा इति सिमानाꣳ रूपꣳ खेनैवैनाꣳ स्तद्रूपेण समर्द्धयति ॥ ६ ॥

गतमेतत् ॥ ६ ॥

ननु प्रकृतावार्भवस्यान्यस्तृचोऽभिप्रियाणीत्याद्योजागतः तत्कथं तत्स्थाने त्रैष्टुभस्तृचः सङ्गच्छत इति तत्राह ।

त्रिष्टुभः सत्योजगत्यो रूपेण तस्माज्जगतीनां लोके क्रियन्ते ॥ ७ ॥

त्रिष्टुभः सत्योऽपेता जागतरूपेण गोशब्देन योगात् जगत्यो भवन्ति तस्मादेव जगतीनां स्थाने क्रियन्ते गोन्यादा इति गोशब्दो दृश्यते तस्य जागतरूपत्वं प्रागाम्नातं ॥ ७ ॥

अथासाव्यंशुरिति प्रथमविहिते तृचे पूर्ववद्गायत्रं साम विधाय तत्स्तावकमिमे वै लोका गायत्रमित्यादिकं तत् ब्राह्मणञ्चातिदिशति ।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ ८ ॥

स्पष्टोऽर्थः ॥ ८ ॥

अथास्मिन्नेवाष्टमे तृचे सामान्तरं विधत्ते ।

सन्तनि भवति पञ्चमस्याहः सन्त्यै ॥ ९ ॥

असाव्यंशुरिति सन्तनिसंज्ञकं साम कार्यं तच्च पञ्चम-

स्याद्धः सन्तत्यै अहरन्तरेण सन्तानाय सम्बन्धायाविच्छेदाय भवति कथमस्य सन्तानहेतुतेति चेत् उच्यते सर्वाणि हि सामानि योनिग्रन्थे एकैकस्यामेवर्चि उत्पन्नानि दृष्टानि तत्राप्येषस्य धारयेति ऋचे गीयते तद्वदत्रासाव्यंशुरिति ऋचे गातव्यमिति विधीयते तत्र किं तिसृषु ऋक्षु योनिभूतासु दृश्यमानं साम असाव्यंशुरिति अस्मिन् ऋचे किमेकस्यां गातव्यं किं वा अतापि ऋचे कृत्वा उत्तरार्थं ऋच इव अन्यत्र आहर्त्तव्यं तथा च एकैकस्मिंस्तृचे एकस्य साम्नः समाप्तेरात् तत्पञ्चास्मिन्नः स्तोत्रीया भवन्तीति न त्रिणवस्तोमविरोधः आहोस्वित् सामान्तरवत् योनिग्रन्थे कस्यामेव गीतं साम पुनरुत्तरयोः प्रस्तावभक्तिलोपेन तदेव गीयते असाव्यंशुरिति ऋचे तद्वदेव प्रथमायां गीत्वा उत्तरयोरपि प्रस्तावविभक्तिलोपेन तदेवोद्गातव्यमिति संशये सन्तनिचोद्यमानमेकैकस्यां सर्वस्मित्यादिकं पक्षद्वयं पूर्वपक्षयित्वा अन्तिमं पक्षं सिद्धान्तितवान् तिसृष्वाचार्थः स्मृतेर्यथान्यानि सामानीति तथाचैकस्यां सामसमाप्तावपि प्रथमकृतं प्रस्तावमेवोत्तरार्थमभ्युपेत्य उत्तरयोः पृथक् प्रस्तावाभावात् ओङ्कारेण पृथगुद्गीथादानाच्च तस्य साम्नः सन्तनोत्यन्वर्थसंज्ञेयं अतएवास्याङ्गः सन्तानहेतुत्वं तदप्युक्तं सन्तानाच्च सन्तानीति ॥९॥

अथ प्रकारान्तरेण सन्तानहेतुतया स्तौति।

वाग्वा एषा प्रतता यद्बृहद्गायन्त्स्या एष विषुवान्यत् पञ्चममहस्तामेवैतेन सन्तनोति ॥ १० ॥

यत् यो द्वादशाहः द्वादशानामह्नां समूहः क्रतुः एषा प्रतता प्रकर्षेण विस्तारिता वाग्वै वागेव अतस्तस्या वाच एष विष्टुवान् एतद्विष्टुवसंज्ञकमहर्भवति पञ्चममहः अहःषट्कद्वयात्मिकान्तामेव वाचं एतेन सन्तनिसाम्ना सन्तनोति ॥ १० ॥

अथाभिद्युम्नमिति विहिते तृचे गेयं साम दर्शयति ।

च्यावनं भवति ॥ ११ ॥

च्यावनाख्यं साम अस्मिंस्तृचे गातव्यमित्यर्थः ॥ ११ ॥

तदेतत् स्तौति ।

प्रजातिर्वै च्यावनं प्रजायते बहुर्भवति च्यावनेन तुष्टुवानः ॥ १२ ॥

प्रजातिः प्रजननहेतुः खलु च्यावनं साम तस्माच्च्यावनेन तुष्टुवानः स्तुतवान् प्रजायते पुत्रपौत्रादिरूपेणोत्पद्यते अस्य पौत्रादय उत्पद्यन्त इत्यर्थः ततो बहुरनेकरूपश्च भवति ॥१२॥

अथास्य च्यावनसंज्ञां निर्ब्रुवन् दृष्टिफलहेतुतामाह ।

एभ्यो वै लोकेभ्यो दृष्टिरपाक्रामत्तां प्रजापतिश्च्यावनेनाच्यावयदच्यावयत्तच्च्यावनस्य च्यावनत्वच्च्यावयति दृष्टिञ्च्यावनेन तुष्टुवानः ॥ १३ ॥

एभ्यस्त्रिभ्यो लोकेभ्यः पुरा दृष्टिरपाक्रामत् तामपक्रान्तां

दृष्टिं प्रजापतिश्चावनेन साम्ना अच्यावयत् अच्चारयत् सर्वतः प्रावर्षत् यद्यस्मादनेन साम्ना साधनेनाच्यावयत् तत्तस्माच्चावनस्य साम्नश्चावनत्वमिति नाम सम्पन्नं यस्मादेवं तस्माद्यतनोऽपि च्यावनेन तुष्टुवानः स्तुवन् पुरुषः दृष्टिं च्यावयति चारयति ॥ १३ ॥

अथ प्राणाशिशुरिति तृचे गेयं साम दर्शयति।

क्रौञ्चं भवति ॥ १४ ॥

क्रौञ्चाख्यं साम तस्मिंस्तृचे गेयमित्यर्थः ॥ १४ ॥

अस्य च संज्ञां अर्थान्निर्ब्रुवन् पशुप्राप्तिसाधनतामाह।

एतेन वा इन्द्र इन्द्रक्रौञ्चे विश्वामित्रजमदग्नी इमा गाव इत्यक्रौञ्चत् पशूनामवरुध्यै क्रौञ्चं क्रियते ॥१५॥

एतेन खलु साम्ना साधनेन पुरा इन्द्र इन्द्रक्रौञ्चे एतत् संज्ञे स्थाने हे विश्वामित्रजमदग्नी इमा गावो वर्त्तन्त इत्यक्रौञ्चत् उच्चैर्घोषं कृतवान् तस्मादस्य साम्नः क्रौञ्चनसाधनत्वात् क्रौञ्चमिति नाम सम्पन्नमिति भावः तस्मादिदानीमपि पशूनां गवादीनामवरुध्यै अवरोधनाय प्राप्तये क्रौञ्चं साम क्रियते प्रयुज्यते ॥ १५ ॥

अथ पवस्व वाजसातय इति तृचे विहिते गेयं साम दर्शयन् तद्ब्राह्मणमर्थतिदिशति।

गौरीवितं भवति यदेव गौरीवितस्य ब्राह्मणं ॥१६

गतमेतत् ॥ १६ ॥

अथास्मिन्नेव ऋचे पुनराऽऽवृत्ते सामान्तरं विधत्ते ।

ऋषभः शाक्करो भवति ॥ १७ ॥

ऋषभः शाकर इति साम्नः संज्ञा एतत् संज्ञं साम अस्मिन्नेव ऋचे गातव्य ॥ १७ ॥

तदेतत् स्तौति ।

पशवो वै शक्वर्यः पशुष्वेव तन्मिथुनमप्यर्ज्जति प्रजात्यै न ह वा अनृषभाः पशवः प्रजायन्ते ॥१८॥

अस्मिन् पञ्चमेऽहनि विनियुक्ताः शक्वर्यस्तावत्यः पशवो वै गोरूपा एव ऋषभश्चात्र विधीयते तत्तथा च एकस्मिन्नहनि शक्वरीणामृषभः संयोजनात् पशुष्वेव मिथुनं स्त्रीपुंसरूपं युगलमप्यर्ज्जति अवस्थापयति प्रजात्यै प्रजननाय ऋजुगतिस्थानोपार्ज्जनेष्विति धातुः न खलु अनृषभ ऋषभेण वियुक्ताः पशवः प्रजायन्ते वत्साञ्जनयन्ति तस्मात् पशुसंस्तुतानां शक्वरीणां समीपे ऋषभो विनियोगयोग्य इत्यर्थः ॥ १८ ॥

तदस्मिन्नेव ऋचे आवृत्ते सामान्तरं विधत्ते ।

पार्थम्भवति ॥ १९ ॥

पृथिना दृष्टं साम पार्थं तदस्मिन्नेव ऋचे गातव्यं ॥ १९ ॥

अथैतत् ग्राम्यारण्यपशुसङ्घप्राप्तिसाधनमिति स्तौति।

एतेन वै पृथो वन्य उभयेषां पशूनामाधिपत्यमाश्नुतोभयेषां पशूनामाधिपत्यमश्नुते पार्थेन तुष्टुवानः ॥ २० ॥

एतेन पार्थेन साम्ना खलु पुरा वैन्यो वेनस्य पुत्रः पृथीनाम राजर्षिः उभयेषां ग्राम्यारण्यानां पशूनामाधिपत्यमधिपतित्वं स्वामित्वमाश्नुत प्राप्नोत् अतो अद्यतनोऽपि पार्थेन तुष्टुवानः स्तुतवान् उभयेषाम्पशूनां स्वामित्वं प्राप्नोति ॥ २० ॥

अथास्मिन्नेव ऋचे आदृत्ते सामान्तरं विधत्ते।

अष्टेडः पदस्तोभो भवति ॥ २१ ॥

अष्टाविडा यस्मिन् ऋचि पादे स्तोभोयस्मिन् स तथोक्तः एतन्नाष्टेडः पदस्तोभः साम्नः संज्ञा धर्त्ता दिव इत्यस्यां योनौ चत्वारि सामानि गीयन्ते तत्र प्रथममष्टेडापदस्तोभसंज्ञं तत्यवस्व वाज इत्यस्मिन् ऋचे ऊहितव्यं ॥ २१ ॥

अथास्य साम्नो गाने किञ्चिद्गुणं विधित्सुराह।

इन्द्रो ऋत्राय वज्रमुद्यच्छन्तं षोडशभिर्भोगैः पर्य्य-

भुजत्म एतं पदस्तोभमपश्यत्तेनापावेष्टयदपवेष्टय-न्निव गायेत् पाप्मनोऽपहत्यै ॥ २२ ॥

इन्द्रो वृत्रमसुरं हन्तुं वज्रं कुलिशं उदयच्छदुद्गृहीत् तं वृत्रासुरः षोडशभिः षोडशसंख्याकैर्भोगैः सर्व्वशरीरै पर्य्य-भुनक्त् पर्य्यग्रसत् आवेष्टितवान् स तथाविध इन्द्रः एतं पदस्तोभं एतत्संज्ञं सामापश्यत् तेन पदस्तोभेन स्वदृष्टेनापावेष्टयत् अपगतवेष्टनमकरोत् आवेष्टकान् सर्व्वभोगानपसारितवानित्यर्थः तस्मादिदानीन्तनोऽपि स्तोता अपवेष्टयन्निवापगतं वेष्टनस्यापगमनं कुर्व्वन्निव गायेत् किमर्थं पाप्मनः पापस्यापहत्यै अपहननाय विनाशार्थं ॥ २२ ॥

एतदेव विवियते ।

पाप्मा वाव स तमगृह्णात्तं पदस्तोभेनापाहतापाप्मानꣳ हते पदस्तोभेन तुष्टुवानः ॥ २३ ॥

तमिन्द्रं स वृत्रः पाप्मा वाव पापमेव भूत्वा अगृह्णात्तं पाप्मानं पदस्तोभेनापाहत व्यनीनशदनाशयत एवमतः कारणात्पदस्तो-भेन तुष्टुवानः स्तुतवान् पाप्मानं पापमपहते विनाशयति ॥२३॥

अथास्य पदस्तोमसंज्ञां निर्व्वक्ति ।

पदोक्तममपश्यत्तत्पदस्तोमस्य पदस्तोमत्वं ॥२४

पदः पदात् ऋचः प्रतिपादं उक्तमं अतिशयेनाचरितारं

स्तोभमपश्यत् अदर्शयत् तत्तस्मात्पदस्तोभस्य साम्नः पदस्तोभत्वं पदस्तोभ इति नाम सम्पन्नं ॥ २४ ॥

अथास्य प्रतिष्ठाहेतुतामाह ।

द्वादशनिधनो भवति प्रतिष्ठायै ॥ २५ ॥

स च पदस्तोभो द्वादशनिधनः द्वादशानि निधनानीति यस्य तादृशो भवति प्रतिष्ठायै प्रतिष्ठानाय द्वादशमासात्मकः संवत्सरो हि प्रतिष्ठाहेतुः तत्सामान्यात् द्वादशनिधनोऽपि पदस्तोभः प्रतिष्ठाहेतुरित्यर्थः तानि च द्वादशनिधनानि स्तुतशस्त्रैरुक्तानि निधनानि पदानि पदस्तोभेषु तथेडा इति अयमर्थः पदस्तोभा नाम धर्त्ता दिव इत्यस्यां गीयमानानि चत्वारि सामानि अष्टेडषडिडचतुरिडद्विरिडानीति अत्र चाष्टेडः पदस्तोभो विहितः तस्य यानि चत्वारि पदानि यास्वाष्टाविडा तानि मिलित्वा द्वादशनिधनानि भवन्ति ॥ २५ ॥

अथान्तिमे ल्टचे गेयं साम विधत्ते ।

दाशस्त्यं भवति ॥ २६ ॥

दाशस्त्याख्यं साम इन्दुर्वाजी पवत इति ल्टचे गेयं ॥२६॥

वाभ्रवदृहःप्रशंसा कामः तत्साम संज्ञाद्वारेण स्तौति ।

यां वै गां प्रशंसन्ति दाशस्त्येति तां प्रशंसन्त्यक्षरवैतेन प्रशंसन्ति ॥ २७ ॥

लोके हि यां गां प्रशंसन्ति स्तुवन्ति तां दाशस्त्यायेति प्रशंसन्ति दाशृदान इति धातुः दाशो दानस्य पतिः दाशस्तिः भावपरो निर्देशः दाशस्तौ साधुर्दाशस्त्यो बर्हिषस्य क्षीरस्य प्रदातुमीश्वरः गां स्तुवन्ति अतो दाशस्त्यसंज्ञा प्रशंसाहेतुः एतेन दाशस्त्यसंज्ञेन साम्ना अक्षरेवेदमनुष्ठीयमानं प्रशंसन्ति ॥ २७ ॥

अथैतत्पवमानस्तोत्रमुपसंहरति ।

निधनान्ताः पवमाना भवन्त्यह्नो धृत्यै स्तोमः॥२८

सर्वत्र तावच्चत्वार एव सामान्ताः स्वरो निधनमिडावागिति ऋचामन्त्यमक्षरं स्वरयित्वा समापितं हाइकारश्च द्वयमपि स्वर इति रूढ्या व्यपदिश्यते स्वरवागिडाभ्योऽन्ये सामान्तरं रूढ्यैव निधनमित्युच्यते अस्मिंश्च दाशस्त्ये स्वरवागिडाभ्योविलक्षणमेव पदावसानं दृश्यते तथा पूर्वयोरपि पवमानयोस्तस्मादेते त्रयः पवमानाः निधनान्ताः निधनसंज्ञः सामान्तो येषां तथाविधा भवन्ति तच्च निधनान्तत्वमस्यानुष्ठीयमानस्य पञ्चमस्याह्नो धृत्यै धारणाय कल्पते एवन्ह्यवसु सामसु तत्रेषु क्रियमाणेषु सप्तविंशतिस्तोत्रीयात्मकस्त्रिगवस्तोमो निष्पद्यते स एव स्तोमोऽस्यार्भवस्य भवति ॥ २८ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य

पञ्चम खण्ड ।

अथ षष्ठः खण्डः ।

अथोक्थानां प्रथमस्य स्तोत्रीयं ऋचं दर्शयति ।

आ ते अग्न इधीमह्येति ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

तदेतत् स्तौति ।

अपच्छिदिव वा एतद्यज्ञकाण्डं यदुक्थानि यदे-नि सलोमत्वायैव ॥ २ ॥

गतमेतत् ॥ २ ॥

द्वितीयस्योक्थस्य स्तोत्रीयं ऋचं विधाय स्तौति ।

इन्द्राय साम गायतेति पूर्णाः ककुभस्तेनानश्ना-यको भवति ॥ ३ ॥

इन्द्राय साम गायतेति पूर्णाः अक्षरसंख्यया सम्पूर्णाः अन्यूनाः ककुभः ककुप्छन्दस्काः स्तोत्रियाः ब्रह्मसाम्नो भवन्ति तेन पूर्णस्य ककुभस्य ऋचस्य करणेन यजमानोऽपि पूर्णस्तृप्तः सन् अनशनायुकः अशनाया अशनेच्छा क्षुत्पीडा तद्रहितो भवति ॥ ३ ॥

प्रकारान्तरेण स्तौति ।

पुरुषो वै ककुप् पुरुषमेव तन्मध्यतः प्रीणाति ॥४

यदिदं ककुप्छन्दस्तत्पुरुषो वै पुरुषात्मक एव तत्तथा सति मध्यतः उक्थानामध्ये पुरुषमेव यजमानस्यात्मानमेव देहमध्येऽवस्थितं प्रीणाति तर्पयति ॥ ४ ॥

अथ तृतीयस्योक्थस्तोत्रीयं दर्शयति।

असावि सोम इन्द्रत इति सिमानाꣳ रूपꣳ खेनैवैनाꣳस्तद्रूपेण समर्द्धयति ॥ ५ ॥

असावि सोम इन्द्रत इत्यच्छावाकस्योक्थस्य स्तोत्रीयस्तृचो भवति सोमः असावि अभिषुतः रसावस्यामापन्नोऽभूदित्यर्थः प्रतीयते शक्वर्यः सिमा इत्युच्यन्ते पशवो वै शक्वर्य इति श्रुतेः तासाङ्गोरूपत्वात् गवाञ्च क्षीरादिसम्बन्धः सिञ्च एवेति असावि सोम इति रसप्रतिपादकशब्दः सिमानां शक्वरीणां रूपं गतमन्यत् ॥ ५ ॥

अथ प्रथमतृचे गेयं साम दर्शयति।

सञ्जयन्भवति ॥ ६ ॥

सञ्जयाख्यं साम आते अग्नद्रधीमश्वीत्यस्मिंस्तृचे गातव्यं ॥६

अथास्य संज्ञां आख्यायिकया निर्ब्रुवन् पशुसाधनतामाह ॥

देवाश्च वा असुराश्च समदधत यतरे नः सञ्जयाꣳ

स्तेषान्नः पशवोऽमानिति ते देवा असुरान् सञ्जयेन समजयन् यत्समजयꣳस्तस्मात्सञ्जयम्पशूनामवरुध्यै सञ्जयं क्रियते ॥ ७ ॥

पुरा खलु देवाश्चासुराश्च पशुविषयं स्पर्द्धमानाः समदधत सन्धानं समयमकुर्व्वन् नोऽस्माकमध्ये यतरे सञ्जयात् सम्यग् जयेयुः नोऽस्माकमध्ये तेषामेव पशवो गवाद्या आसन् सन्तु भवन्त्विति एवं सन्धानं कृत्वा ते युध्यमाना देवाः सञ्जयेनानेन साम्ना असुरान् समजयन् अभ्यभवन् यद्यस्मादनेन साम्ना समजयन् तस्मात् सञ्जयमिति तस्य साम्नो नाम सम्पन्नं अतोऽद्यतनोऽपि यजमानस्य पशूनामवरुध्यै अवरोधनार्थं सञ्जयं साम क्रियते ॥ ७ ॥

अथ द्वितीयोक्थस्य साम विधत्ते ।

सौमित्रं भवति ॥ ८ ॥

सुमित्रेण दृष्टं साम सौमित्रं तदिन्द्राय साम गायतेति लक्षे गेयं ॥ ८ ॥

अथैतत् सर्वप्राप्तिसाधनमिति विवक्षुराह ।

दीर्घजिह्वी वा इदꣳ रक्षो यन्नहा यन्नानवलिह्त्यचरत्तामिन्द्रः कयाचन मायया हन्नाशꣳसताथ ह सुमित्रः कुत्साः कल्याण आस तमब्रवीदिमामच्छा-

ब्रूष्वेति तामच्छा ब्रूत सैनमब्रवीन्नाहैवतन्नु शुश्रुव प्रियमिव तु मे हृदयस्येति तामन्नपयत्ताꣳ सꣳस्कृतेऽहतां तद्वाव तौ तर्ह्यौकामयेतां काममनि साम सौभित्रं काममेवैतेनावरुन्धे ॥ ९ ॥

दीर्घजिह्वी दीर्घा जिह्वा यस्याः सा दीर्घजिह्वी दीर्घजिह्वी च रुन्त्सोति निपातनादीकारः दृदमीदृशी रक्षः राक्षसी यज्ञहा यज्ञस्य हन्त्री यज्ञान् यज्ञियान् यज्ञार्थांश्चरुपुरोडाशसोमादीन् अवलिहती दीर्घया जिह्वया अवलेहनं कुर्वती आस्वादयन्ती भक्षयन्ती अचरत् अवर्त्तयत् तां दीर्घजीह्वीं राक्षसीं इन्द्रः कयापि मायया हन्तुं हिंसितुं नाशंसत नाशक्नोत् अथैतस्मिन् समये सुमित्रः शोभनेन मैत्रीभावेन युक्तः कल्याणः प्रशस्तः कुत्साख्यऋषिरास आविरभूत् स इन्द्रस्तमृषिमब्रवीत् दूसां राक्षसीं अच्छा मदभिमुखं यथा भवति तथा ब्रूहीति अतस्तां राक्षसीं अच्छा ब्रूष्वेति स ऋषिः यथा सा अभिमुखी भवति तथाब्रवीत् एतत्साम गीयते सा राक्षसी अभिमुखी सती एनमृषिमब्रवीत् अहेति हर्षे मम हृदयस्य प्रियमिव तु प्रियमेवाभूदिति एवमभीक्षतां तां राक्षसीं अन्नपयत् इन्द्राय न्यवेदयत् ततस्तां राक्षसीं संस्कृते प्रोक्षणादिसंस्कारेणाविशुद्धे यज्ञवाटे अहतां कुत्सइन्द्रौभौ मिलित्वा अहिंसिष्टां तदेव राक्षस्याहननं तर्हि तस्मिन् काले तावाकामयेतां कामयित्वा च हतवन्तौ तस्मात् सौमित्रं सुमित्रेण दृष्टं साम काममनि काम-

प्रदं सर्वकामप्राप्तिसाधनं तस्मात्तेन सर्वमेव कामं यजमानोऽवरुन्धे ॥ ९ ॥

अथ प्रकारान्तरेणैतत् स्तौति ।

सुमित्रः सन् क्रूरमकरित्येनं वाग्भ्यवदत्तꣳशुगार्थत्सतपोऽतप्यत स एतत्सौमित्रमपश्यत्तेन शुचमपाहतापशुचꣳ हते सौमित्रेण तुष्टवानः ॥ १० ॥

अस्य रात्रोवधानन्तरं हे कुत्स सुमित्रः सर्वेषां भूतानां शोभनमित्रः सन् क्रूरं कर्म अकः अकार्षीदिति एनमृषिं अशरीरी वाग्भ्यवदत् अभितोऽब्रवीत् स ऋषिस्तपोऽतप्यत तेन च तपसा एतत्सौमित्रं सामापश्यत् तेन च पुष्टेन सौमित्रेण शुचं शोकं अशरीरवाग्जन्यमपाहत व्यनाशयत् तस्मादद्यतनोऽपि सौमित्रेण तुष्टवानः स्तुतवान् शुचं शोकं अपाहत अपहन्ति नाशयति ॥ १० ॥

अथ तृतीयोक्थस्य साम विधत्ते ।

महावैश्वामित्रं भवति ॥ ११ ॥

एतत्सांत्रं साम असावि सोम इन्द्रत इति तृचे गेयं ॥११॥

अथैतत्सांत्रानिर्वचनेन स्तौति ।

पाप्मानꣳ हत्वा यदमहीयन्त तत् महावैश्वामित्रस्य महावैश्वामित्रत्वं ॥ १२ ॥

देवाः पुरा अनेन साम्ना पाप्मानं पापं हत्वाऽमहीयन्त यस्मात्कारणादमहीयन्त पूज्या आसन् तत्तस्मान्महावैश्वामित्रस्यास्य साम्नो महावैश्वामित्रत्वं महावैश्वामित्रमिति नाम सम्पन्नं ॥ १२ ॥

अथास्य साम्नः स्तोभमुपादाय स्तौति।

हायादूहयाउहाउहेति पशूनेवैतेन न्यौहन्त ॥ १३ ॥

अस्मिन् स्तोभे उहा उहेति दृश्यते एतेन स्तोभेन पशूनेव न्यौहन्त नितरां प्राप्नुवन् यद्वा समूहीतवन्तः अस्य साम्नोऽवसाने हो३इडेति तिः प्रयुज्यते ॥ १३ ॥

तदनूद्य स्तौति।

लोडं भवति चिरात्यै धृत्यै ॥ १४ ॥

तिस्र इडा यस्य तत्त्रीडमेतत् साम भवति तच्च द्वितीयस्य चिरात्यै धृत्यै धारणाय भवति ॥ १४ ॥

अथ पूर्वस्मादिडाद्वयात् उत्तमाया इडाया गुणविशेषं विदधानः सन्तानहेतुतामाह।

द्रवन्तीमिडामुत्तमामुपयन्ति षष्ठस्याह्नः सन्त्यै ॥ १५ ॥

हो३इडेति द्रवन्तीं द्राघीयसीमुत्तमामन्त्यां तृतीयामिडा-

सुपयन्ति उपगच्छन्ति सा च दीर्घीभूता षष्ठस्याङ्गः करिष्यमाणस्य सन्तत्यै सन्तानाय सन्धानाय भवति ॥ १५ ॥

अथैतेषूक्थेषु पूर्ववत् स्तोमरूपिं दर्शयित्वा स्तौति।

त्रिणव एव स्तोमो भवति प्रतिष्ठायै पुच्छे विष्टद्वा एष पुष्टः ॥ १६ ॥

व्याख्यातमेतत् ॥ १६ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य षष्ठः खण्डः।

अथ सप्तमः खण्डः।

एवं दाशरात्रिकस्य पञ्चमस्याङ्गः स्तोमरूपिमुक्त्वा अथ षष्ठेऽहनि बर्हिष्यवमानस्य प्रथमं स्तोत्रीयाख्यं ऋचं दर्शयति।

ज्योतिर्यज्ञस्य पवते मधुप्रियमिति षष्ठस्याङ्गः प्रतिपद्भवति ॥ १ ॥

त्रयस्त्रिंशत्स्तोमकं दाशरात्रिकं षष्ठमङ्गमतः परमध्यायपरिसमाप्तेः प्रतिपाद्यते तस्य षष्ठस्याङ्गो ज्योतिर्यज्ञेति प्रतिपद्यते अनयैवेति प्रतिपदिति प्रथमा ऋगुच्यते ऋचस्तूक्तानाः

मादिग्रहणेन विधिरनादेश इति परिभाषया एतदादिकस्तृच-
एव ग्राह्यः सोऽयं बर्हिष्यवमानस्याद्यस्तृचो भवति ॥ १ ॥

अत्र ज्योतिःशब्देन सूचितमर्थं प्रदर्श्य स्तौति।

ज्योतिर्वै गायत्री छन्दसां ज्योतो रेवती साम्नां ज्योतिस्त्रयस्त्रिंशः स्तोमानां ज्योतिरेव तत्सम्यक् सन्दधात्यपि ह पुत्रस्य पुत्रो ज्योतिष्मान् भवति ॥२॥

छन्दसामध्ये गायत्री ज्योतिर्वै तेजोरूपत्वाग्निना सह
प्रकाशयति प्रजापतिमुखादुत्पत्तेः; तथा साम्नामध्ये रेवती
रैवतं साम ज्योतिस्तेजोरूपं रयिर्धनं तद्वदस्य प्रकाशोऽस्तीति
प्रसिद्धं अतोरयिमच्छब्दपर्य्यायेण रैवच्छब्देनाभिधेयं साम प्रका-
शात्मकं स्तोमानां त्रिवृदादीनां मध्ये त्रयस्त्रिंशस्तोमो ज्योती-
रूपः तस्य त्रयस्त्रिंशद्देवतात्मकत्वात् तथा सति ज्योतिर्यज्ञस्येति
ज्योतिःशब्दप्रयोगादस्मिन्नहनि ज्योतिरेव उक्तं त्रितयात्मकं
सम्यक् सङ्गतं यथा भवति तथा सन्दधाति संयुनक्ति अस्य यज-
मानस्य यःपुत्रस्तस्य पुत्रो ज्योतिष्मान् तेजस्वी भवति किमु
वक्तव्यमस्य यजमानस्य ज्योतिष्मत्त्वं भवतीति ॥ २ ॥

अथात्रान्यं पदान्तरमनूद्य स्तौति।

मधुप्रियमिति पशवो वै रेवत्यो मधुप्रियं तदेव तदभिवदति ॥ ३ ॥

रेवत्यो रेवत्यात्मकं साम पशवो वै पशवात्मकमेव तदेव मधु प्रियं रसातिशयनेच्छाविषयं मधु मधुरस्य क्षीरादिरसस्य प्रदानेनैव पशूनामधुरत्वं तत्प्रतिपदं पशुद्वारा रेवत्यात्मकं तदेव मधु अभिवदति अभिब्रवीति शब्दसामान्येनेयं स्तुतिः ॥ ३ ॥

अथ पदान्तरमनूद्य स्तौति।

मदिन्तमो मत्सरइन्द्रियोरस इतीन्द्रियं वै वीर्य्यꣳ रसः पशवस्तदेव तदभिवदति ॥ ४ ॥

इन्द्रियात्मकं वीर्यं रसः पशवः वीर्यरसात्मकाः पशवः इत्यर्थः हतं हतवत इन्द्रस्य वीर्यं भूमौ परापतत् तच्चौषधिरूपेण परिणीतमभूत् ओषधीनाञ्च पशुभिरात्मनि धारणात् रसात्मकस्य क्षीरादेः प्रदानाञ्च पशूनां वीर्यरसात्मकत्वं गतमन्यत् ॥ ४ ॥

अथानुरूपाख्यं बर्हिष्यवमानस्य द्वितीयं तृचं विधत्ते।

असृक्षत प्रवाजिन इत्यनुरूपो भवति ॥ ५ ॥

स्पष्टोऽर्थः ॥ ५ ॥

तत्रासृक्षतेति पदसूचितेनार्थेनाङ्गा सङ्गतिमाह।

सृष्टानीव ह्येतर्ह्यहानि ॥ ६ ॥

एतर्हि एतस्मिन् काले अहान्येतदन्तानि सृष्टानीव उत्पा-

दितान्येव तस्माद्भूतकालविहितदक्षिरस्कमसृजतेति सृजिधातुः सृष्टेर्हि सङ्गत इत्यर्थः ॥ ६ ॥

अथ पूर्ववदस्य त्वचस्य अनुरूपसंज्ञां निर्ब्रुवन् तद्वेदनफलं दर्शयन् स्तोत्रीयानुरूपौ त्वचौ संहत्य स्तौति।

पूर्वमु चैव तद्रूपमपरेण रूपेणानुवदति यत्पूर्वꣳ रूपमपरेण रूपेणानुवदति तदनुरूपस्यानुरूपत्वमनुरूपणं पुत्रो जायते य एवं वेद स्तोत्रीयानुरूपौ त्वचौ भवतः प्राणापानानामवरुध्यै ॥ ७ ॥

सिद्धमेतत् ॥ ७ ॥

अथ दशर्चद्वयं विधत्ते।

दशर्चौ भवतो दशाक्षरा विराड् वैराजमन्नमन्नाद्यस्यावरुध्यै ॥ ८ ॥

पवस्व देव वीरति सना च सोम जेषि च एतौ दशर्चौ स्तोत्रीयानुरूपत्वचद्वयानन्तरं कार्यौ विराट्छन्दो दशाक्षरमेतच्च दशविधेन्द्रियतर्पकत्वेन दशसंख्यायोगाद्विराज विराट्सम्बन्धि तस्माद्दशसंख्याद्वारा एतौ दशर्चौ अन्नाद्यस्य अन्नयोग्यस्याक्षस्यावरुध्यै अवरोधनाय भवतः ॥ ८ ॥

अथानयोरुत्तरस्य दशर्चस्य किञ्चिदङ्गं विधत्ते।

उत्तरो दशर्चो भवति सोदर्क इन्द्रियस्य वीर्यस्य रसस्यानतिक्षाराय ॥ ९ ॥

सना च सोमेत्युत्तरो द्वितीयो दशर्चः सोदर्कः अथानोवस्य सख्यधीति प्रत्यृचं समान अवसानो भवति किमर्थमिन्द्रियस्य वीर्यस्य इन्द्रियात्मकस्य सामर्थ्यस्य रसस्य चीरादेश्च अनतिक्षाराय अतिक्षारः अतिशयेन क्षरणमपगमनं तत्र संहित्याय एकस्य पादस्य प्रत्यृचमावेष्टनात् तेन सन्तिष्ठन्नन्यत् पादद्वयं दृढं भवतीत्यर्थः ॥ ९ ॥

तस्यैव पादस्य कुतः पुनरावृत्तिरित्यत आह ।

यत्र वै देवा इन्द्रियं वीर्यꣳ रसमपश्यꣳस्तदनुन्यतुदन् ॥ १० ॥

यत्र वै यस्मात् खलु मन्त्रभागे देवाः पुरा इन्द्रियात्मकं वीर्यं रसञ्चापश्यन् तत्तदनुन्यतुदन् प्रत्यृचमभ्यस्यन् यद्वा यत्र खलु स्थाने देवाः पुराऽनुष्ठानसमये इन्द्रियं वीर्यं रसमजानन् तद्वीर्यं तत्रानुन्यतुदन् आनुपूर्व्येण स्थापयन् तस्माद्विधितो रसः कामयते मन्त्रात् श्रवणविधानस्थानीयेन च सर्व्यासामुपर्य्येव तथा ऋचां तत्समानेन पादेन पिहितत्वात् अनतिक्षारो भवतीत्यर्थः ॥ १० ॥

अथ चतस्रः स्तोतीया विधत्ते ।

चतुर्ऋचो भवति प्रतिष्ठायै ॥ ११ ॥

चतुर्ऋचः चतस्र ऋचो यस्मिन् समुदाये सोऽयन्तरत्समन्दी-त्यादिकश्चतुर्ऋचो भवति स च प्रतिष्ठायै यज्ञस्य यजमानस्य प्रतिष्ठानाय भवति चतुष्पादा हि गवादयो लोके प्रतिष्ठिता दृश्यन्ते ॥ ११ ॥

अथैतत् स्तौति।

ध्वस्रे वै पुरुषन्तो तरन्तपुरुमीढाभ्यां वैददश्विभ्याꣳ सहस्राण्यदिक्षतां तावैच्छेतां कथन्नाविदमात्तमप्रतिगृहीतꣳ स्यादिति तौ प्रत्यैतां ध्वस्रयोः पुरुषन्योरा सहस्राणि दद्महे तरत्समन्दीधावतीति ततो वै तत्तयोरात्तमप्रतिगृहीतमभवत् ॥ १२ ॥

ध्वस्रे घत्वृणां स्वधयित्यौ पुरुषन्तो एतत्समज्ञे लिङ्गव्यत्ययः एतत्समज्ञौ राजानौ वैददश्विभ्यां विददश्वगोत्राभ्यां तरन्त-पुरुमीढाभ्यां ऋषिभ्यां सहस्राणि सहस्रसंख्यकानि अदिक्षतां दातुमैच्छतां ततस्तादृशौ ऐच्छेतां ईक्षणं पर्य्यालोचनमकुरुतां नावावयोरिदं धनमात्तं स्वीकृतं कथं केन प्रकारेण अप्रतिगृहीतं स्यात् प्रतिग्रहदोषवियुक्तं भवेदिति ततस्तौ प्रत्यैतां अजानीतां ध्वस्रयोः पुरुषन्योरेति मन्त्रमपश्यतामित्यर्थः ततोऽनन्तरं मन्त्र-प्रभावात्तं स्वीकृतं तयोस्तद्धनं अप्रतिगृहीतं प्रतिग्रहदोषविमु-क्तमभवत् ॥ १२ ॥

अथैतदेदनं प्रशंसति ।

आत्तमस्याप्रतिगृहीतं भवति य एवं वेद ॥ १३ ॥

स्पष्टोऽर्थः ॥ १३ ॥

अथ प्रकारान्तरेण मन्त्रचतुष्टयं स्तौति ।

विनाराशंसो भवत्युभयस्यान्नाद्यस्यावरुध्यै मानुषस्य च दैवस्य च ॥ १४ ॥

ध्वस्योः पुरुषन्योरेति नरयोः शस्यमानत्वात् अयं चतुर्ऋचो विनाराशंसो नाराशंसविशिष्टो भवति अत उभयस्य द्विविधस्य मानुषस्य मनुष्यसम्बन्धिनश्च दैवसम्बन्धिनश्च अन्नाद्यस्यावरुध्यै अवरोधनाय भवति ॥ १४ ॥

अथ बर्हिष्यमानस्यान्त्यं तृचं विधत्ते ।

तृच उत्तमो भवति येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥ १५ ॥

गतार्थमेतत् ॥ १५ ॥

एवं स्तोत्रीयासु विहितासु स्तौति ।

त्रयस्त्रिंशएव स्तोमोभवति प्रतिष्ठायै देवतासु वा एष प्रतिष्ठितः ॥ १६ ॥

अस्य बहिष्पवमानस्य त्रयस्त्रिंशएव स्तोमो भवति स च यजमानस्य प्रतिष्ठायै प्रतिष्ठानाय भवति कुतः त्रयस्त्रिंशत्संख्यासु देवतासु खल्वेकएव त्रयस्त्रिंशत्प्रतिष्ठितः स्वयं प्रतिष्ठितवान् प्रतिष्ठाहेतुरित्यर्थः ॥ १६ ॥

इति तारण्डमहाब्राह्मणे त्रयोदशाध्यायस्य

सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

अथास्मिन् षष्ठेऽहनि प्रथममाज्यस्तोत्रं दर्शयति ।

इमꣳ स्तोममर्हते जातवेदस इत्याग्नेयमाज्यं भवति सोदर्कमिन्द्रियस्य वीर्यस्य रसस्यानतिच्चाराय यत्र वै देवा इन्द्रियं वीर्यꣳ रसमपश्यꣳ स्तदनुन्यतुदन् ॥ १ ॥

इमं स्तोममिति त्रच आग्नेयमग्निदैवत्यं प्रथममाज्यस्तोत्रं भवति तत्र सोदर्कं समानोदर्कं अग्नेः सख्ये मारिषामावयन्तव इत्यनेन पादेन प्रत्यृचं समाप्यमानं भवति ग्निष्टं सिङ्क्ते ॥ १ ॥

अथ द्वितीयमाज्यस्तोत्रं दर्शयति ।

प्रतिवाꣳ सूर उदिते इति सूरवन् मैत्रावरुणं ॥ २

प्रतिवां सूर इति त्रचः सूरवत् सूरशब्दयुक्तं मैत्रावरुणं मित्रावरुणदेवताकं द्वितीयमाज्यस्तोत्रं भवति ॥ २ ॥

तदेतत् स्तौति।

अन्तो वै सूरोऽन्त एतत् षष्ठमह्नामन्त एव तदन्तेन स्तुवते प्रतिष्ठायै ॥ ३ ॥

सूरः सूर्योऽन्तो वै अवसानभूतः एतत् षष्ठमहस्य अह्नामन्तः अन्तेन षष्ठस्य समापनात् तत्तथा सति अन्तेन अन्तभूतसूर्यस्य वाचकपदयुक्तेन ऋचेनान्त एव स्तुवते स्तुवन्त्यङ्गातारः प्रतिष्ठायै प्रतिष्ठानार्थमुभयोः सारूप्यादतः प्रतिष्ठाहेतुरित्यर्थः ॥ ३ ॥

अथ तृतीयमाज्यस्तोत्रं दर्शयति।

भिन्धि विश्वा अपद्विषः इत्यैन्द्रꣳ सोदर्कमिन्द्रियस्य वीर्यस्य रसस्यानतिक्षाराय यत्र वै देवा इन्द्रियं वीर्यꣳ रसमपश्यꣳस्तदनुन्यतुदन् ॥ ४ ॥

भिन्धि विश्वा इति ऋचमैन्द्रं इन्द्रदैवत्यं तृतीयमाज्यस्तोत्रं तच्च सोदर्कं समानोदर्कं समानावसानं वसुष्वर्कं तदाभरेति गतमन्यत् ॥ ४ ॥

अथ चतुर्थमाज्यस्तोत्रं दर्शयति।

यज्ञस्य हिꣳस्य ऋत्विजेत्यैन्द्राग्नꣳ सोदर्कमिन्द्रियस्य वीर्यस्य रसस्यानतिक्षाराय यत्र वै देवा इन्द्रियं वीर्यꣳ रसमपश्यꣳस्तदनुन्यतुदन् स्तोमः ॥५॥

यज्ञस्य हिस्र इति तृचः ऐन्द्राग्नं इन्द्राग्निदेवताकं चतुर्थमाज्यस्तोत्रं तच्च इन्द्राग्नी तस्य बोधतमिति पादेन सोदर्कं समानोदर्कं गतमन्यत् पूर्वोक्त एव तयस्त्रिंशस्तोमः चतुर्ष्वाज्यस्तोत्रेषु कार्य्यः ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य
अष्टमः खण्डः ।

अथ नवमः खण्डः ।

अथास्मिन्नहनि माध्यन्दिनस्य पवमानस्य प्रथमतृचं विधत्ते।

इन्द्रायेन्दो मरुत्वत इति मरुत्वतीयागायत्रा-भवन्ति ॥ १ ॥

मरुत्वत्यो मरुच्छब्दयुक्ता इन्द्रायेन्दो मरुत्वत इत्याद्यास्तिस्रः गायत्रछन्दस्काः स्तोत्रीया माध्यन्दिनपवमानस्य भवन्ति ॥ १ ॥

अथासामाध्यन्दिनसवने सङ्गतिमाह ।

मरुत्वद्धि माध्यन्दिनꣳ सवनं ॥ २ ॥

मरुत्वत् मरुद्भिर्युक्तं हि माध्यन्दिनं सवनं मरुत्वतीयग्रहाणां मरुत्वतीयस्य च शस्त्रस्य सङ्गावात् ह्यतो मरुत्वत्यस्तत्र सङ्गता इत्यर्थः ॥ २ ॥

अथान्यं तृचं विधत्ते ।

सृज्यमानः सुहस्त्येति सिमानां रूपं ॥ ३ ॥

सृज्यमानःसुहस्त्येति तत्र सिमानां शाक्करीणां रूपं तत्र हि गोभिरज्ञानो अर्षसीति श्रुतं गावश्च शाक्वर्य इति गोशब्दयुक्तस्तृचः शाक्करीणां रूपमित्युच्यते ॥ ३ ॥

ननु शाक्करीसम्बद्धस्तृचो रैवतपृष्ठके षष्ठेऽहनि कथं सङ्गच्छत इति तत्राह ।

समानं वै सिमानाञ्च रूपं रेवतीनाञ्च सिमाथो ह्यधिरेवत्यः प्रजायन्ते ॥ ४ ॥

सिमानां शाक्करीणां शाक्करसाम्न उत्पत्तेरनन्तरमेव रेवत्यः प्रजायन्ते सृष्टिसमये रैवतं सामोत्पद्यते तथा च प्रागाम्नातं स शाक्करीरसृजत तदपां घोषोऽन्वसृज्यत रेवतीरसृजत तद्गवां घोषोन्वसृज्यतेति अत्र सर्व्वत्र शाक्वर्य इति चेत् साधारणतृच-वाचिना आर्धेयं सामोच्यते उभयोरत्र व्यवहिततेति द्रष्टव्यं तस्मान्नैरन्तर्य्येण जातत्वात् शाक्ररेवतयोः समानरूपत्वमेवेति कृत्वा शाक्करसम्बद्धोऽपि तृचोऽस्मिन् षष्ठेऽहनि सङ्गत इत्यर्थः ॥४॥

अथ तृचान्तरं विधत्ते ।

एतमुत्यन्दश्चिप इत्यादित्या आदित्या वा इमाः प्रजास्तासामेव मध्यतः प्रतितिष्ठति ॥ ५ ॥

एतमुत्यन्द्शच्छिप इत्याद्यास्तिस्र आदित्याः सम्बन्धिन्यः स्तोत्रीया भवन्ति समादित्यैरेभिरस्यतेति तदाम्नातं इमाः दृश्यमानाः सर्व्वाः प्रजाः देवमनुष्याद्याः आदित्या वै अदितेः पुत्रा इति तासां प्रजानामेव मध्यतो मध्ये आदित्यवतीभिः स्तोत्रीयाभिः प्रतितिष्ठति यजमानः प्रतिष्ठितो भवति ॥ ५ ॥

ननु प्रकृतो माध्यन्दिनपवमानान्तस्तृचस्त्रैष्टुभः प्रतुद्रवेति कथं तत्स्थाने गायत्रस्य तृचस्य सङ्गतिरिति तदाह।

गायत्राः सत्यस्त्रिष्टुभो रूपेण तस्मात्त्रिष्टुभां लोके क्रियन्ते ॥ ६ ॥

त्रिष्टुप्सम्बन्धेन्द्रशब्दयोगेनात्रैष्टुभत्वात् त्रिष्टुभां स्थाने क्रियन्ते ॥ ६ ॥

अथेन्द्रायेन्दो मरुत्वत इति प्रथमे तृचे गायत्रं साम विधाय पूर्ववत् स्तावकं ब्राह्मणञ्चातिदिशति।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ ७ ॥

सिद्धमेतत् ॥ ७ ॥

अथास्मिन्नेव तृच आवृत्ते सामान्तरं विधत्ते।

दृषोदृघोयं भवति ॥ ८ ॥

दृषोदृघोयन्नाम सामाऽस्तोऽस्मिन्नेव तृचे गेयं भवति दृषो

ऊर्ध्व इत्यस्य साम्नोऽवसाने दर्शनात् इषोऽधीयत्वमस्येति द्रष्टव्यं ॥ ८ ॥

तदेतत् स्तौति।

पशवोवा इषोऽधीयं पशूनामवरुध्या इषे वै पञ्चममहर्वृधे षष्ठमवर्द्धन्त ह्येतर्हि यजमानमेवैतेन वर्द्धयन्ति ॥ ९ ॥

इषोऽधीयाख्यं साम पशवो वै पशवएव इषा ऊर्ध इत्यनेन अन्नेन वर्द्धयित्वात् पशवश्च क्षीरादिना वर्द्धयन्तीति तच्छब्दः तस्मात् पशूनां ऊर्ध्वे वर्द्धनायैवैतत् क्रियते अपि च इषे वै अन्नार्थमेव पञ्चमं शाक्करमहरनुष्ठितं ऊर्ध्वे वर्द्धनाय षष्ठमहरनुष्ठीयते एतर्हि एतस्मिन् काले षष्ठस्याङ्गोऽनुष्ठानकाले हि यस्माद्देवा अवर्द्धयन्त समृद्धा अभवन् यस्माद्वर्द्धनाय षष्ठस्याङ्गोऽनुष्ठानं अतस्तत्सूचकेनेषोऽधीयेनैतेन साम्ना यजमानमेव वर्द्धयति ॥ ९ ॥

अथास्मिन्नेव ऋचे पुनरावृत्तेः सामान्तरं विधत्ते।

क्रौञ्चम्भवति ॥ १० ॥

क्रुञ्चा नामाङ्गिरस ऋषिः तेन दृष्टं साम क्रौञ्चं तदिन्द्रायेन्दो मरुत्वत इति ऋचे गातव्यं ॥ १० ॥

तदेतत् स्तौति।

क्रुङ्ग्येयमहरविन्दद्ऐयमिव वै षष्ठमहरहरेवैतेन विन्दन्ति ॥ ११ ॥

क्रुङाख्यऋषिः एयं एषणीयमहः अनेन साम्ना अविन्दत् लभत इदं षष्ठमहश्च एयमिव वै एषणीयमिव खलु तस्मादेतेन क्रौञ्चेन इदं षष्ठमहरेव विन्दन्ति लभन्ते ॥ ११ ॥

अथास्मिन्नेव ऋचे सामान्तरं विधत्ते।

वाजदावर्य्यो भवन्ति ॥ १२ ॥

रेवतीर्न इत्यस्यां योनौ वेदसामाख्येग्रन्थे गीयमानं साम वत्सो वाजदावर्य्यो रेवत्यः रेवतीरिति योनौ दृष्टं बह्वृचनं साम्यृचार्थं इति रेवत्य इति निर्देशः तद्रैवतं साम इन्द्रायेन्दो इत्यस्मिंस्तृचे गेयं तच्च प्रतिष्ठित्यै प्रतिष्ठानाय यजमानस्य भवति रेवतीशब्दस्य रयिमत् वाचकत्वात् रयिमतश्च पुरुषस्य प्रतिष्ठादर्शनात् रेवतीनां प्रतिष्ठाहेतुत्वं ॥ १२ ॥

अथैतत् स्तौति।

अन्नं वै वाजोऽन्नाद्यस्यावरुध्यै यदाहि वा अन्नमथ गौरथाश्वोऽथ पुरुषो वाजी ॥ १३ ॥

वाजस्य दात्री वाजदावरीति संज्ञाया उत्पत्तिः वाजश्चान्नं वै अन्नमेव तस्माद्वाजदावर्य्याख्यं साम अन्नाद्यस्य प्राप्त्यै भवति अपिच यदा खलु यजमानस्य बह्वन्नं भवति अथानन्तरं

गौः गावश्च भवन्ति अथानन्तरं रथाश्च भवन्ति अथानन्तरमश्वाश्च भवन्ति अथानन्तरं पुरुषो वाजी वेजनवान् वेगवांश्च भवति अन्नहेतुका एते यजमानस्य भवन्तीति ॥ १३ ॥

अथास्मिंस्तृचे सामान्तरं विधत्ते।

रेवत्यो भवन्ति प्रतिष्ठायै ॥ १४ ॥

रेवतीर्न इत्यस्यां योन्यां छन्दःसामाख्ये ग्रन्थे गीयमानसामबाधपुरःसरं पवमानस्तोत्र एतद्ज्ञातव्यमिति ॥ १४ ॥

अथास्य निधनसंख्यामनूद्य स्तौति।

षण्निधना षड्ऋतवस्य धृत्यै ॥ १५ ॥

तीर्ना इडा सधमादा २ इडा ३ ऊ वा २३ ई ३४ डा इत्यादीनि षण्निधनानि यासां रेवतीनां षण्निधनाः तथाविधा भवेयुः किमर्थं षड्ऋतवस्य एतद्देतस्यानुष्ठितस्य षष्ठस्य षडहस्य धृत्यै धारणाय भवति ॥ १५ ॥

ननु रैवतं साम वैरूपवैराजादिवत् षष्ठस्तोत्र एव गातव्यं एतच्च षष्ठमहः रैवतषष्ठकं किमिति पवमाने विधीयमान इत्याशङ्क्य विपक्षे वाजदावर्य्य इति तद्बद्धवचनं वाजदावर्य्याख्यं मेन्द्रायेन्दवित्यस्मिंस्तृचे गातव्यमित्युपपादयति।

आपो वै रेवत्यस्ता यत् षष्ठं कुर्युरपशुर्यजमानः स्यात् पशूनस्य निर्हन्येयुर्यच्च वा आपो वीव वर्त्तन्ते

तदोषधयो जायन्तेऽथ यत्रावतिष्ठन्ते निर्मृतुकास्तत्र भवन्ति तस्मात् पवमाने कुर्वन्ति पराचा हि पवमानेन स्तुवते ॥ १६ ॥

या इमा रेवत्यस्ता आपो वै अपरूपा एव रयिभिर्हनैर्मणिमुक्तादिभिस्तासां युक्तत्वात्ता रेवत्यः; तद्रेवतं साम यदि पृष्ठं पृष्ठस्तोत्रं कुर्युरुद्गातारस्तर्हि यजमानः अपसुः; पशुरहितः स्यात् यदि तान् प्रयुञ्ज्येरन् अपामभावात् अस्य यजमानस्य पशून्निर्दहेयुः; नाग्नयेयुः; नन्वेवं रेवतीनां प्रयोगे दोषदर्शनात् कथं तत्तानुष्ठानमिति तद्दर्शयति यत्र वा आप इति यत्र खलु देशे आपो वीव वर्त्तन्त इव विरलमेव वर्त्तमाना भवन्ति तत्रौषधयो जायन्ते अथ यत्र तु देशेऽवतिष्ठन्ते नित्यं वर्त्तन्ते तत्रौषधयो निर्मृतुकानिर्गमनशीला भवन्ति तत्र नोत्पद्यत इत्यर्थः; एवं सति अग्नंसुतारेवत्यः पृष्ठस्तोत्रे यदि क्रियेरन् तदा तयस्त्रिंशस्तोमसम्पत्तये अवश्यमभ्यसेरन् तथा चापां भूयिष्ठत्वादोषध्युत्पत्तौ यजमानस्यापशुत्वं स्यात् तस्मात्पवमाने माध्यन्दिने रेवतीः कुर्वन्ति तत्र चोक्तापां दृष्टिर्न भवतीत्याह पराचा हीति हि यस्मात् परावा अनादृत्तेन पवमानस्तोत्रेण स्तुवते तस्मात् रेवतीनामभ्यासाभावात् अग्नंसुतानां तासामभावाद् बाहुल्याभावाच्च उक्तदोषद्वयाभावः ॥ १६ ॥

अथ विहितं सामचतुष्कं संहत्य स्तौति।

मेथी वा इषोऽधीयꣳ रज्जुः क्रौञ्चं वत्सोवाज-दावर्य्यो रेवत्यो मातरो यदेतान्येवꣳ सामानि क्रियन्त एवमेव प्रत्तां दुग्धे ॥ १७ ॥

इषोऽधीयाख्यं साम मेथी वै गवां बन्धनाय निखातस्थानं मेथी तत्स्थानीयं क्रौञ्चं क्रौञ्चाख्यं साम रज्जुः गौर्बध्यते यया रज्ज्वा तत्स्थानीयं वत्सोवत्सस्थानीयो वाजदावर्य्यः वाजदावर्य्याख्यं साम रेवत्यो रैवतं साम मातरः मातृस्थानीयं एतानि सामान्येवं दृष्टरूपाणि भवन्तीति तेन एवमेव प्रत्तां प्रकर्षेण दत्तां गां दुग्धे यजमानः कामान् दोग्धि ॥ १७ ॥

अथ सामान्तरं विधत्ते।

औच्चोरन्ध्रे भवतः ॥ १८ ॥

उच्चोरन्ध्रेण दृष्टे सामनी औच्चोरन्ध्रे एते मज्यमानः सुहस्येति ऋचमाहृत्य तस्मिन् पर्य्यायेण गेय इत्यर्थः ॥ १८ ॥

अथैतद्ऋषिसम्बन्धप्रदर्शनपुरःसरं स्वर्गसाधनत्वेन स्तौति।

उच्चोरन्ध्रो वा एताभ्यामृग्भ्योऽङ्गिरसा स्वर्गं लोकमपश्यत् स्वर्गस्य लोकस्यानुख्यात्यै स्वर्गात् लोकान्न च्यवते तुष्टुवानः ॥ १९ ॥

काव्यः कविर्भृगुस्तद्गोत्रज उच्चोरन्ध्रो नामर्षिः एताभ्यां

साम्भ्यां साधनेन ऋजसा अनायासेन स्वर्गं लोकमपश्यत् अत-एते सामनी स्वर्गस्य लोकस्यानुख्यात्यै अनुख्यानाय सन्दर्शनाय भवतः किञ्च आभ्यां तुष्टुवानः स्तुतवान् स्वर्गलोकान्न च्युतो भवति चिरं तत्रैवावतिष्ठते ॥ १६ ॥

अथास्मिन्नेव ऋचे आदत्ते सामान्तरं विधत्ते ।

वाजजिद्भवति सर्वस्यास्यै सर्वस्य जित्यै सर्वं वा एते वाजं जयन्ति ये षष्ठमहरागच्छन्ति ॥ २० ॥

वाजमन्नं जयत्यनेनेति वाजजित्तत्साम स्तूयमान इति ऋचे गेयं तच्च सर्वस्य निरवशेषस्य वाजस्य अन्नस्य प्राप्त्यै भवति तथा सर्वस्य जेतव्यस्य च जित्यै जयाय च भवति ये यजमानादशरात्रस्य षष्ठमहरागच्छन्ति प्राप्नुवन्ति एते सर्वमेव वाजञ्जयन्ति ॥ २० ॥

एतदेव विवृणोति ।

अन्नं वै वाजोऽन्नाद्यस्यावरुध्यै ॥ २१ ॥

स्पष्टोऽर्थः ॥ २१ ॥

अथास्मिन्नेव ऋचे सामान्तरं विधत्ते ।

वरुणसाम भवति ॥ २२ ॥

वरुणस्य साम एतदाख्यं साम स्तूयमानः सुक्षत्र्येत्येतस्मिन्नेव ऋचे गातव्यं ॥ २२ ॥

अथैतत्प्रशंसति।

एतेन वै वरुणो राज्यमाधिपत्यमगच्छद्राज्य-माधिपत्यं गच्छति वरुणसाम्ना तुष्टुवानः ॥ २३ ॥

एतेन साम्ना साधनेन पुरा वरुणो देवः राज्यं राजत्वं आधिपत्यं अधिपतित्वं स्वामित्वञ्चागच्छत् प्राप्नोत् तस्मादद्यतनोऽपि वरुणसाम्ना तुष्टुवानः स्तुतवान् राज्यमाधिपत्यं गच्छति प्राप्नोति ॥ २३ ॥

अथ सामान्तरं विधत्ते।

अङ्गिरसां गोष्ठो भवति ॥ २४ ॥

अङ्गिरसां गोष्ठाख्यं साम स्तूयमानः सुहस्त्येत्याद्यृक्तेऽस्मिन् एव ऋचे गेयं ॥ २४ ॥

अथैतत्प्रशंसति।

पशवो वै रेवत्यो गोष्ठमेव तत्पशुभ्यः पर्य्यस्यन्ति तमेवैनान् प्रवर्त्तयन्त्यविस्रंसाय ॥ २५ ॥

याः पुर्व्वप्रयुक्ता रेवत्यः ताः पशवो वै पशव एव अतस्तासां गोष्ठाख्यं स्थानमपेक्षते तथा चाङ्गिरसां गोष्ठो भवतीति यत् तत्तेन पशुभ्यः पशूनामर्थं गोष्ठं गावो यत्र तिष्ठन्ति तादृशं स्थानमेव पर्य्यस्यन्ति परितः समीपे हि यन्ति स्थापयन्ति यद्गोष्ठमेव एतान् पशून् प्रवर्त्तयन्ति अविस्रंसाय अविनाशाय ॥ २५ ॥

अथ एतमुत्यन्दशच्चिप इति तृचे गातव्यं साम दर्शयति।

इडवद्वामदेव्यं भवति॥ २६॥

इडवत् इडशब्दयुक्तं वामदेव्यं वामदेवेन ऋषिणा दृष्टमेतदाख्यं साम एतमुत्यन्दशच्चिप इत्यन्तिमे तृचे गेयं॥ २६॥

अथैतदन्नप्राप्तिसाधनत्वेन स्तौति।

एतेन वै वामदेवोऽन्नस्य पुरोधामगच्छदन्नं वै ब्रह्मणः पुरोधान्नाद्यस्यावरुध्यै॥ २७॥

एतेन वै वामदेवोऽन्नस्य पुरोधामगच्छदन्नं वै प्राप्तये भवति॥ २७॥

अथैतच्छन्दोद्वारा स्तौति।

गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति॥ २८॥

सिद्धमेतत्॥ २८॥

ननु वैष्टुभं माध्यन्दिनं सवनं सर्वप्रकृतौ ज्योतिष्टोमे कथं तत्र गायत्रः सङ्गच्छत इति तत्राह।

इन्द्रवत्यो गायत्रो भवन्ति तदु वैष्टुभादूपान्नयन्ति स्तोमः॥ २९॥

इन्द्रायेन्दो मरुत्वत इत्याद्या गायत्यः यस्मात्तस्मादिन्द्रदेवत्य इन्द्रशब्दयुक्ता भवन्ति तद्योगस्य प्रकृतौ माध्यन्दिनसवने दर्शनात् त्रैष्टुभं रूपं तदु तस्मादेव मरुच्छब्दयोगात् एता गायत्यः त्रैष्टुभात् त्रिष्टुभः सम्बन्धिनो रूपान्न यन्ति नोपगच्छन्ति एवं गायत्यादिषु दृहवद्वामदेव्यान्तेषु एकादशसु सामसु त्रिचेषु क्रियमाणेषु निष्पद्यमानस्त्रयस्त्रिंशस्तोमोऽस्य पवमानस्तोत्रस्य कार्य्यइत्यर्थः ॥ २६ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य

नवमः खण्डः ।

अथ दशमः खण्डः ।

अथ पृष्ठस्तोत्रेषु स्तोत्रीयाणामृचां छन्दोविशेषं विधित्सुराह ।

यातयामान्यन्यानि छन्दाꣳस्ययातयामा गायत्री तस्माद्गायत्रीषु स्तुवन्ति ॥ १ ॥

अन्यानि त्रिष्टुबादीनि छन्दांसि यातयामानि द्वितीयादिष्वहःसु विनियुक्तत्वात् गतसारांणि यद्यपि गायत्री प्रथमेऽहनि विनियुक्ता तथाप्ययातयामा यातयामत्वदोषरहिता प्रजापतिमुखात् अग्निना सहोत्पन्नत्वेन तस्या उत्कर्षादिति तस्मात्

षष्ठेऽहन्यस्मिन् गायत्रीषु पृष्ठैः सामभिः स्तुवन्तिरेवतीर्नः सध-माद इत्याद्यासु गायत्रीषु पृष्ठस्तोत्राणि कार्य्याणीत्यर्थः ॥ १ ॥

अथ ब्रह्मपृष्ठस्य स्तोत्रीया ऋचो विदधानः किञ्चिद्विशेषं विधत्ते ।

सुरूपकृत्नुमूतय इत्यभ्यारम्भेण षट्पदाः षष्ठस्याहोरूपं तेन षष्ठमहरारभन्ते सन्तत्यै ॥ २ ॥

सुरूपकृत्नुमूतय इत्याद्यास्तिस्रो गायत्र्यः ब्रह्मसाम्नः स्तोत्रीयाः ताभ्यामारम्भेण प्रत्यृचं षट्पदाः अयमर्थः गानसमये आसां प्रथमपादस्त्रिरभ्यस्यते तृतीयपादस्यान्त्यश्चतुरृचस्त्रिरभ्यस्यते एवमभित आद्यन्तयोरारम्भे पुनःपुनरादाने सति प्रत्येकमेताः षट्पदा भवन्ति प्रथमपादस्य त्रिरावृत्तत्वात् त्रयः पादा द्वितीयश्चैकः उत्तमश्चैकः पुनस्तदेतस्य चतुरृचस्य द्वयोरभ्यासयोरेकः पाद इति पादषट्कसम्पत्तिः अतः षट्संख्यायोगात् एताः षष्ठस्याहोरूपं तेन कारणेन षट्पदाभिः षष्ठमहरारभन्ते स्वीकुर्वन्ति किमर्थं सन्तत्यै पूर्वोत्तराभ्यामहर्भ्यां सन्तानार्थं ॥ २ ॥

अथाच्छावाकपृष्ठस्तोत्रीया ऋचो दर्शयति ।

उभे यदिन्द्ररोदसी इति षट्पदाः षष्ठस्याहोरूपं तेन षष्ठमहरारभन्ते सन्तत्यै ॥ ३ ॥

उभे यद्दिन्द्र रोदसी इत्याद्याः षट् पदा यासां तथाविधा ऋच अच्छावाकसाम्नः स्तोतीया भवन्ति शिष्टं पूर्ववद्व्याख्येयं ॥ ३ ॥

अथाद्यं पृष्ठस्तोतीयं साम विधत्ते।

रेवतीषु वारवन्तीयं पृष्ठं भवति ॥ ४ ॥

पृष्ठस्तोत्रत्वेन कार्यमित्यर्थः पशवो वै रेवत्यइति हि प्रागाम्नातं ॥ ४ ॥

पशवस्त्वाप्विकारा इत्यभिप्रायेणाह।

अपां वा एष रसोयद्रेवत्यो रेवतीनाꣳ रसोयद्वारवन्तीयꣳ सरसा एव तद्रेवतीः प्रयुङ्क्ते यद्वारवन्तीयेन पृष्ठेन स्तुवते ॥ ५ ॥

रेवत्यः रेवच्छब्दयुक्ताः स्तोतीया इति यदेष अपामेव रसः सारः तथा वारवन्तीयाख्यं सामेति यत् एष रेवतीनां रसः एवं सति तासु रेवतीषु वारवन्तीयस्य करणात् ता रेवतीः सरसाः रससहिता एव प्रयुङ्क्ते करोति यद्यस्माद्वारवन्तीयेन साम्ना निर्वर्त्त्य तेन पृष्ठेन पृष्ठस्तोत्रेण स्तुवते स्तुवन्त्युद्गातारः तत्तस्मादित्यर्थः ॥ ५ ॥

अथैतच्चनप्राप्तिहेतुत्वेन स्तौति।

रेवद्वा एतद्दैवत्यं यद्वारवन्तीयमास्य रेवान् रैवत्यो जायते ॥ ६ ॥

रेवत् ऋद्धिमत् रयेर्मतौ बऊलमिति सम्प्रसारणं पूर्वत्वं रयिमत् धनयुक्तमेवैतद्रेवतीनां सम्बन्धि साम यद्वारवन्तीयाख्यं साम एतद्रेवतीषु कुर्वतो यजमानस्य रेवान् रयिवान् धनवान् रैवत्यः रेवत्यः पशवस्तेषां स्वामी एवं गुणविशिष्टः पुत्रः आजायते आभिमुख्येनोत्पद्यते ॥ ६ ॥

अथैतद्वेदनमपि धनप्राप्तिहेतुरित्याह ।

रेवान् भवति य एवं वेद ॥ ७ ॥

गतमेतत् ॥ ७ ॥

अथैतस्य वारवन्तीयस्य गानसमये किञ्चिद्विधित्सुस्तदर्थमाख्यायिकामाह ।

केशिने वा एतद्बालभ्याय सामाविरभवत्तदेनमब्रवीदगातारो मा गायन्ति मा मयोङ्गासिषुरिति कथं त आगा भगव इत्यब्रवीदागेयमेवास्मागायन्निव गायेत्यतिष्ठायै तद्बलम्म्यारिजानतं पश्चादत्तः शयानमेतामागां गायन्तमजानात्तमब्रवीत् पुरस्त्वादधा इति तमब्रुवन् को न्वयं कस्मा अलमित्यलन्तु वै मल्लमिति तद्बलम्मस्यालम्मत्वं ॥ ८ ॥

दालभ्याय दलभपुत्राय केशिने एतत्साम्नाय ऋषये पुरा खल्वेतत् वारवन्तीयं साम आविरभवत् बुद्धौ प्रकाशमानमासीत् तच्चाविर्भूतं साम केशिनमृषिमब्रवीत् अवोचत् कथमिति तदुच्यते हे ऋषे मा मां अगातारोगानुमकुशलाः गायन्ति प्रयुञ्जते ते गानशक्तिरहिताः पुरुषाः मया साम्ना साधनेन मोद्गासिषुः उद्गानं न कुर्य्युरिति एवं साम्नोक्ते सति ऋषिरब्रवीदुक्तवान् हे भगवन् ऐश्वर्य्यादियुक्त मन्त्रात्मन् ते त्वदीया आगा प्राध्यानं कथं केन प्रकारेण कर्त्तव्यमिति पुनः सामाब्रवीत् प्रहमागेयं आङीषदर्थईषत् अप्रयत्नेन गातव्यमेवास्मि भवामि वाक्यावसानद्योतक इति शब्दोऽवाप्यनुषञ्जनीयः यस्मादेवं साम्नोक्तं तस्मात् आगायन् आगानं कुर्व्वन्निव यथा लोकेऽलोकेव प्रयत्नेन निष्पन्नेन स्निग्धेन स्वरेण लौकिका गानं कुर्व्वन्ति एवमेव गायेदुद्गाता एवं गाने सति तत्साम प्रतिष्ठायै यजमानस्य प्रतिष्ठानाय सम्पद्यते कुत एतदित्यतआह तदलम्साम्पारिजातमिति परिजानतः पुत्रं अलम्सं एतत्सं च पश्चादर्द्धं रथाङ्गस्य चक्रात् प्रत्यग्भागे शयानं निषसं एतामागां एतं पूर्व्वोक्तमागानं गायन्तं उच्चारयन्त तत्साम्राजानात् अज्ञासीत् ज्ञात्वा च तमलम्साङ्गायन्तमब्रवीत् पुरस्ताद्यथाव्यस्य पुरोभागे अधः प्रात्मानं धारयेति एवं साम्नोक्तेन पार्श्वस्था ऋषयोऽब्रुवन् भोस्तु कोन्वयं पुरुषः कस्मै वा प्रयोजनाय अलं समर्थ इति एवं पार्श्वस्थैरधिक्षिप्ते सामैवाब्रवीत् अलम्न समर्थएव खल्वेष मत्साम्नेति मां सम्यक्गातुं कुशल इत्यर्थः यस्मादेवं साम्नोक्तमलं

मल्लमिति तत्तस्मात् अस्य ऋषेः अलम्मत्वं अलम्म इति नाम सम्पन्नं यस्मादयमृषिरस्य साम्न आगानेन स्वैक्ष्येन पुरतो धारितोऽभूत् तस्मादेतदीयमागानं प्रतिष्ठाहेतुरित्यर्थः ॥ ८ ॥

अथ स्तोभविशेषमनूद्य प्रतिष्ठाहेतुतामाह।

इडेहेति गायेत्प्रतिष्ठायै ॥ ९ ॥

इडाहायि इति स्तोभं पुनःपुनः प्रक्षिप्य गायेत् इडशब्देन इह लोकस्य प्रत्यभिज्ञानात् अस्मिन् लोके प्रतिष्ठायै प्रतिष्ठानाय यजमानस्यैतद्गानं भवति ॥ ९ ॥

अथ मैत्रावरुणषष्ठस्तोत्रं प्राकृतमेवेत्यभिप्रेत्य तदनन्तरस्य ब्रह्मषष्ठस्य विहिते सुरूपकृत्नुमूतय इति ऋचे गातव्यं साम दर्शयति।

ऋषभो रैवतो भवति ॥ १० ॥

रैवत इति रेवतीनां सम्बन्धी ऋषभः एतस्य पदद्वयाभिधेयं साम सुरूपकृत्नुमूतय इत्यभ्यारम्भेण षट्पदासु स्तोत्रीयासु गातव्यं ॥ १० ॥

अथैतत्प्रजातिहेतुत्वेन स्तौति।

पशवो वै रैवत्यः पशुष्वेव तन्मिथुनमप्यर्ज्जति प्रजात्यै न ह वा अनृषभाः पशवः प्रजायन्ते ॥ ११ ॥

रैवत्यो रैवतं सामेति यत्तत् पशवो वै पशुरूपा एव

अवशिष्टं ऋषभः शक्करो भवतीत्यस्य वाक्यशेषवद्व्याख्येयं ॥ ११ ॥

अथाच्छावाकस्तोत्रं साम दर्शयति।

श्येनो भवति ॥ १२ ॥

श्येनवत् क्षिप्रकारित्वात् सामापि श्येनः एतत्संज्ञं साम उभे यदिन्द्रेति त्रृचे गातव्यं ॥ १२ ॥

अथैतस्य दृष्टान्तपुरःसरं क्षिप्रकारितामाह।

श्येनो ह वै पूर्वप्रेतानि वयाꣳस्याप्नोति पूर्वप्रेतानिव वै पर्वाण्यहानि तेषामाप्त्यै श्येनः क्रियते ॥ १३ ॥

श्येनाख्यः खलु पक्षी पूर्वप्रेतानि पूर्वमेवोत्पतितानि वयांसि पक्षजातानि स्वयं पश्चादुत्पतनविशेषं प्राप्नोति लुप्तोपममेतत् यथैवं लौकिकः श्येनः एवमेव तेषामङ्गां प्राप्त्यै क्षिप्रप्राप्तये श्येनः श्येनाख्यं साम क्रियते कानि पुनस्तानि प्राप्यानि पूर्वाणि अस्मात् षष्ठादङ्गः पूर्वानुष्ठितान्यहानि पञ्चसंख्यानि पूर्वप्रेतानीव वै पूर्वोत्पतितपक्षजातसदृशानि खलु तेषामङ्गानामित्यर्थः ॥ १३ ॥

एवं पूर्वानुष्ठितानां पञ्चानामङ्गां प्राप्त्यर्थमेतदिति स्तुत्वानुष्ठीयमानस्य षष्ठस्याङ्गोऽपि पारप्राप्तिः अनेनैव भवतीत्याह।

श्येनो वा एतद्हः सम्भरयितुमर्हति स हि वयसामाशिष्ठस्तस्यानपहननाय सम्भरणायैतत् क्रियतेऽन्तो हि षष्ठञ्चाहः सप्तमञ्च ॥ १४ ॥

श्येनो वै श्येन एव एतत् षष्ठमहः सम्मारयितुं पारयितुं पारमवसानं पारयितुमर्हति शक्नोति स खलु वयसां पक्षिणां मध्ये आश्रिष्टः व्याप्ततमः तस्य षष्ठस्याङ्गः अनपहननाय सम्मारणाय सम्यक् पारप्रापणाय च एतत्साम क्रियते षष्ठञ्च सप्तमञ्च यदिह सम्पद्येते एतद्दृश्यं अन्तोहि अवसानभूतं हि षष्ठेनाङ्गा षडहस्य समाप्तत्वात् उभयोरङ्गोरन्तत्वं तस्मात् षष्ठस्याङ्गः पारप्राप्तिरपेक्षितेति भावः ॥ १४ ॥

अथैतेषु पृष्ठस्तोत्रेषु ब्रह्मवादिनां चोद्यमुद्भावयति।

ब्रह्मवादिनो वदन्ति यद् बृहदायतनानि पृष्ठान्यथैते द्वे गायत्र्यौ द्वे जगत्यौ क्व तर्हि बृहत्यो भवन्तीति ॥ १५ ॥

ब्रह्मवादिनस्तावद्वेदार्थाभिज्ञा ऋषयः पुरा वदन्ति एषु पृष्ठस्तोत्रेषु चोदयन्ति किमिति यत् यस्मात् पृष्ठानि पृष्ठस्तोत्राणि बृहदायतनानि बृहतीछन्द आयतनं स्थानं येषां तानि तथोक्तानि सर्व्वप्रकृतौ हि ज्योतिष्टोमे बृहतीष्वेव स्तोत्रीयासु पृष्ठस्तोत्राणि क्रियन्ते तस्मात्तत् बृहतौ षष्ठेऽहनि तथैव भवितव्यं अथ चात्र एते द्वे गायत्र्यौ द्वे जगत्यौ अत्र हि प्रथमयोः रेवतीनः कयानश्चित्र इति द्वे गायत्र्यौ ऋचौ ततस्तृतीये पृष्ठस्तोत्रे सुरूपकृत्नुमूतय इत्याद्यभ्यारम्भेण षट्पदाः तिस्रः स्तोत्रीयाः चतुर्थस्य पृष्ठस्तोत्रस्य च तएव षट्पदाः उभे यद्विद्रे-

त्याद्यास्तिस्रः अत एतयोः पृष्ठस्तोत्रयोर्याः स्तोत्रीयास्ता अष्टाक्षरैः षड्भिः पादैरुपेतत्वात् अक्षरसंख्यया अष्टाचत्वारिंशदक्षरा जगत्यो भवन्ति तस्मादादित आरभ्य द्वयोः पृष्ठस्तोत्रयोः प्रथमे द्वे गायत्यौ उत्तरयोः प्रथमे द्वे जगत्यौ क्व तर्हि कस्मिन् खलु पृष्ठस्तोत्रे बृहत्यः स्तोत्रीया भवन्ति ॥ १५ ॥

अस्य ब्रह्मवादिभिः कृतस्य चोद्यस्योत्तरं दर्शयति।

ये द्वे जगत्योः पदे ते गायत्रा उपसम्पद्येते तत् सर्व्वा बृहत्यो भवन्त्यायतने पृष्ठानि यातयत्यायतनवान् भवति ॥ १६ ॥

उपरितनपृष्ठद्वयवर्त्तिन्योर्ज्जगत्योर्ये द्वे पदे यौ द्वौ पादौ बृहत्या अतिरिच्येते अष्टाचत्वारिंशदक्षरा हि जगती भवति अपराण्यपरेण इत्यं चतुर्षु पृष्ठेषु आद्यानामृचां बृहतीत्वसम्पादनमुक्तं एवमुत्तमानामपि बृहतीत्वसम्पत्तिर्द्रष्टव्या तदेतदाह तत्सर्व्वा बृहत्यो भवन्तीति तत्तथाच वक्ष्यत्वात् च त्रिष्टैर्ज्जागतैः पादैः गायत्रीणां योजनात् सर्व्वतोऽपि पृष्ठचतुष्टयगता स्तोत्रीया बृहत्यो भवन्ति तथाच आयतने स्वकीय एव प्राकृते स्थाने पृष्ठानि पृष्ठस्तोत्राणि यातयति विस्तारयति आयतनवान् स्थानवान् यजमानो भवति ॥ १६ ॥

यद्येवं, सम्पन्नास्वेव बृहतीषु गानं स्यादित्यत आह।

षट्पदासु स्तुवन्ति षड्वा ऋचस्य इत्यै ॥ १७ ॥

षट्पदास्वेवर्चु स्तुवन्ति न सप्तादितासु बृहतीषु किमर्थं षड्रात्रस्य धृत्यै धारणाय ॥ १७ ॥

अथ प्रसङ्गादस्मिन्नहनि याज्याद्वयोः पादयोः संख्यां विधाय स्तौति ।

सप्तपदया यजति सप्तमस्याह्नः सन्तत्यै स्तोमः ॥१८॥

सप्तपदया सप्तभिः पादैरुपेतया ऋचा षष्ठेऽहनि होत्रादयो यजन्ति ताश्च सप्तपदाः आश्वलायनेन सूत्रकृता षष्ठस्य प्रातःसवन इति षड्वै ऋषन्विन्द्रऋषभाणास इन्दवः सुषुमायतमद्रिभिरित्यादिना दर्शिताः अत्र सप्तपदयोरित्येकवचनं जात्यभिप्रायात् तत्पदया यजनं सप्तमस्यागामिनोऽह्नः सन्तत्यै सन्तानाय अनेन षष्ठेनाह्ना संश्लेषाय भवति सप्तसंख्यया तस्य बृह्वौ विपरिवर्त्तनत्वात् एषु च षष्ठस्तोत्रेषु पूर्वोक्तस्तयस्त्रिंशपरः स्तोमः कार्यः ॥ १८ ॥

इति तारण्यमहाब्राह्मणे त्रयोदशाध्यायस्य

दशमः खण्डः ।

अथ एकादशः खण्डः ।

अथाभवपवमानस्य आद्यास्त्रिस्तः स्तोत्रीया दर्शयति ।

परिष्कानो गिरिष्ठा इति तरित्वतो गायत्रो भवन्ति सर्वस्य पर्य्यासाय ॥ १ ॥

परिग्रह्ययोगादेताः सर्व्वस्य कृत्स्नस्य पर्य्याप्त्यै सम्पूर्णतायै भवति परीत्यनेनोपसर्गेण पर्य्याप्तेः सूचितत्वात् ग्रिष्टं सृष्टं ॥१॥

अथान्यं ऋचं दर्शयति ।

समुन्वेयो वसूनामिति पशवो वै वसु पशूनामवरुध्यै ॥ २ ॥

वसुशब्देन धनसामान्यवाचिना धनविशेषस्योपस्थानात् पशवएव वसुशब्दाभिधेयाः तथा चायं ऋचः पशुप्राप्तेर्भवति ॥२

अथान्यं ऋचं विधत्ते ।

तं वस्यखायो मदायेति बालखिल्याः ॥ ३ ॥

बालखिल्यानामृषीणां सम्बन्धिन्यो बालखिल्याः तं वस्यखाय इत्याद्याः स्तोतीया भवन्ति ॥ ३ ॥

अथ सप्तमेऽहनि विधास्यमानं सखाय आनिषीदतेति ऋचमिमञ्च चतुर्थं संयुज्यानुवदति ।

बालखिल्यावेतौ ऋचौ षष्ठे चाहनि सप्तमे च ॥४॥

षष्ठसप्तमयोरह्नोस्तं वः सखाय आनिषीदतेति यावेतौ ऋचौ बालखिल्यौ बालखिल्यसम्बन्धिनौ ॥ ४ ॥

किमतस्तदाह ।

यदेतौ बालखिल्यौ ऋचौ भवतोऽङ्गोरेव व्यतिषङ्गायाव्यवस्रंसाय सन्तत्यै ॥ ५ ॥

एतौ बालखिल्यौ ऋचौ क्रमेण षष्ठसप्तमयोरङ्गोर्भवतः प्रयुज्येते इति चेत् तदङ्गोः षष्ठसप्तमयोर्व्यतिषङ्गाय व्यतिषङ्गनं संसर्ज्जनं तदर्थं भवति एतदेव विशदयति अव्यवस्रंसायेति व्यवस्रंसो विश्लिष्य संभवनं विच्छेदनं तदभावाय फलितमर्थमाह सन्तत्या इति ॥ ५ ॥

अथापरं ऋचं दर्शयति ।

सोमाः पवन्त इन्दव इत्यनुष्टुभो निमसदो भवन्ति प्रतिष्ठायै ॥ ६ ॥

सोमाः पवन्त इत्याद्यास्तिस्रोऽनुष्टुभः स्तोत्रीयाः तासामनुष्टुभानां पादचतुष्टयोपेतत्वात् प्रतिष्ठायै यजमानस्य प्रतिष्ठानाय भवन्ति ॥ ६ ॥

अथान्यं ऋचमन्दर्शयति ।

अयापवापवस्वेना वसूनीति त्रिष्टुभस्त्र्यो जगत्यो रूपेण तस्माज्जगतीनां लोके क्रियन्ते ॥ ७ ॥

अयापवापवस्वेत्याद्यास्तिस्रः स्तोत्रीयाः तास्त्रिष्टुभस्त्रिष्टुप्छन्दस्काः सत्योऽपि जागतो रूपेण योगाज्जगत्यो भवन्ति किं तद्रूपमिति चोच्यते वसूनीत्यनेन पदेन धनमुच्यते तच्च वैश्य-

सम्बन्धिजगत्या सहोत्यन्नेऽपि पारम्पर्येण वसूनीत्येतज्जागतं रूपं यस्मादेवं जगत्यस्तस्माज्जगतीनां स्थाने क्रियन्ते प्रकृतावार्भवस्यान्त्यस्तृचोऽभिप्रियाणीति जागतस्तस्मादार्भवान्त्यस्य जगतीस्थानत्वं ॥ ७ ॥

अथ प्रथमे तृचे पूर्ववद्गायत्रं साम विधाय तद्धितिकर्त्तव्यतापतिपादकं द्वे वै लोका गायत्रमित्यादिकं प्रागाम्नातं ब्राह्मणञ्चातिदिशति।

गायत्रम्भवति यदेव गायत्रस्य ब्राह्मणं ॥ ८ ॥

परिस्थानो गिरिष्ठा इति विहिते तृचे गायत्रं साम प्रथमतो गातव्यं भवति सिद्धमन्यत् ॥ ८ ॥

अथैतमेव तृचं त्रिरावृत्य तत्र तीणि सामानि गातव्यानीति विधत्ते।

वैदन्वतानि भवन्ति ॥ ९ ॥

चत्वारि हि वैदन्वतानि सामानि परिस्थान इत्यस्यां योन्यां गीयन्ते तत्र तृतीयवर्ज्जितानि तीणयस्मिन्नेव तृचानि गेयानि ॥ ९ ॥

अथैतेषां वैदन्वतसम्बन्धं दर्शयन् विशिष्टफलसाधनतामाह।

विदन्वान्वै भार्गव इन्द्रस्य प्रत्यङ्ङस्तङ्गुगार्धत्

सतपोऽतप्यत स एतानि वैदन्वतान्यपश्यत्तैः शुचमपाहतापशुचऽहते वैदन्वतैस्तुष्टुवानः ॥ १० ॥

भार्गवे भृगुगोत्रे विदन्वान्नामऋषिः इन्द्रस्य सहोत्पन्नान् प्रत्यङ्न् प्रतिकूलान् शत्रून् हतवान् अनन्तरन्तमृषिं शुक्शोकः आर्थत् प्राप्नोत्सच शोकार्त्तः ऋषिः तपस्तप्तवान् स च तपोबलात् एतानि वैदन्वतानि त्रीणि सामानि अपश्यत् दृष्टवान् दृष्ट्वा च तैः सामभिः शुचं शोकमपाहत अपागमयत् यस्मादेवं तस्माद्वैदन्वतैरेव सामभिस्तुष्टुवानः स्तुतवान् शुचं शोकमपहत अपगमयति विनाशयतीत्यर्थः ॥ १० ॥

अथ समुन्वेयो वसूनामिति विहिते त्रृचे गेयं साम दर्शयति।

भरद्वाजस्य लोम भवति पशवो वै लोम पशूनामवरुध्यै ॥ ११ ॥

भरद्वाजस्य लोमाख्यं सामैव दीर्घं दीर्घशब्दाख्यमिति च आङ्गरन्ये ब्रह्मवादिनः कथयन्ति ॥ ११ ॥

तद्दीर्घमित्याङ्गरायुर्वै दीर्घमायुषोऽवरुध्यै ॥१२

तच्च दैर्घ्यं दीर्घविशिष्टं तत्सामान्याद्दीर्घाख्यं साम आयुषः शतवर्षलक्षणस्य प्राप्त्यै भवति प्रमुदनाख्यस्य प्राप्त्यै भवति ॥ १२ ॥

अथान्यस्मिन्विहिते हृचे सामान्तरं विधत्ते ।

कार्णश्रवसं भवति शृण्वन्ति तुष्टुवानं ॥ १३ ॥

कर्णश्रवसा दृष्टं कार्णश्रवसं एतदाख्यं साम तं वः सखाय इति हृचे गातव्यं अनेन च तुष्टुवानं स्तुवन्तं शृण्वन्ति लौकिका वऊ मन्यन्ते गट्वान् भवतीत्यर्थः ॥ १३ ॥

अथैतदृषिसम्बन्धं दर्शयन् पशुसाधनत्वेन स्तौति ।

कर्णश्रवा वा एतदाङ्गिरसः पशुकामः सामापश्यत्तेन सहस्रं पशूनसृजत यदेतत्साम भवति पशूनां पुष्ट्यै ॥ १४ ॥

स्पष्टोऽर्थः ॥ १४ ॥

अथ सोमाः पवन्तइन्द्व इति हृचे अन्यत्साम विधाय तदीयं ब्राह्मणञ्चातिदिशति ।

गौरीवितं भवति यदेव गौरीवितस्य ब्राह्मणं ॥१५

सिद्धमेतत् ॥ १५ ॥

अथास्मिन्नेव हृचे आवृत्ते सामान्तरं विधत्ते ।

मधुश्चुन्निधनं भवति ॥ १६ ॥

मधुश्चुत इति निधनं यस्य तत्तथोक्तं एतदाख्यं साम सोमाः पवन्त इत्यस्मिंस्तृचे गातव्यं ॥ १६ ॥

अथैतत् स्तौति।

परमस्यान्नाद्यस्यावरुध्यै परमं वा एतदन्नाद्यं यन्मधु ॥ १७ ॥

यन्मधु माक्षिकं एतत्परममुत्कृष्टं अन्नाद्यं अदनीयमन्नं तस्मादेतन्मधुस्रुन्निधनं परमस्यान्नाद्यस्य प्राप्त्यै भवति च्युतिरक्षरणे मधुच्योतयतिच्यावयति क्षारयतीति मधुस्रुदिति तत्संज्ञानिर्व्वचनात्तस्य मधुप्राप्तिहेतुता ॥ १७ ॥

इदं मह्यद्यौजसेति योनौ यत् घृतस्रुन्निधनाख्यं साम तत् गीयते स्तुत्यर्थं तच्चेदञ्च संयुज्य प्रशंसति।

प्रजापतेर्वा एतौ स्तनौ यदृतस्रुन्निधनञ्च मधुस्रुन्निधनञ्च यज्ञो वै प्रजापतिस्तमेताभ्यां दुग्धे यङ्कामङ्कामयते तन्दुग्धे ॥ १८ ॥

प्रजापतेः सर्व्वकारणभूतस्य विधातुरेतौ स्तनौ यदृतस्रुन्निधनाख्यम्मधुस्रुन्निधनाख्यञ्च सामनी स च प्रजापतिः यज्ञो वै यज्ञएव तं यज्ञात्मकं प्रजापतिमेवैताभ्यां स्तनाभ्यां घृतस्रुत् मधुस्रुत् रूपाभ्यां दुग्धे एतद्देव विद्वियते यङ्कामभिति यजमानो यं यङ्कामयते आशंसते तं तं सर्व्वमेताभ्यां दुग्धे दोग्धि ॥१८॥

अथास्मिंस्तृचे सामद्वयं विधत्ते।

क्रौञ्चे भवतः ॥ १९ ॥

क्रुञ्चाख्येण ऋषिणा दृष्टे सामनी क्रौञ्चे एते सोमाः पवन्त इन्दव इत्यस्मिन्नेव ऋचे द्विराहृत्ते क्रमेण गायेत् ॥ १९ ॥

अथैते स्तौति ।

क्रुङ्ङ्यमहरविन्दद्देष्यमिव वै षष्ठमहरहरेवैताभ्यां विन्दन्ति ॥ २० ॥

इन्द्रायेन्दो मरुत्वत इति खण्डे व्याख्यातमेतत् ॥ २० ॥

अथापवापवस्वेत्यन्तिमे ऋचेऽन्यत्साम विधत्ते ।

श्रौष्टं भवति ॥ २१ ॥

श्रुष्टाख्येन ऋषिणा दृष्टं साम श्रौष्टं तत्साम्नां ॥ २१ ॥

अथैतस्य स्तुतिः ।

श्रुष्टिर्वा एतेनाङ्गिरसोऽञ्जसा स्वर्गं लोकमपश्यत् स्वर्गस्य लोकस्यानुख्यात्यै स्वर्गात् लोकान्न च्यवते तुष्टुवानः ॥ २२ ॥

एतदपि सिद्धं ॥ २२ ॥

अथास्य निधनं विधत्ते ।

अग्नेर्वा एतद्वैश्वानरस्य साम दोदिह्नीति निधनमुपयन्ति दोदायेव ह्यग्निर्वैश्वानरः ॥ २३ ॥

वैश्वानरस्य विश्वानरहितस्याग्नेः खलु तत्साम तदस्मा-
द्धोदिहोत्येतत्पदं निधनमुपयन्त्युपगच्छन्ति उद्गातारः दीदा-
येव दीप्तवद्वैश्वानरोऽग्निः ॥ २३ ॥

अथैतत्पवमानस्तोत्रमुपसंहरति ।

निधनान्ताः पवमाना भवन्त्यङ्गो ध्रुत्यै स्तोमः॥२४

पवमानाः पवमानस्तोत्राणि बहिष्पवमानादीनि निधना-
न्तानि निधनावसानानि भवन्ति किमर्थं अङ्गो ध्रुत्यै धारणाय
स्थैर्यार्थं एवं गायत्र्यादिस्त्रैष्टान्तेष्वेकादशसु साम्सु प्रत्येकं
तत्रे गीयमानेषु तत्र्यस्त्रिंशः स्तोमो निष्पद्यते स एवार्भवस्य
पवमानस्य स्तोम इत्यर्थः ॥ २४ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य
एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

अथ प्राकृतमेवाग्निष्टोमसामेत्यभिप्रेत्य ततः परेषूक्थ-
स्तोत्रेषु द्विपदाः स्तोत्रीयाः कार्या इति विधित्सुस्तदर्थं किञ्चि-
द्ब्रह्मवादिनां विचारमुपक्षिपति ।

**ब्रह्मवादिनो वदन्ति प्रायणतो द्विपदाः कार्या ३
उदयनता ३ इति ॥ १ ॥**

ब्रह्मवादिनो वेदार्थचिन्तका वदन्ति मीमांसन्ते किं षड-हस्य प्रायणतः प्रारम्भसमये द्विपदा ऋचः स्तोतीया किं वा उदयनतः समाप्तिवेलायामिति उभयत्र विचार्यमाणानामिति श्रुतिर्दृष्टव्या ॥ १ ॥

एवं विचार्य निर्णीतं पक्षमाह।

उदयनतएव कार्याः पुरुषो वै द्विपदाः प्रतिष्ठायै ॥ २ ॥

उदयनतएव कार्याः कुत एतत् येयं द्विपदा सा पुरुषो वै द्विपदाः तस्मात्यात् पुरुषात्मकाएव पुरुषसंस्तुतानान्तस्मिन् द्विपदानामन्ततः करणं पादहयवतो यजमानस्य प्रतिष्ठानाय कल्पते ॥ २ ॥

अथ प्रकारान्तरेण स्तौति।

वाचा वै सर्वं यज्ञन्नन्वते तस्मात्सर्वां वाचं पुरुषो वदति सर्वा ह्यस्मिन् सꣳस्तुता प्रतितिष्ठति ॥ ३ ॥

वाचा श्रुतयाख्यात्मिकया खलु सर्वं यज्ञं अग्निष्टोमादि विश्वरूपजामयनान्तं सकलयज्ञजातं तच्च ते यजमानाः विस्तारयन्ति यस्माद्यज्ञे सर्वा वाक् साधनभूता तस्मात्सर्वां लौकिकीञ्च वैदिकीञ्च वाचं पुरुषो वदति प्रयुङ्क्ते हि यस्मादस्मिन् पुरुषे सर्वा वाक् संस्तुता सह स्तुता प्रतितिष्ठति प्रतिष्ठिता भवति

तस्मात् सर्व्वां पुरुषो वदति तादृशः पुरुषो द्विपदाभिः षडहावसानगताभिः प्रतिष्ठितो भवतीति द्विपदास्तुतिर्द्रष्टव्या ॥ ३ ॥

अथ मैत्रावरुणोक्थस्य साम दर्शयति।

गूर्हो भवति ॥ ४ ॥

अग्ने त्वन्नो अन्तम इत्यत द्विपदात्वे गूर्हं साम गातव्यं भवति ॥ ४ ॥

अथास्य साम्न आख्यायिकाप्रदर्शनपुरःसरं सर्व्वकामसाधनतामाह।

गौपायनानां वै सत्रमासीनानां किरातकुल्यावसुरमाये अन्तःपरिध्यस्थन् प्राकिरतान्नेऽग्नेत्वन्नो अन्तमदित्यग्निमुपासीदꣳ स्तेनास्थनस्मꣳवꣳ स्तदाव ते तर्ह्यकामयन्त कामसनि साम गूर्हः काममेवैतेनावरुन्धे ॥ ५ ॥

गौपायनानां गौपगोत्राणां सत्रमासीनानां सत्रासनं कुर्व्वतामृषीणां अस्थन् प्राणान् किरातकुल्यौ किराता म्लेच्छाः तत्तुल्यरूपे असुरमाये असुरसम्बन्धिन्यौ माये अन्तःपरिधि आहवनीयस्य परिधीनामभ्यर्द्देशे प्राकिरतां प्रकर्षेण विचिपतां क्षविक्षेप इति धातुः ततस्ते गौपायनाः अग्ने त्वन्नो अन्तम इति ऋचेनाग्निमुपासीदन्नुपागच्छन् अस्तुवन्नित्यर्थः

तेनोपसदनेन अग्नेः प्रसादात् पुनरात्मीयान् असून् स्रावयन् बलयन् मायापरिक्षिप्तान् पुनरादाय प्रबलान् कुर्वन्नित्यर्थः ते गौपायनाः तस्मिन् समये एतदेवेतर्हीकामयन्त तस्माद्गृहैः कामसनि कामप्रदं गतमन्यत् ॥ ५ ॥

अथ ब्रह्मण उक्थस्तोत्रस्य साम दर्शयति।

गोतमस्य भद्रं भवति ॥ ६ ॥

गोतमस्य भद्राख्यं साम इमानुकं भुवनासीषधे सेत्यस्मिन् द्विपदे त्रृचे गातव्यं ॥ ६ ॥

भद्रशब्दवाच्यत्वादाग्नेः प्रापकमेतत्सामेति स्तौति।

आग्निपमेवास्मा एतेनाग्नास्ते साम हि सत्या-ग्नेः ॥ ७ ॥

अग्नौ यजमानाय सिक्तं घृष्टं ॥ ७ ॥

अथैतत् महत्त्वप्रापकमिति स्तौति।

एतेन वै गोतमो जेमानं महिमानमगच्छत् तस्माद्यो च पराञ्चो गोतमाद्य चार्वाञ्चस्त उभये गोतम ऋषयो ब्रुवते ॥ ८ ॥

एतेन खलु भद्रेण साम्ना पुरा गोतमः ऋषिः जेमानमतिशयेन जेतृत्वं महिमानं महत्त्वमागच्छत् तस्मादेव कारणात्

गोतमादेव ऋषेः ये पराञ्चः पूर्वकालीना ज्येष्ठाः ये च अर्वाञ्चः अर्वाचीनाः पश्चाज्जाताः कनिष्ठाः उभये उभयविधास्ते गोतम ऋषयः गोतमाख्या ऋषय इति ब्रूवते उच्यन्ते गोतमशब्देनैव उच्यन्ते व्यवह्रियन्त इत्यर्थः तस्मादनेन साम्ना स्तुवन् जेमानं महिमानं गच्छतीति ॥ ८ ॥

अथाऽऽवाकोक्थस्य साम दर्शयति ।

उद्गंशपुत्रो भवति ॥ ९ ॥

उद्गंशपुत्राख्यं साम प्रव इन्द्राय वृत्रघ्नमायेति ऋचे गातव्यं ॥ ९ ॥

गायन्ति त्वा गायत्रिण इत्यस्यां योन्यां गीयमानं सामोद्गंशीयन्तद्धर्म्मप्राप्त्यर्थं तादृग्यं तदुद्गंशपुत्रस्यातिदिशति ।

यद्वा उद्ऽगंशीयन्तदुद्ऽगंशपुत्रः ॥ १० ॥

योनिदृष्टेनोद्गंशशब्देन सम्बन्धादुद्गंशीयं यदेवोद्गंशीयाख्यं साम तदेवोद्गंशपुत्रः तद्धर्म्मभाग्भवतीत्यर्थः ॥ १० ॥

कोऽसौतद्धर्म्म इत्यत आह ।

अर्ङ्डामतिस्वरति ॥ ११ ॥

उविलत्यङ्डा अतिसारश्च उद्गंशीये दृश्यते तावत्रापि भवतः तथैव ह्यधीमहि उशमा २ तोऽ५ ङाइ इति उविलत्यङ्डे-

डापि तत्स्थाने इडास्थानादेश इति परिभाषासूत्रेण इट् इति प्रयोगकाले प्रयोक्तव्यं अर्ड्डेडोपाध्ययनन्तु ब्रह्मयज्ञाद्यर्थं अयमर्थः अर्ड्डेडां कृत्वा तत ऊर्द्धं अतिस्वारमतिमन्द्रं करोति ॥११॥

तदेतत् स्तौति ।

तस्मादूधर्ड्डारा अति क्षरन्तीडायामन्तः पशुषु प्रतितिष्ठति ॥ १२ ॥

यस्मादर्ड्डेडामतीत्य स्वरति तस्माद्गवां दुग्धप्रदेशमतीत्य पयसो धाराः क्षरन्ति स्रवन्ति अन्ततः षडहावसाने इडायां प्रतितिष्ठन् पशुष्वेव प्रतितिष्ठति तदात्मकत्वादिडायाः ॥ १२ ॥

यदेतदतिस्वरणं तत् सप्तमस्याङ्गः संसारहेतुरिति स्तौति ।

कॢप्त उपरिष्टाद्क् साम च विमुच्येते अभ्युस्वरेण सप्तममहः स्वरति सन्तत्यै ॥ १३ ॥

कॢप्ते कल्पिते ऋक्सामभ्यां तिरश्चादिस्तोमैश्च सम्पूर्णानुष्ठिते षडहे सति उपरिष्टात्तदूर्द्धं ऋक् साम च विमुच्येते यथा ग्रामप्राप्तेरूर्द्धं शकटवाहिनौ बलीवर्दौ विमुच्येते तद्वत् ऋक्सामयोः सामापनोदार्थं विमोकः कार्यः; तथा च षडहस्य कॢप्तिसमाप्तत्वात् सप्तमस्य चाङ्गोऽनारम्भात् दशरात्रो विच्छिन्नः स्यात् तत्परिहारेणैतत् क्रियमाणेनातिस्वारेण द्राघीयसा सप्तममहरभिस्वरति अभिलक्ष्य स्वारं करोति सन्तत्यै उक्तविच्छेदपरिहारेण षडहसप्तमयोरङ्गोः सन्तानार्थं ॥ १३ ॥

षडहसमाप्तेरूर्ध्वं लौकिकं वैदिकञ्च वऋभाषणन्न किञ्चित्कार्य्यमिति विधत्ते ।

ऊऋषीव वा एतर्हि वाग्यदा षडहः सन्तिष्ठते न वऋ वदेन्नान्यं पृच्छेन्नान्यस्मै प्रब्रूयात् ॥ १४ ॥

एतर्हि एतस्मिन् काले वाग्देवता ऊऋषीव वै ऊढ़वतीव खलु यथा सति दूरं भारवहनं कृत्वा पुरुषः श्रान्तो भवति एवमेव षडहे बह्वी ऋचो वऋनि सामानि प्रयुञ्जानानां वागपि श्रान्ता भवति यदासौ षडहमन्त्रां षण्णां समाहारः षडहः सन्तिष्ठते यस्मिन् काले समाप्यते तस्मान्न वऋ वदेत् वाग्देवतायाः समपनोदसिद्ध्यर्थं वऋभाषणन्न कुर्य्यात् अन्यञ्च पुरुषन्न पृच्छेत् अन्यस्मै पुरुषान्तराय च न ब्रूयात् प्रवचनं न कुर्य्यात् ॥ १४ ॥

अथैतस्मिन् समये ऋत्विजां वऋभोजनं विधत्ते ।

मधु वाशयेद्घृतं वा यथोऊषो बहं प्रत्यनक्ति तथा तत् ॥ १५ ॥

षडहसमाप्तेरनन्तरं ऋत्विजो मधु वा प्राशयेत् घृतं वा अन्ययोरन्यतरेणोपसिक्तमन्नमृत्विजो भोजयेदित्यर्थः तथा च सूत्रं षष्ठेऽहनि संस्थिते वऋवादिनः स्युर्व्व चाधीयोरन्नोत्तरस्याऋः उपाकरणात् सर्पिर्मधुभ्यामृत्विजोभोजयेदहीनेष्वन्यतरेण वेति ऊऋषो ऊढवतो बलीवर्दादेः वहं वहप्रदेशं स्कन्धभागं

प्रत्यनक्ति तैलादिभिः स्नेहयति तथा तत् मध्वदनं वा ऋत्विजां भवति यथा वहस्य प्रत्यञ्चनेन बलीवर्दादिः पुनर्वहनसमर्थो भवति एवं श्रान्तवाचो ऋत्विजो मधुघृतप्राशनेन स्फुरद्वाचः क्रियन्त इत्यर्थः ॥ १५ ॥

अथैतेषु त्रिपृक्थस्तोत्रेषु स्तोमं विधत्ते ।

त्रयस्त्रिंश एव स्तोमो भवति प्रतिष्ठायै देवतासु वा एष प्रतिष्ठितः ॥ १६ ॥

यथा वहस्य प्रत्यञ्चनेन बलीवर्दादिः पुनर्वहनसमर्थो भवति तथा परिश्रान्तो वाचो ऋत्विजः सिद्धमेतत् ॥ १६ ॥

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन् ।
पुमर्थाश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे त्रयोदशाध्यायस्य द्वादशः खण्डः ।

त्रयोदशाध्यायः समाप्तिमगमत् ।

चतुर्दशोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं ॥

इत्थं द्वितीयपञ्चिकायास्त्रिभिरध्यायैर्ईश्वरादिभूतस्य षष्ठ्यषडहस्य स्तोमक्लृप्तिरुक्ता अथ छन्दोमानां प्रथमद्वितीययोः स्तोमक्लृप्तिश्चतुर्थेऽध्याये विधीयते । तत्र प्रथमस्य छन्दोमस्य वह्निष्यमाणस्तोत्रे स्तोमक्लृप्तिं विधातुमाह ।

आप्यन्ते वा एतत् स्तोमाश्छन्दाꣳसि यत् षडह आप्यते ॥ १ ॥

यद्यदा षडहः षण्णामह्नां समाहारः राजाहःसखिभ्यष्टच् समासान्तः न संख्यादेः समाहार इत्यच्प्रादेशप्रतिषेधः यस्मिन् षष्ठ्यः षडहः समाप्यते एतत् एतस्मिन् काले त्रिवृत्प्रभृतयः स्तोमा गायत्र्यादीनि च छन्दांसि आप्यन्ते वै परिसमाप्यन्ते खलु त्रिवृदादिस्तोमानां गायत्र्यादिछन्दसाञ्च क्रमेण षट्स्वहःसु विनियुक्तत्वात् ॥ १ ॥

नन्वेवं केन च स्तोमेन केन च छन्दसा छन्दोमाः कल्पयितव्या इत्यत आह ।

आप्ते षडहे छन्दाꣳसि स्तोमान् कृत्वा प्रयन्ति ॥२

षडहे आप्ते परिसमाप्ते स्तोमछन्दसोरपि परिसमाप्तत्वात् पुनरन्यानि छन्दांसि चतुर्विंशादीन् स्तोमांश्च कृत्वा निर्माय प्रयन्ति छन्दोमान् प्रारभन्ते ॥ २ ॥

अथ तत्र प्रथमे छन्दोमे बहिष्पवमानस्य स्तोत्रीयाख्यं प्रथमं ऋचं विधत्ते।

प्रकाव्यमुशने वव्रुवाण इति गायत्रया रूपेण प्रयन्ति ॥ ३ ॥

प्रकाव्यमुशने इति ऋचो बहिष्पवमानस्य स्तोत्रीयाख्यः ऋच एति प्रेत्याशुमदित्यनुक्रान्तत्वात् प्रशब्दो गायत्यारूपं सा हि छन्दसां प्रथमा प्रशब्दः प्राथम्यवाचीति युक्तं तस्य गायत्रीरूपत्वं तथा गायत्याः सम्बन्धिना रूपेण प्रकाव्यमिति प्रशब्देन प्रयन्ति सप्तममहः प्रारभन्ते ॥ ३ ॥

ननु छन्दोऽन्तरस्य रूपं परित्यज्य गायत्रीरूपस्वीकारे किं कारणमित्यत आह।

इयं वै गायत्र्यस्यामेव प्रतिष्ठाय प्रयन्ति ॥ ४ ॥

इयं सर्वप्राणिनां पुरोवर्त्तिनां दृष्टिरेव गायत्रीस्वरूपा उभयोः प्राथम्यसाहश्याच्छन्दाꣳस्येवं गायत्रं रूपं प्रयुञ्जानाः

अस्यामेव पृथिव्यां प्रतिष्ठाय प्रथमतः प्रतिष्ठा भूत्वा प्रयन्ति अहः प्रारभन्ते ॥ ४ ॥

नन्वेवं मुख्येव गायत्री कस्मान्न प्रयुज्यत इत्यत आह।

त्रिष्टुप् प्रतिपद्भवति ॥ ५ ॥

त्रिष्टुप् छन्दस्कैवास्य सप्तमस्याङ्गः प्रतिपद्भवति सर्वप्राणिनां पुरोवर्त्तिनां पृथिव्येव गायत्रीस्वरूपा प्रतिपद्यते प्रारभ्यत इत्यपि प्रतिपत् सा च पूर्व्वोक्ता प्रकाश्यमुशने वक्तुवाण इत्येषा यद्यपि प्रतिपदिति एकवचनेन एका स्तोत्रीया विधित्सितेति प्रतीयते तथापि छन्दस्तूक्तानामादिग्रहणेन विधिरनादेश इति परिभाषायास्तदादिकस्तृचएवात्र ग्राह्यः ननु गायत्रं प्रातः सवनं त्रैष्टुभमाध्यन्दिनं सवनं जागतं तृतीयसवनमिति प्रकृतौ ज्योतिष्टोमे दृश्यते तत्कथं प्रातःसवने त्रिष्टुब्विधानन्नैष दोषः द्वादशाहो हि द्विविधः समूढो व्यूढश्चेति तत्र समूढे यथा प्रकृतौ तथैव सवनानि भवन्ति व्यूढे तु छन्दसां व्यूहनस्योक्तत्वात् तृतीयस्य त्रिरात्रस्य प्रातःसवनानि सर्व्वाणि त्रैष्टुभानि जागतानि माध्यन्दिनसवनानि गायत्राणि तृतीयसवनानीति व्युच्छेदनत्वात् त्रिष्टुभः प्रातःसवने सङ्गतिरधिगन्तव्या ॥ ५ ॥

तदेतत्प्रशंसति।

ओजोवीर्य्यं त्रिष्टुबोजस्येव वीर्य्ये पराक्रम्य प्रयन्ति ॥ ६ ॥

ओजोबलं तदात्मकं वीर्यञ्च त्रिष्टुप् प्रजापतेरङ्गाङ्गलक्षणतो बाऽङ्गलक्षणाच्च वीर्यवतेन्द्रेण सहोत्पत्तेः तथाप्योजोरूप एव वीर्ये स्थित्वा पराक्रम्य जेतव्यं जित्वा प्रयन्ति प्रगच्छन्ति ॥ ६ ॥

अथ प्रकारान्तरेणेमं तृचं स्तौति ।

स्तोत्रीयस्तृचो भवति प्राणापानानामवरुध्यै ॥७॥

प्रकाश्यमुशने वज्रवाण इत्ययं त्रैष्टुभस्तृचः स्तोत्रीयाख्यः प्रथमस्तृचो भवति बर्हिष्यमाने प्रथमस्य तृचस्य स्तोत्रीय इति संस्था गतमन्यत् ॥ ७ ॥

ननु त्रिष्टुप्छन्दसो द्वितीयेऽहनि प्रयोगेण गतसारत्वात् कथं छन्दोसेषु विनियोग इति तत्राह ।

हरिवत्यो भवन्ति छन्दोमानामयातयामतायै ॥८

हरिवत्यो हरिशब्दयुक्ताः स्तोत्रीया भवन्ति छन्दोमानां गायत्रीत्रिष्टुब्जगतीभिश्छन्दोभिर्मीयमानानां चतुर्विंशादीनां स्तोमानामयातयामतायै अगतसारत्वाय परीणं संकृणुते तिग्मशृङ्गोदिवाहरिर्दृहन्ने नक्तमज्जइत्यस्मिन् तृचे श्रवणात्प्राणभृन्न्यायेनासां हरिशब्दवत्त्वं ॥ ८ ॥

अथ स्तुत्यर्थं विहितेनानेन तृचेन सहिताः अन्या एकविंशतिः स्तोत्रीयाः विधत्ते ।

द्वादशर्चौ भवतः ॥ ९ ॥

द्वादशानामृचां समाहारो द्वादशर्चः ऋक्यूरब्बूं पथामानचे इति अकारः समासान्तः प्रस्थानासो रथा इवेति नवर्चः अस्मृग्मिन्दवः पथेति नवर्चः आतेदक्षमिति त्रयः एवमेकविंशतिसंख्या ऋचः पूर्वं विहिताभिस्तिसृभिः सह द्वादशर्चौ बहिष्पवमानस्य भवतः ॥ ९ ॥

अथैतत् स्तौति ।

द्वादशमासाः संवत्सरः संवत्सरमेव तत्पूर्वस्मै षडहाय प्रत्युद्यच्छति सवीवधतायै ॥ १० ॥

द्वादशमासात्मकः संवत्सरः पृष्ठ्यषडहस्य संवत्सरः षड्वा ऋतवः षट्पृष्ठानीति श्रुतेः तत्तथा सति द्वादशमासात्मकं संवत्सरमेव पूर्वस्मै षड्हाय प्रत्युद्यच्छति प्रतिनिधित्वेनोद्गमयति किमर्थं सवीवधतायै वीवधो भारः समानो वीवधः तस्य भावः सवीवधता तदर्थं ॥ १० ॥

एवं द्वादशर्चद्वयगतद्वादशसंख्योपजीवनेन स्तौति ।

चतुर्विंशतिर्भवन्ति चतुर्विंशतिरर्द्धमासाः संवत्सरः संवत्सरमेव तत्पूर्वस्मै षडहाय प्रत्युद्यच्छति सवीवधतायै ॥ ११ ॥

एवं द्वादशर्चयोः सतोश्चतुर्विंशतिः चतुर्विंशतिसंख्याकाः स्तोत्रीया ऋचो भवन्ति चतुर्विंशकार्द्धमासात्मकः संवत्सरस्तत्तथा सति स्तोत्रीयाचतुर्विंशकेन चतुर्विंशत्यर्द्धमासात्मकं संवत्सरमेव पूर्वस्मै प्रागनुष्ठिताय षड्हाय प्रतिरूपत्वेनोद्यच्छत्युद्गमयति आतोलनवेलायासुभयोर्गौरवसाम्यार्थः ॥ ११ ।

अथास्मिन्नहनि चतुर्विंशं स्तोमं विधातुमुक्तिप्रत्युक्तिभ्यां कञ्चिद्दृष्टान्तमाह ।

इत ऐन्द्रोत इति होवाचाभिप्तारो काक्षसेनिर्यो महाव्रतस्याग्रं गच्छन्ति क्व ते ततो भवन्ति प्र राजन् पक्षिणः पतन्त्यपक्षाः पद्यन्ते ॥ १२ ॥

ऐन्द्रोतः इन्द्रेण ऊतो रक्षितः इन्द्रोतः तद्गोत्रजः ऐन्द्रोतः सच इताख्यः पदद्वयमप्येतत् सम्बुद्ध्यन्तं संज्ञा पूर्वको विधिरनित्य इति एङ् ह्रस्वात् सम्बुद्धेरिति सम्बुद्धिलोपविधेरनित्यत्वात् सुलोपाभावः हे ऐन्द्रोत इताख्य ऋषे इति सम्बोध्य काक्षसेनिः कक्षसेनस्य पुत्रः अभिप्तारी नाम राजर्षिः इत्युवाच एवं खलु प्रोक्तवान् कथमिति तदुच्यते ये प्राणिनः महाव्रतस्य महतः शाखास्कन्धादिभिरुन्नतस्य वृक्षस्य अग्रमूर्द्धं गच्छन्ति प्राप्नुवन्ति ते ततोऽग्रादूर्द्धं क्व कुत्र स्थाने भवन्तीति एवमुक्तो इतं प्रत्यवोचत् हे राजन् पृथिवीपते त्वदुक्तात् महाव्रताग्रात् पक्षिणः पक्षं मुक्त्वा एतत्पतन्ति पक्षाभ्यामुत्पतन्ति अपक्षाः पक्षरहितास्त्वेद-

वपद्यन्त इति शब्दोत्रासञ्जनीयः अधःपततीति क्षयमर्थः षष्ठेऽहनि प्रयुक्तस्त्रयस्त्रिंशः स्तोमः महाव्रताग्रस्थानीयः त्रिवृदादिस्तोमानां संख्याधिक्यविश्रान्तभूमित्वात् तं प्रयुक्तवन्तो यजमानाः पक्षिणः ॥ १२ ॥

के पक्षरहिताः कौ च तेषां पक्षौ इति तत्सर्वमाह ।

यो वै विद्वाꣳसस्ते पक्षिणो येऽविद्वाꣳसस्तेऽपक्षास्त्रिवृत्पञ्चदशावेव स्तोमौ पक्षौ कृत्वा स्वर्गं लोकं प्रयन्ति ॥ १३ ॥

ये खलु विद्वांसो वेदार्थाभिज्ञाः ते पक्षिणः पक्षवन्तः ये अविद्वांसोऽनभिज्ञाः ते अपक्षाः पक्षरहिताः तस्माद्विद्वांसस्त्रिवृत्पञ्चदशौ स्तोमावेव पक्षौ कृत्वा स्वर्गं लोकं प्रयन्ति इति त्रिवृत्पञ्चदशाभ्यां संहताभ्यां स्तोमाभ्यां एतत्सप्तममहः परिसमाप्य तत्साध्यं फलं प्राप्नुवन्तीत्यर्थः ॥ १३ ॥

एवं पारोक्ष्येण चतुर्विंशं स्तोमं विधायाथ प्रत्यक्षं विधत्ते ।

चतुर्विꣳश एव स्तोमो भवति प्रतिष्ठायै तेजसे ब्रह्मवर्चसाय ॥ १४ ॥

त्रिवृत्पञ्चदशौ स्तोमौ विदुषां पक्षभूतौ मिलित्वा चतुर्विंशतिः स्तोत्रीया भवन्ति तस्मात्सप्तमेऽहनि चतुर्विंशः स्तोमो

भवति स चतुर्विंशत्यर्द्धमासात्मकसंवत्सरसंस्तुतत्वात्प्रतिष्ठादिहेतु-र्भवति संवत्सरो हि प्रतिष्ठाहेतुः ॥ १४ ॥

इति तारुण्यमहाब्राह्मणे चतुर्दशाध्यायस्य

प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

अथास्मिन् सप्तमेऽहनि प्रथममाज्यस्तोत्रं दर्शयति ।

मूर्द्धानन्दिवो अरतिं पृथिव्या इत्याग्नेयमाज्यं भवति ॥ १ ॥

अस्मिंस्तृचे गीयमानमग्निदेवत्यं प्रथममाज्यस्तोत्रं भवती-त्यर्थः ॥ १ ॥

अथास्य तृचस्यास्मिन्नहनि सङ्गतिमाह ।

मूर्द्धा वा एष दिवोयस्तृतीयस्त्रिरात्रः ॥ २ ॥

द्वौ त्रिरात्रौ गतौ तदपेक्षया यत् योऽयं तृतीयस्त्रिरात्रः एषहि द्युस्थानीयस्य दिवो दशरात्रस्य मूर्द्धा शिरः तस्मान् मूर्द्धानं दिव इति तृचस्तृतीये त्रिरात्रे सङ्गत इत्यर्थः ॥ २ ॥

अथ पादान्तरमनूद्य स्तौति ।

वैश्वानर ऋत आजातमग्निमिति वैश्वानर इति वा अग्नेः प्रियं धाम प्रियेणैवैनं तद्धाम्ना परोक्षमुपश्चित्ति ॥ ३ ॥

वैश्वानर ऋत आजातमग्निमिति पादोऽस्मिंस्तृचे दृश्यते वैश्वानर इति विश्वनरहितं सर्वजनानामनुग्राहकं परं धाम शरीरन्तेजोमयं उच्यते तत्तेन वैश्वानरपदप्रतिपाद्येन प्रियेणैव धाम्ना तेजसा एतमग्निं परोक्षं परोक्षेण उपश्चित्ति प्रीणयति श्चितिर्जननकर्म्मा तेन च तज्जन्यं प्रीणनं लक्ष्यते ॥ ३ ॥

अथ द्वितीयमाज्यस्तोत्रं विधत्ते ।

प्रवो मित्राय गायतेति द्यावापृथिवीयम्मैत्रावरुणं द्यावापृथिवी वै मित्रावरुणयोः प्रियं धाम प्रियेणैवैनौ तद्धाम्ना परोक्षमुपश्चित्ति ॥ ४ ॥

प्रवोमित्रायेति द्यावापृथिवीयं द्यावापृथिवीसम्बन्धं मैत्रावरुणं मित्रावरुणदेवताकं द्वितीयमाज्यस्तोत्रं भवति तानः शक्रं पार्थिवस्याहोरायोदिव्यस्येति द्यावापृथिवीसम्बन्धादस्य तत्त्वस्य द्यावापृथिवीयत्वं ॥ ४ ॥

अथ तृतीयमाज्यमिन्द्रदेवताकं स्तौति ।

इन्द्रायाहि चित्रभानवित्यार्भवमैन्द्रमभवो वा

इन्द्रस्य प्रियं धाम प्रियेणैवैनं तद्धाम्ना परोक्षमुपश्चिक्षति ॥ ५ ॥

ऋभु क्षित् राज इति त्रयः सुधन्वनः पुत्राः ऋभुशब्दवाच्याः त एवेन्द्रस्य प्रियं धाम स्थानं शरीरं तेजो वा ते ह्येन्द्रस्य हरः निर्माय प्राऽऽः इन्द्रो हरोमुमुक्ष्ये अश्विना रथमिति हि मन्त्रवर्णः यद्वा इन्द्रः सूर्यः ऋभवो रश्मयः तेषां सूर्यप्रियधामत्वं स्पष्टं शिष्टं पूर्ववद्योज्यं ॥ ५ ॥

अथ चतुर्थमाज्यस्तोत्रं विधत्ते ।

तमीडिष्वयो अर्चिषेत्यनिरुक्तमैन्द्राग्नं देवतानामनभिधर्षायोत्तमार्द्धे निराह देवतानामप्रणाशाय स्तोमः ॥ ६ ॥

तमीडिष्वेति त्रयः अनिरुक्तं निरुक्तं निष्कृत्य शङ्खग्राहकयोक्तं देवतापदं यस्मिन्नास्ति तादृशमैन्द्राग्नमिन्द्राग्निदेवताकं चतुर्थमाज्यस्तोत्रं भवति किमर्थमस्यानिरुक्तत्वमिति देवतानामनभिधर्षार्थं तत्तन्नाम्नाप्यवह्रियमाणादेवता अभिधृष्टा अभिपीडिताः स्युः यथा विद्यादिभिः श्रेष्ठाः पुरुषाः औपचारिकनाम परित्यज्य स्वकेन नाम्ना व्यवह्रियमाणाः कुप्यन्ति तद्वदेवताश्रेष्ठाः तस्मात् अधिधर्षो माभूदित्येवमर्थं अस्य स्तोत्रस्यानिरुक्तत्वं यद्वेवं देवताया अप्रतिपादितत्वात् अनिरुक्तप्रजापतिरिति श्रुतेः प्राजापत्यमेवैतत् स्तोत्रं स्यात् नैन्द्राग्नमित्यत आह उक्त

मार्ष्टीति निराहेति ऐन्द्रमग्निꣳ स्वोढ्व इति उत्तमेनार्द्धर्चेन निराह देवतां निष्कृत्य ब्रवीति देवतानामप्रणाशाय प्रणाशाभावाय देवताविशेषसद्भावद्योतनार्थः एतेष्वपि चतुर्ष्वाज्यस्तोत्रेषु पूर्वोक्तचतुर्विंशएव स्तोमः कार्य्यः एतेषु प्रातःसमननिष्टेषु पञ्चसु स्तोत्रेषु स्तोत्रीयामात्रस्यान्यत्र विधानात् साम प्राकृतमेवेति द्रष्टव्यं ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्दशाध्यायस्य
द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

अथास्मिन् सप्तमेऽहनि माध्यन्दिनपवमानस्य प्रथमं तृचं दर्शयति ।

दृषा पवस्व धारयेति गायत्री भवत्यक्षो धृत्यै ॥१॥

दृषा पवस्वेति गायत्री माध्यन्दिनपवमानस्य प्रतिपद्यते प्रथमस्यर्चो गायत्री भवतीत्यर्थः सोऽयं सप्तमस्याक्षो धृत्यै धारणाय भवति धारयेति धारणवाचि धृञ् धातुशब्दनिष्पन्नत्वात् ॥ १ ॥

अथास्मिन्नहनि तृचस्य सङ्गतिमाह ।

दृषणवत्यस्त्रिष्टुभोरूपेण त्रैष्टुभꣳ स्तोतदृचः ॥२॥

दृषण्वत्योदृषच्छब्दयुक्ता दृषापवस्वेत्यास्यास्तिस्रोगायत्यो रूपेण

वृषशब्दरूपेण त्रैष्टुभेन रूपेण योगात्त्रिष्टुभो भवन्ति एतत् सप्तममहरिति त्रैष्टुभं हि त्रिषु प्रायणत्वात् तस्मादस्मिन्नहनि वृषखत्योगायत्रलक्षणया त्रिष्टुप्त्वात् सङ्गता इत्यर्थः ॥ २ ॥

अथान्य ऋचं दर्शयति ।

पुनानः सोमधारयेति धृत्यै ॥ ३ ॥

पूर्ववदस्यापि ऋचस्य धृतिहेतुता योज्या ॥ ३ ॥

ऋचान्तरं विधत्ते ।

प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतमिति प्रवत्यो भवन्ति प्रणिनीषेण्यमिव ह्येतदहः ॥ ४ ॥

प्रो अयासीदित्याद्या प्रवत्यः प्रशब्दयुक्तास्तिस्रः स्रोत्यो भवन्ति यत् सप्तममहः प्रणिनीषेण्यं प्रणेतव्यत्वेनेष्टमिव हि षडहस्य समाप्तत्वात् सप्तममहः पुनः प्रारिप्सितमित्यर्थः तस्मात्प्रणयनार्थस्तृचकेन प्रशब्देन योगात् सप्तमे प्रणेतुमिष्टेऽह्नि विनियोज्या इत्यर्थः ॥ ४ ।

ननु माध्यन्दिनपवमानस्यान्त्यस्तृचस्त्रिष्टुभः प्रकृतौ तस्थाने कथमयं जागतस्तृचः संगच्छत इत्यत आह ।

जगत्यः सत्यस्त्रिष्टुभो रूपेण तस्मात्त्रिष्टुभां लोके क्रियन्ते ॥ ५ ॥

प्रो अयासीदित्याद्याएताः समा जगत्यः सत्योऽपि त्रैष्टुभेन

रूपेण योगात् त्रैष्टुभः तच्च रूपमिन्द्रशब्दः त्रिष्टुभा सहेन्द्रोत्पत्तेः गतमन्यत् ॥ ५ ॥

अथ इषा पवस्वेति विहिते प्रथसे ऋचे गायत्रं साम विधाय पूर्ववत्तद्ब्राह्मणमतिदिशति।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ ६ ॥

सिद्धमेतत् ॥ ६ ॥

अथास्मिन्नेव ऋचे आदत्ते सामान्तरं विधत्ते।

सन्तनि भवति सप्तमस्याह्नः सन्तत्यै ॥ ७ ॥

वेदसामाख्ये ग्रन्थे सर्वाण्यपि सामानि एकैकस्यां गीयन्ते दृष्ट्वा साम ऋचे व्यासज्य गीयते अथ तिसृषु स्तोत्रीयास्वस्य सन्तानदर्शनात् सन्तनीति संज्ञा एतदृषापवस्वेत्यस्मिन्नेव ऋचे गातव्यं तत्रास्य सप्तमस्याह्नः षष्ठेनाह्ना सह सन्तत्यै सन्तानाय संश्लेषाय भवति ॥ ७ ॥

अथ विक्लित्तिपूर्वकत्वात् सान्तत्यस्य षष्ठसप्तमयोरह्नोस्तदुभयं सदृष्टान्तं दर्शयति।

यथा वै व्योकसौ विप्रद्रुवत एवमेते षष्ठश्चाहः सप्तमश्च विप्रद्रुवतस्तौ यथा समानीय संयुज्यादेवमेवैते एतेन साम्ना संयुनक्ति ॥ ८ ॥

यथा खलु व्योकसौ विभिन्ननिलयौ पक्षिणौ विप्रद्रवतः विश्लिष्टं पतत: एवमेते षष्ठसप्तमहः सप्तममहश्च विप्रद्रवतौ विमुक्तौ भवतः षष्ठेन षडहस्य समाप्तत्वात् तौ व्योकसौ पक्षिणौ समानीय एकत्र आनीय संयुज्यात् संयुक्तौ कुर्य्यात् एवमेवैते षष्ठसप्तमे अहनी एतेन सन्तनिसाम्ना संयुनक्ति सन्तनोति ॥ ८ ॥

अथास्मिन्नेव तृचे सामान्तरं विधत्ते।

सौपर्णं भवति स्वर्गस्य लोकस्य समष्ट्यै ॥ ९ ॥

सौपर्णाख्यं साम तृचा पवस्वेत्यस्मिन्नेव तृचे कार्य्यं सुपर्णो हि पक्षी उत्पतनेन स्वर्गं प्रापयितुं शक्तस्तत्सम्बद्धं सौपर्णं साम स्वर्गलोकस्य प्राप्त्यै समर्थं ॥ ९ ॥

अथ प्रकारान्तरेण प्रशंसति।

यज्ञो वै देवेभ्योऽपाक्रामत्स सुपर्णरूपं कृत्वाचरत्तं देवा एतैः सामभिरारभन्ता यज्ञइव वा एष यच्छन्दोमा यज्ञस्यैवैष आरम्भः ॥ १० ॥

यज्ञः खलु पुरा देवेभ्यः सकाशात् केनचिदपराधेनापाक्रामदपागच्छत् अपक्रम्य च सः यज्ञः सुपर्णरूपं सुष्ठुतनः श्येनस्वरूपात्मानं कृत्वा अचरत् अन्तरिक्षे अपवर्त्तत तं सुवर्णरूपयज्ञं देवाः एतैः सौपर्णैः सामभिरारभन्त अगच्छन् तस्मादेतत् साम यज्ञारम्भसाधनं यत् एते त्रयश्छन्दोमाः एष यज्ञः इव वै

यज्ञविलक्षण एव अतो यज्ञस्यैव एष आरम्भो ग्रहणं भवति यत् सौपर्णं भवतीति एवं वा यज्ञभूतेषु छन्दोमेषु यज्ञग्रहणसाधनस्य सौपर्णस्य करणात् तेषां यज्ञत्वं सिद्ध्यतीत्यर्थः ॥१०॥

अथास्मिन्नेव तृच आदत्ते सामान्तरं विधत्ते।

रोहितकूलीयं भवत्याजिजित्यायै ॥ ११ ॥

रोहितकूलीयाख्यं सामापि तृचा भवत्येत्यस्मिन्नेव तृचे गातव्यं तच्च आजिजित्यायै आजिः सङ्केतितप्राप्त्यावधिः तस्य जयाय भवति ॥ ११ ॥

कुत एतदित्यत आह।

एतेन वै विश्वामित्रो रोहिताभ्याꣳ रोहितकूलमाजिमजयत् ॥ १२ ॥

एतेन खलु साम्ना साधनेन पुरा विश्वामित्र ऋषिः रोहिताभ्यामश्वाभ्यां रोहितकूले एतत् संज्ञे स्थाने आजिमजयत् जितवान् तस्मादेतदाजिजयसाधनमित्यर्थः ॥ १२ ॥

एतदेव विवियते।

विश्वामित्रो भरतानां मनस्त्यायात्सौदन्तिभिर्नाम जनतयाꣳ ग्रास्यतेमाम्मां यूयं वव्रिकाञ्जयायेमानि मह्यं यूयं पूरयाय यदोमाविदꣳरोहितावश्व-

चितं कूलमुद्वहात दूति स एते सामनी अपश्यत्ताभ्यां युक्ता प्रासेधत्स उदजयत्॥ १३॥

विश्वामित्रः पुरा भरतानां भरतवंशजातानां मनःसत्या मनसा युक्तया प्रजया आयात् भरतानां देशं शकटारूढोऽगच्छदित्यर्थः अत्र च भरतदेशे सौदन्तिभिः सुदन्तवंशजैः एतत्संज्ञैः जनतया जनसमूहेन अंशं विभजनाय धनं प्राप्तुत प्राप्तिय आजिं सन्धाय तेन प्राप्तव्यमेतदिति स्थापितमभूत् योऽस्माकं मध्ये ज्येष्ठोऽस्ति तस्येदमस्विति तत्र विश्वामित्रो दैवसङ्गतएवमब्रवीत् हे सूदन्ताया यदि यूयं ज्येष्ठाय तर्हि अस्मिन् संख्यां वल्गिकां वल्गिसंज्ञां वसुसम्बन्धं धनसमूहं प्रति मां यूयं जयाय देहि यदि तु मदीयाविमौ रोहितावश्वौ अश्मार्चितं अश्मभिः पाषाणैरासमन्ताच्चितं सन्तमग्निमिदं नद्याः कूलं उद्वहात ऊर्ध्वशकटं उत्तारयिता तर्हि मह्यं अतदर्थमेव इमानि धनानि पूरयाय पूरणायेति एवं कृतप्रतिज्ञः स विश्वामित्रः एते रोहितकूलीये सामनी अपश्यत्ताभ्यां सामभ्यां अश्वौ शकटे युक्ता प्रासेधत् प्रकर्षेण कूलोद्वहनं साधितवान् ततः स उदजयत् उत्कृष्टजयं प्राप्नोत् तस्मादेतद्रोहितकूलसम्बन्धात् रोहितकूलीयमित्याख्यायते॥ १३॥

अस्येवमस्याजिजयहेतुता द्वादशाहे कथं सङ्गच्छत इत्यत आह।

आजिर्वा एष प्रततो यद्द्वादशाहस्तस्यैते उज्जित्यै ॥ १४ ॥

प्रततः प्रकर्षेण विस्तारितः द्वादशाह इति यत् एष आजिर्वै आजिरेव अतस्तस्य द्वादशाहस्याजेरुज्जित्यै उज्जयाय भवति ॥ १४ ॥

अथ द्वितीयर्चे सामान्तरं विधत्ते।

कखरथन्तरं भवति ॥ १५ ॥

पुनानः सोमधारयेति विहितेऽस्मिन् ऋचे कखरथन्तराख्यं साम गातव्यं ॥ १५ ॥

अथैतत् स्तौति।

तेजो वा एतद्रथन्तरस्य यत्कखरथन्तरꣳ सरसमेव तद्रथन्तरं प्रयुङ्क्ते यत्कखरथन्तरेण सप्तमेऽहनि स्तुवते ॥ १६ ॥

यत् कखरथन्तराख्यं साम एतद्रथन्तरस्य अभि त्वा शूरेत्यस्यां गीयमानस्य तेजो वै तेज एव सारभूतमेतद्यावद्वीरात्तस्य सप्तमेऽहनि उद्गातारः कखरथन्तरेण स्तुवत इति यत्तत्तेन सरसं रससहितं सारवदेव रथन्तरं प्रयुङ्क्ते ॥ १६ ॥

अथैतत्प्रकारान्तरेण स्तौति।

जामि द्वादशाहस्यास्तीति ह स्माहोग्रदेवो राजनिर्व्वार्हतꣳ षष्ठमहर्व्वार्हतꣳ सप्तमं यत्कखरथन्तरं भवति तेनाजामि ॥ १७ ॥

राजनिः रजनस्य पुत्रः उग्रदेवाख्यः ऋषिः षष्ठसप्तमयोरुभयोरपि नैरन्तर्य्येण बार्हतत्वात् जामित्वदोषोऽस्तीत्याह पुरोक्तवान् षष्ठमहर्बार्हतं बृहतः सम्बन्धि एव साम्नो बृहतः सकाशाज्जामित्वात् सप्तममहश्च बार्हतं बृहतः सम्बन्धि तथाच जामिसादोषः तत्रायं परिहारः सप्तमेऽहनि कखरथन्तरं भवतीति यत् तेन कखरथन्तरेण अजामि जामितादोषो न भवति रथन्तरस्य कृतत्वात् ॥ १७ ॥

अथास्मिंस्तृचे सामान्तरं विधत्ते।

गौङ्गवम्भवति ॥ १८ ॥

गौङ्गवाख्यं साम पुनानः सोम इत्यस्मिन्नेव आदत्ते तृचे गेयं ॥ १८ ॥

अथैतदस्मिन्नहनि प्राप्तिहेतुत्वेन स्तौति।

अग्निरकामयतान्नादः स्यामिति स तपोऽतप्यत स एतङ्गौङ्गवमपश्यत्तेनान्नादोऽभवद्यदन्नं वित्वा गर्द्द्यदगङ्गूयत्तङ्गौङ्गवस्य गौङ्गवत्वमन्नाद्यस्यावरुध्यै गौङ्गवं क्रियते ॥ १९ ॥

अन्नादो अन्नस्यात्ता भवेयमिति अग्निरकामयत कामितवान् कामयित्वा च स तपस्यतप्यत स तपोमाहात्म्येन एतद्गौङ्गवाख्यं सामापश्यत् तेन च साम्ना अन्नस्यात्ताभवत् तदन्नं वित्वा लब्ध्वा यद्गर्हत् शब्दमकरोत् गर्ह शब्दे इति धातुः एतदेव व्याचष्टे यद्गङ्क्यदिति गङ्क अव्यक्ते शब्दे अगङ्क्यत् अव्यक्तं शब्दमकरोत् तत्तस्माद्गौङ्गवस्य साम्नो गौङ्गवत्वं गौङ्गवमिति नाम सम्पन्नं तस्मादद्यतनोऽपि अन्नाद्यस्यावरोधाय सप्तमेऽहनि गौङ्गवं क्रियते प्रयुज्यते ॥ १९ ॥

अथ प्रकारान्तरेण तत् स्तौति ।

यत्साम देवताः प्रशंसति तेन यजमानाः सत्याशिषः सत्याशिषोऽसामेति वै सत्रमासते सत्याशिष एव भवन्ति ॥ २० ॥

साम्नां मध्ये यत् साम देवताः प्रशंसति प्रशंसां करोति तेन साम्ना यजमानाः सत्याशिषः सत्यफला भवन्ति गौङ्गवाख्यं साम देवतायाः अग्नेः अन्नादत्वलक्षणं प्राशस्त्यं करोति यजमानस्य सत्याशिषः सत्यफलाः असामेत्यभिप्रायेण खलु सत्रमासते सत्रासनं कुर्वते ते देवताः प्रशंसकेनैतेन साम्ना सत्याशिष एव भवन्ति ॥ २० ॥

अथ सामान्तरं विधत्ते ।

आयास्यम्भवति तिरश्चीननिधनं प्रतिष्ठायै ॥२१॥

आयास्यं अयास्येन दृष्टं साम पुनानः सोमेत्यस्मिन्नेव दृष्ट आदत्ते गातव्यं तच्च तिरश्चीननिधनं तैरश्चीनं तिर्य्यग्वर्त्तमानं निधनं यस्य तादृशं भवति यजमानस्य प्रतिष्ठानार्थं ॥ २१ ॥

अथैतद्विभ्रष्टशब्ददोषनिवर्हणहेतुतया स्तौति।

अयास्यो वा आङ्गिरस आदित्यानां दीक्षितानामन्नमाश्नात् स व्यभ्रंशत स एतान्यायास्यान्यपश्यत्तैरात्मानꣳ समयीणाद्विभ्रष्टमिव वै सप्तमम्महर्य्यदेतत्साम भवत्यहरेव तेन सꣳश्रीणाति ॥ २२ ॥

आङ्गिरसो अङ्गिरोगोत्र अयास्य ऋषिः पुरा दीक्षितानां प्रारब्धयज्ञानां आदित्यानां अन्नमाश्नात्* तैः सामभिरात्मानं वीर्य्यैः समश्रीणात् समगमयत् एतत् सप्तममहश्च विभ्रष्टमिव वै भ्रष्टवीर्य्यमिव खलु दृश्यपञ्चहस्य समाप्तत्वात् आगामिनोऽहरन्तरस्य चानिष्पत्तेरेकाकित्वात् एतदायास्यं साम सप्तमेऽहनि भवतीति यत् एतेन साम्ना तदहरेव संश्रीणातीति वीर्य्येण संयोजयति ॥ २२ ॥

अथान्तिमे तृचे सामान्तरं विधत्ते।

* अत्र पतितमनुमीयते।

प्रवङ्गार्गवं भवति ॥ २३ ॥

प्रवत् प्रशब्दयुक्तं भार्गवं भृगुदृष्टं तदाख्यं सामाप्नवात् आगामिनोऽहरन्तरस्य प्रो अयासीदिति विहितेऽस्मिंस्तृचे गातव्यं ॥२३

अथैतत् स्तौति ।

प्रवता वै देवाः स्वर्गं लोकं प्रायन्नुद्वतोदायन् ॥२४

प्रवता प्रशब्दवता साम्ना खलु पुरा देवाः स्वर्गं लोकं प्रायन् प्रागच्छन् गन्तुं प्रक्रान्ता उद्वता उद्गच्छद्वता साम्ना उदायन् ऊर्ध्वं गच्छन् तस्मादेतत् साम स्वर्गप्राप्तिसाधनमित्यर्थः ॥ २४ ॥

अथैतत्पवमानस्तोत्रमुपसंहरति ।

निधनान्ताः पवमाना भवन्त्यह्नो धृत्यै स्तोमः ॥२५

सर्वत्र हि पवमानाः पवमानस्तोत्राणि निधनान्तानि भवन्ति निधनमन्ते येषां ते निधनान्ताः अत्र च मा २ नोपथा ३ ऊषा २३४५ इति प्रवङ्गार्गवस्यावसाने निधनमधीयते तच्चाह्नो धृत्यै धारणाय भवति एवं गायत्रादिप्रवङ्गार्गवान्तेष्वष्टसु सामसु तृचेषु गीयमानेषु निष्पद्यमानश्चतुर्विंशस्तोमोऽस्य पवमानस्तोत्रस्य कार्त्स्न्यं इत्यर्थः ॥ २५ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्दशाध्यायस्य
तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

अथ षष्ठस्तोत्रेषु प्रथमद्वितीये प्रकृते एवेति मन्वानस्तृतीयस्य षष्ठस्तोत्रस्य तृतीयं तृचं दर्शयति ।

वयं घत्वा सुतावन्त ऊति सतो बृहत्यो वर्षीयश्छन्द आक्रमतेऽनपभ्रंशाय ॥ १ ॥

वयंघत्वाद्यास्तिस्रः सतो बृहत्यो ब्रह्मसाम्नः स्तोत्रीया भवन्ति आसाञ्च सतो बृहतीत्वं पूर्वसूक्ते प्रकृतौ हि बार्हतः प्रगाथो ब्रह्मसाम्नः आधारः बृहती च षट्त्रिंशदक्षरा सतो बृहत्याख्यं छन्दः वर्षीयो दृढतरं चत्वारिंशदक्षरत्वात् अनुष्टुप्छन्द आक्रमते प्रारभते अनपभ्रंशाय अपभ्रंशाभावाय अधःपतनाभावाय ॥ १ ॥

अथ चतुर्थस्य षष्ठस्तोत्रस्य स्तोत्रीयं तृचं दर्शयति ।

न किष्टं कर्म्मणानशदिति बृहत्यः सत्योऽभ्यारम्भेण जगत्यः ॥ २ ॥

न किष्टं कर्म्मणेत्याद्यास्तिस्रोऽवावाक्षसाम्नः स्तोत्रीया भवेयुः ताश्च स्वभावतो बृहत्यः सत्यो भवन्त्यभ्यारम्भेण गानसमये सङ्गीयमानस्य मन्त्रभागस्य पुनरपि गानार्थमुपादानमभ्यारम्भः तेन जगत्यो भवन्ति अस्मिंस्तृचे वैखानसाख्ये गीयमाने

सदादृधाम् तमञ्चसाम् सुमोजसा इति चतुरक्षराख्योऽर्द्धमादाः पुनरारभ्यन्ते एतानि द्वादशाक्षराणि सम्पद्यन्ते बृहती षट्त्रिंशदक्षरेति मिलित्वा अष्टाचत्वारिंशदक्षरा प्रथमा जगती भवति एवमुत्तरे अपि ॥ २ ॥

एवमभ्यारम्भेण जगतीसम्पादने कोलाभ इत्यत आह।

अपभ्रंशदूव वा एष यज्ज्यायसः स्तोमात्कनीयांसं स्तोममुपयन्ति यदेता अभ्यारम्भेण जगत्यो भवन्त्यङ्ग एव प्रत्युक्तम्भाय ॥ ३ ॥

ज्यायसो बृहत्तरात् त्रयस्त्रिंशात् स्तोमात् कनीयांसं अल्पीयांसं न्यूनसंख्यं चतुर्विंशं स्तोममुपयन्ति यत् एषा अपभ्रंशदूव वै अधःपतनमिव खलु तस्मात् सप्तमेऽहनि या देवताः पूर्वोक्ताः न किंचं कर्मणानशदित्याद्यास्ता अभ्यारम्भेण जगत्यो भवन्ति तदस्य सप्तमस्याङ्ग एव प्रत्युक्तम्भाय प्रत्युक्तम्भनाय अधःपततोधृत्यै धारणाय भवति अधिकाक्षरछन्दसः कारणात् स्तोमप्रयुक्तन्यूनता परिहृता भवतीत्यर्थः ॥ ३ ॥

अथास्मिन्नहनि ब्रह्मणः पृष्ठस्तोत्रनिवर्त्तकं साम दर्शयति।

अभिनिधनं कार्ष्णवम्भवति ॥ ४ ॥

अभीति निधनं यस्य तादृगं कृष्णदृष्टं साम वयं घत्वेति तृचे गातव्यं ॥ ४ ॥

तदेतद्ब्राह्मणं हननहेतुरिति स्तौति।

अभिनिधनेन वा इन्द्रो वृत्राय वज्रं प्राहरत्तमस्तृणुत स्तृणुते ज्ञातव्यमभिनिधनेन तुष्टुवानः॥ ५॥

अभिनिधनेनानेन साम्ना पुरा इन्द्रो वृत्रं हन्तुं वज्रं प्राहरत् प्राक्षिप्तवान् प्राहृत्य च तं वृत्रमस्तृणुत अवधीत् स्तृञ् हिंसायामिति धातुः शिष्टं स्पष्टं॥ ५॥

अथाक्षावाकृष्यस्तोत्रनिवर्त्तकं साम दर्शयति।

वैखानसं भवति॥ ६॥

वैखानसाख्यं साम नक्षिप्तं कर्मणा नशदिति तत्त्वे ज्ञातव्यं॥ ६॥

अथैतत् सर्वकामप्राप्तिसाधनमिति विवक्षुराख्यायिकामाह।

वैखानसा वा ऋषय इन्द्रस्य प्रिया आसꣳस्तान् हस्युर्देवमलिम्लुङ्मुनिमरण्येऽमारयत्ते देवा अब्रुवन् कतमर्षयोऽभूवन्निति तान् प्रेषमैक्षत्तान्नाविन्दत्त इमान् लोकानेकधारेणापुनात्तान्मुनिमरण्येऽविन्दत्तानेतेन साम्ना समैरयत्तद्वाव सतर्ह्यकामयत कामसनि साम वैखानसं काममेवैतनावरुन्धे स्तोमः॥ ७॥

वैखानसा विखनसः पुत्राः ऋषयः इन्द्रस्य प्रिया आसन् इष्टतमा अभवन् तादृषीन् रहस्युन्नाम देवमलिम्लुङ् देवान् मालिन्यं मोचयति प्रापयतीति देवमतिग एवं विधोऽसुरः मुनिमरणे मुनयो म्रियन्तेऽस्मिन्निति मुनिमरणं स्थानविशेषः अधिकरणे लुट् तस्मिन् स्थाने अमारयत् अवधीत् एवं मृतेषु वैखानसेषु तमिन्द्रं देवा अब्रुवन् ते च प्रिया ऋषयः क्व कुत्राभूवन्निति स इन्द्रस्तादृषीन् प्रैषमैषकृत् अन्विष्टवानित्यर्थः सच गवेषयमाणस्तान् क्वचिदपि नाविन्दन्नालभत स इमान् पृथिव्यादीन् सर्वानेकधारेण एकोद्योगेनापुनादशोधयत् एवं सर्वान् लोकान् शोधयित्वा तादृषीन् मुनिमरणे स्थानेऽविन्दत् मृतानलभत अपश्यदित्यर्थः स इन्द्र एतेन साम्ना तान् समैरयत् पुनः प्राणैस्तान् समयोजयत् यस्मादेवं वैखानसानां सम्बन्धः तस्माद्वैखानसमिति साम्नः संज्ञा जाता तत् खलु समीरणं तस्मिन् काले सोऽकामयत यस्मादेवं कामितार्थमसाधयत् तस्माद्वैखानसं साम कामसनि कामप्रदं तस्मात्सर्व्वमेव काम्यमानं फलं तेन साम्ना लभते एतेष्वपि चतुर्षु षष्ठस्तोत्रेषु पूर्व्वोक्तएव चतुर्व्विंशस्तोमः कार्य्यः ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्दशाध्यायस्य

चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

अथार्भवपवमानस्य प्रथमं प्रतिपत्तृचं दर्शयति ।

यस्ते मदो वरेण्य इति गायत्री भवति मदवद्वै रसवत् तृतीयसवनं मदमेव तदृसं दधाति ॥ १ ॥

यस्ते मदो वरेण्य इति गायत्री आर्भवपवमानस्य प्रतिपद्भवति गायत्रः प्रथमस्तृचो भवतीत्यर्थः शिष्टं पूर्ववद्व्याख्येयं ॥ १ ॥

अथ तृचान्तरं विधत्ते ।

एषस्यधारयासुत इति ककुभः सत्योऽभ्यारम्भेण त्रिष्टुभः ॥ २ ॥

एषस्यधारयेति तिस्रः स्तोत्रीयाः कार्याः ताः ककुभः अभ्यासाक्षरौ अष्टाक्षरौ द्वौ पादौ मध्ये द्वादशाक्षराः ताः ककुभ ईदृश्यः सत्यो भवन्तिः गीतिसमयेऽभ्यारम्भेण त्रिष्टुभो भवन्ति प्रथमपादस्य द्वितीयपादे अव्याबारेभिः पवते मदिन्तमः इत्यादेः अष्टाक्षरस्य तु पुनरारभ्यमाणत्वात् एवमभ्यस्यमानौ द्वावष्टाक्षरौ मिलित्वा षोडशाक्षराणि सम्पद्यन्ते अध्ययनतस्तु अष्टाविंशत्यक्षरेति मिलित्वा चतुश्चत्वारिंशदक्षरा एकैका त्रिष्टुब् भवति ॥२॥

एतत्त्रिष्टुप्सम्पादनं पूर्ववदङ्गउक्तस्तुत्यर्थमित्याह ।

अपभ्रष्टमिव वा एष यत् ज्यायसः स्तोमात्कनी-

यांसꣳ स्तोममुपयन्ति यदेता अभ्यारम्भेण त्रिष्टुभो भवन्त्यह्न एव प्रत्युत्तम्भाय ॥ ३ ॥

व्याख्यातमेतत् पूर्वस्मिन् खण्डे ॥ ३ ॥

अथ तृचान्तरं विधत्ते।

सखाय आनिषीदतेति वालखिल्या वालखिल्यावेतौ तृचौ षष्ठे चाह्नि सप्तमे च यदेतौ वालखिल्यौ तृचौ भवतोऽह्नोरेव व्यतिषङ्गायाव्यवस्रꣳसाय सन्तत्यै ॥ ४ ॥

सखाय आनिषीदतेत्याद्याभिस्तो वालखिल्याः वालखिल्यसम्बन्धिन्यः ऋचो भवन्ति शिष्टं परिस्तानो गरिष्ठा इति परिवत्यो गायत्यो भवन्तीति खण्डे व्याख्यातं ॥ ४ ॥

अथान्यं तृचं विधत्ते।

पुरोजिती वो अन्धस इति विराडन्नं विराडन्नाद्यस्यावरुध्यै ॥ ५ ॥

पुरोजिती वो अन्धस इत्याद्याभिस्तः स्तोमीया भवन्ति तासु प्रथमानुष्टुबुत्तरे गायत्यौ संहत्य गणनायां दशपादा भवन्ति सा एका विराट् दशाक्षरा विराडिति श्रुतेः तासामक्षरपरिगणनायामशीत्यक्षराणि सम्पद्यन्ते सा अन्या विराट् आम्नातं हि

पुरा पद्यया विराडत्यर्थान्यास्यात् लोकात्पद्यया विराजान्नाद्य-मवरुन्ध इत्येतदेवाभिप्रेत्य पुरोजिती वो अन्धस इति सिद्धवद्-व्यवहारः गतमन्यत् ॥ ५ ॥

अथ तत्रान्तरं दर्शयति।

प्रवाज्यत्रारित्यत्तरपङ्क्तिः स्तोमानां प्रभूतिः ॥६

प्रवाज्यत्रारित्यादिकोऽक्षरपङ्क्तिछन्दस्कस्तुचो भवति अष्टाक्षरैर्हि पञ्चभिः पादैः पङ्क्तिः इयन्तु अक्षरसंख्यया चत्वारिंशदक्षरा पङ्क्तिः सा च स्तोमानां त्रिवृदादीनां प्रभूतिः प्रभवः उत्पत्तिस्थानमित्यर्थः त्रिवृदाद्यष्टाचत्वारिंशान्तेषु स्तोमेषु नवाद्यष्टाचत्वारिंशदन्ता या सङ्ख्या सा सर्व्वाक्षरपङ्क्तावन्तर्भूतेति प्रभूतित्वं ॥ ६ ॥

गायत्र्यादीनां छन्दसां षडहे विनियुक्तत्वात् तैः साध्यानां छन्दोमानां यद्गतसारत्वमाशङ्क्यते तदप्यनेनाक्षरपङ्क्तिछन्दसा समाधीयत इत्यत आह।

अथो °एतद्वैवैतर्हि छन्दो यातयाम यदक्षरपङ्क्तिस्तेन छन्दोमा अयातयामानः क्रियन्ते ॥ ७ ॥

अथो अपि एतर्ह्येतस्मिन् सप्तमस्याह्नः प्रयोगकाले एतदेव खलु छन्दः अयातयाम अगतसारं यदक्षरपङ्क्त्याख्यं छन्दः

पूर्वेष्वहःसु अविनियुक्तत्वात् तेनायातयामाक्षरपङ्क्तिछन्दसा छन्दोमाः अयातयामानः यातयामत्वदोषरहिताः सारयुक्ताः क्रियन्ते ॥ ७ ॥

एतदेव प्रश्नप्रत्युक्तिभ्यां विवृणोति ।

ब्रह्मवादिनो वदन्ति यत् षड्हे स्तोमाश्छन्दाꣳस्याप्यन्ते किं छन्दस्यछन्दोमा इत्येतच्छन्दसो यदेता अक्षरपङ्क्तय इति ब्रूयात् ॥ ८ ॥

ब्रह्मवादिनो वेदार्थमीमांसका आहुः षडहे समाप्यमाने त्रिवृदादयः स्तोमाः गायत्र्यादीनि छन्दांसि समाप्यन्ते यद्येवं तावत् छन्दोमाश्छन्दोमाख्यानि त्रीण्यहानि किं छन्दसः केन छन्दसा निष्पाद्या इति एवं ब्रह्मवादिभिः पृष्टे तस्योत्तरं ब्रूयात् यदेता अक्षरपङ्क्तयः अक्षरपङ्क्तिछन्दस्काः प्रवाज्यक्षरित्याद्याः एतच्छन्दस एतदक्षरपङ्क्तिछन्दोयेषां तथाविधा छन्दोमा इति अक्षरपङ्क्तिरेव पूर्वेष्वहःसु विनियुक्तत्वात् छन्दोमानां सारत्वापादकमसाधारणं छन्द इत्यर्थः ॥ ८ ॥

अथ तत्रस्थान्तरं विधत्ते ।

ये सोमासः परावतीति परावतमिव वा एतर्हि यज्ञो गतरूपमेवैतेनान्विच्छन्ति ॥ ९ ॥

ये सोमासः परावतीति स्तौति परावतमिव वै एतर्हि यज्ञो

गतः प्रायणीयातिरात्रमारभ्य एतदन्तानां सप्तानामङ्गां गतत्वात् यथाध्वगस्य पुरुषस्यातीतदिवसे मध्ये मार्गेऽवस्थिता महीरुहाद्यादूरस्था भवन्ति एवमेव सप्तममहरनुतिष्ठतो यजमानस्यातीतानि पूर्व्वाण्यहानि विप्रकृष्टानि भवन्तीत्यर्थः तमेव दूरगतं यज्ञं एतेन दूरवाचिवच्छब्दयुक्तेन ऋचेनान्विच्छन्ति गवेषयन्ति ॥ ९ ॥

ननु प्रकृतावार्भवस्यान्त्यस्तृचो जागतः कथं तत्र ये सोमास इत्याद्या गायत्र्यः सत्यः जागतं गच्छन्ति इत्याशङ्क्य लक्षणया जगतीत्वात् सङ्गतिरित्याह।

गायत्र्यः सत्यो जगत्यो रूपेण तस्माज्जगतीनां लोके क्रियन्ते ॥ १० ॥

गतमेतत् ॥ १० ॥

अथ यस्ते मदो वरेण्य इति विहिते ऋचे पूर्ववद्गायत्रं साम विधाय तदितिकर्त्तव्यताविधायकं ब्राह्मणञ्चातिदिशति।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ ११ ॥

सिद्धमेतत् ॥ ११ ॥

अथास्मिन्नेव ऋचे सामान्तरं विधत्ते।

दक्षिणिधनं भवति ॥ १२ ॥

दत्तायेति दत्तशब्दोनिधनं यस्य तद्दत्तनिधनं एतदपि साम यस्येमदद्म्येतस्मिंस्तृचे आहृत्ते गातव्यं अथ सूत्रकारेण कल्पकारोक्तसामद्वयमुदाहृत्य स्तोमातिरेकपरिहाराय व्यवस्था दर्शिता सप्तमेऽग्नेरर्कोऽध्यर्द्धैडञ्च सोमसाम मौत्रस्य पूर्वयोर्मौत्रसोमसामनी गायत्रस्योत्तरयोरग्नेरर्कस्तृच्यति वेति अयमर्थः यदेतद्दत्तनिधनाख्यं तस्यैव मौत्रमिति नाम तत्र गायत्रत्रृचे गीत्वा अग्नेरर्काख्यं अध्यर्द्धैडञ्च सोमसाम मौत्रं वेति त्रीणि सामानि यस्येमद इत्याद्यासु तिसृषु एकर्चानि क्रमेण गातव्यानि अथवा गायत्रमेकस्मिन्गीत्वा तदुत्तरयोर्मौत्रसोमसामनी गातव्ये अग्नेरर्काख्यं तिसृषु गातव्यमिति अत्र ब्राह्मणे अग्नेरर्कसोमसाम्नोरविधानात् विहितयोरेव गायत्रमौत्रयोस्तृचे गानादेव सोमसम्पत्तेः सूत्रकारवचनस्य शाखान्तरीयप्रतीतेर्विकल्पएवमुक्तः ननु उक्तप्रकारेणसमुच्चयः तथा निरालम्बकमता* भगवता पतञ्जलिनोक्तं सप्तमेऽह्यर्कः कृताकृतो भवत्यब्राह्मणविहितत्वादिति ॥ १२ ॥

अथैतद्ब्रह्महेतुत्वेन स्तौति ।

प्रजापतिः प्रजा असृजत ता अस्मात् सृष्टा अवलादूवाक्रदयंस्तास्तेन साम्ना दत्तायेत्योजोवीर्यमदधाद्यदेतत् साम भवत्योज एव वीर्यमात्मन्धत्ते ॥ १३ ॥

* असमीक्षितः पाठः ।

पुरा प्रजापतिः सर्व्वाः प्रजाः सृष्टवान् ताः सृष्टाः प्रजाः अस्मात्प्रजापतेः सकाशात् अबला बलरहिताः अवस्यातुमशक्ताः सत्यः अच्छदयन् देशान्तरमाद्रवन् अपागच्छन्नित्यर्थः अथ तासु प्रजासु मौञ्जेण साम्ना दृचायेति निधनेन बलवाचिना ओजोबलात्मकं वीर्य्यमदधादस्थापयत् तस्मादेतत्साम भवतीति यत् तेन ओजोरूपं वीर्य्यमेवात्मन् आत्मनि तस्मिन् धत्ते धारयति ॥ १३ ॥

अथ ऋचान्तरे सामान्तरं विधत्ते ।

शार्करं भवति ॥ १४ ॥

शर्करेण दृष्टं साम शार्करं तत् एषस्यधरयासुत इति विहिते ऋचे गातव्यं ॥ १४ ॥

अथैतदाख्यायिकया सर्वकामप्राप्तिहेतुरित्यत आह ।

इन्द्रꣳ सर्व्वाणि भूतान्यस्तुवन् स शर्करꣳ शिशुमारर्षिमुपेत्याब्रवीत् स्तुहि मेति सोऽपःप्रस्कन्दन्नब्रवीदेतावतोऽहं त्वाꣳ स्तुयामिति तस्मादपां वेगमवेजयत सहोन दूवामन्यत स एतत्सामापश्यत्तेनापोन समाश्नुत तद्वाव सतर्ह्यकामयत कामसनि साम शार्करं काममेवैतेनावरुन्धे ॥ १५ ॥

पुरा खल्विन्द्रं सर्वाणि भूतानि भूतजातानि देवर्षिमनुष्यगन्धर्वादीन्यस्तुवन् विविधैः स्तोत्रैरप्रीणयन् स इन्द्रः शर्कराख्यं शिशुमारर्षिं शिशुमारो जलचरः तद्रूपिणमृषिमुपेत्योपगत्य स इन्द्रोऽब्रवीत् मां स्तुहीति स शर्करः अपोजलं प्रस्कन्दम् प्रक्षिपन्नब्रवीत् उक्तवान् प्रस्कन्नास्वपु यावन्तो बिन्दवो निष्पद्यन्ते एतावता एतावत्यर्थान्तं अहं त्वां स्तवानीति यस्मादेवमुक्तवान् तस्मात्तमृषिं अपां वेगमवेजयत् स ऋषि अपां वेगं दृष्ट्वा ततोहीनैव मदीया स्तुतिरित्यमन्यत ततस्तत्साम्यार्थं प्रयतमानः स ऋषिरेतत्सामापश्यत् तेन साम्ना स्तुवन्नपः अपां वेगन्न समाप्नुत प्राप्नोत् एतदीया स्तुतिः प्रकीर्त्यमाणा अपोऽत्यक्रमीदित्यर्थः गतमन्यत् ॥ १५ ॥

अथ तृचान्तरे सामान्तरं विधत्ते ।

प्लवो भवति ॥ १६ ॥

सखाय आनिषीदतेति बालखिल्यतृचे प्लवाख्यं साम कार्यं ॥ १६ ॥

अथैतं द्वादशाहं समुद्रात्मना रूपयन् तस्य पारप्राप्तिसाधनमेतदिति स्तौति ।

समुद्रं वा एते प्रस्कान्तीत्याङ्गर्व्ये द्वादशाहमुपयन्तीति यो वा अप्लवः समुद्रं प्रस्कान्ति न स तत उदेति यत् प्लवो भवति स्वर्गस्य लोकस्य समष्ट्यै ॥ १७ ॥

ये यजमानाः द्वादशाहमुपयन्ति उपगच्छन्ति एते समुद्रमुदधिं प्रखान्ति अवगाहन्ते इत्याहुः ब्रह्मवादिनः एवञ्च यः खलु अप्लवः प्लवरहितः अनौकः समुद्रं प्रखाति प्रविशति स ततः समुद्रात् नोदेति नोद्गच्छति तत्रैव निमज्जतीत्यर्थः तथा चास्मिन् द्वादशाहाख्ये समुद्रे अवगाहतामपि केनचित् प्लवेन भवितव्यं तस्मादस्मिन् सप्तमेऽहनि प्लवाख्यं साम भवतीति यत् तत् स्वर्गस्य लोकस्य समष्ट्यै प्राप्त्यै भवति द्वादशाहाख्यस्य समुद्रस्य तरणाय भवतीत्यर्थः ॥ १७ ॥

अथास्य निधनमनूद्य स्तौति।

अतिविश्वानि दुरिता तरेमेति यदेवैषां दुष्टुतं दुःशस्तं तदेतेन तरन्ति * ॥ १८ ॥

अनेन निधनेन दुरितातितरणं प्रतिपाद्यते तथा च एषामृत्विजां सम्बन्धि यदेव दुष्टुतं दुःशस्तं अयथास्तवनमयथाशंसनञ्च तदेतेन निधनेनातितरन्ति अतिक्रामन्ति ॥ १८ ॥

अथैतन्निधनसंख्याद्वारा स्तौति।

एकादशाक्षरणिधनो भवत्येकादशाक्षरा त्रिष्टुबोजोवीर्य्यं त्रिष्टुबोजस्येव वीर्य्यं प्रतितिष्ठति ॥ १९ ॥

अतिविश्वानीत्याद्यानि एकादशाक्षराणि निधनानि यस्य

* अयं मन्त्रो मुखपुस्तकत्रयेऽपि नास्ति।

तादृशः प्रवो भवति छन्दसाम्मध्ये त्रिष्टुप् छन्दः एकादशाक्षरा सा च त्रिष्टुबोजो वीर्य्यरूपा एवं परम्परया संख्याद्वारा ओजस्येव ओजो बलं तद्रूप एव वीर्ये यजमानः प्रतिष्ठितो भवति ॥ १९ ॥

अथ तृचान्तरं सामान्तरं विधाय तद्ब्राह्मणञ्चातिदिशति।

गौरीवितं भवति यदेव गौरीवितस्य ब्राह्मणं॥२०

पुरोजितो वो अन्धस इति तृचे गौरीविताख्यं साम गातव्यं अस्य गौरीवितस्य यद्ब्राह्मणं प्रागाख्यातं गौरीवितिर्वा एतच्छास्त्रयो ब्रह्मणोऽतिरिक्तमपश्यदिति तदत्रापि द्रष्टव्यं ॥ २० ॥

अथास्मिन्नेव तृचे सामान्तरं विधत्ते।

कार्त्तयशं भवति ॥ २१ ॥

कृतयशेन दृष्टं साम कार्त्तयशं एतदाख्यं साम पुरोजितो इत्यस्मिन् तृचे गातव्यं अस्मिन् साम्नि अईर्ज्वावसानेषु उपाध्ययनार्थं क्रियते ॥ २१ ॥

तस्य स्थाने अन्यं निधनं विधत्ते।

ह्वीति निधनमुपयन्ति पाप्मनोऽपहत्यै ॥ २२ ॥

उपास्थाने ह्वी इति निधनमुपयन्त्युपगच्छन्ति तत्र पाप्मनः पापस्यापहत्यै पापहननाय विनाशनाय भवति ह्वी इत्यस्य हन्ति धातुनिष्पन्नत्वात् ॥ २२ ॥

अथ स्तोतुः फलमाह।

अपपाप्मानꣳ हते कार्त्तयशेन तुष्टुवानः॥ २३॥

स्पष्टोऽर्थः॥ २३॥

अथान्यस्मिंस्तृचे सामान्तरं विधत्ते।

सौहविषं भवति॥ २४॥

सुहविषा दृष्टं साम सौहविषं तत् प्रवाच्यचारित्यस्मिन् तृचे गातव्यं॥ २४॥

तदेतत् स्तौति।

सुहविर्वा एतेनाङ्गिरसोऽञ्जसा स्वर्गं लोकमपश्यत् स्वर्गस्य लोकस्यानुख्यात्यै स्वर्गाल्लोकान्न च्यवते तुष्टुवानः॥ २५॥

सुहविर्नामाङ्गिरसः अङ्गिरोगोत्रऋषिः एतेन साम्ना साधनेनाञ्जसा अनायासेन स्वर्गं लोकमजानीत ज्ञितं स्पष्टं॥ २५॥

अथैतदाधारभूतानामृचां छन्दोद्वारेण तुष्टुवानाह।

ब्रह्मवादिनो वदन्ति यत् षडहे स्तोमाश्छन्दाꣳस्याप्यन्ते किं छन्दसश्छन्दोमा इति पुरुषश्छन्दस इति ब्रूयात्पुरुषो वै पाङ्क्तः पुरुषो द्विपदा छन्दोमानामयातयामतायै॥ २६॥

ब्रह्मवादिनो वेदार्थचिन्तकाः वदन्ति चोदयन्ति यद्यस्मात् षड्हे षष्ठाख्ये समाप्यमाने ऋचि त्रिवृदादयस्तोमा यस्मिन्नृचि इति गायत्र्यादीनि छन्दांसि च समाप्यन्ते तस्माद्विनिक्तस्यान्यच्छन्दसोऽभावाद्विनियुक्तानाञ्च गतसारत्वाञ्च छन्दोमाः किं छन्दसः केन छन्दसा निष्पाद्या इति एवं ब्रह्मवादिभिश्चोदिते पुरुषच्छन्दसश्छन्दोमा इत्यभिज्ञ उत्तरं ब्रूयात् किं तत् पुरुषछन्दस इति तदुच्यते तत् मांसस्नाय्वस्थिमज्जारेत इति पञ्चभिर्धातुभिरुपेतत्वात् पुरुषः पाङ्क्तः पङ्क्तिसम्बद्धः साहि पञ्चभिः पादैरुपेतत्वात् पञ्चसंख्यावती तस्मात् पङ्क्तिस्तावदेकं पुरुषछन्दस्तथा द्विपदापि पुरुषात्मकः पादद्वयसामान्यात् एवं विधस्य पुरुषछन्दसः पूर्व्वमेव नियुक्तः पुरुषश्छन्द इति तदुच्यते तत् मांसस्नाय्वस्थिमज्जारेत इति पञ्चभिर्धातुभिरुपेतत्वात् तेन सारवत्त्वात् तच्छन्दस्के प्रवर्ज्जिन्निति ऋचे गीयमानं साम छन्दोमानां त्रयाणामयातयामतायै अगतसारतायै भवति ॥ २६ ॥

अथ ऋचान्तरे अन्यत् साम विधत्ते।

जराबोधीयं भवत्यन्नाद्यस्यावरुध्यै ॥ २७ ॥

जराबोधीयं जराशब्दयुक्तायां योन्यामुत्पन्नं साम जराबोधीयं तत् ये सोमासः प्रावतीत्यार्भवस्यान्तिमे ऋचे गातव्यं तदन्नाद्यस्यादनीयस्यान्नस्य अवरुध्यै अवरोधनाय लाभाय भवति ॥ २७ ॥

एतदेव व्याचष्टे।

अन्नं वै जराबोधीयं मुखं गायत्री मुख एव तद्-अन्नमत्ति ॥ २८ ॥

यदेतज्जराबोधीयं साम तदन्नं वै जीर्य्यमाणावस्थायां अनेन हि बोधउत्पाद्यते येषां गायत्री ये सोमासः परावतीत्याद्या तत् मुखं प्रजापतेर्मुखाद्धि सा पूर्व्वं दृश्यते तथा च गायत्र्यां जराबोधीयस्य गानात् मुखे आस्य एव तत् अन्नमत्ति धारयति यस्मादेवं तस्मादेतेन साम्ना स्तुवन्नन्नमत्ति लब्धान्नः सन् भोक्तृत्वं लभत इत्यर्थः ॥ २८ ॥

एतद्वेदनफलमाह ।

अन्नादो भवति य एवं वेद ॥ २९ ॥

स्पष्टोऽर्थः ॥ २९ ॥

अथैतद्गायत्रीषु स्तवनमनूद्य प्रकारान्तरेण स्तौति ।

गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्च्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥ ३० ॥

सिद्धमेतत् ॥ ३० ॥

जराबोधीयस्यावसाने औ इडेत्याम्नायते तमनूद्य स्तुवन् स्तोत्रमुपसंहरति ।

इडान्नाः पावमाना भवन्ति पशवो वा इडाः पशु-

वस्क्रन्दोमाः पशुष्वेव तत्पशून्दधाति स्तोमः ॥ २१ ॥

पवमानार्भवावसाने जराबोधीयेन प्रयन्ति सिन्धुमेतत् जराबोधीयगाने पवमानान्ताः पवमानाः स्तोत्राणि इडान्ताः इडावसानानि भवन्ति किं ततो भवति उच्यते पशवो वै इडारूपाः पशवः खलु छन्दोमाश्च पशवश्चतत्तथा सति पशुष्वेव पशून्दधाति अभिपद्यर्थं एवं गायत्रादिषु जराबोधीयान्तेष्वष्टसु सामसु तृचे गीयमानेषु चतुर्विंशतिः स्तोत्रीया भवन्ति तदात्मकश्चतुर्विंशः स्तोमोऽस्यार्भवपवमानस्य कार्य इत्यर्थः ॥ २१ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्दशाध्यायस्य
पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

अथ प्राकृतमेवाग्निष्टोममभिप्रेत्य उपरितनानामुक्थस्तोत्राणां प्रथमस्य स्तोत्रीयं तृचमाह ।

आते वत्सोमनोयमदित्यपच्छिदिव वा एतद्यज्ञकाण्डं यदुक्थानि यदेति सलोमत्वायैव ॥ १ ॥

उक्थानि स्तोत्राणीति यत् एतत् यज्ञकाण्डं यज्ञभागः अपच्छिदिव वै अपच्छिन्नमिव भग्नमिव भवति तत्र प्रथमे उक्थ स्तोत्रे आते वत्स इति अयं स्तोत्रीयस्तृचो भवति इति आ इति

योऽयमुपसर्गः आभिमुख्यवाची आते वत्स इत्यादिकः सोऽयमुक्थानां सलोमत्वाय भवति पूर्वैः स्तोत्रैः सलोम्याय सन्तानाय भवतीत्यर्थः ॥ १ ॥

अथ द्वितीयस्योक्थस्य स्तोत्रीयं तृचं दर्शयति।

त्वन्न इन्द्राभरेति पूर्णाः ककुभः ॥ २ ॥

त्वन्न इन्द्रेत्याद्याः पूर्णाः अक्षरैकन्यूनाः ककुभः ककुप्छन्दस्काः ब्रह्मणउक्थस्य स्तोत्रीया भवन्ति अभितोऽष्टाक्षरौ पादौ मध्ये द्वादशाक्षर इति ककुभो लक्षणं ॥ १ ॥

अथैतासां पूर्णत्वं कनीयस्स्तोमस्य करणे अङ्गो यत् अपभ्रंशनं तत्परिहारार्थमिति स्तौति।

अपभ्रꣳश इव वा एष यज्ज्यायसः स्तोमात्कनीयांसꣳ स्तोममुपयन्ति यदेताः पूर्णाः ककुभो भवन्त्यनपभ्रꣳशाय ॥ ३ ॥

सिद्धमेतत् ॥ ३ ॥

अथ तृतीयस्योक्थस्य स्तोत्रीयं तृचं दर्शयति।

यदिन्द्र चित्रं मदृह नास्ति त्वादातमद्रिवो राधस्तन्नोविदद्दस उभया हस्त्याभरेति राद्धिमेवैतेनावरुन्धे ॥ ४ ॥

यदिन्द्र चित्रेति ऋचः अच्छावाकौक्थस्य स्तोत्रीयः इह मा स्तोत्यादेरनुवादस्तुत्यर्थः तस्यायमर्थः हे इन्द्र चित्रं चायनीयं मे मम इहास्मिन्नेव स्थाने यद्धनन्नास्ति त्वादातन्त्वया दातव्यं हे अद्रिवो वज्रिन् हे विदद्वसो लब्धधनेन्द्र तद्राधोधनं उभाभ्यां हस्ताभ्यां मह्यमाहरेति एवं राधसः प्राप्तेः प्रतिपाद्यत्वात् एतेन स्तुवन् रयिं सदृङ्सेवावरुन्धे यजमानो लभते ॥ ४ ॥

अथ प्रथमौक्थस्य साम विधत्ते ।

वात्सम्भवति ॥ ५ ॥

वत्सेन दृष्टं साम वात्सं तदा तद्वात्सं इति ऋचे गातव्यं ॥५॥

तत्रैतदाख्यायिकया सर्वकामप्राप्तिसाधनमिति स्तौति ।

वत्सश्च वै मेधातिथिश्च काण्वावास्तां तं वत्सो मेधातिथिराक्रोशदब्राह्मणोऽसि शूद्रापुत्र इति सोऽब्रवीदेतेनाग्निं व्ययाव यतरो नौ ब्रह्मीयानिति वात्सेन वत्सो व्यैन्मैधातिथेन मेधातिथिस्तस्य न लोम च नौषत्तद्वाव स तर्ह्यकामयत कामसनि साम वात्सं कामसेवैतेनावरुन्धे ॥ ६ ॥

वत्सश्च मेधातिथिश्च ऋषी काण्वौ कण्वगोत्रौ आस्तां पुरा किलाभवतान्तं वत्सं ऋषिं मेधातिथिराक्रोशत् अश्लीलया

वाचा पर्य्यवदत् हे वत्स त्वम् अब्राह्मणो ब्राह्मणरहितोऽसि शूद्रापुत्रः शूद्रायाः पुत्रोऽशूद्रपुत्रोऽपि शूद्रापुत्र इत्याक्रोश्यते षष्ठ्या आक्रोश इति विहितस्य लुक्; पुत्रेऽन्यतरस्यामिति विकल्पनादभाव एवमाक्रुश्यमाणः स वत्सोऽब्रवीत् ऋतेन सत्यभूतेन मन्त्रेणाग्निं व्ययाव आवां विश्लेषेण गच्छावः प्रविशावेत्यर्थः; नावयोर्मध्ये यतरो यो ब्रह्मीयान् ब्रह्मिष्ठ इति निर्णेतुं एवमुक्त्वा वत्सो वात्सेनानेन साम्ना व्यैत् व्यगच्छदग्निं प्राविशत् मैधातिथेन साम्ना मेधातिथिः; तस्य वत्सस्य लोम च नौषत् अग्निर्नादहत् उषदाह इति धातुः; तर्हि तस्मिन् समये तत् अदहनं स खलु ऋषिः अकामयत तस्माद्वात्सं साम कामप्रदं गतमन्यत ॥ ६ ॥

अथ द्वितीयस्योक्थस्य साम विधत्ते।

सौश्रवसं भवति ॥ ७ ॥

सुश्रवसः सम्बन्धि सौश्रवसं एतदाग्व्यं साम त्वन्न इन्द्राभरेति ऋचे गातव्यं ॥ ७ ॥

इदमपि सर्वकामप्राप्तिसाधनमिति प्रशंसितुमाख्यायिका माह।

उपगुर्वै सौश्रवसः कुत्सस्यौरवस्य पुरोहित आसीत् स कुत्सः पर्य्यशपद्य इन्द्रं यजाता इति स इन्द्रः सुश्रवसमुपेत्याब्रवीद्याजस्व मा३ग्नायामिवा

इति तमयजत स इन्द्रः पुरोडाशहस्तः कुत्समुपेत्याब्रवीद्यज्ञत मा क्व ते परिशप्तमभूदिति कस्त्वा यष्टेति सुश्रवा इति स कुत्स औरव उपागाः सौश्रवसस्योद्गायत औदुम्बर्या शिरोऽच्छिनत्सु शुश्रवा इन्द्रमब्रवोत्त्वत्तनाद्वै मेदमीदृगुपागादिति तमेतेन साम्ना समैरयत्तद्वाव सतह्यकामयत कामसनि साम सौश्रवसं काममेवैतेनावरुन्धे ॥ ८ ॥

सौश्रवसः सुश्रवसः पुत्र उपगुर्नाम ऋषिः औरवस्य उरुपुत्रस्य कुत्सस्य राजर्षेः पुरोहित आसीत् सच कुत्सः प्रद्वेषेण पर्य्यशपत् यो यजमान इन्द्रं यजाता इति यजेत् अपरिपूर्णार्थत्वात् तस्य शिरश्छिन्द्यादिति अध्याहारेण योज्यं एवं शापे कृते सामर्थ्यप्रकटनाय सः इन्द्रः पुरोडाशहस्तः सुश्रवसा दत्तं पुरोडाशं हस्ते धारयन् कुत्समुपगम्याब्रवीत् सामयज्ञत इष्टवान् तव क्व परिशप्तः परिशापः कुत्स अभूदिति एवमिन्द्रेणाधिक्षिप्ते अत्र पुनरब्रवीत् को यजमानः त्वामिष्टवानिति सुश्रवा इतीन्द्रोऽब्रवीत् स औरवः कुत्सः सौश्रवसस्य सुश्रवसः पुत्रस्य उपगोः उद्गायतः सदस्युद्गानं कुर्वतः शिरः औदुम्बर्या सदसि निघातया औदुम्बर्याख्यया स्थूणया अच्छिनत् छिन्नवान् स सुश्रवा इन्द्रमब्रवीत् त्वत्तनात् यजमानात् खलु ईदृगेवविधमिदमप्राप्तोदिति तं छिन्नं सौश्रवसं एतेन साम्ना समैरयत् सङ्गतावयवमकरोत ॥८॥

अथ तृतीयस्योक्थस्य साम विधत्ते।

वोङ्कं भवति ॥ ९ ॥

वोङ्काख्यं साम यदिन्द्रचित्रेति तृचे गातव्यं ॥ ९ ॥

तदेतदाख्यायिकया पूर्ववत् स्तौति।

च्यवनो वै दाधीचोऽश्विनोः प्रिय आसीत्सोऽजो-र्य्यत्समेतेन साम्नाप्सु व्यङ्क्यतान्नं पुनर्य्युवानमकुरुतां तद्वा तौ तर्ह्यकामयेतां काममनि साम वोङ्कं काम-मेवैतेनावरुन्धे ॥ १० ॥

दाधीचो दधीचः पुत्रः च्यवनो नाम ऋषिः अश्विनोरश्वि-देवतयोः प्रिय इष्टतमः स्तोतासीत् स च्यवनोऽजीर्य्यत् जीर्णा-वयवोऽभूत् तं जीर्णमेतेन वोङ्केन साम्ना अप्सूदकेषु व्यङ्क्यतां अश्विनौ व्यचलयतां अमज्जीतामित्यर्थः ततस्तं पुनर्युवानमकु-रुतां यौवनावस्थाः प्रापयतां शिष्टं सिद्धं ॥ १० ॥

अथ पूर्ववदेषूक्थेषु स्तोत्रीयेषु स्तोमकृप्तिं विधत्ते।

चतुर्विंश्य एव स्तोमो भवति तेजसे ब्रह्मवर्च-साय ॥ ११ ॥

चतुर्विंशतिभिः स्तोत्रीयाभिर्निष्पाद्यस्तोमश्चतुर्विंश एवो-क्थानां स्तोमो भवति यच्चतुर्विंशतिसंख्याद्वारा गायत्र्योषण्य-

न्मात् गायत्र्याश्च अग्निना सहोत्पत्तेः तेजसे ब्रह्मवर्चसाय भवति तेजः शरीरकान्तिः ब्रह्मवर्चसं श्रुताध्ययनादिजन्यं ब्राह्मं तेजः ॥ ११ ॥

इति ताण्डमहाब्राह्मणे चतुर्दशाध्यायस्य

षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

एवं दाशरात्रिकस्य सप्तमस्याह्नः स्तोमकृन्निरुक्ता अथाष्टमस्याह्नः स्तोमकृन्निरध्यायपरिसमाप्तेः प्रतिपाद्यते तत्र बर्हिष्यवमानस्य स्तोत्रीयाख्यं प्रथमं ऋचं दर्शयति ।

शिशुञ्जज्ञानꣳ हर्य्यतं मृजन्त्योत्यष्टमस्याह्नः प्रतिपद्यवति ॥ १ ॥

प्रतिपद्यते आरभ्यतेऽनयेति प्रतिपत् सा चाष्टमस्य चतुश्चत्वारिंशस्तोमकस्याह्नः शिशुं जज्ञानमित्येषा भवति इयमादिको बर्हिष्यवमाने प्रथमस्तृच इत्यर्थः तृचसूक्तानामादिग्रहणेन विधिरनादेश इति परिभाषितत्वात् ॥ १ ॥

अथास्य तृचस्याष्टमेऽहनि सान्त्यर्थं स्तौति ।

शिशुरिव वा एष सप्तमेनाह्ना जायते तमष्टमेनाह्ना मृजन्ति ॥ २ ॥

एषः स्तोमः शिशुरिव वै बालः पुत्र इव सोऽयं एषः सप्तमेनानुष्ठितेनाह्ना जायते उत्पद्यते तं जातं शिशुं अष्टसंख्यापूरणेनानेन क्रियमाणेनाह्ना सृजन्ति हस्तैः संसृजन्ति जन्मनि हि शिशुः उल्बेन प्रावृतो मलाश्लिष्टो भवति स यथा उक्षोदकादिना प्रक्षाल्य संसृजते तद्वत् तस्मादष्टमेऽहनि शिशुज्ञानं हर्यतं सृजन्तीति शिशुजन्ममार्ज्जनलिङ्गवांसृचः संगत इत्यर्थः॥ २॥

अथास्य च स्तोत्रस्य स्तोत्रीयसंख्यामनूद्य स्तौति।

स्तोत्रीयस्तृचो भवति प्राणापानानामवरुध्यै॥ ३॥

गतमेतत्॥ ३॥

त्रिवृदादीनां स्तोमानां गायत्र्यादिछन्दसां षडहे समाप्तत्वात् विनियुक्तैः स्तोत्रैरेव छन्दोमानां त्रयाणामङ्गां कल्पेन यातयामत्वं स्यादित्यत आह।

हरिवत्यो भवन्ति छन्दोमानामयातयामतायै॥४

हरिवत्यो हरिशब्दयुक्ताः शिशुज्ञानमित्याद्याः गतमन्यत्॥ ४॥

अथ स्तोत्रीयतृचानन्तरं क्रमेण नवर्चत्रितयं विधत्ते।

नवर्चा भवन्ति॥ ५॥

नवानामृचां समाहारो नवर्चः एते स्तोमा अभीत्येकः

सोमः पुनान इत्येकः सोमा अस्ग्रमिन्दव इत्यपरः एते त्रयो नवर्चाः स्तोत्रीयाः क्रमेण भवन्ति ॥ ५ ॥

अवत्यां नवसंख्यां स्तौति ।

नव वै प्राणाः पशवश्छन्दोमाः पशुष्वेव तत्प्राणान्दधाति ॥ ६ ॥

सप्त शीर्षण्याः प्राणाः द्वावर्वाञ्चौ एवं पुरुषे नवैव खलु प्राणा भवन्ति छन्दोभिर्गीयमानाः सप्तमादीनि त्रीण्यहानि पशवः एव तत्तथा सति नवर्चानां करणेन पशुष्वेव नवसंख्यान् प्राणान् दधाति ॥ ६ ॥

अथ पञ्चर्चं विधाय स्तौति ।

पञ्चर्चो भवति पञ्चपदा पङ्क्तिः पाङ्क्तमन्नमन्नाद्यस्यावरुध्यै ॥ ७ ॥

उत्ते शुष्मास इत्याद्याः पञ्चर्चः पञ्चानामृचां समाहारो भवति अनया च पञ्चसंख्यया अन्नप्राप्तिमुपपादयति पञ्चपदा पङ्क्तिरित्यादिना ॥ ७ ॥

अस्मिन् पञ्चर्चे विद्यमानं किञ्चिल्लिङ्गं प्रदर्श्य अष्टमेनाङ्गा सङ्गतिमाह ।

वाणवान् भवत्यन्तो वै वाणोऽन्त एतदष्टममहामन्त एव तदन्नेन स्तुवते प्रतिष्ठायै ॥ ८ ॥

पूर्वोक्तः पञ्चर्चोवाणशब्दयुक्तो भवति वाणः शततन्त्रीको वीणाविशेषः सचान्तो वै वाद्यानां पर्य्यवसानभूमिरेव वाणस्य वादने या परिमितिः तद्वाचकः शब्दो अस्मिन् पञ्चर्चे विधत्ते अच्छां पूर्वमुक्तमेतदष्टममहरन्तस्तथा सति अन्तएव अन्तेन सुवन् इति उद्गातारः अन्तसंस्तुतेऽहनि अन्तसंस्तुतवाणशब्द-युक्तस्य पञ्चर्चस्य करणं प्रतिष्ठायै यजमानस्य प्रतिष्ठानाय भवति अन्तत्वसाम्येन संश्लिष्टत्वात् ॥ ८ ॥

अथ तत्त्रयं विधत्ते।

त्रयस्तृचा भवन्ति प्राणापानानां सन्तत्यै ॥ ९ ॥

तिसृणामृचां समाहारस्तृचः पञ्चर्चानन्तरं अयावीतो परि अपन्नन् पवते अयोपवस्व धारयेत्याद्यास्त्रयस्तृचा भवन्ति तथा च नवसंख्योपपत्तेः प्राणापानावामुपरि वर्त्तमानाश्च श्रोत्राद्याः प्राणा अधोवर्त्तमानौ गुदोपस्थावपानौ संहतानासेषान्नवानां प्राणापानानां सन्तत्यै सन्तानाय भवन्ति ॥ ९ ॥

अथास्य बर्हिष्पवमानस्तोत्रस्य स्तोमं विधाय स्तौति।

चतुश्चत्वारिंश एव स्तोमो भवत्योजस्येव तद्वीर्य्ये प्रतितिष्ठत्योजोवीर्य्यं त्रिष्टुप् ॥ १० ॥

प्रथमतः एकस्तृचः ततस्त्रयोनवर्चाः अथैकः पञ्चर्चः ततस्त्र-यस्तृचा इत्येवं क्रमेण प्रयुज्यमानाश्चतुश्चत्वारिंशतिः स्तोत्रीया

भवन्ति ततः संख्यात्मकश्चतुश्चत्वारिंशस्तोमएवास्य बर्हिष्यव मानस्य भवति तत्तेन स्तोमेन ओजोरूप एव वीर्ये प्रतितिष्ठति यजमानः प्रतिष्ठितो भवति कुत एतत् यस्मादोजोवीर्यात्मकं त्रिष्टुप्छन्दः तद्वीर्यं यतः प्रजापतेरङ्गादुत्पन्ना सा चतुश्चत्वारिंशदक्षरा भवति तत् संख्यया मीयमानश्चतुश्चत्वारिंशस्तोम ओजोवीर्यहेतुरित्यर्थः ॥ १० ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्दशाध्यायस्य
सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

अथास्मिन्नष्टमेऽहनि प्रथममाज्यस्तोत्रं दर्शयति ।

अग्निं वो देवमग्निभिः सजोषा इत्याग्नेयमाज्यं भवति ॥ १ ॥

अग्निं वोदेवमिति ऋचः आग्नेयमग्निदेवत्यं प्रथममाज्यस्तोत्रं भवति ॥ १ ॥

अथैनं ऋचं स्तौति ।

अग्निभिरित्येव पूर्वाण्यहानि समिद्वान्यष्टमं मरुतश्चमसिन्वे ॥ २ ॥

एतत् ऋचगतेनाग्निभिरिति बहुवचनान्तेनाग्निशब्देनैव

पूर्वाण्यनुष्ठितानि सप्तसंख्यान्यहानि समिद्धानि सन्दीपितानि अथाग्निं नव इत्येकवचनान्तेन अग्निशब्देनाष्टममहरभिसमिन्धे पूर्वाण्यहरण्यभिलक्ष्य सप्तमदीप्तं करोति ॥ २ ॥

अथ द्वितीयमाज्यस्तोत्रं दर्शयति।

मित्रं वयꣳ हवामहे दूति बार्हतं मैत्रावरुणं ॥ ३

मित्रं वयमिति त्रुचे बार्हतं बृहत्साम्ना सञ्जितं बृहत्पृष्ठके द्वितीयेऽहनि अस्य द्वितीयमाज्यस्तोत्रत्वेन विधानात् तत्सम्बन्धस्तदेतन्मैत्रावरुणं मित्रावरुणदेवताकं अष्टमेऽहनि द्वितीयमाज्यस्तोत्रं भवति ॥ ३ ॥

यद्येवं विनियुक्तविनियोगलक्षणो दोषः स्यादित्यत आह।

उग्रगाधमिव वाएतद्यच्छन्दोमास्तद्यादुग्रगाधे व्यतिपद्य गाहन्त एवमेवैतद्रूपे व्यतिपद्यति छन्दोमानामसंव्याथाय ॥ ४ ॥

यत् छन्दोमा एतदुग्रगाधमिव वै यथा वेगयुक्तो नदीप्रवाहः उग्रगाधः उग्र उद्गूर्णस्तीक्ष्णो गाधः अवस्थानं यस्य स तथोक्तः दुरवगाह इत्यर्थः एवमेव छन्दोमत्रितयमपि उग्रगाधं दुरवगाहं तत् तथा सति अस्मात्कारणात् उग्रगाधे वेगवत्प्रवाहेण दुरवगाहे प्रदेशे यथा पुरुषाः परस्परं व्यतिपद्य हस्तावलम्ब्य गाहन्ते वेगवत्प्रवाहमुत्तरन्ति एवमेवैतद्रूपे

अग्निं वो देवमिति वैश्वतं मित्रं वयं हवामह इति प्राजापत्यं एते रूपे व्यतिषजति व्यतिषक्ते संश्लिष्टे करोति छन्दोमानामसंव्याघाय संव्याथः सञ्चलनं अन्यत्रानुष्ठानं तद्भावाय पारम्पर्या इत्यर्थः ॥ ४ ॥

अथ तृतीयमाज्यस्तोत्रं दर्शयति।

तमिन्द्रं वाजयामसीत्यैन्द्रं ॥ ५ ॥

तमिन्द्रं वाजयामसीति तृचः ऐन्द्रं इन्द्रदेवत्यं तृतीयमाज्यस्तोत्रं भवति ॥ ५ ॥

अथैतत् स्तौति।

अष्टमेन वै देवा अह्नेन्द्रमवाजयन्नवमेन पाप्मानमगघ्नन्नहरेवैतेन वाजयन्ति ॥ ६ ॥

अष्टमेन अष्टसंख्यापूरकेण अनेन खलु ह्ना देवाः सुरेन्द्रमवाजयन् बलवन्तमकुर्वन् नवमेनाह्ना पाप्मानं पापरूपमसुरं अघ्नन् अहिंसिषुः एषश्च तमिन्द्रं वाजयामसीति वाजयति धातुस्तृचेनैतेन तृचेन अहरेव वाजयन्ति कुर्वन्ति बलवन्तमुद्गातारः ॥ ६ ॥

अथ चतुर्थमाज्यस्तोत्रं दर्शयति।

इन्द्रे अम्ना नमोबृहदिति वार्हतमैन्द्राग्नं ॥ ७ ॥

इन्द्रे अग्ना इति बार्हतं बार्हते द्वितीयेऽहनि विनियुक्तत्वात् बृहता सञ्ज्ञं ऐन्द्राग्नमिन्द्राग्निदेवताकं चतुर्थमाज्यस्तोत्रञ्च भवति ॥ ७ ॥

अथापि पूर्ववद्विनियुक्तविनियोगदोषमाशङ्क्य समाधत्ते।

उग्रगाधमिव वाएतद्यच्छन्दोमास्तद्यथाद उग्रगाधे व्यतिषज्य गायन्त एवमेवैतद्रूपे व्यतिषजति छन्दोमानामसंव्याघाय स्तोमः ॥ ८ ॥

अत्र तमिन्द्रं वाजयामसीति वैकृतं रूपं अन्यत्साम्नां पूर्ववद्योज्यं एतेषु चतुर्ष्वाज्यस्तोत्रेषु पूर्वोक्तचतुश्चत्वारिंश एव स्तोमः कार्यः एवं प्रातःसवनिकेषु पञ्चसु स्तोत्रेषु स्तोत्रीया विहिताः तासु प्राकृतमेव गायत्रं साम गातव्यमिति द्रष्टव्यं ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्दशाध्यायस्य

अष्टमः खण्डः।

अथ नवमः खण्डः।

अथाग्निष्टमेऽहनि माध्यन्दिनपवमानस्य स्तोमकृप्तिं विधित्सुस्तोत्रीयामृचं दर्शयति।

अध्वर्यो अद्रिभिः सुतमिति गायत्रो भवत्यन्नाद्यस्यै ॥ १ ॥

अद्रिभिरिति लिङ्गं गायत्री माध्यन्दिनपवमानस्य प्रतिपङ्क्तिवति गायत्रः प्रथमस्तृचो भवतीत्यर्थः सचाष्टमस्याह्नो धृत्यै धारणाय स्थैर्याय भवति अद्रिभिरिति लिङ्गात् अद्रयो हि लोके दृढहेतुतया प्रसिद्धाः ॥ १ ॥

नन्वयं त्रिरात्रः त्रिष्टुप्प्रायत्वात् त्रैष्टुभः तत्र कथं गायत्रस्य तृचस्य सङ्गतिरित्यत आह।

गायत्राः सत्यस्त्रिष्टुभोरूपेण त्रैष्टुभꣳ ह्येतद्दृहः ॥ २ ॥

दृंहृशब्दो मरुच्छब्दस्थानिन्नेव तृचे दृश्यते तत् त्रैष्टुभं गतमन्यत् ॥ २ ॥

अथापरं तृचं विधत्ते।

अभिसोमास आयव इत्यभीति रथन्तरस्य रूपं बृहदिति बृहत उभयोः सहरूपमुपैत्युभौ हि वर्णावेतद्दृहः ॥ ३ ॥

अभिसोमास आयव इत्ययं तृचः तत्र अभीत्यभिशब्दो रथन्तरस्य रूपं तद्योनाभिव्यञ्जक इति दृष्टत्वात् बृहदिति बृहच्छब्दः बृहत्साम्नो रूपं तद्वाचकत्वात् एवं च बृहद्रथन्तरयोरूपं सहोपैति एकधोपगच्छति कुतः हि यस्मात् एतद्दृहरुभौ वर्णौ उभयवर्णात्मकं ॥ ३ ॥

अथान्यं ऋचं विधत्ते।

धर्त्ता दिवः पवते कृत्वोरस इत्यधृत इव वा एष-त्राह्नो यद्वर्त्तेति धृत्या एव ॥ ४ ॥

धर्त्ता दिव इति ऋचः कार्य्यः एष दशरात्रस्य त्रिरात्रस्तृतीयः अधृत इव वै अधारित इव शिथिल इव खलु तस्मिंस्त्रिरात्रे मध्यमेऽहनि यद्वर्त्तेति पदयुक्तस्तृचः क्रियते तत्तस्य त्रिरात्रस्य धृत्यै धारणाय दाढार्य्याय भवति ॥ ४ ॥

ननु प्रकृतौ माध्यन्दिनपवमानान्त्यस्तृचः त्रैष्टुभः तत्र कथ-मसौ जागतस्तृचः तस्य त्रिरात्रस्य धृत्यै धारणाय सङ्गत इति तत्राह।

जगत्यः सत्यस्त्रिष्टुभो रूपेण तस्मात्त्रिष्टुभां लोके क्रियन्ते ॥ ५ ॥

सिद्धमेतत् ॥ ५ ॥

अध्वर्य्यो अद्रिभिरिति ऋचे पूर्ववद्गायत्रं साम विधाय तद्-ब्राह्मणञ्चातिदिशति।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ ६ ॥

गतमेतत् ॥ ६ ॥

अथास्मिन्नेव ऋचे सामान्तरं विधत्ते।

वैरूपं भवति ॥ ७ ॥

अध्वर्यो अद्रिभिरित्यस्यां योन्यामुत्पन्नं सामान्तरं ॥ ७ ॥

वैरूपं साम प्रशंसति ।

पशवो वै वैरूपं पशूनामवरुध्यै विरूपः संवत्सरो विरूपमन्नमन्नाद्यस्यावरुध्यै ॥ ८ ॥

यदेतद्वैरूपं साम तत्पशवो वै तस्मात्पशूनामवरोधाय एतत् साम भवति कथमस्य पशुरूपतेत्यत आह विरूपः संवत्सर इति वसन्ताद्यृतुभेदेन विरूपो विविधरूपो नानारूपः संवत्सरः तत् सम्बन्धाद्वैरूपं साम तदन्नाद्यस्य अत्तुं योग्यस्यान्नस्यावरोधाय भवति ॥ ८ ॥

अथैतस्मिंस्तृचे सामान्तरं विधत्ते ।

आशु भार्गवं भवति ॥ ९ ॥

भार्गवं भृगुणा दृष्टं आशु एतदाख्यं साम अध्वर्यो अद्रिभिरित्यस्मिन्नेव पुनरादत्ते तृचे गातव्यं ॥ ९ ॥

अस्य साम्नो हेतुतां ब्रुवन् निर्वक्ति ।

अर्चन्तो एतदब्रूयत तद्वा आशुनाभ्यधिन्वँस्तदाशोराशुत्वं ॥ १० ॥

एतदृष्टममंहः खलु पुरा अब्रूयत अशीर्यत तत्तादृशमभ-

देवाः आशुना अशुसंज्ञेनानेन साम्ना अभ्यधिन्वन् अवर्धयन् व्याप्नुवन्नित्यर्थः तत्तस्मात् व्याप्तिसामर्थ्यात् आशोः एतत्संज्ञस्य साम्नः आशुत्वं आप्तिति नाम सम्पन्नं ॥ १० ॥

अथ सामान्तरं विधत्ते ।

मार्गीयवं भवति ॥ ११ ॥

मार्गीयवाख्यं साम अध्वर्यो अद्रिभिरिति ऋचे पुनरावृत्ते गातव्यं ॥ ११ ॥

तदेतत्प्रशुहेतुत्वेन स्तौति ।

देवं वा एतं मृगयुरिति वदन्त्येतेन वै स उभयेषां पशूनामाधिपत्यमाप्नुतोभयेषां पशूनामाधिपत्यमश्नुते मार्गीयवेण तुष्टुवानः ॥ १२ ॥

एतं प्रसिद्धं देवं महादेवं मृगयुरिति वदन्ति कथयन्ति एतं कामिकान् मृगानात्मन इच्छतीति मृगयुः महादेवः एतेन खलु साम्ना पुरा उभयेषां उभयविधानां ग्राम्यारण्यानां पशूनामाधिपत्यमधिपतित्वं आप्नुत प्राप्नोत् तस्मादद्यतनोऽपि मार्गीयवेण तुष्टुवानः स्तुतवान् उभयेषां पशूनामाधिपत्यं प्राप्नोति ॥ १२ ॥

अथ सामान्तरं दर्शयति ।

सौमित्रं भवति ॥ १३ ॥

सौमित्राख्यं साम अस्मिन्नेवाहनि अध्वर्यो अद्रिभिरिति त्वचे गातव्यं ॥ १३ ॥

अथास्य स्तावकं प्रागाम्नातं ब्राह्मणमतिदिशति।

यदेव सौमित्रस्य ब्राह्मणं ॥ १४ ॥

यत्पञ्चमेऽहनि सौमित्रस्य साम्नः स्तावकं ब्राह्मणमाम्नातं दीर्घजिह्वी वा इदं रक्षो यन्नाहेत्यादि तदेव ब्राह्मणमपि सौमित्रस्याश्रयत्वेन द्रष्टव्यं ॥ १४ ॥

अथ सामान्तरं दर्शयति।

ऐढतं भवति ॥ १५ ॥

एतदपि साम आहरन्ते अध्वर्यो अद्रिभिरित्येव त्वचे गेयं ॥ १५

तदेतत् स्वर्गसाधनत्वेन स्तौति।

दृढ्वा एतेन काव्योऽङ्गिरसः स्वर्गं लोकमपश्यत् स्वर्गस्य लोकस्यानुख्यात्यै स्वर्गाल्लोकान्न च्यवते तुष्टुवानः ॥ १६ ॥

काव्यः कवेः पुत्र दृढ्वन् वै इढस्नामर्षिः गतमन्यत् ॥ १६ ॥

अथ सामान्तरं विधाय तद्ब्राह्मणमप्यतिदिशति।

साकमश्वं भवति यदेव साकमश्वस्य ब्राह्मणं ॥ १७

साकमश्वाख्यं साम प्रकृत एव ऋचे गातव्यं तस्य च साकमश्वस्य स्तावकं देवा वा अग्निष्टोममभिजित्येत्यादिना यद्ब्राह्मणमाम्नातं तदत्रानुसन्धेयं ॥ १७ ॥

अथैतत्प्रकारान्तरेण स्तौति ।

तदु धुराꣳ सामेत्याहुः प्राणा वै धुरः प्राणानामवरुध्यै ॥ १८ ॥

तदु तत्साकमश्वाख्यं धुरां सामेत्याहुः कथयन्ति ब्रह्मवादिनः कस्मा धुर इति उच्यते प्राणा वै धुर एव ते हि म्रियमाणस्य देहान्निर्गच्छतः समीपस्थं परिजनं धूर्वन्ति हिंसन्तीति तस्मादेतत् धुरां साम प्राणानामवरुध्यै अवरोधनाय शरीरधारणाय भवति ॥ १८ ॥

अथ सामान्तरं दर्शयति ।

विलम्बसौपर्णम् भवति ॥ १९ ॥

विलम्बसौपर्णाख्यमपि साम प्रकृते अध्वर्यो अद्रिभिरिति ऋचे गेयं ॥ १९ ॥

अथास्य विलम्बसौपर्णसंज्ञां निर्ब्रुवन् स्तौति ।

आत्मा वा एष सौपर्णानां यदष्टमेऽहनि पक्षावेतावभितो भवतो ये सप्तमनवमयोर्व्यूव वा अन्व-

रात्मा पक्षौ लम्बते यदन्तरात्मा पक्षौ विलम्बते तस्मा-
द्विलम्बसौपर्णं ॥ २० ॥

सौपर्णानां साम्नां मध्ये एष आत्मा वै एतद्विलम्बसौपर्णं साम मध्यदेहस्थानीयं यदष्टमेऽहनि विनियुज्यते ये ऐडस्याख्ये सौपर्णे सप्तमनवमयोरहोर्विनियुज्येते एतावभितः पार्श्वयो-र्वर्त्तमानौ पक्षौ भवतः वयसन्तु पक्षावन्तरा पक्षयोर्मध्ये आत्मा मध्यदेहे वीव लम्बते विशेषेण लम्बमानो भवति अन्तरा अन्त-रेण च वीव यदस्मात् पक्षौ पक्षभूतयोः सौपर्णयोर्मध्ये आत्मा आत्मभूतं इदं सौपर्णः विलम्बते तस्माद्विलम्बसौपर्णमिति साम्नो नाम सम्पन्नं ॥ २० ॥

किं तत इत्याह ।

स्वर्गस्य लोकस्य समष्ट्यै सौपर्णं क्रियते ॥ २१ ॥

स्पष्टोऽर्थः ॥ २१ ॥

अथ तृचान्तरे सामान्तरं विधत्ते ।

हिङ्हिङ्कारं वामदेव्यं भवत्यन्नाद्यस्यावरुध्यै ॥ २२

ऊम् आ ऊम् आ इति हिङ्कारद्वययुक्तं वामदेव्यं साम अभिसोमास आयव इति तृचे गातव्यं तच्चान्नाद्यस्यावरोधाय भवति ॥ २२ ॥

वामदेव्यस्य पशवात्मनोऽसंस्तूयमानत्वाद्विष्टुत्रयसंयुक्तस्याष्टमेऽहनि अष्टसंख्यापूरके कः सम्बन्ध इत्यत आह।

द्वितीयꣳ ह्येतद्रूपं यच्छन्दोमाः ॥ २३ ॥

यत् एतत् द्वितीयं हि रूपं षडहः एकः समूहः तदपेक्षया छन्दोमत्रितयात्मकस्य समूहस्य द्विसंख्यापूरकत्वात् द्विष्टुत्कारं सामाष्टम्यहनि सङ्गतमित्यर्थः ॥ २३ ॥

अथ तत्पशुसम्बन्धिहेतुरिति स्तौति।

पशवो वै वामदेव्यं पशवश्छन्दोमाः पशुष्वेव तत् पशून्दधाति ॥ २४ ॥

स्पष्टोऽर्थः ॥ २४ ॥

अथ सामान्तरं विधत्ते।

गायत्रपार्श्वमभवति ॥ २५ ॥

अभिसोमास आयव इत्यस्मिन्नेव तृचे गायत्रपार्श्वाख्यं साम गातव्यं ॥ २५ ॥

अथैतत् स्तौति।

अहर्वा एतदवृहीयत तदेवा गायत्रपार्श्वेन समतन्वꣳ स्तस्माद्गायत्रपार्श्वं ॥ २६ ॥

एतदुक्थमहरवृहीयत अजीर्यत् तदहरेवा गायत्रपार्श्वेन

समतन्वन् समदधुः तस्मादृक्षः सन्तानार्थं गायत्रपार्श्वं गातव्यमिति शेषः ॥ २६ ॥

एतदेव व्याचष्टे।

त्रिरात्रो यद्व्यशीर्यत तमेतैः सामभिरभिषज्यन् गायत्रपार्श्वेनोपायच्छन् सन्तानिना समतन्वन संकृतिना समस्कुर्वन् प्रतिष्ठितौ पूर्वौ त्रिरात्रावप्रतिष्ठित एष यदेतान्येव ए सामानि क्रियन्त एतस्यैव प्रतिष्ठित्यै॥२७

अयं तृतीयस्त्रिरात्रो यद्यदा व्यशीर्यत विशीर्णः शिथिलावयवोऽभवत् तदा तत् त्रिरात्रं एतैर्वक्ष्यमाणैः सामभिर्दैवा अभिषज्यन् दार्ढ्याय भैषज्यमकुर्वन् भिषजप्रकार उच्यते गायत्रपार्श्वेन साम्ना उपायच्छन् शिथिलावयवानां पुनः सन्तानार्थमुपादानमकुर्वन् अथ सन्तनिसाम्ना समतन्वन् समदधुः संकृतिसाम्ना समस्कुर्वन् कृतसन्धाने तस्मिंस्त्रिरात्रे प्राणातिशयाधारं संस्कारः पूर्णं कुर्वन् संपर्य्युपेभ्यः करोतौ भूषण इति कात् पूर्वसुट् अडभ्यां सव्यवायेऽपीत्यडागमेन व्यवायेऽपि भवति अपि च पूर्वौ त्रिरात्रौ प्रतिष्ठितौ एष तृतीयस्त्रिरात्रः तस्यैव त्रिरात्रे प्रतिष्ठित यदेतानि गायत्रपार्श्वादीनि सामानि एवं क्रमेण क्रियन्ते तृतीये रात्रे प्रयुज्यन्ते तस्यैव त्रिरात्रस्य प्रतिष्ठानाय भवति सप्तमेऽहनि सन्तनिसाम नवमे संकृति अष्टमेऽहनि तु गायत्रपार्श्वमित्येवमानुपूर्व्यो दृष्ट्या ॥ २७ ॥

अथ सामान्तरं विधत्ते।

पौरुहन्मनं भवति॥ २८॥

पौरुहन्मनाख्यमपि साम अभिसोमास आयव इत्यस्मिन्नेव ऋचे गातव्यं॥ २८॥

अथैतत् स्तौति।

पुरुहन्मा वा एतेन वैखानसोऽङ्गिरा स्वर्गं लोकमपश्यत् स्वर्गस्य लोकस्यानुख्यात्यै स्वर्गाल्लोकान्न च्यवते तुष्टुवानः॥ २९॥

पुरुहन्मा वा एतेन वैखानसो विखनसगोत्रः पुरुहन्मा नाम ऋषिः गतमन्यत्॥ २९॥

अथैतस्मिन् सामगानविषये किञ्चिद्रूपं विधत्ते।

अभ्याघात्यं भवत्यभ्याघात्यसामानो हि छन्दोमाः॥३०

अभ्याघात्यमभ्याघातः अभ्याहननं अभ्यासः अस्मिन् साम्नि भवति अस्य हि योनौ भिराभ्रा १ ईगूरः२ तरुता ३ तरुता ३ वाहागार ३४ गाँदू त्रहा ५ गणाई इत्यभ्यासो दृष्टः तद्वदेव ऋचे गीयमानेऽप्यभ्यासाः कार्या इत्यर्थः कुत एतत् हि यस्मात् छन्दोमा अभ्याघात्यं अभ्यस्यमानावयवं साम येषां ते तथोक्ताः तस्मादित्यर्थः॥ ३०॥

अथ सामान्तरं विधत्ते।

द्वैगतं भवति ॥ ३१ ॥

द्वैगतनाम साम अभिसोमास आयव इत्यस्मिन्नेव ऋचे गातव्यं ॥ ३१ ॥

अथैतत् द्विविधफलप्राप्तिहेतुरिति स्तौति।

द्विगद्वा एतेन मार्गवो द्विः स्वर्गं लोकमगच्छदागत्य पुनरगच्छद्द्वयोः कामयोरवरुध्यै द्वैगतं क्रियते ॥ ३२ ॥

द्विर्वारं गच्छतीति द्विगत् क्विप् चेति क्विपि गमः क्वाविति नुनासिकलोपो झल्यस्यपिति क्ङिति लुक् एतत् संज्ञो भार्गवो भृगुगोत्रऋषिः द्विर्द्विर्वारं एतेन साम्ना साधनेन स्वर्गं लोकं अगच्छत् गतवान् एतदेव विशदयति आगत्येत्यसञ्चत् स्वर्गं लोकं गत्वा पुनरिमं लोकमागत्य पुनः स्वर्गमगच्छत् तस्मात् द्वयोः कामयोरवरुध्यै द्विविधफलप्राप्त्यै द्वैगतं सामाष्टमेऽहनि क्रियते ॥ ३२ ॥

अथ सामान्तरं विधत्ते।

हारायणं भवति ॥ ३३ ॥

हारायणनामापि साम अभिसोमास इत्यस्मिन्नेव ऋचे गातव्य ॥ ३३ ॥

अथैतत् स्तौति।

इन्द्रस्तेजस्कामोहरस्कामस्तपोऽतप्यत स एतद्धारायणमपश्यत्तेन तेजो हरोऽवारुन्ध तेजस्वी हरस्वी भवति हारायणेन तुष्टुवानः॥ ३४॥

तेजः शरीरकान्तिः हरः पराभिभवक्षमं सामर्थ्यं एतदुभयं कामयमानः इन्द्रः पुरा तपस्तप्तवान् तदनन्तरमेतद्धारायणाख्यं साम अपश्यत् अद्राक्षीत् तेन च साम्ना तेजोहरश्चावारुन्ध प्राप्नोत् तस्मादद्यतनोऽपि हारायणेन तुष्टुवानः स्तुवन् तेजस्वी हरस्वी च भवति॥ ३४॥

अथ सामान्तरं विधत्ते।

अक्षिद्रं भवति॥ ३५॥

अक्षिद्रन्नाम साम प्रकृतएव त्रुटये गातव्यं॥ ३५॥

अथैतस्याक्षिद्रसंज्ञान्वर्थेति स्तौति।

यद्वा एतस्याह्नष्टमस्याक्षिद्रमासीत्तद्देवा अक्षिद्रेणाप्यौहꣳस्तदक्षिद्रस्याक्षिद्रत्वं॥ ३६॥

एतस्याष्टमस्याह्नो यदेवं क्षिद्रं शुषिरमासीत् तत् क्षिद्रमनेनाक्षिद्रेण साम्ना देवा अप्यौहन् अपिहितमकुर्वन् तत्तस्मात्कारणात् अक्षिद्रस्य साम्नः अक्षिद्रत्वं अक्षिद्रमिति नाम सम्पन्नं॥ ३६

अथ प्रहिन्वानऋतं बृहदिति अध्यास्यायां गेयं साम दर्शयति।

बार्हदुक्थं भवति ॥ ३७ ॥

बार्हदुक्थाख्यं तत्साम अध्यास्यायां गातव्यमित्यर्थः ॥ ३७ ॥

अथैतत् स्तौति।

बृहदुक्थो वा एतेन वाम्रेयोऽन्नस्य पुरोधाम-गच्छदन्नं वै ब्रह्मणः पुरोधान्नाद्यस्यावरुध्यै ॥ ३८ ॥

वाम्रेयो वाम्राः पुत्र बृहदुक्थोनाम ऋषिः एतेन साम्ना अन्नस्य पुरोधामगच्छत् अग्रं सिद्धं ॥ ३८ ॥

अथास्तिमे तृचे गेयं साम विधत्ते।

उद्वङ्गार्गवं भवति ॥ ३९ ॥

उद्वङ्गार्गवाख्यं साम धर्तादिव इत्यस्मिन् तृचे गातव्यं ॥ ३९

तदेतत् पूर्वस्मिन्नहनि विहितेन प्रवङ्गार्गवेण संहत्य स्तौति।

प्रवता वै देवाः स्वर्गं लोकं प्रायन्नुदतोदायन् ॥ ४०

सिद्धमेतत् ॥ ४०।

तदेतत् पवमानस्य स्तोत्रमुपसंहरति।

निधनान्ताः पवमाना भवन्त्यह्नो धृत्यै स्तोमः ॥४१

एतदपि व्याख्यातं, एतदुक्तं भवति अध्वर्यो अद्रिभिरिति ऋचे गायत्रं वैरूपं आशुभार्गवं मार्गीयवं सौमित्रमैठतं साकमश्वं वितम्बसौपर्णं इत्येवमष्टौ सामानि, अभिसोमास आयव इति ऋचे द्वि हिङ्कारंवामदेव्यं गायत्रपार्श्वं पौरुहन्मनं द्वैगतं हारायणमच्छिद्रमिति षट्सामानि धर्त्तादिवः पवत इति ऋचे उद्दङ्गार्गवमेकं साम प्रहिन्वान इत्यध्यास्यायां गीयमानं बार्हदुक्थं साम इत्य पञ्चदशसामानि ऋचे विहितानि एकमेकर्चतया च षट्चत्वारिंशस्तोत्रीया भवन्ति एवं विहितस्य चतुश्चत्वारिंशस्तोमस्यातिरेकः स्यात् अतस्तत्परिहाराय गायत्र्यादीनामन्यतममेकर्चं कार्य्यं तथा च चतुश्चत्वारिंशस्तोम एव माध्यन्दिनपवमानस्य भवतीति ॥ ४१ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्दशाध्यायस्य
नवमः खण्डः ।

अथ दशमः खण्डः ।

अथ ब्रह्मसृष्टसाम्नः स्तोत्रीयां विधित्सुरत्र शाखान्तरीयस्तोत्रे प्रथमं ऋचं दर्शयति ।

कदिं वेद सुतेसचेति सतोबृहत्यः ॥ १ ॥

कदिं वेदेत्याद्यास्तिस्रः सतोबृहत्यृचो ब्रह्मसाम्नः स्तोत्री-

याः अयुजौ पादौ जागतौ युजौ गायत्र्यौ यस्याः सा सतोबृहती ॥ १ ॥

अथैतासां सतोबृहतीनां विधानमुपपादयति।

अपम्रक्ष्ण इव वा एषयत्सप्तमेऽहनि सतोबृहत्यो भवन्ति नाष्टमे तस्मादष्टमे कार्या अनपम्रक्ष्णाय ॥२

यत् सप्तमेऽहनि वयङ्कृत्वेत्याद्याः सतोबृहत्यो भवन्ति अष्टमेऽहनि न भवन्तीति यत् एषोऽपम्रक्ष्ण इव वै अधःपतनसदृशमेव अधिकाच्चरात्मतोबार्हताच्छन्दसोन्यूनाच्चरे बार्हते त्रिचे साम्नो गानप्रसङ्गात् यस्मादपम्रक्ष्णपरिहाराय अष्टमे सतोबृहती कार्या प्रयोज्या अतः कईं वेदेत्याद्यासिस्रः सतोबृहत्यः ब्रह्मसाम्नः स्तोत्रीयाः कार्या इत्यर्थः ॥ २ ॥

अथ सिद्धान्तमाह।

तदाहुः शिथिलमिव वा एतच्छन्दो यत्सतोबृहत्येषा वै प्रतिष्ठिता बृहती या पुनः पदा यदिन्द्र प्रागपागुदगिति दिशां विमर्शः प्रतिष्ठित्यै ॥ ३ ॥

तत्तत्राष्टमेऽहनि ब्रह्मसामस्तोत्रीयाविषये ब्रह्मवादिन आहुः प्रतिपद्यन्ते सतोबृहत्याख्यं यत् छन्दः एतत् शिथिलमिव वै शिथिलावयवमिव खलु तस्येहायुजौ पादौ जागतौ युजौ गायत्र्यौ तथा च नेरन्तर्येण पादद्वयस्य संख्यावैलक्षण्येनैकरूपाभावा-

त्तस्य शैथिल्योक्तिः एषा खलु प्रतिष्ठिता लब्धास्पदा स्थिरा बृहती या पुनः पदा सकृत्प्रयुक्तः पादः बृहतीत्वसम्पत्तये यस्मात्तत्र पुनरुपादाय प्रयुज्यते सा पुनः पदा यैषा पुनः पदा बृहती का पुनस्सा यदिन्द्रप्रागपागुदगित्याद्याः अत्र हि पूर्व्वस्याः पूर्व्वस्या ऋचः अन्त्यं पद द्विरभ्यस्य तिस्रो बृहत्यो गानसमये क्रियन्ते अपिचास्मिन् प्रगाथे प्राग्पागुदगिति प्राच्यादीनां दिशां विमर्शः कीर्त्तनं दृश्यते अतस्तासु दिक्षु यजमानस्य प्रतिष्ठानाय भवति ॥३

तासु गातव्यं ब्रह्मसाम दर्शयति।

तासु नैपातिथं ब्रह्मसाम ॥ ४ ॥

तासु यदिन्द्र प्रागित्याद्यासु बृहतीषु नैपातिथं नीपातिथिना दृष्टं एतदाख्यं ब्रह्मसाम कार्य्यं ब्रह्मणः पृष्ठस्तोत्रनिवर्त्तकं साम कार्य्यं ॥ ४ ॥

अथैतदृषिसम्बन्धेन साम्नाभिधेयत्वात् स्वर्गहेतुरित्याह।

सामार्षेयवत् स्वर्गाय युज्यते स्वर्गाल्लोकान्न च्यवते तुष्टुवानः ॥ ५ ॥

सिद्धमेतत् ॥ ५ ॥

चतुर्थस्य पृष्ठस्य स्तोत्रीयं तृचमाह।

उभयꣳ शृण्वन्न इति ॥ ६ ॥

स्पष्टोऽर्थः ॥ ६ ॥

अथैतं ऋचमुभयशब्द्योगिनः सन्तानहेतुरिति स्तौति ।

यच्च पृष्ठानि यानि चैतान्यहानि तेषामुभयेषाꣳ सन्तत्यै ॥ ७ ॥

यत् यानि च पृष्ठानि च रथन्तरबृहद्रुपादीनि प्राक् षडहे प्रयुक्तानि यानि चैतानि छन्दोमाख्यान्यहानि तेषामुभयेषां द्विविधानां सन्तत्यै संक्षेपाय उभयशब्दयुक्तोऽयं ऋचो भवति उभयशब्देन द्विधा द्वयस्य स्मारितत्वात् ॥ ७ ॥

अथैतस्मिंस्तृचे गातव्यं साम दर्शयति ।

तासु वैयश्वं ॥ ८ ॥

तासु शृणवच्च न इत्याद्यासृचु वैयश्वाख्यं साम गेयं ॥ ८ ॥

अथैतदृषिपुरःसरं स्वर्गसाधनमिति ब्रुवन् अच्छावाकसाम कार्यमित्याह ।

व्यश्वो वा एतेनाङ्गिरसोऽङ्गसा स्वर्गं लोकमपश्यत् स्वर्गस्य लोकस्यानुख्यात्या एतत् पृष्ठानामन्ततः क्रियते स्तोमः ॥ ९ ॥

आङ्गिरसोऽङ्गिरोगोत्रः व्यश्वोनाम ऋषिः शिष्टं स्पष्टं एतेषु च पृष्ठस्तोत्रेषु पूर्वोक्तएव चतुश्चत्वारिंशः स्तोमः कार्यः ॥ ९ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्दशाध्यायस्य
दशमः खण्डः ।

अथ एकादशः खण्डः ।

अथाभिप्लवमानस्य प्रतिपत्तृचं विधाय सवने सङ्गतिमाह ।

पवस्व देव आयुषगिन्द्रं गच्छतु ते मद इति गायत्रो भवति मदवद्वै रसवत्तृतीयसवनं मदमेव तद्रसं दधाति ॥ १ ॥

पवस्व देव इति गायत्री प्रतिपद्भवति गायत्रं प्रथमसवनं भवतीत्यर्थः पवस्व देव आयुषगिति गायत्री भवति एतावता पर्य्याप्ते पुनरधिकोपादानं मदशब्दप्रदर्शनान्मदवत्त्वेन तृतीयसवने सङ्गतिकथनार्थं शिष्टं पूर्ववद्व्याख्येयं ॥ १ ॥

अथान्यं तृचं विधत्ते ।

अभिद्युम्नं बृहद्यश इत्यभीति रथन्तरस्य रूपमृचं बृहदिति बृहत उभयोः सहरूपमुपैत्युभौ हि वर्णावेतद्दृहः ॥ २ ॥

एतदपि सिद्धं ॥ २ ॥

अथ तृचान्तरं विधत्ते ।

प्राणाग्निद्युम्नहीनामिति प्राणवत्यो भवन्ति प्राणानेव तद्यजमाने दधाति ॥ ३ ॥

प्राणाशिशुर्मेहीनामित्याद्यास्तिस्रः प्राणवत्यः प्राणशब्दयुक्ताः स्तोत्रीया भवन्ति एकस्यां प्राणशब्ददर्शनात् छत्रिन्यायेन तिस्रोऽपि प्राणवत्यः तत्तेन यजमाने प्राणानीन्द्रियाणि शिशुप्राणसंहितानि दधाति धारयति ॥ ३ ॥

अथ ऋचान्तरं विधाय यष्टसेनाङ्गा तस्य सङ्गतिमाह ।

अभीनोवाजसातममित्यभीतिं रथन्तरस्य रूपꣳ राथन्तरꣳ ह्येतदहः ॥ ४ ॥

अभिशब्दयुक्तस्तृचोऽष्टमेऽहनि सङ्गतइत्यर्थः शिष्टं सिद्धं ॥४॥

अथाक्षरपङ्क्तिछन्दस्कं ऋचं विधाय सप्तमेऽहनीव तत् स्तौति।

पवस्व सोम महान् समुद्र इत्यक्षरपङ्क्तिः स्तोमानां प्रमूतिरथो एतद्वैवैतर्हि छन्दो यातयाम यदक्षरपङ्क्तिस्तेन छन्दोमा अयातयामानः क्रियन्ते ब्रह्मवादिनो वदन्ति यत् षड्हे स्तोमाश्छन्द्राꣳस्याप्यन्ते किं छन्दस्छन्दोमा इत्येतच्छन्दसो यदेता अक्षरपङ्क्तय इति ब्रूयात् ॥ ५ ॥

एतत्सर्वं यस्ते मदो वरेण्य इति पञ्चमखण्डवदत्रापि व्याख्येयं ॥ ५ ॥

अथान्त्यं ऋचं विधत्ते ।

हिन्वन्ति सूरमुषय इति गायत्राः सत्योजगत्यो रूपेण तस्माज्जगतीनां लोके क्रियन्ते ॥ ६ ॥

हिन्वन्तीत्याद्यास्तिस्रो गायत्र्यः आर्भवस्यान्तिमाः स्तोत्रीयाः ताश्च देवदेवेभ्य इति देवशब्देन जागतेन रूपेण तस्माज्जगत्यः प्रजापतेर्मध्यदेहाद्देवैः सह खलु जगती सृष्टिकाल उत्पन्ना तस्माद्देवानां वाचको देवस्य शब्दो जागत रूपं यस्माद्देवं जगत्यस्तस्माज्जगतीनां लोके आर्भवान्तोऽपि प्राकृतो जगतीनां स्थाने तत्र क्रियन्ते ॥ ६ ॥

अथास्मिन्नेव तृचे पूर्ववद्गायत्रं साम विधाय तद्ब्राह्मणञ्च अतिदिशति ।

यागत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ ७ ॥

स्पष्टोऽर्थः ॥ ७ ॥

अथ पवस्व देव आयुष इति विहितेऽस्मिंस्तृचे सामान्तरं विधत्ते ।

स्वाश्विरामर्को भवति ॥ ८ ॥

स्वाश्विरामर्काख्यं साम पवस्वेत्यस्मिन्नेवार्चे तृचे गेयं ॥ ८ ॥

अत्र स्वाश्विरामर्क इति पदद्वयाभिधेयेन साम्ना साध्यं फलमाह ।

अन्नं वा अर्कोऽन्नाद्यस्यावरुध्यै प्राणा वै स्वाशिरः प्राणानामवरुध्यै ॥ ९ ॥

अन्नं खल्वर्चनसाधनत्वादर्क इति पदद्वयस्याभिधेयं सामान्नाद्यस्याप्त्यै भवति तथा प्राणाः खलु स्वाशिरः स्वयमेव शिरस्याश्रयितारः तस्मात्प्राणानामवरोधाय भवति ॥ ९ ॥

अथ सामान्तरं दर्शयति।

सुरूपं भवति ॥ १० ॥

एतदपि साम पवस्व देव इत्यस्मिन्नेव ऋचे गातव्यं ॥ १० ॥

अथैतत् स्तौति।

पशवो वै सुरूपं पशूनामवरुध्यै ॥ ११ ॥

सुरूपं साम पशवो वै तेषां शोभनरूपयोगेन समानशब्दाभिधेयत्वात् तस्मादेतत्साम पशूनामवरोधाय भवति ॥ ११ ॥

अथ सामान्तरं विदधाति।

भासं भवति भाति तुष्टुवानः ॥ १२ ॥

भासाख्यमेतदपि साम पवस्व देव इत्यस्मिन्नेव ऋचे गातव्यं अनेन तुष्टुवानः स्तुतवान् भाति यशसा दीप्यते ॥ १२ ॥

अथास्यानेनाह्वा सङ्गतिमाह।

पदनिधनं राथन्तरं ह्येतदहः ॥ १३ ॥

राथन्तरं रथन्तरसम्बन्धि रूपं पदनिधनं रथन्तरपृष्ठे प्रथमेऽहनि पदनिधनं प्रथमस्याह्नो रूपमिति विधिना तद्रूपता एतदहरस्य राथन्तरं रथन्तरसम्बन्धि बृहद्रथन्तरं साम हि द्वितीयः छन्दोमाख्यमहः ॥ १३ ॥

अथैतत्प्रकारान्तरेण स्तोतुं संज्ञां निर्वक्ति ।

स्वर्भानुर्वा आसुर आदित्यं तमसाविध्यत् स न व्यरोचत तस्यात्रिर्भासेन तमोऽपाहन् स व्यरोचत यद्वै तन्नात्रा अभवत्तन्नामस्य भासत्वं ॥ १४ ॥

आसुरः असुरवंशजः स्वर्भानुर्नाम पुरा आदित्यं सूर्यं तमसा अन्धकारेणाविध्यत् आच्छादितवान् तदनन्तरं स सूर्यो न व्यरोचत नादीप्यत तस्य सूर्यस्य सम्बन्धि स्वर्भानुकृतं तमः अत्रिऋषिः भासेनानेन साम्ना अपाहन् अपहृतवान् ततः स सूर्यो व्यरोचत विशेषेण दीप्तोऽभवत् तत्तस्मादेतत्तदानीं सूर्योभास्वरोऽभवत् तत्तस्मान्नामसाधनत्वात् भासस्य साम्नो भासत्वं भासमिति नाम सम्पन्नं ॥ १४ ॥

किन्तत इत्याह ।

तमु ह्व वा एतान्यहानि यच्छन्दोमास्तेभ्य एतेन साम्ना विवासयति ॥ १५ ॥

तम इव वै तमो रूपाण्येव एतान्यहानि यद्यानि छन्दोमाख्यानि प्रयोगबाऽल्येन दुःखप्रदत्वादेतस्य तमोरूपत्वं ततस्तेभ्योऽहोभ्य एतेन भाससाम्ना विभासयति तमो विश्लेषयति ॥ १५ ॥

अथ सामान्तरं विधत्ते।

काक्षीवतं भवति ॥ १६ ॥

कक्षीवता दृष्टं काक्षीवतं तदपि पूर्व्वोक्त एव त्रृचे गेयं ॥१६॥

अथैतत् स्तौति।

कक्षीवान्वा एतेनौशिजः प्रजातिं भूमानमगच्छत् प्रजायते बहुर्भवति काक्षीवतेन तुष्टुवानः॥१७

उशिजस्य पुत्रः कक्षीवान्नाम ऋषिः एतेन साम्ना प्रजातिं प्रकृष्टजननं प्रजोत्पत्तिं भूमानं बाऽल्यञ्चागच्छत् अथाद्यतनोऽपि अनेन स्तुवन् फलद्वयं लभत इत्यर्थः ॥ १७ ॥

अथ सामान्तरं विधत्ते।

आसितं भवति ॥ १८ ॥

असितेन दृष्टमासितं तदपि पूर्व्वोक्ते त्रृचे गेयं ॥ १८ ॥

अथैतत् स्तौति।

असितो वा एतेन दैवलस्त्रयाणां लोकानां

दृष्टिमपश्यत् त्रयाणाङ्कामानामवरुध्या आसितं क्रियते ॥ १९ ॥

दैवलो देवलस्य पुत्रः असितो नाम ऋषिः एतेन साम्ना साधनेन त्रयाणां पृथिव्यादीनां लोकानां दृष्टिं दर्शनसाधनमपश्यत् अजानात् तस्मादद्यतनैरपि पुरुषैस्त्रयाणां कामानां लोकत्रयविषयाणां त्रिविधानां फलानामवरुध्यै अवरोधनाय प्राप्त्यर्थं. आसितं साम क्रियते प्रयुज्यते ॥ १९ ॥

अथ सामान्तरं विधत्ते ।

ऐशिरं भवति प्रजातिर्वा ऐशिराणि प्रजायते बहुर्भवत्यैशिरेण तुष्टुवानः ॥ २० ॥

स्पष्टोऽर्थः * ॥ २० ॥

त्रैतं भवति प्रतिष्ठायै ॥ २१ ॥

त्रितेन दृष्टं साम त्रैतं तत् प्राणाशिशुर्भृहीनामिति तृचे गेयं तच्च यजमानस्य प्रतिष्ठानाय भवति ॥ २१ ॥

अथास्मिन्नहनि सङ्कृतिमाह ।

पदनिधनꣳ राथन्तरꣳ राथन्तरꣳ ह्येतदहः ॥ २२

गतमेतत् ॥ २२ ॥

अत्र भाष्यं पतितमनुमीयते ।

अथैतत् स्तौति ।

**नाथविन्दु साम विन्दते नाथन्नाथविन्दून्येतान्य-
ङ्गानि यत् छन्दोमा नाथमेवैतैर्विन्दते ॥ २३ ॥**

तच्चैतं साम नाथविन्दु नाथस्य नाथनीयस्य याचनीयस्य लम्भकं अतोऽनेन स्तुवन् नाथं याचितं फलं विन्दते किञ्चानेन साम्ना योगात् एतान्यङ्गान्यपि नाथविन्दूनि याचनीयस्य फलस्य लम्भकानि यत् यानि छन्दोमाख्यानि स्युष्टमन्यत् ॥ २३ ॥

अथ सामान्तरं विधत्ते ।

गौरीवितं भवति यदेव गौरीवितस्य ब्राह्मणं ॥२४

गौरीविताख्यं साम अभीनो वाजसातमामिति ऋचे गेयं तस्य च यदेव प्रागाम्नातं ब्राह्मणं गौरीवितिर्वा एतच्छाक्त्य इत्यादि तदत्रापि द्रष्टव्यमित्यर्थः ॥ २४ ॥

अथान्यत्साम विधत्ते ।

कौत्सं भवति ॥ २५ ॥

कुत्सेन दृष्टं साम कौत्सं तच्च अभीन इति पूर्वोक्त एव ऋचे गेयं ॥ २५ ॥

अथैतत् स्तौति ।

एतेन वै कुत्सोऽन्धसो विपानमपश्यत् स ह स्म वै सुराहृतिनोपवसथं भावयत्युभयस्यान्नाद्यस्यावरुध्यै कौत्सं क्रियते ॥ २६ ॥

एतेन खलु साम्ना पुरा कुत्स ऋषिः अन्धसोऽन्धस्य विपानं विशेषेण पातव्यं रसं अपश्यत् दृष्टवान् तत एव स ऋषिः सुराहृतिना सुरापूर्णेन हृतिना युक्तः सन् उपवसथं खाद्यस्य अग्निसमीपे वसत्यस्मिन्दिवस इति उपवसथं यागदिवसात् पूर्वमहः तद्भावयति स्म यत एवं ततो हेतोः उभयस्य पेयस्य चान्नाद्यस्य अत्तुं योग्यस्यान्नस्य अवरुध्यै अवरोधनाय कौत्सं क्रियते यजमानैः प्रयुज्यते ॥ २६ ॥

अथास्मिन्नेव तृच आदत्ते सामान्तरं विधत्ते ।

शुद्धाशुद्धीयं भवति ॥ २७ ॥

स्पष्टोऽर्थः ॥ २७ ॥

अशुद्धस्य शुद्धापादकत्वात् शुद्धाशुद्धीयमिति निर्वचनमभिप्रेत्याह ।

इन्द्रोयतोन् सालावृकेयेभ्यः प्रायच्छत्तमश्नीला वागभ्यवदत्सोऽशुद्धोऽमन्यत स एतच्छुद्धाशुद्धीयमपश्यत्तेनाशुध्यच्छुध्यति शुद्धाशुद्धीयेन तुष्टुवानः ॥ २८ ॥

यतीन् कर्म्मविरोधिजनान् सालावृकेयेभ्यः सालावृकी-पुत्रेभ्यः इन्द्रो दत्तवान् तमिन्द्रं अश्लीला पापरूपा वागभ्यवदत् इन्द्रस्य ब्रह्महत्या सञ्जातेत्येवं रूपा अपस्करी वाग्जातेत्यर्थः तदनन्तरं स इन्द्रः आत्मानमशुद्धोऽमन्यत अजानात् स च एतत् शुद्धाशुद्धीयाख्यं सामापश्यत् तेनाशुध्यत् शुद्धोऽभवत् तस्मादद्यनोऽपि शुद्धाशुद्धीयेन तुष्टुवानः स्तुवन् शुध्यति शुद्धो भवति ॥ २८ ॥

अथ सामान्तरं विधाय तत् ब्राह्मणं प्रागाम्नातमथ्यतिदिशति ।

क्रौञ्चं भवति यदेव क्रौञ्चस्य ब्राह्मणं यत् द्वितीयेऽहनि ॥ २९ ॥

क्रौञ्चं साम अभीनो वाजसातममित्यस्मिन्नेव ऋचे गेयं तस्य क्रौञ्चस्य यदेतत् ब्राह्मणं स्तावकमाम्नातं तदत्रापि द्रष्टव्यं तत्र ब्राह्मणं द्वितीयेऽहनि षष्ठेऽहनि च पृथगेवाम्नातं तत्र द्वितीयेऽहनि वाग्वै क्रौञ्चमित्यादिकं तदेवाम्नातमतिदिश्यत इत्यर्थः ॥ २९

अथ सामान्तरं विधत्ते ।

रयिष्ठं भवति ॥ ३० ॥

एतत्साम अभीनोवाजसातममित्यस्मिन्नेव ऋचे गातव्यं ॥ ३०

अथैतत् स्तौति ।

पशवो वै रयिष्ठं पशूनामवरुध्यै ॥ ३१ ॥

यदेतद्रयिष्ठं साम तत्पशवो वै अतिशयेन रयिमान् हि लोके रयिमित्युच्यते अस्य च बह्वपशुत्वमपि सम्भवतीति रयिष्टस्य पशुरूपता तस्मादेतत्पशूनामवरुध्यै भवति ॥ ३१ ॥

अथास्मिन्नेव ऋचेऽन्यत् साम विधत्ते ।

औदलं भवति ॥ ३२ ॥

स्पष्टोऽर्थः ॥ ३२ ॥

अथैतत् स्तौति ।

उदलो वा एतेन वैश्वामित्रः प्रजातिं भूमानमगच्छत् प्रजायते बह्वर्भवत्यौदलेन तुष्टुवानः ॥ ३३ ॥

वैश्वामित्रो विश्वामित्रगोत्रः उदलोनाम ऋषिः गतमन्यत् ॥ ३३ ॥

अथान्यत्साम विधत्ते ।

धर्म्म भवति धर्म्मस्य धृत्यै ॥ ३४ ॥

धर्म्माख्यं साम पवस्व सोमेत्यनुष्टुप्छन्दस्के ऋचे गातव्यं तच्च धर्म्मस्य यागजन्यस्यापूर्वस्य धृत्यै धारणाय यावत् फलमवस्थानाय भवति ॥ ३४ ॥

अथैतत् छन्दोद्वारेण स्तौति ।

ब्रह्मवादिनो वदन्ति यत् षड्ह स्तोमाश्छन्दाꣳ-

स्याप्यन्ते किं छन्दस्यछन्दोमा इति पुरुषः छन्दस इति ब्रूयात् पुरुषो वै पाङ्क्तः पुरुषोद्विपदाश्छन्दोमानामयातयामतायै ॥ ३५ ॥

एतदपि यस्येमदोवरेण्यइति पञ्चमखण्ड इव व्याख्येयं ॥३५॥

अथान्यत् साम विधत्ते।

विश्वोविश्वीयं भवति ॥ ३६ ॥

एतत्सप्तं साम हिन्वन्ति सूरमुस्रय इति तृचे गेयं ॥ ३६ ॥

अथैतत् स्तौति।

अग्निरकामयत विश्वोविश्वोऽतिथिःस्यां विश्वो-विश्व आतिथ्यमश्नुवीयेति स तपोऽतप्यत स एतद्वि-श्वोविश्वीयमपश्यत्तेन विश्वोविश्वोऽतिथिरभवत् विश्वो-विश्व आतिथ्यमाश्नुत विश्वोविश्वोऽतिथिर्भवति विश्वो-विश्व आतिथ्यमश्नुते विश्वोविश्वीयेन तुष्टुवानः॥३७॥

अग्निः पुरा अकामयत किमिति विश्वोविश्वः सर्वस्या-विश्वः सर्व्वासां प्रजानामहमतिथिः स्यां अतिथिवत् पूज्यो भवेयं तथा विश्वोविश्वः सर्व्वस्याविश्वः सकाशादातिथ्यं हविरश्नुवीय प्राप्नुयामिति एवं कामयित्वा तदर्थं तपस्तप्तवान् तप्त्वा च सोऽग्नि-रेतद्विश्वोविश्वीयं सामापश्यत् तेन साम्ना विश्वोविश्वः सर्व्वस्याः

अपि प्रजायाः अग्निरतिथिरभवत् तथा तर्व्यस्याविग्नः सकाशात् आतिथ्यमाप्नुत प्राप्नोत् तस्मादद्यतनोऽपि विशोविशीयेन तुष्टुवान: स्तुवन् विशोविशोऽतिथिर्भवति आतिथ्यमाप्नुते ॥२७॥

अथैतत् छन्दोद्वारेण स्तौति ।

गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥ ३८ ॥

गायत्रीषु तु विशोनिशीयेन स्तुवन्ति तासाञ्च त्रिपादत्वात् अग्निना सहोत्पन्नत्वात् प्रतिष्ठाब्रह्मवर्चसे यजमानस्य सिध्यतः अपि च गायत्रेण छन्दसे स्तोत्रस्य प्रायणं कृतं उदयनमपि गायत्रेण क्रियते तस्याञ्च त्रिपदात्मकेन प्रायणं स्तुतेन येनैव गायत्रेण प्रयन्ति तेनैव स्तोत्रं परिसमापयन्ति ॥ ३८ ॥

अथैतत्पवमानस्तोत्रं पूर्ववदुपसंहरति ।

दूडान्ताः पवमाना भवन्ति पशवो वा दूडा पशवश्छन्दोमाः पशुष्वेव तत्पशून्दधाति स्तोमः ॥ ३९ ॥

सिद्धमेतत् । एवं गायत्रादीनि विशोविशीयान्तानि षोडश सामानि विहितानि अत्र चतुश्चत्वारिंशस्तोमस्य विधानात् तदतिरेकपरिहाराय सामद्वयमेकर्चं कार्यं तच्च स्तुतकारेणोक्तं सुरूपकौच्छे एकर्चयोरेक इति अयमर्थः अष्टमेऽहन्यार्भवे स्तोमातिरेकपरिहाराय सुरूपकौच्छे सामनी एकैकस्याऽभाव इत्येतत्

मतं स्वपक्षस्तु द्विप्रभृतिकक्रुप्प्रभृत्यानन्त्यैर्गणेति वचनादेतयोरेकर्च्चकरणमिति ॥ ३६ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्दशाध्यायस्य

एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

अथोक्थानां प्रथमस्य स्तोत्रीयं तृचमुन्दर्शयति ।

प्रेष्ठं वो अतिथिमित्यातिथ्यस्यैव तद्रूपं क्रियते ॥ १

प्रेष्ठं वो अतिथिमित्यतिथिशब्दयोगात् एतस्य तृचस्य करणं आतिथ्यस्यैव रूपं क्रियते ॥ १ ॥

अथ द्वितीयस्योक्थस्य स्तोत्रीयं तृचं दर्शयति ।

ऐन्द्रनोगधिप्रियेतीन्द्रियस्य वीर्य्यस्यावरुध्यै ॥ २ ॥

इन्द्रशब्दयोगात् अयं तृचः इन्द्रियरूपस्य वीर्य्यस्यावरोधनाय भवति ॥ २ ॥

अथ तृतीयस्योक्थस्य स्तोत्रीयं तृचं दर्शयति ।

पुरां भिन्दुर्य्युवकविरमितौजा अजायतेन्द्रो विप्रुषस्य कर्म्मणो धर्त्ता वज्री पुरुष्टुत इति धृत्या एव ॥ ३

पुरां भिन्दुरिति तृतीयस्योक्थस्य स्तोत्रीयस्तृचः कार्य्यः यच्च धर्तेशब्दयोगप्रदर्शनाय भूयसः पदस्यभूयस्यानुवादः ॥ ३ ॥

अथ प्रथमस्योक्थस्य साम विधत्ते ।

औशनं भवति ॥ ४ ॥

औशनाख्यं साम प्रेष्ठं व इति तृचे गेयं ॥ ४ ॥

अथैतत् स्तौति ।

उशना वै काव्योऽकामयत यावानितरेषां काव्यानां लोकस्तावन्तꣳ स्पृणुयामिति स तपोऽतप्यत स एतदौशनमपश्यत्तेन तावन्तं लोकमस्पृणोद्यावानितरेषां काव्यानामासीत्तद्व स तर्ह्यकामयत कामसनि सामौशनं काममेवैतेनावरुन्धे ॥ ५ ॥

काव्यः कवेः पुत्रः उशना नाम ऋषिः पुरा कामितवान् इतरेषां स्वव्यतिरिक्तानां काव्यानां कविपुत्राणां स्वदायादानाम् यावान् यत्परिमाणको लोकः तावन्तं लोकं स्पृणुयां अहं प्राप्नुयामिति स च तपस्त्वैतत्साम दृष्टवान् तेन च तावन्तं लोकं प्राप्नोत् यावान् यत्परिमाणः लोकः इतरेषां काव्यानामासीत् स्विद्धमन्यत् ॥ ६ ॥

अथ द्वितीयस्योक्थस्य साम विधत्ते ।

सांवर्तं भवति ॥ ६ ॥

एतदाख्यं साम ऐन्द्रनो गधीत्यस्मिंस्तृचे गेयं ॥ ६ ॥

अथास्य साम्नः सांवर्त्तत्वं ब्रुवन् पापक्षयहेतुतामाह।

देवानां वै यज्ञꣳ रक्षाꣳस्यजिघाꣳसꣳस्तान्येतेन इन्द्रः संवर्त्तमुपावपद्यात् संवर्त्तमुपावपत्तस्मात् सांवर्त्तं पाप्मा वाव स तानसचत * तं सांवर्त्तेनापाघ्नतापपाप्मानꣳ हते सांवर्त्तेन तुष्टुवानः ॥ ७ ॥

देवानां सम्बन्धिनं यज्ञं रक्षांस्यजिघांसन् हन्तुमैच्छन् तानि रक्षांसि एतेन साम्ना इन्द्रः संवर्त्तं प्रलयं उपावपत् उपागमयत् यत्संवर्त्तमुपावपत् तस्मादस्य साम्नः सांवर्त्तमिति नाम तं यज्ञं पाप्मा पापमेव अगच्छात् गृहीतवत् तं पाप्मानं सांवर्त्तेन अनेन साम्ना देवा अपाघ्नत तस्मादद्यतनोऽपि सांवर्तन स्तुवन् पाप्मानमपहते ॥ ७ ॥

अथ तृतीयस्योक्थस्य साम दर्शयति।

मारुतं भवति ॥ ८ ॥

मारुतं साम पुरां भिन्दुरित्यस्मिंस्तृचे गेयं ॥ ८ ॥

अथैतत् स्तौति।

मासा वै रश्मयो मरुतो रश्मयोमरुतो वै देवानां भूयिष्ठा भूयिष्ठा अस्यामेति वै सत्रमासते भूयिष्ठा एव

* तानसचत इत्यत्र तस्मादङ्गात् इति भाष्यसम्मतः पाठः।

भवन्त्यृतुमन्ति पूर्वाण्यङ्गान्यनृतवः छन्दोमा यदेतत्साम भवति तेनैतान्यङ्गान्यृतुमन्ति भवन्ति ॥ ९ ॥

मासाएव संवत्सरस्य रश्मिभूताः मरुतश्चेन्द्रस्य रश्मयः अतो मासानां मरुताञ्च साम्यात् छन्दोमानामृतुमत्त्वमिति उपरिष्टाद्योज्यं एतत्सामसम्बन्धिनो ये मरुतः ते खलु देवानां मध्ये भूयिष्ठा बहुतराः तथैव वयं असाम भवाम एवं कामा यजमानाः सत्रमासते अत्र भूयसां मरुतां सम्बन्धिनानेन साम्ना स्तुवन्तो भूयिष्ठा एव भवन्ति किञ्च पूर्वेऽपि त्रिवृत्पञ्चदशादिस्तोमकानि षडङ्गानि ऋतुमन्ति ऋतुयुक्तानि त्रिवृदादीनां षण्णां स्तोमानां वसन्ताद्यात्मना संस्तवात् तथाच तैत्तिरीयके वसन्तेन देवाः वसवस्त्रिवृता स्तुतमित्यनुवाके संस्तवो दृश्यते उक्तवैलक्षण्यात् अनृतवः ऋतुरहितास्त्रयस्त्रिन्दोमा यद्यस्मात् एतन्मारुतं साम भवति तेनैतानि छन्दोमाख्यानि तीव्रयङ्गान्यृतुमन्ति ऋतुयुक्तानि भवन्ति कुत एतत् मासा वै रश्मयो मरुतो रश्मय इति मरुतां मासात्मना संस्तवात् मासद्वयात्मकत्वाच्च ऋतूनां ॥ ९ ॥.

एतेषु त्रिषूक्थस्तोत्रेषु पूर्ववत् स्तोमं विधाय स्तौति ।

चतुश्चत्वारिंश एव स्तोमो भवत्योजस्येव तद्वीर्ये प्रतितिष्ठत्योजो वीर्यं त्रिष्टुप् ॥ १० ॥

सिद्धमेतत् ॥ १० ॥

वेदार्थस्य प्रकाशेन तमोहार्दन्निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीर-बुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे चतुर्दशाध्यायस्य द्वादशः खण्डः।

चतुर्दशाध्यायः समाप्तिमगमत्।

पञ्चदशोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निश्वसितं वेदा यं वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

एवं दशरात्रस्याष्टानामह्नां स्तोमानां कृप्तिरुक्ता अथ नवमस्याष्टाचत्वारिंशस्तोमकस्य प्रथमेनावरणेन स्तोमकृप्तिरारभ्यते तत्र बर्हिष्पवमानस्य प्रतिपत्तत्त्वं दर्शयति ।

अक्रान् समुद्रः परमे विधर्म्मन्निति नवमस्याह्नः प्रतिपद्भवति ॥ १ ॥

प्रतिपद्यतेऽनयेति प्रतिपत् अक्रान् समुद्र इति तृचो बर्हिष्पवमानस्य प्रथमो भवतीत्यर्थः ॥ १ ॥

परमे विधर्म्मन्निति पदद्वययोगादस्य तृचस्य अनेन नवमेनाऽह्ना सङ्गतिमाह ।

परमं वा एतदहर्विधर्म विधर्म्म वा एतदन्यैरहर्भिरहर्यन्नवमं ज्येष्ठꣳ हि वरिष्ठं ॥ २ ॥

एतन्नवममहः परमं वै उत्कृष्टतरं अष्टाचत्वारिंशेन स्तुत-

दादिभ्यः सर्वेभ्यः सोमेभ्योऽधिकेन सोमेन युक्तत्वात् अतएवैतद्वर्विधर्म्म सोत्रीयाधिक्येन गुरुत्वातिशयात् विशेषेण धारणीयं एतदेव व्याचष्टे विधर्म्म वा इति अन्यैस्त्रिवृदादिसोमकैरहर्भिरेतद्वर्विधर्म वै विशेषेण धारणीयं यन्नवमन्नवसंख्यापूरकेन तद्वः कुतो विधरणीयमित्यत आह ज्येष्ठं बृहत्तरं तस्य व्याख्यानं वरिष्ठमिति यस्मादेतन्नवमसहः वरिष्ठतरं तस्मात् विधर्म एवञ्च परमविधर्मशब्दयुक्तस्तृचोऽस्मिन्नहनि संगच्छत इत्यर्थः ॥ २ ॥

अथास्य तृचस्य द्वितीयामनूद्य स्तौति ।

मित्रावायुमिष्टये राधसे न इति वारुण्येका भवति यद्वै यज्ञस्य दुरिष्टं तद्वरुणो गृह्णाति तदेव तदवयजति ॥ ३ ॥

मित्रावायुमिष्टय इत्यस्यामृचि मित्रावरुणापूयमान इति वरुणशब्दश्रवणात् एषा ऋक् वारुणी वरुणसम्बन्धिनी यद्वै यत् खलु यज्ञस्य दुरिष्टं दुर्ज्जरं तद्वरुणो गृह्णाति आदत्ते तयया वारुण्या तदेव दुरिष्टं तमेव तदवयजति ॥ ३ ॥

अथैतस्य प्रथमस्य तृचस्य सोत्रीयसंज्ञां कुर्व्वन् प्रकारान्तरेण स्तौति ।

सोत्रीयस्तृचो भवति प्राणापानानामवरुध्यै ॥४॥

सिद्धमेतत् ॥ ४ ॥

अथैतस्मिन् बर्हिष्यवमाने दश स्तोत्रीया विधत्ते ।

दशर्चो भवति दशाक्षरा विराट् वैराजमन्नमन्नाद्यस्यावरुध्यै ॥ ५ ॥

दशानामृचां समाहारो दशर्चः ऋक्यूरच्चूः पथामानकेत्यकारः समासान्तः स च एष देवो अमर्त्य इत्यादिकः स्पष्टमन्यत् ॥ ५ ॥

अथैतत् स्तौति ।

सप्रभृतयो भवन्तीन्द्रियस्य वीर्यस्य रसस्यानतिक्षाराय यत्र वै देवा इन्द्रियं वीर्यं रसमपश्यंस्तदनुन्यतुदन् ॥ ६ ॥

ता ऋचः सप्रभृतयः समानोपक्रमा एष देवो अमर्त्यः एषविप्रेरभिष्टुतः एष विश्वानि वार्य्येत्येवंविधा भवन्ति तच्च सप्रभृतित्वं इन्द्रियस्य इन्द्रलिङ्गस्य वीर्यस्य वीर्यात्मकस्य रसस्य अनतिक्षाराय अतिक्षरणाभावाय भवति यत्र खलु मन्त्रभागे देवा इन्द्रियं वीर्यं रसमपश्यन् दृष्टवन्तः तन्मन्त्रभागं अनुन्यतुदन् प्रयुयुचमभ्यस्यन् रसस्यानपगमाय अभ्यसनाद्रक्षयन्नित्यर्थः ॥ ६

अथान्या अष्टर्चस्तोत्रीया विधत्ते ।

अष्टर्चो भवति ॥ ७ ॥

अष्टानामृचां समाहारोऽष्टर्चः स चैषधिया यात्यग्नेत्यादिकः ॥ ७ ॥

अथैतामष्टसंख्यामुपजीव्य स्तौति।

अष्टाग्रफाः पशवः शफशस्त्यशूनाप्नोति अष्टाक्षरा गायत्री तेजो ब्रह्मवर्चसं गायत्री तेज एव ब्रह्मवर्चसमवरुन्धे ॥ ८ ॥

सिद्धप्रायमेतत् ॥ ८ ॥

अथ चतुरः षड्चान् विधत्ते।

षड्चा भवन्त्यृतूनां धृत्यै ॥ ९ ॥

षण्णामृचां समाहारः षट् संख्यासाम्यात् षण्णामृतूनां धृत्यै धारणाय भवति ॥ ९ ॥

अथास्य षड्चस्य चतुःसंख्यामुपजीव्य स्तौति।

चत्वारः षड्चा भवन्ति चतुर्विंशतिरर्द्धमासाः संवत्सरः संवत्सरएव प्रतितिष्ठति ॥ १० ॥

एष उक्थ्य एष वाजी एष कविः स सुतः पीतये इति चत्वारः षड्चा भवन्ति ता: तत्र चतुर्विंशतिस्तोत्रीया भवन्ति संवत्सरचतुर्विंशतिरर्द्धमासात्मकः तथा च चतुर्भिः षड्चैः संवत्सर एव यजमानः प्रतिष्ठितो भवति ॥ १० ॥

तेषु चतुर्थस्य षड्चस्य किञ्चिल्लिङ्गमुपजीव्य स्तौति ।

स वानुत्तमः षड्चो भवत्युभयस्य परोक्षप्रत्यक्षस्यावरुध्यै ॥ ११ ॥

स वा सुतः पीतये स पवित्रे स वाजीरोचनं दिव इत्येवं सप्तर्चयुक्तानुत्तमः अन्त्यश्चतुर्थः षड्चो भवति तच्छन्दस्य परोक्षवाचित्वात् तच्च स इति पदं परोक्षवाचकं इतरत्प्रत्यक्ष वाचकमित्युभयस्य द्विविधस्य परोक्षप्रत्यक्षस्य देशकालादिविप्रकृष्टस्य प्रत्यक्षस्य पुरोवर्तिनः फलस्यावरोधनाय भवति ॥११

अथ बर्हिष्यवमानस्यान्त्यं त्रचं विधाय स्तौति ।

त्रच उत्तमो भवति येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥ १२ ॥

अतोत्तराषाढे विनियुज्यान्तिमस्य त्रचस्य पृथगाम्नानात् कोऽसावित्याशङ्क्य सूत्रकारेणोक्तं नवमस्य ज्योतिष्टोमः पर्य्याप्तः साप्तमिक इत्येक इति अयमर्थः नवमस्याङ्गो बर्हिष्यवमानेऽन्त्यस्तृचो ज्योतिष्टोमः ज्योतिष्टोमसम्बन्धी भवति सर्व्वत्र प्रकृतिभूते ज्योतिष्टोमे सप्तमेऽहनि वा यः पावमानी इत्यस्यान्त्यस्तृचः अनयोरन्यतरोऽस्मिन्नवमेऽहनि बर्हिष्यवमानस्यान्त्यस्तृचः कार्य्य इत्यर्थः गतमन्यत् ॥ १२ ॥

अथास्मिन् बर्हिष्यवमाने स्तोमं विधत्ते ।

अष्टाचत्वारिंशद्व एव स्तोमो भवति प्रतिष्ठायै प्रजात्यै ॥ १३ ॥

अष्टाचत्वारिंशत्स्तोमात्मकः स्तोमो भवति संख्याद्वारा प्रतिष्ठायै प्रतिष्ठानाय प्रजात्यै प्रजननाय च भवति जगती ह्यष्टाचत्वारिंशदक्षरा पशवश्च जागताः पशूनाञ्च प्रतिष्ठाहेतुत्वञ्च लोकसिद्धं एवं संख्याद्वारा अष्टाचत्वारिंशस्य प्रतिष्ठाहेतुता द्रष्टव्या ॥ १३ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य

प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

अथास्मिन्नवसेऽहनि प्रथममाज्यस्तोत्रं दर्शयति ।

अगन्ममहानमसा यविष्ठमित्याग्नेयमाज्यं भवति ॥ १

अगन्ममहेत्ययं ऋचः आग्नेयमग्निदैवत्यं प्रथममाज्यस्तोत्रं भवति ॥ १ ॥

गमिधातुयुक्तत्वादयन्नवमेऽहनि सङ्गत इत्याह ।

गच्छन्तीव वा एते ये नवममहर्गच्छन्ति ॥ २ ॥

ये यजमानाः नवममहर्गच्छन्ति प्राप्नुवन्ति एते गच्छन्तीव

वै दशरात्रस्य समाप्तप्रायत्वाद्यागाग्निं गच्छन्तीव तस्माद्गन्नम इति गमिधातुयुक्तस्तृचो नवमेऽहनि योज्य इत्यर्थः ॥ २ ॥

अथास्य तृचस्य प्रथमायामृचि लिङ्गत्रयमनूद्य सङ्गतिप्रदर्शनायाह ।

यो दीदाय समिद्धस्वे दुरोण इति दीदायेव ह्येष यो नवभिरहर्भिस्तुष्टुवानः स्वाङ्कृतमिति स्वाङ्कृतो ह्येष यो नवभिरहर्भिराङ्कृतोविश्वतः प्रत्यञ्चमिति विश्वतोह्येष प्रत्यङ् ॥ ३ ॥

योऽग्निर्नवभिरहर्भिः प्रायणीयातिरात्रसहितैरतीतैरष्टभिरहोभिस्तुष्टुवानः स्तुतः एष दीदायेव दिदीप्त एव हि यस्माद्दीदायसमिद्धस्वे दुरोण इति लिट् गिट् स्कस्य दीदेतेः प्रयोगः सङ्गत इत्यर्थः तथा योऽग्निर्नवभिरहर्भिराङ्कृत आङ्कृतिभिस्तर्पितः एष हि स्वाङ्कृतः सुष्ठु आङ्कृत्या तर्पितो भवति तस्मात् स्वाङ्कृतमिति पदयोगः तथा एष ह्यग्निर्विश्वतः सर्वत्र प्राणिषु प्रत्यङ् प्रत्यञ्चति सरूपेण अन्तर्वर्त्तमानो भवति तस्मात् विश्वतः प्रत्यङिति पदान्तर प्रयुज्यते ॥ ३ ॥

अथास्य तृचस्य तृतीयायामृचि किञ्चिल्लिङ्गं प्रदर्श्य स्तौति ।

त्वं वरुण उत मित्रो अग्न इति वारुण्येका भवति

यद्वै यज्ञस्य दुरिष्टन्तद्वरुणो गृह्णाति तदेव तदवयजति ॥ ४ ॥

त्वं वरुण इति वरुणशब्दश्रवणात् एका स्तोत्रीया वारुणी वरुणसम्बन्धिनी भवति सिद्धं सिद्धं ॥ ४ ॥

अथ द्वितीयमाज्यस्तोत्रं दर्शयति ।

मित्रञ्जुवे पूतदक्षमिति राथन्तरं मैत्रावरुणं ॥ ५ ॥

मित्रं ज्रुव इति रथन्तरसम्बन्धि मैत्रावरुणमित्रावरुणदेवताकं द्वितीयमाज्यस्तोत्रं भवति गव्यन्तस्त्वा हवामह इति राथन्तरे प्रगाथे ह्वतिधातुदर्शनात् अत्रापि तत्सद्भावात् राथन्तरत्वं ॥ ५ ॥

वैरूपेषु मध्ये सकृत्प्रयुक्तस्यास्य राथन्तरस्याज्यस्य पुनः प्रयोगे कारणमाह ।

उग्रगाधमिव वा एतद्यच्छन्दोमास्तद्यथाद उग्रगाधे व्यतिषज्य गाहन्त एवमेवैतद्रूपे व्यतिषजति छन्दोमानामसंव्याथाय ॥ ६ ॥

एतच्चाग्निं वो देवमग्निभिः सजोषा इति खण्डे व्याख्यातं ॥ ६ ॥

अथ तृतीयमाज्यस्तोत्रं दर्शयति ।

महाꣳ इन्द्रो य ओजसेत्यैन्द्रमष्टमेन वै देवा अह्नेन्द्रमवाजयन्नवमेन पाप्मानमघ्नन्नहरेवैतेन महयन्ति ॥ ७ ॥

महां इन्द्रो य ओजसेति तृच ऐन्द्रमिन्द्रदैवथं तृतीयमाज्यस्तोत्रं भवति शिष्टेनास्य तृचस्य नवनेऽहनि सङ्गतिः उच्यते अष्टमेन खल्वह्ना देवाः पुरा इन्द्रमवाजयन्नवलयन् नवमेनाह्ना पाप्मानं पापरूपं वृत्रं अघ्नन्नहिंसन् एतेन महच्छब्दयुक्तेन तृचेन तन्नवममहरेव महयन्ति महत् कुर्वन्ति ॥ ७ ॥

अथ चतुर्थमाज्यस्तोत्रं दर्शयति।

ता ऊ षु वयोरिदमिति रायन्तरमैन्द्राग्नं ॥ ८ ॥

ता ऊ षु इति तृचः रायन्तरं रथन्तरसम्बन्धि ऐन्द्राग्नं इन्द्राग्निदेवताकं चतुर्थमाज्यस्तोत्रं भवति मित्र ऊ षु इति पदस्यापि रथन्तरसम्बन्धो द्रष्टव्यः ॥ ८ ॥

रथन्तरसम्बन्धिनोऽस्य तृचस्य प्रयोगे दोषं पूर्ववदुपपादयति।

उग्रगाधमिव वा एतद्यच्छन्दोमास्तद्यथाद उग्रगाधे व्यतिषज्य गाहन्त एवमेवैतद्रूपे व्यतिषजति छन्दोमानामसंव्याघाय स्तोमः ॥ ९ ॥

एतेष्वपि चतुर्ष्वाज्यस्तोत्रेषु पूर्वोक्ताष्टाचत्वारिंश एव स्तोमः

कार्यं: सिङ्गमन्यत् इत्यं पञ्चसु प्रातःसवनिकेषु स्तोत्रीया: स्तोम-कृतिश्च विहिता तासु गतव्यं साम प्राकृतमेवेत्यधिगन्तव्यं ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य
द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

अथास्मिन्नवमेऽहनि माध्यन्दिनपवमानस्य प्रथमं तृचं दर्शयति ।

पवमानस्य जिघ्नतो हरेश्चन्द्रा असृक्षतेति हरिवत्यो गायत्रीयो भवन्ति छन्दोमानामयातयामतायै ॥ १ ॥

पवमानस्य जिघ्नत इत्याद्यास्तिस्रः हरिवत्यो हरिशब्दयुक्ताः गायत्र्यः स्तोत्रीया भवन्ति ताश्च हरिशब्दयोगात् छन्दोमानां त्रयाणामप्यमयातयामतायै अगतसारतायै भवति ॥ १ ॥

अथैता ऋचः प्रकारान्तरेण स्तौति ।

पवमानस्य जिघ्नत इति वै बृहतो रूपꣳ हरेश्चन्द्रा असृक्षतेति जगत्या उभयोः सहरूपमुपैति साम्नश्च छन्दसश्च ॥ २ ॥

जिघ्नत इति प्रतिपाद्यमानं हननं बृहत्साम्नो रूपं तद्धि क्षत्रियजात्या सहोत्पन्नत्वेन शौर्यवत्त्वात् हननक्षमं तथा चन्द्राः आह्लादकरिष्णोर्हरेर्हरणशीलादह्लत इष्टा अभूवन्निति आह्लादकत्वं प्रतिपाद्यते तच्च पशूनां सम्भवति पशवश्च जागता इति चन्द्रा इति पदं जगतीछन्दसो रूपं पवमानस्य जिघ्नत इति तच्चं प्रयुञ्जानः साम्नश्च बृहतश्छन्दसश्च उभयो रूपं सहोपैति उपगच्छति भूयसो फलायेति शेषः ॥ २ ॥

अथान्यं स्तोत्रीयं विधाय स्तौति ।

परीतोषिञ्च तासुतमिति परिवत्यो भवन्त्यन्तो वै नवममहस्तस्यैताः पर्य्याप्त्यै ॥ ३ ॥

परीतोषिञ्च तासुतमित्याद्यास्तिस्रः परिवत्यः परिशब्दयुक्ताः स्तोत्रीया भवन्ति तेन च परिशब्देन पर्य्याप्तिर्लक्ष्यते नवममहस्यान्तो वै दशरात्रे तृतीयस्य त्रिरात्रस्य अनेनाह्ना समाधानात् अतस्तस्य नवमस्याह्नः एताः परिवत्यः पर्य्याप्त्यै परिसमापनाय भवन्ति ॥ ३ ॥

अथान्यं तच्चं विधत्ते ।

असावि सोमो अरुषोवृषा हरिरिति जगत्यः सत्यस्त्रिष्टुभो रूपेण तस्मात्त्रिष्टुभां लोके क्रियन्ते ॥४॥

असावि सोम इत्याद्यास्तिस्रः स्तोत्रीयाः ताश्च स्वभावतोऽपि

जगत्यो रूपेण त्रिष्टुभः दृषद्वत्योर्हि त्रैष्टुभं रूपं दृषद्वद्बृलद्वद्वयिमद्विश्ववदित्यादिना तद्रूपत्वस्य परिगणनात् यस्मा देवमेताः त्रिष्टुभः तस्मात् त्रिष्टुभां लोकै स्तोमे क्रियन्ते प्रयुज्यन्ते-प्रकृतौ हि माध्यन्दिनपवमानान्त्यस्तृचः प्रतुद्रवेति त्रैष्टुभः ॥४॥

इत्थं त्रयस्तृचा विहिताः अथ सामानि क्रमेण विधित्सुः प्रथमतृचे गायत्रं साम विधाय पूर्ववद्ब्राह्मणमतिदिशति।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ ५ ॥

प्रकृतौ गायत्रसाम्नो यद्ब्राह्मणं इमे वै लोका गायत्रमित्यादिकमाम्नातं तदेव अस्यापि गायत्रस्य ब्राह्मणं ॥ ५ ॥

अथ स्मिन्नेव प्रथमे तृचे सामान्तरं विधत्ते।

भरद्वाजस्यादारसद्भवति ॥ ६ ॥

भरद्वाजस्यादारसदाख्यं साम पवमानस्य जिघ्नत इति तृचे गेयं ॥ ६ ॥

अथास्यैतां संज्ञां निर्ब्रुवन् स्तौति।

दिवोदासं वै भरद्वाजपुरोहितन्नानाजनाः पर्य्ययतन्त स उपासीदद्दधे गातुम्मे विन्देति तस्मा एतेन साम्ना गातुमविन्दद्गातुविद्वा एतत्सामानेन दारे नासन्मेति तददारसतोऽदारसत्त्वं विन्दते गातुन्न दारे धावत्यदारसता तुष्टुवानः ॥ ७ ॥

भरद्वाजः पुरोहितो यस्य तं भरद्वाजपुरोहितं दिवोदास-नानाजनाः नानाविधाजनाः शत्रुजनाः पर्य्ययतन्त पर्य्यवेष्टयन् स दिवोदासो भरद्वाजमुपासीदत् विनयपूर्वमगच्छत् हे ऋषे गातुं मार्गं से मम विन्द लम्भयेति ब्रुवन् एवमागताय तस्मै दिवो दासाय एतेन साम्ना गातुं मार्गमविन्दत् अलभत अतएतत्साम गातुविदे मार्गलम्भकं । एवमस्य भरद्वाजसम्बन्धमुक्त्वा अरार-स्त्वमपि निर्वक्ति अनेन खलु साम्ना दारे दारखण्डे नास्मन्न गच्छामेति यस्मादेवमब्रुवन् तत्तस्माद्दारस्तः साम्नोऽदारस्त्वं अदारस्तदिति नाम सम्पन्नं यस्मादेवं तस्मादनेनादारस्तुता तुष्टुवानो गातुं मार्गं विन्दते दारे दरणे खण्डे न धावति न प्रापयत्यात्मानं ॥ ७ ॥

अथ सामान्तरं विधाय तद्ब्राह्मणञ्चातिदिशति ।

सुरूपं भवति यदेव सुरूपस्य ब्राह्मणं ॥ ८ ॥

सुरूपाख्यमपि साम पवमानस्य जिघ्नत इत्यस्मिन्नेव ऋचे गेयं पशवो वै सुरूपमित्यादिकं यद्ब्राह्मणं सुरूपस्य प्रागा-म्नातं तदेवास्यापि सुरूपाख्यस्य स्तावकं ब्राह्मणं ॥ ८ ॥

अथान्यत्साम विधत्ते ।

हरिश्रीनिधनं भवति ॥ ९ ॥

हरी३श्री२३४५३: इति निधनं यस्य तत्तथोक्तं एतत्साम्नां साम पवमानस्य जिघ्नत इत्यस्मिन्नेव ऋचे गातव्यं ॥ ९ ॥

अथैतत् स्तौति।

पशवो वै हरिश्रियः पशूनामवरुध्यै श्रियञ्च हरश्चोपैति तुष्टुवानः ॥ १० ॥

गवाद्याः पशवः खलु हरिश्रियः हरणशीलाः श्रयणाः अतो हरिश्रीशब्दनिधनमेतत्साम पशूनामवरोधनाय भवति अथानेन तुष्टुवानः स्तुतवान् श्रियं सम्पदं हरस्तेजश्चोपैत्युपगच्छति हरिश्रीशब्दाभ्यां उभयोः सूचनात् ॥ १० ॥

अथान्यत्साम विधत्ते।

सैन्धुक्षितं भवति यदेव सैन्धुक्षितस्य ब्राह्मणं ॥११॥

सिन्धुक्षिता दृष्टं साम सैन्धुक्षितं तदपि पवमानस्य जिघ्नत इत्येव ऋचे गेयं तस्य च सैन्धुक्षितस्य सिन्धुक्षिद्वै राजन्य ऋषिरित्यादिकं यद्ब्राह्मणं स्तावकं प्रागाम्नातं तदेवास्य ब्राह्मणं स्तुत्यर्थमानेतव्यं ॥ ११ ॥

अथान्यत्साम विधत्ते।

गतनिधनं वाभ्रवं भवति गत्यै ॥ १२ ॥

गमिधातुनिष्पन्नगशब्दयुक्तं निधनं यस्य तद्गतनिधनं वभ्रुणा दृष्टं साम पूर्वोक्तएव ऋचे गेयं तच्च गत्यै गमनाय भवति ॥ १२ ॥

अथैतद्वसुसम्बन्धप्रदर्शनपुरःसरं स्वर्गसाधनतया स्तौति।

वभ्रुर्वा एतेन कौम्भ्योऽञ्जसा स्वर्गं लोकमपश्यत् स्वर्गस्य लोकस्यानुख्यात्यै स्वर्गाल्लोकान्न च्यवते तुष्टुवानः॥ १३॥

कौम्भ्यः कुम्भगोत्रः वभ्रुर्नाम ऋषिः एतेन साम्ना साधनेन अञ्जसा आर्जवेन स्वर्गं लोकमपश्यत् अजानात् सिष्टं सिद्धं॥१३॥

अथान्यत्साम विधत्ते।

इडानाꣳ संचारो भवति॥ १४॥

इडनां संचाराख्यं साम पवमानस्य जिघ्नतेत्यस्मिन्नेव ऋचे गेयं॥ १४॥

अथैतत् स्तौति।

पशवो वा इडा पशवश्छन्दोमाः पशुष्वेव तत्पशून्दधाति॥ १५॥

इडानां संचारइत्यत्र पठ्यन्तेनेडाशब्देनाभिधेया इडानां पशवो वै पशव एव छन्दोमानां च पशुत्वं प्रागुक्तं तत्तथा च पशुष्वेव पशून्दधाति स्थापयति॥ १५॥

अथान्यत्साम विधत्ते।

ऋषभः पावमानो भवति ॥ १६ ॥

पावमानः पवमानसामसम्बन्धी ऋषभ एतत्पदद्वयाभिधेयं सामापि पवमानस्य जिघ्नत इत्यस्मिन्नेव ऋचे कार्यं ॥ १६ ॥

अथैतत्पशुजन्मत्वेन स्तौति।

पशवो वै छन्दोमाः पशुष्वेव तन्मिथुनमप्यर्ज्जति प्रजात्यै न ह वा अनृषभाः पशवः प्रजायन्ते ॥१७॥

छन्दोमाख्यान्यहानि पशवो वै पशुरूपाण्येव एतेष्वृषभे भवतीति यत्तत्तेन पशुष्वेव मिथुनमप्यर्ज्जति सम्पादयति किमर्थं प्रजात्यै प्रजननाय वत्साद्यिरूपेणाभिवृद्ध्यर्थं न खल्वृषभाः ऋषभेण पुंसा विमुक्ताः पशवः प्रजायन्ते वत्साञ्जनयन्ति ॥ १७ ॥

अथान्यत्साम विधत्ते।

पृष्ठं भवति ॥ १८ ॥

पृष्ठाख्यं साम परीतोषिञ्चतासुतमित्यस्मिन् ऋचे गेयं ॥१८॥

अथैतत् स्तौति।

पृष्ठं वा एतद्यज्ञां यन्नवमं पृष्ठ एव तत्पृष्ठेन स्तुवते प्रतिष्ठायै ॥ १९ ॥

यन्नवमम्यज्ञः एतद्यज्ञां प्रायणीयादीनां पृष्ठं वै पृष्ठवंशस्था-

नीयं तत्तथा च पृष्ठरूप एवैतस्मिन्नवमेऽहनि पृष्ठेन स्तुवते स्तुवन्त्युद्गातारः किमर्थं प्रतिष्ठायै प्रतिष्ठानार्थं उभयोः साम्याद्यजमानस्य प्रतिष्ठाहेतुर्भवतीत्यर्थः ॥ १९ ॥

अथान्यत्साम विधत्ते।

कौलमलवर्हिषं भवति ॥ २० ॥

कुलमलवर्हिःसम्बन्धि कौलमलवर्हिषं एतदाख्यं साम परीतोषिञ्चेत्यस्मिन्नेव हृचे गेयं ॥ २० ॥

अथैतत् स्तौति।

कुलमलवर्हिर्वा एतेन प्रजापतिं भूमानमगच्छत् प्रजायते बहुर्भवति कौलमलवर्हिषेण तुष्टुवानः ॥२१

स्पष्टोऽर्थः ॥ २१ ॥

अथान्यत्साम दर्शयति।

अर्कपुष्पं भवति ॥ २२ ॥

अर्कपुष्पाख्यं सामापि परीतोषिञ्चेत्यस्मिन्नेव हृते गातव्यं ॥२२

अथैतद्रससहितान्नाद्यहेतुत्वेन स्तौति।

अन्नं वै देवा अर्क इति वदन्ति रसमस्य पुष्पमिति सरसमेवान्नाद्यमवरुन्धेऽर्कपुष्पेण तुष्टुवानः ॥२३

देवा अन्नं खलु अर्क इति वदन्ति अर्च्यते अनेनेति व्युत्पत्तेः अस्यान्नस्य रसं पुष्पमिति वदन्ति तस्मादन्नरसयोर्वाचकोऽर्कपुष्पशब्दः तदाख्येन साम्ना स्तुतवान् सरसं रससहितमेवान्नाद्यमवरुन्धे ॥ २३ ॥

अथान्यत्साम विधत्ते।

दैर्घ्यश्रवसं भवति ॥ २४ ॥

दीर्घश्रवसः सम्बन्धि दैर्घ्यश्रवसं एतदाख्यं सामापि परोक्षेत्यस्मिन्नेव लक्षे ज्ञेयं ॥ २४ ॥

अथैतत् स्तौति।

दीर्घश्रवा वै राजन्य ऋषिर्ज्योगपरुद्धोऽशनायꣳश्चरन् स एतद्दैर्घश्रवसमपश्यत्तेन सर्वाभ्यो दिग्भ्योऽन्नाद्यमवारुन्ध सर्वाभ्यो दिग्भ्योऽन्नाद्यमवरुन्धे दैर्घश्रवसेन तुष्टुवानः ॥२५॥

दीर्घश्रवा नाम राजन्यो राजपुत्र ऋषिः ज्योक् चिरकालमपरुद्धः शत्रुभिराक्रान्तो राज्याद्भ्रष्टः अशनायन् अशनामात्मन इच्छन् क्षुधार्त्तः चरन् सर्वतः परिभ्रमन् आसीत् स ऋषिः एतद्दैर्घश्रवसमपश्यत् तेन च साम्ना सर्वाभ्यो दिग्भ्यः अन्नाद्यमवारुन्ध प्राप्नोत् अतोऽद्यतनोऽपि दैर्घश्रवसेन स्तुतवान् सर्वाभ्यो दिग्भ्यः प्राच्यादिसर्वदिक्सकाशात् अन्नाद्यमवरुन्धे प्राप्नोति ॥२५

अथान्यत्साम विधत्ते।

वैयश्वं भवति यदेव वैयश्वस्य ब्राह्मणं ॥ २६ ॥

व्यश्वेन दृष्टं साम वैयश्वं तदपि परीतोषिश्चेति त्वचे गेयं तस्य च स्तावकं व्यश्वो वा एतेनेत्यादिकं यद्ब्राह्मणं पूर्वमाम्नातं तदत्रापि स्तुत्यर्थमानेतव्यं ॥ २६ ॥

अथैतस्मिन्नेव त्वचे अन्यत्साम विधाय तद्ब्राह्मणञ्चाति दिशति।

आभीशवं यदाभीशवस्येति ॥ २७ ॥

आभीशवमिति भवति ब्राह्मणमिति पदद्वयमनुषज्यते आभीशवाख्यं साम यद्वा अधतमभीशुनातद्धारेत्यादिकं तस्य प्रागाम्नातं अन्यत्सिद्धं ॥ २७ ॥

अथान्यत्सामद्वयं विधत्ते।

देवस्थानं भवति प्रतिष्ठायै संकृति भवति संस्कृत्यै ॥ २८ ॥

देवास्तिष्ठन्त्यस्मिन् सान्नीति देवस्थानं तत्साम परीतोषिस्तत्यस्मिन्नेव त्वचे गेयं तच्च स्थितिवाचिस्थानशब्दाभिधेयत्वात् प्रतिष्ठायै प्रतिष्ठानाय भवति तथा संकृत्याख्यमपि तस्मिन्नेव त्वचे गेयं तच्च संकृत्यै संस्काराय भवति ॥ २८ ॥

अथैतत्सामद्वयं संप्रयुज्य स्तौति ।

अहर्वा एतदब्रीयत तद्देवा देवस्थाने तिष्ठन्तः संक्रतिना समस्कुर्वंस्तत् संक्रतेः संक्रतित्वं देवस्थानेन वै देवाः स्वर्गे लोके प्रत्यतिष्ठन् स्वर्गे लोके प्रतितिष्ठामेत्येतत् ॥ २९ ॥

एतन्नवमहः खलु पुरा अब्रीयत व्यगीर्य्यत तद्देवा देवस्थाने साम्नि आधारभूते तिष्ठन्तः तन्नवममहः संक्रतिना साम्ना समस्कुर्वन् तत्तस्मात्संस्कारसाधनत्वात्संक्रतेरस्य साम्नः संक्रतित्वं संक्रतीति नाम सम्पन्नं अतएव संस्कृत्या इति युक्तं तथा देवस्थानेन खलु साम्ना देवाः पुरा स्वर्गे लोके प्रत्यतिष्ठन् प्रतिष्ठिता अभवन् यजमाना अपि स्वर्गे लोके प्रतितिष्ठाम प्रतिष्ठिता भवामेति हि एतत् एतर्हि एतस्मिन्काले सत्रमासते अतो देवस्थानं एवं प्रतिष्ठाप्रापकमित्यर्थः ॥ २९ ॥

अथ देवस्थानं वियुज्य श्रैष्ठ्यहेतुत्वेऽपि स्तौति ।

वरुणाय देवता राज्याय नातिष्ठन्त स एतद्देवस्थानमपश्यत्ततो वै तास्तस्मै राज्यायातिष्ठन्त तिष्ठन्तेऽस्मै समानाः श्रैष्ठ्याय ॥ ३० ॥

वरुणाय षष्ठ्यर्थे चतुर्थी पुरा वरुणस्य राज्याय राजत्वाय अन्याः सर्व्या देवता नातिष्ठन्त राजत्वं नाभ्युपागच्छन् राजत्वान-

अभ्युपगमं प्रकाशितवन्त इत्यर्थः; अतो यो देवस्थानेन स्तौति असौ यजमानाय समानाः सदृशा ज्ञातयः श्रैष्ठ्याय श्रेष्ठत्वाय तिष्ठन्ते अनुमन्यन्ते पूर्ववदात्मनेपदचतुर्थौ ॥ २० ॥

अथैतद्वेदनफलमाह ।

क्षत्रस्येवास्य प्रकाशो भवति प्रतितिष्ठति य एवं वेद ॥ २१ ॥

क्षत्रस्य क्षत्रियस्येव अस्य वेदितुः प्रकाशः कीर्तिर्भवति स्पष्टमन्यत् ॥ २१ ॥

अथान्यत्साम द्वयं विधत्ते ।

भर्गएव भर्गेण तुष्टुवानो भवति यशो यशसा ॥ २२

परीतोषिञ्चेत्यस्मिंस्तृचे क्रमेण भर्गेण यशसा च द्वाभ्यां सामभ्यां स्तुतवान् भर्गः तेजस्वी यशो यशस्वी च भवति ॥ २२ ॥

अथान्यत्साम विधाय तद्ब्राह्मणमतिदिशति ।

वासिष्ठं भवति यदेव वासिष्ठस्य ब्राह्मणं ॥ २३ ॥

वसिष्ठेन दृष्टं साम वासिष्ठं तदपि परीतोषिञ्चेति तृचे श्रीणन्त इत्यध्यास्यायामृचि गेयं वसिष्ठो वा एतेन वैडव इत्यादिकं तत्सावकं यद्ब्राह्मणं प्रागाम्नातं तदत्रापि स्तुत्यर्थमानेयं ॥ २३ ॥

अथान्यत्साम विधत्ते ।

दीर्घतमसोऽर्को भवत्यन्नं वा अर्कोऽन्नाद्यस्याव-रुध्यै ॥ ३४ ॥

दीर्घतमा नाम ऋषिः तस्य सम्बन्धी अर्कः एतत्सांनं साम असावि सोमो दृषाहरिरित्यस्मिंस्तृचे गेयं शिष्टं विद्वं ॥ ३४ ॥

अथान्यत्साम विधत्ते ।

सामराजं भवति साम्राज्यमाधिपत्यं गच्छति सामराज्ञा तुष्टुवानः ॥ ३५ ॥

साम्नां राजा सामराजः राजाहःसखिभ्यष्टचिति समासान्तः एतत्सांनं साम असावि सोमो अरुष इत्यस्मिन्नेवाष्टचे गेयं अनेन च साम्ना सामराज्ञा तुष्टुवानः स्तुतवान् साम्राज्यमभिषिक्तस्य राजसूयेनेष्टवतः सार्वभौमस्य राज्ञः कर्म आधिपत्यं अधिपतित्वञ्च गच्छति अत्र सामराज्ञेति समासान्तविधेरनित्यतेति टज्भावरूपं ॥ ३५ ॥

अथैतत्स्वर्गसाधनमित्याह ।

तदु संवदित्याहुः संवता वै देवाः स्वर्गं लोकं प्रायन्नुइतोदायन् ॥ ३६ ॥

तदु तत्सामराजाख्यं साम संवत् स्वर्गप्रापणाय भवतीत्यर्थः ॥ ३६ ॥

अथैतत्पवमानस्तोत्रमुपसंहरति ।

निधनान्ताः पवमाना भवन्त्यह्नो धृत्यै स्तोभः ॥३७

अष्टाचत्वारिंशः पूर्वोक्त एवास्य स्तोत्रस्य स्तोमः सिद्धमन्यत्। ननु पवमानस्य जिघ्नत इति गायत्रे ऋचे गायत्रादि सामाष्टकं विहितं तथा परीतोषिञ्चेति बार्हते पृष्ठकौल्मलबर्हिषादीनि एकादशसामानि असावि सोमो अरुषो वृषाहरिरिति जागते ऋचे सामद्वयं एवं एकविंशतिसामसु ऋचेषु गीयमानेषु त्रिषष्टिस्तोत्रीयाः सम्पद्यन्ते तथा चाष्टाचत्वारिंश स्तोमातिरेकस्थानेनैष दोषः स्तुतशस्ता परिहृतत्वात् स स्तुत्येवं नवममहःप्रभृत्यास्तुवत्यत् तस्य बृहत्यामरण्ये गेयानि ऋचेषु पृष्ठश्चेति अस्यायमर्थः यानि बार्हते ऋचे एकादशसामानि विहितानि तेषु पृष्ठं कौल्मलबर्हिषं ऋकपृष्ठं दैर्घश्रवसं वैयश्वमाभीशवं वासिष्ठमिति सप्त ग्रामे गेयानि देवस्थानं संक्रतिभर्गो यज्ञ इति चत्वार्यरण्ये गेयानि तथा च तस्य नवमस्याह्नो बृहत्यां गेयेषु सामसु मध्ये देवस्थानप्रभृति अरण्ये गेयं सामचतुष्टयं ग्रामे गेयेषु च पृष्ठश्चेत्येतत्सामपञ्चकमेव ऋचे कुर्यात् अन्यानि षट्सामान्येकर्चानि कार्याणि दैर्घतमसो कौत्सः सामराजश्चेति स्तुतशस्त्रेण जगत्यां गीयमानस्य सामद्वयस्य विकल्पनाभिधानात् अन्यतरस्यैव प्रयोगात् पञ्चदशस्तोत्रीया हीयन्ते तथाष्टाचत्वा-

रिंग्य एव स्तोमो भविष्यति पञ्चान्तरमपि सूत्रकृतोक्तं तत् अतिविस्तारभयात् न लिखितमिति तत्रैव द्रष्टव्यं ॥ २७ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य
तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

अथ पृष्ठस्तोत्रे चतुर्षु तृतीयं स्तोत्रीयं तृचं दर्शयति ।

आयन्तदूव सूर्य्यवत्यो भवन्ति ॥ १ ॥

सूर्य्यवत्यः सूर्य्यशब्दयुक्ताः आयन्त इत्याद्यास्तिस्रः ऋचो ब्रह्मसाम्नः स्तोत्रीयाः ॥ १ ॥

अत्रासां सूर्य्यवत्त्वं कोऽसावस्मिन्नहनि सङ्गतिरित्याह ।

आदित्यदेवत्यꣳ ह्येतदहरन्तो वै सूरोऽन्त एतन्नवममहामन्तएव तदन्तेन स्तुवते प्रतिष्ठायै ॥ २ ॥

एतन्नवममहरादित्यदेवत्यं आदित्यदेवतार्थं अग्निवायुसूर्य्यक्रमेणादित्यस्तृतीयो भवति एतदहश्च छन्दोमानां तृतीयमिति तद्देवत्यत्वं यस्मादेवं तस्मात् सूर्य्यवत्यः सङ्गता इत्यर्थः अपि च सूरः सूर्य्योऽन्तो वै उक्तप्रकारेणान्तिमः एतन्नवममहश्च अङ्गां अनुष्ठितानां प्रायणीयादीनामन्तः अवसानं अनेन नवरात्रस्य समाप्यमानत्वात् तत्तथा च अन्तएवान्तेन सूर्य्यवतीभिः

स्तोत्रीयाभिः स्तुवते तच्च स्तवनं उभयोरैकरूप्यात्प्रतिष्ठानाय भवति ॥ २ ॥

अथाङ्गावाकृष्टस्य स्तोत्रीयं ऋचं दर्शयति।

यत इन्द्रभयामहे ततोनो अभयं कृधि मघवञ्छ्रुग्धि तव तन्न ऊतये वि द्विषो विमृधो जहीति द्विषश्चैव मृधश्च नवमेनाह्ना विहत्य दशमेनाह्नोत्तिष्ठन्ति ॥ ३ ॥

यत इन्द्रभयामह इत्याद्यास्तिस्रः ऋचोऽङ्गावाकसाम्नः स्तोत्रीयाः स्तुत्यर्थमृचोऽनुवादः अस्यामृचि द्विषो द्वेष्टॄन् मृधः संग्रामकारिणः एवमुभयविधान् शत्रून् हे इन्द्र त्वं जहि विनाशयेत्यर्थः प्रतिपाद्यते अतएवं रूपवाचकशब्दयुक्तेन ऋचेन द्विषश्चैव मृधश्च द्वेष्टॄंश्च संग्रामकारिणः उभयविधांश्च शत्रून् अनेन नवमेनाह्ना विहत्य विनाश्य दशमेनानुष्ठास्यमानेनाविवाक्यसंज्ञेनाह्ना उत्तिष्ठन्ति सत्रादुत्थानं कुर्वन्ति तस्माद्विद्विषो विमृधो जहीति लिङ्युक्तस्तृचो नवमेऽहनि सङ्गत इत्यर्थः ॥३॥

अथ ब्रह्मपृष्ठनिवर्त्तकं साम दर्शयति।

आयन्तीयं भवति ॥ ४ ॥

आयन्त इव सूर्यमित्याद्यासु गीयमानं आयन्तीयं ब्रह्मसाम भवति ॥ ४ ॥

अथैतत् स्तौति।

श्रीर्वै श्रायन्तीयꣳ श्रीन्नवममहः श्रियमेव तच्छ्रियां प्रतिष्ठापयति ॥ ५ ॥

श्रीः सम्पदूपमेव श्रायन्तीयं श्रीशब्दोदितश्रियतिधातौ निष्पन्नः श्रीयतीति यः शब्दस्य तथेति तादूप्यं नवममहश्च श्रीर्वै च सूर्यरूपं अष्टाचत्वारिंशस्तोमकत्वेन स्तोत्रीयाबाहुल्यात् तत्तेन श्रियमेव सम्पदमेव श्रियां सम्पदि प्रतिष्ठापयति उद्गाता प्रतिष्ठितां करोति ॥ ५ ॥

अथाछावाकपृष्ठस्तोत्रनिवर्त्तकं साम दर्शयति ।

समन्तं भवति ॥ ६ ॥

समन्ताख्यं साम यत इन्द्रभयामह इत्यस्मिन्नृचे गातव्यं ॥ ६

एवं नित्यत्वेन विधाय काम्यमपीत्याह ।

समन्तेन पशुकामः स्तुवीत पुरोधाकामः समन्तेन स्तुवीत ॥ ७ ॥

पशुकामः पशून् कामयमानो यजमानः समन्तेन साम्ना स्तुवीत तथा पुरोधाकामः पौरोहित्यं कामयमानोऽप्येतेन समन्तेन स्तुवीत एवन्नित्यकाम्यविषयवाक्यद्वयेन खादिरो यूपो भवति खादिरं वीर्यकामस्य यूपं कुर्वीतेति तत् एकस्यैव नित्यत्वं काम्यत्वञ्चोक्तं भवति तदुक्तं एकस्य तूभयत्वे संयोगपृथक्त्वमिति ॥ ७

अथैतस्य फलद्वयसाधनतामुपपादयति ।

आग्नेयो पृथिव्याग्नेयो ब्राह्मण ऐन्द्रो द्यौरैन्द्रो राजन्योऽन्तरिक्षेण द्यावापृथिवी समन्ते अन्तरिक्षेणैवैनꣳ समन्तं करोति विन्दते पशून् प्र पुरोधामाप्नोति य एवं विद्वान् समन्तेन स्तुते स्तोमः ॥ ८ ॥

आग्नेयी अग्निदेवत्या पृथिवी ब्राह्मणस्याग्नेयः अग्निना सह प्रजापतिमुखादुत्पत्तेः तथा द्यौरैन्द्री इन्द्रदेवत्या राजन्यस्येन्द्रेण सह प्रजापतेः उरसोबाहुभ्याञ्चोत्पत्तेः एतेन ब्राह्मणराजन्ययोर्द्यावापृथिव्यात्मकत्वमुक्तं भवति तच्च द्यावापृथिवी द्यावापृथिव्यौ अन्तरिक्षेण मध्यवर्त्तिना समन्ते सङ्गच्छते अतः समन्तेन स्तुवन् समतान्तत्वहेतुनान्तरिक्षेणैव एनं यजमानं समन्तं समतान्तगतं करोति किमुक्तं भवतीत्यत आह विन्दत इत्यादि य एवं ब्राह्मणार्थं विद्वान् समन्तेन स्तुते सोऽयं पशून् विन्दते लभते पुरोधां पुरोधानं पौरोहित्यञ्च प्राप्नोतीति तेषु च पृष्ठस्तोत्रेषु पूर्व्वोक्त एवाष्टाचत्वारिंश एव स्तोमः कार्य्यः ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य

चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

अथास्मिन्नवमेऽहन्यार्भवपवमानस्तोत्रीयांस्तृचान् क्रमेण दर्शयति । तत्र प्रथमं तृचं विधाय स्तौति ।

त्वꣳ सोमासि धारयुरिति गायत्रो भवत्यह्नो धृत्यै त्वमिति बृहतो रूपं बार्हतꣳ ह्येतदहः ॥ १ ॥

त्वं सोमासीति गायत्री आर्भवस्य प्रतिपद्भवति तदादिकस्तृचो भवतीत्यर्थः तच्च धारयुरिति धृञ् धातोर्निष्पन्नेन शब्देन योगात् अस्य नवमस्याह्नो धृत्यै धारणाय भवति सा चास्यानेनाह्ना सङ्गतिः इति तदाह त्वमित्येतत्पदं बृहत्साम्नो रूपं तद्योनौ त्वामिद्धि हवामह इति युष्मच्छब्ददर्शनात् एतदहश्च बार्हतं बृहत्साम्नः सम्बन्धि तृतीयं बृहत्पृष्ठोहि छन्दोमाः अतोऽस्मिन्नहनि तृचः सङ्गत इत्यर्थः ॥ १ ॥

अथ तृचान्तरं विधाय सङ्गतिमाह ।

त्वꣳ ह्यङ्ग दैव्येति त्वमिति बृहतो रूपं बार्हतꣳ ह्येतदहः ॥ २ ॥

त्वं ह्यङ्ग दैव्येति तृचोऽप्यार्भवस्य स्तोत्रीयः सिद्धमन्यत् ॥ २ ॥

अथापरं तृचं विधाय सङ्गतिमाह ।

पवस्व देव वीतय इति बृहतो रूपं बार्हतꣳ ह्येतद्रहः ॥ ३ ॥

पवस्व देव वीतय इति तृचः तत्र पवस्वेत्येतद् बृहत्साम्नो रूपं सिक्तमन्यत् ॥ ३ ॥

अथान्यं तृचं विधत्ते।

परित्यꣳ हर्य्यतꣳ हरिमिति परिवत्सो भवन्त्यन्तो वै नवममहस्तस्यैताः पर्य्याप्त्यै ॥ ४ ॥

परित्यं हर्य्यतं हरिमिति परिशब्दयुक्तास्तिस्रः सोतीवा भवन्ति शिष्टं सिक्तप्रायं ॥ ४ ॥

अथाक्षरपङ्क्तिछन्दस्कं तृचं विधाय पूर्व्ययोरक्षोरिव तं प्रशंसति।

पवस्व सोम महेदक्षायेत्यक्षरपङ्क्तिः स्तोमानां प्रभूतिरथो एतद्वैतर्हि च्छन्दोऽयातयाम यदक्षरपङ्क्तिस्तेन छन्दोमा अयातयामानः क्रियन्ते ब्रह्मवादिनो वदन्ति यत् षड्हे स्तोमाश्छन्दाꣳस्याप्यन्ते किं छन्दमश्छन्दोमा इत्येतच्छन्दमा यदेता अक्षरपङ्क्तय इति ब्रूयात् ॥ ५ ॥

एतत्सर्वं पूर्व्वस्मिन्नध्याये व्याख्यातं ॥ ५ ॥

अथापरं त्रयं विधत्ते ।

उपोषु जातमप्तुरमिति गायत्राः स्तुत्योजगत्यो रूपेण तस्मात् जगतीनां लोके क्रियन्ते ॥ ६ ॥

गोभिर्भङ्गं परिस्रुतमिति गोशब्देन जागतं रूपं पशवो वै जगत्य इति श्रुतेः जगत्योरूपेण योगाज्जगत्यः गतमन्यत् ॥ ६ ॥

अथैतेषु त्रयेषु क्रमेण सामानि विधास्यन्ते। तत्र प्रथमे त्रये गायत्रं प्रथमं साम गातव्यं, तस्य पूर्वोक्तं ब्राह्मणमतिदिशति ।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ ७ ॥

स्पष्टं ॥ ७ ॥

अथैतस्मिन्नेव त्रये साम विदधाति ।

आग्नस्रुक्तं भवति ॥ ८ ॥

आग्नस्रुक्तनाम त्वं सोमासीत्येव त्रये गातव्यं ॥ ८ ॥

तस्य च साम्नोऽवसाने शुक्र आरुत इति पदद्वयं श्रूयते तत् स्तौति ।

अग्निं वै पूर्वैरृषिभिराजुहोत्यथैतदादित्यदेवत्यमहः शुक्र आरुत इत्यसौ वा आदित्यः शुक्रस्तमेवैतेनाजुहोति ॥ ९ ॥

पूर्वैः पूर्वमनुष्ठितैरृष्टिभिरृषिभिः अग्निं वै अग्निमेवाभिजुहोति हविर्भिर्जुहोतीति तेन सूर्यः अधुना तु एतन्नवममहः आदित्यदैवत्यं आदित्यदेवतार्थं एवञ्चास्मिन्नहनि आश्वस्तूक्ते शुक्रआऽऽत इति श्रूयमाणेनैतेन पदेन तमेवादित्यमभिजुहोति असौ खल्वादित्यः शुक्रोदीप्तः सोऽयं शुक्र आऽऽतः आऽऽतिभिः तर्पित इति अस्यार्थस्य प्रतिभासमानत्वात् एतद्विशिष्टेनानेन नवमेनाह्ना अभिजुहोतीति व्यपदेशः ॥ ९ ॥

अथैतस्मिन्नेव ऋचे सामान्तरं विदधाति।

शाम्मदं भवति ॥ १० ॥

शम्मदा ऋषिणा दृष्टं साम शाम्मदं एतदपि त्वं सोमासीत्यस्मिन्नेव ऋचे गेयं ॥ १० ॥

तदेतत् साक्षात् स्वर्गसाधनमिति स्तौति।

शम्मदा एतेनाङ्गिरसोऽङ्गसा स्वर्गं लोकमपश्यत् स्वर्गस्य लोकस्यानुख्यात्यै स्वर्गाल्लोकान्न च्यवते तुष्टुवानः ॥ ११ ॥

आङ्गिरसो अङ्गिरोगोत्रः शम्मदृषिः एतेन साम्ना सिद्धमन्यत् ॥ ११ ॥

अथास्मिन्नेव ऋचेऽन्यत् साम विधत्ते।

दावसुनिधनं भवति ॥ १२ ॥

दावसुर्निधनं यस्य तत्तथोक्तं ॥ १२ ॥

अथैतत् स्तौति।

आशिषमेवास्मा एतेनाशास्ते साम हि सत्याशीः ॥ १३ ॥

दावसुनिधनं यस्येति दावसुशब्दार्थः तथाचास्मै यजमानाय धनविषयमाशिषामेवैतेन दावसुनिधनेन साम्ना आशास्ते कामयते साम खलु सत्याशीः ऋचां यजुषाञ्च मध्ये अवितथत्वेन फलप्रतिपादकं सामेत्यर्थः ॥ १३ ॥

अथैतत्पशुपोषहेतुत्वेन स्तौति।

दावसुर्वा एतदाङ्गिरसः पशुकामः सामापश्यत्तेन सहस्रं पशूनसृजत यदेतत् साम भवति पशूनां पुष्ट्यै ॥ १४ ॥

दावसुर्नामाङ्गिरसः ऋषिः पशुकामः सन् तत्साधनत्वेनैव तत्साम दृष्टवान् तेन साम्ना सहस्रसंख्यान् पशून् असृजत अलभत तथा चैतत् सामास्मिन्नवमेऽहनि भवतीति यत् तत्पशूनां पुष्ट्यै पोषायाभिष्टुत्यै भवति ॥ १४ ॥

अथ सामान्तरं विधत्ते।

प्रतीचोनेडं काशीतं भवति ॥ १५ ॥

प्रतीचीना इडा यस्य तथाविधं काशीताख्यं साम त्वं सोमासि धारयुरित्यस्मिन्नेव ऋचे गेयं ॥ १५ ॥

अथैतस्य प्रतीचीनेडत्वं पुत्रपक्षादिरूपस्य फलस्य जनिहेतुरिति स्तौति।

पराचीभिर्वा अन्याभिरिडाभी रेतो दधदेत्यथैतत्प्रतीचीनेडङ्काशीतं प्रजात्यै तस्मात्पराञ्चो गर्भाः सम्भवन्ति प्रत्यञ्चः प्रजायन्ते तस्मादु तेऽवाचीनविलेभ्यो नावपद्यन्त एतेन ह्येव ते धृताः॥ १६ ॥

कालेयगौतमशौरवारिष्टतैरश्वान्धीगवादिषु पूर्व्यं प्रयुक्तेषु सामसु ह्वो इडा इत्येवं रूपाः पराचीना इडाः ताभिरन्याभिः पराचीभिरनिवृत्ताभिः परागताभिरिड़ाभिर्यजमानो रेतोदधत् पुत्रपक्षादेरुपादानभूतं वीर्य्यं स्वयोनावादधाति गच्छति अथाधुना प्रयुज्यमानं प्रतीचीनेडं काशीतं प्रजात्यै पूर्व्या हि तस्य गर्भस्य प्रजननाय भवति होवा इडा इत्यनेन योगादेतत्साम प्रतीचीनेडं यस्मादेवं वेदे प्रतिपाद्यते तस्मादेव कारणाल्लोकेऽपि गर्भाः पुंसां योनौ निधिच्यमानाः पराचः प्राङ्मुखाः सम्भवन्ति उत्पत्तिसमये प्रत्यञ्चः प्रत्यङ्मुखाः प्रजायन्ते उत्पद्यन्ते हि यस्मादेतेन साम्ना ते गर्भा धृताः तस्मादेव हेतोरवाचीनविलेभ्यो योनिभ्यो नावपद्यन्ते नाधःपद्यन्ते ॥ १६ ॥

अथान्यत्साम विधत्ते।

हाविष्कृतं भवति प्रतिष्ठायै क्रतानुवाद एव सः ॥ १७ ॥

हाविष्कृतं हविष्कृता दृष्टं साम तदपि त्वं सोमासि धारयुरिति तृचे गातव्यं तत्र यजमानस्य प्रतिष्ठानाय भवति स च हविष्कृत् पुरा हविष्मान् वै हविरुच्चाङ्गिरसावास्तामित्यादिना क्रतानुवाद उक्तानुवाद एव तत्र हि नवमेऽहनि हविष्कृदराधोदित्यर्थः प्रतिपादितः अथ एतत्साम सदृङ्निहेतुरित्युक्तं भवति ॥ १७ ॥

अथ सामान्तरं विधाय तद्ब्राह्मणञ्चातिदिशति ।

सौपर्णं भवति यदेव सौपर्णस्य ब्राह्मणं ॥ १८ ॥

सौपर्णाख्यं साम त्वं ह्यङ्ग दैव्येत्यस्मिंस्तृचे गातव्यं यज्ञो वै देवेभ्योऽपाक्रामत् स सुपर्णरूपं कृत्वाऽचरदित्यादिकं सौपर्णस्य ब्राह्मणं प्रागाम्नातं तदेवास्यापि सौपर्णस्य ब्राह्मणमानीय तेन स्तोतव्यं ॥ १८ ॥

अथान्यत्साम विधत्ते ।

वैश्वमनसं भवति ॥ १९ ॥

विश्वमनसा ऋषिणा दृष्टं साम वैश्वमनसं तत्यवस्व देव वीतय इत्यस्मिंस्तृचे गेयं ॥ १९ ॥

अथैतत्साम्नो विश्वमनसः सम्बन्धं पापहननहेतुतां च प्रतिपादयिषुराख्यायिकामाह।

विश्वमनसं वा ऋषिमध्यायमुद्व्रजितꣳ रक्षोऽगृह्णात्तमिन्द्रोऽचायदृषिं वै रक्षोऽग्रहीदिति तमभ्यवददृषे कस्त्वेष इति स्थानुरिति ब्रूहीति रक्षोऽब्रवीत् स स्थाणुरित्यब्रवीत्तस्मै वा एतेन प्रहरेत्यस्मा इषीकां वज्रं प्रयच्छन्नब्रवीत्तेनास्य सीमानमभिनत् सैषेन्द्रेणतेषीका पाप्मा वाव स तमगृह्णात्तं वैश्वमनसेनापाहतापापमानꣳहते वैश्वमनसेन तुष्टुवानः ॥२०॥

अध्यायमध्ययनं उद्व्रजितं प्राप्तं वैश्वमनसं विश्वमनससंज्ञमृषिं रक्षोऽगृह्णात् पुरा कश्चित् राक्षसो गृहीतवान् तं दृष्ट्वान्तमिन्द्रोऽचायत् ध्यानयोगेनाज्ञासीत् वायुपूजानिशामयोरिति धातुर्ऋषिं खलु रक्षोऽग्रहीदिति मनसाजानत् सदृन्द्रः तमृषिमभ्यवदत् ऋषे कः खल्वेष तव गृहीतेति एवमिन्द्रेण पृष्टे ऋषिं रक्षोऽब्रवीत् स्थाणुर्मामग्रहीदितीन्द्राय ब्रूहीति ततः स ऋषिः स्थाणुर्मां गृहीतवानित्यब्रवीत् एवमृषिणोक्ते तस्मै तद्रक्षसं एतेन वज्रेण प्रहर जहीति अस्माऋषये इषीकां वज्रं इषीका तृणविशेषः तदेव वज्रीकृत्य प्रयच्छन् इन्द्रोऽब्रवीत् ततः तेन वज्रेण स ऋषिरस्य रक्षसः सीमानं शिरःकपालमध्यमभिनत् विदारितवान् इन्द्रेणतः इन्द्रेण निर्मिता सैषेषीका मूलाग्रपर्वभेदे

एवं तस्मिन् रक्षसि हते स एव स्थाणुः पाप्मा वाव स पापरूप एव भूत्वा तं विश्वमनसमभ्यक्रामत् तं पाप्मानं वैश्वमनसेन साम्नापाहत व्यनाशयत् अतो अद्यतनोऽपि वैश्वमनसेन स्तुतवान् यजमानः पाप्मानमपहते ॥ २० ॥

अथान्यस्मिंस्तृचे सामान्तरं विधाय तत् स्तावकं ब्राह्मणमाह तिदिशति ।

गौरीवितं भवति यदेव गौरीवितस्य ब्राह्मणं ॥२१॥

परित्यं हर्यतं हरिमिति तृचे गौरीवितं साम गातव्यं तस्य च गौरीवितिर्ऋषिः एतच्छास्त्र इत्यादिकं यद्ब्राह्मणमाम्नातं तदत्रापि अनुसन्धेयं ॥ २१ ॥

अथास्मिन्नेव तृचेऽन्यत् साम विधत्ते ।

निहवो भवत्यन्नाद्यस्यावरुध्यै ॥ २२ ॥

वसिष्ठनिहवाख्यं साम परित्यमिति पूर्वोक्त एव तृचे गेयं तच्चान्नाद्यस्यावरोधनाय भवति ॥ २२ ॥

कुत एतदित्यत आह ।

क्षौति वा अन्नं प्रदीयत इत्यग्निरन्नमत्ति ॥ २३ ॥

अस्मिन् साम्नि ओ ही ही३ ओ ही एहि या औ २३४ वा हा ही इति क्षौभो दृश्यते क्षौभिके च हिङ्क्षेत्राग्नं प्रदीयते

बालानामन्यस्य निवारणार्थं भोजयितव्यैरीशब्दस्य प्रयोगात् तदेवैतानुब्रूहीति हिशब्दमुच्चार्य ततो देवेभ्यो हविर्लक्षणमन्नं हीयते तथा ईं इति एवं रूपं शब्दं कुर्वन्नग्निरन्नं खात्तानि ऊतं हविरक्ति दहति अतो ईंहीत्यन्नप्रदानसम्बन्धयोः शब्दयोः प्रयोगादस्य साम्नोऽन्नहेतुत्वं ॥ २३ ॥

अथैतत्साम प्रकारान्तरेण स्तोतुमाख्यायिकामाह ।

ऋषयो वा इन्द्रं प्रत्यक्षन्नापश्यन् स वसिष्ठोऽकामयत कथमिन्द्रं प्रत्यक्षं पश्येयमिति स एतन्निह्नवमपश्यत्ततो वै स इन्द्रं प्रत्यक्षमपश्यत् स एनमब्रवीद् ब्राह्मणन्ते वक्ष्यामि यथात्वत्पुरोहिता भरताः प्रजनिष्यन्तेऽथ मान्येभ्य ऋषिभ्यो मा प्रवोच इति तस्मा एतान् स्तोमभागानब्रवीत्ततो वै वसिष्ठपुरोहिता भरताः प्राजायन्त सेन्द्रं वा एतत्साम यदेतत्साम भवति सेन्द्रत्वाय ॥ २४ ॥

वसिष्ठाद्या ऋषयः पुरा इन्द्रं प्रत्यक्षन्नापश्यन् अपरोक्षेण नाजानन् तेषु ऋषीणामध्ये स प्रसिद्धो वसिष्ठ ऋषिरकामयत कथं केन प्रकारेणोपायेन इन्द्रं प्रत्यक्षं पश्येयं साक्षात्कार्यमिति एवं कामयमानः सः निह्नवाख्यमेतत्सामापश्यत्तस्मादेतस्य वसिष्ठस्य निह्नव इति संज्ञा ततोऽनन्तरमेव स ऋषिरिन्द्रं प्रत्य-

अमपश्यत्साक्षात् कृतवान् स इन्द्र एवर्षिमब्रवीत् हे वसिष्ठ ते तुभ्यं ब्राह्मणं वक्ष्यामि अनुष्ठेयार्थप्रतिपादकं वेदभागमुपदेक्ष्यामि यथा येन प्रकारेण त्वत्पुरोहिताः त्वं पुरोहितो येषां तथाविधा भरता एतत्संज्ञाः राजानः यद्वा भरता इति मनुष्यनाम सर्वे मनुष्याः प्रजनिष्यन्ते उत्पत्स्यन्ते अथ मदुपदेशानन्तरं मामिन्द्र अन्येभ्यस्त्वद्व्यतिरिक्तेभ्य ऋषिभ्यो मा प्रवोचः न ब्रूयाः इत्येवमुक्त्वा तस्मै वसिष्ठाय एतान् पूर्वोक्तान् स्तोमभागान् रश्मिरसीत्याद्यान् स्तोमानुमन्त्रणान् मन्त्रान् अब्रवीत् उक्तवान् ततो वै तत एव कारणात् सर्वे भरता वसिष्ठपुरोहिताः प्राजायन्त वसिष्ठः पुरोहितो येषां ते तथोक्ताः एवमिन्द्रप्रत्यक्षीकरणं वसिष्ठेन दृष्टत्वात् एतन्निह्नवाख्यं साम सेन्द्रं वै इन्द्रसहितं खलु स्पष्टमन्यत् ॥ २४ ॥

अथान्यत्साम विधत्ते ।

यद्वाहिष्ठीयं भवति ॥ २५ ॥

योनौ यद्वाहिष्ठशब्दान्वयाद्यद्वाहिष्ठीयं एतत्संज्ञं सामापि परित्यमित्यस्मिन्नेव ऋचे गेयं ॥ २५ ॥

अथैतत् स्तौति ।

ब्रह्मयशसं वा एतानि सामान्यृचा श्रोचीकाणि ब्रह्मयशसी भवति यद्वाहिष्ठीयेन तुष्टुवानः ॥ २६ ॥

एतानि यद्वाहिष्ठीयप्रभृतीनि सामानि ऋचा योनिभूता

ऋचोऽवयवेन पदेन श्रोत्रीयाणि श्रोतव्यानि ब्रह्मयशसं वै ब्राह्मणजातेः सम्बन्धि यशोरूपाणि अतो अनेन यद्वाहिष्ठीयेन तुष्टुवान् स्तुतवान् यजमानो ब्रह्मयशसी भवति ॥ २६ ॥

अथ सामान्तरं विधाय तत्स्तावकं ब्राह्मणञ्चातिदिशति।

आसितं भवति यदेवासितस्य ब्राह्मणं ॥ २७ ॥

असितेन ऋषिणा दृष्टं सामासितं तदपि परित्यं हर्य्यतमित्यस्मिन्नेव ऋचे गातव्यं तस्य चासितस्यासिवा एतेन दैवल इत्यादिकं यद्ब्राह्मणं पूर्व्वमाम्नातं तदस्याप्यसितस्य स्तावकं ब्राह्मणं ॥ २७ ॥

अथैतस्मिं स्तृचेऽन्यत्साम विधत्ते।

साध्रं भवति सिद्ध्यै ॥ २८ ॥

राधसाध संसिद्धाविति धातोः ष्ट्रक् प्रत्यये साध्रशब्दनिष्पत्तिः तथा च साध्रशब्दाभिधेयं साम परित्यं हर्य्यतं हरिमिति ऋचे गीयमानं यजमानाभिमतफलस्य सिद्धौ प्राप्तौ सम्पद्यते ॥२८

अथान्यत्साम विधत्ते।

आकूपारं भवति ॥ २९ ॥

एतदपि परित्यमिति पूर्वोक्त एव ऋचे गेयं ॥ २९ ॥

अथैतत् स्तौति।

अकूपारो वा एतेन कश्यपो जेमानम्महिमान-मगच्छज्जेमानम्महिमानं गच्छत्याकूपारेण तुष्टुवानः ॥ ३० ॥

अकूपाराख्यः कश्यपगोत्रऋषिः जेमानं जेतृत्वं महिमानं महत्त्वञ्च एतेन साम्ना प्राप्नोत् स्पष्टमन्यत् ॥ ३० ॥

अथ सामान्तरं विधत्ते।

विधर्म्म भवति धर्म्मस्य विधृत्यै ॥ ३१ ॥

पवस्व सोममहेदत्त्वायेत्यस्मिन्नक्षरपङ्क्तिछन्दस्कत्वे विधर्म्मीयं साम गेयं एतद्विधर्मेत्यस्य साम्नैवावसाने दर्शनाद्विधर्मसंज्ञा यस्मादेतत्साम विधर्मं विधृत्य कारणं तस्माद्धर्मस्यानुष्ठेयस्य यागस्य विधृत्यै विधारणाय भवति ॥ ३१ ॥

अथैतेषु छन्दोमाख्येष्वहःसु ब्रह्मव दिभिः कृतं कञ्चित् प्रश्नमुपन्यस्यास्य साम्न आधारभूतत्वछन्दसा परिहरति।

ब्रह्मवादिनो वदन्ति यत् षड्हे स्तोमाश्छन्दाꣳस्याप्यन्ते किं छन्दसश्छन्दोमा इति पुरुषः छन्दस इतिब्रूयात् पुरुषो वै पाङ्क्तः पुरुषोद्विपदाच्छन्दोमानामयातयामतायै ॥ ३२ ॥

ब्रह्मवादिनो वेदार्थविचक्षणाश्छन्दोमेषु चोदयन्ति किमिति

पृष्ठषडहे समाप्ते त्रिवृदादयः स्तोमाः गायत्र्यादीनि छन्दांसि च क्रमेण षट्स्वहःसु विनियुक्तत्वाद्यस्मात्समाप्यन्ते तस्मात् छन्दोमाः किं छन्दः केन छन्दसा निष्पन्नाः यदि वेति सूक्तानां गायत्र्यादीनामन्यतममेतर्हि गतसारता स्यात् अस्योत्तरं पुरुषः छन्दसः छन्दोमा इति ब्रूयात् ननु पुरुषो नाम गायत्र्यादिछन्दोऽनन्तरं न प्रसिद्ध इत्यत आह पुरुषो वै पाङ्क्तः इति अयमर्थः पङ्क्तिस्तावत् पञ्चपदत्वात् पञ्चसंख्यावती पुरुषश्च त्वङ्मांसस्नावास्थिमज्जेति पञ्चधातुभिः पञ्चज्ञानेन्द्रियैः पञ्चकर्मेन्द्रियैश्चोत्पत्तिमत्त्वेन पञ्चसंख्याद्वारा पङ्क्तिः द्विपदाश्च पदद्वयसाम्यात् पुरुषस्थानीयाः ताश्च पवस्व सोममहेदत्तायेत्यादि तिस्रोऽक्षरपङ्क्तिछन्दस्काः द्विपदाः अतएव छन्दोद्वयं पूर्वमविनियुक्तत्वात् छन्दोमानामयातयामतायै अगतसारतायै भवति ॥ ३२ ॥

अथान्यत्साम विधत्ते ।

शुद्धं भवति ॥ ३३ ॥

उपोषु जातमित्यस्मिंस्तृचे तत् शुद्धाख्यं साम गेयं ॥ ३३ ॥

अथैतत्पशुसाधनत्वेन स्तौति ।

पशवो वै शुद्धं पशूनामवरुध्यै ॥ ३४ ॥

सुगोऽर्थः ॥ ३४ ॥

एतदेव व्याचष्टे ।

प्रजापतिः पशूनसृजत तेऽस्मात् सृष्टा अपाक्रामꣳ स्तानेतेन साम्ना सूधिया एहियेत्यन्वह्वयत्त एनमुपावर्त्तन्त यदेतत् साम भवति पशूनामुपावृत्त्यै ॥ ३५

पुरा प्रजापतिः पशूनसृजत सृष्टवान् ते च सृष्टा अस्मात् प्रजापतेः सकाशादपाक्रामन् अपलायन्त तानपाक्रान्तान् पशूनेतेन शुद्धेन साम्ना सूधिया एहियेति सामावयवेन स्तोभेनान्वह्वयत् अनुक्रमेणाह्वतवान् स्तोभस्यायमर्थः हे पशुसङ्घ त्वं मद्वचनं सूधि शृणु एहि आगच्छेति एवमाह्वतास्ते पशव एनं प्रजापतिमुपावर्त्तन्तोपागताः तस्मादेतत्साम पशूनामुपावृत्त्या उपावर्त्तनाय भवति ॥ ३५ ॥

अथैतद्वेदनफलमाह ।

उपैनं पशव आवर्त्तन्ते य एवं वेद ॥ ३६ ॥

स्पष्टोऽर्थः ॥ ३६ ॥

अथास्य साम्न आधारभूतानामृचां छन्दोद्वारेण स्तुतिं कुर्वन् एतत्पवमानस्तोत्रमुपसंहरति ।

गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्तोऽदान्ताः पवमाना भवन्ति पशवो वा इडा पशवश्छन्दोमाः पशुष्वेव तत्पशून्दधाति स्तोमः ॥ ३७ ॥

उषोषु जातमपुरमित्याद्यासु गायत्रीषु शुद्धेन साम्ना स्तुवन्त्युद्गातारः अस्य चावसाने इड शब्दः श्रूयते तस्मादस्य पवमानस्तोत्रस्येडान्तत्वं सिद्धमभवत् एवं गायत्रादिशुद्धान्तेषु षोडशसु सामसु प्रत्येकं तृचे गीयमानेषु अष्टाचत्वारिंशत् स्तोत्रीयाः सम्पद्यन्ते तत्सद्गातारमकोऽष्टाचत्वारिंशस्तोम एवास्य स्तोत्रस्य कार्यः ॥ ३७ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य

पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

अथोक्थेषु प्रथमस्य स्तोत्रीयं तृचं विधित्सुराह ।

आग्नेयीषु पूर्वेषामह्नामुक्थानि प्रगायन्त्यथै-तस्याह्न आग्नेय्यैन्द्र्यां प्रगायन्त्युभयोरेव रूपयोः प्रतितिष्ठति ॥ १ ॥

अथाग्नेयीषु अग्निदेवत्यासु ऋक्षु एतासु ब्रवाणित इत्याद्यासु पूर्वेषां गतानामह्नां उक्थानि तृतीयसवन उक्थस्तोत्राणि प्रगायन्ति कुर्वन्ति अथशब्दस्यशब्दार्थे एतस्य नवमस्याह्नस्य आग्नेय्यैन्द्र्यां अग्निरिन्द्रश्चोभे देवते यस्यास्यामृचि प्रगायन्ति

तथा चोभयोरेव रूपयोः अग्नाविन्द्रे च यजमानः प्रतिष्ठितो भवति ॥ १ ॥

अथ प्रथमोक्थस्तोत्रनिर्वर्त्तकं साम दर्शयति।

ऐध्मवाहं भवति ॥ २ ॥

ऐध्मवाहाख्यं साम अग्नेय्यैन्द्र्याङ्गातव्यमित्यर्थः ॥ २ ॥

एतदेवानूद्य स्तौति।

आग्नेय्यैन्द्रीषु स्तुवन्ति ब्रह्म चैव तत् क्षत्रञ्च सयुजौ करोति ब्रह्मैव क्षत्रस्य पुरस्तान्निदधाति ब्रह्मणे क्षत्रञ्च विशञ्चानुगे करोति ॥ ३ ॥

आग्नेय्यैन्द्रीषु अग्नीन्द्रौ देवते यासां तासु आद्या ये अग्निमिन्धत इत्याद्यासु ऐध्मवाहेन स्तुवन्ति ब्रह्म ब्राह्मणजातिं क्षत्रं क्षत्रियजातिञ्चैव सयुजौ समानयुञ्जाने संयुक्ते करोति अग्नेः ब्राह्मणजात्या सह प्रजापतिमुखादुत्पन्नस्य इन्द्रस्य क्षत्रियजात्या सह प्रजापतेरुरसो बाहुभ्यामुत्पन्नस्य च उभयोरेकस्यामेव संयोजनात् तत्राप्यग्निशब्दः प्रथमः श्रुतः पश्चादिन्द्रस्य क्षत्रियजातेः पुरस्ताद्ब्रह्मैव ब्राह्मणजातिमेव निदधाति तथा ब्रह्मणे ब्राह्मणजातये क्षत्रं क्षत्रियजातिं च विशं वैश्यजातिञ्चानुगे अनुगन्त्र्यौ करोति ॥ ३ ॥

अथ द्वितीयोक्थस्तोत्रनिर्वर्त्तकं साम दर्शयति।

त्रैककुभं भवति ॥ ४ ॥

य एक इद्विदयत इत्यादिके हृचे एतत्त्रैककुभाख्यं साम गीयमानं ब्रह्मण उक्थस्तोत्रं भवति ॥ ४ ॥

अथैतत् स्तौति।

ओजस्येव तद्वीर्य्ये प्रतितिष्ठत्योजोवीर्य्यन्त्रैककुभं ॥ ५ ॥

तत्तेन त्रैककुभेन ओजोरूप एव वीर्य्ये प्रतितिष्ठति अस्य साम्नो वीर्य्यं त्रैककुभमिति स्त्रिककुभं विनिधाय चरदित्यारभ्य त्रिवीर्यं वा एतत्सामेत्यादिना पूर्व्वमेव प्रतिपादितं ॥ ५ ॥

अथ तृतीयस्योक्थस्य निर्वर्त्तकं साम दर्शयन् तद्ब्राह्मणं चादिशति।

उद्वृहतीयं भवति यदेवोद्वृहतीयस्य ब्राह्मणं ॥ ६ ॥

गायन्ति त्वा गायत्रिण इत्यस्मिंस्तृचे गीयमानमुद्बृहतीयमक्षावाकस्योक्थस्तोत्रं भवति तस्य चोद्बृहतीयस्य षष्ठानि वा अक्षरव्यन्त तेषां यत्तेजोरसोत्यरिच्यतेत्यादिकं यत् स्तावकं ब्राह्मणमाम्नातं तदत्रापि स्तुत्यर्थमनुसन्धेयं ॥ ६ ॥

अथैतेषु स्तोत्रेषु पूर्व्ववत् स्तोत्रीयं विधाय स्तौति।

अष्टाचत्वारिंश एव स्तोमो भवति प्रतिष्ठायै प्रजात्यै ॥ ७ ॥

अस्य स्तोमस्य संख्याद्वारा जगतीसम्बन्धात्तस्याश्च पञ्चात्मकत्वात्पञ्चनाञ्च प्रतिपादनहेतुत्वञ्च स्पष्टमित्येवं संख्याद्वारा अष्टाचत्वारिंशस्तोमस्योभयहेतुत्वमधिगन्तव्यं ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे षष्ठदशाध्यायस्य

षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

इत्थं दशरात्रिकाणान्नवानामह्नां स्तोमसृष्टिरुक्ता, अथ दशमस्याह्नः स्तोमसृष्टिरध्यायशेषेण विधीयते, प्रथमं तावत्तस्मिन्नहनि अनुष्टुभां प्रयुज्योपायनं निषेद्धुकामः तत्रानुष्टुभस्य छन्दसः प्रसक्तिमाह ।

गायत्रं वै सप्तममहस्त्रैष्टुभमष्टमञ्जागतं नवममश्रैतदानुष्टुभमहर्यद्दशमं ॥ १ ॥

गायत्र्यादीनां छन्दसां षण्णवतेऽहे क्रमेण विनियुक्तत्वेन समाप्तत्वात् पुनरपि सप्तमाष्टमादिष्वहःसु तान्येव गायत्र्यादीनि छन्दांसि क्रमेण प्रयोज्यानि तस्माद्गायत्रं गायत्रीछन्दस्कं सप्तम-

महस्त्रिष्टुप्छन्दस्कमष्टमं जगतीछन्दस्कन्नवमं यद्दशममहः एतदानुष्टुभं अनुष्टुप्छन्दस्कं तस्मादनुष्टुभोऽस्मिन् दशमेऽहनि प्रयोज्या इत्यर्थः ॥ १ ॥

इत्थं प्रयोज्यानामनुष्टुभां प्रत्यक्षापायने दोषं दर्शयन् सम्प्रत्या तासां सद्भावमाह।

तदाहुर्य्यदनुष्टुभꣳ स्तोम्यां प्रत्यक्षमुपेयुः परास्परावतं यजमानो गच्छेन्न प्रतितिष्ठेदिति या वै चतुर्विꣳशतिर्गायत्र्यस्ता अष्टादशानुष्टुभोऽनुष्टुभमेव तत् स्तोम्यां परोक्षमुपयन्ति प्रतिष्ठायै प्रतितिष्ठति ॥ २ ॥

तत्तत्र दशमेऽहनि विषये ब्रह्मवादिनः आहुः स्तोम्यां स्तोमार्हां स्तोत्रीयामनुष्टुभमक्षं यद्यपि प्रत्यक्षस्वरूपेणोपेयुरुपगच्छेयुः कुर्युरित्यर्थः तदा परां परावतं अतिशयेन दूरं यजमानो गच्छेत् तथा न प्रतितिष्ठेत् प्रतिष्ठितश्च न भवेदिति तस्मादनुष्टुप् तत्प्रत्यक्षमुपेयात् कथं तर्ह्यस्याङ्ग आनुष्टुभत्वं प्रतिज्ञातमिति तदुच्यते चतुर्विंशस्तोमो ह्यस्मिन्नहनि विधास्यते तत्र वक्ष्यमाणे विधास्यमाना याः चतुर्विंशतिः गायत्र्यस्ता अष्टादशानुष्टुभो भवन्ति अष्टादशसु गायत्रीषु अवशिष्टा गायत्रीषट्कस्थसन्धिनां पादानामष्टादशानां एकैकस्य प्रक्षेपणेन द्वात्रिंशदक्षरसम्पत्तेः तत्तस्मात् स्तोम्यां स्तोत्रीयामनुष्टुभमेव परोक्षं यज्ञसम्पत्तिद्वारा

परोक्षेणोपयन्त्युपगच्छन्ति प्रतिष्ठायै प्रतिष्ठार्थं अनुष्टुभो हि चतुष्पादत्वात् प्रतिष्ठाहेतवः ॥ २ ॥

अथास्मिन्नहनि प्रमादादिस्मृतस्यानुष्ठेयस्य प्रतिषेधनं पार्श्वस्थैर्न कार्यमिति दर्शयति।

प्रजापतिं वा एतेनाङ्गा परिवेविषति तन्न व्यवदद्यं यद्वै श्रेष्ठे परिविष्यमाणेऽवदत्यन्नाद्यस्य सोवग्रहस्तस्मान्न व्यवदद्यमन्नाद्यस्यानवग्राहाय ॥ ३ ॥

प्रजापतिं सर्वकारणभूतं स्रष्टारं खलु एतेन दशमेनाङ्गा परिवेविषति भोजयति तर्पयति तत्तस्मान्न व्यवदद्यं ऋत्विग्भिर्विस्मृतं अनुष्ठेयं न विवाद्यं एतदेव सदृष्टान्तमुपपादयते यद्वा इत्यादिना श्रेष्ठे प्रशस्यतमे विद्यातपःप्रभृतिभिरधिके अतिशयोक्ते परिविष्यमाणो भोज्यमानो यत् खलु तत्रत्यं वैकल्यं वदति सोऽन्नाद्यस्य भोजनस्यावग्रहः प्रतिबन्धकः तस्मात्कारणान्न व्यवदद्यं विवादो न कार्यः किमर्थमन्नाद्यस्य भोजनस्यानवग्राहाय अप्रतिबन्धाय एवमत्रापि प्रजापतेर्भोजनाविच्छेदाय विस्मृतमनुष्ठेयजातं न केनचिदप्यभिज्ञेनाविष्करणीयमित्यर्थः ॥ ३ ॥

अथ पक्षान्तरमाह।

तदु व्यवदद्यं यथा श्रेष्ठाय वलिं हियमाणं पन्थानं पर्यवनुदति गत्यै तथा तत् ॥ ४ ॥

उशब्दोऽवधारणे तत्तत् दशमेऽहनि व्यवसृज्य निश्चितमनुष्ठेयं कर्म व्यवसृज्य विविच्य कथनीयमेव यथा खलु श्रेष्ठाय प्रशस्यतमायातिथये अपथेन ह्रियमाणं नीयमानं बलिसुपहारं मार्गाभिज्ञः पत्यानं पथ्यवनुदति प्रपयति गत्यै गमनार्थं तथैव तत् यद्दशमेऽहन्यनुष्ठेयस्य विस्मृतस्य प्रकरणमिति ॥ ४ ॥

अस्मिन् पक्षे कश्चिद्धर्मं विधत्ते ।

यावत्यनुष्टुप्तावतीं वाचं सम्पाद्य विब्रूयुस्तद्वनतिरिक्तꣳ स्वस्योचैव यज्ञस्यारिष्ट्यै ॥ ५ ॥

यावती यत् परिमाणाक्षरानुष्टुप् तावतीं तावत्परिमाणां वाचं सम्पाद्य उच्चार्य विब्रूयुः विस्मृतं स्मारयेयुः विस्मरणं हि मन्त्रविषयमर्थविप्रयं चेति द्वेधा सम्पद्यते तत्रानुष्टुभोऽधिके छन्दसि विस्मरणे द्वात्रिंशदक्षरपर्यन्तं मन्त्रमुच्चार्य ततो विवेचनं कार्यं न्यूने छन्दसि गायत्र्यादौ यावत् द्वात्रिंशदक्षरसम्पत्तिस्तावदभ्यस्य विविच्य अथ विस्मृतौ तु समर्थमनुष्टुप्श्लोकेन स्मारयेयुः तद्यथा षष्ठहोमस्थया कार्यस्तदनन्तरमृग्जपः ततश्च स्तोमयोगः स्यात्ततः स्तोत्र ततो जप इति एतत्सर्वं सूत्रकृतोक्तं अप्रतिभासे तस्मिन्नहन्यनुष्टुभावं ज्ञात्वाचक्षीरन् ज्यायसि छन्दसि लुप्येयुरक्षराणि कनीयस्यभ्यस्येयुरिति वाचैव ब्रूयुरिति धानञ्जयोवागनुष्टुविति हि ब्राह्मणं भवतीत्यादिना एवमनुष्टुभं सम्पाद्य च द्विवचनं तत् उक्तनतिरिक्तं अतिरिक्तमधिकन्न भवति

स्वस्माच्च आनुष्टुभत्वात् एवं विवेचनं यज्ञस्यारिष्ट्यै अहिंसायै सम्पूर्णतायै भवति ॥ ५ ॥

एवं क्रतस्वाङ्गसम्बन्धिधर्मविशेषमुक्त्वा वक्ष्यमाणस्य स्तोत्रीयां विधित्सुराह ।

अभि वा एते देवानारोहन्तीत्याज्यैं दशभिरङ्गैः स्तुवत इति पञ्चानामङ्गानामनुरूपैः प्रत्यवयन्ति यथाभ्यारुह्य प्रत्यवरोहेत्तथा तन्नवर्चो भवति या एवामूः प्रयाज्या अवदधाति ता एता उदस्यति ॥ ६ ॥

ये यजमाना अतीतैः प्रायणीयातिरात्रसहितैर्दशभिः स्तुवते एते देवानारोहन्ति क्रमेण तैरङ्गैः देवान् प्राप्नुमेतदारोहन्ति तथा चेह लोके स्थितिर्न स्यात्तदर्थं पञ्चानामङ्गानामनुरूपैः प्रत्यवयन्ति अवरोहन्ति एतत् स्तवक्रताविसृष्टं व्याख्यातं दशमस्य वक्ष्यमाणं द्वितीयप्रभृतीनां पञ्चानामङ्गानामनुरूपाः प्रथमाच्च वक्ष्यमाणं तन्नवर्चमिति तस्यायमर्थः दृष्यषडहस्य द्वितीयप्रभृतीनामङ्गां वक्ष्यमाणेषु येऽनुरूपास्तृचाः पवस्वेन्दो वृषासुत एते असृग्रमिन्दवः पवमानैरजीजनत् पवमानस्य विश्ववित् असृक्षत प्रवाजिन इत्यादिकाः तानत्राहरेत् प्रथमाच्चाङ्गः क्रतवं वक्ष्यमाणं अस्य प्रस्रामनुद्युतमित्यादिकमाहरेदिति यथा खलु दृषमारुह्य प्रत्यवरोहेत् तथा तदनुरूपैः

प्रत्यवरोहणं एवमनुरूपटचपञ्चकानन्तरं तन्नवर्चे भवति प्रथमस्याह्नो वहिष्यमानस्य अस्य प्रत्नामनुद्युतमित्यादिकं तन्नवर्चं प्रयोक्तव्यमित्यर्थः; तत्र च प्रत्यवरोहणे सूत्रकारेण बहवः पक्षाः दर्शिताः अनुरूपेषु टचाः प्रतिलोमा ऋचो नवर्चे इति गौतमः इत्येकः पक्षः, अनुरूपेषु असृक्षत प्रवाजिन इति षष्ठस्याह्नोऽनुरूपटचं प्रथममाहृत्य पञ्चमचतुर्थाद्यनुरूपं तदवरोहेणाहरेत् तदस्य प्रत्नामनुद्युतमिति तन्नवर्चेषूपाख्यो गायतानर इत्युपक्रम्य अस्य प्रत्नामनुद्युतमित्यन्तं ऋचएव प्रतिलोमाः स्युरिति गौतमपक्षस्यार्थः, अथ तथैव सूत्रकृता पुनस्त्रिपक्षाः प्रतिपादिताः सर्वत्र टचा इति धानञ्जयो यथाधीतन्नवर्चेमिति शाण्डिल्यायनः सर्वत्रर्चः प्रतिलोमा इति शाण्डिल्य इति यथानुरूपेषु टचानां प्रातिलोम्यं नवर्चे तथा नवर्चे नास्त्येव प्रातिलोम्यं यथाधीतमेव प्रयोक्तव्यमिति शाण्डिल्यायनमतं अनुरूपेषु नवर्चे च ऋचएव प्रतिलोमाः स्युर्न पुनस्टचा इति शाण्डिल्यमतं, प्रकृतमनुसरामः अथ दशरात्रं प्रारभमाणः प्रथमेऽहनि या एवामूः अस्य प्रत्नामनुद्युतमित्याद्या नवर्चः शस्याः नवरात्रस्य शस्यास्थानीयाः अवदधाति योजनाय प्रक्षिपति ता एताः शस्या इदानीमुदस्यति अङ्कां विमोचनार्थमुत्क्षिपति ॥ ६ ॥

अथ तस्मिन्नवर्चे द्वयोर्ऋचोर्लिङ्गमनूद्य स्तौति।

वाक्त्र्येका भवति यद्वै यज्ञस्य दुरिष्टमहरणो

गृह्णाति तदेव तदवयजत्यादित्यैका भवतीयं वा अदितिरस्यामेव प्रतितिष्ठति ॥ ७ ॥

एष प्रत्नेन मन्मना देवो देवेभ्य इत्यस्यामृचि कविर्विप्रेण वावृध इति कविशब्दश्रवणात् एषा वारुणी कवी नो मित्रावरुणेत्यादौ कविशब्दस्य मित्रावरुणयोर्वाचकत्वात् इत्यं वारुणी वरुणसम्बन्धिनी एकाक्षरवती यत् खलु यज्ञसम्बन्धि दुरिष्टं दुर्यजनं तद्वरुणो मन्त्रात्यादत्ते तत्र या वारुणा तदेव दुरिष्टं तदवयजति निरस्यति तथा आदित्या अदितिसम्बन्धिनी एका भवति दुहानः प्रत्नमित्ययमित्यस्यामृचि क्रन्दं देवा अजीजन इति देवजनयितृत्वं प्रतिपाद्यते तच्चादितेरेवेति लिङ्गात् एषा आदित्या इयं पुरोवर्त्तिनी भूमिरेवादितिः अदितिशब्दाभिधेया तथा चादित्यया ऋचा अस्यां पृथिव्यामेव यजमानः प्रतितिष्ठतीति ॥ ७

अथैतस्मिन् बर्हिष्यवमाने स्तोमं विधाय स्तौति ।

चतुर्विंश एव स्तोमो भवति तेजसे ब्रह्मवर्चसाय ॥ ८ ॥

यज्ञस्यमुरुपत्नेषु तन्नवर्चे च क्रियमाणे चतुर्विंशस्तोत्रीयाः सम्पद्यन्ते तत्सङ्घातात्मकचतुर्विंशस्तोम एवास्य बर्हिष्यवमानस्य भवति स च चतुर्विंशतिसंख्याद्वारा गायत्रसम्बन्धात् गायत्रस्य वा छन्दसः प्रजापतिमुखाद्ग्निना सहोत्पन्नतेजोरूपत्वाद्

ब्रह्मवर्चसस्य च तेजोऽवान्तरजातित्वात् तेजोब्रह्मवर्चसयोर्हेतु-र्भवतीत्यर्थः ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य

षष्ठः खण्डः ।

अथ अष्टमः खण्डः ।

अथास्मिन् दशमेऽहनि प्रथममाज्यस्तोत्रं दर्शयति ।

सुषमिद्धो न आवहेत्याप्रिय आज्यानि भवन्ति ॥१॥

आप्रिय इति प्रयाजानुयाजानां संज्ञा सुषमिद्धो न आवहेत्याद्या एकादशर्चो दाशतय्यामाम्नाताश्वलायनेन सूत्रकृता समिद्धो अद्येति सर्वेषां यथर्षिचेति प्रयाजयाज्यात्वेन विहिताः तस्मादेता आप्रीसंज्ञाः सुषमिद्धो न आवहेत्याद्यास्तिस्रऋचः आग्नेयं प्रथममाज्यस्तोत्रं भवति आज्यानि भवन्तीति बहुवचनं आप्रिय इति बहुत्वापेक्षया ॥ १ ॥

अथैतत्सामाप्रीसंज्ञां निर्ब्रुवन् स्तौति ।

प्रजापतिः प्रजा असृजत सदुग्धो रिरिचानो ऽमन्यत स एतान्याप्रिय आज्यान्यपश्यत्तैरात्मान-माप्रीणात् दुग्धइव वा एष रिरिचानो यो दशभि-

रक्षभिस्तुष्टुवानो यदेतान्याप्रिय आज्यानि भवन्त्यात्मानमेवैतैराप्रीणाति ॥ २ ॥

पुरा प्रजापतिः एतान्याप्रिय आज्यानि आप्रीभिर्निष्पाद्यमिष्ट आज्यस्तोत्रमपश्यत् तैराज्यैरात्मानमाप्रीणात् अलपत् आप्रीणसाधनत्वात् एतासां आप्री इति संज्ञा तच्छब्दः केवलोऽप्युत्पूर्वतिष्ठतेरर्थे वर्त्तते इत्यर्थः ॥ २ ॥

यदद्य स्वरुदित इति स्वरवन्मैत्रावरुणमन्तो वै स्वरोऽन्त एतद्गममन्नामन्त एव तदन्तेन स्तुवते प्रतिष्ठाया उत्वा मन्दन्तु सोमा इत्युद्वैन्द्रमुत्थानस्य रूपं* ॥ ३ ॥

अथ चतुर्थमाज्यस्तोत्रं दर्शयति ।

इन्द्राग्नी आगतं सुतमिति येनैव रूपेण प्रयन्ति तदभ्युद्यन्ति स्तोमः ॥ ४ ॥

इन्द्राग्नी आगतं सुतमिति ऋचः इन्द्राग्निदेवताकं चतुर्थमाज्यस्तोत्रं दशरात्रस्य प्रथमेऽह्न्यपि एतदेव चातुर्थमाज्यस्तोत्रं पूर्वं विहितं तथाच येनैव रूपेण एतत्तृचलक्षणं प्रयन्ति दशरात्रं प्रारभन्ते तदेवाभिलक्ष्योद्यन्ति दशरात्रं परिसमापयन्ति एतेषु

* अस्य ब्राह्मणस्याभाषत्वेन भाष्यञ्च पतितमनुमीयते ।

चतुर्व्वाज्यस्तोत्रेषु पूर्व्वोक्तश्चतुर्व्विंशएव स्तोमः कार्य्यः इत्थं प्रातःसवनिकानां स्तोत्राणां स्तोत्रीया ऋचो विहिताः साम एतासु प्राक्तनमेवेत्यधिगन्तव्यं ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य

अष्टमः खण्डः ।

अथ नवमः खण्डः ।

अथास्मिन् दशमेऽहनि माध्यन्दिनपवमानस्य स्तोत्रीयं ऋचं दर्शयति ।

उच्चाते जातमन्धस इत्युद्वत्यो गायत्त्रो भवन्त्युत्थानस्य रूपं ॥ १ ॥

उच्चाते जातमन्धस इत्याद्यास्तिस्रो ऋचः साधनत्वात् तासामाप्रीसंज्ञा एवञ्च यो दशभिरहर्भिस्तुष्टुवानः स्तुतवान् यजमानः एषदुग्धोरिरिचानो रिक्तो भवति यत् यान्येतान्याप्रिय आज्यानि भवन्ति आत्मानमेव एतैराज्यैराप्रीणाति तर्पयति* ॥ १

अथान्यं स्तोत्रीयं ऋचं दर्शयति ।

पुनानः सोमधार्येति पन्थानमेव तत् पर्य्यवयन्ति ॥ २ ॥

* एवञ्चेत्यादि तर्पयति इति पर्य्यन्तं भाष्यं अष्टमखण्डीयद्वितीयब्राह्मणस्य भाष्यमित्यनुभीयते ।

पुनानः सोमधारयेति वार्हतस्तृचो भवति तत्तेन पन्थानमेव पर्य्यवर्त्तन्त परिप्रापुर्वन्त सर्व्वप्रकृतिभूतेऽग्निष्टोमे उच्चाते जातमन्वस इत्यनन्तरं पुनानः सोमेति तृचो विहितः स च तत्प्रकृतित्वात् पन्था इत्युच्यते ॥ २ ॥

अथान्यं तृचं विधत्ते ।

आजाग्रविर्व्विप्रकृतम्मतोनामिति यदाग्ने प्रवतोः कुर्य्युरतिपद्येरन्यदावत्यो भवन्त्यनतिपादाय ॥ ३ ॥

आजाग्रविरिति आद्यास्तिस्रः स्तोत्रीयाः कार्य्याः यद्यदि आग्ने समाध्यमाने दशरात्रे प्रवतीः प्रतुद्रवेत्याद्याः प्रशब्दयुक्ताः कुर्य्युः यदाग्ने अतिपद्येरन् अतिदूरं गता भवेयुः प्रशब्देन प्रकर्षगमनस्य सूचनात् तस्मादावत्यः आ इत्यनेनोपसर्गेण युक्ताः स्तोत्रीयाः भवन्ति पशुवद्यजमानानामनतिपादाय अतिदूरगमनाभावाय भवति ॥ ३ ॥

अथ प्रथमे तृचे पूर्ववद्गायत्रं साम विधाय तद्ब्राह्मणस्यातिदिशति ।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ ४ ॥

उच्चा ते जातमन्धस इति तृचे गायत्रं साम गातव्यं तस्य चेमे वै लोका गायत्रमित्यादिकं यद्ब्राह्मणमाम्नातम् तदत्रापि युक्तमेवेयं ॥ ४ ॥

अथास्मिन्नेव ऋचेऽन्यत्साम विधाय स्तौति ।

आमहीयवं भवति क्लृप्तिश्चान्नाद्यञ्च क्लृप्तिश्चैवैतेनान्नाद्यञ्चाभ्युत्तिष्ठन्ति ॥ ५ ॥

आमहीयवाख्यमपि साम उच्यते जातमन्यस इत्यस्मिन्नेव ऋचे आदत्ते गेयं तच्च साम क्लृप्तिः कल्पकं सामर्थ्यप्रदं अन्नाद्यं अदनीयानुरूपञ्च तथाच क्लृप्तिश्चैवान्नाद्यञ्चाभिलक्ष्य एतेनामहीयवेन साम्नोत्तिष्ठन्ति ॥ ५ ॥

अथ सामान्तरं विधत्ते ।

आजिगं भवत्याजिजित्यायै ॥ ६ ॥

आजिगाख्यमपि साम पूर्वोक्त एव ऋचे गेयं आजिं गच्छतीत्याजिगमिति अन्वर्थसंज्ञकत्वात् तत्साम आजिजित्यायै आजिगन्तव्यभूमेर्मध्यपर्यन्तं तच्च जयाय भवति ॥ ६ ॥

एतदेव व्याचष्टे ।

आजिर्वा एष प्रततो यदेतदादग्राहस्तस्यैतदुज्जित्यै ॥ ७ ॥

यत् योऽयं द्वादशाहषष्ठः प्रततो विसृत आजिः वै यथा धावतां पुरुषाणामतिशीघ्रपरीक्षार्थं आजिः कल्पते एवमनुष्ठातॄणां

सामर्थ्यपरीक्षणाय आजिवत्कल्पित इत्यर्थः तस्य द्वादशाहस्य लक्षणस्याजेः उज्जित्यै उज्जयाय एतत्साम भवति ॥ ७ ॥

अथान्यत्साम विधत्ते ।

आभीकं भवत्यभिक्रान्त्यै ॥ ८ ॥

आभीकाख्यमपि साम उच्यते जातमन्यस्य इत्यस्मिन्नेव तृच आह्नते गेयं तच्चाभिक्रान्त्यै स्वर्गस्याभिक्रमणाय भवति ॥ ८ ॥

अथेतत् शोकापगमनहेतुरिति आख्यायिकाप्रदर्शनेन स्तौति ।

अङ्गिरसस्तपस्तेपानाः शुचमशोचꣳस्त एतत्सामापश्यꣳस्तानभीकेऽभ्यवर्षत्तेन शुचमशमयन्त यदभीकेऽभ्यवर्षत्तस्मादाभीकं यामेव पूर्वैरृद्भिः शुचꣳ शोचन्ति तामेतेनाशमयित्वोत्तिष्ठन्ति ॥ ९ ॥

अङ्गिरसस्तपस्तेपानाः तप्तवन्तः शुचमशोचन् शोकं प्राप्नुवन् ततः शोकस्य निष्कृतिं कामयमानाः एतत्सामापश्यन् तच्च साम तानृषीन् अभीके समीपेऽभ्यवर्षदभिप्राप्नोत् तेन समीपं गतेन साम्ना तेऽङ्गिरसः शुचमशमयन्त अपाहन् यस्मादेतत् सामाभीकेऽभ्यवर्षत् तस्मादाभीकसम्बन्धादस्य साम्नः आभीकमिति नाम सम्पन्नं यस्मादेवं तस्मात् यामेव शुचं शोकं पूर्वैरृद्भिः प्रायणीयाद्यैरनुष्ठितैः शोचन्ति शोकं प्राप्नुवन्ति तां

ध्रुवं ग्रोक्षं एतेनाभीकेन साम्ना अत्राग्निन् काले शमयित्वा अपहत्योत्तिष्ठन्ति यागादुत्थानं कुर्वन्ति यागं समापयन्तीति यावत् ॥ ९ ॥

अथ त्रयाणामन्यत्साम विधत्ते ।

उत्सेधो भवति ॥ १० ॥

उत्सेधाख्यं साम पुनानः सोमधारयेत्यस्मिन्नृचे गेयं ॥ १० ॥

अथैतत् स्तौति ।

उत्सेधेन वै देवाः पशूनुदग्रेधन्निषेधेन पर्य्यगृह्णन् ॥ ११ ॥

उत्सेधाख्येन साम्ना पर्य्यगृह्णन् पर्य्यवेष्टयन् एतेन निषेधाख्यमपि सामाग्निन्नेव ऋचे गेयमिति विहितं भवति ॥ ११ ॥

अथैतयोः साम्नोर्मध्ये सामान्तरस्य गानं विधत्ते ।

अन्तरोत्सेधनिषेधौ यज्ञायज्ञीयं ॥ १२ ॥

उत्सेधनिषेधावन्तरावुत्सेधनिषेधयोः साम्नोर्मध्ये यज्ञायज्ञीयं साम पुनानः सोमेति ऋचे गेयं प्रथममुत्सेधं गीत्वा ततो यज्ञायज्ञीयं ततो निषेधं गायेदित्यर्थः ॥ १२ ॥

अथैतस्य यज्ञायज्ञीयस्य उत्सेधनिषेधयोरन्तराले करणं स्तौति ।

पशवोऽन्नाद्यं यज्ञायज्ञीयं पशूनेव तदन्नाद्यमुत्सेध-निषेधाभ्यां परिगृह्णाति ॥ १३ ॥

यदेतद्यज्ञायज्ञीयं साम एतत्पशव: पशुात्मकं अन्नाद्यरूपञ्च तत्तस्मात्पशूंश्चैवान्नाद्यञ्च उत्सेधनिषेधाभ्यामुभयतो वर्त्तमानाभ्यामिति परितोवघ्नाति ॥ १३ ॥

अथैतद्यज्ञायज्ञीयस्य माध्यन्दिनपवमाने गानं स्वर्गसाधनमिति स्तौति ।

माध्यन्दिने वै पवमाने देवा यज्ञायज्ञीयेन यज्ञं संस्थाप्य स्वर्गं लोकमारोहꣳस्तद्य एवं वेद माध्यन्दिन एवैतत्पवमाने यज्ञायज्ञीयेन यज्ञꣳसꣳस्थाप्य स्वर्गं लोकमारोहति ॥ १४ ॥

पुरा देवा: माध्यन्दिनपवमान एव यज्ञायज्ञीयेन साम्ना स्तुत्वा यज्ञं संस्थाप्य परिसमाप्य स्वर्गं लोकमारोहन् यज्ञायज्ञीयेन हि साम्ना प्रकृतिभूतस्याग्निष्टोमस्य समापनात् यत्र कुत्रापि क्रियमाणमेतत्साम समाप्तिहेतुर्भवति तत्तथाच यो यजमान: एवमुक्तं ब्राह्मणार्थं वेद जानाति एतत् एष वेदिता माध्यन्दिने पवमान एव यज्ञायज्ञीयेन साम्ना यज्ञं समाप्य स्वर्गं लोकमारोहति ॥ १४ ॥

यदुक्तं अस्मिन् दशमेऽहनि अनुष्टुप् परोक्षमुपेतोद्यन्ति तदप्यनेन साम्ना सिध्यतीत्याह ।

अथो परोक्षमनुष्टुभं सम्पद्यते परोक्षा वै प्रत्यक्ष-मनुष्टुब्यद्यज्ञायज्ञीयं तद्यत्तृतीयसवने कुर्युः प्रत्यक्ष-मनुष्टुभमृच्छेयुस्तस्मान्माध्यन्दिने कुर्वन्ति तेन परोक्षमनुष्टुभमुपयन्ति ॥ १५ ॥

अथोऽपि च एतदृशममहः परोक्षं परोक्षेण वर्त्तमानमनुष्टुभं सम्पद्यते सम्प्राप्नोति कथमिति तदुच्यते एषा वै प्रत्यक्षं प्रत्यक्षेण वर्त्तमानानुष्टुप् यद्यज्ञायज्ञीयाख्यं साम वाङ्निधनत्वात् वागनुष्टुबिति हि ब्राह्मणं तत्सामानुष्टुप्संस्तुतं यज्ञायज्ञीयं यद्यदि तृतीयसवने कुर्युः प्रयुञ्जीरन् प्रत्यक्षमनुष्टुभं अस्मिन् दृशमेऽहनि ऋच्छेयुः प्राप्नुयुः तच्च न कार्य्यमित्युक्तं तस्मान्माध्यन्दिने पवमाने यज्ञायज्ञीयं कुर्युः तथाच स्तोत्रमध्ये सामान्तरैर्निगूढत्वात् परोक्षं परोक्षेणैव वर्त्तमानमनुष्टुभमुपयन्त्युपगच्छन्ति ॥ १५

अथान्तिमे तृचे गेयं साम दर्शयति।

गौरीवितं भवति ॥ १६ ॥

आजाग्टविर्विप्रकृतस्मृतीनामिति तृचे गौरीवितं साम गेयं ॥ १६ ॥

अथैतस्य माध्यन्दिने करणं स्तौति।

एतद्वै यज्ञस्य प्रस्तनं यद्गौरीवितमेतदायतनो

यजमानो यन्मध्यन्दिनो यज्ञौरीवितम्मध्यन्दिने भवति ध्रुवत्वमेव तद्यजमान आत्मन्धत्ते स्तोमः ॥ १७ ॥

ध्रुवत्वमेव तद्यजमान आत्मन् आत्मनि यस्मिन् धत्ते धारयति एवं गायत्यादि गौरीवितान्तेष्वष्टसु सामसु प्रत्येकं तृचे गीयमानेषु चतुर्विंशतिस्तोत्रीयाः सम्पद्यन्ते तथाच तत्सङ्घातात्मकचतुर्विंशएव स्तोमस्य पवमानस्य स्तोत्रमस्य भवति ॥ १७ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य

नवमः खण्डः ।

अथ दशमः खण्डः ।

अथ प्रथमस्य पृष्ठस्य स्तोत्रीयं तृचं दर्शयति ।

कयानश्चित्र आभुवदिति कवत्यस्तेन प्राजापत्याः को हि प्रजापतिः प्रजापतेराप्त्यै ॥ १ ॥

कयानश्चित्र इत्याद्यास्तिस्रः स्तोत्रीयाः प्रथमस्य पृष्ठस्तोत्रस्य सम्भवति तासु कवत्यः कशब्दोपेताः तेनैव कारणेन प्रजापतिदेवताकाः हि यस्मात्प्रजापतिः कः कशब्दाभिधेयः एवञ्चैताः स्तोत्रीयाः प्रजापतेराप्त्यै प्राप्त्यै सम्पद्यन्ते ॥ १ ॥

अथ द्वितीयस्य पृष्ठस्य स्तोत्रीयं तृचं दर्शयति ।

माचिदन्यद्विशंसतेत्युत्थानमेतदाशिषो ह्येतर्हि ॥२

माचिदन्यद्विशंसतेति ऋचः मैत्रावरुणपृष्ठस्तोत्रीयाः अन्यन्माचिद्विशंसन्त स्तुतशस्त्रान्तरमावृतेति शंसनादुपरमस्य प्रतिपाद्यमानत्वात् एतदुत्थानस्य योगान्निर्गमनस्य रूपं एतर्हि एतस्मिन् दशमस्याह्नोऽनुष्ठानकाले एतदाशिषो हि एतदुत्थानमाशीः आशीर्यं फलं येषां तथाविधाः खलु यजमानाः भवन्ति तस्मादेतस्मिन्नहन्ययं ऋचः सङ्गत इत्यर्थः ॥ २ ॥

अथ तृतीयस्य पृष्ठस्तोत्रीयं ऋचं दर्शयति ।

उदुत्ये मधुमत्तमा इत्युदृत्य उदयनीयेऽहन्येतदाशिषोह्येवैतर्हि ॥ ३ ॥

उदुत्ये मधुमत्तमा इत्याद्यास्तिस्र ऋचो ब्रह्मसाम्नः स्तोत्रीया भवन्ति ताश्चोदृत्य उच्छब्दयुक्ता उदयनीये दशरात्रस्य समापके दशमेऽहनि सम्बन्धयोग्या गतमन्यत् ॥ ३ ॥

अथ चतुर्थस्य पृष्ठस्य स्तोत्रीयं ऋचं दर्शयति ।

तरोभिर्वो विदद्वसुमिति स्तोमो वै तरो यज्ञो विदद्वसुः स्तोमेन वै यज्ञो युज्यते यत्तरोभिर्वो विदद्वसुमित्याह यज्ञमेव तद्युनक्ति ॥ ४ ॥

तरोभिर्वो विदद्वसुमिति ऋचोऽछावाकपृष्ठसाम्नः स्तोत्रीय-

ऋचः स्तोमो वै देवेषु तरो नामास्तोदित्यादिना पूर्वप्रतिपादितत्वात् स्तोमो वै तरः तरशब्देन स्तोम एवोच्यते विदद्वसुशब्देन च यज्ञः स्तोमेन खलु विदद्वादिना यज्ञो युज्यते संयुक्तो भवति एवञ्च तरोभिर्वो विदद्वसुमिति यदाह तत्तेन यज्ञमेव स्तोमेन युनक्ति योजयति ॥ ४ ॥

अथ प्रथमपृष्ठस्तोत्रनिवर्त्तकं साम विधत्ते ।

वामदेव्यस्यर्क्षु रथन्तरं पृष्ठं भवति गायत्री वै रथन्तरस्य योनिः स्वायामेव तद्योनौ रथन्तरं प्रतिष्ठापयति ॥ ५ ॥

वामदेव्यस्य साम्नो योनिभूतास्वृक्षु कयानश्चित्र इत्याद्यासु पूर्वं विहितासु रथन्तरं साम पृष्ठस्तोत्रं भवति अथैतासु कयानश्चित्र इत्याद्यासु गायत्रीषु रथन्तरस्य करणं युक्तमित्याह गायत्री खलु रथन्तरस्य योनिः उत्पत्तिकारणं प्रजापतिर्वा एतां गायत्रीं योनिमपश्यत्स आदीधीतेत्यादिना तथैव पूर्वं प्रतिपादितत्वात् तत्तथा स्वायां स्वकीयायां रथन्तरं जननहेतावेव योनौ कयानश्चित्र इत्यस्यामृचि तत् साम प्रतिष्ठापयति ॥५॥

अथ ऋक्सामस्तोमानां समुदायमवत्यं प्रशंसति ।

तेजो वै गायत्री छन्दसां तेजो रथन्तरꣳ साम्नां

तेजश्चतुर्विंशस्तोमानां तेज एव तत्सम्यक् सन्दधात्य-पि ह पुत्रस्य पुत्रस्तेजस्वी भवति ॥ ६ ॥

तेज एव खलु गायत्री छन्दसामग्ने तथा साम्नामग्ने रथन्तरं तेजः उभयोरग्निना सह प्रजापतिमुखादुत्पत्तेस्तेजस्वं स्तोमानां मध्ये चतुर्विंशाख्यस्तोमस्तेजः चतुर्विंशतिसंख्यायोगेन तस्य गायत्रीसम्बन्धात्तस्याश्च तेजस्त्वमुक्तं तथाच गायत्यादीन्येतानि त्रीणि संयोजयन् तेजएव सम्यक् समीचीनं सन्दधाति संयोजयति एव प्रयोक्तुर्यजमानस्य यः पुत्रः तस्य पुत्रोऽपि तेजस्वी भवति ॥ ६ ॥

अथैतस्य रथन्तरस्य प्रथमस्तोत्रीयाणां पूर्वं विहितं प्रस्तावभागपरिमाणमभित्वा स्फूरेत्यस्यामेव कयानश्चित्र इत्यस्यामपि तथैव भवितव्यमनूद्य स्तौति ।

अष्टाक्षरेण प्रथमाया ऋचः प्रस्तौत्यष्टाश्रफाऽस्त्यश्वानवरुन्धे ॥ ७ ॥

अष्टाक्षरेण कयानश्चित्र आभुवदित्यनेन पादेन प्रथमायां स्तोत्रीयायामृचं प्रस्तौति क्रियाग्रहणं कर्त्तव्यमिति कर्मणः संप्रदानसंज्ञा चतुर्थ्यर्थे षष्ठी यस्मादेवमष्टाक्षरेण प्रथमायाः प्रस्तावस्तस्मात् अष्टाश्रफान् अष्टौ श्रफाः खुरा येषां तथाविधान् पशूनवरुन्धे यजमानो लभते ॥ ७ ॥

अथ द्वितीयतृतीययोः स्तोत्रीययोः प्रस्तावभागं पूर्ववदनूद्य स्तौति।

द्यक्षरेणोत्तरयोर्ऋचोः प्रस्तौति द्विपाद्यजमानो यजमानमेव यज्ञे पशुषु प्रतिष्ठापयति ॥ ८ ॥

उत्तरयोः कस्त्वासत्यो मदानामित्यादिकयो र्ऋचोरादितो द्यक्षरेण प्रस्तावः कार्यः; स्पष्टमन्यत् ॥ ८ ॥

अथैतद्रथन्तरं ऋद्धिसाधनत्वेन स्तौति।

गायत्रं वै रथन्तरं गायत्रछन्दो यद्गायत्रीषु रथन्तरं भवति तेन स्वायाञ्जनतायामभ्रीतोमे वै लोका-गायत्री यद्गायत्रीषु रथन्तरं भवतीमानेव तल्लोकान् समाप्योत्तिष्ठन्ति ॥ ९ ॥

रथन्तरं साम गायत्रं वै गायत्र्याः सम्बन्धि प्रजापतेर्वा एतद्गायत्रीमित्यादिना रथन्तरस्य गायत्रीसकाशात् सृष्टेः प्रतिपादितत्वात् तथाच रथन्तरं गायत्रीछन्दस्कं च्छन्दसाम्मध्ये गायत्र्याख्यं छन्दो यस्य सम्बन्धि तत्तथोक्तं दाशरातिके प्रथमे गायत्रेऽहनि रथन्तरपृष्ठस्तोत्रतया सम्बन्धात् गायत्रछन्दस्कं एवञ्च यद्गायत्रीषु कयानश्चित्रेत्याद्यासु रथन्तरं साम भवति तेन कारणेन स्वीयां स्वकीयायामेव जनतायां जनसमूहे यजमानः अभ्रीतोति अभिदृब्धो भवति अपिच इमे वै पृथिव्यादयस्त्रयोलोका

गायन्ती शिष्टं विघ्नप्रायं, समाप्य सम्यक् प्राप्य उत्थानं कुर्वन्ती-त्यर्थः ॥ ९ ॥

अथ मैत्रावरुणपृष्ठनिवर्त्तकं साम विधत्ते ।

मैधातिथं भवति ॥ १० ॥

मेधातिथिना दृष्टं साम मैधातिथं तन्माचिदन्यद्विसंसतेत्यृक्संज्ञे गेयं ॥ १० ॥

अथैतद्दृषिसम्बन्धप्रदर्शनेन पशुप्राप्तिसाधनमित्याह ।

एतेन वै मेधातिथिः काण्वोविभिन्दुकाद्व्यूहीर्गा उदसृजत पशूनामवरुध्यै मैधातिथं क्रियते ॥११॥

काण्वः कण्वगोत्रो मेधातिथिर्नाम ऋषिः एतेन साम्ना साधनेन विभिन्दुकात् विभेदनशीलादेतत्संज्ञकादसुरात् व्यूहीः विरुद्धोधस्का गा उदसृजत उद्गमयत् तस्मादेतन्मैधातिथं पशु-प्राप्त्यर्थमेवेदानीं क्रियते ॥ ११ ॥

अथ तृतीयस्य पृष्ठस्य निवर्त्तकं साम दर्शयति ।

अभीवर्त्तो ब्रह्मसाम भवत्येकाक्षरणिधनः प्रतिष्ठायै ॥ ११ ॥

अभीवर्त्ताख्यं साम उदुत्ये मधुमत्तमा इत्यृक्संज्ञे ब्रह्म-

साम ब्रह्मणः पृष्ठस्तोत्रनिवर्त्तकं साम कार्यं सचाभीवर्त्तः एकाक्षरनिधनः वा २ ३ ४ ५ इति ऋचस्याभ्यमक्षरनिधनं यस्य स तथोक्तः सोऽयं प्रतिष्ठायै यजमानस्य प्रतिष्ठानाय भवति ॥ १२ ॥

कथं प्रतिष्ठाहेतुतेत्यत आह ।

एकाक्षरा वै वाग्वाच्येव प्रतिष्ठायोत्तिष्ठन्ति ॥१३॥

वागित्येकेनाक्षरेणाभिधेया हि वाक् तस्याश्च प्रतिष्ठाहेतुत्वं राजसु दृष्टं तथाच वाच्येव प्रतिष्ठाया ऋच उत्तिष्ठन्ति ॥ १३ ॥

अथ चतुर्थं पृष्ठस्तोत्रनिवर्त्तकं साम दर्शयति ।

कालेयमच्छावाकसाम भवति ॥ १४ ॥

कालेयाख्यं साम तरोभिर्वो विदद्वसुमित्यस्मिंसूचे गीयमानमच्छावाकस्य पृष्ठसाम भवति ॥ १४ ॥

अथास्मिन्नहनि रथन्तरकालेययोः प्रयोगं संकृत्य स्तौति ।

समानलोके वै कालेयञ्च रथन्तरञ्चेयं वै रथन्तरं पशवः कालेयमस्याञ्चैव पशुषु च प्रतिष्ठायोत्तिष्ठन्ति स्तोमः ॥ १५ ॥

कालेयञ्च रथन्तरञ्चैते सामनी समानलोके वै समानस्थाने खलु यस्मिन्नहनि रथन्तरं साम पृष्ठं तत्र कालेयमप्यच्छावाकसामत्वेन प्रयुक्तं यत्र रथन्तरपृष्ठे प्रकृतौ ज्योतिष्टोमे दाशरथ

त्रिके प्रथमेऽहनि च अतोऽस्य दशमस्याह्नो रथन्तरपृष्ठत्वात् कालेयमपि प्रयोज्यं दृयं वै सर्वैरनुभूयमाना पृथिव्येव रथन्तरं पशव इव कालेयं तत्साधनत्वात् तथाच अस्यामेव पृथिव्यां पशुषु च प्रतिष्ठाय प्रतिष्ठिताभूता उत्तिष्ठन्ति सत्रादुत्थानं कुर्वन्ति एतेषु पृष्ठस्तोत्रेषु पूर्व्योक्तः चतुर्विंश एव स्तोमः कार्य्यः ॥ १५ ॥

इति ताण्डमहाब्राह्मणे पञ्चदशाध्यायस्य

दशमः खण्डः ।

अथ एकादशः खण्डः ।

अथास्मिन् दशमेऽहन्यार्भवपवमानस्य स्तोत्रीयं प्रथमं तच्च दर्शयति ।

स्वादिष्ठया मदिष्ठयेति गायत्री भवति मदवदेव रसवत्तृतीयसवनम्मादमेव तदृसं दधाति ॥ १ ॥

स्वादिष्ठयेति आर्भवस्य स्तोत्रीया गिष्ट सिञ्चं ॥ १ ॥

अथास्मिन्नृचे पूर्ववद्गायत्रं साम विधाय तद् ब्राह्मणमर्थतिदिशति ।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणं ॥ २ ॥

सिञ्चमेतत् ॥ २ ॥

अथाग्निमेव त्वचेऽन्यत्साम विधत्ते।

संहितं भवति द्व्यक्षरणिधनं प्रतिष्ठायै प्रतिष्ठायैवोत्तिष्ठन्ति ॥ ३ ॥

संहिताख्यं साम स्वादिष्ठयेत्यस्मिंस्तृचे गेयं तच्च द्व्यक्षरणिधनं द्वे अक्षरे निधनं यस्य तत्तथोक्तं तच्च पादद्वयसाम्यात् प्रतिष्ठायै भवति तथाच प्रतिष्ठायैवोत्तिष्ठन्ति ॥ ३ ॥

अथान्यत्साम विधत्ते।

सफं भवति ॥ ४ ॥

पवस्व मधुमत्तम इत्यस्मिंस्तृचे सफाख्यं साम गेयं ॥ ४ ॥

अथैतस्य सफसंज्ञान्निर्ब्रुवन् लोकत्रयप्राप्तिहेतुतामाह।

सफेन वै देवा इमान् लोकान् समाप्नुवन्यत्साम्ना-प्नुवंस्तत्साफस्य सफत्वमिमानेवैतेन लोकान् समाप्योत्तिष्ठन्ति ॥ ५ ॥

सफाख्येन खलु साम्ना पुरा देवा इमान् लोकान् समाप्नुवन् संप्राप्ताः यद्यस्मात् अनेन साम्नाप्नुवन् तत्तस्मात् सफाख्यस्य साम्नः सफत्वं सफमिति नाम जातं संपूर्वादाप्नोतेर्वर्णव्यापत्त्या सफशब्दनिष्पत्तिरित्यर्थः ततश्चेदानीन्तना अपि यजमानाः एतेन सफेनेमानेव लोकान् समाप्य सम्यक्प्राप्य यज्ञादुत्तिष्ठन्ति ॥ ५ ॥

अथान्यस्मिन् सामान्तरं विधाय तत् स्तावकं ब्राह्मणमतिदिशति।

रोहितकूलीयं भवति यदेव रोहितकूलीयस्य ब्राह्मणं ॥ ६ ॥

रोहितकूलीयाख्यं साम इन्द्रमच्छेत्यस्मिंस्तृचे गेयं तस्य च रोहितकूलीयस्य एतेन वै रोहिताभ्यां रोहितकूल आजिमजयदित्यादिकं यद्ब्राह्मणं पूर्वमाम्नातं तदस्यापि रोहितकूलीयस्य ब्राह्मणं ॥ ६ ॥

अथ सामद्वयं विधत्ते।

श्यावाश्वान्धीगवे भवतः समीच्यौ विराजौ दधात्यन्नाद्याय ॥ ७ ॥

श्यावाश्वान्धीगवे सामनी भवतः ते च प्रकृतौ पुरोजिती वो अन्धस इत्यस्मिंस्तृचे गीयेते तत्र च पद्यावा अन्या विराडुच्यत इति विराट् द्वयं पूर्वमुक्तं एवञ्चैते सामनी प्रयुञ्जानः समीच्यौ सञ्चते ते एवं विराजौ दधाति किमर्थमन्नाद्यार्थं ॥ ७ ॥

अथैतयोराधारभूताः ऋचो विधत्ते।

पिपीलिकमध्यासु स्तुवन्ति ॥ ८ ॥

पर्वसु प्रधन्व वाजसातय इत्याद्यास्तिस्रोऽनुष्टुभः पिपीलिक-

मध्याक्षिपदाः प्रथमतृतीयौ पादौ द्वादशाक्षरौ मध्यमोऽष्टाक्षर इति पिपीलिकमध्या मध्यं यथा अल्पीयो भवति एवं न्यूनाक्षरत्वेन मध्यमपादस्याल्पीयस्त्वात् पिपीलिकमध्या तासु स्तोमाश्वान्त्वीगवाभ्यां स्तुवन्ति ॥ ८ ॥

अथैतासु गानं स्तौति।

इन्द्रो वृत्रं हत्वा नास्तृपीति मन्यमानः परां परावतमगच्छत्स एतामनुष्टुभं व्यौहत्तामध्ये व्यवासर्पदिन्द्रगृहे वा ऐषोभये यजतेऽभय उत्तिष्ठति यएवं विद्वानेतासु स्तुते ॥ ९ ॥

इन्द्रो वृत्रमसुरं हत्वा नास्तृपि नाहिंसिषं वृत्रमिति मन्यमानः मन्वानः तस्माद्भीतः सन् परां परावतं पलायमानोऽत्यन्तं दूरं प्राप्नोत् गत्वा च स इन्द्रः एतां पिपीलिकमध्यामनुष्टुभं व्यौहत् विशेषेणाहृतवान् ततस्तस्यामध्ये व्यवासर्पत् अभयार्थं प्राविशत् अतो यो यजमानः एवं ब्राह्मणार्थं विद्वान्जानन् एतासु पिपीलिकमध्यानुष्टुप्सु एताभ्यां सामभ्यां स्तुते ऐषोभये भयरहिते इन्द्रगृहे यजते तथा अभय एव स्थान उत्तिष्ठति ॥ ९ ॥

अथ सामान्तरं विधत्ते।

यज्ञायज्ञीयनिधनꣳ सौहविषं भवति यज्ञायज्ञीयादेव तत्तृतीयसवने न यन्ति ॥ १० ॥

यन्नायन्नीयस्य वागिति निधनं तदेव निधनं यस्य तथाविधं सौहविषं साम परिप्रधन्नेत्यस्मिंस्तृचे गेयं तथाच तृतीयसवने यन्नायन्नीयादेव साम्नो न यन्ति नापगच्छन्ति तृतीयसवनं हि यन्नायन्नीयस्य स्थानं तच्चैतस्मिन्नहनि माध्यन्दिन एव पवमाने प्रयुक्तं तृतीयसवनेऽपि तदेकदेशस्य निधनस्य प्रयोगात् यन्नायन्नीयमेव तृतीयसवने कृतं भवति ॥ १० ॥

अथान्यत्साम विधत्ते।

वाजजिन्नवति ॥ ११ ॥

वाजजिदाख्यं साम सूर्यस्येव रश्मय इत्यस्मिंस्तृचे गेयं ॥ ११ ॥

वाजोऽन्नं जनयेत्यनेनेति निर्वचनमभिप्रेत्य स्तौति।

सर्वस्याप्त्यै सर्वस्य जित्यै सर्वं वा एते वाजं जयन्ति ये दशममहरागच्छन्त्यन्नं वै वाजोऽन्नाद्यस्यावरुध्यै ॥ १२ ॥

एतदिन्द्रायेन्दो मरुत्वत इति मरुत्वत्यो गायत्यो भवन्तीत्यस्मिन् खण्डे व्याख्यातं ॥ १२ ॥

अथास्य साम्नो निधनपरिमाणं विधाय स्तौति।

दशाक्षरन्निधनमुपयन्ति दशरावस्य धृत्यै दशाक्षरा विराड्वैराजमन्नमन्नाद्यस्यावरुध्यै ॥ १३ ॥

दशाक्षराणि निधनानि यस्य तत्तथोक्तं तच्च दशाक्षरनिधनं अक्षरशो दशरात्रस्य दशानामह्नां धारणाय भवति शिष्टं सिद्धं ॥ १३ ॥

अथैतस्याधारभूतौ विधाय स्तौति ।

सूर्य्यवतीषु स्तुवन्त्यतो वै सूरोऽन्न एतद्दशममहामन्नएवं तदन्नेन स्तुवते प्रतिष्ठायै ॥ १४ ॥

सूर्य्यस्येव रश्मय इत्याद्यासु सूर्य्यशब्दयुक्तासु तिसृषु ऋक्षु स्तुवन्ति शिष्टं सुषमिद्धो न आवहेत्याग्रिय आज्यानीत्यत्र व्याख्यातं ॥ १४ ॥

तथैवास्यैव लिङ्गद्वयमनूद्य स्तौति ।

उपवत्यो भवन्ति प्रतिष्ठायै परिवत्यो भवन्ति सर्वस्य पर्य्याप्त्यै ॥ १५ ॥

उपोमतिः पृच्छ्यते सिच्यतेममित्युपशब्दयोगादेता उपवत्यो भवन्ति उपशब्दस्योपगमनद्योतक इति ता यजमानस्य प्रतिष्ठायै भवन्तीति तथा मधुमां द्रप्सः परिवारमर्षतीति परिशब्दवत्यः परिवत्यो भवन्ति तथाच सर्वस्य फलस्य पर्य्याप्त्यै संपूर्णतायै ॥ १५ ॥

एवं गायत्रादि बाजजिदन्तेष्वष्टसु सामसु प्रत्येकं तत्त्वे

गीयमानेषु यः स्तोमः तम्पद्यते स एवास्य पवमानस्य स्तोत्रस्य स्तोम इत्याह।

चतुर्विꣳशएव स्तोमो भवति तेजसे ब्रह्मवर्चसाय॥ १६॥

स्पष्टोऽर्थः॥ १६॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य

एकादशः खण्डः।

अथ द्वादशः खण्डः।

अथास्मिन्नहन्यन्तिमं स्तोत्रीयं दर्शयति।

विराट्सु वामदेव्यमग्निष्टोमसाम भवति शान्त्यै क्लृप्त्यै॥ १॥

अग्निन्नरोदीधितिभिररण्योरित्याद्यासु विराट्सु वामदेव्यं गीयमानं अग्निष्टोमसाम भवति तच्च शान्त्यै परितापशमनाय क्लृप्त्यै कल्पनाय सामर्थ्याय च भवति॥ १॥

तथैतस्मिन् स्तोत्रे सप्तसामस्तोमान् संहृत्य स्तौति।

सप्तै वामदेव्यꣳसाम्नाꣳ सप्तविराट् छन्दसाꣳ मन्त्रयस्त्रिꣳशः स्तोमानाꣳ सतामन्तान् सम्पायोत्तिष्ठन्त्यपि पुनस्य पुनः सप्तमश्नुते॥ २॥

सात्राम्नाम्ये वामदेव्यं साम सत् उत्कृष्टं तथा विराट् छन्दसां मध्ये स्तोमानामाम्ये त्रयस्त्रिंश एवैतान् सह प्रयुञ्जानः सतामुत्कृष्टानामन्तान् पर्य्यन्तान् सन्धाय संहृत्य एकीकृत्य सत्रादुत्तिष्ठन्ति अपि वास्य यः पुत्रः तस्य पुत्रोऽपि सत्त्वं सङ्गावमश्नुते प्राप्नोति ॥ २ ॥

यथास्य दशरात्रस्य समापने ब्रह्मवादिभिः कृतश्लोत्थमुङ्काव्य परिहरति।

ब्रह्मवादिनो वदन्ति यतः सत्रादुदस्थाता ३ स्थिता ३दिति यद्यत इति ब्रूयुरप्रतिष्ठाना अप्रजसो भविष्यन्तीत्येनान् ब्रूयाद्यत् स्थितादिति ब्रूयुः स्थायुकैषाꣳ श्रीर्भविष्यति न वसीयाꣳसो भविष्यन्तीत्येनान् ब्रूयात् पूर्णादेव पूर्णमभ्युदस्थामेति ब्रूयुः ॥ ३ ॥

ब्रह्मवादिनो वेदार्थचिन्तकाश्चोदयन्ति किमेते यजमानाः यतो गच्छतः सत्राद्दशरात्रादुदस्थाता उत्तिष्ठन्ति उत स्थितात् सत्रादिति यद्यपि यतो गच्छतः सत्रादुदस्थाता इति ब्रूयुः तथापि गमनशीलाद्ध्रुवादुत्थितत्वात् यजमाना अप्रतिष्ठानाः प्रतिष्ठानरहिताः गन्तुकामाः अप्रजसः प्रजारहिताश्च भविष्यन्तीत्येनान् यजमानानभिद्रुह्यः प्रतिब्रूयात् यद्यदि स्थिताच्चिरस्थितात् सत्रादुदस्थातेति ब्रूयुस्तर्ह्येषां श्रीः स्थायुका स्थानशीला भविष्यति नोत्तरोत्तरं वर्द्धते अत एतेन वसीयांसो वसुमत्तरा स्ते

भविष्यन्तीत्येनान् यजमानान् प्रतिब्रूयात् एवं पक्षद्वयेऽपि दोषदर्शनात् पूर्णादेव पूर्णमभ्युदस्यामेति ब्रूयुः ॥ ३ ॥

एतद्व्याचष्टे ।

एते वै पूर्णात् पूर्णमभ्युत्तिष्ठन्ति ये वामदेव्येन स्तुत्वोत्तिष्ठन्ति ॥ ४ ॥

एते खलु पूर्णात् अधिकात् पूर्णमधिकमभिलक्ष्य सत्राद्युत्तिष्ठन्ति ये वामदेव्येन साम्ना स्तुत्वोत्तिष्ठन्ति ॥ ४ ॥

वामदेव्यस्य च पूर्णत्वमुपपादयति ।

अन्तरिक्षं वै वामदेव्यमन्तरिक्षेणेदꣳ सर्वं पूर्णं ॥ ५ ॥

अन्तरिक्षेण च इदं सर्वं जगत् पूर्णं सर्वव्यापकान्तरिक्षात्मकत्वात् वामदेव्यस्य पूर्णत्वमित्यर्थः ॥ ५ ॥

एवं साम्नः सत्रद्वित्वहेतुमुक्त्वा स्तोमस्यापि सत्रद्वित्वहेतुमाह ।

एष वै सत्रद्वः स्तोमो यत् त्रयस्त्रिꣳशस्त्रयस्त्रिꣳशदक्षरासु सत्रद्वावेव प्रतितिष्ठन्ति ॥ ६ ॥

यत्त्रयस्त्रिंशः स्तोमः एष वै खलु सत्रद्वः पूर्णः स्तोमः त्रिष्टादिभ्यः पञ्चभ्यः स्तोमेभ्योऽधिकत्वात् स च त्रयस्त्रिंशः स्तोमः त्रयस्त्रिंशदक्षरास्वग्निर्वर इत्याद्यासु विराट्सु निष्पद्यते तत्राप सत्रद्वावेव यजमानाः प्रतितिष्ठन्ति ॥ ६ ॥

अथैता ऋचः सर्व्वछन्दोरूपेण स्तौति ।

सर्वेषां वा एताश्छन्दसाꣳ रूपं यत्त्रिपदास्तेन गायत्यो यदेकादशाक्षराणि पदानि तेन त्रिष्टुभो यद् द्वादशाक्षरं पदं तेन जगत्यो यत् त्रयस्त्रिꣳशदक्षरास्तेन विराजस्तेनो अनुष्टुभो न त्र्येकस्मादक्षराद्विराधयन्ति ॥ ७ ॥

एता अग्निन्नरोदीधितिभिरित्याद्याः सर्व्वेषां गायत्यादीनां छन्दसां रूपं यद्यस्मादेतास्त्रिपदास्तेन गायत्यो भवन्ति यद्यस्मादासां एकादशाक्षराणि पदानि एकादशाक्षराः पादाः तेनैतास्त्रिष्टुभः यद्यस्मात् द्वादशाक्षरं पदं अक्षरव्यूहेन प्रथमः पादो द्वादशाक्षरो भवति तेनैता जगत्यः यद्यस्मादेतास्त्रयस्त्रिंशदक्षराः तेनैताविराजः तेनैव चानुष्टुभः तत्रानुष्टुप् द्वात्रिंशदक्षराणामनुष्टुप्त्वमिति नत्र्येकस्मादिति न खल्वेकस्मादक्षरादधिकात् न्यूनाद्वा छन्दांसि विराधयन्ति विभिद्यन्ते अतो अधिकमप्येकमक्षरमासामनुष्टुप्त्वं न चान्तर इत्यर्थः ॥ ७ ॥

अथैतस्य स्तोत्रस्य विधित्सितं पूर्व्वं सुतं स्तोमं विधाय स्तौति ।

त्रयस्त्रिꣳशएव स्तोमो भवति प्रतिष्ठायै देवतासु वा एष प्रतिष्ठितः ॥ ८ ॥

अस्याग्निष्टोमसाम्नः त्रयस्त्रिंशएव स्तोमः कार्यो न प्रकृतश्चतुर्विंशः त्रयस्त्रिंशत्संज्ञाकासु देवतासु खलु एष त्रयस्त्रिंशः प्रतिष्ठितः तस्मात् त्रयस्त्रिंशएवान्ततः प्रयोक्तव्य इत्यर्थः।

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ८॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य द्वादशः खण्डः।

पञ्चदशोऽध्यायः समाप्तिमगमत्।

षोड़शोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

एवं द्वादशाहस्य व्यूढस्य दशरात्रस्य स्तोमलक्षणिरुक्ता समूढस्य तु कल्पकारेण लक्षणावगन्तव्या स च व्यूढो दशरात्रो हीनात्मकः सत्रात्मकस्य उभयलिङ्गसद्भावात् एकोदीच्येतैकस्यैव दीक्षाविधानं द्वादशाहेन यजत इति यजतिचोदना अतिरिक्तं वा एतदतिरिक्तेन स्तुवन्ति यद्गौरीवितेनाहीनानिति अहीनत्वस्य सिद्धवदनुवादः यजमानं वा अनुप्रतितिष्ठन्तमुद्गाता प्रतितिष्ठतीति ऋत्विग्यजमानयोर्भेददर्शनं यजमानमेवैतया वर्धयन्तीति एकस्यैव यजमानस्य वर्धनं ध्वस्रे वै पुरुषन्तीतरन्तपुरुषमीढाभ्यां वैददश्विभ्यां सहस्राण्यदित्सतामिति दक्षिणाप्रवाद इत्यादीनि वक्ष्यत्यहीनलिङ्गानि स्तोमो वृज्यते सत्रियेभ्योऽहर्भ्यः यतः सत्रादुदस्थाता ३ स्थिता ३ दिति सत्रसंशब्दनं सर्वं वा एतेषाजञ्जयन्ति ये दशममहरागच्छन्तीति येनैव रूपेण प्रयन्ति तमभ्युद्यन्तीत्यादीनि बहुकर्तृकत्वप्रतिपादनानि बहुत्वः सत्रलिङ्गानि यान्युपलभ्यन्ते तस्मादेवमुभयलिङ्गसद्भावात् सत्रा-

हीनात्मको दशरात्रः सोऽयं प्रायणीयोदयनीयावतिरात्राभ्यां संस्कृतो द्वादशाहाख्यः क्रतुर्भवति स च द्वादशाहो विधास्यमानानां द्विरात्रप्रभृतीनां अहीनानामेकादशरात्रादीनां सत्राणाञ्च प्रकृतिरिति सर्व्वप्रकृतेरग्निष्टोमस्य विधानानन्तरं गतैरध्यायैर्विहितः एवं प्रकृतिभूतावग्निष्टोमद्वादशाहौ येनैव क्रमेण विहितौ तेनैव क्रमेणातः परं तद्विकृतयो विधास्यन्ते तत्र प्रथममग्निष्टोमविकृतिभूतानेतान् विधित्सुस्त्रिकद्रुकाख्यानां त्रयाणामेकाहानां प्रथमस्य ज्योतिरिति संज्ञां निर्वक्ति।

प्रजापतिर्वा इदमेक आसीन्नाहरासीन्न रात्रिरासीत्सोऽस्मिन्नन्धे तमसि प्रासर्पत्स ऐच्छत्स एतमभ्यपद्यत ततो वै तस्मै व्यौच्छद्व्युष्टिर्वा एष आह्नियते यद्वै तज्ज्योतिरभवत्तत् ज्योतिषो ज्योतिष्ट्वं ॥ १ ॥

प्रजापतिः प्रजानामधिपतिः सर्व्वकारणभूतः स्रष्टा इदं दृश्यमानं यज्जगदस्ति एतदात्मकः एकएव पुरा आसीत् पुरातनस्य प्रपञ्चस्य प्रविलीनत्वात् अद्यतनस्य वास्रष्टत्वात् अद्वितीयः प्रजापतिरेक एवावर्त्तत इत्यर्थः एवञ्चाहोरात्रविभागहेतोः सूर्य्यस्याप्यभावात् अहोरात्रविभागोऽपि नासीत् एवं प्रकाशाभावात् स प्रजापतिः अस्मिन्नन्धे तमसि अन्धत्वापादके दृष्ट्याच्छादके अन्धकारे प्रासर्पत् प्रावर्त्तत स च तमोनिरोधकं तेज ऐच्छत् अकामयत स च कामयमानः एतं ज्योतिराख्यं यज्ञ-

मभ्यपद्यत अभिप्राप्नोत् ततोऽनन्तरं तस्मै प्रजापतये व्यौच्छत् तमोऽपागच्छत् तस्माद्व्युष्टिर्विवासनं तमसो निष्टप्तिः एतदात्मक एव एष क्रतुराख्यिते यस्मात्तदानीं ज्योतिस्तमोनिवर्त्तकं तेजोऽभवत् तस्मादस्य ज्योतिषः ज्योतिराख्यस्य क्रतोः ज्योतिष्टुं ज्योतिःसंज्ञकत्वं ज्योतिर्नाम सम्पन्नमित्यर्थः एवञ्च स स्वर्गः स्यात् सर्व्वान् प्रत्यविशिष्टत्वादिति न्यायेन स्वर्गकामः एतेन ज्योतिषा एकाह्नेन यजेतेति विधिरुन्नेतव्यः प्रकृतिभूतस्य ज्योतिष्टोमस्य प्रकरणात् अन्यत्वाम्नातत्वादेतत् ज्योतिःसंज्ञं कर्मान्तरं यथा कुण्डपायिनामयने माममग्निहोत्रं जुहुतीति मासाग्निहोत्रं नित्याग्निहोत्रात् कर्मान्तरं तथेति द्रष्टव्यं ॥ १ ॥

अथैतस्य ज्योतिष्टोमविकृतेः स्तुत्यर्थं सर्व्वप्रकृतेर्ज्योतिष्टोमस्य प्रथमानुष्ठानं स्तौति ।

एष वाव प्रथमो यज्ञानां य एतेनानिष्ट्वाथान्येन यजते कर्त्तपत्यमेव तज्जीयते वा प्रवामीयते ॥ २ ॥

योऽयमिदानीं ज्योतिःसंज्ञ एकाहो विधीयते एष एव यज्ञानां प्रथमः अन्येषां सोमयागानां प्रथमोऽनुष्ठेयः एतदुक्तं भवति प्रजापतिरकामयत वहुः स्यां प्रजायेयेति स एतमग्निष्टोम मपश्यदित्यादिभिरध्यायैर्योऽयं सर्वप्रकृतिभूतोऽग्निष्टोमो विहितः तत्सदृश एष ज्योतिराख्यः एकाह इति एतेन प्रकृतिभूतेन ज्योतिष्टोमेनाग्निष्टोमेनानिष्ट्वा अथान्येन यज्ञक्रतुना यजते तत् स यज-

मानः कर्त्तृपत्यं कर्त्तृपतनं यथा भवति तथैव जीयते ज्यावयोद्वागिति धातुः अथवा प्रमीयते म्रियते तस्मादन्येभ्यो यज्ञेभ्यः पूर्वमेष एवानुष्ठेयः ॥ २

एवं विपक्षे बाधोपन्याससमुखेन प्राथम्यमुक्त्वा अथान्येषां यज्ञानां तज्जन्यत्वेन पश्चाद्भावित्वात्तज्जनकत्वेन चैतस्य प्रथमानुष्ठानं सदृष्टान्तमुपपादयति।

यथा वा इदमग्नेर्ज्जातादग्नयो विह्रियन्त एवमेतस्माद्ध्यन्ये यज्ञा विह्रियन्ते ॥ ३ ॥

इदं इदानीं यथा वै यथा खलु जागान्निर्मथनादुत्पन्नादग्नेः अन्ये अग्नय आहवनीयाद्याः पश्चाद्विह्रियन्ते विभज्यन्ते तं देशमाह्रियन्ते एवं एतस्मात् ज्योतिष्टोमात् अधि ऊर्द्धं अन्ये तद्विकृतयो यज्ञा विह्रियन्ते विस्तार्य्यन्ते अतः सर्व्वेषामुत्पादकत्वादेष एव प्रथमोऽनुष्ठेयः ॥ ३ ॥

ज्योतींषि स्तोमा यस्यासौ ज्योतिष्टोम इति हि नामनिर्व्वचनं तत्सिद्ध्यर्थं त्रिवृदादीनां स्तोमानां ज्योतीरूपत्वमाह।

यो हि त्रिवृदन्यं यज्ञक्रतुमापद्यते सतन्दीपयति यः पञ्चदशः सतं यः सप्तदशः सतं य एकविंशः सतं ॥ ४ ॥

यो हि त्रिवृत् स्तोमः अन्यं सर्वप्रकृतेर्ज्योतिष्टोमात् अन्यं

सोमयागमापद्यते प्राप्नोति स्तोमस्तं सोमयागं दीपयति एवमुत्तरत्रापि योज्यं त्रिवृदादीनां मध्ये एकैक एव सोमयागं निर्वर्त्तयितुं शक्त इत्यर्थः अतएव दशरात्रे प्रथमादिष्वहःसु त्रिवृदादि एकैक एव स्तोमः क्रमेण विहितः ॥ ४ ॥

नन्वेवं दीपकत्वादस्त्वेतेषां ज्योतीरूपत्वं तथापि ज्योतिष्टोमस्य त्रिवृदादिज्योतिः स्तोमचतुष्टयसाध्यत्वादेकैकस्तोमकानां ज्योतिष्टोमता नस्यादित्यत आह।

एतत्तद्यदाह्रुरेको यज्ञ इत्येतद्वि सर्वे ज्योतिष्टोमा भवन्ति ॥ ५ ॥

त्रिवृदादीनामेक एव यज्ञोयज्ञसाधन इति यदाह्रुर्ब्रह्मवादिनः तदेतदेव यत्सामर्थ्यं यो हि त्रिवृदन्यं यज्ञक्रतुमित्यादिना त्रिवृदादीनां प्रत्येकं प्रतिपादितं एतद्वि एकैकस्य स्तोमस्य प्रत्येकं यज्ञसाधनत्वात् एकस्तोमका एव सर्वे ज्योतिष्टोमाः ज्योतिष्टोमशब्दवाच्या भवन्ति ॥ ५ ॥

एवं त्रिवृदादीनां प्रत्येकं ज्योतीरूपत्वेन ज्योतिष्टोमनिष्पादकत्वमभिधाय अथ प्रकृतिभूते ज्योतिष्टोमे तेषां समावेशविशेषमाह।

अस्थूरिवा एष सन्ततो यज्ञो द्वौ द्वौ हि स्तोमौ सवनं वहतस्त्रिवृत्पञ्चदशौ प्रातःसवनं पञ्चदश-

सप्तदशौ माध्यन्दिनꣳ सवनꣳ सप्तदशैकविंशौ तृतीयसवनं ॥ ६ ॥

सन्ततौ वक्ष्यमाणप्रकरणे अन्योन्यासंश्लिष्टस्तोमकाः एष ज्योतिष्टोमोऽस्यूरिर्वै एकेनाक्षेण युक्तोरथः स्यूरिः तद्विलक्षणो द्वाभ्यामक्षाभ्यान्नीयमानो रथोऽस्यूरिः तत्सदृशोज्योतिष्टोम इत्यर्थः तथाहि द्वौ द्वौ स्तोमौ त्रिवृदादिकौ संहतौ अस्य ज्योतिष्टोमस्यैकैकं सवनं वहतः कतमं कतमौ वहत इति उच्यते त्रिवृत्पञ्चदशश्च स्तोमौ प्रातःसवनं वहतः तत्र वह्निष्यमाणे त्रिवृत्स्तोमः चतुर्ष्वाज्येषु पञ्चदशसवनयोः सान्त्यार्थं अनुवर्त्तमानः पञ्चदशः सप्तदशश्च इत्येतौ स्तोमौ माध्यन्दिनं सवनं वहतः माध्यन्दिने पवमानस्तोत्रे पञ्चदशः षष्ठस्तोत्रेषु सप्तदशः तथैव सप्तदशैकविंशौ तृतीयसवनं वहतः आर्भवपवमाने सप्तदशएकविंशोऽग्निष्टोमसाम्नीत्यर्थः ॥ ६ ॥

एवं ज्योतिःशब्दवाच्यानां समावेशमुक्त्वा परिच्छिन्नदक्षिणावत्त्वादपि ज्योतिष्टोम एव प्रथमः कार्य्य इत्याह ।

या मितदक्षिणैव स्यादेष एव कार्य्य इयं वै ज्योतिरियमिमस्य यन्त्रिकैषा वा एतं यन्तुमर्हति ॥ ७ ॥

या यज्ञक्रिया मितदक्षिणा एव स्यात् परिमितदक्षिणैव भवेत् एष एव यज्ञः कार्य्योऽनुष्ठेयः नन्वेवमपरिमितस्यानुष्ठानात् अपरिमितं फलं नस्यादित्यत आह इयं वै सर्व्वैः परि-

दृश्यमाना इयमेव पृथिवी ज्योतिः पृथिव्यात्मको ज्योतिष्टोम इत्यर्थः इयञ्च पृथिवी स्वयमपरिमितत्वात् अमितस्य अपरिमितस्य यागस्य फलस्य वा यन्त्रिका नियन्त्री एतदेव प्रपाद्यते एषा वा इति ॥ ७ ॥

अथैनं ज्योतिष्टोमं स्तोत्रीयासङ्ख्यया स्तौति ।

तस्य नवतिशतꣳ स्तोत्रीयास्तासां या अशीतिशतं ताः षट्त्रिꣳशिन्यो विराजः षड्ऋतव ऋतुष्वेव विराजा प्रतितिष्ठति ॥ ८ ॥

तस्य ज्योतिष्टोमस्य विहितस्तोमानुसारेण नवतिशतं नवत्युत्तरशतसङ्ख्यास्तोत्रीयाः सम्पद्यन्ते प्रातःसवने पञ्चसु स्तोत्रेषु एकोनसप्ततिस्तोत्रीयाः माध्यन्दिनसवनेऽष्युत्तरा अशीतिस्तोत्रीयाः तृतीयसवने त्वष्टात्रिंशदिति नवतिशतस्य सम्पत्तिः तासां स्तोत्रीयाणामध्ये या अशीतिशतं अशीत्युत्तरशतसंख्याकाः स्तोत्रीयाः त्रिंशिन्यस्त्रिंशदक्षरास्त्रिंशत्सङ्ख्या विभज्यमानाः षट्विराजो भवन्ति वसन्ताद्या ऋतवश्च षट् तस्मादृतुष्वेव एकैकया विराजा प्रतितिष्ठति यजमानः प्रतिष्ठितो भवति ॥ ८ ॥

अथावशिष्टाभिः स्तोत्रीयाभिः स्तौति ।

अथ या दशैषा वा आत्मन्वा विराडेतस्यां वा इदं पुरुषः प्रतिष्ठितः ॥ ९ ॥

अथाग्नीतिशतादनन्तरं या दशस्तोत्रीया एष खल्वात्मन्यात्मसम्बन्धिनी देहसम्बद्धदशेन्द्रियरूपा विराट् एतस्यां खलु विराजि अयं पुरुषः आत्मा प्रतिष्ठित आश्रितः ॥ ९ ॥

अथास्मिन् ज्योतिष्टोमदक्षिणाङ्गत्वेन दातव्यानि द्रव्याणि प्रदर्श्य स्तौति ।

गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्चैतस्यामेव विराजि प्रतितिष्ठति ॥ १० ॥

एवं गवादीनि दशद्रव्याणि दातव्यानीत्यर्थः यदुक्तं सूत्रकारेण स्वतन्त्रस्य ज्योतिष्टोमस्य संस्थाविकल्पा आग्निष्टोम्यमुक्थ्यातिरात्र्यमितीति तस्य चायमर्थः योऽयं मूलसंस्तुतः पुरुषस्यावश्यको ज्योतिष्टोमः स अग्निष्टोम उक्थ्यो वा अतिरात्रो वा स्यात् इति विकल्पः ॥ १० ॥

एवं प्रथमप्रयोज्यानां त्रयाणामध्ये द्वयोरेवैतद्दक्षिणाविधानमिति तेनैव सूत्रकृतोक्तं ।

तस्य द्वादशꣳ शतं दक्षिणाः ॥ ११ ॥

तस्य अनतिरात्रस्य द्वादशं शतं दक्षिणा इति ॥ ११ ॥

दशस्तोत्रीयादक्षिणामप्यवयुज्य स्तौति ।

वीरहा वा एष देवानां यः सोममभिषुणोति याः

शतं वैरं तद्देवानवदयतेऽथ या दशदशप्राणाः प्राणाꣳस्ताभिस्पृणोति यैकादश्यात्मानं तया या द्वादशी सैव दक्षिणा ॥ १२ ॥

यो यजमानः सोममभिषुणोति एष देवानां मध्ये वीरहा वै वीरोवीर्य्यवान् यः सोमः तस्य हन्ता खलु तस्मादस्य वीरहन्तृतालक्षणो दोषो जायत इत्यर्थः तत्र याः शतं शतसंख्याभावः तत्तेन शतेन वैरं वीरहननलक्षणं पापं देवान् प्रत्यनवदयते निरस्यति अथ शतादधिकान् दश या गावः ताभिः प्राणान् स्पृणोति प्रीणयति दशसंख्या हि प्राणा नव वै पुरुषे प्राणाः नाभिर्दशमीति हि ब्राह्मणं अथ या एकादशी गौः तयात्मानं स्पृणोति अथ या द्वादशी द्वादशसंख्यापूरणी सैव यज्ञस्य दक्षिणा ॥ १२ ॥

अथैतद्दक्षिणावत्त्वं स्तौति ।

श्लेष्मा वा एतद्यज्ञस्य यद्दक्षिणा नवा अश्लेष्मा रथो वहत्यथ यथाश्लेष्मवता यं कामं कामयते तमभ्यश्नुत एवमेतेन दक्षिणावता यं कामं कामयते तमभ्यश्नुते ॥ १३ ॥

* पुरुषः प्राप्नोति एवमेतेन दक्षिणा च यागेन यत् फलं कामयते तत् फलं प्राप्नोति ॥ १३ ॥

* अत्र भाष्यं पतितमनुमीयते ।

अथ प्रकारान्तरेण दक्षिणादानं स्तौति।

शुभो वा एता यज्ञस्य यद्दक्षिणा यद्दक्षिणावता यजते शुभमेवास्मिन्दधाति ॥ १४ ॥

यत् या दक्षिणा एता यज्ञस्य शुभे वै शोभाहेतवोऽलङ्काराः; तस्मात् यत् यो दक्षिणावता यागेन सोमेन यजते तस्मिन् यज्ञे शुभं शोभाहेतुमलङ्कारमेव दधाति निदधाति स्थापयति इत्यं सर्व्वप्रकृतिभूतस्य ज्योतिष्टोमस्य स्तुतिः कृता सैव प्रकृतिवद्विकृतिः कर्त्तव्येत्यतिदेशवाक्येन ज्योतिष्टोमविकृतौ ज्योतिरात्र्येऽस्मिन्नेकाहेऽतिदिश्यमाना अस्यैव स्तुतिर्भवति यद्यप्येतत्सर्वं तत्प्रकरण एव वक्तव्यं तथापि विधास्यमानानां विकृतीनां तत्प्रकृतित्वं द्योतयितुं तदुपन्यास इत्यदोषः ॥ १४ ॥

इति ताण्ड्यमहाब्राह्मणे षोड़शाध्यायस्य
प्रथमः खण्डः।

अथ द्वितीयः खण्डः।

अथान्यमेकाहं विधत्ते।

अथैष गौः ॥ १ ॥

अथानन्तरं गवाख्योऽन्य एकाहोऽभिधीयते इति शेषः ॥ १ ॥

तत्र ज्ञातव्यजयहेतुत्वं वक्तुमाह।

गवा वै देवा असुरानेभ्यो लोकेभ्योऽनुदन्तैभ्यो लोकेभ्यो भ्रातृव्यनुदते य एवं वेद ॥ २ ॥

गवा वै गवाख्येनैकाहेन खलु देवाः पुरा असुरानेभ्यो लोकेभ्यः पृथिव्यादिभ्यस्तेभ्यो लोकेभ्यः सकाशात् अनुदन्त प्रेरितवन्तः अपाक्रमयन् स्पष्टमन्यत् ॥ २ ॥

अथास्य गौरितिसंज्ञां निर्वक्ति ।

यद्वै तद्देवा असुरानेभ्यो लोकेभ्यो गोवयऽस्तद्गोर्गोत्वं ॥ ३ ॥

तत्तदानीन्तनसमये यद्वै यस्मादेव असुरानेभ्यो लोकेभ्यो गोवयन् गुप्तांस्तिरोहितान् कुर्वन् तत्तस्माद्गोः गवाख्यैकाहस्य गोत्वं गौरितिनाम सम्पन्नं गोवयतिः तिरोधानार्थः छान्दसो धातुः तस्य च क्विपि पृषोदरादित्वात् गोभाव इति अत्यभिप्रायः यद्वा गमेर्डो इति डोप्रत्यये यथा गमेर्गोशब्दनिष्पत्तिः एवं गोवयतेरित्यौणादिको डोप्रत्ययः ॥ ३ ॥

अथैतद्वेदनफलमाह ।

गोवयति पाप्मानं भ्रातृव्यं य एवं वेद ॥ ४ ॥

पाप्मानं पापरूपं भ्रातृव्यं गोवयति तिरोहितं करोति य एवमुक्तं ब्राह्मणार्थं जानाति इत्थं वाक्यदोषपर्य्यालोचनया भ्रातृव्यवाननेन गवा यजेतेत्युक्तं भवति ॥ ४ ॥

अथैतस्य एकाहस्य सोमसंस्थितिरभिधीयते, तत्र बर्हिष्यवमानस्य स्तोमं विधाय स्तौति।

तस्य पञ्चदशं बर्हिष्यवमानं वज्रो वै पञ्चदशो वज्रमेव तत्पुरस्तान्निदधाति तेन विजयते ॥ ५ ॥

तस्य गोरेकाहस्य बर्हिष्यवमानं पञ्चदशं पञ्चदशस्तोमकं भवति स च पञ्चदशो वै वज्रो वज्ररूप एव इन्द्रेण सहोत्पत्तेरैन्द्रत्वात् वज्रस्य च तदायुधत्वात् पञ्चदशस्य वज्रत्वोपचारः तत्तथा च वज्रमेव पुरस्तात् पूर्वभागे यज्ञस्यादौ निदधाति स्थापयति तेन च वज्रेण परान् विजयते विपराभ्यां जेरित्यात्मनेपदं ॥ ५ ॥

अथैतस्य पञ्चदशस्य प्रायश्चित्तं प्रकारान्तरेण स्तौति।

पशुस्तोमो वा एष एवमिव वै पशुः समाहितः शिरः स्थवीयोऽणीयस्यो ग्रीवा पार्श्वाभ्यां वरीयाꣳ सक्थिभ्यां वरिष्ठः ॥ ६ ॥

एष स्तोमयागो गोशब्दाभिधेयत्वात् पशुस्तोमः स्तोमसंस्थानेन पशुमदृशः एवमिव वै एवम्विध एव खलु पशुः समाहितः अवस्थितो भवति एवं शब्देन परामृष्टमेव प्रदर्श्यते शिर इत्यादिना पशोः शिरो मूर्धा स्थवीयः स्थूलतरं स्थूलतरेत्यादिना ईयसुनियसुनियसादिपरलोपः पूर्वस्य च गुणः शिरस्यः

सकाशादणीयस्यः अणुतरा अल्पपरिमाणा ग्रीवा कण्ठो भवति स च पशुः पार्श्वाभ्यां पार्श्वद्वयेन वरीयान् गुरुतरोऽतिशयेन विस्तीर्णः; तथा सक्थिभ्यां जघनाभ्यां वरिष्ठ उरुतरोऽतिविस्ततमः; एवं ग्रीवास्थानीयेभ्य आज्येभ्यः शिरःस्थानीयं बर्हिष्प्रवमानं अधिकेन सोमेन युज्यमानं सङ्गच्छत इत्यर्थः ॥६॥

अथोक्तग्रीवादिसाम्यप्रदर्शनायाह ।

यत् पञ्चदशं बर्हिष्प्रवमानं भवति त्रिवृन्त्याज्यानि सप्तदश माध्यन्दिनꣳ सवनमेकविꣳशं तृतीयसवनꣳ रूपेणैवैनन्तत् समर्द्धयति ॥ ७ ॥

बर्हिष्प्रवमानं पञ्चदशस्तोमकं भवति आज्यानि त्रिवृन्ति त्रिवृत्स्तोमकानि भवन्ति माध्यन्दिनꣳ सवनं ज्रक्षं प्रवमानादिषु पञ्चस्वपि स्तोत्रेषु सप्तदशः स्तोम इत्यर्थः तृतीयसवनं ज्रक्षमेकविंशं एकविंशस्तोमकं उक्थसंस्थोक्षयं तेन तृतीयसवने पञ्चसु स्तोत्रेषु एकविंशः स्तोमः कार्यः; एवमस्मिन्नहनि स्तोमसङ्कृन्निर्भवतीति यत् तत्तेन पशुसम्बन्धिरूपेणैव एनं सोमयागं समर्द्धयति ॥ ७ ॥

एवं स्तोमसङ्कृतौ सत्यां एका स्तोत्रीया विराट्सम्पत्तेरतिरिच्यते सा च पशोः पुच्छस्थानीयेत्याह ।

एका षꣳस्तुतानां विराजमतिरिच्यते तस्मात् पशोः पश्चादतिरिक्तं ॥ ८ ॥

संस्तुतानां सहस्तुतानां स्तोत्रीयाणां परिगणनायां एका स्तोत्रीया विराजं अतिरिच्यते तस्मादेव पशोः लौकिकस्य पश्चादपरभागे सति एकैकस्याः स्तोत्रीयाया अतिरेको भवति सा च पशुत्वेन संस्तूयमानस्य क्रतोः पुच्छस्थानीयेत्यर्थः ॥८॥

इति ताण्ड्यमहाब्राह्मणे षोडशाध्यायस्य

द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

अथान्यमेकाहं विधत्ते ।

अथैष आयुः ॥ १ ॥

उच्यत इति शेषः, अथानन्तरं एष वक्ष्यमाणः आयुराख्यः सोमयागः ॥ १ ॥

अथास्यायुरिति संज्ञामर्थान्निर्वक्ति ।

आयुषा वै देवा असुरानायुवतायुते भ्रातृव्यं य एवं वेद ॥ २ ॥

आयुषा वै आयुराख्येन एतेन यज्ञेन देवा असुरानायुवता आसमन्तात्प्राणादिभिर्वियोजयत यौतिरत्र पृथग्भावे वर्तते तस्मादायुर्वर्तनसाधनत्वात् अस्यायुरिति संज्ञेत्यर्थः यएवं

ब्राह्मणार्थं वेत्ति असौ भ्रातव्यं शत्रुं आयते आत्मनः सकाशात् पृथक्करोति ॥ २ ॥

अथास्मिन्नधिकारिणमाह ।

स्वर्गकामो यजेत ॥ ३ ॥

आयुराख्यो यज्ञः स्वर्गसाधनमित्यर्थः ॥ ३ ॥

अथास्मिन्नहनि स्तोमसंख्यामाह ।

ऊर्ध्वाः स्तोमा यन्त्यनपभ्रंशाय ॥ ४ ॥

गवाख्येऽतीतएकाहे यैव स्तोमसंख्योक्ता सैवास्यापि स्तोमसंख्या दृश्यांस्तु विशेषः ऊर्ध्वाः ऊर्ध्वगामिनः त्रिवृत्पञ्चदशसप्तदशादिक्रमेणोत्तरोत्तरमधिकसंख्यां प्राप्ताः स्तोमा यन्ति गच्छन्ति सवनत्रये सम्बध्यन्ते पूर्ववत् हि प्रथमं पञ्चदशस्तोमो बहिष्पवमाने आज्येषु त्रिवृदित्युक्तं यद्येवमेवावापि क्रियते तमधिकसंख्याता न्यूनसंख्यायामाक्रमणात् अपभ्रंशोऽधःपातः स्यात् आयुराख्ये एकाहे बहिष्पवमाने त्रिवृत्स्तोमः आज्येषु पञ्चदशः शिष्टं गोष्टोमवदिति एवमूर्ध्वा अभिमुखा एव स्तोमा भवेयुः तच्चानपभ्रंशाय अपभ्रंशाभावाय भवति ॥ ४ ॥

अथास्याधिकारिविशेषे संस्थान्तरमाह ।

एतेनैवामयाविनं याजयेदतिरात्रः कार्यः ॥ ५ ॥

एतेनैवायुराख्येनैकाहेन आमयाविनं दीर्घरोगिणं यजमानं याजयेत् तदानीमयमतिरात्रसंस्थः कार्यः उक्थसंस्थोस्यायुः ॥ ५ ॥

आमयाविनः प्रयोगे अतिरात्रसंस्थाया आनुकूल्यमाह।

स गायत्रीꣳ सम्पद्यते प्राणो गायत्रायुरेष आयुश्चैवास्मिन् प्राणञ्चोभे समीची दधाति ॥ ६ ॥

योऽतिरात्रसंस्थ आयुः स गायत्रीं सम्पद्यते तथाहि प्रातःसवने बर्हिष्यमानेन स्तोत्रीयाश्च चतुर्ष्वाज्येषु षष्टिर्मिलित्वा नवषष्टिस्तोत्रीया भवन्ति एवं सवनत्रयगतानि मिलित्वा अष्टाचत्वारिंशदधिकचतुःशतसंख्याकाः स्तोत्रीया भवन्ति ताश्चतुर्विंशतिसंख्यया विभज्यमाना अष्टादशगायत्र्यो भवन्ति द्वौ च गायत्रौ पादौ भवतः एवमतिरात्रस्य गायत्रीसम्पत्तिर्द्रष्टव्या, अस्त्वेवं किन्तत इत्यत आह प्राणो गायत्रीति प्राणापानव्यानरूपेण गायत्र्यात्मकः प्राणः गायत्री च त्रिपदा तथा साम्यात् प्राणएव गायत्रीत्युपचारः तथा एष सोमयाग आयुःसंज्ञकः एवं प्राणायुषोः सङ्गावात् अस्मिन्नामयाविनि यजमाने आयुर्जीवनञ्च प्राणञ्च उभे समीची सङ्गते दधाति स्थापयति ॥६॥

अथ विहितान् ज्योतिरादिकान् त्रीन् एकाहान् संहत्य स्तौति।

स्वर्ग्या वा एते स्तोमा यत् ज्योतिर्भवति ज्योति-

रेवास्मै स पुरस्ताद्वरत्यथैष गौरेकया विराजमतिरिक्त आरम्भणमेव तदथैष आयुरेकस्या विराज ऊन आसाद एव सोऽथो ऊनातिरिक्तौ स्तोमौ मिथुनौ प्रजात्यै ॥ ७ ॥

एते स्तोमाः स्तोमयुक्ता ज्योतिराद्या एकाहाः स्वर्ग्या वै स्वर्गार्हाः खलु स्वर्गहेतव इत्यर्थः एवं सह स्तुत्वा अवयज्य स्तूयते यत् ज्योतिराख्य एकाहो भवति सोऽस्मै यजमानाय ज्योतिरेव पुरस्तात् पूर्वभागे ज्योतिः प्रकाशं हरति गमयति ज्योतिष्टवान यत्र यत्र गच्छति तत्र तत्र सर्वप्रकाशो जायते इत्यर्थः अथेति वाक्यान्तरोपक्रमे एष पूर्वोक्तो गौर्गवाख्यः एकाहः एकया स्तोत्रीयया विराजमतिरिक्तो अधिको भवति तदाधिक्यं विराजं तस्यारम्भणं उपक्रम एव अथैषः आयुः एकस्या विराज ऊनः एकया स्तोत्रीयया विराट्सम्पत्तेर्न्यूनः स गोष्टोमोपक्रान्तायां विराज आसाद एव आसत्तिः प्राप्तिरेव आयुष एकया स्तोत्रीयया विराजो न्यूनता प्रदर्श्यते स्वभावत उक्थसंस्थत्वात् एतस्मिन् पञ्चदशस्तोत्राणि तेषु च पूर्वोक्तसंख्यापरिगणनायां नवपञ्चाशदधिकशतद्वयसंख्याका स्तोत्रीया भवन्ति तथा च दशसंख्यया विभागे पञ्चदशविराजः ततः परा विराट् एकया स्तोत्रीयया न्यूना गोष्टोमेऽधिकया स्तोत्रीयया षड्विंशा ऊनाया विराजो योजने विराट् सम्पत्तिर्भवति अथो अपि ऊनातिरिक्तौ उक्तप्रकारेण न्यूनाधिकौ आयुष्टोमगोष्टोमौ

मिथुनरूपौ मिथुनौ स्त्रीपुमांससहगौ प्रजात्यै यजमान-प्रकृष्टजन्मने भवतः ॥ ७ ॥

अथैतान् संहृत्य प्रकारान्तरेण स्तौति ।

एते वै त्रिकद्रुकाः स्तोमा एतैर्वा इन्द्रः सर्वां तृप्तिमतृप्यत् ॥ ८ ॥

एते खलु त्रिकद्रुकाख्याः स्तोमाः एतैः खलु इन्द्रः सर्वां सम्पूर्णां तृप्तिं अतृप्यत् अतिशयेन तृप्तोऽभवत् त्रिकद्रुकेषु महिषोयवाग्निरन्तु विष्णुपस्तृम्पदिति मन्त्रवर्णात् ॥ ८ ॥

अथैतद्वेदितुः फलमाह ।

तृप्यति प्रजया पशुभिर्य एवं वेद ॥ ९ ॥

स्पष्टोऽर्थः । एषां त्रयाणां एकाहानां स्तोत्रीयोक्तिभिः कल्पकारेण कृप्तो ज्योतिष्टोमो गोर्वाक्जन्मस्य लोक इत्यादिना उद्गीथस्य नामेधमिति रात्रिः समानमितरं सांवत्सरिकेणोत्पन्नेन प्रतिपादिता सा चात्र विस्तरभयान्न लिख्यते ॥ ९ ॥

इति ताण्ड्यमहाब्राह्मणे षोडशाध्यायस्य

तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

अथाभिजिद्विश्वजितावेकाहौ विधित्सुस्तत्संज्ञां निर्वक्तुमाख्यायिकामाह ।

प्रजापतिः प्रजा असृजत ता अस्मै श्रैष्ठ्याय नातिष्ठन्त स आसान्दिशां प्रजानाञ्च रसं प्रबृह्य स्रजं कृत्वा प्रत्यमुञ्चत ततोऽस्मै प्रजाः श्रैष्ठ्यायातिष्ठन्त ॥ १ ॥

पुरा प्रजापतिः प्रजाः सृष्टवान् ताः सृष्टाः प्रजाः अस्मै अस्य प्रजापतेः श्रैष्ठ्याय नातिष्ठन्त श्रेष्ठत्वं नावमन्यन्त स प्रजापतिः आसां प्रसिद्धानां प्राच्यादिदिशां सर्वासां प्रजानाञ्च रसं सारं प्रबृह्य उद्गृह्य स्रजं मालां कृत्वा प्रत्यमुञ्चत स्वगले ऽबध्नात् ततोऽनन्तरं स्रजो महिम्ना प्रजापतेः श्रैष्ठ्यै प्रजाः अन्वमन्यन्त ॥ १ ॥

अथैतद्वेदितुः फलमाह ।

तिष्ठन्तेऽस्मै समानाः श्रैष्ठ्याय य एवं वेद ॥ २ ॥

समानाः विद्याकर्म्मवयोभिः सदृशाः पुरुषाः अस्मै वेदित्रे श्रैष्ठ्याय श्रेष्ठत्वा यतिष्ठन्ते अवतिष्ठन्ते श्रेष्ठत्वमनुजानन्तीत्यर्थः सुष्टमन्यत् ॥ २ ॥

ततः प्रजापतिः किमकार्षीदिति तदाह ।

सोऽकामयतेन्द्रोमे प्रजायाꣳ श्रेष्ठः स्यादिति तामस्मै स्रजं प्रत्यमुञ्चत्ततो वा इन्द्राय प्रजाः श्रैष्ठायातिष्ठन्त तच्छिल्पं पश्यन्त्यो यत्पितर्यपश्यन् ॥ ३ ॥

प्रज यामिति जातावेकवचनं मे मदीयासु प्रजासु मध्ये इन्द्रः श्रेष्ठः प्रशस्यतमः अधिकः स्यादिति सः प्रजापतिः कामितवान् कामयित्वा च तामात्मीयां स्रजं अस्येन्द्रस्य प्रत्यमुञ्चत गले बद्धवान् ततोऽस्येन्द्रस्य श्रैष्ठ्यार्थं प्रजा अन्वजानन् यत्पितरि श्रैष्ठ्यकारणं शिल्पमपश्यत् तच्छिल्पमाश्रित्य सुरूपमिन्द्रं पश्यन्त्यः विलोकयन्त्यः लक्षणहेत्वोः क्रियाया इति हेत्वर्थे तौ शतृप्रत्ययः ॥ ३ ॥

अथान्यं प्रासङ्गिकमाह ।

तस्माद्यः पुत्राणां दायन्धनतममिवोपैति तं मन्यन्ते यमेवेदं भविष्यतीति ॥ ४ ॥

यस्मात्पितुः प्रजापतेः सकाशात् स्रजोलाभेन श्रेष्ठोऽभूत् तस्माल्लोके पुत्राणां मध्ये यः पुत्रो धनतममिव अतिशयितमेव धनदायमुपैति पितुः सकाशात् दायत्वेनोपगच्छति तं पुत्रमन्यन्ते लौकिका जानन्ति अयमेव पुत्र इदं सर्वं पितृसम्बन्धि ग्रामादिकं भविष्यति सर्वस्याधिपतिः भविष्यति ॥ ४ ॥

अस्त्वेवं प्रकृते क्रियमाणे किमायातमित्यत आह।

ततो वा इदमिन्द्रो विश्वमजयद्यद्विश्वमजयत्तस्माद्विश्वजित्॥ ५॥

ततः ऐन्द्राग्नानन्तरमिदं विश्वं जगदजयत् जितवान् आत्मसेन कृतवान् यद्यस्मात्कारणात् स्वयूपावस्थितेनानेन यज्ञेन विश्वमजयत् तस्माद्विश्वजिदिति यज्ञस्याख्या॥ ५॥

अथाभिजितः संज्ञानिर्ब्रूक्षुमाह।

सोऽकामयत यन्मेऽनभिजितं तदभिजयेयमिति स एतमभिजितमपश्यत्तेनानभिजितमभ्यजयत्॥६॥

स इन्द्रोऽकामयत यन्मे ममानभिजितं जयेनाप्राप्तमस्ति तदिदानीमभिजयेयं यज्ञेनाप्नुयामिति स एतमभिजिदाख्यं सोमयागमपश्यत् तेनानभिजितं सर्वमभ्यजयत् तस्मादभिजयसाधनत्वात् अस्याभिजित्संज्ञा॥ ६॥

अथैतावभिजिद्विश्वजितौ विधत्ते।

यदभिजिङ्गवत्यनभिजितस्याभिजित्यै॥ ७॥

एतद्विश्वजितोपलक्षणं अयमर्थः अभिजिदाख्य एकाहो भवति सचानभिजितस्य वस्तुनोऽभिजित्यै अभिजयाय भवति विश्वजिदाख्य एकाहो भवति स च विश्वस्य जयाय भवति

विश्वजिद्भवति विश्वस्य जित्या इति हि ब्राह्मणान्तरं ॥ ७ ॥

अथैतौ स्तौति।

तौ वा एताविन्द्रस्तोमौ वीर्यवन्तौ शिल्पं वा एतौ नाम स्तोमावास्तां ॥ ८ ॥

तावेतावभिजिद्विश्वजितावेन्द्रस्तोमौ उक्तप्रकारान्तरेणेन्द्रसम्बन्धत्वादिन्द्रस्तोमाख्यौ इन्द्रसम्बन्धिनौ स्तोमवन्तावित्यर्थः; ततो वीर्यवन्तौ वीर्ययुक्तौ एतौ च पुरा उक्तं शिल्पं वै शिल्पं नाम शिल्पाख्यौ विचित्रसंस्थानौ स्तोमौ स्तोमवन्तावास्तां अभूतं यच्छिल्पं पश्यन्तो यत्पितर्यपश्यन्निति विश्वजितः शिल्परूपत्वमुक्तं तत्सम्बन्धादभिजितोऽपि शिल्पत्वोपचारः ॥ ८ ॥

अथैतद्वेदनफलमाह।

पश्यते गृहे शिल्पं य एवं वेद ॥ ९ ॥

य एवं ब्राह्मणार्थं जानाति सोऽयं गृहे शिल्पसामाख्यं वस्तुजातं पश्यति ॥ ९ ॥

अथैतयोः प्रयोगप्रकारमाह।

न वै यमौ नाम स्तोमौ स्तो यो यमाभ्यां यजेतेताभ्यां यजेत यन्द्वौ ॥ १० ॥

न वै खलु यमौ नाम स्तोमौ यमाख्यस्तोमवन्तौ यज्ञौ भवतः

यो यजमानो यमाभ्यां यजेत स एताभ्यामभिजिद्विश्वजिद्भ्या-मेकाहाभ्यां यजेत समष्ट्यै समष्ट्यर्थं एतदुक्तं भवति यमाभ्यां यमलाभ्यां संहताभ्यामभिजिद्विश्वजिद्भ्यां यजेत तौ दर्श-पौर्णमासवत् संहतौ एव फलसाधनमिति तयोश्चानुष्ठानक्रम: सूत्रकृतोक्त: विश्वजिदभिजिद्भ्यां यमाभ्यां यजमान: पूर्व्वा-पराभ्यां यजेतेति धानञ्जय्यो युगपदिति शाण्डिल्योऽभिजितो दक्षिणा देवयजनं स्याद्विश्वजित उत्तरं तत्प्रति पत्नीशाला स्यान्नानर्विज इत्यादिना अयमर्थ: दर्शपौर्णमासवदेव पौर्व्वा-पर्य्येणानयोरनुष्ठानमिति धानञ्जय्यमतं एकस्मिन् काले उभयो: सहानुष्ठानमिति शाण्डिल्यमतं दक्षिणात उत्तरतश्च देवयजन द्वयं कृत्वा दक्षिणोऽभिजित् उत्तरे विश्वजित् विश्वजित: पश्चा-त्पत्नीशाला नाभिजित: प्रत्येकं षोड़शर्त्विज इति एवं संहतयो-रेव फलसाधनत्वमिति यमाभ्यामिति शब्देनावगम्यते पक्षान्त-रमपि सूत्रकृतोक्तं कामञ्च यमाभ्यां यजेतेति नावश्यं संहत-योरेव फलसाधनत्वमपि तु पृथक् साधनत्वमपि विद्यते तस्मा-दन्यतरपरिहारेणान्यतरप्रयोगोऽपि कर्त्तुं शक्यत इत्यर्थ: ॥ १० ॥

उभयो: स्तोमानामावृत्तिं विधत्ते

पुनरभ्यावर्त्तꣳ स्तोमा भवन्ति पुनरभ्यावर्त्तꣳ ह्येताभ्यामिन्द्रोजितमजयत् ॥ ११ ॥

पुनरभ्यावर्त्तं पुन: पुनराहृत्तं अनयोरभिजिद्विश्वजितो: स्तोमा भवन्ति हि यस्मात् पुनरभ्यावर्त्तं आहृत्याहृत्य एता

भ्यामभिजिद्भ्यां अजितं जेतव्यं इन्द्रो अजयत् जितवान् तस्मादित्यर्थः ॥ ११ ॥

अथाभिजिति स्तोमानां तालेवाभ्याहृत्तिं विवृणोति ।

त्रीँस्त्रिवृदभिजितः प्रणयति त्रीन् पञ्चदश स्त्रीन् सप्तदश स्त्रोनेकविँशस्ते द्वादश सम्पद्यन्ते द्वादशमासाः संवत्सरः संवत्सरः प्रजापतिः प्रजापतिमेवाप्नोति ॥ १२ ॥

त्रिवृत्स्तोमोऽभिजितः त्रीन् प्रणयति बर्हिष्पवमानादीनि त्रीणि स्तोत्राणि निष्पादयति एवं पञ्चदशादिष्वपि योजना त्रिवृदादिनैकैकेन स्तोमेन बर्हिष्पवमानादीनां स्तोत्राणां त्रयं त्रयं अभिजिति निर्वर्त्यमित्यर्थः; तथाच कल्पकारेण अभिजितमधिकृत्योक्तं सर्वस्तोमस्य सतस्त्र्याहृतस्तोमास्त्रयः प्रणया इति एवं द्वादशस्तोत्राणि सम्पद्यन्ते द्वादशमासात्मकः संवत्सरः संवत्सरः प्रजापत्यात्मकः; तथाच तमेव प्रजापतिं द्वादशभिः स्तोमैः प्राप्नोति ॥ १२ ॥

अथ विश्वजिति स्तोमानामभ्याहृत्तिं स्पष्टयति ।

चतुरस्त्रिवृद्विश्वजितः प्रणयति चतुरः पञ्चदशश्चतुरः सप्तदशस्ते द्वादश सम्पद्यन्ते द्वादशमासाः संवत्सरः संवत्सरः प्रजापतिः प्रजापतिमेवाप्नोति ॥ १३ ॥

विश्वजितो बर्हिष्पवमानादीन् चतुरश्चत्वारि स्तोत्रादीनि त्रिवृत् प्रणयति निर्वर्त्तयति तथा पञ्चदशस्तदनन्तरभावीनि चत्वारि स्तोत्राणि सप्तदशोऽप्येवं तथाच द्वादश स्तोत्राणि सम्पद्यन्ते अन्यत् पूर्ववत् इमामभ्यावृत्तिं विश्वजितमधिकृत्य कल्पकृदुक्तवान् सर्वस्तोमस्य सतश्चतुराद्यत्तस्तोमास्त्रिप्रणया इति ॥१३

इति ताण्ड्यमहाब्राह्मणे षोड़शाध्यायस्य
चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

अथ विश्वजिति बर्हिष्पवमानस्य नवस्तोत्रीयाः क्रमेण विदधाति तत्र प्रथमामाह ।

उप त्वा जामयोगिर इत्युपवतो प्रतिपद्भवति स्तोमस्य रूपं ॥ १ ॥

उपवती उपशब्दयुक्ता प्रतिपद्यते अनयेति प्रतिपद्बर्हिष्पवमानस्य प्रथमा भवति तद्योपेति स्तोमस्य अत्र प्रयोज्यस्य त्रिवृदाख्यस्य रूपं उपास्मै गायतानर इति प्रकृते त्रिवृत्स्तोमके बर्हिष्पवमाने दर्शनात् ॥ १ ॥

वायोरनीके अस्थिरन्नित्यस्यास्तृतीयः पादस्तद्योगेनैतां प्रशंसितुमाह ।

प्राणैर्वा एष व्यृध्यत इत्याङ्गिर्यः सर्वं ददाति सर्वान् स्तोमान् सर्वाणि पृष्ठान्युपैतीति यद्वायव्या भवति प्राणानाꣳ समृद्ध्यै ॥ २ ॥

प्राणैरेव एष यजमानोव्यृध्यते वियुज्यत इत्याङ्गिरसब्रह्मवादिनः योऽयं यजमानः सर्वं ददाति सर्वांश्च त्रिवृदादीन् स्तोमान् सर्वाणि च रथन्तरबृहद्वैरूपवैराजादीनि षाडहिकानि पृष्ठसामान्युपैति उपगच्छति विश्वजित् सर्वपृष्ठः सर्वस्तोमः सर्वस्वदक्षिणः एवं विशिष्टमेनं कुर्वन् प्राणैरेव वियुज्यत इति तथाच वायोरनीक इति वायुशब्दयोगात् वायव्या वायुदेवत्या उपत्वा जामय इत्येषा भवतीति यत् तत्प्राणानां समृद्ध्यै पुनः समर्थनाय भवति यः प्राणः स वायुरिति वायुप्राणयोस्तादात्म्यश्रवणात् एवं प्रथमत्वस्य प्रथमा विहिता ॥ २ ॥

अथोत्तरे विधत्ते ।

सरस्वतश्च सरस्वत्याश्चोत्तरे भवतः ॥ ३ ॥

जनीयन्तोन्वग्नव इत्येषा सरस्वता देवस्य सख्युस्विनी उत नः प्रियेति सरस्वत्या एते ऋचावुत्तरे भवतः ॥ ३ ॥

अथैते स्तौति ।

मिथुनं वा एतद्यत् सरस्वाꣳश्च सरस्वती च मिथुनमेवास्य यज्ञमुखे दधाति प्रजननाय ॥ ४ ॥

सरस्वांश्च सरस्वती चेति यदेतद्द्वन्द्वयप्रतिपाद्यौ देवते एतन्मिथुनं वै स्त्रीपुंसात्मकत्वात् एवञ्चास्य यजमानस्य प्रजननाय प्रजात्यर्थं मिथुनमेव यज्ञमुखे यज्ञप्रारम्भे दधाति स्थापयति ॥४॥

अथान्यां स्तौतीयां विधत्ते।

सावित्रो चतुर्थो भवति ॥ ५ ॥

तत्सवितुर्वरेण्यमित्येषा सावित्री सवितृदेवताका चतुर्थीत्यृग्भवति ॥ ५ ॥

अथैतां स्तौति।

दुष्करं वा एष करोति यः सर्वं ददाति यत् सावित्रो भवति सवितृप्रसूतं मे कर्म्मास्दिति सवितृप्रसूतमेवास्य कर्म भवति ॥ ६ ॥

यो यजमानः सर्वं धनं ददाति एष दुष्करं कर्त्तुमशक्यं एव करोति तथा सर्वस्मिन् दक्षिणे अस्मिन् यदेषा सावित्री भवति सवितृप्रसूतं सविता प्रसविता देवेन प्रसूतमनुज्ञातं मम मदीयं कर्म सर्वस्वदानदक्षिणं अस्त् अस्त्वित्यभिप्रायेण सवितृदेवत्या प्रयुज्यते तस्य यजमानस्य कर्म सवितृप्रसूतं भवति ॥६॥

अथान्यां स्तौतीयां विधत्ते।

ब्राह्मणस्त्या पञ्चमी भवति ॥ ७ ॥

सोमानां स्वराणामिति एषा ब्रह्मणस्पतिदेवताका पञ्चमी ऋग् भवतीति ॥ ७ ॥

अथ स्तौति।

ब्रह्म वै ब्रह्मणस्पतिर्ब्रह्मैवास्य यज्ञमुखे दधाति ॥ ८

ब्रह्म वेदस्यैष पतिरीशिता ब्रह्मणस्पतिः स च ब्रह्म वै परब्रह्म तथा चास्य यजमानस्य यज्ञमुखे तदेव ब्रह्म निदधाति ॥ ८॥

अथान्यां स्तोत्रीयां विधत्ते।

आग्निपावमानो षष्ठी भवति ॥ ९ ॥

अग्निः पवमानो देवता यस्याः सा आग्निपावमानी अग्न आयूंषि पवस इत्येषा षष्ठी भवति ॥ ९ ॥

अथ स्तौति।

अग्निरेवैनन्निष्टपति पवमानः पुनाति पूतमेवैनं यज्ञियं यज्ञार्हं षष्ठान्युपनयति ॥ १० ॥

अस्यां हि अग्निः पवमानः सोम इति देवताद्वयं प्रतिपद्यते तयोर्मध्ये अग्निरेव एनं यजमानं निष्टपति निःशेषेण तप्तकलुषं करोति पवमानः सोमः पुनाति पूतं शुद्धं करोति एवं हि बहिष्पवमानेन पूतमेवैनं यजमानं यज्ञियं यज्ञार्हं षष्ठानि रथन्तरादीनि करिष्यमाणानि उपनयति उपगमयति ॥ १० ॥

अथोक्तमर्थं विधित्सुराह।

यन्ति वा एते पथ इत्याह यज्ञे सञ्चार्याः कुर्वते ॥ ११

य उद्गातारः सम्भार्याः सम्भरणीयाः प्रदेशान्तरे आम्नाता-मेकैकामृचमुपादाय उक्तक्रमेण सम्भृताः सम्पन्नाः कुर्वते प्रयु-ञ्जते एते पथो न्याय्यादनुष्ठानमार्गात् यन्ति अपगच्छन्तीति ब्रह्मवादिन आहुः ॥ ११ ॥

कस्तर्हि परिहार इति तदाहुः।

पावमान उत्तमस्तृचो भवति तेन पथो नयन्ति॥१२

पवमानस्य ते वयमिति पवमानसोमदेवताक इति पवमान-सोमदेवताकबर्हिष्पवमानस्यान्त्यस्तृचो भवति तेन यथाम्नात-स्तृचक्रमेण पथः सकाशान्न गच्छन्ति आम्नातानां तृचां तथैव प्रयोगो ह्यनुष्ठानमार्गः ॥ १२ ॥

एवं विभक्तितो बर्हिष्पवमानस्य नवस्तोत्रीयाः संस्तुतिका दर्शिताः अथैताभिरेव करिष्यमाणानां रथन्तरादीनां षण्णां पृष्ठानां योगं प्रतिपादयति।

स तु वै पृष्ठैः स्तुवीतेत्याहुर्य एतानि बर्हिष्पव-माने युञ्जादिति ॥ १३ ॥

स तु वै सएव पृष्ठैः रथन्तरादिभिः स्तुवीत स्तौति य एतानि पृष्ठानि बर्हिष्पवमाने युञ्जात् योजयेदिति ब्रह्मवादिन आहुः तस्मात् पृष्ठानां बर्हिष्पवमाने स्तोत्रीयाभिर्योजनं कार्यं यथा ह्यरात्रस्य प्रथमेऽहनि अस्य प्रत्नामनुद्युतमित्यादिभिर्नवभिर्न-वानामृचां योगस्तथात्रापि पृष्ठानां योजनं कार्यमित्यर्थः ॥१३॥

तत्र कया स्तोत्रीयया किं योज्यत इत्याशङ्क्य रथन्तरयोगं तावदाह।

उपवती प्रतिपद्भवत्युप वै रथन्तरꣳ रथन्तरमेवास्मै तया युनक्ति ॥ १४ ॥

उपत्वाजामयोगिर इत्येषा प्रथमा भवति उपशब्दसम्बन्धं हि रथन्तरपृष्ठं ज्योतिष्टोमे उपास्मै गायतानर इति उपशब्दस्य प्रयुक्तत्वात् एवञ्चैतयोपवत्या अस्मै यजमानाय रथन्तरं साम युनक्ति ॥ १४ ॥

अथ बृहतो योगं दर्शयति।

सरस्वती द्वितीया भवति स्वर्गो लोकः सरस्वान् स्वर्गोलोको बृहद् बृहदेवास्मै तया युनक्ति ॥ १५ ॥

सरस्वतः सरस्वदाख्यस्य देवस्य सम्बन्धिनी द्वितीया जनीयन्तोत्वग्व इत्येषा भवति स्वर्गाख्यो लोकएव सरस्वान् अमावास्या वै सरस्वती पौर्णमासः सरस्वानिति ब्राह्मणान्तरात् सरस्वतः पूर्णमासत्वात् तस्य च स्वर्गसाधनत्वात् तदात्मकत्व व्यपदेशः बृहत्साम च स्वर्गलोकात्मकं इयं वै रथन्तरमसौ वै लोको बृहदिति श्रुतेः एवं परम्परया सरस्वतो बृहत्सम्बन्धिन्या एतया सरस्वद्देवताकया बृहदेव तस्मै युनक्ति ॥ १५ ॥

अथ वैरूपस्य योगमाह।

सरस्वत्यास्तृतीया भवति वाग्वै सरस्वती वाग्वैरूपं वैरूपमेवास्मै तया युनक्ति ॥ १६ ॥

सरस्वत्याः सम्बन्धिनी उप नः प्रियास्वित्येषा तृतीया भवति वाक्शब्दात्मिका हि सरस्वती वैरूपञ्च वाक्संस्तुतं तथा च तया तृतीयया वैरूपमेवास्मै युनक्ति ॥ १६ ॥

अथ वैराजस्य योगमाह ।

सावित्रो चतुर्थी भवति प्रजापतिर्वै सविता प्रजापतिर्वैराजं वैराजमेवास्मै तया युनक्ति ॥ १७ ॥

सावित्री सवितृदेवताका तत्सवितुर्वरेण्यमित्येषा चतुर्थी भवति सा प्रजापतिरेव सविता सर्व्वस्य प्रेरकत्वात् वैराजञ्च साम प्रजापतिसंस्तुतं तथा चैतया सावित्र्या वैराजमेवास्मै युनक्ति ॥ १७ ॥

अथ शाक्करस्य साम्नो योगमाह ।

ब्राह्मणस्पत्या पञ्चमो भवति ब्रह्म वै ब्रह्मणस्पतिर्ब्रह्म शक्वर्य्यः शक्करीरेवास्मै तया युनक्ति ॥१८॥

ब्राह्मणस्पत्या ब्रह्मणस्पतिदेवताका सोमानां स्वराणामित्येषा पञ्चमी भवति परब्रह्मैव ब्रह्मणस्पतिरित्युच्यते विदा मघवन्नित्याद्याः शक्वर्य्यश्च परब्रह्मणः प्रतिपादकत्वात् ब्रह्मात्मिका तथा चैतया ब्राह्मणस्पत्यया शक्करीरेव शक्करीषु ऋचि गीयमानं शाक्करं सामैवास्मिन् युनक्ति ॥ १८ ॥

अथ रैवतस्य साम्नो योगमाह ।

आग्निपावमानी षष्ठी भवति गायत्री वै रेवती गायत्रछन्दा अग्नेरेवतीरेवास्मै तया युनक्ति ॥१९॥

आग्निपावमानी अग्न आयूंषि पवस इत्येषा षष्ठी भवति गायत्री गायत्रछन्दस्का खलु रेवती: रेवतस्साम्नो योनिभूता रेवतीर्न इत्येषा अनया प्रतिपाद्यमानोऽग्निश्च गायत्रछन्दा: गायत्रं छन्दो यस्य स तथोक्त: एवञ्चैतया आग्नेय्या गायत्र्या रेवतीरेव रेवतीषु गीयमानं रैवतं सामास्मै युनक्ति ॥ १९ ॥

ननु एवं रथन्तरादीनि षट्सामानि योजितानि कथं तेषां चतुर्षु पृष्ठस्तोत्रेष्वन्तर्भाव इत्यत आह ।

न चत्वारि षड्भ्यो विभवन्ति यदनिरुक्तानि तेन विभवन्ति ॥ २० ॥

सत्यं चत्वारि पृष्ठस्तोत्राणि न षड्भ्य: सामभ्यो विभवन्ति न व्याप्नुवन्ति यद्यस्मादेतानि षट्सामान्यनिरुक्तानि पृष्ठस्तोत्रेष्वेव कार्य्याणीति न नि:शेषेणोक्तानि तेन कारणेन पृष्ठस्तोत्रेष्वन्यत्र प्रयोक्तुं शक्यत्वात् विभवन्ति व्याप्तुं शक्नुवन्ति ॥ २० ॥

आज्यस्तोत्रेषु कञ्चिद्दोषमाशङ्क्य समाधत्ते ।

सर्वाणि स्वारण्याज्यानि तज्जामि नानादेवत्यै: स्तुवन्त्यजामितायै ॥ २१ ॥

सर्वाणि चत्वार्याज्यस्तोत्राणि स्वारनिधनानि तथाच स

सर्वेषां समानावसानत्वात् जामितादोषः स्यात् अतस्तत्परिहाराय नानादेवत्यैः अग्निर्मित्रावरुणाविन्द्राग्नी चेति क्रमेण तद्देवताकैराज्यैः स्तुवन्ति ॥ २१ ॥

कानि पुनस्तथाविधानीत्यत आह।

सुषमिद्धो न आवहेत्याप्रिय आज्यानि भवन्ति ॥ २२ ॥

आप्रिय इति प्रयाजानुयाजा इत्युच्यन्ते सुषमिद्धो न आवहेत्याद्यास्तिस्र आप्रियस्तोत्रीयाआग्नेयं प्रथममाज्यस्तोत्रं भवति इतराणि च त्रीणि कल्पकारेणोक्तानि तान्यः शक्रं पार्थिवस्य युञ्जन्ति ब्रह्मरूपम् तमीडिष्वयो अर्चिषेति ॥२२॥

अथाप्रीणामाज्यत्वं सर्वस्वदानेन रिक्तीकृतस्य यजमानस्य पुनः पोषणार्थमिति स्तौति।

प्रजापतिः प्रजा असृजत स दुग्धोरिरिचानोऽमन्यत स एतान्याप्रिय आज्यान्यपश्यत्तैरात्मानमाप्रीणाद्दुग्धइव वा एष रिरिचानोयः सर्वन्ददाति यदाप्रिय आज्यानि भवन्त्यात्मानमेव तैराप्रीणाति ॥ २३ ॥

एतत्सर्वं पूर्वस्मिन्नेवाध्याये आख्यातं ॥ २३ ॥

अथ रथन्तरादीनां षण्णां पृष्ठानां स्थानविशेषं व्यवस्थापयितुमाह।

एतर्हि तु वै पृष्ठानि यथायतनं कल्पन्त इत्याङ्-र्यद्रथन्तरं प्रथमं बृहदुत्तमम्मध्यदूतरानीति ॥ २४ ॥

माध्यन्दिनपवमाने रथन्तरं साम बृहदग्निष्टोमसाम इतराणि चत्वारि पृष्ठस्तोत्रेषु प्रयोज्यानि तथाच कल्पः अस्य प्रत्नामनुद्युतमिति गायत्रमामहीयवञ्च परीतोषिञ्च तासु तमिति कालेयमेकस्यां रथन्तरं तिसृषु दैर्घश्रवसन्तिसृषु यौधाजयमेकस्यां अयं सोम इति पार्थमन्त्यं वैराजञ्च महानाम्न्यश्च वैरूपञ्च रैवत्यश्चेति तथा त्वमग्ने यज्ञानां होतेति बृहदग्निष्टोमसामेति अयमर्थः माध्यन्दिनपवमाने परीतोषिञ्च तासु तमिति तिसृषु रथन्तरं कार्यं वैराजञ्च होतुः पृष्ठे शाक्करं मैत्रावरुणपृष्ठे वैरूपञ्च ब्रह्मपृष्ठे रैवतमच्छावाकपृष्ठे त्वमग्ने यज्ञानामिति तिसृषु बृहदग्निष्टोमसामत्वेन कार्य्यमिति ॥२४॥

कथंवं क्रियमाणे किञ्चिद्दूषणमाशङ्क्य निरस्यति।

जामि वा एतद्यज्ञे क्रियत इत्याङुर्यत्सर्वाणि निधनवन्ति सह क्रियन्त इति यदन्तरा सोमा यन्त्यन्तरोक्थानि शस्यन्तेऽन्तरा वषट्कुर्वन्ति तेनाजामि ॥ २५ ॥

अत्रसमेतद्यज्ञे क्रियते यत्सर्वाणि वैराजादीनि सामानि निधनवन्ति निधनयुक्तानि सह क्रियन्ते नेरन्तर्येण प्रयुञ्जत इति एतज्जामि क्रियत इति ब्रह्मवादिन आहुः अयं दोषः

परिक्षियते यदन्तरेत्यादिना यद्यस्मादन्तरा अन्तराले तेषां मध्ये सोमाः ग्रहचमसपूरिताः सन्तो होमार्थं यन्ति उत्तरवेदिं गच्छन्तीति तथान्तरा मध्ये उक्थानि शस्त्राणि च शस्यन्ते बहुभिः तथान्तराले होत्रादयः सप्त वषट कुर्वन्ति वौषड्न्तया याज्यया यजन्ति तेन कारणेन द्वयोर्द्वयोर्मध्ये उक्तस्य बहुविधस्यानुष्ठेयस्य सङ्गावेन व्यवधानात् जामिदोषो न भवतीत्यर्थः ॥ २५ ॥

अथ प्रकारान्तरेणाजामित्वमुपपादयति ।

व्यत्यासमिडाश्च निधनानि चाङ्कस्तेनाजामि ॥२६

व्यत्यासं व्यत्यस्य व्यत्यस्य परिक्षित्य परिक्षित्य इडाश्चाद्यानि च निधनान्याङ्कः तेन निधनवत्त्वे समानेऽपि तेषान्निधनानां व्यत्यस्य प्रयोगे परस्परं वैलक्षण्याज्जामिदोषो न भवतीत्यर्थः अतएव पूर्वमुक्तं निधनं वैराजं प्रथमं कृत्वा इडानिधनं शाक्वरमनन्तरं कार्यमित्यादि ॥ २६ ॥

अथ रैवतसाम्नि कश्चिद्दोषमाशङ्क्य समाधत्ते ।

च्यवन्ते वा एतद्रेवत्यः स्वादायतनादित्याङ्गर्यत् त्रयस्त्रिंशात् स्तोमाद्यन्तीति यद्गायत्रो भवन्ति तेनायतनान्न च्यवन्ते या हि का च गायत्री सा रेवती ॥ २७ ॥

एतत् एतर्हि रेवत्यः रैवतं साम स्वादात्मीयादायतनात् च्यवन्ते प्रच्युता भवन्तीति ब्रह्मवादिन आङ्गः यद्यस्मात् त्रयस्त्रिंशं

ग्रात् सोमाद्यन्ति गच्छन्तीति षष्ठेऽहनि तस्यैव सोमस्य तदायतनत्वेन लृप्तत्वात्, तत्रायं परिहारः यद्यस्मात् अस्य रैवतसाम्नो गायत्यो गायत्रीछन्दस्का ऋच आधारभूता भवन्ति तेन कारणेन स्वादायतनान्न च्यवन्ते कुत एतत् रेवतीर्नः सधमाद् इति गायत्री रैवतसाम्नो योनिस्तत्सामान्यात् अन्यापि या कापि गायत्री सैव रेवती हि यस्मादेवं तस्मात् स्वयोनिसदृशीषु गायत्रीषु ऋक्षु गीयमानं रैवतं स्वादायतनान्न च्यवत इति ॥१७॥

इति ताण्ड्यमहाब्राह्मणे षोड़शाध्यायस्य

षष्ठमः खण्डः ।

अथ षष्ठः खण्डः ।

अथ सर्व्वस्वदाननिमित्तं यजमानस्य व्रतं दर्शयति, तदङ्गत्वेनादौ वत्सत्वचः परिधानं विधत्ते ।

पशुभिर्वा एष व्यृध्यत इत्याऽऽहुर्यः सर्वन्ददातीति च्छवीं परिधत्ते पशुभिरेव सम्रध्यते ॥ १ ॥

यो यजमानः सर्व्वं धनं ददाति एष पशुभिः खलु व्यृध्यते विहीयते इति ब्रह्मवादिन आहुः ॥ १ ॥

तत्र परिधानं विधाय स्तूयते ।

रोहिणी छवी भवत्येतद्वै पशूनां मुयिष्ठꣳ रूपं यद्रोहितꣳ साक्षादेवैनानवरुन्धे ॥ २ ॥

रोहिणी रोहितं वस्त्रं क्रुवी भवति सर्वेषां गवादीनां पशूनां भूयिष्ठं रोहितं तद्वज्रतरं यद्रोहितं लोहितवर्णस्तथा च साक्षात् प्रत्यक्षमेव एनान् पशूनवरुन्धे लभते ॥ २ ॥

एवं कृतपरिधानस्य यजमानस्य विरात्रमरण्यवासं परिधत्ते।

अरण्ये तिस्रोवसत्यारण्यं ताभिरन्नाद्यमवरुन्धे॥३॥

तिस्रो रात्रीः अरण्ये वसति अत्यन्तसंयोगे द्वितीया तेन वासेन आरण्यमरण्यसम्बन्धि अन्नाद्यमवरुन्धे लभते ॥ ३ ॥

तत्रारण्यवासे स्थानविशेषं विधत्ते।

उदुम्बरे वसत्यूर्गुदुम्बर ऊर्ज्जमेवावरुन्धे ॥ ४ ॥

उदुम्बरे उदुम्बरमूले वसति ऊर्ज्जं अन्नं उदुम्बरः सदा फलत्वात् तथा च तन्मूले वसन् ऊर्ज्जमन्नमेवावरुन्धे ॥ ४ ॥

अथ तत्र जीविकां विधत्ते।

खनित्रेण जीवत्यदृत्तिमपजयति ॥ ५ ॥

यदरण्ये कन्दमूलादिकं खान्यमस्ति तत् खनित्रेण खननसाधनेन खात्वा तेन जीवेदित्यर्थः तथाच अदृत्तिदारिद्र्यमेवापजयति अपजितं करोति ॥ ५ ॥

किं तत् खनित्रमिति तदाह।

उभयतः च्णुदघ्निर्भवत्युभयत एवास्मा अन्नाद्यꣳ रदत्यस्माच्च लोकादमुष्माच्च ॥ ६ ॥

तत् खनित्रं उभयतः च्युत् उभयतस्त्रीच्णमुखोदङ्भिर्भवति सा च वैणवी कल्माषीति केचित् अन्यदृच्चजातापि इति प्रत्यन्तरं एवम्भूताभिरुभयतः उभयविधानादेव अस्मै यजमानाय अन्नाद्यं रञ्जयति उभयत इत्येतद्व्याक्रियते अस्मात् भूर्लोकात् असुष्माच्च स्वर्गात् ॥ ६ ॥

अथ त्रिरात्रं निषादकुले निवासं विधाय स्तौति ।

निषादेषु तिस्रोवसत्यस्यां वा एते परीत्ताय देवास्यामन्नाद्यन्तदवरुन्धे ॥ ७ ॥

निषादेषु निषादग्राममसमीपे तिस्रोरात्रीर्वसेत् अस्यां भूमौ एते निषादाः परीत्ताः प्राप्तपरिदाना भवन्ति एवं तेषां भूमिसम्बन्धात् यदेवास्यां पृथिव्यामन्नाद्यन्तदवरुन्धे लभते एवं वसतो जीवनं सूत्रकृतोक्तं तेषाङ्गाममारण्यं भुञ्जीत नैवारं श्यामाकमार्गमिति ॥ ७ ॥

अथापरं त्रिरात्रवासं विधत्ते ।

जने तिस्रो वसति जन्यन्ताभिरन्नाद्यमवरुन्धे ॥ ८

विवाह्ययोग्योऽसमानगोत्रो ब्राह्मणो जनः यद्वा राजन्यबन्धुरस्य गृहे तदीयमन्नं भुञ्जानः तिस्रो रात्रीर्वसेत् तथा च ताभीरात्रीभिर्जन्यं जनसम्बन्ध्यन्नाद्यमवरुन्धे ॥ ८ ॥

अथापरं त्रिरात्रवासं विधत्ते ।

समानजने तिस्रः समानजन्यन्ताभिः ॥ ९ ॥

वसति अन्नाद्यमवरुन्ध इत्यनुवर्त्तते समानगोत्रोजनः समानजनः यद्वा ब्राह्मणमात्रं तस्य गृहे तदीयमन्नं भुञ्जानस्त्रिरो रात्रीर्वसेत् जने तिस्रोवसतीत्यादिवाक्यद्वयं राजन्यबन्धुना ब्राह्मणः समानजन इति शाण्डिल्य इत्यादिना सूत्रकारेण बहुधा व्याख्यातं ॥ ९ ॥

अथैता रात्रीः संहत्य स्तौति।

द्वादशैता रात्रयो भवन्ति द्वादशमासाः संवत्सरः संवत्सरमन्वन्नाद्यं प्रजायते तदेवान्नाद्यमवरुन्धे ॥ १० ॥

अरण्ये तिस्रो निषादे तिस्रो जने तिस्रः समानजने तिस्र इत्येवमेतारात्रयो द्वादश भवन्ति संवत्सरस्य द्वादशमासात्मकः तथाच संवत्सरं संवत्सरपर्य्यन्तं अन्नं अनु अन्नमर्हं प्रजायते तेनोत्पद्यते एवं रात्रिगतसंख्यया तदेवान्नाद्यं आत्मा अवरुन्धे स्वीकरोति ॥ १० ॥

अथान्यत् व्रतमाह।

संवत्सरन्न याचेदामाद्यमिव वा एतद्यः सद्योदत्तं प्रत्यत्ति सद्यो वै देवानाꣳ संवत्सरः ॥ ११ ॥

संवत्सरं सर्वस्वदानानन्तरं संवत्सरपर्य्यन्तं न याचेत् मत्स्यमेतद्देहीति परं नार्थयेत् किं कारणमयाचनं तदाह आमाद्यमिव वा एतद्यः सद्योदत्तं प्रत्यत्तीति एतदामाद्यमिव वै आमस्यापरिपक्वफलस्य भक्षणमिव खलु यो दत्तं धनं सद्यस्कदानीमेव प्रत्यत्ति प्रतिनिष्टत्य भक्षयति, नतु बहुषु दिवसेषु गतेषु

संवत्सरमध्येऽपि प्रतिग्रहो न विरुध्यत इत्यत आह सद्यो वा इति अस्माकं संवत्सर इति यत् तद्देवानां सद्यो वै अविलम्बितः कालः एकं वा एतद्देवानामहर्यत् संवत्सर इति हि ब्राह्मणान्तरं तस्मात् संवत्सरस्यापि सद्यःकालात्मकत्वात् यदि तन्मध्ये सर्वस्वं दत्तवान् पुनर्याचेत् तदा तदपरिपक्वफलभक्षणसदृशं भवेत् इति याञ्ञाप्रतिषेधः समर्थ्यते ॥ ११ ॥

यद्ययाचमानायापि तस्मै यत्किञ्चिद्धनं दातुमिच्छेत्तदा न विरोधमित्याह ।

नोदीयमानं प्रति नुदेदन्नाद्यस्याप्रतिनोदाय ॥ १२

अयाचितमन्येन दीयमानं न प्रतिनुदेत् न प्रतिषेधेत् अपि तु प्रतिगृह्णीयादेव अन्नाद्यस्यातःपरं प्राप्तस्यान्नस्य प्रतिनोदः प्रतिषेधो माभूत् इत्येवमर्थम् ॥ १२ ॥

अथास्योष्णीषधारणं विधत्ते ।

उष्णीषम्बिभर्त्ति शिल्पत्वाय ॥ १३ ॥

उष्णीषं शिरोवेष्टनवस्त्रं तद्बिभ्रियात् तद्धरणं शिल्पत्वाय वैचित्र्याय भवति परिधानीयाया रोहिण्याः वत्मत्वस्य सकाशात् वैलक्षण्यात् ॥ १३ ॥

अथान्यन्निषेधयति ।

न स्रुन्मयेन पिबेदाकृतिर्वा एषा यद्ब्राह्मणस्य मुखꣳ वै स्रुन्मयमाकृतिमानशेऽथ यदस्रुन्मयो भवति स्वएव मुखआकृतिञ्जुहोति ॥ १४ ॥

मन्मयेन मद्विकारेण पात्रेण जलादिकन्न पिबेत् एषा आ-ज्ञतिर्वै यज्ञमिव आज्ञत्यधिकरणं यत् ब्राह्मणमुखं न खलु मन्मयं मद्विकारपात्रं आज्ञतिमानशे आज्ञतियोग्यतां प्राप्नोति अतो यत् यस्मात् अमन्मयः अमन्मयेन दारुमयादिना पात्रेण पाता भवति तेन स्वएव आत्मीयएव मुखे आज्ञतिं हविर्जु-होति ॥ १४ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चदशाध्यायस्य

षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

अथ सर्व्वजित्संज्ञमेकाहं विधास्यन् तस्य स्तोमसंख्ये दर्श यति ।

पञ्चविंशोऽग्निष्टोमः ॥ १ ॥

अग्निष्टोमसंख्याः पञ्चविंशस्तोमका इत्यर्थः ॥ १ ॥

अथ तं विधत्ते ।

सर्व्वजिता वै देवाः सर्वमजयन् सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाप्नोति सर्वञ्जयति ॥ २ ॥

सर्व्वजिता सर्व्वजिताख्येन यज्ञेन खलु पुरा देवाः सर्वं जगद जयन् तस्मात् सर्व्वस्य फलस्य प्राप्त्यै सर्वस्य जेतव्यस्य जित्यै जयाय अनेन सर्वजिता यष्टव्यं स्वष्टमन्यत् ॥ २ ॥

अथाग्निमेकाहे प्रथमं षष्टस्तोमं विधत्ते ।

तस्य महाव्रतं पृष्ठं ॥ ३ ॥

तस्य सर्वजितः महाव्रताख्यं प्रागुक्तं स्तोत्रं पृष्ठं भवति माहेन्द्रस्तोत्रं भवतीत्यर्थः. कल्पकारेण विस्तरेण महाव्रतस्तोत्रस्वरूपमुक्तं इन्द्रमिन्नाथिनो बृहदिन्द्रोदधीचो उद्वेदभिश्रूतामद्यमिति त्रिवृच्छिरो गायत्रं पञ्चदशं रथन्तरं दक्षिणः पक्षः सप्तदशं बृहदुत्तरः पक्षः एकविंशं भद्रं पुच्छं तदिदास भुवनेषु ज्येष्ठमिति पञ्चविंश आत्मा राजनमिति शिर आद्यवयवपञ्चकत्वेन रूप्यमाणं गायत्र्यादि सामपञ्चकं उक्तस्तोमकं महाव्रतस्तोत्रमिति कल्पार्थः ॥ ३ ॥

अथ शस्त्रं विधत्ते।

अर्कꣳ शस्यते ॥ ४ ॥

अर्कः सूर्यः तत्सम्बन्धिबृहती सहस्राख्यं शस्त्रं शस्यते अनेन शस्त्रेण होत्रा महाव्रतस्यानुशंसनं कार्यमित्यर्थः ॥ ४ ॥

अथ पञ्चविंशस्तोमकत्वं स्तौति।

चतुर्विꣳशतिः संवत्सरस्यार्द्धमासाः संवत्सरः पञ्चविंशोऽन्नं व्रतꣳ संवत्सरादेतेनान्नाद्यमवरुन्धे ॥ ५ ॥

संवत्सरस्य चतुर्विंशतिः संख्या ह्यर्द्धमासास्तत्स्थानीयाश्चतुर्विंशतिः स्तोत्रीयाः तेषामर्द्धमासानां पञ्चविंशः पञ्चविंशतिसंख्यापूरकः संवत्सरः स एवं पञ्चविंशस्तोत्रीयात्मकः यदेतन्महाव्रताख्यं स्तोत्रं तदन्नं तस्यान्नरूपत्वं प्रथमपङ्क्तिकायामुक्तं

एवञ्च पञ्चविंशस्तोमं महाव्रतं प्रयुञ्जानः संवत्सरादेव एतेन यागेनान्नाद्यमवरुन्धे ॥ ५ ॥

अथैतद्वेदितुः फलमाह।

अन्नादो भवति य एवं वेद ॥ ६ ॥

स्पष्टोऽर्थः ॥ ६ ॥

अथ प्रकारान्तरेण स्तौति।

एतेन वै गौराङ्गिरसः सर्वं पाप्मानमतरत्सर्वं पाप्मानमत्यरत्येतेन स्तोमेन तुष्टुवानः ॥ ७ ॥

एतेन पञ्चविंशस्तोमेन गौर्नामाङ्गिरसः ऋषिः सर्वं पाप्मानं पापं अतरत् अत्यक्रमीत् स्पष्टमन्यत् अस्यावशिष्टस्तोत्रकल्पनं कल्पकारोक्तं द्रष्टव्यं ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे षोडशाध्यायस्य

सप्तमः खण्डः।

अथ अष्टमः खण्डः

अथ सप्तसदक्षिणाः साहस्रा नाम चत्वारएकाहास्तत्र ज्योतिरग्निष्टोमः प्रथमस्तं दर्शयति।

अथैषज्योतिः ॥ १ ॥

अथेत्यानन्तर्ये एष वक्ष्यमाणो ज्योतिःसंज्ञ एकाहः ॥ १ ॥

अग्निष्टोमसंस्थां विधित्सुराह।

पराङ्वै चिरात्रोऽर्वाङग्निष्टोमो यस्त्रिरात्रे विभ्रंशते न तस्मिन् पुनरस्त्यथ योऽग्निष्टोमे प्रायश्चित्तिमत्तदपि ह्येतेनैकविंशतिदक्षिणेन पुनर्यजेत यस्मिन्नेव यज्ञक्रतौ विभ्रंशते सैव तस्य प्रायश्चित्तिः ॥२॥

योऽयं त्रिरात्रस्तिसृणां रात्रीणां समाहारः अहीनोगर्गत्रिरात्राख्यो विधास्यते स पराङ्वै परागतः प्रराङ्मुखः योऽयं प्रकृतिभूतोऽग्निष्टोमः सः अर्वाङ् अभिमुखः अतो यो यजमानस्त्रिरात्रे क्रतौ विभ्रंशते विभ्रष्टो भवति स तस्मिंस्त्रिरात्रे पुनर्नास्ति पुनरधिक्रतो न भवति योऽग्निष्टोमे विभ्रंशते तत्तस्य प्रायश्चित्तिमत् प्रायश्चित्तयुक्तं कर्म्म भवति किं तत् प्रायश्चित्तमुच्यते एतेनाग्निष्टोमेन एकविंशतिदक्षिणेन पुनरविकलेन यजेत यस्मिन्नेव यज्ञक्रतौ विभ्रंशते पूर्व्वं विभ्रष्टो भवति तस्य यज्ञस्य सैव प्रायश्चित्तिः अतस्त्रिरात्रादग्निष्टोमस्य गरीयस्त्वात् अग्निष्टोमसंस्थैवास्य ज्योतिषः कार्य्येत्यर्थः ॥ २ ॥

अथ तस्मिन्नेकाहे प्रातरनुवाकस्य होत्रानुवक्तव्यस्य परिमाणं कालविशेषं दक्षिणापरिमाणं ब्रह्मसाम्नः स्तोत्रीयाक्षरपरिमाणञ्च मिश्रवदनूद्य प्रतिष्ठाहेतुत्वेन स्तौति।

उपसदि सहस्रं प्रातरनुवाकमन्वाह तदसौ लोकः सहस्रं दक्षिणास्तदन्तरिक्षꣳ सहस्रमेतान्यक्षराणि तदयं लोक एषु लोकेषु प्रतितिष्ठति य एवं वेद ॥३॥

उपसदि उपसद्दिवसे सहस्रं सहस्रसंख्याभिर्ऋग्भिः परिमितं प्रातरनुवाकं होतानुब्रूयात् तं सहस्रं असौ स्वर्गलोकः तथास्मिन्नेकाहे सहस्रं दक्षिणाः सहस्रसंख्यागावो दक्षिणात्वेन दातव्याः तत् सहस्रमन्तरिक्षात्मकं एतानि ब्रह्मसामानि ब्रह्मसाम्नः सम्बन्धीनि ब्रह्मसाम्नः सहस्रमक्षराणीत्युक्तं कल्पकारेण ब्रह्मसामस्वादोरिक्थेति पंक्त्यां श्रुतमाम्नातं सा च चत्वारिंशद्भिरक्षरैरुपेता एवञ्च पञ्चविंशस्तोमकल्पनया सहस्रं सम्पद्यत इति तदयं भूर्लोकः एवं सहस्रत्रयस्य लोकत्रयात्मकतां यो वेत्ति विदित्वा चानुतिष्ठति स एषु त्रिषु लोकेषु प्रतितिष्ठति ॥ ३ ॥

अथैतत् सहस्रदक्षिणापरिमाणं प्रकारान्तरेण स्तौति।

ऋक्था वा अन्यत् सहस्रमित्याऽऽहुरक्षरेत्था अन्यदिति यत् त्रिरात्रे दीयते तदृक्था अथ यदग्निष्टोमे तदक्षरेत्था ॥ ४ ॥

अन्यदेकं सहस्रं सहस्रसंख्यादक्षिणा ऋक्था ऋक्संख्यया तत्स्थिता; अपरं सहस्रं सहस्रसंख्यादक्षिणा अक्षरेत्था अक्षरसंख्ययावस्थिता इति ब्रह्मवादिन आहुः का पुनः कुत्रेति विविच्यते यत् सहस्रं गर्गत्रिरात्रे दक्षिणात्वेन दीयते तदृक्था तत् सहस्रसंख्यादक्षिणा ऋक्था तत्र हि सहस्रं स्तोत्रीयाः सहस्रं दक्षिणा इति स्तोत्रीयाणामृचां सहस्रसंख्या दृश्यते तस्माच्च तत्संख्यया दक्षिणा ऋक्था भवति अथ यत् सहस्रमग्नि-

ष्टोमे अग्निष्टोमसंस्थे अस्मिन्नेकाहे दक्षिणा सहस्रमक्षरेस्रा ब्रह्मसाम्नः स्तोत्रीयाक्षरसंख्यावस्थिता अक्षरेस्रा ॥ ४ ॥

एतावद्दक्षिणेति।

यत् सहस्राक्षरासु ब्रह्मसाम भवति सहस्रस्यैव सा प्रतिष्टुतिः ॥ ५ ॥

स्वादोरित्थाविषूवत इत्याद्यास्तिस्रः पङ्क्तयोऽत्र ब्रह्मसाम्नः स्तोत्रीयास्ताः प्रत्येकं चत्वारिंशदक्षराः पञ्चविंशस्तोमकत्वात् आवृत्त्या पञ्चविंशतिसंख्याकाः पङ्क्तयो भवन्ति एवञ्च प्रत्यृचां चत्वारिंशत्सङ्ख्या परिगणनायां सहस्राक्षराणि सम्पद्यन्ते तदिदमुक्तं सहस्राक्षरास्विति यत् सहस्राक्षरासु ब्रह्मसाम ब्रह्मणः पृष्ठस्तोत्रनिर्वर्त्तकं स्थेताख्यं साम भवति सा सहस्रस्यैव दीयमानस्येव प्रतिष्टुतिः प्रतिस्तवनं ॥ ५ ॥

अथान्यप्रकारेण दक्षिणादानं स्तौति।

यावद्वै सहस्रङ्गाव उत्तराधरा इत्याऊस्तावदस्मात् लोकात् स्वर्गोलोक इति तस्मादाऊः सहस्रयाजो वा दूमान् लोकान् प्राप्नोति ॥ ६ ॥

सहस्रं सहस्रसङ्ख्यागावः उत्तराधरा अन्योन्यस्योपरि उत्तराधरभावेनावस्थिताः यावदुक्ष्रिता भवन्ति अस्माल्लोकात्तावत्प्रमाणे उन्नते स्थाने स्वर्गाख्योलोक इति ब्रह्मवादिन आऊः यस्मादेवं सहस्रगवोर्द्धप्रमाणे स्वर्गः तस्मादेव आऊर्ब्रह्मवा-

दिनः सहस्रयाजी सहस्रगोदक्षिणेन यागेनेष्टवान् पृथिव्यादीन् लोकान् व्याप्नोतीति यद्यपि पूर्वं सहस्रगवोर्द्धप्रमाणः स्वर्ग इति एकस्यैव लोकस्य प्राप्यत्वमवगम्यते तथापि नान्तरीयकं पृथिव्यन्तरिक्षयोः प्रापणमित्यभिप्रायेणेमान् लोकानिति बहुवचनं ॥ ६ ॥

अथ ब्रह्मसाम्नः पङ्क्तिच्छन्दस्का ऋचो विधातुमाह ।

पशुभिर्वा एष व्यृध्यत इत्याङ्गिरसः सद्यः सहस्रं ददातीति पङ्क्तिषु ब्रह्मसाम भवति पाङ्क्तो यज्ञः पाङ्क्ताः पशवो यज्ञ एव पशुषु प्रतितिष्ठति ॥ ७ ॥

योऽयं यजमानः सद्योयुगपदेव गवां सहस्रं ददाति एष पशुभिः व्यृध्यते क्षीयते तत्परिहाराय पङ्क्तिषु पङ्क्तिच्छन्दस्कासु ऋक्षु स्तोदोरिक्थाविषूवत इत्याद्यासु स्थितं ब्रह्मसाम भवति पाङ्क्तः पङ्क्तिसम्बन्धी यज्ञः पशवश्च पाङ्क्ताः पङ्क्तिसम्बन्धाः एवञ्च पङ्क्तिच्छन्दसा यज्ञएव पशुषु प्रतितिष्ठति पुनर्बहुपशुको भवतीत्यर्थः ॥ ७ ॥

अथैतस्याग्नेः स्तोत्रीयासम्मितिद्वारेण स्तुतिं करोति ।

त्रिष्टुतꣳ स्तोमꣳ सम्पद्यते विराजं छन्दः ॥ ८ ॥

स्तोत्रीयाणामियत्तापरिज्ञानाय कल्पकारेण कृतास्तोमकृप्तिः प्रदर्श्यते त्रिष्टवहिष्पवमानं पञ्चदशः तत्तस्त्र्याज्यानीति द्वे

पञ्चदशके द्वे त्रिवृती इत्यर्थः पञ्चदशत्रिवृत्स्तोत्राणि सप्तदशो माध्यन्दिनः पवमानो होतुश्च षष्ठं पञ्चदशं मैत्रावरुणस्य पञ्चविंशं ब्राह्मणाच्छंसिनः सप्तदशमच्छावाकस्य एकविंश आर्भवः पवमान एकविंशोऽग्निष्टोम इति एवञ्च प्रातःसवनीयाः स्तोत्रीयाः सप्तपञ्चाशत् ५७ माध्यन्दिनपवमानीया एकनवतिः ९१ तृतीयसवने द्विचत्वारिंशत् ४२ संहत्य नवत्यधिकशतस्तोत्रीया भवन्ति १९० ताश्चतुर्विंशतिसंख्या त्रिवृतः एका विराट् भवति तदेतदुच्यते त्रिवृतं स्तोममिति पूर्वोक्तस्तोमको यज्ञस्त्रिवृतं स्तोमं सम्पद्यते विराडाख्यं छन्दश्च त्रिवृतो हि नवस्तोत्रीयाः तथाच स्तोत्रीयाणां नवनवशो भागे अशीतिशताभिः स्तोत्रीयाभिः विंशतित्रिवृतः सम्पद्यन्ते ॥ ८ ॥

अवशिष्टा दशस्तोत्रीयाः सा एका विराट् किमत इत्याह।

प्राणो वै त्रिवृदन्नं विराण्नवैव प्राण ऋतेऽन्नात्सारयति नान्नऋते प्राणात्प्राणेषु चैवान्नाद्ये च प्रतितिष्ठति ॥ ९ ॥

त्रिवृत् स्तोमः प्रजापतिमुखादुत्पन्नः प्राणवायुश्च मुखे वर्त्तत इति तस्य प्राणात्मकत्वं विराट् छन्दो दशाक्षरं अन्नञ्च दशविधेन्द्रियतर्पकं तस्माद्विराजोऽन्नत्वं नवैव खलु प्राणाः प्राणवायुः अन्नाद्यो अन्नं विहाय शरीरेऽवस्थातुं शक्नोति अन्नं प्राणमन्नमपानमाहुरिति श्रुतेः तथा प्राणाऋते प्राणं विहाय अन्नमपि शरीरं पोषयितुञ्च शक्नोति तस्मादनयोः

परस्परसहकारित्वादुभयोरेव सह सम्पादनेन प्राणेषु चैव अन्नाद्येषु यजमानः प्रतिष्ठितो भवति ॥ ९ ॥

इति तारण्यमहाब्राह्मणे षोडशाध्यायस्य
अष्टमः खण्डः ।

अथ नवमः खण्डः ।

अथ द्वितीयमन्यं साहस्रमेकाहं दर्शयति ।

अथैष सर्वज्योतिः सर्वस्याप्तिः सर्वस्य जितिः सर्वमेवैतेनाप्नोति सर्वञ्जयति ॥ १ ॥

अथानन्तरमेष वक्ष्यमाणः सर्वज्योतिर्नामैकाह उच्यत इति शेषः स च सर्वस्य फलस्याप्तिः प्राप्तिसाधनं तथा सर्वस्य जेतव्यस्य जितिर्जयसाधनं तस्मादनेन यो यजते स सर्वमेतेन फलमाप्नोतीति सर्वं च जेतव्यं जयति ॥ १ ॥

अथास्य सहस्रदक्षिणात्ववेदनं स्तौति ।

परमो वा एष यज्ञः परमꣳ सहस्रं परमतां गच्छति य एवं वेद ॥ २ ॥

एष सर्वज्योतिर्नाम यज्ञः परमोवै सर्वेभ्य उत्कृष्टः सर्वज्योतिरिति संज्ञया सकलतेजोमयत्वात् यदस्य दक्षिणारूपं सहस्रं

तदपि परमं शतादिसंख्याया आधिक्यात् एवं सहस्रदक्षिणस्य परमत्वं यो वेद परमतां श्रेष्ठतां गच्छति ॥ २ ॥

अथास्य स्तोत्रीयाः संहत्यानूद्य सहस्रदक्षिणात्वमित्याह।

तस्य द्विशताः स्तोत्रीया अन्तो वै वाचो द्विशतमन्तः सहस्रमन्त एव तदन्तं प्रतिष्ठापयति ॥ ३ ॥

पूर्ववदत्रापि स्तोमसंख्याः कल्पकारकृता प्रदर्श्यते तस्य त्रिवृत्बहिष्पवमानं पञ्चदशान्याज्यानि सप्तदशो माध्यन्दिनः पवमानस्तोत्राणि च षष्टानि पञ्चविंशं ब्राह्मणाच्छंसिनः सप्तदश आर्भव एकविंशोऽग्निष्टोम इति एवञ्च प्रातःसवने एकोनसप्ततिः ६९ स्तोत्रीयाः माध्यन्दिने त्रिनवतिः ९३ तृतीयसवनेऽष्टत्रिंशत् ३८ मिलित्वा द्विशतं स्तोत्रीया भवन्ति २०० तदिदमुक्तं तस्य द्विशता इति तस्य सर्वज्योतिर्नाम्नः द्विशता शतद्वयपरिमिताः स्तोत्रीया ऋचो भवन्ति वाचः प्रजन्तस्य द्विशतसंख्यान्तो वै अवसानभूतं सहस्रसंख्या चान्तः तस्मात् न्यूनसंख्यानां अवसानभूतत्वात् तथाच द्विशतस्तोत्रीयात्मके क्रतौ सहस्रदक्षिणादानं कुर्वन् अन्तत एवान्तं प्रतिष्ठापयति परस्परं सम्बन्धं करोतीत्यर्थः ॥३॥

अथैतत् प्रकारान्तरेण स्तौति।

क्रतुस्तोमो वा एष सर्वमेवैतेनाप्नोति सर्वं जयति सर्वꣳ ह्येतेन जयति ॥ ४ ॥

एष सर्वज्योतिर्नामैकाहः क्रतुस्तोमो वै क्रतुः पूर्वस्मिन्नेकाहे

क्लृप्तः स्तोमः स्तोत्रीयासमूहो यस्य स तथोक्तः निष्पन्नस्तोत्रक इत्यर्थः स्पष्टमन्यत् सर्वजयहेतुः सर्वं हि क्रतुनेति सर्वं जेतव्यं हि यस्मात् क्रतुना निष्पन्नेनैव साधनेन लोकोजयति यस्मादित्यर्थः ॥ ४ ॥

अथान्नप्राप्तिसाधनत्वेन स्तौति ।

विराजꣳ सम्पद्यतेऽन्नं विराडन्नाद्यमेवावरुन्धे ॥५

दशाक्षरा विराट् अस्य चैकाहस्य पूर्वोक्तानां स्तोत्रीयाणां दशसंख्यया विभागे विंशतिर्विराजो भवन्ति तथा चायं यज्ञो विराजं सम्पद्यते प्राप्नोति शिष्टं सिद्धं ॥ ५ ॥

अथाग्निष्टोमसाम्नः स्तोमं विधाय स्तौति ।

एकविंशोऽग्निष्टोमो भवति प्रतिष्ठा वा एकविंशोऽन्तत एव यज्ञस्य प्रतितिष्ठति ॥ ६ ॥

एकविंशस्तोमकोऽग्निष्टोमो भवति अग्निष्टोमसामं एकविंशस्तोमको भवतीत्यर्थः किमतो भवति तदुच्यते तथा प्रतिष्ठारूपो ह्येकविंशः पूर्वमुक्तः तथाच यज्ञस्यान्ततोऽवसान एव यजमानः प्रतिष्ठितो भवतीति ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे षोडशाध्यायस्य

नवमः खण्डः ।

अथ दशमः खण्डः ।

अथ विश्वज्योतिःसंज्ञं तृतीयं साहस्रमेकाहं दर्शयति ।

अथैष विश्वज्योतिरुक्थ्यः ॥ १ ॥

अथानन्तरं एष वक्ष्यमाणो विश्वज्योतिर्नाम उक्थ्यः उक्थसंस्थः अन्यः साहस्र एकाहः ॥ १ ॥

अथैतस्य विश्वज्योतिरिति संज्ञां उक्थसंस्थतां च स्तौति ।

पशवो वा उक्थानि पशवो विश्वं ज्योतिर्विश्व एव ज्योतौ पशुषु प्रतितिष्ठति ॥ २ ॥

उक्थान्युक्थस्तोत्रीयाणि पशवो वै तत्साधनत्वात् तच्छन्दवाच्याः पशवश्च विश्वं व्याप्तं ज्योतिस्तेजः बहुपशुको हि लोकेऽतिशयेन प्रकाशते तस्माद्विश्वज्योतिःसंज्ञ एकाहे उक्थस्तोत्राणि प्रणयन् विश्वव्याप्ते ज्योतौ ज्योतींष्येष पशुषु प्रतितिष्ठति ॥ २ ॥

अथैतं विरात्रसाम्येन स्तौति ।

अष्टभिर्वै चिरात्र इमान् लोकानाप्नोति सवनैरेष उत्तरमुत्तरं चिरात्रस्याहर्वर्षीय उत्तरमुत्तरमेतस्य सवनं वर्षीयस्तेन चिरात्रमाप्नोत्युत्तर उत्तर एषां लोकानां ज्यायाꣳस्तेनेमान् लोकानाप्नोति ॥३॥

योऽयं वक्ष्यमाणो गर्गत्रिरात्राख्यः सोमयागः अयमहर्भिः क्रमेणानुष्ठितैः अग्निष्टोमोक्थ्यातिरात्रसंस्थैस्त्रिभिरहोभिरेव द्यूमान् पृथिव्यादीन् लोकानाप्नोति एष तु विश्वज्योतिर्नाम यज्ञस्त्रिभिरेव सवनैस्तानाप्नोति तथा चास्य त्रिरात्रस्य यदुत्तरमुत्तरमहस्तद्वर्षीयः वृद्धतरं अग्निष्टोमोक्थ्यातिरात्रसंज्ञानामुत्तरोत्तरं विवृद्धस्तोमकत्वात् एतस्यैकाहस्य उत्तरमुत्तरं सवनं वर्षीयः प्रातःसवनात् माध्यन्दिनं सवनं वृद्धतरं ततोऽपि तृतीयसवनं वृद्धतरं एतच्चाग्रे दर्शयिष्यते तथाच एष यस्त्रिरात्रं यज्ञक्रतुमाप्नोति तद्वत्प्रशस्तो भवतीत्यर्थः अपिच एषां पृथिव्यादिलोकानां मध्ये उत्तरउत्तरो लोकोज्यायान् वृद्धतरोऽतिशयेन विस्तीर्णः तेनोत्तराधिकसवनेन यज्ञेन द्यूमानेव लोकानाप्नोति ॥ ३ ॥

अथास्य सवनानामुत्तरोत्तराधिक्यं दर्शयितुमाह।

अस्यूरिर्वा एष सन्ततो यज्ञो द्वौ द्वौ हि स्तोमौ सवनं वहतः ॥ ४ ॥

अस्यूरिरश्वहृद्ययुक्तो यो रथस्तत्सदृश एष सन्ततः संहितो यज्ञः कुतः हि यस्मात् द्वौ द्वौ स्तोमौ संहत्य अस्यैकैकं सवनं वहतः ॥ ४ ॥

कतमौ च द्वौ द्वौ स्तोमाविति तत्राह।

त्रिष्टुप्पञ्चदशौ प्रातःसवनꣳ सप्तदशपञ्चविꣳशौ

माध्यन्दिनꣳ सवनञ्चतुर्विꣳशैकविꣳशौ तृतीयस-
वनं ॥ ५ ॥

त्रिवृद्वह्निप्लवमानस्य स्तोमः पञ्चदश आज्यानां एवमेतौ
वंहतौ प्रातःसवनं वहतः एवमुत्तरौ द्वौ द्वावपि द्वे सवने
वहतः ॥ ५ ॥

अथैतत् स्तोमद्वययोजनं प्रशंसन् पूर्ववत्सहस्रं देयमित्याह ।

यद्वै युक्ते सन्तत आधीयते वहति तद्यथा युक्ते
सन्तत आदध्यादेवमेतस्मिन् सहस्रमाधीयते ॥ ६ ॥

यद्वै यत् खलु द्रव्यं युक्ते अश्वाभ्यां योजिते सन्तते सम्बद्धे
रथे आधीयते आरोप्य निधीयते स रथस्तद्द्रव्यं वहति यथैव
युक्ते सन्तते च रथे आदध्यात् वोढव्यं भारं निदध्यात् एवमेवै-
तस्मिन्नेकाहे प्रतिसवनं स्तोमद्वयेन युक्ते दक्षिणानां गवां सहस्र-
माधीयते आरोप्यते अस्यापि यज्ञस्य पूर्ववत् सहस्रं दक्षिणा
दातव्या इत्यर्थः ॥ ६ ॥

षोडशेन प्राप्तयोर्बृहद्रथन्तरयोः प्रकृतिवद्विकल्पे प्राप्ते समु
च्चयं विधत्ते ।

उभे बृहद्रथन्तरे भवतः ॥ ७ ॥

रथन्तरसाध्यन्दिने पवमाने कार्ये बृहद्धोतुः पृष्ठतृति उभयं
सामसु पूर्वमुक्तं ॥ ७ ॥

अथैतत् स्तौति ।

इयं वै रथन्तरं द्यौर्बृहदेवास्माल्लोकाद्गायत्येवा-मुष्माद्बृहद्गायत्येवयोरनयोर्लोकयोः प्रतितिष्ठति ॥ ८ ॥

इयं पृथिव्येव रथन्तरं साम द्यौः स्वर्गोलोको बृहत् एव आदृव अस्मादेव भूर्लोकाद्रथन्तरं गायति असुष्मात् द्युलोक द् बृहद्गायति तथा चानयोरुभयोर्द्यावापृथिव्योर्लोकयोर्यजमानः प्रतितिष्ठति ॥ ८ ॥

अथान्यत्साम विधत्ते ।

अनुष्टुब्याथर्वणं भवति ॥ ९ ॥

आर्भवे पवमाने पुरोजिती वो अन्धस इत्यस्मिन्ननुष्टुभे ऋचे श्यावाश्वान्धीगवे गीत्वा तस्मिन्नेव ऋचे पुनराथर्वणं साम गातव्यं तथा च कल्पकृतोक्तं यस्येमदो वरेण्य इति गायत्रौक्ते आन्धीगवादुत्तरमाथर्वण इति ॥ ९ ॥

अथैतत् स्तौति ।

भेषजं वै देवानामथर्वाणो भेषज्यायैवारिष्ट्यै ॥ १० ॥

अथर्वाणः अथर्वणा ऋषिणा दृष्टा मन्त्राः देवानां भेषजं वै भैषज्यरूपास्मादेतत्साम भेषजाय भैषज्याय अरिष्ट्यै अहिंसायै भवति ॥ १० ॥

अथोक्थस्तोत्रेष्वन्तिमेऽन्यत्साम विधाय स्तौति ।

उद्वृहतीयमुक्थानामन्ततो भवति सर्वेषां वा एतत् पृष्ठानाꣳ रूपꣳ सर्वेष्वेव रूपेषु प्रतितिष्ठति ॥ ११ ॥

उक्थानामुक्थस्तोत्राणामन्ततोऽवसाने अच्छावाकोक्थस्तोत्रे उद्गीयं साम भवति यथोक्तं कल्पकारेण साकमश्वं सौभरं त्रैककुभञ्चोद्गीयमित्युक्थानीति साकमश्वं होतुरुक्थं सौभरत्रैककुभयोरन्यतरद् ब्रह्मणः उद्गीयमच्छावाकस्येति कल्पार्थः एतदुद्गीयं सर्वेषां रथन्तरादीनां षण्णां पृष्ठानां रूपं एतच्चाष्टमेऽध्याये प्रपञ्चेन दर्शितं स्पष्टमन्यत् ॥ ११ ॥

अथास्य पूर्वोक्तामुक्थसंस्थामनूद्य स्तौति ।

उक्थो भवति पशवो वा उक्थानि पशवः सहस्रं पशुष्वेव तत्पशून्दधाति ॥ १२ ॥

अयमुक्थसंस्थो भवति उक्थस्तोत्राणि पशुसाधनत्वात् पशवात्मकानि सहस्रसंख्यादक्षिणास्तु पशवस्तेन पशुष्वेव पशून् दधाति स्थापयति ॥ १२ ॥

इति ताण्ड्यमहाब्राह्मणे षोडशाध्यायस्य
दशमः खण्डः ।

अथ एकादशः खण्डः ।

अथाग्निष्टोमसंस्थं चतुर्थं साहस्राख्यं एकाहं विधित्सुराह ।

यो वा अग्निष्टोमे विराजं प्रोतं विद्यात्सोऽग्निष्टोमे सहस्रं दद्यात् विराजायतनꣳ हि सहस्रं ॥ १ ॥

यो ह्यग्निष्टोमे अग्निष्टोमसंस्थे एकाहे त्रिरात्रं वक्ष्यमाणं गर्गत्रिरात्राख्यंयज्ञं प्रोतं प्रतिमुक्तं विद्यात् जानीयात् सोऽस्मिन्नग्निष्टोमे सहस्रं दक्षिणा दद्यात् त्रिरात्रायतनं त्रिरात्र एव आयतनमिति स्थानं यस्य तथाविधं हि सहस्रं सहस्रदक्षिणादानं तस्मादस्यैकाहस्य त्रिरात्रसम्बन्धं विदुषा सहस्रगावो दक्षिणात्वेन दातव्या इत्यर्थः एवञ्चाग्निष्टोमसंस्थेन सहस्रदक्षिणेन यजेतेति विधिरुन्नेतव्यः ॥ १ ॥

अथास्मिंस्त्रिरात्रस्य प्रोतत्वं दर्शयितुं तदीयानां त्रयाणामृचां याः प्रतिपदस्तोमसामन्यतमास्य प्रतिपत्काय्यैत्याह ।

उपास्मै गायतानर उपोषु जातमप्तुरं पवस्व वाचो अग्रिय इति प्रतिपदो भवन्त्येतद्वै त्रिरात्रमकः ॥ २ ॥

उपास्मै गायतानर इत्यादिऋचानां मध्ये अन्यतमस्तृचोऽस्मिन्नहनि बर्हिष्पवमानस्य प्रथमस्तृचः कार्य्यः एतत् वै एतद्धि प्रतिपत्त्रयं त्रिरात्रं गर्गत्रिरात्रं अकः अकार्षीत् तदीयेषु त्रिष्वहःसु एतेषां बर्हिष्पवमानस्य क्रमेण प्रथमऋचत्वात् तस्मादत्रायेषामन्यतमः प्रथमस्तृचः अपरौ ऋचौ दविद्युतत्यारुचा पवमानस्य ते कव इति कल्पकारोक्तौ द्रष्टव्यौ ॥ २ ॥

अथ त्रिरात्रसम्बन्धिष्वहःसु यानि पृष्ठसामानि तान्यत्र क्रियन्त इत्याह ।

पवमाने रथन्तरं करोति पवमानस्यान्त्यं वामदेव्यं बृहत् पृष्ठं ॥ ३ ॥

अत्र कल्पः उच्यते जातमन्धस इति गायत्रञ्चामहीयवञ्च पवस्व मधुमत्तम इतीडानां संज्ञार एकस्यां प्रजं पीयूषं पूर्व्यं यदुक्थमिति यौधाजयं तिसृषु पुनानः सोमधारयेति रौरवमेकस्यां रथन्तरं तिसृषु शिशुञ्जज्ञानं हर्य्यतमृतीति वामदेव्यमन्त्यं बृहत् पृष्ठमिति तस्मादेवं स्तृप्रान् माध्यन्दिने पवमाने पुनानः सं मेति तृचे रथन्तरं साम बृहत्साम होतुः पृष्ठं स्तोत्रं गातव्यं तथा शिशुञ्जज्ञानमित्यस्मिंस्तृचे गीयमानं वामदेव्यं तस्य पवमानस्यान्त्यं साम भवति तथा बृहत्साम होतुः पृष्ठं भवति ॥ ३ ॥

अथैतेषां सङ्घातकरणं स्तौति ।

दूयं वै रथन्तरमन्तरिक्षं वामदेव्यं द्यौर्बृहदिमे लोकास्त्रिरात्रो यदेतानि सामानि सधस्त्र्यञ्चि करोतीमानेव तल्लोकान् सन्दधाति तेन विराजमाप्नोति ॥ ४

रथन्तरवामदेव्यबृहतां पृथिव्यन्तरिक्षस्वर्गात्मकत्वं प्रागुक्तं त्रिरात्रस्येमे पृथिव्यादयो लोकाः वसुरुद्रादित्यैस्त्रिरात्रावयवानामग्निष्टोमोक्थ्यातिरात्राणां त्रयाणामङ्गां पृथिव्यादिलोकत्रयसाधनतया क्रमेण प्रयुक्तत्वात् तथा चान्यासुते एवञ्च यदेतानि त्रिरात्रे वियुज्य प्रयुज्यमानानि रथन्तरादीनि सामानि

सम्भरन्ति सहाश्नुतीति तत्तथा अस्मिन्नहनि सह प्रयुक्तानि करोति तत्तेनेमानेव पृथिव्यादिलोकान् सन्दधाति परस्परं संयोजयति तथा लोकद्वारा विराजं यज्ञक्रतुमाप्नोति ॥ ४ ॥

अथ सर्वप्रकृतौ ज्योतिष्टोमे तृतीयसवने पवस्व मधुमत्तम इति यः काकुभः प्रगाथ सोऽत्रापि चोदकेन तृतीयसवन एव प्रयोज्यत्वेनातिदिश्यते तस्य माध्यन्दिनपवमान आकृत्य प्रयोगं विधत्ते ।

काकुभं प्राचीमुदूहति ॥ ५ ॥

पवस्व मधुमत्तम इत्येतां काकुप्छन्दस्कां स्तोत्रीयां प्राचीं प्राग्भागे वर्त्तमानामुदूहति आर्भवात् पूर्वभागे माध्यन्दिनपवमाने तां प्रापयेत प्रयुञ्जीतेत्यर्थः ॥ ५ ॥

अथैतस्मात् पूर्वस्मिन् भागे आकर्षणमुपपादयति ।

पुरो ह्येतया सत्या अपशुवीर्यं करोति ॥ ६ ॥

पुरः पुरस्तात् पूर्वभागे वर्त्तमानया ह्येतया काकुभा स्तोत्रीयया अपशुः पशुरहितः सोमयागः तदुत्पत्त्यर्थं वीर्यं करोति तस्मात्तां प्राचीमुदूहेदित्यर्थः ॥ ६ ॥

अथ तत्र कर्त्तभिगेयं साम विधाय स्तौति ।

तस्याभिडानाꣳ संज्ञारः पुरुषो वै काकुप् पशव उड़ानाꣳ संज्ञार आत्मन्येव तत्पशून् प्रतिष्ठापयति ॥ ७ ॥

तस्यां ककुभि स्तोत्रीयायामिडानां संस्काराख्यं साम गातव्यं तच्चैव पूर्व्वं कल्प उदाहृतः किमतस्तदुच्यते पुरुषो हि ककुप्छन्दः ककुप्प्राणः छन्दस्य पुंस्त्वात् अस्यापि ककुप्स्थानीयेनाधिकेन मध्यमपादेन युक्तत्वेन तत्साम्यात् पुंस्त्वं योऽयमिन्द्रानां संस्कारः सपशवः गोवाचकेनेडानां शब्देनाभिधेयत्वात् तत्तथा च ऋक्सामयोः पुरुषपशुात्मकत्वात् पुरुषरूपे आत्मन्येव पशून् प्रतिष्ठापयति ॥ ७ ॥

अथास्मिन्नेव माध्यन्दिने सवमाने यौधाजयस्याधारभूतास्तिस्रः स्तोत्रीया विदधाति।

प्रत्नम्पोयूषम् पूर्व्यं यदुक्थमिति सतोबृहत्यो भवन्ति ॥ ८ ॥

स्पष्टोऽर्थः ॥ ८ ॥

अथैताः स्तौति।

सतोबृहत्या वै देवा इमान् लोकान् व्याप्नुवन्निमानेवैताभिर्स्तोकान् व्याप्नोति ॥ ९ ॥

सतोबृहत्या बृहतीछन्दस्कया खलु पुरा देवाः इमान् पृथिव्यादिलोकान् व्याप्नुवन् स्पष्टमन्यत् ॥ ९ ॥

अथैतासां गायत्र्यादिसर्व्वछन्दोरूपत्वं प्रदर्शयन् सर्व्वपशुसाधनतामाह।

ता वा एता गायत्र्यो यच्त्रिपदास्तेन गायत्र्य-

स्तावा एता जगत्यो यद्द्वादशाक्षराणि पदानि तेन जगत्यस्तावा एता बृहत्यो यत् षट्त्रिंशदक्षरास्तेन बृहत्यः सर्वेषां वा एताश्छन्दसाꣳ रूपꣳ सर्वाणि रूपाणि पशूनामवरुन्धे ॥ १० ॥

ता वा एताः प्रत्तं पीयूषमित्याद्याः गायत्र्यो भवन्ति कथं सतोबृहतीनां गायत्रीत्वमिति अत्रोच्यते यद्यस्मात् एतासु पदाक्षरेण गायत्रीसाम्यात् गायत्यस्तथा ता एता जगत्यो भवन्ति एतदुपपद्यते यत् द्वादशाक्षराणि पदानीति पादाः प्रथमपादस्य अक्षरव्यूहेन द्वादशाक्षरत्वं एवं बृहतीत्वमपि योज्यं यस्मादेवमेताः सर्वेषां गायत्र्यादीनां छन्दसां रूपं तस्मादेताभिः सर्वाणि पशूनां रूपाण्यवरुन्धे नानारूपान् सर्वान् पशून् लभत इत्यर्थः ॥ १० ॥

अथैतं यज्ञस्य महाव्रतात्मना रूपयन् स्तौति ।

एतद्वै प्रत्यक्षं महाव्रतस्य गायत्रꣳ शिरो बृहद्व्यन्तरे पक्षौ वामदेव्यमात्मा यज्ञायज्ञीयं पुच्छन्दक्षिणा एवाक्यमेष वाव प्रत्यक्षं महाव्रतेन स्तुते य एतेन यजते ॥ ११ ॥

एष खलु वै यज्ञः प्रत्यक्षं मुख्यं महाव्रतं यद्वै शिरः पक्षादिभिरवयवैर्भवितव्यं महाव्रतस्तोतस्य शिरःप्रभृति पुच्छावयवात्मकत्वात् अत्र कथं तेषां सङ्गाव इति तत्राह तस्येति तस्य प्रकृतस्य महाव्रतस्य यतः यज्ञायज्ञं साम प्रातःसव-

नादौ प्रयुज्यते तच्छिरः पश्चात् माध्यन्दिनपवमाने बृहत् स्तोत्रे च प्रयुज्यमाने बृहद्रथन्तरे पक्षौ भवतः माध्यन्दिनपवमानान्ते प्रयुज्यमानं वामदेव्यं आत्मा मध्यदेहः अग्निष्टोमसामत्वेन प्रयुज्यमानं यज्ञायज्ञीयं पुच्छं याः सहस्रसंख्याका दक्षिणास्ता एवार्क्यमहाव्रतस्तोत्रानुशंसनं बृहती सहस्राख्यं शस्त्रं तस्मादेतेनैवंगुणविशिष्टेन एकाहेन यो यजते एष एव प्रत्यक्षं साक्षान्महाव्रतेन महाव्रतस्तोत्रेण स्तुते स्तौति उक्तसामपञ्चकात्मकत्वात्तस्य ॥ ११ ॥

अथ श्यायन्तीयं ब्रह्मसाम विधित्सुः पक्षान्तरमुपन्यस्य तत्र दोषमुद्भावयति ।

तस्य बृहत्पृष्ठं षड्क्तिषु ब्रह्मसाम तदाऋच्छन्दोव्याधीयते यद्बृहत्पृष्ठम्भवति षड्क्तिषु ब्रह्मसामेति ॥ १२ ॥

अस्मिन्नहनि बृहत्साम होतुः पृष्ठमित्युक्तं तस्यायमनुवादः षड्क्तिषु स्वादोरित्था विषूवत इत्याद्यासु यत् प्रथमे सहस्र एकाहे ब्रह्मसाम विहितं तत् षड्क्तिषु तदेव ब्रह्मणः पृष्ठस्तोत्रं तत्तत्र एवं क्रियमाणे सामद्वये आऋर्ब्रह्मवादिनस्योदयन्ति कथमिति यद्यदि बृहत् बृहत्साम बृहतीषु गीयमानं पृष्ठस्तोत्रं भवति षड्क्तिषु गीयमानं ब्रह्मसाम भवति तदा च्छन्दो व्याधीयते स्पष्टं विभिद्यते तच्चायुक्तमिति ॥ १२ ॥

किं तर्हि कार्यं तदाह।

आयन्तीयमेव कार्य्यन्न छन्दो व्याधीते ॥ १३ ॥

आयन्तीयमेव स्वासु ब्रह्मसाम कार्यं तथा च बृहतो ब्रह्मसाम्नश्च वाईते तत्र गानात् न छन्दोव्याधीयते भिद्यते ॥ १३ ॥

नन्वेवं पङ्क्तीर्विहाय बृहत्यां ब्रह्मसाम्नि क्रियमाणे सहस्राक्षरसम्पत्तेरभावात् पूर्वोक्तसहस्रप्रतिष्टुतिर्न स्यादित्यत आह।

एषो सहस्रस्य प्रतिष्टुतिः ॥ १४ ॥

एषो एषैव आयन्तीयस्य स्वासु स्तोत्रीयासु गानमेव सहस्रस्य दक्षिणारूपस्य गवां सहस्रस्य प्रतिष्टुतिः प्रतिस्तवनं ॥ १४

ननूक्तं ब्रह्मसाम्नोऽक्षराणां सहस्रसंख्यापूर्त्त्यभावात् प्रतिष्टुतिर्न स्यादिति तत्राह।

सहस्रमन्यमभितिष्ठतीत्याहुः सहस्रमन्योऽन्वातिष्ठतीति ॥ १५ ॥

सहस्रस्वयं अन्यं यज्ञमभितिष्ठति तत्रत्यब्रह्मसाम्नोऽक्षरसङ्ख्या तमधितिष्ठते अन्यस्तु यागः सहस्रमन्वातिष्ठतीति हीने अनोः कर्म प्रवचनीयत्वं सहस्रसंख्यातो न्यूनया ब्रह्मसाम्नोऽक्षरसंख्यैव स्वयं सहस्रमधितिष्ठतीति ब्रह्मवादिन आहुः एवमुभयथापि सहस्रसम्बन्धसम्भवात् सहस्रस्य प्रतिष्टुतिः सिद्धेत्यर्थः ॥ १५ ॥

कथमयं यज्ञः सहस्रमन्वातिष्ठतीति तदाह ।

ककुभं प्राचीमुदूहत्यथ यदेषा द्विपदा ककुभो-ल्लोके क्रियते सहस्रस्यैव सोऽन्वास्थायः ॥ १६ ॥

आर्भवपवमाने स्थितां पवस्व मधुमत्तम इत्येतां ककुभं प्राचीमुदूहति प्राग्देशमाध्यन्दिनपवमानलक्षणं नयति अथानन्तर तस्याः ककुभो लोके स्थाने यत्पारिप्रधन्नेत्येषा द्विपदा क्रियते प्रयुज्यते स च सहस्रस्यान्वास्थानं ॥ १६ ॥

अथ स्तोत्रियासङ्घातं संहत्य स्तौति ।

अनुष्टुभꣳ सम्पद्यते वागनुष्टुबाक् त्रिरावस्तेन त्रिरावमाप्नोति ॥ १७ ॥

अयमेकाहः संस्तोऽनुष्टुभं अनुष्टुप्छन्दः सम्पद्यते अत्र कस्मात् त्रिवृद् बहिष्पवमानं पञ्चदशानि वीर्याज्यानि त्रिवृन्मैत्रावरुणस्य सप्तदशो माध्यन्दिनः पवमानो स्तोतुश्च पृष्ठं पञ्चदशं मैत्रावरुणस्य पञ्चविंशं ब्राह्मणाच्छंसिनः सप्तदशसदावाकस्य सप्तदश आर्भव एकविंशोऽग्निष्टोम इति एवञ्च सोमक्रयौ सत्यां प्रातःसवने त्रिषष्टि स्तोत्रीया भवन्ति ६३ माध्यन्दिने त्रेकनवतिः ९१ तृतीयसवनेऽष्टत्रिंशत् ३८ मिलित्वा ह्यधिकनवतिशतं स्तोत्रीया भवन्ति १८२ द्वात्रिंशदक्षराऽनुष्टुप् तथाच द्वात्रिंशत्संख्यया विभज्यमाना षडनुष्टुभो भवन्ति एवमनुष्टुभं सम्पद्यते अयं यज्ञः प्राप्नोति अनुष्टुप् खलु वाक्संस्तुता त्रिरावोऽपि वाक्संस्तुतः

तेनानुष्टुभा वाचा च त्रिरात्रं गर्गत्रिरात्राख्यं यज्ञक्रतुमाप्नोति तत् फलं प्राप्नोतीत्यर्थः ॥ १७ ॥

इति ताण्ड्यमहाब्राह्मणे षोडशाध्यायस्य एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

अथ साद्यःक्रानाम पञ्चैकाहास्तेषु प्रथमद्वितीययोर्दीक्षाप्रभृत्यवभृथान्तं सर्वमेकस्मिन्नेवाहन्यनुष्ठेयं तृतीयस्य तु एकस्मिन् दिवसे दीक्षा परस्मिन् दिवसे सोमक्रयाद्यवभृथान्तं चतुर्थपञ्चमयोरप्येवं यद्वा एका दीक्षा सोमक्रयप्रभृतिरुपवसथान्तं द्वितीयेऽहनि सुत्येति एवं सूत्रकारमतं पञ्चस्वपि साद्यःक्रान्वयात् सद्यएव एकस्मिन्नेवाहनि दीक्षाद्यवभृथान्तं कर्त्तव्यमिति मतान्तरं एतत्सर्वं साद्यःक्रेण वक्ष्यमाणे महारात्रे प्रातराऊर्ति ऊर्त्वेत्यादिना सूत्रकारेण विसृष्टमुक्तं तत्र प्रथमस्य यदुक्तं सर्वं सद्योऽनुष्ठेयमिति तद्विधित्सुराह ।

आदित्याश्चाङ्गिरसश्चादीक्षन्त ते स्वर्गं लोकमस्वर्ग्यन्त तेऽङ्गिरस आदित्येभ्यः प्रवः सुत्यां प्राब्रवꣳस्त आदित्या एतमपश्यꣳस्तꣳ सद्यः परिक्रीयायास्य रुद्धातारं दृष्ट्वा तेन स्तुत्वा स्वर्गं लोकमायन्नहीयन्ताङ्गिरसः ॥ १ ॥

पुरा आदित्याश्चाङ्गिरसश्च अदीक्षन्त यज्ञाय दीक्षां कृतवन्तः ते उभे स्वर्गे लोके स्वर्गलोकनिमित्तमस्पर्द्धन्त वयं प्रथमं गमिष्यामो वयं प्रथमं गमिष्याम इति स्पर्द्धां कृतवन्तः एवं स्पर्द्धमानास्तेऽङ्गिरस आदित्येभ्यः सुत्यां ह्व परस्मिन्दीक्षानन्तरदिने करिष्यमाणं सोमयागं प्राब्रुवन् प्रोक्तवन्तः अथ ते आदित्या एवं वक्ष्यमाणयज्ञमपश्यन् तं यज्ञं सद्यः एकस्मिन्नेवाहनि परिक्रीय सोमं क्रीत्वा अयास्यमृषिमुद्गातारं कृत्वा त्वमुद्गाता भवेत्युद्गातृत्वेन कृत्वा तेनायास्येन सर्वैः स्तोत्रैः स्तुत्वा स्तावयित्वा समापयन् दीक्षाद्यवभृथान्तं सर्वं कर्म्म एकस्मिन्नेवाहनि अन्वतिष्ठन्नित्यर्थः यज्ञसमाप्त्यनन्तरमेव ते स्वर्गं लोकमायन् प्राप्नुवन् अङ्गिरसस्त्वहीयन्त दीक्षानन्तरदिवसे सुत्येति तैरुक्तत्वात् एतस्मिन् दिने दीक्षाद्यवभृथान्तस्य सर्वस्याननुष्ठानेन स्वर्गप्राप्त्यभावात् सह दीक्षितैरादित्यैः सद्योऽनुष्ठानेन स्वर्गगतेः हीनाः-भूमावेव परित्यक्ताः आसन् ॥ १ ॥

एवं सद्योऽनुष्ठेये यज्ञेऽधिकारिणमाह ।

भ्रातृव्यवान्यजेत ॥ २ ॥

भ्रातृव्यः शत्रुसदृशेन यागेन यजेत शत्रुक्षयहेतुरयं याग इत्यर्थः ॥ २ ॥

अथैतद्धेतुः फलमाह ।

भवत्यात्मना पराऽस्य भ्रातृव्यो भवति यएवं वेद ॥ ३

यएवं ब्राह्मणार्थज्ञानाति स आत्मना स्वयमेव भवति भवनशीलः समृद्धो भवति ०अस्य यो भ्रातृव्यः शत्रुः स परा भवति पराभूतः तिरस्कृतो भवति ॥ ३ ॥

अथास्मिन् यागे दक्षिणां विधित्सुराह।

तस्मा अमुमादित्यमश्वꣳ श्वेतं कृत्वा दक्षिणामानयꣳस्तं प्रतिगृह्य व्यभ्वꣳशत स एतान्यायास्यान्यपश्यत्तैरात्मानꣳसमयोजयात् ॥ ४ ॥

तस्मै आयास्यायोद्गात्रे अमुं दृश्यमानमादित्यं श्वेतं शुक्लवर्णमश्वं कृत्वा दक्षिणामानयन् क्रतुदक्षिणात्वेन प्रायच्छन् तमश्वं प्रतिगृह्य सोऽयास्योऽव्यभ्यत विस्मृष्टवीर्योऽभूत् स ऋषिः एतानि इदानीं समाम्नायमानान्यायास्यानि सामान्यपश्यत् तैः दृष्टैः सामभिरात्मानं समयीणात् वीर्येण समयोजयत् तस्मात् श्वेताश्वोऽस्य क्रतोर्दक्षिणा सद्योद्गातुर्हातव्यः इतरेऽप्यृत्विजो यथा सन्तोषमायान्ति तथा तेभ्यो यत्किञ्चित् धनं दद्यादिति विधिरुन्नेतव्यः तदेतत् सूत्रक्रतोक्तं अश्वः श्वेत एतस्य दक्षिणासुद्गात्रे दद्यात् किञ्चिच्चेतरेभ्य इति ॥ ४ ॥

यस्मादेवं तस्मादिदानीमप्यस्मिन् यज्ञे आयास्यं साम प्रयोक्तव्यमित्याह।

यदायास्यानि भषन्ति भेषजायैव शान्त्यै ॥ ५ ॥

यदेतेषु साद्यःक्रेष्वेतान्यायास्यानि सामानि भवन्ति तद्-

यजायैव अश्वप्रतिग्रहजनितस्य दोषस्य चिकित्साया एव शान्त्यै उपशमाय च भवति तथा चास्मिन्यज्ञे माध्यन्दिनसवने दक्षिणारूपाश्वप्रतिग्रहजन्यदोषनिर्हरणाय आर्भवे पवमाने इन्द्रमच्छेत्यस्यां स्तोत्रीयायां आयास्यं साम कार्यं तथा चास्याङ्गः स्तोमस्तोत्रीयाविधाने कल्पकारेणोक्तं उपास्मै गायतानरः पवमानो अजीजनत् पवमानस्य ते कवे इममञ्जु त्वमस्माकमिति प्रक्रम्य स्वादिष्ठया मदिष्ठयेति गायत्रञ्च स्वाभिरामर्कः पवस्वेन्द्रमच्छेति सफायास्ये पुरोजिती वो अन्धस इति श्यावाश्वान्धीगवे कावमन्त्यं यज्ञायज्ञीयमग्निष्टोममामेति ॥ ५ ॥

अथाधिकार्थ्यन्तरमाह ।

स्वर्गकामो यजेत ॥ ६ ॥

स्पष्टोऽर्थः ॥ ६ ॥

अथैतस्य स्वर्गसाधनतामुपपादयति ।

बृहतीꣳ सम्पद्यते बृहत्या वै देवाः स्वर्गं लोकमायन् स्वर्गमेवैतेन लोकमाप्नोति ॥ ७ ॥

अस्य यज्ञस्याग्निष्टोमसंस्थत्वात् द्वादशस्तोत्राणि तेषु सर्वेषु त्रिष्टुबेव स्तोमः तथाच प्रतिस्तोत्रं नवस्तोत्रीया इति मिलित्वा अष्टोत्तरशतं स्तोत्रीया भवन्ति १०८ षट्त्रिंशदक्षरा च बृहती तत्संख्यया विभज्यमानास्तास्तिस्रो बृहत्यो भवन्ति एवञ्च अयामेकां बृहतीं सम्पद्यते बृहत्या बृहतीच्छन्दसा साधनेन देवाः

पुरा स्वर्गं लोकमायन्नगच्छन् अतो बृहतीसम्पन्नेनैतेन स्वर्गमेव लोकमाप्नोति ॥ ७ ॥

अथान्यमधिकारिणमाह।

पशुकामो यजेत ॥ ८ ॥

स्पष्टोऽर्थः ॥ ८ ॥

तथैव तस्य पशुसाधनत्वमुपपादयति।

पशवो वै बृहती पशुष्वेव प्रतितिष्ठति ॥ ९ ॥

छन्दांसि पशुर्वाजिमजयंस्तान् बृहत्यजयत् तस्माद्बार्हताः पशव उच्यन्ते इति ब्राह्मणान्तरात् बृहत्याः पशुरूपत्वं अतः पशुरूपान्वयात् बृहत्या सम्पन्नः पशुष्वेव यजमानः प्रतितिष्ठतीति ॥ ९ ॥

इति ताण्ड्यमहाब्राह्मणे षोडशाध्यायस्य
द्वादशः खण्डः।

अथ त्रयोदशः खण्डः।

अथ द्वितीयं साद्यःक्रमेकाहं दर्शयति।

एतस्यैवैकविंशमग्निष्टोमसाम कृत्वामयाविनं याजयेत् ॥ १ ॥

एतस्यैव पूर्वोक्तस्य यज्ञस्याग्निष्टोमसाम एकविंशं एकविंशस्तोमकं कृत्वा एतेनामयाविनं रोगिणं यजमानं याजयेत् यथा दर्शपौर्णमासयोर्गुणविकृता राकायज्ञादयः यथा वा अग्निष्टोमस्य गुणविकृता उक्थादयः एवं अयं द्वितीयः साद्यःक्रः पूर्वोक्तएव गुणविकृतः ॥ १ ॥

अथास्य व्याधिनिर्हरणहेतुतामाह।

प्राणो वै त्रिवृत्प्राण आदित्यः प्राणैरेष व्यृध्यते य आमयावी प्राणैरेवैनꣳ समर्द्धयति ॥ २ ॥

अस्मिन् हि यागे बर्हिष्प्रवमानादौ प्रथमं त्रिवृत्स्तोमः प्रयुज्यते स च प्राणसंस्तुतः प्राणश्चादित्यः स हि सर्वेषां भूतानां प्राणनहेतुः योऽसौ तपत्युदेति स सर्वेषां भूतानां प्राणानादायोदेतीति श्रुतेः य आमयावी व्याधिग्रस्तः एष प्राणैः व्यृध्यते वियुज्यते एवञ्च प्राणसंस्तुतस्त्रिवृत्स्तोमकेन तेनैनं आमयाविनं पुनः प्राणैरेव समर्द्धयति ॥ २ ॥

अथ प्रकारान्तरेण आमयाव्यधिकारमुपपादयति।

विराजꣳ सम्पद्यतेऽप वा एतस्मादन्नाद्यं क्रामति यऽआमयाव्यन्नं विराडन्नाद्यमेवास्मिन् दधाति ॥ ३ ॥

अयं द्वितीयः साद्यःक्रोविराजं छन्दः सम्पद्यते अस्य हि अग्निष्टोमसामव्यतिरिक्तान्येकादशत्रिवृन्ति स्तोत्राणि तेषु नवनवतिस्तोत्रीया भवन्ति एकविंशस्तोमकमग्निष्टोमसामेति विंश-

तिश्रतं स्तोत्रीया भवन्ति दशाक्षरा विराडिति दशसङ्ख्या विभागे सति विराट्सम्पत्तिः य आमयावी रोगी एतस्मात् अन्नाद्यं अन्नस्यादनमपक्रामति अपगच्छति स्पष्टमन्यत् ॥ ३ ॥

अथाग्निष्टोमसाम्न एकविंशतिस्तोमतामनूद्य आमयाविनः प्रतिष्ठाहेतुतामाह ।

एकविꣳशोऽग्निष्टोमो भवत्यप्रतिष्ठितो वा एष य आमयावी प्रतिष्ठैकविꣳशः प्रत्येव तिष्ठति ॥ ४ ॥

एकविंशकमग्निष्टोमसाम भवति य आमयावी रोगी एषोऽप्रतिष्ठितः प्रतिष्ठारहितः गतमन्यत् ॥ ४ ॥

अथापरावधिकारिणावाह ।

एतेनैवान्नाद्यकामो वा प्रतिष्ठाकामो वा यजेतान्नं विराट् प्रतिष्ठैकविꣳशोऽन्नान्नं प्रतितिष्ठति ॥ ५

अन्नाद्यमदनीयमन्नं कामयमानो वा प्रतिष्ठाकामो वा एतेनैव साद्यःक्रेण यजेत अयं हि विराट्सम्पन्न इत्युक्तं सा च विराट् अन्नं अन्नात्मिका अतोऽन्नाद्यकामोऽन्नमत्ति अत्तुं योग्यो भवति अग्निष्टोमसाम्नः एकविंशस्तोमकत्वात् प्रतिष्ठाकामोऽपि प्रतितिष्ठति अथैतस्य स्तोमकृप्तिः कल्पकारोक्ता प्रदर्श्यते तस्यैकविंशमग्निष्टोमसामोभौ त्रिवृताविति उभौ प्रथमद्वितीयावेतौ साद्यःक्रौ त्रिवृत्स्तोमकौ द्वितीये त्वग्निष्टोमसामैकविंशस्तोमकमिति तस्यार्थः अथ साद्यःक्राणां साधारणधर्मविधास्यन्ते यद्य-

ष्येते प्रथमसाद्यःक्रानन्तरमेव वक्तव्याः तथापि तस्यैषायं द्वितीयः साद्यःक्रो गुणविकार इत्यभिप्रेत्य विकारसहितस्य तस्यानन्तरं धर्म्माणां प्रतिपादनं तथाच सूत्रकारेणोक्तं उर्व्वरावेदिरिति प्रथम इति अयमर्थः उर्व्वरावेदिरित्याद्यङ्गजातं वक्ष्यमाणं प्रथमेऽपि साद्यःक्रे द्रष्टव्यं न केवलमस्मिन्नेवेति ततो यन्नवनीतमुद्दियात्तदाज्येऽपि कार्य्यं सद्यस्त्वायेति आम्नास्यमानत्वात् साद्यःक्रतैव धर्म्मान्वयहेतुः नान्यत् साद्यःक्रता च प्रथमादीनां सर्व्वेषां समानेति सर्व्वत्र वक्ष्यमाणा धर्म्माः कर्त्तव्या इति ॥ ५ ॥

तत्र वेदिं विधाय स्तौति ।

उर्व्वरा वेदिर्भवत्येतद्वा अस्या वीर्य्यवत्तमं वीर्य्येणैव यज्ञꣳ समर्द्धयति ॥ ६ ॥

उर्व्वरा सर्व्वसस्याढ्या यवोर्वरा पक्वा स्याद्व्रीह्यूर्वरावेति सूत्रकृतोक्तत्वात् व्रीहियवयोरन्यतरेण परिपक्वेन सस्येनाढ्या भूमिर्वेदिर्भवति एतत् खलु स्थानं अस्याः पृथिव्या वीर्य्यवत्तमं अतिशयेन वीर्य्यवत् अतो वीर्य्येणैव यज्ञं समर्द्धयति समृद्धं करोति उर्व्वरां वेदिं कुर्वन् ॥ ६ ॥

अथोत्तरवेदिस्थानं विधत्ते ।

खलउत्तरवेदिरत्व हि स रसः समवैति सरसमेव यज्ञं करोति ॥ ७ ॥

तस्यामुर्व्वरायां परिपक्वा व्रीहियवा यस्मिन् स्थाने सम्भेत्यो

विविच्यन्ते स खल उत्तरवेदिः अत्र हि स्थाने स प्रसिद्धः व्रीहियवानां रसः समवैति समवेतो भवति धान्यसारस्यावष्टानात् तथाच सरसं रससहितमेव यज्ञं करोति ॥ ७ ॥

अथ यूपं विधत्ते।

खलेवाली यूपोभवत्येतया हि तꣳ रसमुत्कृषन्ति ॥ ८ ॥

खले मध्ये निखाता मेढी खलेवाली स एव यूपो भवति एतया हि खलेवाल्या तं खलसमवेतं रसं उत्कृषन्ति उद्गमयन्ति अयं वाक्यशेषो खलेवालीमेढीत्यस्मिन् पक्षे न सङ्गच्छत इत्यभिप्रेत्येतद्वाक्यमनूद्य लाङ्गलेषा यूपः स्यादिति सूत्रकृता व्याख्यातं लाङ्गलसम्बन्धिनी ईषा दण्डो यूपः कार्य्य इति तस्य च कर्षणसाधनत्वात् भुगतं रसं तेनोत्कृषन्ति कर्षुका इति सङ्गतिर्भवति ॥ ८ ॥

अथ सोमक्रयसाधनं द्रव्यं विधत्ते।

त्रिवत्सः साण्डः सोमक्रयणः सेन्द्रत्वाय ॥ ९ ॥

ईशदपरिसमाप्तत्रिवर्षस्य त्रिवत्स इति यौगिकी संज्ञा यद्वा यो वत्सः त्रिस्तोऽर्द्धेनूनदुपेत् स त्रिसृणां वत्सत्वात् त्रिवत्सः यद्वा वत्सरपदस्यान्त्यवर्णलोपः त्रिवत्सः त्रिवर्ष इत्यर्थः एतत्पदत्रयं सूत्रकृतोक्तं बञ्चत्रिवर्षस्य जानपदी त्रिवत्स इति यो वा त्रिस्तो धयेत्त्रिवर्षोवैव स्यादिति स च त्रिवत्सः साण्डः समुष्कः

सोमक्रयणः सोमक्रयसाधनं द्रव्यं ईदृशेन गवा सोमः क्रेतव्य इत्यर्थः स चाण्डसहितत्वेन वर्षणसमर्थत्वात् इन्द्रस्य च वर्धितत्वात् सेन्द्रत्वाय इन्द्रसाहित्याय भवति ॥ ९ ॥

अथैतेषु साद्यःक्रेषु प्राच्यादिचतुर्दिगवस्थितान् सहर्त्विज आनेतुं सोमप्रवाकानां गमनं विधत्ते।

सर्व्वादिशोऽश्वरथाः सोमप्रवाका विधावन्ति ॥१०॥

अत्र सूतं प्राञ्चं होतारं वहेयुरुदञ्चमुद्गातारं प्रत्यञ्चमध्वर्युं दक्षिणा ब्रह्माणमिति अयमर्थः अश्वरथाः अश्वयुक्तरथसहिताः सोमप्रवाकाः सोमस्य प्रवक्तारो यजमानपुरुषाः सर्व्वाश्चतस्रो दिशः विधावन्ति वक्ष्यमाणप्रकारेण गच्छेयुः गत्वा च प्रतीच्यां दिश्यवस्थितं होतारं रथे आरोप्य ततस्थः सोमप्रवाकः प्राङ्मुखन्तमानयेत् एवमन्यास्वपि दिक्षु अन्ये सोमप्रवाकाः कुर्य्युः ॥ १० ॥

किमतस्तदाह।

सर्व्वाभ्य एवास्मै दिग्भ्योऽन्नाद्यमवरुन्धे ॥ ११ ॥

एवं सर्वासु दिक्षु विधानात् सर्वाभ्य एव दिग्भ्यः सकाशात् अस्मै यजमानाय अन्नाद्यमवरुन्धे प्राप्नोति ॥ ११ ॥

कस्यान्दिशि केन रथेन कियत्परिमाणं धावनमिति क्रमेण सर्व्वमाह

योजने चतुर्व्वाहिणा प्राच्यां दिशि प्राङ्वैवमिव वा

अध्वानो विमिता यैवाध्वनोमात्रा तान्भावयन्ति त्रैपदे प्रष्ठिवाहिनोदोच्याङ्गव्यूतौ द्योगेन प्रतिच्यां क्रोशे स्थूरिणा दक्षिणैतद् वै दिशाꣳ रूपं यदेव दिशाꣳ रूपन्तेन यज्ञꣳ समर्द्धयन्ति ॥ १२ ॥

चतुर्व्वाहिणा चत्वारो वाहा यस्मिन् युज्यन्ते स चतुर्व्वाही तादृशेन रथेन प्राच्यान्दिशि योजने क्रोशचतुष्टयपरिमिते दूरे धावेत् अहेति प्रसिद्धौ एवमिव खल्वध्वानो मार्गाः प्रकर्षेण विमिता अतिदीर्घोऽध्वा पञ्चयोजनो दशयोजनः शतयोजन इति योजनप्रमाणनैव परिच्छिद्यत इत्यर्थः तस्माद्योजनपरिमितं दूरं गच्छेदित्यर्थः तथाच यैव खल्वध्वनोमार्गस्य मात्रा प्रमाणान्तां भावयन्ति प्राप्नुवन्ति उदीच्यामुत्तरदिशि त्रैपदे त्रिपाद्योजने क्रोशत्रयपरिमिते प्रष्ठिवाहिना अश्वत्रययुक्तोरथः प्रष्ठिवाही तेन रथेन धावेयुः तथा प्रतीच्यान्दिशि गव्यूतौ क्रोशद्वयपरिमितदूरे द्योगेन अश्वद्वययुक्तेन रथेन च वहेयुः दक्षिणा दक्षिणादिशि क्रोशपरिमिते दूरे स्थूरिणा एकाश्वयुक्तेन रथेन वहेयुः एवं रथविशेषैः प्राच्यादिदिक्षु योजनादिदूरं गत्वा तत्तत्स्थानां महर्त्विजां सोमं प्रोच्य सोमप्रवाकारान् रथेष्वारोप्य प्रागुक्तनीत्या नयेयुरित्यर्थः यदेतच्चतसृषु दिक्षु रथाध्वनोर्विशेषप्रतिपादनं एतत् खलु तासां दिशां रूपं तथाच यद्वै दिशां रूपं तेन यज्ञं समर्द्धयन्ति समृद्धं कुर्व्वन्ति ॥ १२ ॥

अथान्यदङ्गं विधत्ते।

सद्यीरद्दतयो रथा भवन्ति ततोऽयन्नवनीतमुद्दियात्तदाज्येऽपि कार्य्यꣳ सद्यस्त्वाय ॥ १३ ॥

ते च रथाः सद्योदुग्धेन क्षीरेण पूर्णाः सद्यीरास्त्राद्दतयो येषु रथेषु तथाविधा भवेयुः तदुक्तं स्तुतकारेण ततो यन्नवनीतमुद्दियात् फेनो वा तदाज्येऽपि स्रुजेयुरिति ॥१३॥

इति ताण्ड्यमहाब्राह्मणे षोड़शाध्यायस्य

त्रयोदशः खण्डः ।

अथ चतुर्दशः खण्डः ।

अथान्यं साद्यःक्रमेकाहं दर्शयति ।

अथैषोऽङ्गिरसामनुक्रोः ॥ १ ॥

अथानन्तरमेष वक्ष्यमाण अङ्गिरसामृषीणां सम्बन्धी अनुक्रीर्नाम साद्यःक्रः एकाहः ॥ १ ॥

अथास्मिन्नधिकारिणमाह ।

एतेन वा अङ्गिरस आदित्यानाप्नुवन् यो ह्येन मानुजावरदुव स्यात् स एतेन यजेताप्नोति पूर्व्वेषां प्रज्ञामाप्नुवन् ह्येतेनाङ्गिरस आदित्यान् ॥ २ ॥

एतेन खलु यज्ञेन अङ्गिरस ऋषयः आदित्यान् सह दीक्षित्वैकस्मिन्नेव दिने यागं समाप्य पूर्व्वमेव स्वर्गं गतान् पश्चादाप्नुवन्

अतोऽस्य यज्ञस्याङ्गिरसां सम्बन्धः तस्माद्यो यजमानः हीनो निकृष्ट आनुजावर इव अनुजादप्यवर इव स्यात् स एतेन यजेत स यजमानः पूर्व्वेषां स्वस्मादधिकानां यजमानानां प्रहां प्रहाणं आप्नोति पूर्व्वं ये स्वस्मादूगुणैरधिकास्तेऽपि यथा प्रहीना भवन्ति तथा स्वयमुत्कृष्टो भवतीत्यर्थः हि यस्मात् हीना अङ्गिरसः एतेन यागेन आदित्यानधिकानाप्नुवन् तत्स्यमगच्छन्नित्यर्थः ॥२

अथास्य माध्यन्दिनार्भवयोः पवमानयोः स्तोमकृप्तिं विधत्ते ।

तस्य चतुर्विंशौ पवमानौ ॥ ३ ॥

तस्यानुक्रीर्षंस्य चतुर्विंशौ चतुर्विंशस्तोमकौ पवमानौ यद्यपि बर्हिष्पवमानस्य प्राथम्यात्तस्य माध्यन्दिनपवमानस्य च चतुर्विंशस्तोमविधानमिति व्याख्यानं न्याय्यं तथापि कल्पकृता चतुर्विंशावुत्तरौ पवमानाविति कल्पितत्वात् माध्यन्दिनार्भवयोरेतत् स्तोमविधानं ॥ ३ ॥

तदेतत् स्तौति ।

चतुर्विंशत्यक्षरा गायत्री गायत्र्या वै देवा द्यूमान् लोकान् व्याप्नुवन्निमानेवैतेन लोकान् व्याप्नोति ॥ ४ ॥

चतुर्विंशस्तोमे चतुर्विंशतिसङ्ख्या विद्यते गायत्री चतुर्विंशत्यक्षरा गायत्येवं छन्दसा साधनेन देवाः पुरा द्यूमान् द्युप्रभृत्यादिलोकान् व्याप्नुवन् तत्संख्यासाम्यादेतेन चतुर्विंशस्तोमेन द्यूमानेव लोकान् यजमानो व्याप्नोति ॥ ४ ॥

अथैतत्प्रकारान्तरेण स्तौति।

तेजो ब्रह्मवर्चसङ्गायत्री तेज एव ब्रह्मवर्चसमवरुन्धे प्राणो गायत्री प्रजननं प्राणादेव गायत्राः प्रजायते ॥ ५ ॥

या इयं गायत्री सा तेजोरूपा ब्रह्मवर्चसरूपा च प्रजापतेर्मुखादग्निना ब्राह्मणजात्या च सङ्गोत्पत्तेः; तथाच गायत्रीसंस्तुतेन चतुर्विंशस्तोमकेन तेजश्च ब्रह्मवर्चसञ्च यजमानोऽवरुन्धे तथा प्राणरूपा गायत्री प्रजननं प्रजासाधनञ्च एवञ्च प्राणात् प्राणरूपाया एव गायत्र्याः सकाशात् प्रजायते पुत्रपौत्रादिरूपेणोत्पद्यते ॥ ५ ॥

अथास्य यज्ञस्य प्रकारान्तरेण प्रजासाधनतामाह।

उभये स्तोमा युग्मन्तश्चायुजश्च तन्मिथुनं तस्मान्मिथुनात्प्रजायते ॥ ६ ॥

उभये उभयविधा युग्मन्तश्च युक्संख्याका अयुजश्च विषमसंख्याकाश्च स्तोमा भवन्ति ऋग्यस्य च पवमानयोश्चतुर्विंशस्तोमो विहितः स च समसंख्याक एकविंशोऽग्निष्टोमसान्नि विधास्यति स विषमसंख्याकः; अन्येषु स्तोत्रेषु कल्पकारेण समानमितरत् पूर्वेण स स्तोममिति द्वितीयस्याद्यऋक्सम्बन्धिनः स्तोमस्यातिदिष्टत्वात् तिष्टत्स्तोम एवमुभयविधा स्तोमा भवन्ति तन्मिथुनं

स्त्रीपुंसात्मकं तस्मान्मिथुनात् प्रजायते यजमानस्यापत्यपुत्र पौत्रादिरुत्पद्यते ॥ ६ ॥

अथ स्तोत्रीयासङ्घसम्पत्तिद्वारेण स्तौति।

विराजꣳ सम्पद्यतेऽन्नं विराडन्नाद्यमेवावरुन्धे ॥ ७

अस्य यज्ञस्य स्तोत्रीयासमुदायः विराजश्छन्दः सम्पद्यते अग्निष्टोमसंस्थोत्थयं तत्र नवानां स्तोत्राणां त्रिवृत्स्तोमकत्वात् एकाशीतिस्तोत्रीया भवन्ति ८१ द्वयोश्चतुर्विंशत्वात् अष्टाचत्वारिंशदग्निष्टोमसाम्न एकविंशतिरिति एवं पञ्चाशदधिकं शतं स्तोत्रीया भवन्ति १५० एवं दशसंख्यया विभज्यमाने विराट्सम्पत्तिः शिष्टं स्पष्टं ॥ ७ ॥

एकविꣳशोऽग्निष्टोमो भवति प्रतिष्ठा वा एकविꣳशोऽन्तत एव यज्ञस्य प्रतितिष्ठति ॥ ८ ॥

एकविंशस्तोमकोऽग्निष्टोमो भवति गतमन्यत् ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे षोडशाध्यायस्य
चतुर्दशः खण्डः।

अथ पञ्चदशः खण्डः।

अथ चतुर्थं साद्यःक्रमेकाहं दर्शयति।

अथैष विश्वजिच्छिल्पः ॥ १ ॥

अथानन्तरमेष वक्ष्यमाणः विश्वजिन्नाम साद्यःक्र एकाहः स च शिल्पश्चित्रभूतः तस्य च शिल्पत्वं एकाहिकस्य विश्वजितः शिल्पत्वव्याख्यानेन पूर्व्वक्रतेन व्याख्यातं ॥ १ ॥

अथैतस्य वेदितुः फलमाह।

शिल्पं वा एष स्तोमानां पश्यते गृहे शिल्पं य एवं वेद ॥ २ ॥

स्तोमानां स्तोमसाध्यानां एषः यज्ञः शिल्पं वै सर्वपृष्ठत्वात् सर्वस्तोमकत्वात् सर्वस्वदक्षिणत्वाच्चास्य शिल्पभूतः य एवमस्य शिल्पं वेत्ति सः स्वकीये गृहे शिल्पं चित्रं पश्यति ॥ २ ॥

अथास्य माध्यन्दिनार्भवयोः पवमानयोः स्तोमं विधत्ते।

तस्याष्टादशौ पवमानौ ॥ ३ ॥

तस्य साद्यःक्रस्य विश्वजितः अष्टादशावष्टादशस्तोमकौ माध्यन्दिनार्भवपवमानौ कार्य्यौ ॥ ३ ॥

अथ रथसाम्नेदं यज्ञं स्तौति।

चक्रीवान्वा एष यज्ञः कामाय यद्यज्ञमङ्कामयते तमेतेनाप्नुते यत्र हि चक्रीवता कामयते तदाप्नुते ॥ ४ ॥

चक्रीवान्वै चक्रयुक्तोरथ एवैष यज्ञः कामाय फलप्राप्त्यै अतो यद्यज्ञमङ्कामयते यजमानस्तमेतेन यज्ञेनाभिप्राप्नोति यत्र हि

यस्मिन् खलु विषये चक्रीवता रथेन पुरुषः कामयते तदभ्यश्नुते प्राप्नोति तस्माच्चक्रीवत्संस्तुतेनापि यज्ञेन फलप्राप्तिरिति ॥ ४ ॥

अथास्मिन्नधिकारिणमाह।

स्वर्गकामो यजेत ॥ ५ ॥

स्पष्टोऽर्थः। ५।

अथैतत् स्वर्गफलत्वमुपपादयति।

स्वर्गोलोकः पृष्ठानि स्वर्गमेवैतेन लोकमाप्नोति ॥ ६ ॥

स्वर्गपृष्ठोक्ति विश्वजित् पूर्वमनुक्रान्तः अतोऽपि विश्वजिन्नाम्ना इतराङ्गवत्सर्वपृष्ठत्वमप्यतिदिश्यते तस्मादृध्यन्तरादीनि षट्पृष्ठसामान्यत्र प्रयोज्यानि तानि च पृष्ठानि स्वर्गलोकः केवलैन्द्रत्वात् स्वर्गलोकात्मकानि तस्मादेतेन सर्वपृष्ठेन विश्वजिता स्वर्गमेवाप्नोति ॥ ६ ॥

अथ प्रकारान्तरेणास्य सर्वपृष्ठतां स्तौति।

तेजो ब्रह्मवर्चसं पृष्ठानि यदेकधा पृष्ठानि भवन्त्येकधैवास्मिंस्तेजो ब्रह्मवर्चसं दधाति ॥ ७ ॥

तेजोरूपाणि ब्रह्मवर्चसरूपाणि च पृष्ठानि रथन्तरस्य तावत् प्रजापतिमुखात् अग्निना ब्राह्मणजात्या च सहोत्पत्तेस्तेजोरूपत्वं ब्रह्मवर्चसरूपत्वञ्च तत्कार्यकारित्वे तत्साम्यादितरेषामपि बृहदादीनां पृष्ठानां तेजोब्रह्मवर्चसरूपता यद्य

स्यादेकधा सह अस्मिन्नथन्तरादीनि षट्पृष्ठानि भवन्ति एकधैव एकयज्ञेनैवास्मिन् यजमाने तेजो ब्रह्मवर्चसञ्च दधाति ॥७॥

अथ प्रकारान्तरेण स्तौति ।

अन्नं पशवः पृष्ठानि यदेकधा पृष्ठानि भवन्त्येकधैवास्मिन्नन्नाद्यं पशून् दधाति ॥ ८ ॥

वैराजस्यान्नरूपत्वं पूर्वमुक्तं तथा शाक्ररैवतयोरपि पशुरूपत्वं प्रागुक्तं तत्सम्बन्धादितरेषामन्नपशुत्वात्मकता शिष्टं पूर्ववद्योज्यं ॥ ८ ॥

अथास्य स्तोत्रद्वय एकविंशं स्तोमं विधातुमाह ।

तदाहुर्नानालोकानि पृष्ठानि यदेकस्मिन्यज्ञक्रतौ समवरुध्यन्त ईश्वरो यजमानोऽप्रतिष्ठातोरिति ॥ ९ ॥

तत्तस्मिन् विश्वजिद्विषये आहुस्मोदयन्ति ब्रह्मवादिनः कथमिति यान्येतानि पृष्ठानि रथन्तरादीनि एतानि नानालोकानि विभिन्नस्थानानि दशरात्रस्यादितः षट्स्वहःसु तेषां रथन्तरादीनां नियुज्येकैकस्य प्रत्यहं विनियुक्तत्वात् तथा चैकस्मिन्यज्ञक्रतौ यदि एतानि सर्वाणि समवरुध्यन्ते सह प्रयुज्येरन् तर्हि यजमानोऽप्रतिष्ठातोः अप्रतिष्ठातुं अप्रतिष्ठानमनाश्रयङ्कर्तुं ईश्वरः शक्तः स्यात् स्वकीयस्थानेभ्यः पृष्ठानाञ्चालितत्वादिति ॥ ९ ॥

कस्तर्ह्यस्य दोषस्य परिहार इत्यत आह ।

एकविंशꣳ होतुःपृष्ठं भवति प्रतिष्ठा वा एकविंशोमध्यत एव यज्ञस्य प्रतितिष्ठत्येकविंशोऽग्निष्टोमो भवति प्रतिष्ठा वा एकविंशोऽन्ततएव यज्ञस्य प्रतितिष्ठति ॥ १० ॥

होत्रनुशंसनीयं पृष्ठं होतुःपृष्ठन्तदेकविंशस्तोमकं भवति प्रतिष्ठारूपोऽप्येकविंशस्तोमः प्रतिष्ठाहेतोः प्रजापतिपादप्रदेशोत्पत्तेः इदं हि स्तोत्रं यज्ञस्य मध्यत्तथाच प्रतिष्ठाहेतुनैकविंशेन यज्ञस्य मध्यतो मध्यदेश एव प्रतितिष्ठति अपि चाग्निष्टोमोऽग्निष्टोमसामापि एकविंशः एकविंशस्तोमकं भवति गतमन्यत् ॥ १० ॥

अथैतयोरेकविंशयोर्द्वित्वसंख्यामुपजीव्य स्तौति ।

द्वावेतावेकविंशौ भवतो द्विपाद्यजमानो यजमानमेव यज्ञे पशुषु च प्रतिष्ठापयति ॥ ११ ॥

पूर्वोक्तावेतौ एकविंशौ द्वौ भवतः यजमानस्य द्विपात् पादद्वययुक्तः तथाच द्वित्वसंख्यया यज्ञे पशुषु च प्रतिष्ठापयति प्रतिष्ठितं करोति द्वयोरेकविंशयोः प्रयोक्ता उद्गातेत्यर्थः ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे षोडशाध्यायस्य
पञ्चदशः खण्डः ।

अथ षोडशः खण्डः ।

अथ श्येनाख्यः पञ्चमः साद्यःक्रः कल्पकारेण लुप्तः स षड्विंशब्राह्मणे विधास्यते, अथैकत्रिकाख्यं षष्ठं साद्यःक्रं दर्शयति ।

अथैष एकत्रिकः प्रजापतेरुद्भित्॥ १ ॥

एकया तिसृभिश्च स्तोत्रीयाभिः स्तोमकृन्निर्व्यूढस्य स एकत्रिकः एष एकत्रिकाख्यो यज्ञः प्रजापतेर्विधातुः सम्बन्धी उद्भिद्वलभिद् भेदनसाधनं अयमपि शौचिदस्मिमतेन साद्यःक्रत्वात् एकस्मिन्नेव दिनेऽनुष्ठेय इति पूर्वमुक्तं मतान्तरमपि सूत्रकारेणोक्तं एकदीक्षस्तुप्यसत्क इति गौतम इति ॥ १ ॥

अथैतस्य प्रजापतेरुद्भित्त्वमुपपादयति ।

एतेन वै प्रजापतिरेषां लोकानामुदभिनत् ॥ २ ॥

एतेन खलु यज्ञेन प्रजापतिः स्रष्टा एषां पृथिव्यादिलोकानां सम्बन्धीनि वस्तून्युदभिनत् उद्भिन्नवान् निर्म्मितवान् ॥ २ ॥

अथैतं प्रकारान्तरेण स्तौति ।

क्रतस्तोमो वा एष उद्भिन्नएव क्रतस्य॥३ ॥

एष यागः क्रतस्तोमो वै क्रतो निष्पन्नः स्तोमो यस्य स तथोक्तः अस्य हि षट्सु स्तोत्रेषु एकैव स्तोत्रीया अपरेषु षट्सु तिसृभिस्तिसृभिरिति स्तोमान्तरवत् आवृत्त्या निष्पत्त्यनपेक्षत्वात् तथा च क्रतस्य तृतीयार्थे षष्ठी क्रतेन हि तेन सर्व्वं फलं उद्भिन्नं निष्पन्नमेव भवति ॥ ३ ॥

अथैतस्य पूर्वोक्तां स्तोमकृप्तिं विधाय स्तौति ।

यदेकया स्तुवन्त्येको वै प्रजापतिः प्रजापतिमेवाप्नोत्यथ यत्तिसृभिस्त्रय इमे लोका एष्वेव लोकेषु प्रतितिष्ठति ॥ ४ ॥

बहिष्पवमानादीनामध्ये षट्सु स्तोत्रेषु एकयैव स्तोत्रीयया स्तुवन्ति यदेतत् स्तवनं तेन प्रजापतिमेवाप्नोति कुतः एको वै एक एव खलु प्रजापतिः सर्वकारणभूतः एकैव स्तोत्रीया इति उभयोः साम्यात् अथ एकस्तोत्रानन्तरं यत् तिसृभिः स्तुवन्ति तेन इमे लोका एष्वेव लोकेषु प्रतितिष्ठति यत्तिसृभिः स्तोत्रीयाभिः स्तुवन्ति इमे पृथिव्यादयस्त्रयोलोकास्तस्मात्तेन तिसृभिः स्तवनेन एष्वेव लोकेषु यजमानः प्रतिष्ठितो भवति अयमर्थः त्रिकस्तोमं बहिष्पवमानं एकस्तोमं तदनन्तरमाज्यं एवं व्यत्यासमस्य द्वादशस्तोत्राणि भवन्तीति अत्र सूत्रं एकत्र्यविनमेक इति त्रिकं बहिष्पवमान स्यादिति शाण्डिल्य इत्यादिनान्येपि पक्षाः सूत्रकारेणोक्ताः तेऽपि द्रष्टव्याः ॥ ४ ॥

अथैताः संहत्य स्तौति ।

ता उ चतस्रः सम्पद्यन्ते चतुष्पादाः पशवः पशुष्वेव प्रतितिष्ठति ॥ ५ ॥

ता उ ता एव पूर्वोक्ताश्चतस्रः सम्पद्यन्ते एका तिसृषु मिलित्वा चतस्रो ऋचो भवन्ति स्पष्टमन्यत् ॥ ५ ॥

अथ सर्वस्तोत्रगतस्तोत्रीयासम्पत्तिद्वारेण स्तौति।

गायत्रीꣳ सम्पद्यते तेजो ब्रह्मवर्चसं गायत्री तेज एव ब्रह्मवर्चसमवरुन्धे ॥ ६ ॥

एष संस्तुतो गायत्रीछन्दः सम्पद्यते षण्णां स्तोत्राणामेकस्तोमत्वात् षट्स्तोत्रीयाः अवशिष्टेषु षट्सु त्रिकस्तोम इत्यष्टादशस्तोत्रीया १८ मिलित्वा चतुर्विंशतिस्तोत्रीया भवन्ति २४ चतुर्विंशत्यक्षरा गायत्रीति सङ्ख्यासाम्याद्गायत्रीसम्पत्तिः गतमन्यत् ॥ ६ ॥

प्रकारान्तरेण गायत्रीसम्पत्तिं स्तौति।

प्राणो गायत्री प्रजननं प्राणादेव गायत्र्याः प्रजायते ॥ ७ ॥

एतदपि सिद्धं ॥ ७ ॥

अथार्भवपवमाने स्तोत्रीयां विधीयते।

अयारुचा हरिण्या पुनान इत्यार्भवः पवमानः ॥८॥

अयारुचेत्येषातिछन्दस्का स्तोत्रीया आर्भवः पवमानो भवति ॥ ८ ॥

अथैनां स्तौति।

सर्वेषां वा एषा छन्दसाꣳ रूपꣳ सर्वेष्वेव छन्दःस्वार्भवं पवमानं प्रतिष्ठापयति ॥ ९ ॥

अस्यां अतिछन्दःस्येव गायत्र्यादीनां सर्वेषां छन्दसामन्तर्भावात् एषा सर्वच्छन्दसां रूपं स्वरूपभूता तथा चैनामार्भवपवमानस्तोत्रीयां कुर्वन् सर्वेष्वेव छन्दःस्वार्भवं पवमानं प्रतिष्ठापयतीति ॥ ९ ॥

अथैतस्यां गातव्यं साम विधाय स्तौति।

तस्याङ्गायत्रपार्श्वं न गायत्रादेति न साम्नो न निधनात् ॥ १० ॥

तस्यां पूर्वोक्तायां अयास्यावृचि तस्यां गायत्रपार्श्वाख्यं साम गातव्यं अस्यापि नामैकदेशेन गायत्रशब्देनाभिधेयत्वात् गायत्रीच्छन्दसो नैति नापगच्छति अतएव गायत्राख्यात् साम्नोऽपि नापगच्छति प्रकृतौ ह्यार्भवे स्वादिष्टयामदिष्टयेति गायत्र्यां गायत्रं साम क्रियते तत्परित्यज्य छन्दोऽन्तरे सामान्तरे क्रियमाणे ततो गायत्रादयो यस्मादित्याशङ्क्य गायत्रपार्श्वमित्यत्र गायत्रशब्दसद्भावात् उक्तदोषो न भवतीत्यर्थः तथा गायत्रपार्श्वस्य करणान्निधनादपि नापगच्छति अस्य हि निधनं भवति ततो निधनत्वात् आर्भवपवमानो निधनयुक्तोऽपि भवतीत्यर्थः।

वेदार्थस्य प्रकाशेन तमोहार्दन्निवारयन्।
पुमर्थांस्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १० ।

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीर-बुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे षोड़शाध्यायस्य षोड़शः खण्डः ।

षोड़शाध्यायः समाप्तिमगमत् ।

सप्तदशोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ चत्वारो व्रात्ययज्ञा एकाहास्तेषु षोडशस्तोमं साधारणेन विधित्सुराह ।

देवा वै स्वर्गं लोकमायꣳस्तेषां देवा अह्रीयन्त व्रात्यां प्रवसन्तस्त आगच्छन् यतो देवाः स्वर्गं लोकमायꣳ स्तेन तꣳ स्तोमन्न च्छन्दोऽविन्दन्येन तानाप्नुयꣳ स्तेदेवा मरुतोऽब्रुवन्नेतेभ्यस्तꣳ स्तोमन्नच्छन्दः प्रायच्छत येनास्मानाप्नवानिति तेभ्य एतꣳ षोडशꣳ स्तोमं प्रायच्छन् परोक्षमनुष्टुभं ततो वै ते तानाप्नुवन् ॥ १ ॥

देवाः पुरास्मिन् लोकेऽवस्थाय यागानुष्ठानेन स्वर्गं लोकं प्राप्नुवन् तेषां देवानामनुचराः अतएव देवसम्बन्धात् देवा जनाः व्रात्यां व्रात्यतां आचारहीनतां प्राप्य प्रवसन्तः प्रवासं कुर्वन्तः सन्तोऽह्रीयन्त ह्रीनाः पृथिव्यामेव परित्यक्ता आसन् अथ देवेषु

स्वर्गकृतेषु ते देवजना आगच्छन् यतः यस्मिन् स्थाने देवाः स्वर्गसाधनयागमन्वतिष्ठन् तत्स्थानं प्रति स्वर्गसाधनदिदृक्षया समागता इत्यर्थः आगत्य च तं स्वर्गसाधनं स्तोमन्नाविन्दन् तथा छन्दश्च नाविन्दन् नालभन्त येन स्तोमेन छन्दसा वास्थाना प्रवान् ते प्राप्नुयुरिति एवन्देवैरुक्ता मरुतः तेभ्यो हीनेभ्यः एतं षोडशं षोडशस्तोत्रीयात्मकं स्तोमं प्रायच्छन् परोक्षेण वर्त्तमानं अप्रत्यक्षमनुष्टुभं छन्दश्च प्रायच्छन् व्रात्ययज्ञेषु प्रथमस्य चतुषु स्तोत्रेषु षोडशः स्तोमः तथाच चत्वारः षोडशाः द्वे अनुष्टुभौ भवतः एवमनुष्टुभः परोक्षत्वं द्रष्टव्यं ततोऽनन्तरं स्तोमछन्दोरूपेण साधनेन ते हीनास्तान् देवान् आप्नुवन् एवं सर्वेष्वपि व्रात्ययज्ञेषु षोडशस्तोमः प्रयोक्तव्य इत्युक्तं भवति परोक्षमनुष्टुभमित्यनेन चतुःषोडशी व्रात्ययज्ञः कार्य्य इति विधिरुन्नेतव्यः चतुर्विधा हि व्रात्याः निन्दिताः कनीयांसो ज्यायांसः एतत्त्रितयव्यतिरिक्ता हीनाचारास्तेति तत्र कनीयः प्रभृतीनां व्रात्यानां उत्तरे त्रयो यज्ञाः त्रितयव्यतिरिक्तानां व्रात्यानां अयं प्रथमश्चतुःषोडशी तदुक्तं आपस्तम्बेन चतुःषोडशी सर्व्वेषाम् इति ॥ १ ॥

अथैतत् प्रकृते योजयति ।

हीना वा एते हीयन्ते ये व्रात्यां प्रवसन्ति न हि ब्रह्मचर्य्यञ्चरन्ति न क्षत्रिन्न वणिज्याꣳ षाडशो वा एतत् स्तोमः समाप्नुमर्हति ॥ २ ॥

ये पुरुषाः व्रात्यां व्रात्यतां विहिताकरणप्रतिषिद्धनिषेवनरूपामाप्य प्रवसन्ति एते हीना निकृष्टाः सन्तो हीयन्ते निकृष्टतमा भवन्ति तत् कस्य हेतोः न खल्वेते ब्रह्मचर्यं ब्राह्मणोचितं कर्माचरन्ति ततो हीनाः सम्पन्ना यस्माच्च ऋषिभिर्गाज्यां वरिजः क्रियां क्रयविक्रयादिरूपाञ्च न कुर्वन्ति ततो वैश्यजातेरपि हीनाः तस्मादेते निकृष्टतमा भवन्तीत्यर्थः तथाविधानात् यत् यः स्तोमः समानुमर्हति श्रैष्ठ्यं प्रापयितुं योग्यो भवति एष षोडशः स्तोमः ॥ २ ॥

कथमस्येदृशं सामर्थ्यमिति तदाह ॥

मरुत्स्तोमो वा एष यानि क्षुद्राणि क्षुन्दाꣳसि तानि मरुतां ॥ ३ ॥

एष षोडशस्तोमो मरुत्स्तोमो वै मरुतां सम्बन्धि स्तोमः कथमस्य मरुतां सम्बन्ध इति तदुच्यते यानि क्षुद्राणि न्यूनाक्षराणि छन्दांसि तानि मरुतां सम्बन्धीनि सप्तगणात्मका एकोनपञ्चात् ४९ संख्यया च विभक्तत्वेन तेषामपि क्षुद्रत्वात् ॥ ३ ॥

अतः क्षुद्रत्वसाम्यात् आह ।

ककुभं प्राचीमुदूहत्यथ यदेषा द्विपदा ककुभोलोके क्रियते रूपेणैवैनाꣳ स्तत् समर्द्धयति ॥ ४ ॥

पवस्व मधुमत्तमः परिप्रधन्व अधाहीन्द्रगिर्वणः इत्यादीनि ककुप्शब्देन वृषभस्य ककुदः स्थानीयत्वात् द्विपदेत्यनेन च पाद-

द्वयस्करणात् एतान् व्रात्यान् रूपेण स्तारयन्नेव समस्तान् करोतीत्यर्थः ॥ ४ ॥

अथ ब्रह्मसाम्नः स्तोत्रीया विधाय स्तौति ।

अधाहीन्द्र गिर्वण इति विषमं छन्दो विषमइव वै व्रातः सर्वानेवैतान् समान् करोति ॥ ५ ॥

अधाहीन्द्रगिर्वण इत्याद्यास्तिस्रो ब्रह्मसाम्नः स्तोत्रीयासासु च विषमं विविधं छन्दो दृश्यते प्रथमा ककुप् मध्यमपादस्य द्वादशाक्षरत्वात् द्वितीया उष्णिक् तृतीयपादस्य द्वादशाक्षरत्वात् तृतीयायासु द्वौ पादौ द्वादशाक्षरौ तृतीयोऽष्टाक्षर इति छन्दोवैषम्यं व्रातो व्रात्यसमुदायो विषम इव वै विविध इव भवति विविधानाचारयुक्ता हि व्रात्याः तथा विषमछन्दसा तेषां वैषम्यं परिहरन् सर्वानेवैतान् व्रात्यान् समान् श्रेष्ठत्वापादनेन समवीर्यान् करोति ॥ ५ ॥

अथ तासु गातव्यं साम विधत्ते ।

तासु द्यौतानं ॥ ६ ॥

तासु पूर्वोक्तास्वधाहीन्द्रगिर्वण इत्याद्यासु द्युतानेन दृष्टं साम द्यौतानं गातव्यं तच्च ब्रह्मसाम भवतीत्यर्थः तथा च कल्पकारः अधाहीन्द्रगिर्वण इत्येन्द्रमिन्द्राय सिञ्चतेति द्यौतानमारुते इति ॥ ६ ॥

अथैतस्य सर्वजित्वहेतुतामाह ।

द्युतानो मारुतस्तेषां गृहपतिरासीत्त एतेन स्तोमेनायजन्त ते सर्व आर्ध्नुवन् यदेतत् साम भवत्यृध्या एव ॥ ७ ॥

मारुतो मरुतां सम्बन्धी द्युतानः तेषां देवानां व्रात्यानां गृहपतिरासीत् बह्वृयजमानके कर्म्मणि यूपाञ्जनर्त्तुयाज्यावचनादीनि केवलक्रत्वर्थानि यः करोति स गृहपतिरित्युच्यते एवं द्युतानं गृहपतिं कृत्वा ते देवा व्रात्याः द्युतानः गृहपतयः एतेन स्तोमेन षोड़शस्तोमकेन यज्ञेनायजन्त ततस्ते सर्व्वे आर्ध्नुवन् समृद्धा अभवन् यदेतत् द्युतानेन दृष्टं साम व्रात्यस्तोमे ब्रह्मसाम भवति तदेषां समृध्या एव सम्पद्यते ॥ ७ ॥

अथैतस्य शाखान्तरीयं निधनं निषिध्य अस्माभिरधीयमानं निधनमेव कार्य्यमिति प्रतिपादयन् स्तौति ।

यन्निरुक्तान्निधनमुपेयुर्गृहपतिरेवर्ध्नुयादुपेतरान् प्रीताथ यदनिरुक्तमुपयन्ति सर्वानेवैतानृद्धौ भूतौ प्रतिष्ठापयति ॥ ८ ॥

अत्र सूत्रे शाखान्तरीयं पक्षमुत्क्रा स्वयमणुक्तं इन्द्रेति द्योतने निधनं निराकृतस्य प्रतिषेधो यथाम्नायनेवोपेयुरिति अयमर्थः निरुक्तं इन्द्रेति निष्कृयैकदेवताप्रतिपादकं निधनं शाखान्तरीयं यद्यदि उपेयुः प्राप्नुयुः प्रयुञ्जीरन् तथाच प्रधानभूतस्यैवेन्द्रस्य निष्कृय कथनात् एतेषामृध्ये प्रधानभूतो गृहपतिरेव ऋध्नुयात्

सम्पद्यो भवत् इतरे त्वपगतर्द्धयो भवेयुः अथानिरुक्तं निर्द्धारितदैवतं अध्ययनसिद्धं ओत्यहो २३४५ इत्येवं रूपं द्युतानस्य निधनं यत् यद्युपयन्ति प्रयुञ्जते तर्हि उद्गाता सर्वानेवैतान् व्रात्यान् ऋद्धौ समृद्धौ भूतावैश्वर्ये च प्रतिष्ठापयति तस्यानिर्द्धारितदेवतात्वेन सर्व्वदेवतासाधारण्यात् सर्व्वेषां समृद्धिः ॥८॥

अथैतस्मिन् व्रात्ययज्ञे चतुर्षु स्तोत्रेषु षोड़शः स्तोमः प्रयोक्तव्य इति तत् प्रशंसितुमाह।

गरगिरो वा एते ये ब्रह्मादन्यमन्नमदन्त्यदुरुक्तवाक्यन्दुरुक्तमाऽऽरदरण्डान्दण्डेन घ्नन्तश्चरन्त्यदीक्षिता दीक्षितवाचं वदन्ति षोड़शो वा एतेषाꣳ स्तोमः पाप्मानन्निर्हन्तुमर्हति यदेते चत्वारः षोडशा भवन्ति तेन पाप्मनोऽधिनिर्मुच्यन्ते ॥ ९ ॥

एते वक्ष्यमाणा गरगिरो वै गरलस्य विषस्य भक्षयितारः ये व्रात्याः ब्रह्मादं ब्राह्मणभोज्यं जन्यञ्जनपदसम्बन्धि अन्नमदन्ति ब्राह्मणार्थं परिकल्पितमन्नं बलात्कारेण भुञ्जत इत्यर्थः येच अदुरुक्तवाक्यं शोभनार्थप्रतिपादकं वाक्यं दुरुक्तं दुष्टमाऽऽरः तथा अदण्डं दण्डानर्हं जनन्दण्डेन घ्नन्तो हिंसन्तश्चरन्ति तथा स्वयमदीक्षिताः अकृतदीक्षाः दीक्षितैः प्रयोज्यां वाचं वदन्ति एवं ये बहुविधान् विपरीताचारानाचरन्ति एते विषभक्षकाः नरकहेतोर्भूयसः पापसञ्चयस्य निषिध्यमानत्वादित्यर्थः तस्मा-

देतेषां व्रात्यानां पाप्मानं पापं निर्हन्तुं निर्हर्तुं षोड़शस्तोम एवार्हति तथाच यदेते चत्वारः षोड़शाः षोड़शस्तोमा भवन्ति अछावाकस्याज्यपृष्ठयोर्माध्यन्दिनार्भवयोश्च पवमानयोः तेन षोड़शस्तोमचतुष्टयेन पाप्मनः सकाशात् अधि उपरि निर्मुच्यन्ते प्रक्षीणपापाः शुद्धा भवन्तीत्यर्थः ॥ ९ ॥

अथाग्निष्टोमसाम्नः स्तोत्रीयामनूद्य स्तौति।

देवोवो द्रविणोदा इत्यग्निष्टोमसाम कार्य्यं देवताख्यैवैनान् प्रतिष्ठापयति ॥ १० ॥

देवो वो द्रविणोदा इत्यस्मिन् प्रगाथे यच्चायच्चीयमग्निष्टोम साम कार्य्यं तथाच देवशब्दस्य श्रूयमाणत्वात् देवताख्यैवैनान् व्रात्यान्शुद्धान् कृत्वा प्रतिष्ठापयति ॥ १० ॥

अथ प्राखान्तरीयमतमुपन्यस्यति।

अथो खल्वाहुरदर्शि गातुवित्तम इत्येव स्तोबृतीषु कार्य्यं विषमइव वै व्रातः सर्व्वानेवैनान् स्तोबृहतः करोति ॥ ११ ॥

अथो खल्विति पक्षान्तरपरिग्रहे अन्ये ब्रह्मवादिनः आहुः कथयन्ति किमित्यदर्शि गातुवित्तम इत्याद्यास्वेव स्तोबृहतीषु प्रगथनैरपेक्षणस्वभावत एव बृहतीच्छन्दस्कासु ऋक्षु अग्निष्टोमसाम कार्य्यमिति उपपत्तिश्चाहुः व्रातो व्रात्यसमुदायः

विषम इव वै विविध आचार एव खलु तथाच नानाविधान् सर्वानेवैनान् सतोबृहतः स्वभावतो महतः करोति ॥ ११ ॥

अथैतन्मतं दूषयित्वा स्वपक्षन्निगमयति ।

तदाहुः शिथिलमिव वा एतत् छन्दश्चराचरं यत् सतोबृहती देवो वो द्रविणोदा इत्येव कार्य्यं ॥ १२ ॥

तत्तत्र विषये अन्ये पुनर्ब्रह्मवादिन आहुः यत् सतोबृहत्याख्यं छन्दः एतत् शिथिलमिव वै अदृढमेव यत एतच्चराचरं चरणशीलं स्यात्तु न भवति चररोः पदाद्युचि चरिचलिपतिसदीनामव्याप्राभ्यासश्चेति द्विर्व्यचनमागागमश्च यस्मादेवं तस्माद्देवो वो द्रविणोदा इत्येतास्वेव कार्य्यं ॥ १२ ॥

अथैतासूक्तदोषवैलक्षण्यमाह ।

एषा वै प्रतिष्ठिता बृहती या पुनः पदा तद्यत्पदं पुनरारभते तस्मात्पुत्रो मातरमध्येति ॥ १३ ॥

या बृहती पुनःपदा सकृदाम्नातं पादं पुनरभ्यस्य या बृहती सम्पद्यते एषा पुनःपदा प्रतिष्ठिता बृहती तत्तथा सति यद्यस्मात्सकृदाम्नातं पदं पादं अविस्मारणेन पुनः पुनरारभते तस्मात् कारणात्पुत्रः स्तनन्धयो मातरमध्येति पुनः पुनः स्मरति इक्स्मरण इति धातुः ॥ १३ ॥

द्युतानो मारुतस्तेषां मरुत्पतिरासीदित्याम्नानात् मरुत्पतिप्रसुवाबृहवो वात्या अनेन यजेरन्निति प्रतीयते तत्र मरुत्-

पतिना सम्पाद्यानि दक्षिणाद्रव्याणि दर्शयति ।

उष्णीषञ्च प्रतोदश्च ज्याक्षोडश्च विपथश्च फलकास्तीर्णः कृष्णग्रं वासः कृष्णबलक्षं अजिने रजतो निष्कस्तद् गृहतेः ॥ १४ ॥

उष्णीषं शिरोवेष्टनं वस्त्रं अयःशलाकायुक्तदण्डः प्रतोदः येन कर्षुकैर्व्वलीवर्द्दा निर्भीड्यन्तेऽक्षोडतिर्व्वात्यर्थः ज्याक्षोडा वाता यस्य चापस्य सज्याक्षोडः इषुरहितः केवलो धनुर्दण्ड इत्यर्थः तदुक्तं सूत्रकारेण धनुष्कणानिषुणा व्रात्याः प्रमेधमाना यन्ति स ज्याक्षोड इति तथा फलकास्तीर्णः फलकाभिरास्तीर्णो विस्तारितो रथः स च विपथः विविधं कुटिलं पथो गच्छतीति विविधगामिभ्यामश्वाभ्यां युक्तः कार्य्य इत्यर्थः कृष्णग्रं कृष्णदग्रं कृष्णा दग्रा यस्य तादृग्रं वासः दकारलोपश्छान्दसः यद्वा लोमग्र इति मत्वर्थः शप्रत्ययः कार्ष्णीयुक्तमित्यर्थः बलक्षः शुक्लवर्णः शुक्लकृष्णवर्णो अजिने आविके चर्मणी पार्ष्वतस्तनुभिः स्यूते भवत इत्यर्थः रजतो रजतनिर्मितो निष्कोऽलङ्कारः भूषा एतान्युष्णीषादीनि द्रव्याणि गृहपतेः स्वभूतानि सम्पाद्यानि दक्षिणार्थं गृहपतिना आनेतव्यानीत्यर्थः तदुक्तं सूत्रकारेण एतत्सर्व्वं गृहपतिराहरेदिति अतः खड्गातुरिव तद्गृहपतेः षष्ठ्या निर्दिष्टस्य संप्रदानशङ्का न कार्य्येत्यर्थः ॥ १४ ॥

अथान्यैः सम्पादनीयानि द्रव्याणि दर्शयति ।

वलूकान्तानि दामतूषाणीतरेषां द्वे द्वे दामनो द्वे द्वे उपानहौ द्विषंहितान्यजिनानि ॥ १५ ॥

वलूकेति लोहितवर्णस्याख्या लोहितवर्णान्तो येषां वास सां तानि तथोक्तानि तूषमिति वस्त्रस्य दृश्यते दामतूषाणि रज्जुरूपदृश्यानीत्यर्थः प्रतिवस्त्रं द्वे द्वे दामनी उभयोरपि प्रान्तयोः एकैकं दाम रज्जुर्यथा भवति तथा कर्त्तव्यमित्यर्थः तथा एकैकस्य व्रात्यस्य द्वे द्वे उपानहौ वर्मसदृशे पादाङ्गुष्ठवेष्टने चर्मणी भवत इत्यर्थः तदुक्तं सूत्रकारेण द्वे द्वे उपानहाविविधकृष्णाः कार्ष्णेय इति शाण्डिल्लो या: कार्ष्येति धानञ्जय इति पूर्ववत् शुक्लकृष्णान्यजिनानि द्विसंहितानि एकैकस्य द्वे द्वे अजिने शुक्लकृष्णे पूर्ववत् सहिते भवत इत्यर्थः एतानि द्रव्याणि गृहपतिव्यतिरिक्तव्रात्यैः सम्पाद्यानि ॥ १५ ॥

अथैतस्य दानं व्रात्यतानिर्हरणहेतुरित्याह ।

एतद् वै व्रात्यधनं यस्मा एतद्ददति तस्मिन्नेव सृजाना यन्ति ॥ १६ ॥

एतदुष्णीषप्रतोदादिकं द्रव्यजातं खलु व्रात्येनाविनाभूतं धनं अतो यस्मै पुरुषाय एतद्धनं ददति प्रयच्छन्ति तस्मिन्नेव पुरुषे सृजानाः व्रात्यत्वापादकं पापन्निर्मृज्य शुद्धाः सन्तो गच्छन्ति तैर्विद्वद्वृत्तिं प्राप्नुवन्ति अस्य च व्रात्यधनस्य प्रतिग्रहीतृविशेषः सूत्रकारेणोक्तः व्रात्येभ्यो व्रात्यधनानि ये व्रात्यचर्य्याया अविरताः स्युर्ब्रह्मबन्धवे मागधदेशीयायेति ॥ १६ ॥

अथैतेषां प्रत्येकं त्रयस्त्रिंशसङ्ख्यागावोऽपि दक्षिणार्थं सम्पाद्या इत्याह ।

त्रयस्त्रिंशता त्रयस्त्रिंशता गृहपतिमभिसमायन्ति त्रयस्त्रिंशद्वै देवा आर्ध्नुवन् ऋध्याएव ॥ १७ ॥

त्रयस्त्रिंशता त्रयस्त्रिंशत्संख्याभिर्गोभिर्गृहपतिमभिसमायन्ति समागच्छन्ति सर्वेषां प्रत्येकं त्रयस्त्रिंशत्सम्पादनार्थं वीप्सा अतो गृहपतिरपि गवां त्रयस्त्रिंशतं सम्पादयेदित्यर्थः इमा गावोऽपि मागधदेशीयेभ्यो व्रात्येभ्यो देयाः यस्मा एतद्दत्ति तस्मिन्नेव सजाना यन्तीति साधारणोक्तेः कुत एतत् त्रयस्त्रिंशत्संख्यायाः सम्पादनमिति तत्रोच्यते त्रयस्त्रिंशत्संख्याकाः खलु देवाः देवसम्बन्धिनो व्रात्या आर्ध्नुवन् अनेन व्रात्यस्तोमेन समृद्धा अभवन् अतस्तत्सम्बन्धद्वारा ऋध्ये समृद्ध्यर्थमेव त्रयस्त्रिंशता गोभिः समागमनमिति ॥ १७ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य

प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

अथाभिशस्तैर्निन्दितैरनुष्ठेयो व्रात्यस्तोमः प्रस्तूयते ।

अथैष षट्प्रौडशी ये नृमेधा निन्दिताः सन्तो व्रात्यां प्रवसेयुस्त एतेन यजेरन् ॥ १ ॥

अथानन्तरं एष वक्ष्यमाणो यज्ञः षट्षोडशी षट्षोडशः स्तोमा यस्य स तथोक्तः दृशंसा निन्दिताः मनुष्यैरभिशंसनेन पापाध्यारोपेण गर्हिताः सन्तो ये पुरुषाः व्रात्यां व्रात्यत्वं प्राप्य प्रवसेयुः तएतेन षट्षोडशिना यजेरन् ॥ १ ॥

षट् षोडशित्वं पाप्मनो निर्हरणहेतुरिति प्रतिपिपादयिषया प्रथममेषां पापसद्भावमाह ।

अभिपूर्व्वेण वा एते पाप्मना गृहीता ये नृशंसा निन्दिताः सन्तो व्रात्यां प्रवसन्ति यत् षट् षोडशानि स्तोत्राणि भवन्ति तेन पाप्मनोऽधि निर्मुच्यन्ते ॥२॥

अभिपूर्व्वेण क्रमेण खल्वेते पाप्मना पापेन गृहीताः ये दृशंसा निन्दिताः अभिशंसनेन गर्हिताः सन्तो व्रात्यां प्रवसन्ति तथा च यत् षट् स्तोत्राणि षोडशानि षोडशस्तोमानि भवन्ति तेन षोडशेन पाप्मनोऽधि पापान्निर्मुच्यन्ते उक्थसंस्थो ह्ययं व्रात्यस्तोमः तथा त्रिषु पवमानस्तोत्रेषु अच्छावाकस्याज्यषष्ठ-उक्थेषु षट् स्तोत्रेषु षोडशस्तोमो भवति तदुक्तं कल्पकारेण षोडशाः पवमाना अच्छावाकसामानि चेति ॥ २ ॥

अथास्याग्निष्टोमसाम्नः स्तोमं विधाय स्तौति ।

यदेकविंशोऽग्निष्टोमो भवति प्रतिष्ठा वा एकविंशोमध्यत एव यज्ञस्य प्रतितिष्ठन्ति ॥ ३ ॥

उक्थसंस्थत्वादग्निष्टोमसाम्नो यज्ञस्य मध्यत्वं सिद्धमन्यत् ॥३॥

तथास्योक्थसंस्थां विधास्यंस्तौति।

उक्थो भवति पशवो वा उक्थानि पशवो नृणꣳसमग्रं परिणयन्ति पशुभिरेवैनानग्रं परिणयति॥ ४॥

पशवो हि गवाद्यो हि नृशंसनैरभिशस्यमानं पुरुषं अग्रं श्रैष्ठ्यं परिणयन्ति तत्पालनदानादिभिः पापं क्षीयते उक्थस्तोत्राणि च पशुसंस्तुतानि अतः पशुभिरेवैनान् व्रात्यान् अग्रं श्रैष्ठ्यं परिणयति प्रापयत्युद्गाता॥ ४॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य
द्वितीयः खण्डः।

अथ तृतीयः खण्डः।

अथ वयसा कनीयांसो ये व्रात्यास्तैरनुष्ठेयो यागो विधीयते।

अथैष द्विषोडशो ये कनिष्ठाः सन्तो व्रात्यां प्रवसेयुस्तएतेन यजेरन्॥ १॥

अथानन्तरंएष द्विषोडशी षोडशस्तोमके द्वे स्तोत्रे यस्य स तथोक्तः ये कनिष्ठाः युवतमाः सन्तो व्रात्यतां प्राप्य प्रवसेयुः बहिःकृताः प्रवासं कुर्युः त एतेन द्विषोडशिना व्रात्यस्तोमेन यजेरन्॥ १॥

अथैतस्मिन् त्रिषु पवमानस्तोत्रेषु त्रिवृत्स्तोमः कार्य्य इति विधित्सुराह।

हीना वा एते हीयन्ते ये कनिष्ठाः सन्तो व्रात्यां प्रवसन्ति यत्त्रिवृतः पवमाना भवन्ति मुखं वै त्रिवृत् स्तोमानाम्मुखत एवैनान् यज्ञस्य परिगायति ॥ २ ॥

वयसातिहीनाः खलु इमे हीयन्ते पुनरहीना हीना भवन्ति तथाच तेषां हीनत्वपरिहाराय त्रिवृतः पवमाना भवन्ति बहिष्पवमानादिषु त्रिषु पवमानस्तोत्रेषु त्रिवृत् स्तोमः कार्य्य इत्यर्थः स्तोमानाम्मध्ये त्रिवृत्स्तोमो मुखं वै मुख्यः प्रथमः यदेवं विधस्य त्रिवृतः पवमानेषु करणं तेन यज्ञस्य मुखतः सवनत्रयप्रारम्भ एव एनान् परिगायति ब्राह्मणत्वं प्रापयति ॥ २ ॥

अथास्याच्छावाकसम्बन्धिनोराज्यपृष्ठस्तोत्रयोः षोडशः स्तोमः कार्य्य इति स्तुतिमुखेन दर्शयति।

यद् वै षोडशे स्तोत्रे भवतस्तेन पाप्मनोऽधिनिर्मुच्यन्ते ॥ ३ ॥

सिद्धप्रायमेतत् ॥ ३ ॥

अथाग्निष्टोमसाम्न एकविंशस्तोमं विधाय स्तौति।

एकविꣳशोऽग्निष्टोमो भवति प्रतिष्ठा वा एकविꣳशोऽन्तत एव यज्ञस्य प्रतितिष्ठन्ति ॥ ४ ॥

अग्निष्टोमसंस्थत्वादेतस्य व्रात्यस्तोमस्य अग्निष्टोमसाम्नो ऽन्तत्वं ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

अथ ये स्थविरा व्रात्यास्तेरनुष्ठेयं व्रात्ययज्ञं दर्शयति ।

अथैष शमनीचामेढ्राणाꣳ स्तोमो ये ज्येष्ठाः सन्तो व्रात्यां प्रवसेयुस्त एतेन यजेरन् ॥ १ ॥

अथानन्तरं एष वक्ष्यमाणो यज्ञः शमनीचामेढ्राणां स्तोमः शमेन यौवनोपरमेण नीचमनुद्धतं मेढ्रं येषां ते शमनीचामेढ्राः स्थाविर्याद्विनष्टवीर्या इत्यर्थः, तेषां सम्बन्धी स्तोमः अतो ये ज्येष्ठाः वृद्धतमाः सन्तो व्रात्यतां प्राप्य प्रवसेयुरेतेन व्रात्यस्तोमेन यजेरन् ॥ १ ॥

अथास्योर्द्धतनस्तोमतां विधत्ते ।

अग्रादग्रꣳ रोहन्त्यूर्द्वाः स्तोमा यत्त्यनपभ्रꣳशाय ॥ २ ॥

अनपभ्रंशाय अनधःपतनाय अधिकसंख्याकं स्तोमं कृत्वा यदि न्यूनसंख्याकं स्तोमं प्रयुञ्जीरन् तदा भवेदधःपातः नैवमूर्द्ध

स्तोमत्वमित्यर्थः; तथाच एवं कुर्वाणो यजमानः; अग्रात् श्रैष्ठ्यात् अग्रं श्रैष्ठ्यं रोहन्ति आरूढा भवन्ति उत्तरोत्तरमुन्नतं पदं प्राप्नुवन्तीत्यर्थः; एतच्चोर्ध्वस्तोमत्वं कल्पकारेण दर्शितं द्वे त्रिवृती स्तोत्रे द्वे पञ्चदशसप्तदशे द्वे एकविंशचतुर्विंशे इत्यादिना एवञ्च पूर्व्वस्मात् स्तोत्रादुत्तरमुत्तरं स्तोत्रमधिकस्तोमकं भवतीत्युक्तं भवति ॥ २ ॥

अथैतस्य शमनीचामेढ्राणां स्तोमत्वं दर्शयन् ऊर्ध्वस्तोमत्वव्यतिरिक्तेन प्रकारान्तरेण स्तोमकल्पने दोषन्दर्शयति।

एतेन वै शमनीचामेढ्रा अयजन्त तेषां कुषीतकः सामश्रवसो गृहपतिरासीत्तान् लुशाकपिः खार्गलिरनुव्याहरदवाकीर्षत कनीयाꣳसौ स्तोमावुपागुरिति तस्मात्कौषीतकीनान्नकश्चनातीव जिह्रीते यत्रावकीर्णा हि ॥ ३ ॥

एतेन खलु स्तोमेन पुरा शमनीचामेढ्रा अपगतयौवनत्वेन निर्व्वीर्य्यप्रजननाः देवसत्रन्यिनो व्रात्या अयजन्त तस्मादेषः शमनीचामेढ्राणां स्तोम इत्याख्यायते तदानीन्तनानां व्रात्यानां समश्रवसः पुत्रः कुषीतको नाम ऋषिः गृहपतिर्मुख्यः आसीत् तान् कुषीतकगृहपतिसहितान् लुशाकपिर्नामा खार्गलिः खर्गलपुत्रो अनुव्याहरदशपत् ततस्ते अवाकीर्णिनः स्रष्टारा अभवन् अनुव्याहरतोऽयमभिप्रायः एते कुषीतकगृह-

पतयः कनीयांसौ अल्पसंख्यावेव द्वौ स्तोमावुपागुः प्राप्नुवन्निति पूर्वैदर्शितमुत्तरोत्तराधिकसंख्यं स्तोमं परित्यज्य न्यूनसंख्यस्तोमद्वयं प्रायुञ्जतेति तस्मादेतैरयथानुष्ठानात् यथार्थदर्शिना शुनाकर्पिना शापः कृत इत्यर्थः यस्मादेते कुषीतकमुख्याः प्राप्ता आसन् तस्मादेव कारणात् कौषीतकीनां कौषीतकशाखाध्येतॄणां वा मध्ये कञ्चन कोऽपि पुरुषः नातीव जिह्रीते अतीव आश्रयो न गच्छति ओहाङ् गताविति धातुः हि यस्मात् एते यज्ञावकीर्णा अन्यथानुष्ठितेन यज्ञेन निमित्तेनावकीर्णा अवकीर्णिनः विभ्रष्टब्रह्मचर्याः तस्मादित्यर्थः ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य
चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

अथ पञ्चभिरग्निष्टुतोविधिस्तत्र केचित् प्रथमेन खण्डेन द्वावग्निष्टुतौ विधीयेते अपरौ चतुर्भिश्चत्वार इति षडग्निष्टुत इति मन्यन्ते अपरे तु तदाऊर्ध्यत् त्रिष्टङ्वत्येकस्मादेवाङ्गात् पाप्मानमपहन्तीत्यादिना प्रथमस्याग्निष्टुतो निन्दापुरःसरं अन्यस्यैव विधानात् प्रथमस्याननुष्ठेयत्वात् पञ्चैवाग्निष्टुत इति वर्षयन्ति कल्पकारस्य तु चत्वारोऽग्निष्टुत इति मतं चतुर्णामेव स्तोमस्तोत्रीयाकल्पनात् एतत् पञ्चत्वयं सूत्रकारेणोक्तं षडग्निष्टुतः त्रिवृज्ज्योतिष्टोमस्याद्यौ स्वर्गे वारवन्तीयावित्यादिना

एतेषु त्रिषु पक्षेषु षडग्निष्टुत इति पक्षः साधीयान् यथा द्वितीयादिषु खण्डेषु पृथक् पृथगग्निष्टुतो विधानं फलञ्च दृश्यते तथाच निदानकारेणोक्तं ते इमे पञ्चानुवाकाश्चत्वारः कल्पाः स एष प्रथमोऽनुवाकः सर्वेषां सार्ष्टस्यादियुक्तं पुनरित्युक्तं अपि वा प्रथमस्य द्वौ स्यातामिति अथ तेषु प्रथमस्य त्रिवृदग्निष्टुतो ब्रह्महत्यानिर्हरणार्थत्वं प्रतिपादयिष्यन् तदर्थं प्रथमं तावदाख्यायिकामाह।

इन्द्रो वै त्रिशिरसं त्वाष्ट्रमहञ्छुक्लमस्यौला वाग-भ्यवदत् सोऽग्निमुपाधावत् स एतदग्निस्तोत्रमपश्यत्तदात्मन्यधिविधाय तेनैनमयाजयत्तेनास्यास्यौलां वाचमपाहन्॥ १॥

त्रिशिरसं त्रीणि शिरांसि यस्य तादृशं त्वाष्ट्रन्त्वष्टुः पुत्रं विश्वरूपाख्यं देवानां पुरोहितं असुरहिताचरणे प्रयतमानं इन्द्रः पुरा हतवान् ततस्मिन्द्रं अस्यौला पापरूपा वागभ्यवदत् हे ब्रह्महन् ब्रह्महन्निति ततः स इन्द्रोऽग्निमुपाधावदुपागच्छत् स चाग्निरेतदग्निस्तोत्रं अग्नेरेव स्तोत्रं नान्येषां देवानां यस्मिन् तमग्निष्टुतमपश्यत् अदर्शयत् तदग्निस्तोत्रमात्मन्यधिविधाय आत्मना धृतं कृत्वा तेनाग्निष्टुता एनमिन्द्रं अयाजयत् तेन चेष्टेन यज्ञेन अस्येन्द्रस्य अस्यौलां ब्रह्महन्नित्येवंरूपां पापां वाचं अपाहन् व्यनाशयन्॥ १॥

अथैतद्धेदितुः फलमाह।

अपाम्शोलां वाचꣳ हते य एवं वेद ॥ २ ॥

स्पष्टोऽर्थः ॥ २ ॥

अथैतमग्निष्टुतं विधत्ते।

योऽपूतइव स्यादग्निष्टुता यजेताग्निनैवास्य पाप्मान-मपहत्य त्रिष्टुता तेजो ब्रह्मवर्चसं दधाति ॥ ३ ॥

यस्मादेवमुक्तप्रकारेण त्रिष्टुदग्निष्टुता यो यजमानः अपूतोऽशुद्ध इव स्यात् ब्रह्महत्यादिदोषाशङ्कितो भवेत् सोऽग्निष्टुता त्रिष्टुत्स्तोमकेन यजेत तथाच स्तूयमानेन ऋत्विग्यजमानाभ्यामग्निना अस्यात्मनः पापं अपहत्य दग्धा निष्पापोऽस्मिन् त्रिष्टुता स्तोमेन तेजो ब्रह्मवर्चसञ्च दधाति निदधाति स्थापयति अग्निना ब्राह्मणजात्या च सहोत्पन्नत्वात् त्रिष्टुत्स्तोमस्योभयहेतुता एवं पूतत्वं ब्रह्मवर्चसञ्च कामयमानस्य त्रिष्टुदग्निष्टुद्विहितः ॥ ३ ॥

अथ चतुष्टोमाग्निष्टुतं विधातुं उक्ते कञ्चिद्दोषं दर्शयति।

तदाऽऽर्ष्यन्त्रिष्टुङ्वत्येकस्मादेवाङ्गात् पाप्मानमपहन्ति मुखादेवेति ॥ ४ ॥

तत्र अग्निष्टुद्विषये आऽऽर्ष्योदयन्ति ब्रह्मवादिनः यद्यदि त्रिष्टुदेक एव स्तोमो भवति तर्ह्येकस्मादेवाङ्गात् पाप्मानमपहन्ति किं तदेकमङ्गमिति मुखादेवेति त्रिष्टुत्स्तोमस्य प्रजा-

पतेर्मुखादुत्पन्नत्वात् अग्निष्टुत: सर्वस्तोमेषु प्रयुज्यमान: स्तोम: मुखादेव सकाशात् पापन्निवारयति नान्यस्माद्वयवादिति ॥ ४ ॥

कतमस्तर्हि प्रशस्तस्तमाह।

ज्योतिष्टोम एव कार्य्य: ॥ ५ ॥

त्रिवृत्पञ्चदशसप्तदशैकविंशा: स्तोमा: ज्योति:शब्देनोच्यन्ते त्रिवृतादयस्त्वार: स्तोमा यस्यं तथाविधोऽग्नि: कार्य्योऽनुष्ठेय: ॥ ५ ॥

एवमनुष्ठित: सर्वेभ्योऽवयवेभ्य: पाप्मनो निवारणकारणमित्याह।

यत्त्रिवृद्वति यदेवास्य मुखतोऽपूतं तत्तेनापहन्ति यत् पञ्चदशो यदेवास्योरस्तो वाह्वोरपूतं तत्तेनापहन्ति यत् सप्तदशो यदेवास्य मध्यतोऽपूतं तत्तेनापहन्ति यदेकविंशो यदेवास्य पदोरष्ठीवतोरपूतं तत्तेनापयन्ति ॥ ६ ॥

यत् यस्मात् अस्मिन्नग्निष्टुति त्रिवृत्स्तोमो भवति अस्य यजमानस्य मुखत आस्यदेशे यदपूतं अशुद्धिकरं पापं तदपूतं तत् त्रिवृत्स्तोमेनापहन्ति त्रिवृत: प्रजापतिमुखादुत्पत्तेर्मुखसम्बन्ध: यद्यस्मादग्निष्टुति पञ्चदशस्तोमो भवति यदेवास्योरस्य: उरसि वक्षसि बाह्वोश्चापूतं पापं तत्तेन पञ्चदशेनापहन्ति स ष्टि

प्रजापतेरुरसोवाङ्भ्याङ्खोत्पन्नः यत् सप्तदशस्तोमो भवति यदेवास्य यजमानस्य मध्यतो देहमध्ये अपूतं तत्तेन सप्तदशेनापघ्नन्ति मध्यतः सप्तदशन्निरमिमीतेति प्रजापतेर्मध्यदेशात्तस्तोत्यत्तेः प्रतिपादनात् यदेकविंशस्तोमो भवति यदेवास्य यजमानस्य पदोः पादतलयोरष्ठीवतोरूर्ध्वोस्त्यापूतं तेनैकविंशेन तदपूतमपहन्ति ॥ ६ ॥

अथास्मिन् वारवन्तीयमग्निष्टोमसामत्वेन विधत्ते।

वैश्वानरं वा एष प्रविशतीत्याङ्ख्यो ऽग्निष्टुता यजत इति वारवन्तीयमग्निष्टोमसाम कार्य्यन्तस्य यदपूतं तदग्निः क्षापयत्यथेतरः शुचिः पूत उदेति ॥७॥

यो यजमानोऽग्निष्टुता यजते एष वैश्वानरमग्निं प्रविशतीत्याङ्ख्यो ब्रह्मवादिनः तस्याग्निष्टुतः केवलाग्नेयत्वात् तस्यानुष्ठातारमेव प्रविशतीत्युच्यते कः पुनरस्य प्रतिकारः तदाह वारवन्तीयमिति वारवन्तीयं स्वकीयास्वृक्षु अग्निष्टोमसामत्वेन कार्य्यं यतः अग्निप्रविष्टस्य यजमानस्य यदपूतमपूतत्वं अशुद्धिरस्ति तदग्निः क्षापयति दहति अथानन्तरं अपां सारभूतेन वारवन्तीयेन सिक्तत्वात् इतरो यजमानः शुचिः शुद्धः पापरहितः पूतः कर्म्मयोग्यश्च सन् उदेति उद्गच्छति प्रकाशते ॥ ७ ॥

इति तारण्डमहाब्राह्मणे सप्तदशाध्यायस्य

पञ्चमः खण्डः।

अथ षष्ठः खण्डः ।

अथ तृतीयमग्निष्टुतं विधत्ते ।

त्रिवृदग्निष्टोमस्तस्य वायव्यास्वग्निष्टोमसाम ॥१॥

अग्निष्टोमसंस्थस्त्रिवृत्स्तोमकस्तृतीयोऽग्निष्टुत् तस्य वायव्यास्तृचे गीयमानं वारवन्तीयमग्निष्टोमसाम कार्यं उपत्वाजामयोगिर इत्याद्या वायव्या ऋचः कल्पकारोक्ताः उपत्वाजामयो गिर इति वायव्यासु वारवन्तीयमग्निष्टोममामेति ॥ १ ॥

अथास्मिन्नधिकारिणमाह ।

ब्रह्मवर्चसकामो यजेत ॥ २ ॥

स्पष्टं ॥ २ ॥

अथैतस्य त्रिवृत्स्तोमत्वं वायव्यास्वग्निष्टोमसाम्नः करणञ्च सौति ।

तेजो वै त्रिवृद् ब्रह्मवर्चसं यद्वायव्यास्वग्निष्टोमसाम भवत्युपैवैनन्नह्यति ॥ ३ ॥

त्रिवृतस्तेजोब्रह्मवर्चसरूपत्वमुक्तं तस्मात्तत्स्तोमद्वारेणास्य ब्रह्मवर्चसहेतुत्वं अपि च वायव्यासु वायुदेवताकास्वृक्षु यदग्निष्टोमसाम भवति तदेनं यजमानमुपधमत्येव यथा लोहकारो लोहतः कोटमपनेतुं अग्नौ प्रास्यत इति तत्सम्बन्धिना वायुना

धमति एवं वायव्यास्तृचं करणं यजमानस्य पापधमनाय भवतीत्यर्थः ॥ ३ ॥

एतदेवाह ।

यथा हिरण्यन्निष्टपेदेवमेनमग्निष्टुन्निष्टपति ॥ ४ ॥

यथा येन खलु प्रकारेण हिरण्यं स्वर्णकारो निष्टपेत् मालिन्यापनयनार्थं एवमयमग्निष्टुद्यागो यजमानन्निष्टपति निष्टप्तं पापहीनं करोतीत्यर्थः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य
षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

अथ पशुकामस्यान्यमग्निष्टुतं विधत्ते ।

एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो यजेत ॥ १ ॥

एतस्यैवाग्निष्टुतो रेवतीषु रेवतीर्न इत्याद्यास्तृचे वारवन्तीयमग्निष्टोमसाम कृत्वा अनेनाग्निष्टुता पशुकामो यजेत ॥ १ ॥

अथास्य पशुसाधनत्वमुपपादयति ।

जरत्कक्षो वा एष योऽपशुर्यथा वै जरत्कक्षे पशवो न रमन्त एवमेतस्मिन् पशवो न रमन्ते यो

ऽपशुर्यदा वै जरत्कक्षमग्निर्दहत्यथैनमभिवर्षत्यथास्मिन्नोषधयो जायन्तेऽथ वै तस्मिन् पशवोरमन्ते ॥२॥

यो यजमानोऽपशुः पशुरहितः स जरत्कक्षो वै जीर्णतृणगुल्मसदृशः तदेव सादृश्यं दर्शयति यथा खलु जरत्कक्षे जीर्णतृणेऽरण्ये पशवो न रमन्ते खाद्यस्य बालतृणस्याभावान्नावतिष्ठन्ते एवमेव एतस्मिन् पुरुषे पशवो न रमन्ते योऽपशुः पशुरहितः तस्माज्जरत्कक्षसदृशोऽयं यजमानः यदा खलु एनं जरत्कक्षमग्निर्दहति भस्मसात्करोति अथानन्तरमेनं दग्धं जरत्कक्षं पर्जन्यो वर्षति अथानन्तरमस्मिन्नोषधयस्तृणादयो जायन्ते अथानन्तरमेव तस्मिन् स्थाने पशवो रमन्ते एवमेवाग्निष्टुता दग्धपापाः रेवतीषु गीयमानेन वारवन्तीयेन अपां रसात्मना संस्तुतेन संसिक्ते यजमाने पशवो रमन्त इत्यर्थः ॥ २ ॥

अथैतद्वेदनं प्रशंसति ।

रमन्तेऽस्मिन् पशवो य एवं वेद ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

अपशोर्यजमानस्य जरत्कक्षसाम्यमुक्तं अथास्यापशुत्वदाहकः कोऽग्निः केन जलेन सिच्यत इति तदुभयमाह ।

यदेवास्यापशव्यन्तदग्निष्टुन्निर्दहति यदग्निष्टुन्निर्दहति तदङ्गीरेवतीभिः शमयति ॥ ४ ॥

रेवतीभिश्च वर्षणात् कोमलत्वगायुक्तो नूतनत्वगाकश्च इव यजमानः पशूनामाश्रयो भवतीत्यर्थः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य
सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

यद्यग्निष्टोमादियज्ञं प्रारब्धवतो यजमानस्य कुतश्चिन्निमित्तात्समाप्त्यभावेन यज्ञो विच्छिन्नः स्यात् तदा यजमानो यज्ञाद्विभ्रष्टो भवेत् तस्य प्रायश्चित्तत्वेन ज्योतिष्टोमोऽग्निष्टुदनुष्ठेय इत्याह ।

ज्योतिष्टोमेनाग्निष्टुता यज्ञाद्विभ्रष्टो यजेत ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

प्रारब्धेऽसमाप्यमाने च सोमयागे अनुष्ठेयानां प्रधानयागानां ऐन्द्रवायवादीनां बर्हिष्प्रवमानादीनां स्तोत्राणाञ्च मध्ये यदि किञ्चित्प्रमादाद्विस्मृतं स्यात् तदाप्ययं प्रायश्चित्तत्वेनानुष्ठेय इत्याह ।

यस्मिन् वा यज्ञक्रतौ विस्रंसेत ॥ २ ॥

अथ वा यस्मिन् यज्ञक्रतौ सोमयागे प्रधानैकदेशविस्मरणात् विस्रंसेत अनुष्ठेयाद्विभ्रष्टो भवेत् तत्राप्यनेन यजमानो ज्योतिरग्निष्टुता यजेतेति ॥ २ ॥

अथ केवलाग्नेयस्याग्निष्टुतोऽनुष्ठानं यज्ञविभ्रष्टस्योपपादयति।

अग्निर्वा एतस्य हव्यमत्ति यो यज्ञे विभ्रंशते न देवता हव्यं गमयत्यग्निमेवैकधार्द्नोति ॥ ३ ॥

एतस्य यजमानस्य हव्यं हविश्च पुरोडाशसोमादिकं अग्निरेवात्ति भक्षयति यष्टव्या अन्या इन्द्राद्या देवता हव्यं न गमयति यो यजमानो यज्ञेऽनुष्ठीयमाने विस्रंशते विभ्रष्टो भवेत् एतस्येति सम्बन्धः; तथा चाग्निष्टुता एकधा एकप्रकारेण अग्निमेवर्द्नोति हविर्भिः समर्द्धयति एवमग्निष्टुति कृते सति पश्चादन्या देवता हवींषि प्रापयतीत्यर्थः ॥ ३ ॥

अथ विस्रष्टस्य यज्ञस्यासमाधाने फलप्राप्त्यभावं प्रायश्चित्तेन समाधाने तत्सद्भावञ्च सदृष्टान्तं दर्शयति।

यद्वै सꣳशीर्य्यतेऽथान्यन्निष्कुर्व्वन्ति न तेन तद्याति यदा वाव तन्निष्कुर्वन्त्यथ तद्याति येष्वेव स्तोमेषु विभ्रꣳशते यस्मिन् यज्ञक्रतौ तैरेव यजेत येष्वेव स्तोमेषु विभ्रꣳशते यस्मिन् यज्ञक्रतौ तेष्वेव प्रतितिष्ठति ॥ ४ ॥

यद्वै यत् खलु रथादिकं वाहनं संशीर्य्यते संशीर्णं भग्नं भवेत् अथानन्तरं तस्मात् संशीर्णात् अन्यद्वाहनं निष्कुर्व्वन्ति संस्कुर्व्वन्ति तत्तदानीं तेन पूर्व्वगामिना संशीर्णेन वाहनेन न याति न गच्छति यदा खलु तदेव संशीर्णं निष्कुर्व्वन्ति समा-

दधते तत्तदा तेनैव याति गच्छति यस्मादेवं लोके तस्माद् यस्मिन् सोमयागे येष्वेव स्तोमेषु प्रयोज्येषु विष्टदादिषु विभ्रंशेत न्यूनाधिकसंख्यया स्वरूपविस्मरणादिना च विभ्रष्टो भवेत् तैरेव स्तोमैः साधनैः पुनर्यजेत तथाच विलुप्तानां प्रायश्चित्तपूर्वकं पुनर्याजेन समाधानात् येष्वेव स्तोमेषु पूर्वं यजमानो विभ्रंशते यस्मिन् सोमयागे तत्र तेष्वेव स्तोमेषु पुनः प्रतिष्ठितो भवति सम्पूर्णावयवोऽस्य यज्ञः फलसाधनाय समर्थो भवतीत्यर्थः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य

अष्टमः खण्डः ।

अथ नवमः खण्डः ।

अथान्यमग्निष्टुतमाह ।

सप्तदशेनाग्निष्टुतान्नाद्यकामो यजेत ॥ १ ॥

अन्नमर्हमन्नं तत्कामयमानः सप्तदशेन सप्तदशस्तोमकेनाग्निष्टुता यजेत ॥ १ ॥

अथैतस्यान्नसाधनत्वमुपपादयति ।

अन्नं वै सप्तदशोऽग्निरन्नाद्यस्य प्रदाताग्निरेवास्मा अन्नाद्यं प्रयच्छति ॥ २ ॥

सप्तदशस्तोमोऽन्नं वै अन्नमेव अन्नाधारात् प्रजापतेर्मध्य-

देहादुत्पत्तेः अग्निश्चान्नाद्यस्य अदनीयस्यान्नस्य आहुतिद्वारा प्रदाता तथाच स्मर्यते अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नततः प्रजा इति एवञ्चाग्नेः सप्तदशस्य चाग्निष्टुतिं संहत्य प्रयुक्तत्वात् अस्मै यजमानाय अग्निरेवान्नाद्यं प्रयच्छति दिशति ॥ २ ॥

अथैतद्धेदितुः फलमाह ।

अन्नादो भवति य एवं वेद ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

अथोक्तसप्तदशस्तोमकत्वमनूद्य स्तौति ।

सर्वः सप्तदशो भवति प्रजापतिर्वै सप्तदशः प्रजापतिमेवाप्नोति ॥ ४ ॥

सर्वेषु स्तोत्रेषु येयः स्तोमः स सर्वः सप्तदशो भवति स च सप्तदशः प्रजापतिर्वै प्रजापतिरेव द्वादशमासाः पञ्चर्तवः स संवत्सरः संवत्सरः प्रजापतिरिति श्रुतेः संवत्सरावयवमासर्तुसंख्यासाम्यात् सप्तदशस्य संवत्सरात्मकत्वं स च संवत्सरः प्राजापत्यात्मक इति सप्तदश एव प्रजापतिरिति व्यपदिश्यते तथा च सप्तदशस्तोमेनानेन प्रजापतिमेवाप्नोति ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य

नवमः खण्डः ।

अथ दशमः खण्डः ।

अग्निष्टुतो यज्ञाः, पञ्च षट् वा एकाहा इति, अथ त्रयस्त्रिंशत एकाहाः प्रजापतेरपूर्व्वो बृहस्पतिसवः सर्व्वस्वार इति तत्र प्रथमं दर्शयति ।

त्रिवृदग्निष्टोमस्तस्यानिरुक्तं प्रातःसवनं ॥ १ ॥

त्रिवृत्स्तोमकोऽग्निष्टोमसंस्थोऽयमेकाहस्तस्य प्रातःसवनं मर्व्वमनिरुक्तं बहिष्पवमानादिषु प्रातःसवनेषु पञ्चसु स्तोत्रेषु गायत्रं सामानिरुक्तं गेयमित्यर्थः उद्गाता स्वभक्तिमुद्गीथमुपद्रवञ्च मनसा प्रयुञ्जानः स्वभक्तिसदृशं ओङ्कारं कृत्वा तं वाचा ब्रूयादिति अनिरुक्त इत्यस्य लक्षणं तथा च स्तूयकारेणोक्तं मनसा तु स्वभक्तिमोङ्कारं तथा स्वरं वाचा गायेदिति ॥ १ ॥

अथैतदनिरुक्तं स्तोतुमाह ।

प्रजापतिः प्रजा असृजत ता अस्मात्सृष्टा अपाक्रामन् स एतदनिरुक्तं प्रातस्सवनमपश्यत्तेनासां मध्यं व्यवैत्ता एनमुपावर्त्तन्त पर्य्यनमाविशन् ॥ २ ॥

पुरा प्रजापतिः प्रजानामधिपतिः स्रष्टा प्रजा असृजत स्रष्टवान् ताश्च स्रष्टा अस्मात्प्रजापतिसकाशात् अपाक्रामन् आगता आसन् ततः स प्रजापतिः एतदनिरुक्तं उक्तप्रकारेण प्रयोज्यं प्रातःसवनमपश्यत् तेन च प्रातःसवनेनासां प्रजानां मध्यदेशं व्यवैत् विशेषेणागच्छत् ताश्च प्रजाः एनं प्रजापतिमुपावर्त्त

उपागच्छन् उपागत्य च एनं पर्य्यविशन् परितो निषसा आसन् ॥ २ ॥

यस्मादेवं तस्मात् एतदनिरुक्तं प्रातःसवनं प्रशस्तमिति दर्शयन् अस्मिन्नधिकारिणमाह ।

ग्रामकामो यजेत यदेतदनिरुक्तं प्रातःसवनं भवति मध्यमेवासां व्यवैत्युपैनमावर्त्तन्ते पर्य्येनं विशन्ति ॥३॥

ग्रामकामो यजमानोऽनेनैकाहेन यजेत तस्य चैतत् प्रातःसवनं यद्यस्मादनिरुक्तं भवति तेन आसां प्रजानां मध्यमेव व्यवैति प्राप्नोति एनं यजमानं ताश्च प्रजा उपावर्त्तन्ते उपगच्छन्ति उपगत्य च एनं परितो निषीदन्ति ॥ ३ ॥

अथास्य संज्ञां प्रदर्श्य तद्वेदितुः फलमाह ।

स एष प्रजापतेरपूर्वो नास्मात् पूर्वो भवति य एवं वेद ॥ ४ ॥

स एष यज्ञः प्रजापतेरपूर्वोनाम प्रजापतेरनेनापूर्वता तस्मात् पूर्वभाविना पुरुषान्तरेण राहित्यं प्राप्नवानिति व्युत्पत्त्या प्रजापतेरपूर्व इत्यस्य संज्ञा जाता अतो यएतां संज्ञां वेद जानाति अस्मात् पूर्वः कोऽपि न भवति सर्वेषां स्वयं ज्येष्ठो भवतीत्यर्थः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य

दशमः खण्डः ।

अथ एकादशः खण्डः ।

अथ बृहस्पतिसवाख्यमेकाहं प्रस्तौति ।

त्रिवृदग्निष्टोमः ॥ १ ॥

त्रिवृत्स्तोमकोऽग्निष्टोमसंस्थो बृहस्पतिसवाख्य एकाहः ॥१॥

अथास्य त्रयस्त्रिंशद्गावश्चतुस्त्रिंशएकोऽश्व इति दक्षिणा विधित्सुस्तासां सवनत्रये विभज्य दानप्रकारमाह ।

तस्य प्रातस्सवने सन्नेषु नाराशंसेष्वेकादश-दक्षिणाव्यादिशत्यश्वद्वादशा माध्यन्दिने ता उभयो-रपाकरोत्येकादश तृतीयसवने ता वशायामपाक-रोति ॥ २ ॥

तस्य सोमयागस्य प्रातःसवने नाराशंसेषु ऊतशिष्टा भक्षिता आप्यायिताश्चमसा नाराशंसाः तत्र प्रातःसवनमाध्यन्दिनसवने विनाराशंसे तृतीयसवनं त्वेकनाराशंसं तत्र प्रथमेषु नाराशं-सेषु सन्नेषु सादितेषु सत्सु एकादशसङ्ख्या दक्षिणा गावो दिशति युष्मदर्थमेता गाव इति ऋत्विग्भ्यो निर्दिशेदित्यर्थः तथा माध्य-न्दिनसवने सन्नेषु नाराशंसेषु अश्वद्वादशाः अश्वो द्वादशसङ्ख्या-पूरको यासां ता अश्वद्वादशा एकादशदक्षिणा व्यादिशति उभयोः उभयविधाः प्रातःसवने माध्यन्दिनसवने च व्यादिष्टा-सुः गा अपाकरोति पृथक्करोति ऋत्विग्भ्यो ददातीत्यर्थः एवञ्च प्रातःसवने व्यादेशमात्रमेव न तु दानमित्युक्तं भवति तथा

तृतीयसवने सन्नेषु नाराशंसेष्वेकादशदक्षिणा गाः व्यादिशति ऋत्विग्भ्यो युष्मदर्थं एतदिति निर्दिशेदित्यर्थः ता एकादशसंख्याका वशायां मैत्रावरुणीवशा ह्यनूबन्ध्या तस्यां वशायां ऊतायां अपाकरोति पृथक्करोति ऋत्विग्भ्यो दद्यादित्यर्थः ॥ २ ॥

अथैताः संहत्य विधाय स्तौति ।

चयस्त्रिꣳशदेता दक्षिणा भवन्ति चयस्त्रिꣳशद्वै देवता देवता एवाप्नोत्यश्वश्चतुस्त्रिꣳशो दक्षिणानां प्रजापतिश्चतुस्त्रिꣳशो देवतानां प्रजापतिमेवाप्नोति ॥ ३ ॥

एतास्त्रयस्त्रिंशद्भावो अस्य क्रतोर्दक्षिणा भवन्ति त्रयस्त्रिंशत्संख्या हि देवताः अष्टौ वसव इत्याद्यास्तथा च दक्षिणार्थं त्रयस्त्रिंशत्संख्या देवता यजमानः प्राप्नोति तथा तासां दक्षिणानां चतुस्त्रिंशश्चतुस्त्रिंशत्संख्यापूरको अश्वो देयः देवतानां वस्वादीनां प्रजापतिश्चतुस्त्रिंशश्चतुस्त्रिंशत्संख्यापूरकः तथा च चतुस्त्रिंशेनाश्वेन चतुस्त्रिंशं प्रजापतिमेवाप्नोति ॥ ३ ॥

अथैतस्य बृहस्पतिसव इति संज्ञां विधाय तं निर्वक्तुमाह ।

स एष बृहस्पतिसवो बृहस्पतिरकामयत देवानां पुरोधां गच्छेयमिति स एतेनायजत स देवानां पुरोधामगच्छत् ॥ ४ ॥

स एष एकाहो बृहस्पतिसव इत्याख्यायते पुरा खलु बृह-

स्पतिरकामयत किमिति देवानामिन्द्रादीनां पुरोधां पौरोहित्यं गच्छेयं प्राप्नुयामिति एवं कामयित्वा सोऽनन्तरं एतेन यज्ञेनेष्टवान् सचैतस्य माहात्म्येन देवानां पुरोधां प्राप्नोत् तस्मादस्य बृहस्पतिसव इति संज्ञा जाता ॥ ४ ॥

अथैतद्वेदनफलमाह।

गच्छति पुरोधां य एवं वेद ॥ ५ ॥

स्पष्टं ॥ ५ ॥

राज्ञा सह ब्राह्मणाः यं ब्राह्मणं धर्म्मस्थापकत्वेन वृणीरन् सस्पतिरित्युच्यते तेन प्राप्तस्थापत्येन पुंसा नैमित्तिकत्वेनायमनुष्ठेय इत्याह।

स एष स्पतिसवो यꣳ स्थापत्याया भिषिञ्चेरन् स एतेन यजेत ॥ ६ ॥

स एष यज्ञः स्पतिसवः स्पतिनानुष्ठेयः अतो यं ब्राह्मणं स्थापत्याय स्पतित्वाय अभिषिञ्चेरन् राजपुरःसरा ब्राह्मणा वृणीरन् सोऽयमेतेन बृहस्पतिसवेन यजेत यथा लब्धहिरण्यस्य नैमित्तिकेष्टिः तद्वत्प्राप्तस्थापत्यस्यायं निमित्तको यज्ञश्चोद्यत इत्यर्थः ॥ ६ ॥

अथैतद्वेदनं प्रशंसति।

गच्छति स्थापत्यं य एवं वेद ॥ ७ ॥

स्पष्टोऽर्थः ॥ ७ ॥

येषु सोमयागेषु यजमानोऽभिषिक्तोऽस्ति तेषां सव इत्याख्या अस्यापि बृहस्पतिसव इति सवशब्दाभिधेयत्वादभिषेकः कार्य्य इत्याह।

कृष्णाजिनेऽध्यभिषिच्यत एतद् वै प्रत्यक्षं ब्रह्मवर्चसं ब्रह्मवर्चस एवाध्यभिषिच्यते ॥ ८ ॥

कृष्णाजिनं कृष्णमृगत्वक् तस्यां समासीनो यजमानोऽभिषेक्तव्यः एतत् खलु कृष्णाजिनं प्रत्यक्षं साक्षाद् ब्रह्मवर्चसं ऋक्सामे हि पुरा देवेभ्यः कुतश्चिन्निमित्तादपक्रान्ते कृष्णमृगरूपमास्थाय पर्य्यचरतां तथा च तैत्तिरीयके ऋक्सामे वै देवस्य इत्यादिना कृष्णाजिनस्य ब्रह्मवर्चसरूपत्वं विस्पष्टमाम्नातं तथा तत्रैव बृहस्पतिसववाक्यशेष एवमाम्नायते ब्रह्मणो वा एष ऋक्सामयोरूपं यत् कृष्णाजिनमिति एवञ्च कृष्णाजिनस्य ब्रह्मवर्चसरूपत्वात् ब्रह्मवर्चस एवोपविष्टोऽभिषिच्यते ॥ ८ ॥

अथाभिषेकसाधनद्रव्यं दर्शयति।

आज्येनाभिषिच्यते तेज आज्यन्तेज आत्मन्धत्ते ॥ ९ ॥

आज्येन घृतेनाभिषिच्यते तच्चाज्यं तेजस्तेजोरूपं आग्नेयस्य तेजसः शारीरस्य चाग्निरूपत्वात् तथा च आत्मन् आत्मनि तेजोधत्ते यजमानो धारयति एवञ्च ब्रह्मवर्चसकाम-

स्तोजस्कामो वा अनेन यजेतेति अधिकारविधिरत्रेयः ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य

एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

अथान्यं त्रिवृदग्निष्टुतासेकाहमाह ।

त्रिवृदग्निष्टोमः स सर्व्वस्तोमो यः कामयेतानामयतामुं लोकमियामिति स एतेन यजेत ॥ १ ॥

त्रिवृत्स्तोमकोऽग्निष्टोमसंस्थोऽपर एकाहः स च सर्व्वस्तोमः स्वरनिधनान्येव सर्व्वाणि सामानि यस्य स तथोक्तः योऽयं यजमानः कामयेत किमिति अनामयता आमयरहितेनैव देहेन व्याध्यादिराहित्येन सुखेनावस्थितादेव देहान्निष्क्रम्य अहं स्वर्गं लोकं द्यां प्राप्नुयामिति स यजमान एतेन यज्ञेन यजेत स्वर्गकामोऽस्मिन्नधिकारीत्यर्थः ॥ १ ॥

अथ स्तोमनिधनद्वारेणास्योत्पत्तिफलानुगुण्यं दर्शयति ।

प्राणो वै त्रिवृत्प्राणः स्वरः प्राणानेवास्य बहिर्णिरादधाति ताजक् प्रमीयते ॥ २ ॥

योऽयं त्रिवृत्स्तोमः स प्राणो वै प्राणात्मकः प्राणवायुर्मुखदेशे वर्त्तते त्रिवृच्च प्रजापतिमुखादुत्पन्न इति मुखसम्बन्धाभ्यात् ताच्छब्द्यं स्वरः स्वर्यमाणो योयः सामान्तः सोऽपि

प्राणस्तुत: एवं प्राणात्मनोस्त्रिवृत्स्वरयो: सर्व्वस्तोत्रेषु प्रयोगात् अस्य यजमानस्य प्राणान्मुख्यप्राणसहितांश्चक्षुरादीन्द्रियात्मकान् बहिर्निराधत्ते शरीरान्निष्क्रम्य बहिरेव स्थापयति तथा च ताजक् तस्मिन्नेव काले प्रमीयते स यजमानोम्रियते ॥ २ ॥

अथैतौ स्तोमस्वरौ वियुज्य स्तौति ।

त्रिवृद् वै स्तोमानां क्षेपिष्ठो यत्त्रिवृद्वत्याश्नीय: सङ्गच्छाता इत्यनन्तो वै स्वरोऽनन्तोऽसौ लोकोऽनन्तमेवैनꣳ स्वर्गं लोकं गमयति ॥ ३ ॥

स्तोमानामध्ये त्रिवृत्स्तोम: खलु क्षेपिष्ठ: क्षेप्नृतम: वज्रो वै त्रिवृदित्यादि श्रुत्या वज्रात्मना संस्तुतत्वात् तथा च त्रिवृत्स्तोम: अस्मिन् यज्ञे सर्व्वस्तोत्रेषु भवति तत आश्नीय: आशुतरं अतिशीघ्रेण संगच्छातौ स्वर्गं लोकं प्राप्नोतु यजमान इत्येतदर्थं तथा स्वरोऽनन्तो वै अन्तरहित: अवसानरहित: असौ स्वर्गोलोक अनन्तोऽन्तरहित: एवञ्चानन्तेन स्वरेण अनन्तं स्वर्गं लोकमेव गमयति प्रापयति ॥ ३ ॥

अथास्मिन् यज्ञे स्तोत्रीया विधाय स्तौति ।

अभिवत्य: प्रवत्यो भवन्त्यस्मादेवैनं लोकात् स्वर्गं लोकं गमयन्ति ॥ ४ ॥

अभिवत्यो अभिशब्दयुक्ता: प्रवत्य: प्रशब्दयुक्ताश्च स्तोत्रीया भवेयु: ताश्च कल्पकारेण प्रस्तोमासो अधन्विषु: प्रस्तानासो-

रथादूषोपप्रयन्तो अध्वरं प्रवोमित्राय गायत अभिद्युम्नं बृहद्यश इत्याद्याः कृताः तौ घोषसर्गौ गमनप्रकर्षेण गमनाभिमुख्यं द्योतयतः तथा चास्मादेव भूलोकात् एनं यजमानं स्वर्गं लोकं गमयन्ति अभिवर्तीभिः प्रवर्तीभिश्च प्रापयन्ति ॥ ४ ॥

अथ यजमानस्य मरणार्थं सम्भरणं विधत्ते ।

आर्भवपवमाने स्तूयमान औदुम्बर्या दक्षिणा प्राष्टतो निषद्यते तदेव सङ्कच्छते ॥ ५ ॥

तृतीयसवन आर्भवपवमान उद्गाृभिः स्तूयमाने सदोमध्ये निखाताया औदुम्बर्याः दक्षिणा दक्षिणतः दक्षिणदेशे अहतेन वाससा प्राष्टतः वेष्टितसर्वदेहः दक्षिणाशिरस्को निषद्यते शयीत तदानीमेव सङ्कच्छते म्रियते ॥ ५ ॥

अथैतस्य यागस्य व्यवहारार्थन्नाम दर्शयति ।

स एष शुनस्कर्णस्तोम एतेन वै शुनस्कर्णो बाध्किहोऽयजत तस्माच्छुनस्कर्णस्तोम इत्याख्यायते ॥ ६ ॥

स एष यागः शुनस्कर्णस्तोमसंज्ञकः एतदेव विव्रियते एतेन वा इत्यादिना एतेन खलु यागेन बाध्किहः बध्किहस्य पुत्रः शुनस्कर्णोनाम ऋषिः अयजत दृष्टवान् तस्मात् शुनस्कर्णसम्बन्धात् अयं यागः शुनस्कर्णस्तोम इत्याख्यायते ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य
द्वादशः खण्डः ।

अथ त्रयोदशः खण्डः ।

अथ शाखान्तरोक्तानि सन्ति चातुर्म्मास्यानि वैश्वदेववरुण-प्रघाससाकमेधशुनासीरीयाणि चत्वारि पर्व्वाणि, तानि च द्विविधानि ऐष्टिकानि सौमिकानि चेति, तत्र सौमिकानामतः परं विधिः, तत्र प्रथमस्य वैश्वदेवाख्यस्य पर्व्वणः स्थाने कर्त्तव्यं सोमयागमुद्दर्शयति ।

त्रिवृदग्निष्टोमो वैश्वदेवस्य लोकः ॥ १ ॥

त्रिवृत्स्तोमकोऽग्निष्टोमसंस्थः सोमयागः वैश्वदेवस्य वसन्तेऽनुष्ठेयस्य ऐष्टिकस्य वैश्वदेवाख्यस्य प्रथमपर्व्वणः स्थाने कर्त्तव्यः ॥ १ ॥

अथ तत्प्रतिपद्दर्शं सवनीयानुबन्ध्यापशोर्देवताविशेषं दर्शयति ।

आग्नेयी प्रतिपद् वैश्वदेवः पशुर्वार्हस्पत्यानुबन्ध्या ॥ २ ॥

आग्नेयी अग्निदेवत्या अग्न आयूंषि पवस इत्येषा बर्हिष्पवमानस्य प्रतिपत् प्रथमा स्तोत्रीया भवति योऽयमतिदेशतः प्राप्तः सवनीयः पशुः स वैश्वदेवः विश्वेभ्यो देवेभ्यः कार्य्यः योऽयमनूबन्ध्या वशा चोदकतः प्राप्ता सा बार्हस्पत्या बृहस्पतिदेवत्या कार्य्या ॥ २ ॥

अथ चोदकप्राप्तं किञ्चिन्निषेधयति ।

न यूपं मिन्वन्ति नोत्तरवेदिन्निवपन्ति॥ ३॥

न यूपमिन्वन्ति प्रक्षिपन्ति न खनेयुर्नाहर्त्तव्यो यूप इत्यर्थः तथा उत्तरवेदिमपि न निवपन्ति सापि चात्वालपांशुभिर्वेदिकारूपेण न कार्य्येत्यर्थः॥ ३॥

कथं तर्हि यूपाभावे पशुनियोजनमित्यत आह।

परिधौ पशुन्नियुञ्जन्ति॥ ४॥

पशुनियोजनक्षमं स्थूलं यज्ञीयकाष्ठं परिधिवेन कृत्वा तस्मिन्नज्ञनादिसंस्कृते पशुर्नियोक्तव्य इत्यर्थः॥ ४॥

अथ दक्षिणापरिमाणं विधत्ते।

षञ्चाशद्दक्षिणा॥ ५॥

षञ्चाशत्सङ्ख्याका गावोऽस्मिन्नहनि दक्षिणात्वेन देया इत्यर्थः॥ ५॥

अथ यजमानेनानुष्ठेयं व्रतं दर्शयति।

अहतं वसानोऽवभृथादुदैति चतुरोमासो न मांसमश्नाति न स्त्रियमुपैति॥ ६॥

अहतमप्रहतं नूतनं वासोवसान आच्छादनमवभृथात् अवभृथस्नानानन्तरं जलमध्यादुदैति उद्गच्छति तदनन्तरं चतुरोमासो न मांसं चतुष्टयमासपर्य्यन्तं मांसाशनन्न कार्य्यं तथा स्त्रीसङ्गतिश्च वर्जनीया॥ ६॥

अथ द्वितीयस्य वरुणप्रघासाख्यस्य पर्व्वणः स्थाने कर्त्तव्यं सोमयागमाह।

ततश्चतुर्षु मासेषु वरुणप्रघासानां लोके द्विदिवः॥७

ततो वैश्वदेवस्यानिकात् त्रिष्टदग्निष्टोमादनन्तरं मासचतुष्टये सम्पूर्णे वरुणप्रघासानां स्थाने द्विदिवः द्वयोर्दिवसयोरह्नोः समाहारः द्विरात्रः सोमयागोऽनुष्ठेय इत्यर्थः॥ ७॥

तत्र प्रथमेऽहनि प्रतिपद्विशेषं सवनीयपशुदेवताञ्च दर्शयति।

वारुणी प्रतिपन्मारुतः पशुः॥ ८॥

वारुणी वरुणदेवत्या इमम्मे वरुणेत्येषा बर्हिष्यवमानस्य प्रथमा भवति योऽयञ्चोदकप्रायः सवनीयः पशुः स मारुतो मरुद्देवत्यः कार्य्यः॥ ८॥

अथ द्वितीयेऽहनि प्रतिपत्पशुदेवते दर्शयति।

कवती प्रतिपद्वारुणः पशुः॥ ९॥

कया त्वन्न ऊत्येति कशब्दवती अन्यत् पूर्व्ववद्योज्यं॥ ९॥

पूर्व्वं हि वैश्वदेवस्यानिके त्रिष्टदग्निष्टोमे अनूबन्ध्यस्य पशोर्देवतान्तरं यूपराहित्यं उत्तरवेदिनिवपनराहित्यञ्च दृष्टं तद्दत्वापि स्यादित्यादिशङ्कां निरसितुमाह।

मैत्रावरुण्यनूबन्ध्या मिन्वन्ति यूपं न्युत्तरवेदिं वपन्ति यूपे पशुं नियुञ्जन्ति॥ १०॥

अनूबन्ध्या वशा प्रकृतिवदेव मैत्रावरुणदेवत्या कार्या तथा प्रकृतिवदेव यूपकारणमुत्तरवेदिनिवपनं कार्यं अतो यूपसङ्गावात् यूपे एव द्वयोरङ्गोः सवनीयपशू नियोक्तव्यौ न पूर्ववत् परिधौ ॥ १० ॥

अथ दक्षिणासंख्यां प्रागुक्तानि व्रतानि च एतदनुष्ठानानन्तरमपि कार्याणीति दर्शयति ।

शतं दक्षिणा अहतं वसानोऽवभृथादुदैति चतुरोमासो न माꣳसमश्नाति न स्त्रियमुपैति ॥ ११ ॥

शतसंख्यागावो दक्षिणाः प्रत्यहं पञ्चाशत् पञ्चाशदित्यर्थः अन्यत् पूर्ववद्योज्यं ॥ ११ ॥

अथ साकमेधाख्यस्य तृतीयस्य पर्वणः स्थानेऽनुष्ठेयं सोमयागमाह ।

ततश्चतुर्षु मासेषु साकमेधानां लोके विरात्रः॥१२॥

ततो वरुणप्रघासस्थाने द्विरात्रः अनन्तरं चतुर्षु मासेषु संपूर्णेषु अनुष्ठेयसाकमेधानां स्थाने त्रिरात्रः सोमयागः कार्यः ॥ १२ ॥

अथ तेषु त्रिष्वहःसु प्रतिपत्पशुदेवतादिकं दर्शयति ।

अनीकवती प्रतिपदाग्नेयः पशुर्न्माकुतो प्रतिपदैन्द्राग्नः पशुर्वैश्वकर्म्मणी प्रतिपदेकादशिनोपशवः

सौर्यानूबन्ध्या मिन्वन्ति यूपं न्युत्तरवेदिं वपन्ति यूपे पशू नियुञ्जन्ति पञ्चाशच्छतं दक्षिणा ॥ १३ ॥

अनीकवती वायोरनीके अस्थिरन्निति अनीकशब्दप्रयुक्ता उपत्वा जामयोगिर इत्येषा त्रिरात्रस्य प्रथमेऽहनि बर्हिष्यवमानस्य प्रतिपत् प्रथमा स्तोत्रीया भवति सवनीयः पशुः प्रकृतिवदाग्नेयोऽग्निदेवत्यः कार्यः द्वितीयेऽहनि तु इन्द्रायेन्दोमरुत्वत इति मरुच्छब्दयुक्ता प्रतिपद्यवति तत्र सवनीयः पशुः ऐन्द्राग्नः इन्द्राग्निदेवताकः कार्यः तृतीयेऽहनि विश्वकर्मन् हविषा वावृधान इत्येषा वैश्वकर्मणी विश्वकर्मदेवत्या बर्हिष्यवमानस्य प्रतिपत् सवनीयपशोः स्थाने एकादशिनीपशवः कार्याः ते चाग्नेयः कृष्णग्रीवः सारस्वती मेषीत्यादिना तैत्तिरीयके समाम्नाताः अनूबन्ध्या वशा सौरी सूर्यदेवत्या कार्याः अस्मिन् त्रिरात्रे पूर्ववद् यूपकरणं उत्तरवेदिनिवपनं कार्यं तथा यूपे एव प्रागनुक्रान्ताः पशवो नियोक्तव्याः अस्य च त्रिरात्रस्य पञ्चाशदधिकं शतत्रयं दक्षिणा प्रत्यृत्विजं पञ्चाशत् पञ्चाशत् दक्षिणा इत्यर्थः ॥ १३ ॥

अथ पूर्ववद्यजमानस्य व्रतानि दर्शयति ।

अहतं वसानोऽवभृथादुदैति चतुरोमासो न माएसमश्नाति न स्त्रियमुपैति ॥ १४ ॥

पूर्ववद्योज्यं ॥ १४ ॥

अथ शुनासीरीयाख्यस्य चतुर्थपर्वणः स्थानेऽनुष्ठेयं सोमयागमाह ।

ततश्चतुर्षु मासेषु शुनासीर्यस्य लोके ज्योतिष्टोमोऽग्निष्टोमः ॥ १५ ॥

ततः साकमेधस्थानीयत्रिरात्रानुष्ठानानन्तरं चतुर्षु मासेषु सम्पूर्णेषु शुनासीरीयस्य पर्वणः स्थाने ज्योतिष्टोमोऽग्निष्टोमः सोमयागः कार्यः त्रिष्टत्पञ्चदशसप्तदशैकविंशस्तोमकोऽग्निष्टोमसंस्थः प्रकृताग्निष्टोमसदृशोऽन्यः सोमयागः कार्य इत्यर्थः॥१५॥

अत्र पूर्ववत् प्रतिपत्पशुदेवतादिकं दर्शयति ।

उपवती प्रतिपद्वायव्यः पशुराश्विन्यनूबन्ध्या मिन्वन्ति यूपं न्युत्तरवेदिं वपन्ति यूपे पशू नियुञ्जन्ति द्वादशं शतं दक्षिणाः ॥ १६ ॥

उपास्मै गायतानर इत्येषा उपवती उपशब्दयुक्ता प्रतिपद् भवति वायव्यो वायुदेवत्यः सवनीयः पशुः आश्विदेवत्या अनूबन्ध्यापशोर्द्वादशाधिकं शतङ्गावो दक्षिणाः शिष्टं पूर्ववत् ॥ १६ ॥

अथैतेन चातुर्मास्येनेष्टवतः फलमाह ।

अग्निः संवत्सरः सूर्यः परिवत्सरश्चन्द्रमा इदावत्सरो वायुरनुवत्सरोऽग्निꣳ संवत्सरं वैश्वदेवेनाप्नोति

सूर्य्यं परिवत्सरं वरुणप्रघासैश्चन्द्रमसमिदावत्सरꣳ साकमेधैर्वायुमनुवत्सरꣳ शुनासीर्य्येण ॥ १७ ॥

अयमर्थः प्रभवविभवदुन्दारभ्य पञ्चशः पञ्चशो विभक्ता ये वत्सरा स्तेषां क्रमेण संवत्सरपरिवत्सरेदावत्सरानुवत्सरेदावत्सर-शब्दा वाचकाः, तथा चोक्तं चान्द्रायणैः प्रभवादीनां पञ्चके युगे संवत्सरोदाग्निर्देत्येतच्छब्दपूर्वास्तु वत्सरा इति तत्र यः संवत्सरः प्रथमः सोऽग्निः अग्न्यात्मकः परिवत्सराख्यो द्वितीयः सूर्य्यात्मक इदावत्सरस्तृतीयश्चन्द्रात्मकः अनुवत्सराख्यश्चतुर्थो वायव्यात्मकः तथा चाग्न्यात्मकं संवत्सरं वैश्वदेवेन वैश्वदेवस्थाने सोमयागेनाप्नोति सूर्य्यात्मकं परिवत्सरं वरुणप्रघासैः वरुणप्रघासस्थानीयेन द्विरात्रेणाप्नोति चन्द्रात्मकमिदावत्सरं शुनासीर्य्येण तत्स्थानेऽनुष्ठेयेन सोमयागेनाप्नोति ॥ १७ ॥

अथ लोकत्रयप्राप्तिफलतया स्तौति ।

हविर्य्यज्ञैर्वै देवा इमं लोकमभ्यजयन्नन्तरिक्षं पशुमद्भिः सामैरमुमिमानवैतेन लोकानाप्नोत्येषु लोकेषु प्रतितिष्ठति य एवं वेद ॥ १८ ॥

यज्ञास्त्रिविधाः चरुपुरोडाशादिलक्षणेनौषधेन हविषा साध्याः पशुसाध्याः सोमसाध्याश्चेति तत्र हविर्य्यज्ञैः केवलचरुपुरोडाशादिसाध्यैर्यज्ञैः पुरा देवा इमं भूलोकमभ्यजयन् अन्तरीक्षलोकं पशुमद्भिः पशुसाध्यैर्यागैः तथा सोमैः सोम-

यागैः अमुं स्वर्गलोकमध्यजयन् एवञ्च उक्तविधयज्ञसङ्घातकत्वात् उक्तानाञ्चातुर्म्मास्यानान्तैरिमानेव पृथिव्यादिकान् त्रीन् लोकानाप्नोति एषु लोकेषु प्रतिष्ठितो भवति य एवं ब्राह्मणार्थं वेद जानाति ज्ञात्वाचानुतिष्ठतीत्यर्थः ॥ १८ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य त्रयोदशः खण्डः ।

अथ चतुर्दशः खण्डः ।

अथैषां चातुर्म्मास्यानान्निरतिशयफलसाधनत्वं वक्तुमग्निहोत्रादिकर्म्मणां सातिशयफलत्वमाह ।

यदाग्निहोत्रञ्जुहोत्यथ दशगृहमेधिन आप्नोत्येकया रात्र्या, यदा दशसंवत्सरानग्निहोत्रञ्जुहोत्यथ दर्शपूर्णमासयाजिनमाप्नोति, यदा दशसंवत्सरान् दर्शपूर्णमासाभ्यां यजतेऽथाग्निष्टोमयाजिनमाप्नोति ॥१॥

अथ खण्डसमाप्तेः पाठोज्ञातव्यः, यदा यस्मिन् काले अग्निहोत्रं जुहोति अग्निहोत्रहोमङ्करोति अथानन्तरं दशगृहमेधिनः गार्हस्थ्यकर्म्मानुष्ठायिनो ये ब्राह्मणास्तैर्दशसंख्याकैर्यत् सुकृतमुपार्ज्यते तदेकया रात्र्या एकस्मिन्दिनेऽनुष्ठितेनाग्निहोत्रेण प्राप्नोति लभते यदा दशसंवत्सरपर्य्यन्तं अग्निहोत्रं जुहोति अथानन्तरं दर्शपूर्णमासयाजिनं सकृद्दर्शपूर्णमा-

साभ्यामिष्टवतो यत् फलन्तत् प्राप्नोति यदा दशसंवत्सरपर्य्यन्तन्दर्शपूर्णमासाभ्यां यजते अथान्तरं अग्निष्टोमयाजिनं अग्निष्टोमेन सोमयागेनेष्टवतो यत् फलं तत् प्राप्नोति ॥ १ ॥

यदा दशभिरग्निष्टोमैर्य्यजतेऽथ सहस्रयाजिनमाप्नोति यदा दशभिः सहस्रैर्य्यजतेऽथायुतयाजिनमाप्नोति यदा दशभिरयुतैर्य्यजतेऽथ प्रयुतयाजिनमाप्नोति यदा दशभिः प्रयुतैर्य्यजतेऽथ नियुतयाजिनमाप्नोति यदा दशभिर्न्नियुतैर्य्यजतेऽथार्बुदयाजिनमाप्नोति यदा दशभिरर्बुदैर्य्यजतेऽथ न्यर्बुदयाजिनमाप्नोति यदा दशभिर्न्यर्बुदैर्य्यजतेऽथ निखर्व्वकयाजिनमाप्नोति यदा दशभिर्न्निखर्व्वकैर्य्यजतेऽथ बहुयाजिनमाप्नोति यदा दशभिर्बहुभिर्य्यजतेऽथाक्षितयाजिनमाप्नोति यदा दशभिरक्षितैर्य्यजतेऽथ गौर्भवति यदा गौर्भवत्यथाग्निर्भवति यदाग्निर्भवत्यथ संवत्सरस्य गृहपतिमाप्नोति ॥ २ ॥

यदा खलु दशसंख्यैरग्निष्टोमैर्यजते अथानन्तरं सहस्रयाजिनं सहस्रदक्षिनक्रतुनेष्टवन्तं यजमानमाप्नोति यदा खलु दशसंख्याकैः सहस्रदक्षिणैर्य्यजते सहस्रः कथितः अयुतः कथितः अथानन्तरं अयुतयाजिनं अयुत दक्षिणेन पौण्डरी-

कादिनेष्टवन्तं यजमानमाप्नोति यदा पुनर्दशभिर्दशसंख्याकैर-युतदक्षिणैर्यजते अथानन्तरं प्रयुतयाजिनमाप्नोति दशगुणित-मयुतं प्रयुतं एवं नियुतार्बुदादिषु उत्तरोत्तरं दशगुणिता संख्या द्रष्टव्या यदा दशभिः प्रयुतदक्षिणैः क्रतुभिर्यजते अथनियुतद-क्षिणेनेष्टवन्तं प्राप्नोति यदा खलु दशसंख्याकैर्नियुतदक्षिणैर्यजते अथानन्तरं अर्बुददक्षिणेनेष्टवतः फलमाप्नोति यदा खलु दश संख्याकैरर्बुददक्षिणैर्यजतेऽथानन्तरं न्यर्बुदयाजिनं न्यर्बुदद-क्षिणेनेष्टवन्तमाप्नोति यदा पुनर्दशसंख्याकैर्न्यर्बुददक्षिणैर्यजते अथ निखर्वकयाजिनं निखर्वकदक्षिणेनेष्टवन्तं यजमानमा-प्नोति यदा खलु दशभिर्निखर्वकसंख्यदक्षिणैर्यजते अथान-न्तरं बह्वयाजिनं बह्वसंख्यदक्षिणेन यागेनेष्टवन्तमाप्नोति यदा दशभिर्बह्वसंख्याकदक्षिणैर्यजेते अथानन्तरं अचितयाजिनं स न क्षीणः सर्वेभ्योऽधिका संख्या यस्याः परं संख्यान्तर-मास्ति अचितशब्देन सा संख्योच्यते अचितदक्षिणेन यज्ञेन इष्टवन्तं यजमानमाप्नोति तादृशैर्दशसंख्याकैरचितदक्षिणैर्य-जते अथानन्तरं स यजमानो गौः आदित्यो भवति गमयति रसानागच्छत्यन्तरिक्षं इति वा गोशब्दव्युत्पत्तिः यदा चायङ्गौ र्भवति अथानन्तरं अग्न्यात्मको भवति यदा चाग्निर्भवति अथा-नन्तरं संवत्सरसत्रस्य गृहपतिः गृहपतित्वमाप्नोति अग्निना वै तेन गृहपतिरेव भूयादिति हि ब्राह्मणान्तरं ॥ २ ॥

एवमग्निहोत्रादिकर्म्मणामुत्तरोत्तरं सातिशयफलसाधनत्व-मुक्तं अथ प्रकृतानां वैश्वदेवादीनामक्षयफलसाधनत्वमाह ।

यदा संवत्सरस्य गृहपतिर्भवत्यथ वैश्वदेवस्य मात्रामाप्नोत्यतो वा इतरे परस्परां परस्परामेव सर्वे: ॥ ३ ॥

यदा यस्मिन् काले उक्तप्रकारेण संवत्सरसत्रस्य गृहपतिर्भवति अथानन्तरं वैश्वदेवस्य चातुर्म्मास्येषु प्रथमपर्व्वणोमात्रां एकदेशसदृशमाप्नोति संवत्सरसत्रमपि वैश्वदेवफलस्य एकादशसमं भवतीत्यर्थः तस्मान्निरतिशयवैश्वदेवस्य फलं इतरे सर्वे वरुणप्रघासादय अतो अस्माद्वैश्वदेवात्परस्परां परस्परामेव उत्तरोत्तरन्निरतिशयफलमित्यर्थः वैश्वदेवाद्वरुणप्रघासोऽधिकफलः ततोऽप्यधिकफलः साकमेधः ततोऽप्यधिकः शुनासीर्य्यः असुमर्थं द्योतयितुं परस्परां परस्परामिति वीप्सा एवं चातुर्म्मास्यानामक्षय्यफलत्वमुक्तं तथा च श्रुत्यन्तरं अक्षय्यं वै चातुर्म्मास्ययाजिनः सुकृतं भवतीति ॥ ३ ॥

अथैतद्धेदितुः फलमाह।

एतानेव लोकानाप्नोत्येतान् लोकाञ्जयति य एवं वेद ॥ ४ ॥

एवमुक्तं ब्राह्मणार्थं यो वेद जानाति स एतान् अग्निहोत्रादिफलत्वेनोक्तानिमान् लोकान् प्राप्नोति प्राप्य च तान् सर्वान् लोकान् जयति स्वायत्तान् करोति।

वेदार्थस्य प्रकाशेन तमोहार्दन्निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ ४ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीर-बुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे सप्तदशाध्यायस्य चतुर्थः खण्डः ।

सप्तदशाध्यायः समाप्तिमगमत् ।

अष्टादशोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अस्मिन्नष्टादशेऽध्याये उपहव्यस्तुतः परं । ऋतपेये शुनाशीर्य्यवैश्वस्तोमोऽथ नीव्रसुत् । वाजपेयोराजसूय इति सप्त प्रकीर्त्तिताः । तत्र आदौ उपहव्यानामेकाहमाह ।

सप्तदशोऽग्निष्टोमः ॥ १ ॥

अयमेकाहः सर्वोऽपि सप्तदशस्तोमकोऽग्निष्टोमसंस्थः ॥ १ ॥

अस्याङ्गोऽनिरुक्तधर्मकत्वं प्रतिपादयितुमाख्यायिकामाह ।

देवाश्च वा असुराश्च प्रजापतेर्द्वयाः पुत्रा आसꣳस्तेऽसुराभूयाꣳसो बलीयाꣳस आसन् कनीयाꣳसो देवास्ते देवाः प्रजापतिमुपाधावन् स एतमुपहव्यमपश्यत् ॥ २ ॥

पूर्वं प्रजापतेः पुत्राणां देवासुराणामध्ये देवा बहून् प्रचुरतरान् जघन्यानसुनाम्नत्वा स्वप्राबल्याय प्रजापतिमुपाधावन् स च विचिन्त्योपायं एतमुपहव्यमपश्यत् ॥ २ ॥

इदानीन्तमुपहव्यमनिरुक्तं प्रायुङ्क्त इत्याह।

स ऐक्षत यन्निरुक्तमाहरिष्याम्यसुराभे यज्ञꣳ हनिष्यन्तीति सोऽनिरुक्तमाहरत् ॥ ३ ॥

आहरत् कार्त्स्न्येन प्रयोगः अनिरुक्तत्वं सूत्रवचनेनैव स्पष्टी क्रियते उपहव्ये देवतानामधेयानि परोक्षं ब्रूयुः स्वस्थानास्थिति उपहव्यग्रहणमनिरुक्तोपलक्षणं अनिरुक्तेषु क्रतुषु स्वस्थानस्थासु देवतासु तन्नामधेयं परोक्षं ब्रूयुः पर्य्यायेणेत्यर्थः परोक्षमेवानिरुक्तत्वमिति प्रत्यक्षमस्वस्थानास्थिति स्वस्थानात् स्थानान्तरङ्गतासु प्रत्यक्षमेव वचनं तत्र तावत् सर्वे पवमानाः सोमस्य स्वस्थानं तेषां सोमदेवत्वात् सर्वाणि पृष्ठानीन्द्रस्य स्वस्थानमग्नेरग्निष्टोमस्तोत्रमित्यादि द्रष्टव्यमिति देवशब्दं सर्वत्र वर्जयेयुरिति सर्वेष्वपि स्तोत्रेषु देवशब्दं वर्जयेयुः देवं सोम इत्यादौ होता देवोमहीमित्रस्येत्येते होता यज्ञे महीयज्ञस्येति ब्रूयुरिति प्रथमद्वितीययोराज्ययोर्देवमित्रशब्दस्थाने यज्ञमित्रशब्दं ब्रूयुरित्यर्थः तत्र केनचित् पर्य्यायेण निर्देशे प्राप्ते नियमाह इन्दुरिति सोममिति सुषाव सोममद्रिभिरित्यादौ सुषावेन्दुमिति ब्रूयुः अत्राग्नेरिन्द्रस्य च सोऽनिरुक्तमाहरदिति ब्राह्मणानुरोधेन प्रत्यक्षं नामाहरेत्ता एव स्तोत्रीयाः कल्पकारेण कृताः तेन तत्र प्रत्यक्षनामधेयाभावादेव तत्पर्य्यायेणोक्तः उत्तमे तु स्तोत्रे यज्ञायज्ञा वा अग्नय इति प्रत्यक्षनामधेयं ब्राह्मणेनानुज्ञातं स उत्तमे स्तोत्रे देवानभिपर्य्यावर्त्ततेत्या-

दिना तेन न किञ्चिद्ध्यसनमस्ति अतएवाग्निशब्दपर्य्यायः स्तुत-कारेणोक्तः देवशब्दोऽपि तत्र प्रयोज्य एवेति ॥ ३ ॥

अथोपहव्यप्रयोगान्तरेण प्रजापतेर्दैवताभिमुख्यं दर्शयति ।

स उत्तमे स्तोत्रे देवा वो द्रविणोदा इति देवान-भिपर्य्यावर्त्तत ॥ ४ ॥

उत्तमे स्तोत्रे अग्निष्टोमसामनी इत्यर्थः ॥ ४ ॥

अस्तु पर्य्यावृत्तिः किं ततः स्यादित्यत आह ।

ततो देवा अभवन् परासुराः ॥ ५ ॥

देवाः प्रबला आसन् असुराः पराभवन्नित्यर्थः ॥ ५ ॥

अथोक्तार्थवेदनं प्रशंसति ।

भवत्यात्मना परास्य भ्रातृव्यो भवति य एवं वेद ॥ ६ ॥

उत्तमस्तोत्राश्रयं पूर्व्वोदाहृतं ॥ ६ ॥

देवो व इति तृचमपोद्य प्राकृतं यज्ञायज्ञीयमेव कार्य्यमिति ब्रह्मवादिनां वचनमाह ।

अथो खल्वाहुर्य्यज्ञायज्ञावो अग्नय इत्येव कार्य्यं ॥ ७ ॥

अथोशब्दः पक्षान्तरद्योतनार्थः आहुः ब्रुवुः ब्रह्मवादिनः ॥ ७ ॥

तत्रोपपत्तिरुच्यते।

अग्निर्वै सर्वा देवतास्तेन न देवतानां काञ्चनान्नरेति ॥ ८ ॥

ते देवा बिभ्यतोऽग्निं प्राविशन् तस्मादाहुः अग्निः सर्वा देवता इति हि श्रुतिः अथ तद्देवताकमन्त्रकरणेन देवतानामन्नेन कामपि देवतामन्तरितवान् भवति ॥ ८ ॥

अथोपहव्यशब्दस्य प्रवृत्तिनिमित्तं दर्शयितुमाह।

इन्द्रो यतीन् सालावृकेयेभ्यः प्रायच्छत्तमश्लीला वागभ्यवदत् स प्रजापतिमुपाधावत्तस्मा एतमुपहव्यं प्रायच्छत्तं विश्वे देवा उपाह्वयन्त यदुपाह्वयन्त तस्मादुपहव्यः ॥ ९ ॥

पूर्वमिन्द्रः यतीन् ज्योतिष्टोमाद्यकृत्वा प्रकारान्तरेण वर्त्तमानान् ब्राह्मणान् सालावृकेयेभ्य अरण्यस्थेभ्यः प्रायच्छत् तं ब्राह्मणहन्तारं इन्द्रं अश्लीला निन्दिता वाक् अभ्यवदत् सर्वे एनं निनिन्दुरित्यर्थः स इन्द्रस्तत् प्रमार्ष्टुं प्रजापतिमुपागच्छत्तस्मै एतमुपहव्यं एकाहं प्रायच्छत् स इन्द्रस्तमन्वतिष्ठदित्यर्थः तेन विश्वे देवा एनमिन्द्रमुपाह्वयन्त एहि निर्दिष्टस्त्वमसीत्यब्रुवन् यस्मादनेनोपाह्वयन्त अत उपाह्वानसाधनत्वादस्योपहव्यमिति नाम ॥ ९ ॥

अथेन्द्रस्याभिशंसनपरिहारप्रसङ्गेनावाधिकारिणमाह।

अभिशस्यमानं याजयेत् ॥ १० ॥

अभिशस्यमानं अन्यैर्दोषारोपणेन निन्द्यमानं ॥ १० ॥

अभिशस्यायायमुपहव्यउचित इत्याह ।

देवता वा एतं परिहृञ्जन्ति यमनृतमभिशंसन्ति देवता एवास्यान्नमादयन्ति ॥ ११ ॥

यं यजमानं अनृतमभिशंसन्ति जनाः एतं देवताः परिहृञ्जन्ति वर्ज्जयन्ति न तस्य हविरादद इत्यर्थः अत एतदनुष्ठानेन देवता एवास्य न्नमादयन्ति याजका एनं यजमानं देवतार्हहविष्कं कारयन्तीत्यर्थः ॥ ११ ॥

न केवलं देवार्ह एवासौ किन्तु मनुष्यैरपि संव्यवहार्य्य इत्यत आह ।

तस्य पूतस्य स्वदितस्य मनुष्या अन्नमदन्ति ॥ १२॥

स्वदितस्य स्वगुद्धितस्य अनिन्दित इति सर्वैर्व्यवहृतस्य अथवा भाव्यपेक्षायां निर्दोषः स्वर्गप्राप्तियोग्यस्येत्यर्थः ॥ १२ ॥

अथातोधिकार्य्यन्तरमाह ।

ग्रामकामो यजेत ॥ १३ ॥

स्पष्टोऽर्थः ॥ १३ ॥

उक्तकामनावतोऽयमुचित इत्याह ।

मारुतो भवति मरुतो वै देवानां विशो विशमे-

वाङ्मा अनुनियुनक्त्वानपक्रामकास्माद्विड्भवति ॥१४

यतोऽत्र मारुती भवति अतोऽयमुचित इत्यर्थः; शशमानस्य वानर इति मारुती, मरुतां ग्रामस्यच क: सम्बन्ध इति तत् समर्थनं मरुतो वा इत्यादि ॥ १४ ॥

अथाधिकार्थान्तरमाह ।

पशुकामो यजेत पौष्णो भवति ॥ १५ ॥

स्पष्टोऽर्थः ॥ १५ ॥

उत नो गोविदश्वविदिति पूषाः पशोश्च कः सम्बन्ध इति तदाह ।

पशवो वै पूषा पशूनेवावरुन्धे ॥ १६ ॥

पूषा पशून् प्रजनयतीति श्रुत्यन्तरं ॥ १६ ॥

अथात्यां वैश्वदेवीं प्रशंसति ।

वैश्वदेवी भवति विश्वे ह्येनन्देवा उपाह्वयन्त ॥१७॥

यत एनमदुष्टमिन्द्रं विश्वे देवा उपाह्वयन्त अतस्त्वैवत्या युक्ता उपनः सूनवोगिर इत्येषा वैश्वदेवी ॥ १७ ॥

अथैतस्य होतुः षष्ठे बृहत्सामतामाह ।

बृहत्सामा भवति ॥ १८ ॥

एकाहापेक्षया बृहत्सामेति पुलिङ्गता ॥ १८ ॥

कथमेवमिति तदाह ।

प्रजापतिर्ह्येनमिन्द्राय प्रायच्छत् ॥ १९ ॥

स्पष्टोऽर्थः ॥ १९ ॥

अथात दक्षिणायां विशेषमाह ।

अश्वः श्यावो दक्षिणा ॥ २० ॥

श्यावाश्वो दक्षिणा ॥ २० ॥

कथमनिरुक्तस्याश्वस्यान्वय इति तत्राह ।

स ह्यनिरुक्तः ॥ २१ ॥

सोऽश्वः प्रजापतिसम्बन्धित्वात्तस्य चानिरुक्तत्वादश्वोऽप्यनिरुक्तः ॥ २१ ॥

कस्यायमश्वस्तमाह ।

स ब्रह्मणे देयः ॥ २२ ॥

स्पष्टोऽर्थः ॥ २२ ॥

सत्स्वन्येषु ऋत्विक्षु कथन्तस्येति तत्राह ।

ब्रह्मा वा ऋत्विजामनिरुक्तः स्वेनैवैनन्तद्रूपेण समर्द्धयति ॥ २३ ॥

अध्वर्वादिवत् प्रतिनियतशाखोक्तव्यापाराभावादनिरुक्तत्वमस्य तत्तया सति ब्रह्मणेऽश्वदाने सत्येनमनिरुक्तलेकाहं स्वेनैवानिरुक्तेन रूपेण समर्द्धयति ॥ २३ ॥

अथोक्तार्थं प्रशंसति ।

यावद्ध व कुमारे सद्योजात एनो नास्मिँस्तावन्न नैनो भवति य एवं वेद ॥ २४ ॥

सद्यस्तदानीमेव जाते उत्पन्नेऽस्मिन् कुमारे कारणाभावादेनः पापन्नास्ति तावत्तस्मिन्नेव काले एनो न भवति य उक्तमर्थमधिगच्छति तस्य उक्तार्थज्ञानानन्तरमेव निर्दोषो भवतीत्यर्थः अत्र पवस्वेन्दो वृषासुत एते अस्यग्निन्द्व उत नोगोषणिन्धियं शशमानस्य वानर इत्यादिकः कल्पो द्रष्टव्यः अत्र दक्षिणाविषये सूत्रकारैः आदिष्टा दक्षिणा ब्राह्मणेनेतरेभ्यश्च किञ्चिदेहीत्यादिति अश्वः श्यावो दक्षिणा तं ब्राह्मणे दद्यादित्यादिष्टा तत्र ब्राह्मव्यतिरिक्तेभ्योऽप्यानर्थ्यं किञ्चिदेहीत्यर्थः अत्र श्यावदक्षिणाविचारो बाधलक्षणस्य तृतीयपादे चिन्तितः श्यावाश्वो ब्राह्मभागस्य बाधको निखिलस्य वा आद्यः प्रकाशवत् मैवन्येतुः वत्सोऽपि नान्यगः अस्युपहव्यनामक एकाहविशेषस्तत्र श्रूयते अश्वः श्यावोरुक्मललाटो दक्षिणा स ब्राह्मणे देय इति प्रकाशन्यायेन ब्राह्मभागस्यैव बाधक इति पूर्वः पक्षः दक्षिणाशब्दसंयोगाद्धेनुन्यायेन कृत्स्नस्य बाधक उपरितमेन तु स ब्राह्मणे देय इति वाक्यान्तरेण तस्याश्वस्य ब्राह्मव्यतिरिक्तपुरुषान्तरसम्बन्धो बाध्यते तथा सति पुरुषान्तरस्यातिदिष्टोपदिष्टदक्षिणाद्वयबाधाल्लौकिकदानादिना केनचिदुपायेनानर्तिः सिध्यति ॥ २४ ॥

इति ताण्ड्यमहाब्राह्मणे अष्टादशाध्यायस्य

प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

अथाऽयमेकाहमाह ।

सप्तदशोऽग्निष्टोमः ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

अत्र दीक्षोपसदोर्विशेषमाह ।

तस्य द्वादश दीक्षोपसदः ॥ २ ॥

अथास्य सूत्रकार एवाह ऋतपेये तस्य द्वादश दीक्षोपसद इति अयमर्थः नव दीक्ष सिस्यस्योपसद इत्यभिप्रेत्य द्वादशोक्तिवादः कुतस्तिस्र एव साङ्गस्योपसद इति प्रकृतौ वचनादिहापि चोदकतः प्राप्तत्वात् अथ वा षट् दीक्षाः षडुपसदः समविभागस्य श्रवणादिति भरद्वाजस्तु प्रत्येकं द्वादशेति व्याख्यातवान् ॥ २ ॥

अथात्राधिकारिणमाह ।

स्वर्गकामो यजेत ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

कथं द्वादशदीक्षादिमत्यस्मिन् स्वर्गार्थिनः सम्बन्ध इति तत्राह ।

द्वादशमासाः संवत्सरः संवत्सरः स्वर्गोलोकः स्वर्गमेवैतेन लोकमाप्नोति ॥ ४ ॥

संवत्सरस्यादित्यात्मकत्वादादित्यस्य च स्वर्गस्थानत्वात् संवत्सरः स्वर्गोलोक इत्युच्यते ॥ ४ ॥

अस्य दीक्षादिवसे व्रतविशेषमाह।

घृतव्रतो भवति ॥ ५ ॥

अत्र सूत्रकारः घृतव्रतो भवतीति यथोक्ताहन्दीक्षा प्राप्नोतीति अयमर्थः घृतव्रतो भवतीति ब्राह्मणं प्रकृतस्य पयोव्रतस्य प्रयाम्नायोऽयन्तत्र दीक्षादिवसेषु यथाबलं घृतप्राशननियम इति ॥ ५ ॥

अथोक्तं घृतव्रतं प्रशंसति।

देवव्रतं वै घृतन्देवव्रतेनैव देवता अप्येति ॥ ६ ॥

स्पष्टोऽर्थः ॥ ६ ॥

अथोपसद्दिवसे घृतप्राशने उत्तरोत्तराङ्गुलिपर्व्वणा कर्त्तव्यत्वं संस्तुतिकमाह।

उत्तरेणोत्तरेण काण्डेनोपैत्युत्तर उत्तर एषां लोकानाञ्ज्यायान् स्वर्गस्य लोकस्य समष्ट्यै ॥ ७ ॥

एषां भूरादीनामग्र्ये पूर्वापेक्षयोत्तरोत्तरतो ज्यायान प्रशस्यः अत्र सूत्रं उत्तरोत्तरेण काण्डेनोपैतीति पृथगुपमत् स्वङ्गुलिपर्व्वभिः प्रतिलोमैः प्राश्नीयादिति उत्तरेणोत्तरेण काण्डेनोपैतीति ब्राह्मणमुपसत्सु नियमविधायकं अङ्गुलेः उत्तमेन काण्डेन घृतमादाय प्रथमायामुपसदि तावन्मात्रं घृतं प्राश्नीयात्

ततो मध्यमेन ततः प्रथमेनेत्येवं प्रतिलोमैः पर्व्वभिः प्राश्नीयादित्यर्थः कुतः उत्तरोत्तर एषां लोकानाञ्जयायानिति वचनोपपात् प्रातिलोम्य एव पर्व्वणामुत्तरोत्तरभूयस्त्वादानुलोम्यवैपरीत्याच्चेति अत्र प्राशने अङ्गुलिपर्व्वविधानात् प्राकृतचमसानां निवृत्तिरिति, अथ मतान्तरमाह एकाङ्गुल्याः पृथक्पर्वभिः सर्वान् देवांश्चमसाभिमताः स्युरित्यनुलोमैरिति शौचिवृत्तिः अतिलोमैः प्राश्नीयादिति शाण्डिल्य इति अयमर्थः प्राकृतचमसबाधो न कार्य्यः अबाधेनापि शास्त्रसम्भवात् कथं चमसस्यैव पृथक्परिमाणविधिरयं चमसप्रान्ताः सर्व्वत ऊर्द्ध्वप्रमाणेन पृथक्पृथगङ्गुलिकाण्डदघ्नाः स्युः तेनार्थाच्चमसत्रयं सम्पद्यते तत्र प्रथमाङ्गुलिकाण्डदघ्नचमसं घृतेन पूरयित्वा प्रथमोपसदि प्राश्नीयात् एवमुत्तरोत्तरकाण्डदघ्नौ चमसावुत्तरयोरुपसदोः कुतः उत्तरेणोत्तरेणेति वचनादानुलोम्यप्रतीतेरिति ॥ ७ ॥

अथास्य बृहत्साम सार्थवादं विधत्ते।

बृहत् साम भवति बृहता वै देवाः स्वर्गं लोकमायन् स्वर्गमेवैतेन लोकमाप्नोति ॥ ८ ॥

स्पष्टोऽर्थः ॥ ८ ॥

ऋत्विजां सदःप्रसर्पणसमये विशेषमाह।

ऋतमुक्त्वा प्रसर्पन्त्यृतेनैवैनꣳ स्वर्गं लोकं गमयन्ति ॥ ९ ॥

एतत् प्रसर्पणवाक्यं शाखान्तरीयं ऋतं वदतो भक्षयन्तीति भक्षणवाक्यञ्च विषयीकृत्य ऋतवदनविषये सूत्रकारः ऋतमुक्त्वा प्रसर्पन्तीति प्रसर्प्यन्तः सदो भक्षयिष्यन्तश्च देवसत्या निर्ब्रूयुरियं भूमिरसानादित्य इतीति उदेता प्रातरादित्ये इति पीतवद् भक्षमन्त्रानूहेयुरित्यर्थः अयमर्थः सदःप्रसर्पणं सोमभक्षणञ्च करिष्यन्तो देवसत्या निर्ब्रूयुरियं भूमिरित्येकं सत्यमसावादित्य इत्यपरं उदेता उदेष्यतीत्यर्थः त्रीण्यपेतानि देवताश्रितानि अन्यानि परमार्थभूतानीति भक्षणसमये ऋतवदने च धानञ्जय स्वन्यथा ब्रूते तथाच सूत्रं या देवताश्चमसैरिज्येरंस्तत्पीतवद्भक्षमन्त्रान् ब्रूयुरिति शाण्डिल्यो विकारेण तु नाराशंसानामिति इन्द्रपीतस्येत्यन्तमुक्त्वा अग्निपीतस्य मित्रावरुणपीतस्येन्द्रियावत इत्यादिना या देवता इज्यन्ते ता एवोहेयुरित्यर्थः ॥ ९ ॥

अथ ऋतपेयदक्षिणायां विशेषमाह ।

सोमचमसो दक्षिणा देवतयैव देवता अप्येति॥१०

सोमस्यापि देवतात्वात् इज्यमानदेवता तु फलत्वेन प्राप्तान् देवानप्येति प्राप्नोति ॥ १० ॥

अस्य चमसस्यौदुम्बरत्वं सार्थवादं विधत्ते ।

औदुम्बरो भवत्यूर्गुदुम्बर ऊर्जमेवावरुन्धे ॥ ११ ॥

देवा ऊर्जं व्यभजन्त तत उदुम्बर उदतिष्ठदिति श्रुतेः औदुम्बरस्य ऊर्यूपत्वं सोमचमसो दक्षिणाविषये सूत्रकारः सोमचमसो दक्षिणेत्यभिप्लुतः स्यादिति क्रत्वर्थतयाभिप्लुतस्य सोम-

रसस्य पूर्णः सोमचमसः न तु लौकिकस्येत्यर्थः कुत इत्याह तस्मिन् हि चमसप्रमाणमिति शास्त्रीये सोमरसे झटिति चमसप्रतीतिः स तु प्राकृतेभ्यो दशभ्योऽतिरिक्तः सम्पादनीय इत्यर्थः तस्माध्वर्न्दिने सवनमुखीये सहोन्नयेयुरिति सवनमुखीयानां दशचमसानामुन्नयनकाले तमप्युन्नयेयुरिति जुह्वयुस्यास्य ऋते देय इति हि ब्राह्मणमिति होमकाले तस्य चमसस्यैकदेशं जुह्वयुः ऋतोदेय इति शाखान्तरीयब्राह्मणादित्यर्थः तं दक्षिणावेलायां पूर्वेणाहवनीयमनिर्हरन्तो वेदेर्दक्षिणेन सदोहविर्द्धानानि हारयित्वा पूर्वया द्वारा सदः प्रविशेयुरिति वेदेर्बहिरन्त इत्यर्थः ॥ ११ ॥

विहितश्चमसः कस्मै कीदृशाय देय इति बुभुत्सयामाह।

सगोत्राय ब्राह्मणे देयः सोमपीथस्याविदोहाय ॥१२

अविदोहाय अविनाशाय विपरीतफलप्रशमनत्वायेत्यर्थः अत्र दक्षिणाविषय एव सूत्रकारः संस्थितेऽहन्यृत्विग्भ्यः किञ्चिद्दद्यादिति सोमचमस एव क्रतौ दक्षिणा तथाप्यृत्विगानामानत्यर्थं किञ्चिद्दद्यादित्यर्थः ॥ १२ ॥

अथ सोमे नियममाह।

सर्वः सप्तदशो भवति ॥ १३ ॥

पवमानाज्यस्तुतिकाः सर्व इत्यर्थः ॥ १३ ॥

सप्तदशत्वं स्तौति।

द्वादशमासाः पञ्चर्तवः स वै संवत्सरः संवत्सरः स्वर्गो लोकः स्वर्गमेवैतेन लोकमाप्नोति ॥ १४ ॥

एष सोमचमसो दक्षिणा ब्रह्मभागस्यैव बाधकः उत क्रत्वन्तरेति बाधाध्याये तृतीयपादे चिन्तितं किं सोमचमसो ब्रह्मभागबाधोऽपुत क्रत्वनुत पशूनां निन्द्या सर्व्वप्रसक्तेर्ब्रह्मभागक्रत् निन्द्येयं निषेधाय चमसः स्तूयते त्वसौ श्यावाश्ववत्सर्व्वोदयः पुरुषान्तरबाधकः ऋतपेये स्तूयते सर्व्वस्य दक्षिणाद्रव्यस्यात्र पुनः प्रसञ्जनात् तथा हि ऋतं वै सोमोऽनृतं पशवो यः पशून् दद्यात्सोऽनृतं कुर्य्यात् इति पशुरूपा दक्षिणा भागनिषेधाय निन्द्यते तौ च निन्द्यनिषेधौ सर्व्वदेयप्रसक्तिं गमयतः तस्मान्न सर्व्वबाधक इति प्राप्ते ब्रूमः नात्र निषेधाय पशुनिन्दोच्यते किन्तु विधित्सितसोमचमसस्तुत्यर्थोऽयमर्थवादः तेन निन्दायाः सर्व्वप्रसञ्जकत्वन्नास्ति तस्मात् सर्व्वप्रसक्तिरूपाया अस्यधिकाशङ्काया निराकृतत्वात् पूर्व्वाधिकरणेनात्र निर्णयो द्रष्टव्यः अथास्य कल्पः द्वितीयस्वरसाम्न आज्यबहिष्पवमानं बार्हदुक्थस्य लोक आष्टादंष्ट्रमौक्षस्य हाविष्मतं अध्वस्य सुन्वानं उज्वरत्युक्थानि समानमितरच्चैकाहिकेनेति ॥ १४ ॥

इति ताण्ड्यमहाब्राह्मणेऽष्टादशाध्यायस्य

द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

अथान्यं सप्तदशस्तोमकमग्निष्टोमसंस्थमेकाहमाह ।

सप्तदशोऽग्निष्टोमः ॥ १ ॥

सप्तोऽर्थः ॥ १ ॥

तत्र दीक्षणीयप्रायणीयातिथ्योपसदाद्यनुष्ठेयमुख्यपदार्थेषु द्वादशमानप्रभृत्युत्तरोत्तरद्वैगुण्यदक्षिणा माध्यन्दिनपवमाने होतृ-द्वात्रे रुक्मस्वरूपदक्षिणाश्चाह ।

तस्य दीक्षणीयायामिष्टौ द्वादशमानꣳ हिरण्यं ददाति सतुर्विꣳशतिमानं प्रायणीयायां द्वे चतुर्विꣳ-शतिमाने आतिथ्यायां चत्वारि चतुर्विꣳशतिमा-नानि प्रातः प्रथमायामुपसद्यष्टौ चतुर्विꣳशतिमा-नान्यपराह्णे प्रथमायामुपसदि षोड़शचतुर्विꣳशति-मानाति प्रातर्म्मध्यमायामुपसदि द्वात्रिꣳशतं चतु-र्विꣳशतिमानान्यपराह्णे मध्यमायामुपसदि चतुः-षष्टिं चतुर्विꣳशतिमानानि प्रातरुत्तमायामुपसद्य-ष्टाविꣳशतिशतं चतुर्विꣳशतिमानान्यपराह्णे उत्त-मायामुपसदि द्वे अष्टाविꣳशतिशतमाने अग्नीषो-मीयस्य पशोर्वपायां चत्वार्य्यष्टाविꣳशतिशतमानानि प्रातःपशोर्वपायामष्टावष्टाविꣳशतिशतमानानि प्रातः

सवने सन्नेषु नाराशꣳसेषु षोडशाष्टाविꣳशतिशत-
मानानि माध्यन्दिने सवनेऽनड्वुच्छतञ्च रुक्मो होतुः
स्रुग्घातुर्द्वात्रिꣳशतमष्टाविꣳशतिशतमानानि तृती-
यसवने सन्नेषु नाराशꣳसेषु चतुःषष्टिमष्टाविꣳ-
शतिशतमानान्युदयनीयायामिष्टावष्टाविꣳशतिशतम-
ष्टाविꣳशतिशतमानानि वशाया वपायां ॥ २ ॥

वशा अनूबन्ध्या अत्रोपसदन्ते अष्टावष्टाविंशतिशतं चतु-
र्विंशतिमानानीत्युक्तं ब्राह्मणे तावत्पर्य्यन्तं चतुर्विंशतिमान-
मारभ्योत्तरोत्तरं द्वे चतुर्विंशतिमाने इत्यादिद्विगुणनिर्देशः
स्पष्टः तत ऊर्द्धं अग्नीषोमीयप्रभृति द्वे अष्टाविंशतिशतमाने
चत्वार्यष्टाविंशतिशतमानानीत्येवं द्विगुणाभ्यासः कृतः तत्र
मानशब्दश्चतुर्विंशतिमानं लक्षणयाह यथाभामेत्येकदेशोक्ता-
वपि सत्यभामा गम्यते तद्वत् द्वे अष्टाविंशतिशतमाने इत्यादौ
तत्संख्याविशिष्टानि चतुर्विंशतिमानान्येव देयानीत्यर्थः कुत
एतत् पूर्वेषु स्थानेषु द्विगुणाभ्यासस्य प्रक्रान्तत्वात् यथाश्रुत-
मानमात्रग्रहणे कनीयस्त्वप्रसङ्गाच्च तेनाग्नीषोमीयप्रभृतिषु
मानशब्दश्चतुर्विंशतिमानलक्षणार्थ इति सिद्धं अनड्वुच्छतस्य
रुक्मेण सह समुच्चयः अधिकदानरूपायाः रुक्मस्तजार्थमाह
सूत्रकारः रुक्मो होतुरिति निष्कोनामालङ्कारस्तं दद्यात् स्रुग्
घातुरिति हिरण्मयी स्रुगादिति तत्र दीक्षणीयादौ द्वादश-

मानमित्यादिदक्षिणादानं दक्षिणायामेव कालोत्कर्षादवेक्ष्येष्यै च न पृथगिति वेदितव्यं ॥ २ ॥

अथोक्तार्थज्ञानपूर्वकानुष्ठानवतः फलमाह ।

एष वा अनडुहो लोकमाप्नोति य एवं वेद ॥ ३ ॥

अत्र वेदनमुपलक्षणं एवं ज्ञात्वा योऽनुतिष्ठति स इत्यर्थः अनडुह इति जात्यपेक्षयैकत्वं लोकशब्दः समूहवाची अनडुहां समूहं प्राप्नोति अनडुहो लोकप्राप्त्यर्थमादित्यलोकप्राप्त्यर्थमिति वा सङ्कल्प इत्यापस्तम्बस्मृतिव्याचक्षाणेन फलत्वेनानडुहोलोकस्य निर्दिष्टत्वात् केवलं वेदितुः फलश्रवणेऽपि तत्पूर्वकानुष्ठातुरेव फलत्वकल्पनं यद्वा श्रुतत्वात् ज्ञातुरेव तत्फलं भवेत् किमु वक्तव्यमनुष्ठातुरिति कैमुतिकेन सिध्यति ॥ ३ ॥

अथ फलान्तरमाह ।

एष वै ज्योतिष्मन्तं पुण्यं लोकञ्जयति य एवं विद्वानेतेन यजते ॥ ४ ॥

ज्योतिष्मन्तमादित्यलोकमित्यर्थः अथास्य कल्पः एते असृग्रमिन्द्व उक्थे शुष्मास ईरत इति पुरस्तात्पर्यासस्य तपसश्चेत्स्वासु श्रेतं समानमितरत्प्रथमेन साहस्रेणेति ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे अष्टादशाध्यायस्य

तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

अथ वैश्यस्तोमाख्यमग्निष्टोमसंस्थमेकाहमाह ।

सप्तदशोऽग्निष्टोमः ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

तत्र सवनत्रयगतेषु सोमेषु श्रीणने विशेषमाह ।

तस्य प्रातःसवनीयान् सोमान् प्रतिदुह्य श्रीणाति श्रृतेन मध्यन्दिने दध्ना तृतीयसवने ॥ २ ॥

अस्यार्थमाह द्राह्यायणः वैश्यस्तोमे सद्योदुग्धेन पयसा सोमम्मिश्रं कुर्युः प्रातःसवने श्रृतेन मध्यन्दिने दध्ना तृतीयसवन इति सद्योदुग्धं पयःप्रतिधुगित्युक्तं श्रृतं पक्वं पयइत्यर्थः ॥ २ ॥

अत्राधिकारिणमाह ।

पशुकामो यजेत ॥ ३ ॥

स्पष्टं ॥ ३ ॥

अथ सवनभेदेनोक्तां श्रपणद्रव्यव्यवस्थां पक्षान्तराङ्गत्वनिराकरणेन स्थापयति ।

यत् सर्वाणि सवनान्याश्रीर्व्वन्ति भवन्त्यनुसवनमेवैनं पशुभिः समर्द्धयति प्रजा त्वस्य मीलितेव भवति शुक्रिये हि सवने पयसा श्रीणाति ॥ ४ ॥

यद्यपि त्रीण्यपि सवनानि दक्षाशीर्युक्तानि भवन्ति तदा अस्य यजमानस्य प्रतिसवनं पशुसमृद्धिः कृता भवति किन्तु अस्य प्रजा मीलितेव सङ्कुचितेव भवति ततः शुक्रिये हि सवने प्रातर्मध्यन्दिने तु पयसा श्रीणाति तत उक्तदोषो न भवति। यद्वा इदं वाक्यं केवलदोहपरतया व्याख्येयं अस्मिन् पक्षे आशीः-पदेन अपणसाधनं पयोदधि वोच्यते यदि सर्वाणि सवनानि उक्तप्रतिध्रुगादिद्रव्याशीर्वन्ति भवन्ति तर्हि यजमानस्य पशु-समृद्धिः स्यादेव किन्तु प्रजाहानिर्भवति तत्र हेतुरुच्यते हि यस्मात् शुक्रिये शुक्रः ऋजीषाभावेनागतसारः सोमः एतर्हि एतद्वती दीक्षिः प्रातर्मध्यन्दिने अपि सवने अयं पयसा श्रीणाति सोमं अतो युक्तं प्रजामीलनं तृतीयसवने ऋजीषत्वादाशीः-अपणं युक्तं स्वतएव दीक्षायाः सवनयोराशीःअपणेन सोमस्य स्वाभाविकदीक्षेः सङ्कुचितत्वादित्यभिप्रायः ॥ ४ ॥

अथोक्तअपणत्वेन पशव्यत्वाद्वैश्यस्यात्राधिकार इत्याह ।

वैश्यं याजयेत् ॥ ५ ॥

स्पष्टं ॥ ५ ॥

अत्र वैश्यस्यान्वयमाह ।

एतद्वै वैश्यस्य सम्पन्नं यत्पशवः पशुभिरेवैनꣳ समर्द्धयति ॥ ६ ॥

सम्पन्नं समृद्धिरित्यर्थः ॥ ६ ॥

अत्र हेतुः पृष्ठे विशेषमाह।

तस्य कण्वरथन्तरं पृष्ठं ॥ ७ ॥

अभित्या शूरेत्यत्र कण्वरथन्तरं ॥ ७ ॥

अथ ब्राह्मणाछंसिपृष्ठे विशेषमाह।

सदो विश्वीयं ब्रह्मसाम ॥ ८ ॥

आनो विश्वाभिरित्यत्र सदोविश्वीयं ॥ ८ ॥

उक्तद्वययोगं प्रशंसति।

पशवो वै कण्वरथन्तरं पशवः सदोविश्वीयमभि-पूर्वानेवास्मिन् पशून् दधाति ॥ ९ ॥

स्पष्टं ॥ ९ ॥

अथात्र बहिष्पवमानाज्यादेः सर्वत्रापि सप्तदशस्तोमत्व-माह।

सर्वः सप्तदशो भवति ॥ १० ॥

स्पष्टं ॥ १० ॥

अथ सप्तदशं प्रशंसति।

द्वादशमासाः पञ्चर्तवः स वै संवत्सरः संवत्सरं पशवोऽनुप्रजायन्ते तानेवाप्नावरुन्धे ॥ ११ ॥

अथास्य कल्पः पवमानस्य विश्वविद्विद्युतत्पारुच्छेति एते अष्टय-

मिन्द्रवस्तत्वाष्टमृणानि बिभ्रतं पवमानस्य ते कवे विश्वेभिरग्ने अग्निभिर्मितं वयं हवामह इन्द्रं वो विश्वतस्परि ताण्डवे ययोरिदमभित्वा शूरनोनुम इति कखरथन्तरं पृष्ठमानो विश्वासु हव्यमिति सदोविशीयं ब्रह्मसाम जनुषेकर्च्चयोः सकपोष्कले परित्यं हर्य्यतं हरिमित्यनुष्टुप् पवित्रन्त इति कावमन्थसुन्वत्युक्थानि समानमितरमायुषैकाहिके वेति ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे अष्टादशाध्यायस्य

चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

अथ तीव्रसोमाख्यं सप्तदशस्तोमकमुक्थसंस्थमेकाहमाह ।

सप्तदश उक्थ्यः ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

अथ सोमातिपवितस्यात्राधिकार इति वक्तुमाह ।

इन्द्रो वृत्रमहन् स विष्वङ्वीर्य्येण व्यार्ध्नोत्तस्मै देवाः प्रायश्चित्तिमैच्छ॰स्तन्न किञ्चनाधिनोत्तन्नीव्रसोम एवाधिनोत् ॥ २ ॥

पूर्वं वृत्रं हतवत इन्द्रस्य सर्वतोवीर्य्यमपगते सति देवाः पुनः

प्राष्ठुपायं विचिन्त्य बह्वन्यज्ञान् प्रायुञ्जत किञ्चनाधिनोत् न प्रीणयन् तं तीव्रसोमस्त्वधिनोत् ॥ २ ॥

एवं प्रशस्येदानीं सोमातिपवितस्यावाधिकार इत्याह ।

सोमातिपवितं याजयेत् ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

तत्कुत इति तदाह ।

छिद्र इव वा एष यꣳ सोमोऽतिपवते यत्तीव्रसोमेन यजते पिहित्या एवाछिद्रतायै ॥ ४ ॥

यं यजमानं सोमोऽतिपवते एष छिद्रमिव वै असम्पूर्ण एव खलु यत्तीव्रसोमेन यजते तत्पिहित्या एव सोमातिपवनविरोधायैव सोऽस्याच्छिद्रतायै सम्पूर्णसामर्थ्यायैव तीव्रश्चासौ सोमश्चेति तीव्रसोम तीव्रसोमत्वं शतमाशिरं दुहन्ति तीव्रयन्त्येवैनमित्यादिना स्पष्टीकरिष्यते सोमातिपवितस्य लक्षणं सूत्रकारो मतभेदेन बहुधा दर्शयति तीव्रसुति सोमातिपवितं याजयेदिति यदुक्त्वा पापीयान् स्यात् स सोमातिपवित इति शाण्डिल्य इति यं सोमोऽतिपवते स सोमातिपवितः सोमयागोत्तरकालः सोऽनष्टश्रीकः स एवमुक्तः इति यः सोमं पीत्वा छर्दयेत विरिच्येत वेति धानञ्जय इतीति वमनं विरेको वा अतिपवनमित्यर्थः ज्येष्ठेवाऽनिष्ठिनि कनीयसी छिनीतीति अथवा यः कनीयसि भ्रातरि इष्टवति सति स्वयं सोमेन नेष्टवान् स सोमातिपवितः ॥ ४ ॥

अथाधिकार्य्यान्तरमाह ।

राजानमपरुद्धं याजयेत् ॥ ५ ॥

स्पष्टोऽर्थः ॥ ५ ॥

अस्मिन्नधिकारनिमित्तमतिपवनं योजयति ।

विडवा एतमतिपवते यो राजावरुध्यते यत्तीव्रसोमेन यजते पिहित्या एवाक्षिद्रतायै ॥ ६ ॥

यो राजावरुध्यते राष्ट्रेण परित्यज्यते एनं राजानं विट् प्रजा खल्वतिपवते अत्यन्तं परित्यजति शिष्टं पूर्ववत् ॥ ६ ॥

पुनरन्यमधिकारिणमाह ।

ग्रामकामो यजेत ॥ ७ ॥

स्पष्टोऽर्थः ॥ ७ ॥

उक्तक्रतावस्यानुकूल्यमाह ।

ग्रामो वा एतमतिपवते योऽलङ्ग्रामाय सन् ग्रामन्न विन्दते यत्तीव्रसोमेन यजते पिहित्या एवाक्षिद्रतायै ॥ ८ ॥

जनसमूहो ग्रामः शिष्टमुक्तप्रायं ॥ ८ ॥

पुनरप्यधिकार्य्यन्तरमाह ।

प्रजाकामो यजेत प्रजा वा एतमतिपवते योऽलं

प्रजायाः सन् प्रजान्न विन्दते यत्तीव्रसोमेन यजते पिहित्या एवाच्छिद्रतायै ॥ ९ ॥

स्पष्टोऽर्थः ॥ ९ ॥

पुनरप्यधिकार्यन्तरमाह।

पशुकामो यजेत पशवो वा एतमतिपवन्ते योऽलं पशुभ्यः सन् पशून्न विन्दते यत्तीव्रसोमेन यजते पिहित्या एवाच्छिद्रतायै ॥ १० ॥

स्पष्टोऽर्थः ॥ १० ॥

पुनरप्यधिकार्यन्तरमाह।

आमयाविनं याजयेत् प्राणा वा एतमतिपवन्ते य आमयावी यत्तीव्रसोमेन यजते पिहित्या एवाच्छिद्रतायै ॥ ११ ॥

स्पष्टोऽर्थः ॥ ११ ॥

सोमस्य तीव्रप्रकारमाह।

शतमाशिरं दुहन्ति तीव्रयन्त्येवैनं ॥ १२ ॥

अस्यार्थमाह सूत्रकारः शतमाशिरं दुहन्तीति धेनुशतन्दोहयित्वा त्रैधं विभज्य सोमस्मिश्रं कुर्युर्यथा वैश्वसोम इति सोममिश्रार्थं दध्यादिकमाशिरमित्युच्यते स्पष्टमन्यत् ॥ १२ ॥

अत्र क्रतौ प्राक्तनदक्षिणामापाद्याशीरर्थं शतं दक्षिणेत्याह।

तत्ता उ एव दक्षिणाः ॥ १३ ॥

तत्तस्य क्रतोः उशब्दोऽवधारणे तथैवकारः अतो अवधारणद्वयेनोक्तव्यतिरिक्तदक्षिणा निर्वर्त्यते तस्य क्रतोः तदेव धेनुशतं दक्षिणास्ताउ एव दक्षिणा इति त्याहेति स्पष्टं ॥ १३ ॥

प्रकारान्तरेण सोमस्य तीव्रत्वमाह ।

अभ्यभिसोमानन्नयन्ति तीव्र एनन्भिनवदित्यु-भावध्वर्यू सर्वं चमसाध्वर्यवोऽछावाकाय प्रतिगृणन्ति तीव्रयन्त्येवैनं ॥ १४ ॥

अस्यार्थं सूत्रकार एवमाह अभ्यभिसोमानुन्नयन्तीति याश्चमसानवजिघ्रेयुस्तेष्वेवाभ्यन्नयेयुरिति याश्चमसानवजिघ्रेयुस्तान् परित्यज्यैव तेषामुपर्युत्तरयागेभ्यः सोमानुन्नयेयुः अवजिघ्रतोऽपि भवित एवेति मत्वा न त्याज्य इत्यर्थः ॥ १४ ॥

पुनः प्रकारान्तरेण तीव्रत्वमाह ।

तदभक्षयन्त ऋत्विजश्चमसानवजिघ्रन्ति तीव्रयन्त्येवैनं तत्तानच्छावाकस्य स्तोत्रे भक्षन्ति तीव्रयन्त्येवैनं ॥ १५ ॥

अस्यार्थं सूत्रकार एवाह तत्र भक्षादृताचमसानवजिघ्रेयुरिति तत्र तीव्रसुति भक्षणस्यादृताधर्म्मेणावघ्राणं कुर्य्युः कुत इत्याह अभक्षयन्त ऋत्विजश्चमसानवजिघ्रन्तीत्याहेति अभक्ष-

यन्तोऽवजिघ्रेयुरिति भक्षणप्रत्याम्नायत्वेनावघ्राणविधानात् तत्त्व-
म्प्रीयन्तिरिति अथ घ्रातान् सोमग्रेषानाज्यस्तोत्रेषु भक्षयन्ति
तदपि सोमस्य तीव्रत्वकरणमित्याह तत्तानक्षावाकस्य स्तोत्रे
भक्षयन्ति तीव्रयन्त्येवैनन्तदिति अत्र स्तुत्वं तानक्षावाकस्तोत्रेण
स्तुत्वा भक्षयन्तीति ह्याहैवं सर्वेषु सवनेष्विति ॥ १५ ॥

अथ सवनान्तेष्वेव यज्ञक्षणमुक्तं तदेतद्व्यतिरेकेन निन्दासं-
कीर्त्तनेन दृढयति।

**तद्यत् सवनानि व्यवभक्षयेयुरपक्रामुका यजमा-
नाच्छ्रोः स्यात् सकृत्सकृत्सवनानामन्ततो भक्षयन्ति
सवनानामसंभेदाय ॥ १६ ॥**

यद्यपि सवनानि सवनगतान् ऋतशिष्टान् ग्रहचमसगतान्
सोमान् व्यवभक्षयेयुः विभज्य विभज्य तत्तद्धोमावसाने भक्षयेयुः
सवनत्रयेष्वपि मध्ये मध्ये विच्छेदेन यज्ञविच्छेदात्स्याच्छ्रीरप-
क्रमणशीला स्यात् तदकृत्वा सवनान्तेष्वेव यदि सकृत् सकृद्भक्ष-
येयुः तत्सवनेषु त्रिष्वपि मध्ये अवच्छेदाय भवति ॥ १६ ॥

होतुःषष्ठस्य रथन्तरत्वमाह।

रथन्तरꣳ साम भवति ॥ १७ ॥

स्पष्टोऽर्थः ॥ १७ ॥

अथ सोमस्यातिपवितावेव रथन्तरं युक्तमिति प्रशंसति।

द्यूयं वै रथन्तरमस्यां वा एष न प्रतितिष्ठति यो न प्रतितिष्ठत्यस्यामेवैनं प्रतिष्ठापयति ॥ १८ ॥

स्पष्टं ॥ १८ ॥

अथ ब्राह्मणाच्छंसिपृष्ठं आयन्तीयं विधत्ते।

आयन्तीयं ब्रह्मसाम भवत्येतदेवास्मिञ्छ्रीणाति ॥ १९ ॥

अस्मिन् सोमातिपवितादौ एतदेव आयन्तीयं सामैव श्रीणाति मिश्रयत्यपगतं तेजःप्रभृतिकं अस्य श्रीणनसामर्थ्यमिन्द्रो दृत्वमहन् स विश्वं वीर्येण व्यभंगत स एतच्छ्रायन्तीयमपश्यत्तेनात्मानं समश्रीणादित्युक्तं सिद्धं ॥ १९ ॥

अथार्भवपवमाने अनुष्टुभि ऋचे अन्त्यस्य यज्ञायज्ञीयस्यापकर्षमाह।

यज्ञायज्ञीयमनुष्टुभि भवति ॥ २० ॥

स्पष्टोऽर्थः ॥ २० ॥

एतत् प्रशंसति।

वागनुष्टुप् वाचोरसो यज्ञायज्ञीयं वाच्येवास्य रसं दधाति ॥ २१ ॥

वाचोऽनुष्टुप्त्वमितरेषां छन्दसामनुष्टुभ्यनुप्रवेशात् सिद्धं देवा वै ब्रह्म व्यभजन्त तस्य यो रसोऽत्यरिच्यत तत् यज्ञायज्ञीय-

भवदिति श्रुतेः वाग्रसत्वमस्य वागात्मकयज्ञायज्ञीयस्य रसं सारमनुष्टुवात्मिकायां वाच्येव दधाति तथा कुर्वन्नुद्गाता ॥२१॥

अस्याग्निष्टोमसामनि यज्ञायज्ञीयस्थानीयं सामान्तरमाह।

विशोविशीयमग्निष्टोमसाम भवत्येतदेवास्मिन् सर्वं प्रतिष्ठापयति ॥ २२ ॥

विशोविशीयमग्निष्टोमं कुर्वन्नुद्गाता अग्निष्टोमस्य सर्वस्तोमान्तत्वात् एतत्सर्वमेव सकलस्तोमसाध्यं कृत्स्नफलमेवास्मिन् सोमातिपवितादौ प्रतिष्ठापयति स्थापयति ॥ २२ ॥

अथ तृतीयोक्थे उद्गीयमनूद्य प्रशंसति।

उद्गीयमुक्थानामन्ततो भवति सर्वेषां वा एतत्पृष्ठानाꣳ रूपꣳ सर्वेष्वेव रूपेषु प्रतितिष्ठति ॥२३॥

सर्वाणि वै रूपाण्युद्गीयं गायन्ति त्वा गायत्रिण इति रथन्तरस्य रूपमित्यादिना सर्वपृष्ठत्वरूपत्वप्रतिपादनात् सर्वपृष्ठत्वरूपत्वमस्य ॥ २३ ॥

अस्य तीव्रसोमस्य उक्थसंस्थतां सार्थवादमाह।

उक्थो भवति पशवो वा उक्थानि पशुष्वेव प्रतितिष्ठति ॥ २४ ॥

अथास्य कल्पः एते असृग्रमिन्दवस्त्वा वृष्णा विभ्वत इति पुरस्तात्पर्यासस्य तृचं पञ्चर्चं त्रायन्तीयं ब्रह्मसाम

संहितस्य लोके मौञ्जं पौष्कलस्य लोके शुद्धं श्यावाश्वस्य यज्ञायज्ञीयं यज्ञायज्ञीयस्यर्तु विशोविशीयमग्निष्टोमसाम समानमितरमायुषैकाहिकेनेति ॥ २४ ॥

इति ताण्ड्यमहाब्राह्मणे अष्टादशाध्यायस्य पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

वाजपेयाख्यमेकाहमाह ।

सप्तदश उक्था षोडशिमान् सप्तदशी ॥ १ ॥

अयं सप्तदशस्तोमकः उक्थसंस्थः सचोक्थ्यः षोडशिमान् षोडशिस्तोत्रयुक्तः एवं सति स षोडशिक उक्थ्यः षोडशस्तोत्रवान् अतिरिक्तोक्थ्येन सह सप्तदशी सप्तदशस्तोत्रवान् कर्त्तव्यः ॥ १ ॥

अथास्य प्रतिस्तोत्रं सप्तदशस्तोमत्वं स्तोत्राणां सप्तदशत्वं च प्रजापत्यात्मना प्रतिपादयति ।

यावान्वै प्रजापतिरूर्ङ्स्तावाँस्तिर्यङ् ॥ २ ॥

यावत्प्रमाणः प्रजापतिरूर्ङ्; उपर्य्युपर्य्युच्छ्रितः तावान् तावत्प्रमाणेव तिर्य्यङ् अत उच्छ्रितेन स्तोत्रसप्तदशकेन आत्मात्मकत्वेन तिर्य्यग्भूतेन सप्तदशेन स्तोमेन चोपेतो वाजपेयः प्रजापत्यात्मकः उभयत्रायामविस्तारसाम्यात् ॥ २ ॥

प्रजापतेरायामविस्तारसाम्यं लोकसाम्येन समर्थ्यते।

यावन्त इमे लोका ऊर्द्धास्तावन्तस्तीर्य्यञ्चः ॥३॥

यथेमे दृश्यमाना भूरादयो लोका यावन्तः यावत्प्रमाणाः ऊर्द्धाः स्युस्तावन्तस्तिर्य्यञ्चः तद्वत् प्रजापतिरपीति ॥ ३ ॥

अस्त्वेवं किमत इत्यत आह।

वाजपेययाजी वाव प्रजापतिमाप्नोति ॥ ४ ॥

वाजपेयस्योक्तप्रकारेण प्रजापतिसाम्यादनुष्ठातापि प्रजापतिमेवाप्नोति ॥ ४ ॥

प्राजापत्यस्तोममेव विभज्य दर्शयति।

यत् सप्तदशस्तोत्राणि तेनोर्द्धमाप्नोति यत्सप्तवः सप्तदशस्तेन तिर्य्यञ्चं ॥ ५ ॥

स्तोत्राणामेकत्र्यादिक्रमेणोपर्य्युपर्य्यनुष्ठानात् प्रजापतेरूर्द्धाकारप्राप्तिः सप्तदशस्तोमस्यावृत्तिसाध्यत्वेन तिर्य्यक्त्वात् प्रजापतेस्तिर्य्यग्रूपावाप्तिः ॥ ५ ॥

अस्य सवनानां वैचित्र्यं प्रशंसितुमनुभाषते।

तस्य नानावीर्य्याणि सवनानि ॥ ६ ॥

स्पष्टोऽर्थः ॥ ६ ॥

कथन्नानावीर्य्यत्वमिति तद्दर्शयति।

अनिरुक्तं प्रातःसवनं वाजवन् माध्यन्दिनꣳ सवनञ्चित्रवत् तृतीयसवनं ॥ ७ ॥

प्रातःसवनस्य गायत्रत्वात् तस्य च कल्पेनानिरुक्तगानात् प्रातःसवनमनिरुक्तं माध्यन्दिनसवने होतुः पृष्ठे रथन्तरविधानात् अत्र मघवन्निन्द्र वाजिन इति वाजशब्दश्रवणात् माध्यन्दिनस्य वाजवत्त्वं तृतीयसवनत्वं तृतीयसवने अग्निष्टोमसाम्नि वारवन्तीये त्वञ्चित्रउत्येति चित्रशब्दश्रवणात् चित्रवत्त्वं ॥ ७॥

अस्तु नानावीर्य्यत्वं किन्तत इत्यत आह।

यदनिरुक्तम् प्रातःसवनम्भवत्यनिरुक्तो वै प्रजापतिः प्रजापतिमेवाप्नोति यद्वाजवन् माध्यन्दिनꣳ सवनमन्नं वै वाजोऽन्नाद्यस्यावरुध्यै यच्चित्रवत् तृतीयसवनꣳ स्वर्गस्य लोकस्य समष्ट्यै ॥ ८ ॥

स्वर्गस्यापि चित्र्याद्यपेक्षया तृतीयत्वात् तृतीयसवनं स्वर्गः स च नानाविधभोगसाधनत्वाच्चित्रः अतश्चित्रवत् तृतीयसवनानुष्ठानं स्वर्गस्य संप्राप्त्यै कल्पते स्पष्टमन्यत् ॥ ८ ॥

अथोक्तस्य प्रातःसवनस्यानिरुक्तत्वं क्रतुस्वयज्ञस्यानिरुक्तस्यानीयमिति प्रशंसति।

वियोनिर्वाजपेयइत्याहुः प्राजापत्यस्य निरुक्तसामेति यदनिरुक्तं प्रातःसवनन्तेन सयोनिः ॥ ९ ॥

यस्मात् वाजपेयः पूर्वोक्तरीत्या प्राजापत्योऽपि निरुक्तसाम अस्य सामानि निरुक्तानि अतोऽनिरुक्तप्रजापतिरूपस्य वाजपेयस्य साम्नामनिरुक्तत्वाभावात् वाजपेयो वियोनिर्विलक्षणा अय इत्याऊरभिन्नाः तत्रेदमुत्तरं यत् प्रातःसवनमनिरुक्तं अतोऽयं सयोनिः प्राजापत्यानुकूलः प्रातःसवनस्य प्राथम्येन मुख्यत्वात्तदनिरुक्तकरणेन सर्वो यज्ञोऽनिरुक्तः कृतो भवतीत्यभिप्रायः ॥ ९ ॥

अथास्य होतुः पृष्ठस्य रथन्तरत्वं विदधाति।

रथन्तरꣳ साम भवत्याग्नीय उज्झित्यै ॥ १० ॥

इयं वै रथन्तरमिति श्रुतेः रथन्तरकरणं अस्य लोकस्याग्नीय आशुतरं क्षिप्रतरं उज्झित्यै भवति ॥ १० ॥

अथ विहितरथन्तरत्वमेव तद्गानकालाभिषेकस्तुतिद्वारा प्रशंसति।

इयं वै रथन्तरमस्यामेवाध्यभिषिच्यते ॥ ११ ॥

अस्यां पृथिव्यामधीश्वरभावेनाभिषिच्यते अतः पृथिवीस्थानीयं रथन्तरं प्रसिद्धमित्यर्थः अर्थात्तत्राभिषेकः कर्त्तव्यमित्युक्तं भवति यस्मिन्नासीनोऽभिषिच्येत तत्सरुक्मं होत्रे दद्यात् अभिषिक्तश्च यामासन्दीमास्थितस्तामुद्गात्रे तथा च सूत्रं ब्रह्मवर्च्सं सरुक्मं होत्रे यस्मिन्नासीनोऽभिषिच्येतेति तथोद्गात्र इति प्रकृत्यासन्दी च स्मरणं यामभिषिक्त आरोहेदिति ॥ ११ ॥

अथाभिषेकप्रसङ्गाद्वाजपेययाजिनः किञ्चिद्व्रतमाह ।

तस्माद्वाजपेययाज्यप्रत्यवरोहीति ॥ १२ ॥

तस्मादधिकमपि नान्दीलिकादिभ्योऽवरोहेदित्यर्थः अपूर्व्वत्वाद्विधिरियं ॥ १२ ॥

तस्मादित्युक्तं विवृणोति ।

अस्याऽ हि सोऽध्यभिषिच्यते ॥ १३ ॥

यथाऽभिषिक्तो राजा राजान्तरन्न प्रत्यवरोहति अथासावथत्वेवाभिषिक्तत्वादित्यर्थः एतद्व्रतं यावज्जीविकमित्येके यावत् प्रत्यवरोहणीययागमित्यपरे प्रत्यवरोहणीयस्य ज्योतिष्टोम इत्यार्षेयकल्पेनोक्तं बृहस्पतिसवः प्रत्यवरोहणीय इति बह्वृचाः वाजपेययाजिनो व्रतान्याह सूत्रकारः तस्य व्रतानि चत्वारित्तिं वर्त्तयेदिति तामेव दर्शयति प्रत्यवरोहणाभिवादने जघन्यव्रज्यां समानशय्यतामिति वर्ज्जयेद्वाजपेययाजिभिरिति आत्मन उत्कृष्टैरप्यवाजपेययाजिभिः सह प्रत्यवरोहणादिकं न कुर्य्यात् षष्ठतोऽनुगमनं जघन्यव्रज्यां स्पष्टमन्यत् ॥ १३ ॥

अथ ब्राह्मणाच्छंसिपृष्ठे विशेषमाह ।

अभोवर्त्तो ब्रह्मसाम भवति ब्रह्मणो वा एष ऋषभ ऋषभतामेवैनं गमयति ॥ १४ ॥

ऋषभः श्रेष्ठः स्पष्टमन्यत् ॥ १४ ॥

अथाग्निष्टोमसामगीतं यज्ञायज्ञीयमार्भवेऽपकर्षति।

यज्ञायज्ञीयमनुष्टुभि भवति वागनुष्टुब् वाचोरसो यज्ञायज्ञीयं वाच्येवास्य रसं दधाति ॥ १५ ॥

गतमिदं ॥ १५ ॥

अथाग्निष्टोमसाम्नि किं सासेति तद्दर्शयति।

वारवन्तीयमग्निष्टोमसाम भवतोन्द्रियस्य वीर्यस्य परिगृहीत्यै ॥ १६ ॥

इन्द्रियस्येत्यस्य व्याख्यानं वीर्यस्येति त्वन्नश्चित्र उत्येति वारवन्तीयमग्निष्टोमसाम कार्यमग्निर्वा इदं वैश्वानरो दह न्नेदित्यत्र रक्षाहेतुत्वेन श्रुतत्वात् सुज्ञानमन्यत् ॥ १६ ॥

अथान्यस्योक्थस्योद्गीयतां सार्थवादमाह।

उद्वꣳशीयमुक्थानामन्ततो भवति सर्वेषां वा एतत् पृष्ठानाꣳ रूपꣳ सर्वेष्वेव रूपेषु प्रतितिष्ठति ॥ १७ ॥

एतदपि पूर्वखण्डे गतं ॥ १७ ॥

अथास्य षोडशिसामाह।

गौरोवितꣳ षोडशिसाम भवति ॥ १८ ॥

स्पष्टोऽर्थः ॥ १८ ॥

एतत् स्तौति।

अतिरिक्तं गौरीवितमतिरिक्तः षोडश्यतिरिक्त-एवातिरिक्तं दधाति ॥ १९ ॥

देवा वै वाचं व्यभजन्त तस्य योरसोऽत्यरिच्यत तद्गौरीवितम-भवदिति श्रुतेरतिरिक्तं गौरीवितं षोडशी च नाह्नो न रात्रेरिति श्रुतेरतिरिक्तः; अतस्त्रयोः; सम्बन्धः; समृद्धिहेतुः ॥ १९ ॥

अथोक्तयोरुद्गीयगौरीवितयोरुभयोरपि स्वारत्वाज्जा-मित्वमाशङ्कते।

तदाहुर्ज्जामि वा एतद्यज्ञे क्रियते यदुद्गृणी-याद् गौरीवितेन स्तुवते स्वारात् स्वारेणेति ॥ २० ॥

स्पष्टं ॥ २० ॥

तस्य परिहारमाह।

न जाम्यस्ति सवनꣳ सन्तिष्ठते ॥ २१ ॥

उक्थस्य समाप्तेर्न्न जामि ॥ २१ ॥

परिहारान्तरमाह।

उक्थꣳ श्रस्यते वषट्कारोऽन्तरा तेनाजामि ॥२२

स्तुतमनुशंसतीति वचनादुक्थस्तोत्रानन्तरमुक्थं श्रस्यते उक्थ्यग्रहहोमे वषट्कारः सोऽन्तरा मध्ये भवति तेनापि न जामिदोषः ॥ २२ ॥

अथान्यतः परिहरति।

अपच्छिदिव वा एतद्यज्ञक्रतोः यत् षोडशी तेनाजामि ॥ २३ ॥

यज्ञपर्व्वापच्छिदिव वै अपच्छिन्नमिव खलु अयमेवापच्छेदो यज्ञौत्थिकानामभावः स्तोत्रियाणां हि षोडशी नातः परं स्तोत्रियाणां सामानि सन्ति अतः क्षुद्रमिदं सर्व्वं विजातीयानां हि क्रतं करणे जामिता स्यात् ॥ २३ ॥

अथ षोडशिन ऊर्द्धं वाजपेयस्तोत्रं सप्तदशं भवति तच्च क्रतुयज्ञकाण्डेष्वनन्तर्भूतं अतएव यज्ञारण्येऽखिले स्थाने सन्तिष्ठत इति दोषमाशङ्कते।

यज्ञारण्ये सन्तिष्ठत इत्याऽऽरत्युक्थान्येत्यतिषोडशिनन्न रात्रिं प्राप्नोतीति ॥ २४ ॥

उक्थानि षोडशिस्तोत्रक्रमेणेति रात्रिपर्य्यायान्न प्राप्नोतीति अतो यज्ञारण्ये सन्तिष्ठते इति समाप्यते इतिशब्दो वचनसमाप्तिद्योतनार्थः ॥ २४ ॥

उक्तदोषं परिहरति।

विष्णोः शिपिविष्टवतीषु बृहदुत्तमं भवति ॥ २५ ॥

स्पष्टोऽर्थः ॥ २५ ॥

कथन्तेन परिक्षतो भवतीति तदाह।

एषा वै प्रजापतेः पशुष्टा तनूर्यच्छिपिविष्टः प्राणो बृहत् प्राण एव पशुषु प्रतितिष्ठति ॥ २६ ॥

यज्ञो विष्णुः पशवः शिपिरितिश्रुत्यन्तरात् विष्णोः प्रजापतित्वात् शिपिविष्ट इति यत् एषा प्रजापतेर्यज्ञात्मकस्य विष्णोः पशुष्टा तनूः किञ्च प्राणबृहत्साम्नोरुभयोरपि बृहत्त्वात् बृहत्साम प्राणः अतः वाजपेयस्तोत्रेण यज्ञसमापकः प्राणे पशुषु च यज्ञं प्रतिष्ठापयति ॥ २६ ॥

अथ पृथक् बृहत्साम्ना समाप्तिद्वारापि परिहरति ।

बृहता स्तुवन्ति बृहदमुं लोकमाप्नुमर्हति तमेवाप्नोति ॥ २७ ॥

असौ बृहदिति श्रुतेः बृहत्साम स्वर्गं लोकमाप्नुमर्हति अतस्तेन समापयितापि स्वर्गमेवाप्नोति अत ऐहिकपशुलाभादामुष्मिकस्वर्गलाभाच्च यज्ञारण्यसंस्थापनदोषोऽस्ति ॥ २७ ॥

इति तारण्यमहाब्राह्मणे अष्टादशाध्यायस्य षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

उक्तो वाजपेयः, अथास्योक्तानामनुक्तानाञ्च केषाञ्चिदङ्गानां विधिपूर्विका स्तुतिः क्रियते, तत्रादौ वाजपेयशब्दनिर्वचनप्रदर्शनप्रसङ्गेनास्याधिकारिणं दर्शयति ।

प्रजापतिरकामयत वाजमाप्नुयाꣳ स्वर्गं लोकमिति स एतं वाजपेयमपश्यद्वाजपेयो वा एष वाजमेवैतेन स्वर्गं प्रलोकमाप्नोति॥ १॥

पूर्वं पेयद्रव्यात्मकवाजाख्यं स्वर्गं कामयमानः प्रजापतिः तत्साधनत्वेन वाजपेयमनुष्ठाय तल्लाभवान् एष यज्ञोवाजपेयः खलु वाजोऽन्नं पेयद्रव्यात्मकं यस्मिन् स वाजपेयः सुराग्रहस्यात्र सम्भवात्तदाग्निहेतुत्वाच्च वाजपेयः अत एतदनुष्ठातापि तत्फलमाप्नोति वाजपेयशब्दो गुणविधायकः कर्म्मेति विचार्य्य प्रमाणाध्याये नामधेयपादएतत्समानार्थं वाजपेयेन स्वाराज्यकामो यजेतेत्येतद्वाक्यं विषयीकृत्य गुणविधित्वं पूर्व्वपक्षीकृत्याग्निहोत्रशब्दवत् कर्मनामधेयमिति सिद्धान्तितं॥ १॥

अथास्य प्रातःसवनगतस्तोत्रीयाणां शुक्रवत्यत्वमनूद्य प्रशंसति।

शुक्रवत्यो ज्योतिष्मत्यः प्रातःसवने भवन्ति तेजो ब्रह्मवर्च्चसन्ताभिरवरुन्धे॥ २॥

सोमाः शुक्रा गवाशिर इति शुक्रवत्यः ताएव ज्योतिष्मत्यः ताभिः स्तोत्रीयाभिस्तेजोविशेषं ब्रह्मवर्च्चसमवरुन्धेऽनुष्ठाता पूर्व्वत्राविहितत्वाच्छुक्रवत्यः कर्त्तव्या इति विधिः॥ २॥

अथ माध्यन्दिने विहितवाक्यत्वमनूद्य प्रशंसति।

वाजवत्योमध्यन्दिने भवन्ति स्वर्गस्य लोकस्य समष्ट्यै ॥ ३ ॥

स्पष्टं ॥ ३ ॥

अन्नवत्योगणवत्यः पशुमत्यस्तृतीयसवने भवन्ति भूमानन्ताभिरवरुन्धे ॥ ४ ॥

पुरोजितीव इत्यत्रान्नशब्दादन्नवत्यः भरन्तो वस्यवः एभिर्वह्वाम इन्नुभिः गायन्ति त्वा गायत्रिण इति बहुकीर्त्तनैर्गणवत्यः गोपातिरश्वसा असीति गोमत्यः ताभिस्तृतीयसवनगताभिर्भूमानं बहुभावं यजमानः अवरुन्धे एतदन्नादेरुपलक्षणं ॥ ४ ॥

अथास्य पवमानादीनां सर्वेषां सप्तदशस्तोममनूद्य प्रशंसति।

सर्वः सप्तदशोभवति प्रजापतिर्वै सप्तदशः प्रजापतिमेवाप्नोति ॥ ५ ॥

ओं आवयेति चतुरक्षरमतिक्रम्य एष वै सप्तदशः प्रजापतिरिति श्रुतेः तस्य सप्तदशत्वं ॥ ५ ॥

अथ ऋत्विजां हिरण्यमालित्वमाह।

हिरण्यस्रज ऋत्विजो भवन्ति महस एव तद्रूपं क्रियते ॥ ६ ॥

ऋत्विजामपि हिरण्यस्रक्त्वं महसो महत्त्वस्य रूपं क्रियते ॥ ६ ॥

केनाभिप्रायेण क्रियते तदाह ।

एषमेऽमुष्मिन् लोके प्रकाशोऽस्दिति ॥ ७ ॥

एष मे मह्यं अमुष्मिन् लोके महसोरूपकरणात् प्रकाशो ऽस्त्वित्यादिति बुद्ध्या देवसन्निधौ प्रकाशं करोति ॥ ७ ॥

तत् पुनर्हेममालित्वं हिरण्यद्वारा प्रशंसति ।

ज्योतिर्वै हिरण्यज्योतिरेवास्मिन् दधाति ॥८॥

स्पष्टं ॥ ८ ॥

अथात्र सर्वेषामाजिधावनं तत्र यजमानस्यैतज्ज्ञयञ्च विधाय प्रशंसति ।

आजिन्धावन्ति यजमानमुज्जापयन्ति स्वर्गमेवै-नन्तल्लोकमुज्जापयन्ति ॥ ९ ॥

सुगमं, आजिधावनसाधनं रथमुद्गाते दद्यात् तथाच सूत्रं येन रथेनाजिन्धावेत्तमुद्गाते दद्यादिति ॥ ९ ॥

अथ स्वर्गप्रतिनिधिरूर्द्धं काष्ठाग्रे रथचक्रादिना कृतं तत्र यजमानारोहणमाह ।

नाकꣳ रोहति स्वर्गमेव तल्लोकꣳ रोहति ॥१०॥

स्पष्टं ॥ १० ॥

अथास्य नाकस्याजीवत्प्रदेशकृतारोहणमाह ।

सरजसे रोहति मनुष्यलोकादेवैनमन्तर्हधति ॥ ११

स्पष्टं ॥ ११ ॥

अथ रथचक्रावस्थितस्य ब्रह्मणो वाजिनां सामगानमाह ।

वाजिनाꣳ साम ब्रह्मा रथचक्रेऽभिगायति वाजो वै स्वर्गो लोकः स्वर्गमेवैनन्तल्लोकमुज्जापयति ॥ १२ ॥

ब्रह्माणं प्रति गानमुक्तं वाजिनां साम आर्षेयकल्पे उक्तं वाजिनाश्चैव सामादित्यानांश्च पवित्रं आविर्मर्य्या इति अनुहित्वा सुतं द्रुहमपि वाजिनां साम ॥ १२ ॥

शिपिविष्टवतीषु बृहद्गानं प्रशंसति ।

विष्णोः शिपिविष्टवतीषु बृहदुत्तमं भवति स्वर्गमेव तल्लोकꣳ रूढ्वा ब्रध्नस्य विष्टपमभ्यतिक्रामति ॥ १३ ॥

किमित्ते विष्णो इति शिपिविष्टवतीषु बृहदुत्तमं षोडशिनः परं भवति चयं तमस्य रजसः पराक इति विष्णोर्हि उपरि निवासस्य श्रूयमाणत्वात् स्वर्गं लोकं रूढ्वा ब्रध्नस्यादित्यस्य विष्णुरूपस्य विष्टपं स्थानं अभि उद्दिश्याभिक्रामति अथास्य कल्पः पूर्वस्य बर्हिष्यवमानं व्रात्यानि लोष्णाज्यानि वैश्वजितमुत्तरं बार्हदुक्थस्य लोके देवस्थानं रथन्तरं पृष्ठमभीवर्त्तो ब्रह्मसामौचस्य लोके स्वाशिरामर्कः श्यावाश्वस्य यज्ञायज्ञीयन्त्वन्त्रिवृत उत्येति वारवन्तीयमग्निष्टोमसाम समानमितरं गवैकाहिकेन गौरीवितं षोडशिसाम विष्णोः शिपिविष्टवतीषु बृहत्सर्वं सम-

दशा इति पूर्वस्य तीव्रसुतस्येत्यर्थः महाव्रतसम्बन्धीन्यन्यानि त्रीणि होतादेवो अमर्त्यः तानः शक्रं पार्थिवस्येत्याद्युक्तानि॥१३॥

इति ताण्ड्यमहाब्राह्मणे अष्टादशाध्यायस्य

सप्तमः खण्डः।

अथ अष्टमः खण्डः।

अथ राजसूयोऽभिधीयते, तत्स्वरूपं बौधायनापस्तम्बाभ्यां आध्वर्यवं सूत्रद्वयाभ्यामुदीरितं, तत्र बौधायनः राजसूयेन यज्ञमानो भवति पुरस्तात् फाल्गुन्यै पूर्णमास्यै चैत्र्यां वा पूर्णमास्यां आमावास्येन हविषेष्ट्वा दीक्षते तस्य तिस्रो दीक्षास्तिस्र उपसदः सप्तम्यां प्रसुतः सन्तिष्ठते एष प्रायणीयोऽग्निष्टोमः सहस्रदक्षिण उदवसानीयान्त इति। आपस्तम्बोऽपि राजा स्वर्गकामो राजसूयेन यजेत शतसहस्रं दक्षिणोऽग्निष्टोमपञ्चापवर्गः प्रथममहः पञ्चसहस्राणि पवित्रे ददाति त्रिंशतमभिषेचनीये त्रिंशतं दशपेये केशवपनीये विंशतिः व्यूष्टिद्विरात्रे पञ्चचत्वारिंशतमुक्थ्यानीति। आश्वलायनोऽपि सूत्रं सूत्रयन्नित्यमाह, अथ राजसूयाः पुरस्तात् फाल्गुन्याः पौर्णमास्याः पवित्रेणाग्निष्टोमेनाभ्यारोहणीयेन यजेत पौर्णमास्यां चातुर्मास्यानि प्रयुङ्क्ते इति। ब्राह्मणभाष्यकृद्भिरपि पूर्वाचार्यैरित्थं संगृहीतं, वक्ष्यते राजयज्ञोऽयं राजसूयाह्वयोऽस्य च। प्रयोगसंग्रहः पूर्वं फाल्गुन्याः सोममाहरेत्। अग्निष्टोमः पवित्राख्यः सोऽभ्यारोहणसाधनः। फाल्गुन्यां पूर्ण-

मास्यान्तु चातुर्मास्यान्युपक्रमेत्। तानि संवत्सरे कृत्वा द्वौ सोमौ तत आहरेत्। आद्योऽभिषेचनीयः स्याद्दशपेयस्ततःपरं। षष्ठिष्टयस्तु बहवः कर्त्तव्यास्तु तदा तदा। स्यात्क्षेत्रपतीयस्य सोऽतिरात्रस्ततः परं। द्युष्टिद्विरात्रः कर्त्तव्यस्तत्राग्निष्टोम आदिमं। अहः स्यादतिरात्रोऽन्त्यं चत्रस्य धृतिरन्तिमः। अग्निष्टोमो भवेदित्थं राजसूयाह्वयः क्रतुः। सोमेष्टिपशुबन्धानां समाहारो भवत्ययं। तत्रेष्टिपशुबन्धेषु सतः साम्नामनन्वयाः। सामा एव प्रकीर्त्यन्त इत्येते अनुगम्यतामिति, तत्रादौ पवित्राख्यमग्निष्टोमं विधत्ते।

अग्निष्टोमं प्रथममाहरति यज्ञमुखं वा अग्निष्टोमो यज्ञमुखमेवारभ्य सवमाक्रमते॥ १॥

द्वादशस्तोत्रयुक्तोयोऽग्निष्टोमस्तमेतं राजसूयोपक्रमे सम्पादयेत् सोमयागानामाद्ये ज्योतिष्टोम आद्यः एष वाव प्रथमो यज्ञोयज्ञानां यत् ज्योतिष्टोम इति श्रुतेः तस्य ज्योतिष्टोमस्य सम्बन्धिन्यो याः सप्तसंस्थाः सन्ति तासामाद्येऽग्निष्टोमसंस्थायाः प्रकृतत्वेन यज्ञमुखत्वं तस्मादादावग्निष्टोमेऽनुष्ठिते सति यज्ञस्य राजसूयाख्यस्य महाक्रतोर्मुखमेवारभ्य सवमाक्रमते महाक्रतुमनुतिष्ठति सूयतेऽभिषिच्यते यजमानो यस्मिन् महाक्रतौ सोऽयमभिषेकयुक्तो महाक्रतुः सव इत्युच्यते यथोक्तविधिं तैत्तिरीया अप्येवमामनन्ति अग्निष्टोममग्रमाहरति यज्ञमुखं वा अग्निष्टोमः यज्ञमुखमेवारभ्य सवमाक्रमत इति॥ १॥

राजसूयगतेषु सप्तसु सोमयागेषु प्रथमो विहितः द्वितीयं विधत्ते।

अथैषोऽभिषेचनीयः ॥ २ ॥

अथशब्दोनानन्तर्यार्थः चातुर्मास्यादिभिर्व्यवहितत्वेनाग्निष्टोमाभिषेचनीययोरानन्तर्यस्य दुःसम्पादनीयत्वात् अधिकारार्थस्तु भवेत् एष वक्तुमिष्टोऽभिषेचनीयोऽधिकृतः प्रारब्ध इत्यर्थः ॥ २ ॥

वह्निप्रवमानमाध्यन्दिनपवमानार्भवपवमानाख्येषु त्रिषु स्तोत्रेषु स्तोमविशेषं विधत्ते।

तस्य द्वात्रिंशाः पवमाना द्वात्रिंशदक्षरानुष्ट्वा-गनुष्टुब्यावती वाक्तयैव स्तूयते ॥ ३ ॥

प्रसिद्धेवानुष्टुभोऽक्षरसंख्या सा वानुष्टुब्वागूपा वाग्देवतायाः प्रियत्वात् तच्छब्दसम्बन्धेन सर्ववेदेषु तथा व्यवहारात् अवगम्यते ततोद्वात्रिंशत्स्तोमे पवमानेषु प्रयुक्ते सति संख्याद्वारायं यजमानः कृत्स्नमन्त्ररूपया वाचाऽभिसिक्तो भवति यद्यपि विष्टुत्यध्याहारयोरयं स्तोमोनाम्नातः तथापि शाखान्तरानुसारिसूत्रकारादुपदेशादवगन्तव्यः तैत्तिरीयासु स्तोमान्तरमामनन्ति अथैषोऽभिषेचनीयश्चतुस्त्रिंशः पवमानो भवति त्रयस्त्रिंशद्वै देवताः एतावाप्नोति प्रजापतेश्चतुस्त्रिंशत्स्तोमेवाप्नोति ॥ ३ ॥

अथ ब्रह्मवादिभिर्यो दोष उद्भाव्यते तं दर्शयति।

तदाहुः षण्णरद्व वा एष छन्दसां यद्विषमा-

स्तोमा अयथापूर्वमिति ॥ ४ ॥

अभिषेचनीयस्योक्थसंस्थारूपत्वात्तत्र पञ्चदशस्तोत्राणि तेषु प्रथमषष्ठैकादशानि सवनत्रयगतानि पवमानस्तोत्राणि तेष्वधिकसंख्योपेतोद्वात्रिंशस्तोमः प्रयुज्यते तेभ्यः उपरितनेषु सवनत्रयगतेषु स्तोत्रेषु पञ्चदशसप्तदशैकविंशस्तोमा न्यूनसंख्योपेताः प्रयुज्यन्ते तदेतदयथापूर्वं भवेत् अल्पेनोपक्रम्याधिकेन समाप्तौ तु यथापूर्वं भवति तच्चात्र नास्ति तदेतद्वैषम्यन्तच्च प्रयुज्यमानमन्त्रगतच्छन्दसामवकाशरूपत्वात् संशरइव सम्यग्वध इव भवति ॥ ४ ॥

तमेतन्दोषं ब्रह्मवादी कश्चिदभिज्ञः समाधत्ते।

यत्समाः पवमानास्तेनासꣳशरस्तेन यथापूर्वं ॥५॥

यदा पवमानस्तोत्राण्यन्यस्तोत्राणि चैकीकृत्य परीक्ष्यन्ते तदानीं अर्वाचीनसंख्या उपरितनत्वे सत्ययथापूर्वत्वरूपेण स्तोमवैषम्येण छन्दोवधः शङ्कते पृथक् परीक्षायान्तु नासौ शङ्कास्ति न तावत् परस्तोत्रेषु अयथापूर्वत्वमस्ति पञ्चदशसप्तदशैकविंशानामनुक्रमेणैवानुष्ठितत्वात् नापि पवमानेष्वसौ शङ्का यद्यस्मात् कारणात् पवमानास्त्वयोऽपि द्वात्रिंशस्तोमवत्त्वात् समाप्तेन कारणेन वैषम्यप्रयुक्तः संशरोनास्ति तेनोभयत्रिधेषु स्तोत्रेषु यथापूर्व्वत्वमेव नतु वै परीत्यं अतोक्तदोषोद्भावनतत्परिहारः तैत्तिरीया अप्येवमामनन्ति संशरएषः स्तोमानामयथापूर्वं यद्विषमाः स्तोमाः एतावान्वै यज्ञः यावत् पवमानाः अन्तः-

श्लेष्मा वा अन्यत् यत्समाः पवमानास्ते संग्रस्तेन यथापूर्वमिति त्रयः पवमाना इति यावानस्ति एतानेव मुख्यो यज्ञभागः अन्यत्तु सर्वमन्तःश्लेष्मणं वै यज्ञमवधेः सम्बन्धमित्येतावदेव यस्मात् पवमानसाम्येन सर्वोदोषः परिहृत इत्यर्थः ॥ ५ ॥

अभिषेचनीयस्योक्थसंस्थारूपत्वं विधत्ते ।

आत्मना वा अग्निष्टोमेनर्ध्नोत्यात्मना पुण्योभवत्यथ यदुक्थानि पशवो वा उक्थानि विडुक्थानि यदुक्थानि भवन्त्यनुसन्तत्या एव ॥ ६ ॥

अभिषेचनीयस्य यः पूर्वभागोऽग्निष्टोमाख्योद्वादशस्तोत्रयुक्तः सोऽयं सर्वेषां सोमयागानां प्रकृतित्वादात्मा देहस्थानीयः तेनेह लोके यजमानः समृद्धो भवति परलोके पुण्यफलोपेतो भवति अथ द्वादशस्तोत्रानन्तरं यदुक्थानि यानि त्रीण्युक्थाख्यस्तोत्राणि सन्ति तान्युक्थानि यज्ञशरीरस्थानीयादग्निष्टोमात् ब्रह्मत्वेन गवाश्वादिपशुस्थानीयानि तथा विट्प्रजापुत्रभृत्यादिप्रजास्थानीयानि च अतस्तानि स्तोत्राणि पशूनां प्रजाया अवच्छेदायैव तस्मादभिषेचनीय उक्थसंस्थ इत्यभिप्रायः शाखान्तरे चायमर्थो विस्पष्टमाम्नायते आत्मनैवाग्निष्टोमेनर्ध्नोति आत्मना पुण्यो भवति प्रजा वा उक्थानि पशव उक्थानि यदुक्थ्यो भवत्यनुसन्तत्यै इति ॥ ६ ॥

बहिष्पवमानस्यादावतिदेशप्राप्तप्राकृतमन्त्रबन्धनाय मन्त्रान्तरं विधत्ते ।

वायो शुक्रो अयामित इति वायव्या प्रतिपद्भवति वाग्वै वायुर्वाचमेवास्य यज्ञमुखे युनक्ति तयाभिषिच्यते सर्वस्याएव वाचः स्रूयते सर्वाएनं वाचो राजेति वदन्ति ॥ ७ ॥

वायो शुक्र इत्यादि पादस्तृचस्य प्रतीकभूतः सोऽयं तृचो वक्ष्यमानस्य प्रतिपत्प्रारम्भसाधनं प्रतिपद्यते प्रारभ्यते अनया तृचरूपया चेति व्युत्पत्तेर्वायुर्देवता यस्याः प्रतिपदः सा वायव्या कौष्ठ्येन वायुना वागुच्चार्यत इति वायोर्वाग्रूपत्वोपचारः तथा सति वायव्यमन्त्रेण प्रारभमाण उद्गाता यजमानस्य यज्ञारम्भे वाग्देवतामेव संयोजयति तत्संयोजने तया वाग्देवतया अस्मिन्नभिषेचनीयक्रतावभिषिक्तो भवति तद्देवतानुग्रहात् सर्वप्राण्युच्चारितायाः सर्वस्याः मन्त्ररूपायाः वाचः सम्बन्धी सन्नेवायं स्रूयतेऽभिषिच्यते अयमर्थः प्रत्यक्ष एव यतः सर्वप्राणिमुखोद्गताः सर्वा वाचः एनं राजेत्येव व्यवहरन्ति शाखान्तरे त्वन्य एव तृचो वायुदेवताक एवमाम्नायते उपत्वाजामयोगिर इति प्रतिपद्भवतीति वाग्वै वायुर्वाच एवैषोऽभिषेकः सर्वासामेव प्रजानां स्रूयते सर्वाएनं प्रजा राजेति वदन्ति ॥ ७ ॥

वायो शुक्र इत्येतस्मात् तृचादूर्ध्वं सम्भार्याख्या एकैकम् आम्नाता ऋचो विधत्ते।

सम्भार्या भवन्ति पृष्ठान्येव ताभिर्युनक्ति यन्ना-

नादेवत्यास्तेन युनक्ति वीर्यं वै पृष्ठानि वीर्य एवाध्यभिषिच्यते ॥ ८ ॥

संभ्रियन्ते स्वयमेकैकाः सत्यस्तृचस्थाने सम्यक्प्रयुज्यन्ते ताः सम्भार्याः उपत्वाजामयोगिर इत्याद्या अग्न आयूंषीत्यन्ताः षट्संख्याका ऋचस्ताभिः षड्भिर्ऋग्भिरनुष्ठिताभिरयमुद्गाता पृष्ठस्तोत्रसामान्ये च योजितवान् भवति षट्संख्यासामान्यात् बृहद्रथन्तरवैरूपवैराजशाक्वररैवताख्यानि षट् पृष्ठसामानि यद्यनेन कारणेन सम्भार्या नादेवताकाः पृष्ठानि च तथा विदधाति एतेन कारणेन पृष्ठस्तवयोजनं सम्भवति पृष्ठानाञ्च सामर्थ्यहेतुत्वात् वीर्यत्वं अतः सम्भार्यापाठेन यजमानो वीर्येऽधिश्रित्याभिषिच्यते ॥ ८ ॥

ब्रह्मवादिनां दोषोद्भावनं दर्शयति ।

यन्ति वा एते यज्ञमुखादित्याहुर्य्ये सम्भार्याः कुर्वत इति ॥ ९ ॥

य उद्गातारः सम्भार्याः स्तोत्रमध्येऽकुर्वत एते यज्ञमुखरूपाद् बहिष्प्रवमानाद्यन्ति विभ्रष्टा भवन्ति एकैकामृचमाश्रित्य ऋक्परित्यागएव भ्रंशः इतिशब्दोदोषसमाप्त्यर्थः ॥ ९ ॥

तं दोषं परिहरति ।

यत्प्रवस्व वाचो अग्रिय इति तेन यज्ञमुखान्न यन्ति ॥ १० ॥

यद्येन कारणेन सम्भार्य्याभ्य ऊर्द्धं पवस्वेत्येतं ऋचं पठन्ति तेन कारणेन यज्ञमुखाद्भ्रंशोनास्ति तस्मादयं ऋचः पक्षत इत्यर्थः एतौ दोषपरिहारौ शाखान्तरेऽप्युक्तौ यन्ति वा एते यज्ञमुखात् ये सम्भार्य्या अब्रुवन् यदाह पवस्व वाचो अग्निय इति तेनैव यज्ञमुखान्नयन्तीति ॥ १० ॥

अन्यं ऋचं विधत्ते ।

द्विद्युतत्यारुचेति छन्दसाꣳ रूपं छन्दाꣳस्येवास्य यज्ञमुखे युनक्ति तैरभिषिच्यते ॥ ११ ॥

द्वीत्यस्य मन्त्रस्य छन्दोरूपत्वं षष्ठाध्यायस्य नवमखण्डे एव पठितं द्विद्युतत्यारुचेति वै गायत्र्या रूपं परिष्टोभन्त्येति त्रिष्टुभः क्रपेत्यनुष्टुभः सोमाः शुक्रागवाशिर इति जगत्याः सर्वेषां वा एषां छन्दसां रूपमिति स्पष्टमन्यत् ॥ ११ ॥

ऋचान्तरं विधत्ते ।

एतमुत्यं दशक्षिप इत्यादित्या आदित्या वा इमाः प्रजास्तासामेव मध्यतः स्रूयते ॥ १२ ॥

तासु ऋक्षु सनोभगाय पूषणे पवस्वेत्येवमादित्यनाम्नः श्रवणादादित्या आदित्यदेवताका एताः तथा प्रजा अप्यदितेरुत्पन्नत्वादादित्याः तत आदित्यदेवताकस्य ऋचस्य पाठादादित्यरूपाणां प्रजानामध्ये एवाभिषिच्यते एतदपि शाखान्तरेऽभिहितं एतमुत्यं दशक्षिप इत्याह आदित्या वै प्रजाः प्रजानामेवैतेन स्रूयत इति ॥ १२ ॥

ऋचान्तरं विधत्ते।

पवस्वेन्दो वृषासुत इति वृषण्वत्यो भवन्ति त्रिष्टुभोरूपं वीर्यं वै त्रिष्टुप् वीर्य्य एवाध्यभिषिच्यते ॥१३॥

वृषन्शब्दस्य विद्यमानत्वादेता ऋचो वृषण्वत्यः यद्यप्येता गायत्यः तथापि वीर्य्यसम्पादकत्वात् फलतस्त्रिष्टुभोरूपं भवन्ति त्रिष्टुभश्चेन्द्रियवीर्य्यहेतुत्वं सर्ववेदप्रसिद्धं ॥ १३ ॥

पञ्चर्चं सूक्तं विधत्ते।

उत्ते शुष्मास ईरत इत्युद्वत्यो भवन्त्युद्वा अनुष्टुभो रूपमानुष्टुभो राजन्यस्तस्मादुद्वत्यो भवन्ति ॥ १४ ॥

आदावुच्छब्दश्रवणात्ता उद्वत्यः अनुष्टुभ्यन्यत्र क्वचिदुत्प्रब्दः श्रुतः उद्यन्नद्यमित्तमह इति तत्सामान्यादेतासामनुष्टुप्रूपत्वं अनुष्टुप् छन्दसां प्रतिष्ठेति श्रुतेः यथा छन्दसां मध्येऽनुष्टुभ उत्तमत्वं तथा राज्ञः सर्वपालकत्वेनोत्तमत्वादानुष्टुभत्वं तस्मादनुष्टुप्प्रकारकात् सम्बन्धाद्राजयज्ञ उद्वत्यः कार्य्याः शाखान्तरेऽप्येतदात्मा तं उद्वतीर्भवन्ति उद्वा अनुष्टुभो रूपमानुष्टुभो राजन्यस्तस्मादुद्वत्यो भवन्तीति ॥ १४ ॥

ऋचान्तरं विधत्ते।

पवमानस्य ते कव इति प्राणानां कॢप्त्यै ॥१५॥

मन्त्रे पवमानस्येति शुद्धिहेतुत्वं प्रतीयते प्राणाश्च शरीरे

शुद्धिहेतवः तदभावे शरीरस्याशुचिता अनेन साम्येनायं त्वचः शरीरे प्राणानां सम्पादनाय भवति ॥ १५ ॥

त्वचान्तरं विधत्ते।

अधत्तपापरिष्कृत इत्यनुष्टुप् प्रथमानुष्टुबुत्तमा वाग्वा अनुष्टुब्वाचैव प्रयन्ति वाचमभ्युद्यन्ति ॥ १६ ॥

अधत्तपेत्यस्मिन् त्वचे क्रियमाणे वहिष्यवमानस्यादावन्ते चानुष्टुप् सम्पद्यते वायो शुक्रोऽइत्यादि अधत्तपेत्यन्तः तयोरुभयोरनुष्टुबेव छन्दः वाचोऽनुष्टुप्त्वं पूर्वमेव प्रतिपादितं तस्मादाद्यन्तयोरीदृशौ त्वचौ कुर्वाणा उद्गातारो वाचैव प्रयन्ति वाचमभिलक्ष्य उद्यन्ति समापयन्तीत्यर्थः अयमर्थः शाखान्तरेऽप्यामनातः अनुष्टुप् प्रथमा भवति अनुष्टुबुत्तमा वाग्वा अनुष्टुब्वाचैव प्रयन्ति वाचोद्यन्तीति ॥ १६ ॥

तावेतौ त्वचौ प्रकारान्तरेण प्रशंसति।

छिन्नमिव वा एतद्यदेकर्चौ यदेतावानुष्टुभौ त्वचावभितो भवतो बह्वः पुरएतारो भवन्ति बह्वः पश्चरपिनः ॥ १७ ॥

वहिष्यवमानस्य मध्ये सम्भार्या एकर्चाऽइति यदस्मि एतदेतेन स्रोतं विच्छिन्नमिव भवत्येव पूर्वोत्तरभाविनां त्वचानां मध्ये व्यवधानात् तद्विच्छेदपरिहारार्थं स्रोतस्याभित आद्यन्तयोरेतावनुष्टुभौ त्वचौ यदि भवतः तदा विच्छेददोषस्य परिहृत-

त्वाद्यजमानस्य पुरएतारः पुरस्तोगन्तारः सेवका बहवः सम्पद्यन्ते पश्चायिनः पृष्ठतः आप्नुवन्तो भृत्या बहवोऽपि भवन्ति ॥१७

अन्तिमं तृचं प्रकारान्तरेण प्रशंसति ।

सौर्यानुष्टुबुत्तमा भवति स्वर्गस्य लोकस्य समष्ट्यै ॥ १८ ॥

उत्तमा अधत्तपेत्येषा सौरी सूर्यदेवताका सूर्यस्य स्वर्गे तिष्ठति तस्मादयं तृचः स्वर्गप्राप्ये सम्पद्यते तद्दृचि विवक्षतोधियेति श्रुतत्वादिति शाखान्तरेऽप्येतदुक्तं सूर्यस्यानुष्टुबुत्तमा भवतीत्यादिना ॥ १८ ॥

इति ताण्डुमहाब्राह्मणे अष्टादशाध्यायस्य

अष्टमः खण्डः ।

अथ नवमः खण्डः ।

अभिषेचनीये वक्तव्या विशेषा उक्ताः अथ दशपेये वक्तव्यान् विशेषान् विधातुं तद्विधिस्तावकमर्थवादमाह ।

वरुणस्य वै सुषुवाणस्य भर्गोऽपाक्रामत्स लेधापतद्बृहस्पतीयमभवच्छायन्तीयं तृतीयमपस्तृतीयं प्राविशत् ॥ १ ॥

सुषुवाणस्याभिषेचनीयस्य क्रतावभिषिक्तस्य वरुणस्य भर्गः इन्द्रियसामर्थ्यं तस्माद्वरुणादपगतं लेधापतितमभूत् तस्य पति-

तस्य भर्गस्य यत्तृतीयमंशरूपं तद्भृगुनामकः ऋषिरभवत् अत एव भृगोर्वरुणपुत्रत्वमन्यत्र श्रूयते भृगुर्वै वारुणिः वरुणं पितरमुपससारेति अन्यत्तृतीयमंशस्वरूपं श्रायन्तीयनामकं सामाभवत् श्रायन्तइव सूर्य्यमित्यस्यामृचुत्पन्नं साम श्रायन्तीयं अतः परं तृतीयमंशरूपमपः प्राविशत् ॥ १ ॥

अथ विवक्षितान् विशेषान् विधत्ते ।

यद्भागवोऽहोता भवति तेनैव तदिन्द्रियं वीर्य्यमाप्त्वावरुन्धे यत् श्रायन्तीयं ब्रह्मसाम भवति तेनैव तदिन्द्रियं वीर्य्यमाप्त्वावरुन्धे यत् पुष्करस्रजं प्रतिमुञ्चते तेनैव तदिन्द्रियं वीर्य्यमाप्त्वावरुन्धे ॥ २ ॥

भृगुगोत्रसमुत्पन्नः पुरुषो दशपेयक्रतौ होता भवेदिति यदस्ति तेनैव भृगुगोत्रसम्बन्धेनैव तत्पतितं वरुणस्येन्द्रियं तत्सामर्थ्यञ्च प्राप्य अवरुन्धे स्वाधीनं कुरुते ब्रह्मणमभिलक्ष्य गातव्यं साम ब्रह्मसाम तच्चात्र श्रायन्तीयं भवेत् पुष्करस्रजं तामरसपुष्पाणां मालां यजमानः प्रतिमुञ्चत एतेन क्रतुत्वेन क्रतुत्वमपीन्द्रियसामर्थ्यं अवरुद्धं भवति अताध्वर्युब्राह्मणमेवमाम्नायते जामि वा एतत् कुर्व्वन्ति यत्सद्यो दीक्षयन्ति सद्यः सोमं क्रीणन्ति पुण्डरीकस्रजं प्रयच्छन्त्यजामितायै अङ्गिरसः स्वर्गं लोकं यन्तः अप्सु दीक्षातपसी प्रावेशयन् तत् पुण्डरीकमभवत् यत्पुण्डरीकस्रजं प्रयच्छति साक्षादेव दीक्षातपसी अव-

स्कन्ध इति अध्वर्युसूत्रमप्येवं पठ्यते दीक्षायास्थाने द्वादश-पुण्डरीकां स्रजं प्रतिमुञ्चत इति ॥ २ ॥

तस्याः स्रजः कालविशेषं विधत्ते ।

दशमो भवति ॥ ३ ॥

अभिषेचनीयादुत्तरमारभ्य दशसु दिनेषु क्रमेण दशसंख्याकानि संहृत्संज्ञकानि हवींषि दशसु दिनेष्वनुष्ठेयानि तस्मिन् दशमेऽह्न्यपराह्णे पुष्करस्रजःप्रतिमोकः ततः स्वगेषा दिनगताया दशसंख्यायाः पूरकत्वात् दशमीत्युच्यते उक्तं हि सूत्रकृता तद्दीक्षित एव दशाहे ततो दशमेयेन यजेतेति ॥ ३ ॥

अपरं विशेषं विधत्ते ।

दश चमसा दश चमसाध्वर्यवो दशदश चमसमभियन्त्यादशमात् पुरुषादन्वाख्याय प्रसर्पन्ति दशसद्वो ह्येष यज्ञ एनं वाव ते तद्यज्ञमन्वैच्छन्य एतेन यजत एतदेवेन्द्रियं वीर्यमाप्त्वास्मिन् दधाति ॥ ४ ॥

यजमानचमसव्यतिरिक्ताः दशसङ्ख्याका अत्र सोमचमसाः स्युरेषाञ्च सोमचमसानां हर्त्तारो दशसंख्याकाश्चमसाध्वर्यवो भवन्ति एकैकं यज्ञचमसं दशदशब्राह्मणाः पानार्थमभियन्ति तत्रैकैकः पुरुषः स्वकीयान् पित्रादीन् दशपुरुषपर्य्यन्तानन्वाख्याय पानार्थं प्रसर्पेत् तदुक्तं सूत्रकृता ते दशमात्पुरुषादशपितृनित्यन्वाख्याय प्रसर्पेयुरिति अध्वर्युसूत्रमपि श्लोभूते पात्रसादनकाले

दशचमसानधिकान् प्रयुनक्ति तासुन्नयनकाले उन्नयति भक्षनकाले दशदशैकस्मिंश्च सोमे ब्राह्मणाः सोमपाः सोमं भक्षयन्त्यादशमात् पुरुषादविच्छिन्नसोमपीथा इति तैत्तिरीयब्राह्मणमपि दशपेयो भवति शतं ब्राह्मणाः पिबन्तीति तदीयमनुब्राह्मणमप्येवमाम्नातं दशपेयो भवति अन्नाद्यस्यावरुध्यै शतब्राह्मणाः पिबन्ति शतायुः पुरुषः शतेन्द्रिय आयुषा एवेन्द्रिये प्रतितिष्ठतीति हि यस्मादेष दशपेयाख्यो यज्ञोदशसमूहः दशभिश्चमसैर्युक्तत्वात् समूहो भवति तत्तस्मात् कारणात्ते समूद्धिकामा एतमेव यज्ञमन्वैच्छन् अन्विष्यादनुष्ठितवन्त इत्यर्थः यः पुमानेतेन दशपेयेन यजते अस्मिन् यजमाने स उद्गाता एतदेव लोकप्रसिद्धं चक्षुरादीन्द्रियं तद्गतवीर्यं च प्राप्य स्थापयति ॥ ४ ॥

विशेषान्तरं विधत्ते।

सर्वः सप्तदशो भवति द्वादशमासाः पञ्चर्तवः स वै संवत्सरः संवत्सरादेवेन्द्रियं वीर्यमाप्त्वावरुन्धे॥ ५ ॥

अस्मिन्दशपेयक्रतौ यानि स्तोत्राणि सन्ति तेषु सर्वेषु स्तोत्रेषु सर्वोऽपि स्तोमः सप्तदशाख्यो भवेत् कार्त्तिकाद्याः द्वादशमासा वसन्ताद्याः पञ्चर्तवः हेमन्तशिशिरयोः समासेनेति न्यूनान्तरादृतुषु पञ्चसंख्या स वै स एव द्वादशमासात्मकः पञ्चर्तुरूपः सप्तदशसंख्योपेतः संवत्सरो भवति अतः संख्यासाम्येनात्मात् संवत्सररूपात् सप्तदशस्तोमादेव इन्द्रियञ्च तद्गतवीर्यं प्राप्य स्वाधीनं करोति ॥ ५ ॥

पूर्वोक्तां यजमानेन स्वकण्ठे प्रतियुक्तां पुष्करस्रजमर्थवादेन स्तौति ।

इन्द्रोवृत्रमहंस्तस्येयं चित्राण्युपैद्रूपाण्यसौ नक्षत्राणामवकाशेन पुण्डरीकञ्जायते यत् पुष्करस्रजं प्रतिमुञ्चते वृत्रस्यैव तद्रूपं क्षत्रम् प्रतिमुञ्चते ॥ ६ ॥

त्वाष्ट्रनामकेन केनचिद्विशिष्टब्राह्मणेनोत्पादित इन्द्रस्य शत्रुः कश्चिद्वृत्रनामकः तं कदाचिदिन्द्रो हतवान् यस्य हतस्य वृत्रस्य शरीरगतानि यानि नीलपीतस्थूलसूक्ष्माद्यवयवरूपाणि सन्ति इयं पृथिवी तानि सर्वाणि रूपाणि उपैत् प्राप्नोत् असौ द्यौर्नक्षत्राणां सम्बन्धीनि दृश्यमानानि वृत्रस्य चित्ररूपाण्याप्नोत् अवकाशेन द्यावापृथिव्योर्मध्यगतेनान्तरीक्षेण वृत्ररूपात्मकमेव पुण्डरीकं जायते एवं सति यद्यदा यजमानः पुष्करस्रजं प्रतिमुञ्चते तदानीं वृत्रस्येव सम्बन्धि तत्सर्वं रूपं क्षत्रियजातिर्यजमानः प्रतिमुञ्चते ॥ ६ ॥

तस्यां स्रजि पुष्कराणां संख्यां विधत्ते ।

द्वादशपुष्करा भवति द्वादशमासाः संवत्सरः संवत्सरेऽन्तर्भूतञ्च भव्यञ्च भूतेन चैवैनं भव्येन च समर्द्धयति ॥ ७ ॥

द्वादशभिः पुष्करैः स्रगियन्निष्पाद्या तथा सति संवत्सरगतया माससंख्यया साम्यं भवति संवत्सरमध्ये वर्त्तमानादस्मा-

द्विषात् अतीतकालसम्बन्धि भविष्यकालसम्बन्धि च वसुजातस्य भूतेन तेन चोभयेन वसुजातेन यजमानं समृद्धं करोति ॥७॥

अथ सर्वेषामृत्विजां सम्बन्धीनि द्रव्याणि विधित्सुरादौ सुवर्णमयीं स्रजं विधत्ते।

स्वगुद्गातुस्सौर्य्य उद्गाता न वै तस्मै व्यौच्छदथो-व्येवास्मै वासयति ॥ ८ ॥

सौवर्णी स्वगुद्गातुर्हैया यथा सूर्य: सर्वञ्जगद्यनक्ति तथा सामवेदार्थं सर्वमुद्गाता व्यनक्ति तस्मात्सौर्य्य उद्गाता सौवर्ण-स्रजोधारणात्पूर्वं तस्मादुद्गात्रे न वै व्यौच्छत् प्रकाशाभावादुष:-कालो नाभूत् अथ सौवर्णस्रजधारणानन्तरं अस्मा उद्गात्रे विवासयत्येव प्रकाशसद्भावादुष:कालं सूर्य्यो विशेषेणास्मा-उद्गात्रे सम्पादयत्येव ॥ ८ ॥

सुवर्णफलकरूपं रुक्मनामकमाभरणं विधत्ते।

रुक्मोहोतुराग्नेयो होताथो अमुमेवास्मा आ-दित्यमुन्नयति ॥ ९ ॥

होतुरुपरिधारणयोग्यो रुक्मो भवेत् अग्निर्वै देवानां हो-तेति श्रुत्यन्तरादाग्नेयोहोता भवति अत: प्रकाशरूपो रुक्मस्तस्य योग्य: अथो अपि च अस्मै होत्रर्थमसुमेव रुक्मरूपमादित्यमुन्न-यति ऊर्ध्वदेशं प्रापयति ॥ ९ ॥

अथ द्रव्यान्तरं विधत्ते।

प्राकाशावध्वर्य्योर्य्यमाविव ह्यध्वर्यू अथो चक्षुषो एवास्मिन् दधाति ॥ १० ॥

प्राकाशौ आभरणविशेषाविति केचित् सौवर्णदर्पणावित्यन्ये अध्वर्युप्रतिप्रस्थातोस्तावुभौ भवेतां एकस्मिन्नुदरे युगपदुत्पन्नौ भ्रातरौ यमौ तद्वदेतौ उभावध्वर्युविशेषौ तस्माच्चक्षुषोः साम्येन प्राकाशदानं युक्तं प्राकाशयोर्दानेनास्मिन् यजमाने प्रतिगृहीतरि वा दृष्टिपाटवं भवति ॥ १० ॥

अश्वदानं विधत्ते।

अश्वः प्रस्तोतुः प्राजापत्योऽश्वः प्राजापत्यः प्रस्तोताथो एव ह्यश्वः प्रोथति एव प्रस्तोता स्तौति ॥११॥

प्रजापतिसम्बन्धिचक्षुर्जन्यत्वादश्वः प्राजापत्यः तथा च श्रुत्यन्तरं प्रजापतेरक्ष्यश्वः यत्तत्यरापतत्तदश्वोऽभवदिति प्रस्तोता प्रथमतो गायति प्रजापतिश्च प्रथमतः सृजति ततः प्रस्तोता प्राजापत्यः अथो अपिच भूमौ विलुठन्नश्वः सहसाभ्युत्थाय एव प्रकर्षेणैव प्रोथयति प्रशब्दं गात्रचालनं करोति प्रस्तोतापि प्रकर्षेणैव स्तुतिं करोति तत्तस्माश्वो योग्यः ॥ ११ ॥

धेनुदानं विधत्ते।

धेनुः प्रतिहर्त्तुः पय एवास्मिन् दधाति ॥ १२ ॥

धेनोर्हि क्षीरसम्पादनं प्रसिद्धं ॥ १२ ॥

वन्ध्यायागोर्दानं विधत्ते।

वशा मैत्रावरुणस्य वशमा नयादिति ॥ १३ ॥

मां यजमानं प्रति समस्तं वस्तुजातं वशं स्वाधीनं नयात् नयतु इत्यनेनाभिप्रायेण वन्ध्यादेया देयवस्तुफलयोर्वशशब्द-साम्यं द्रष्टव्यं ॥ १३ ॥

ऋषभो ब्राह्मणाच्छंसिनोवीर्यं वा ऋषभो वीर्यमेवास्मिन् दधाति ॥ १४ ॥

सेचनसमर्थः पुङ्गव ऋषभः तस्य शक्त्याधिक्येन वीर्यरूपत्वं ॥ १४

वस्त्रदानं विधत्ते ।

वासः पोतुः पवित्रत्वाय ॥ १५ ॥

वस्त्रेण हि जलादीनि पूयन्त इति तस्य पवित्रत्वं ॥ १५ ॥

स्थूलशाटीदानं विधत्ते ।

वरासी नेष्टुरनुलम्बेव ह्येषा होत्रा ॥ १६ ॥

कार्ष्मासापेक्षया हीना हस्तत्रया निर्म्मिता सेयम्वरासी प्रस्थितयाज्या प्रभृतिषु प्रयोगविशेषेषु नेष्टुरनुलम्बेव पश्चालम्बन इव भाषते हि यस्मादेषा वरासी होत्रा होतुर्नेष्टुः सम्बन्धिनी अत्र सूत्रकारः वासः पोतुरिति कार्ष्मासं स्याद्वरासी नेष्टुरिति चौमी स्यादिति ॥ १६ ॥

स्थूलस्य यवपूर्णस्य शकटस्य दानं विधत्ते ।

स्थूरियवाचितमच्छावाकस्य स्थूरिरिव ह्येषा

होचाथोनिर्व्वरुणत्वायैव यवा न वै तर्हि सदस्यां दक्षिणा अभ्यभवन्नथो अस्य त एव तेनाभीष्टाः प्रीता भवन्ति ॥ १७ ॥

होता होमहेतोरच्छावाकस्य सम्बन्धिनी एषा शकट-प्रतिग्रहक्रिया स्थूरिरिव हि पूर्व्वोक्तवस्त्रप्रतिग्रहाद्यपेक्षया स्थूलेव दृश्यते हि शकटस्य प्रौढत्वात् अथोऽपिच शकटस्थिता यवाः निर्व्वरुणत्वाय वरुणाक्रतवाधपरिहाराय सम्पद्यन्ते कथमिति चेत्तदुच्यते तर्हि तस्मिन् काले दक्षपेयक्रतुप्रवृत्तेः पुरा तत्तेयवाः अस्मामच्छावाकाय प्रतिग्रहक्रियायां दक्षिणा अभिलक्ष्य न वै अभवन् क्रत्वन्तरेषु यवानां दक्षिणायोग्यत्वन्नासीदित्यर्थः अथो अनन्तरमेतत् क्रत्वनुष्ठानवेलायामस्य यजमानस्य तएव यवाः तेन दानेन अभीष्टाः अभिगताः इषु-गताविति धातुः प्रीताः वरुणस्य प्रीतिहेतवो भवन्ति यवानां वरुणप्रियत्वं मन्त्रब्राह्मणयोरवगम्यते यवोसि धान्य-राजस्त्वं वारुणोमधुसंयुतः इति मन्त्रः वारुणं यवमयञ्चरुमिति ब्राह्मणं तस्माद्यवदानेन वरुणाक्रतोपद्रवपरिहारोयुक्तः ॥ १७ ॥

बलीवर्ददानं विधत्ते ।

अनड्वानग्नीधोयुनक्ति ॥ १८ ॥

अनड्वान् बलीवर्दो ज्ञेयः शकटं वहति अग्नीधदृत्विगेव नामक

ऋत्विगपि यज्ञं वहति अतः साहस्राद्यज्ञस्य युक्त्यै योगायानड्वुहोदानं ॥ १८ ॥

अजदानं विधत्ते ।

अजः सुब्रह्मण्यायै ॥ १९ ॥

सुब्रह्मण्यायै सुब्रह्मण्यस्य छागोयोग्यः ॥ १९ ॥

स्त्रीपुरुषयोगयोर्गवोदानं विधत्ते ।

वन्मतर्य्युन्नेतुः साण्डः स्तिवत्सो ग्रावस्तुतोमिथुनत्वाय ॥ २० ॥

अत्यन्ततरुणीगौर्वत्सतरी साण्डोलक्ष्यमाणाण्डयुक्तः स्तिवत्सः संवत्सरत्रयवयोयुक्तः ॥ २० ॥

गर्भिणीनां गवां दानं विधत्ते ।

द्वादशपष्ठौह्यो गर्भिण्यो ब्रह्मणो द्वादशमासाः संवत्सरः संवत्सर एव प्रतितिष्ठत्यथ यद्गर्भिण्यो वाग्वै धेनुर्मन्त्रो गर्भो वाचैवास्य मन्त्रं दधात्यामन्त्रणीयो भवत्यथ यद्वेनुभक्ष्या द्वादश पयाꣳसि तान्येवास्मिन् दधाति तस्मादाजः पयस्वी राजा पुण्य इति ॥ २१ ॥

पष्ठौह्यः प्रथमगर्भोपेता तस्यैवार्थस्य वैराज्याय गर्भिण्य इत्यनुवादः द्वादशसंख्यया क्रतोरपि संवत्सरे यजमानः प्रति-

तिष्ठति अथानन्तरं यदु यदपि गर्भिणीत्वमस्ति तद्दते यजमानस्य प्रतिग्रहीतुर्वा वाचि मन्त्रं स्थापयति धेनोर्वायूपत्वाद्गर्भस्य मन्त्ररूपत्वात् आमन्त्रणीयः पूजार्थं सर्वैरन्वेषणीयो भवति अथानन्तरं यज्ञेनुभव्यान्या एताधेनुश्रेष्ठाः द्वादशसंख्याकाः सन्ति ताभिर्द्वादशविधानि तान्येव पयांसि तत्तन्मांसभेदादीषद्भिन्नरसानि क्षीराण्येव यजमाने सम्पादितानि भवन्ति तस्मादेवम्बिधफलोपेतत्वाद्यजमानं प्रति लौकिका एवमाहुः राजसूययाजी राजा पयस्वी प्रशस्तपयाः पुण्यः पावन इति तदेतद्दानजातं शाखान्तरेष्वाम्नातं प्राकाशावद्व्यर्थवे ददाति स्रजमुद्गाते रुक्मं होत्रेऽश्वं प्रस्तोत्प्रतिहर्तृभ्यां द्वादश षडौक्षो ब्रह्मणे वशां मैत्रावरुणाय ऋषभं ब्राह्मणाच्छंसिने वाससी नेष्टृपोतृभ्यां स्थूरियवाचितमक्षावाकायानडाहमग्नीध इति ॥ २१ ॥

इति तारण्डमहाब्राह्मणे अष्टादशाध्यायस्य

नवमः खण्डः ।

अथ दशमः खण्डः ।

उक्तावभिषेचनीयदशपेयौ, तत ऊर्द्धं केशवपनीयः, कर्त्तव्यः पत्नस्तस्मिन्नेव, केशवपनीयेन यजेतेति अभिषेचनीयदशपेयकेशवपनीयानां केचिद्धर्मा अस्मिन् षण्डे सूयन्ते, तत्राभिषेचनीया-

गतानां सम्भार्याणां सान्नाच्च स्तुतिं वक्तुमादौ तावद्दोषमुपन्यस्यति ।

यो वै सवादेति नैनꣳ सव उपनमत्यथ यः सामथ्य एति पापीयान् सुषुवाणो भवति ॥ १ ॥

सवशब्दोऽभिषेकं तद्युक्तं क्रतुं व्याचष्टे सवनमभिषेचनं सवः सूयते अभिषिच्यते यत्र स सव इति द्वेधा व्युत्पन्नत्वात् योवै पुमान् स ꣳ वादेति अभिषेकादपगच्छति एनमभिषेकरहितं पुमांसं सवोऽभिषेकयुक्तः क्रतुर्नोपनयति न प्राप्नोति पूर्व्ववेदपरीत्येन सत्यभिषेके यद्यपि सामथ्योऽपगच्छति तदा सुषुवाणोऽभिषेकं कुर्व्वन्नपि सामरहित्येन शास्त्रीयात् न्यूनभावादसौ पापीयान् भवति ॥ १ ॥

उपन्यस्तदोषं परिहर्त्तुं पूर्व्वोक्तं सम्भार्याणां विधिमनुवर्त्तति ।

सम्भार्या भवन्ति पृष्ठान्येव ताभिर्य्युनक्ति ॥ २ ॥

पूर्व्ववद्व्याख्येयं ॥ २ ॥

सम्भार्याणां पृष्ठरूपत्वे सम्पादिते सति पृष्ठस्तोत्रेषु सामसद्भावात् सामान्यपि सम्पादितानि स्युरित्येतदाह ।

एतानि वाव सामानि यत् पृष्ठानि ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

दोषपरिहारं दर्शयति ।

यत् संभार्या भवन्ति तदेव सामभ्यो नैति ॥ ४ ॥

सम्भार्याणामनुष्ठानं यदस्ति तदेव तेनैवार्यं सामभ्यो नाप-गच्छति साम्नां सम्पादितत्वात् ततः शास्त्रीयएवाभिषेक इत्यर्थः ॥ ४ ॥

सामविशेषं प्रशंसति ।

यानि देवराज्ञाः सामानि तैरमुष्मिन् लोक ऋद्ध्नोति यानि मनुष्यराज्ञान्तैरस्मिन्नुभयोरनयोर्लोकयोर्ऋद्ध्नोति देवलोके च मनुष्यलोके च ॥ ५ ॥

देवेषु मध्ये ये राजसूयेनेष्टवन्तस्ते देवराजानः तैर्यानि दृष्टानि तानि देवराज्ञां सामानि सैन्धुक्षितं दैर्घश्रवसम्यार्यं काक्षीवतमित्यादीनि तैः स्वर्गसमृद्धिर्भवति मनुष्येषु मध्ये ये राजसूयेनेष्टवन्तः क्षत्रियर्षयस्ते मनुष्यराजानस्तैर्दृष्टानि मनुष्यराज्ञां सामानि दैवोदासं वाध्र्यश्वं वैतहव्यमित्यादीनि तैर्मनुष्यलोके समृद्धिः उभयोरित्यादिरुक्तस्यैवोपसंहारः यो वै सवादेतीत्यादिकं शाखान्तरेऽप्येवमेवान्नातं ॥ ५ ॥

साम्नां संख्यां तदुपयुक्तमुपोद्घातमाह ।

साम त्रिष्टुभ्यध्यभिषिच्यते वीर्यं वै सामत्रिष्टुप् वीर्य एवाध्यभिषिच्यते ॥ ६ ॥

सामरूपा त्रिष्टुप् सामत्रिष्टुप् तत्राधित्रितो राजाभिषि

क्षते सामत्रिष्टुभः प्रयोगे सत्यभिषिञ्चेदित्यर्थः त्रिष्टुभो वीर्यत्वं सर्ववेदप्रसिद्धं अतो वीर्ये एवाभिषिक्तो भवति ॥ ६ ॥

संख्यासामान्येन साम्नां त्रिष्टुप्त्वोपचारं दर्शयति।

एकादश राजसामानि भवन्त्येकादशाक्षरा त्रिष्टुबोजोवीर्यं त्रिष्टुबोजस्येव वीर्येऽध्यभिषिच्यते ॥ ७ ॥

वीर्यशब्दस्यैवौजइति व्याख्यानं स्पष्टमन्यत् ॥ ७ ॥

अभिषेचनीये त्रिवृत्स्तोमराहित्यं प्रशंसति।

यत् त्रिवृतमभिषेचनीये कुर्युर्ब्रह्म क्षत्रायापि दध्युर्यत्त्रिवृतमुद्धरन्ति ब्रह्म तत् क्षत्रादुद्धरन्ति तस्माद्धरतां प्रतिदण्डा ब्राह्मणा नहि तं त्रिवृतमभिषेचनीये कुर्वन्ति ॥ ८ ॥

यद्यपि त्रिवृत्स्तोमसुद्गातारोऽभिषेचनीये क्रतौ कुर्युः तदानीं क्षत्राय राज्योत्कर्षार्थं ब्रह्म ब्राह्मणजातिं अपि दध्युः आच्छादयेयुः त्रिवृत्स्तोमो ब्राह्मणजातिस्वरूपः तयोः प्रजापतिमुखजत्वसाम्यात् तथा सति राजक्रतौ प्रधानभूते त्रिवृत्स्तोमस्याङ्गत्वेन ब्राह्मणजातेरवज्ञा स्यात् यद्यपि त्रिवृत्स्तोममभिषेचनीयादुद्धरन्ति तत्र न प्रयुञ्जते तत्तेन प्रयोगाभावेन ब्रह्म ब्राह्मणजातिं क्षत्रादुद्धरन्ति क्षत्रियजातावनन्तर्भाव्य तद्रक्षां परिहरन्ति यस्मादुब्राह्मणजातेर्नीचत्वं परिहृतं तस्माल्लोके भरतां भरत्वं कुर्वतां क्षत्रियाणां प्रतिदण्डा भवन्ति धनापहा-

रादिना राजभिर्दण्ड्यमाना निन्दाशापादिना राजसु प्रतिकूलदण्डयुक्ता भवन्ति न खलु तेभ्यो बिभ्यति हि यस्मात्कारणात्ते ब्राह्मणा अभिषेचनीये विट्सोमन्न कुर्वन्ति तस्माद्भयराहित्यमुपपन्नं ॥ ८ ॥

विषु क्रतुषु सोमव्यवस्थां दर्शयति ।

एकविंशोऽभिषेचनीयस्योत्तमः सप्तदशो दशपेय एकविंशः केशवपनीयस्य प्रथमः क्षत्रं वा एकविंशो विट् सप्तदशः क्षत्रेणैवास्मै विशमुभयतः परिगृह्यात्यनपक्रामुकास्माद्विट् भवति ॥ ९ ॥

अभिषेचनीयस्य द्वात्रिंशः पवमानाः पञ्चदशान्याज्यानि सप्तदशानि पृष्ठान्येकविंशोऽग्निष्टोमः सोकथः एवं सत्येकविंशस्तोम उत्तमो भवति दशपेयेषु स्तोमाः सर्वेऽपि सप्तदशा एव केशवपनीये त्वेकविंशं प्रातःसवनं सप्तदशं माध्यन्दिनं सवनं पञ्चदशं तृतीयसवनं सोकथं सरात्रिकं विट्सम्बन्धिकं एवं सत्येकविंशः प्रथमो भवति सोऽयमेकविंशस्तोमः क्षत्रं वै वीर्यावधिकेन क्षत्रियजातिस्वरूप एव सप्तदशस्तोमस्तु विट्स्वरूपा क्षत्रियेण रक्षणीयायाः प्रजायाः स्वरूपं तत्र पूर्वोत्तरभाविनोरभिषेचनीयकेशवपनीययोः क्रमेणावसाने उपक्रमे चैकविंशस्तोमोयोऽस्ति यश्च मध्यभाविनि दशपेये सप्तदशस्तोमोऽस्ति तेषामेकविंशद्वयसप्तविंशस्तोमानुष्ठानेनास्मै यजमानार्थं मध्यवर्त्तिनीं सप्तदशस्तोमरूपां विशं प्रजां उभयतः पूर्वोत्तरक्रत्वोरवस्थितेनैक-

विंशस्तोमरूपेण वज्रेणैव परिगृह्णाति परिपालयतीत्यर्थः; तथा सति विट् प्रजा अस्माद्यजमानादनपक्रामुका कदाचिदप्यपक्रमशीला न भवति ॥ ९ ॥

इदानीं केशवपनं विधत्ते।

यद्वै राजसूयेनाभिषिच्यते तत् स्वर्गं लोकमारोहति स यदिमं लोकन्नोपावरोहेदति जनं वा गच्छेदुद्वा माद्येद्यदेषोऽर्वाचीनः स्तोमः केशवपनीयो भवत्यस्य लोकस्यानुद्घानाय यथा शाखायाः शाखामालम्भमुपावरोहेदेवमेतेनेमं लोकमुपावरोहति प्रतिष्ठायै ॥ १० ॥

यद्वै यस्मिन्नेव काले यजमानो राजसूयतेनाभिषेचनीयक्रतोरभिषेकेण युक्तो भवति तत्तस्मिन्नेव काले स्वर्गं लोकमारोहति प्राप्तइव भवति स यजमानो यद्यदि भूलोकं प्रति स्वर्गादवरोहणान्न कुर्य्यात् तदानीञ्चनं वातिगच्छेत् स्वकीयं बन्धुवर्गमपरित्यज्य यत्र क्वापि पलायिता वा भवेत् उन्मादेद्वा बन्धुवर्गे स्थित एव सन् भ्रान्तिं वा प्राप्नुयात् तस्मात् स दोषः परिहर्त्तव्यः; कथं परिहार इति चेत् तदुच्यते यद्यदि एषोऽनन्तरं करिष्यमाणः केशवपनीयः क्रतुरर्वाचीनः स्तोमो भवति एकविंशमारभ्य त्रिवृति समाप्यमानत्वादर्वाचीनस्तोमत्वं एतदीयानुष्ठानं स्वर्गात् प्रत्यवरोहणमिव वर्त्तत इति भूलोकस्यानुद्घानाय अत्यन्तं परित्याग उद्घानन्तद्राहित्यार्थं भवति

यथा लोके वृक्षमारुरुक्षोपरितनवर्त्तिन्याः शाखायाः काञ्चिदधोवर्त्तिनीं शाखामालम्बमाधारं कृत्वा अथ वाणमुत्सन्नोऽयं शब्दः आलम्ब्यालम्ब्य भूमावुपावरोहेत् एवमेतेन केशवपनीयेन प्रतिकूलस्रोमयुक्तेन भूलोकमुपारूढो भवति अतोऽयं केशवपनीयः प्रतिष्ठार्थं सम्पद्यते ॥ १० ॥

इति ताण्ड्यमहाब्राह्मणे अष्टादशाध्यायस्य दशमः खण्डः ।

अथ एकादशः खण्डः ।

अथ पूर्वोक्तक्रतुगतसामविशेषस्तुतिर्व्युष्टिद्विरात्रविधिश्चोच्यते, तत्रादौ आयन्तीयं साम स्तौति ।

इन्द्रोवृत्रमहन् स विष्यङ्वीर्य्येण व्यभ्वृश्यत स एतच्छ्रायन्तीयमपश्यत्तेनात्मानꣳ समश्रीणादिन्द्रियेण वा एष वीर्य्येण व्यृध्यते यो राजसूयेनाभिषिच्यते वृत्रꣳ हि हन्ति यच्छ्रायन्तीयं ब्रह्मसाम भवति पुनरेवात्मानꣳ सꣳश्रीणाति ॥ १ ॥

इन्द्रः त्वाष्ट्रं वृत्रं हत्वा अष्टवीर्य्यमात्मानं आयन्तीयेन साम्ना समश्रीणात् समस्करोत् सर्व्वतोभृष्टं वीर्य्यं समाहितवान् तद्वृत्रोऽपि राजसूययाजी पुमानिन्द्रियगतसामर्थ्येन विमुच्यते

हि यस्मात् कारणात् वृत्रस्वरूपभूतं पापं हन्ति तस्माद्वीर्य्य-वियोगः सम्भावितः यदि ब्रह्मणस्पतिरिद्र आयन्तीयनामकं साम भवेत् तदानीं पुनरेवात्मानं राजसूययाजी संश्रीणाति समादधाति इन्द्रियवीर्य्यसमृद्धिं लभत इत्यर्थः ॥ १ ॥

यज्ञायज्ञीयं साम स्तौति ।

यज्ञायज्ञीयमनुष्टुभि भवति वाचा वा एष ह्राध्यते यो राजसूयेनाभिषिच्यते वृत्रं हि हन्ति वागनुष्टुब्वाचोरसो यज्ञायज्ञीयं वाच्येवास्य रसं दधाति ॥ २ ॥

अनुष्टुभि पुरोजितीव इत्यस्यामृचि यज्ञायज्ञीयाख्यं साम गातव्यं कुत इति चेत्तदुच्यते राजसूयेनाभिषिक्तः पुमान्मत्स्वरूपया वाचा वियुज्यते वृत्रवधस्य सङ्गावात्तस्य पापस्यायं परिहारः अनुष्टुभो वाग्विशेषत्वाद्वाग्रूपत्वं तस्या वाचो यज्ञायज्ञीयाख्यं साम रसः सारं तेनाधिकफलजननात् तस्मादेतत्सामगानेनास्य यजमानस्य वाचि सारं स्थापयत्येव ॥ २ ॥

वारवन्तीयं साम प्रशंसति ।

वारवन्तीयमग्निष्टोम साम भवतीन्द्रियेण वा एष वीर्य्येण ह्राध्यते यो राजसूयेनाभिषिच्यते वृत्रं हि हन्ति यद्वारवन्तीयमग्निष्टोम साम भवतीन्द्रियस्य वीर्य्यस्य परिगृहीत्यै ॥ ३ ॥

अग्रवन्त्वा वारवन्तमित्यस्याभ्युत्सन्नं साम वारवन्तीयं तत्सामगानेन वियुक्तस्येन्द्रियसामर्थ्यस्य परिग्रहो भवति ॥ ३ ॥

सामस्तुतिमुपसंहरति ।

अश्रयन्वाव श्रायन्तीयेनावारयन्त वारवन्तीयेनेन्द्रियस्य वा एषा वीर्य्यस्य परिगृहीतिः ॥ ४ ॥

श्रायन्तीयसाम्ना नष्टं वीर्य्यं पुनरश्रयन् प्राप्नुवन् वीर्य्यवियोगं वारवन्तीयसाम्ना निवारितवन्तः तस्मादेषा सामद्वयस्यानुष्ठितिरेवेन्द्रियसामर्थ्यस्य परिगृहीतिर्भवति एतदेवाभिप्रेत्य शाखान्तरे शब्दद्वयनिर्व्वचनं कृतं यदश्रयन् तच्छ्रायन्तीयस्य श्रायन्तीयत्वं यद्वारयन् तद्वारवन्तीयस्य वारवन्तीयत्वमिति ॥ ४ ॥

अथ व्युष्टिद्विरात्रं विधत्ते ।

अप्रतिष्ठितो वा एष यो राजसूयेनाभिषिच्यते यदा वा एतेन द्विरात्रेण यजतेऽथैव प्रतिष्ठा ॥ ५ ॥

अभिषेकेण केवलं पाप्मानं हन्ति न पुनः प्रतिष्ठां लभते कदास्य प्रतिष्ठेति चेत् उच्यते यदा वै यस्मिन्नेव काले एतेन पुरतोवक्ष्यमाणेन द्विरात्राख्येन क्रतुना यजते अथैव तदानीमेव प्रतिष्ठा भवति यथा पादद्वयेन पुरुषस्य प्रतिष्ठा तथा द्विरात्रेणेत्यर्थः ॥ ५ ॥

तामेतां प्रतिष्ठासुपपादयति ।

यावन्ति संवत्सरस्याहोरात्राणि तावत्य एताः स्तोत्रीयाः संवत्सरएव प्रतितिष्ठति ॥ ६ ॥

एकसंवत्सरस्य षष्ट्यधिकशततयमहानि रात्र्यश्च तावत्यस्तदुभयसम्मिलित्वा विंशत्यधिकसप्तशतानि भवन्ति द्विरात्रक्रतौ स्तोत्रीया ऋचोऽपि संख्यया तावत्यएव सम्पद्यन्ते अतः संवत्सरसाम्यात् द्विरात्रानुष्ठानेन संवत्सररूपे काले प्रतितिष्ठत्येव स्तोत्रीयाणामृचां संख्या कथमिति चेत् सेयं द्विरात्रकल्पे पर्य्यालोच्य प्रथमेऽहन्यग्निष्टोमरूपे यानि द्वादशस्तोत्राणि द्वितीयेऽहन्यतिरात्ररूपे यान्येकोनविंशस्तोत्राणि तेषु सर्व्वेषु विहितान् स्तोमविशेषानालोच्य द्रष्टव्या, शाखान्तरेऽप्ययमर्थः सर्व्वोऽप्येवमेवाम्नातः अप्रतिष्ठितो वा एष इत्याद्यः यो राजसूयेन यजत इति यद्वा वा एतेन द्विरात्रेण यजतेऽथैव प्रतिष्ठा अथ संवत्सरमाप्नोति यावन्ति संवत्सरस्याहोरात्राणि तावत्य एताः स्तोत्रीयाः अहोरात्रेष्वेव प्रतितिष्ठतीति ॥ ६ ॥

द्विरात्रावयवाहर्विशेषौ विधत्ते।

अग्निष्टोमः पूर्वमहरतिरात्र उत्तरन्तानेवाहोरात्रयोः प्रतितिष्ठति ॥ ७ ॥

एकेनाह्ना निष्पाद्यः सोमयागोऽहःशब्देनोपलक्ष्यते तच्च प्रथममहरग्निष्टोमरूपं उत्तरन्त्वहरतिरात्ररूपं एतयोर्द्विविधयोरहोरनुष्ठितत्वादहनि रात्रौ च तत्तदुचितभागेन विविधप्रतिष्ठोपपद्यते ॥ ७ ॥

अस्य द्विरात्रस्य विकल्पेन त्रीन् कालान् विधत्ते।

अमावास्यायां पूर्वमहरुदिष्ट उत्तरन्नानैवार्द्धमासयोः प्रतितिष्ठति पौर्णमास्यां पूर्वमहर्व्यष्टकायामुत्तरन्नानैवमासोः प्रतितिष्ठति तदार्द्ध्यै एव समानपक्षे पुण्याहनी स्यातां तयोरेव कार्यꣳ सम्पद्ध्यै ॥८॥

उदिष्टशब्देन शुक्लप्रतिपदुच्यते उत्तरोत्तरोत्कर्षेण चन्द्रदर्शनस्य तत्रोपक्रमात् अमावास्यायामग्निष्टोमः अनन्तरभाविन्यां शुक्लप्रतिपद्यतिरात्रः सोऽयमेककालः अत्र पौर्णमास्यन्तोमास इत्यमुं पक्षमाश्रित्याभिधीयमानत्वादमावास्याशुक्लप्रतिपदोर्भिन्नयोरर्द्धमासयोर्व्वर्त्तमानौ द्वौ दिवसौ तयोरनुष्ठायार्द्धमासद्वये प्रतितिष्ठति व्यष्टका कृष्णप्रतिपत् तदाह सूत्रकारः व्यष्टकायामुत्तरमिति तामिस्रप्रथमात्तिस्रो व्यष्टका इति पौर्णमासी कृष्णप्रतिपदादौ तन्मासगतौ दिवसौ तयोरनुष्ठाय मासद्वये प्रतितिष्ठति सोऽयं द्वितीयः कालः तत्र व्यूढिद्विरात्रविषये किञ्चिदूचुस्तावादिनः आहुः एकस्मिन्नेव शुक्लपक्षे ये द्वे निरन्तरे ज्योतिःशास्त्रप्रसिद्धे पुण्यदिने स्यातान्तयोरेव द्विरात्राख्यं कर्म्म कार्य्यं एकस्य कर्म्मणः एकस्मिन्नेव मास एकस्मिन्नेव पक्षेऽनुष्ठानमुचितं ततस्तत्सम्पद्ध्यै सम्पद्यते सोऽयं तृतीयः कालः ॥ ८ ॥

अथास्मिन् कर्मणि शङ्कितदोषपरिहाराय सामद्वयं विधातुमादौ दोषशङ्कामुद्भावयति।

अपशव्यो द्विरात्र इत्याहुर्द्वे ह्येते छन्दसी गायत्रञ्च त्रैष्टुभञ्च जगतीमन्तर्यन्तीति न तेन जगती कृता यत्तृतीयसवने क्रियते ॥ ९ ॥

अहर्गणेषु प्रथममहर्गायत्रं द्वितीयं त्रैष्टुभं तृतीयञ्जागतमिति स्थितिः तथाच तैत्तिरीयाः सप्तमकाण्डे गायत्रो वा ऐन्द्रवायव इति अस्मिन्ननुवाके समामनन्ति गायत्रं प्रायणीयमहस्त्रैष्टुभं द्वितीयमहर्ज्जागतं तृतीयमहरिति एवञ्च सति द्विरात्रक्रतौ तृतीयस्याह्नोऽसम्भवाद्विनद्वये गायत्रञ्च त्रैष्टुभञ्चेति एते द्वे एव छन्दसी सम्पन्ने जगतीमन्तर्यन्तीति अन्तरितां परित्यक्तां कुर्व्वन्ति सा च जगती पशुसाधनभूता अत एव शाखान्तरे सोमहरणविषय उपाख्याने जगत्याः पशव्यत्वमामनन्ति सा पशुभिश्च दीक्षया चागच्छत् तस्माज्जगतीच्छन्दस्का वशव्यतामेति दृष्ट्या जगत्या राहित्येन द्विरात्रोऽयमपशव्य इत्येवं दोषं ब्रह्मवादिन आहुः, ननु तृतीयसवने जगती विद्यते आर्भवान्यस्य जागतत्वादिति चेत् मैवं यद्यप्यङ्ग एकदेशे तृतीयसवने जगती क्रियते तथापि तावन्मात्रेण तस्याहोऽप्यहनि जगती कृता न भवेत् तृतीयस्याह्न एव कात्स्न्र्येन जागतत्वं तच्चाहर्द्विरात्रे नास्ति तस्माज्जगत्या अन्तरायत्वादवश्य एव ॥ ९ ॥

अस्य दोषस्य परिहारं दर्शयति।

यदा वा एषाहीनस्याहर्भजते साङ्गस्य वा सवन-

मथैव जगती कृता वैशोकमुत्तरस्याह्नो ब्रह्मसाम भवति वैखानसमछावाकसाम यच्छुक्रिये सवने क्रियेते तेनैव जगती कृता तेन पशव्यः ॥ १० ॥

यदा वै यस्मिन्नेव काले एषा जगती अहीनसंज्ञकस्य द्विरात्रादेः सम्बन्धि कृत्स्नमहर्भजते तदानीमहनि जगती कृतेति वक्तुं शक्यते नान्यथा एकेनाह्ना सह वर्त्तन इति साह्न एकाहः तस्य वा प्रातःसवनमाध्यन्दिनसवनयोरन्यतरत्सवनं जगती भजते तदापि जगती कृतेति वक्तुं शक्यते साह्नत्वन्तु द्विरात्रस्य नास्ति तस्मात् केनचित् प्रतिनिधिना जगतीकरणं सम्पादनीयं को.सौ प्रतिनिधिरिति चेत् उच्यते द्विरात्रगतस्योत्तरस्याह्नो ब्रह्मसाम वैशोकं भवति ब्रह्माणमुद्दिश्य गीयमानं ब्रह्मसाम विश्वाः एतना इत्यस्यां जगत्यामुत्पन्नं साम वैशोकं तथैवाछावाकमुद्दिश्य गीयमानमछावाकसाम वैखानसनामकं भवति न किञ्चं कर्म्मणानशदित्यस्यां बृहत्यामुत्पन्नं साम वैखानसं सा च बृहती प्रथमपादव्यतिरिक्तेषु पादेषु चतुर्णामक्षराणामभ्यासाज्जगती सम्पद्यते एते उभे सामनी यदि शुक्रिये सवने ऋजीषव्यतिरिक्तैः सोमांशुभिरभिनिष्पन्ने शुक्रशब्दवाच्यसोमरसोपेते माध्यन्दिने सवने क्रियेते तेनैव सामद्वयकरणेन द्विरात्रे जगती कृता स्यात् तेन जगतीकरणेन द्विरात्रः पशव्यो भवति सोऽयं दोषपरिहारः ॥ १० ॥

अथास्य द्विरात्रस्य संज्ञानुगुणं फलं दर्शयति।

व्युष्टिर्वा एष द्विरात्रो व्येवास्मै वासयति ॥ ११ ॥

अस्य द्विरात्रस्य व्युष्टिरिति संज्ञा ततोऽस्मै यजमानायायं द्विरात्रः स्वकीयसंज्ञानुसारेण विवासयति तमसः पाप्मनोऽपनयनेनप्रकाशं करोति व्युष्टिद्विरात्रादूर्द्धं चतस्र ष्टतिरग्निष्टोमः काये: तत्र स्तुतं तस्मिन्नेव पूर्व्वपक्षे चतस्र ष्टतिना यजेतेति ॥

वेदार्थस्य प्रकाशेन तमोहार्द्दन्निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ ११ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे अष्टादशाध्यायस्य एकादशः खण्डः।

अष्टादशाध्यायः समाप्तिमगमत्।

ऊनविंशोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निःश्वसितं वेदा योवेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

उक्ता राजसूयसम्बन्धिनः सर्वे यज्ञाः पवित्राख्याग्निष्टोमाभिषेचनीयदशपेयकेशवपनीयव्युष्टिद्विरात्रचतस्र इत्यादयः ।

एकोनविंशे द्वन्द्वानां क्रतूनामुपदर्शिताः ।
द्वन्द्वाश्च केचिद्देवानां न द्वन्द्वाः सकला अपि ॥

अत्र निदानं अथैते द्वन्द्वा इत्याचक्षते न ते सर्वे द्वन्द्वाः द्वन्द्वमिश्रास्तु भवन्ति यौ यावेषां समानकर्तृत्वमुपलक्षतौ तौ द्वन्द्वौ भवत इति, आदौ तावद्राडित्येव नामकं क्रतुमाह ।

अथैषराट् ॥ १ ॥

उच्यत इति शेषः, राज्यहेतुत्वाद्राडित्येतत्तस्य नाम भवति ॥ १

तस्य फलमाह ।

योराज्य आग्ग्ं समानोराज्यन्न प्राप्नुयात् स एतेन यजेत राजैवैनग्ं राजानं करोति तन्नु वैरा-

जेति वदेयुर्यꣳ राजा राजानꣳ कुर्य्याद्राजैवैनꣳ राजानꣳ करोति ॥ २ ॥

यः पुमान् राज्ये विषयभूते सन्यासं समानाभिलाषं कुर्व्वन् केनचित् प्रतिबन्धेन राज्यन्न प्राप्नुयात् स पुमान् राज्यप्राप्त्यर्थमेतेन राट्शब्दाभिधेन क्रतुना यजेत तदानीं राजैव क्रत्वन्तराणां राजभूत एवायं क्रतुरेनं राजानं करोति यद्वा राजैव राडित्येतन्नामकेन क्रतुनैवैनमृत्विक्संघः राजानं करोति यं क्रतुना राजानं कुर्य्यात् तमेवैनमविवादेन सर्व्वजना विवदेयुः इतरेष्वपि राज्यं कुर्व्वत्स्वपि राजत्वव्यवहारं न कुर्व्वन्ति तेषामेतदीयभूत्यत्वात् युक्तश्चैतत् क्रतुनैव राजत्वस्य प्राप्तत्वात् ॥ २ ॥

इतरक्रतुभ्योऽस्मिन् राजि क्रतौ को विशेष इत्याशङ्क्याह ।

छन्दोऽन्ये यज्ञाः सम्पद्यन्ते स्तोममेषवीर्य्यं वै स्तोमोवीर्य्य एवाध्यभिषिच्यते ॥ ३ ॥

अन्ये यज्ञाः सङ्घसादयः छन्दोमात्रं बृहत्यादिकं प्राप्नुवन्ति एष तु राट् छन्दसां सङ्घं प्राप्नोति सङ्घस्य चैकैकस्मादधिकं वीर्य्यं प्रसिद्धं ॥ ३ ॥

अस्य राजः क्रतोः स्तोमप्राप्तिं दर्शयति ।

अष्टावेकविꣳशाः सꣳस्तुतो भवत्यष्टौ वै वीरा-राड्ꣳ समृद्ध्यच्छन्ति राजभ्राता च राजपुत्रश्च पुरोहितश्च महिषी च सूतश्च ग्रामणी च क्षत्ता च संग्र-

हीता चैते वै वीरा राष्ट्रꣳ समुद्यच्छन्त्येतेष्वेवाध्यभिषिच्यते ॥ ४ ॥

एकविंशतिसंख्याकाभिः स्तोत्रीयाभिर्निष्पन्नाः स्तोमा एकविंशाः ते चाष्टसंख्याका अस्मिन्नाजि विद्यन्ते तैरष्टभीराट् सम्यक् स्तुतो भवति तथा हि तयः पवमानाः सप्तदशस्तोमोपेतास्तत्रैकपञ्चाशत्स्तोत्रीया भवन्ति ५१ आज्यस्तोत्राणि चत्वारि त्रिवृत् स्तोमयुक्तानि त्रिवृत्स्तोमस्य चैकस्य नवस्तोत्रीयास्तस्माद्राज्येषु षट्त्रिंशत्संख्याकाः स्तोत्रीया भवन्ति ३६ चत्वारि पृष्ठस्तोत्राणि पञ्चदशस्तोमयुक्तानि तस्य स्तोमस्य चैकस्य पञ्चदशस्तोत्रीयाः तस्मात् तत्पृष्ठेषु षष्टिसंख्याकाः स्तोत्रीया भवन्ति ६० ताः सर्वा मिलित्वा सप्तचत्वारिंशदधिकं शतं स्तोत्रीयाः सम्पद्यन्ते १४७ तास्त्वेकविंशतिसंख्यया विच्छेदिताः सप्तसंख्याकाः एकविंशस्तोमाः सम्पद्यन्ते चरमस्तोत्रे स्तुतएवैकविंशः स्तोमो विच्छितः एवमस्मिन्नाजि सर्वे पृष्ठसंख्याका एकविंशस्तोमा भवन्ति यथा वीराः पुरुषाः अष्टसंख्याका राष्ट्रं सम्यक् निर्वहन्ति एवमेते ऽष्टसंख्याका एकविंशस्तोमा राडित्येतन्नामकं क्रतुं सम्यक् निर्वहन्ति राजभ्रातादयस्त्वष्टौ वीरपुरुषाः तत्र भ्रातृपुत्रपुरोहितमहिष्यादयस्त्वारः प्रसिद्धाः सूतो रथपालः ग्रामणी ग्रामेषु योगक्षेमविचारकः क्षत्ता यष्टीको द्वारपालः संग्रहीता भाण्डागारस्य पालकः एतेषां राष्ट्रनिर्वाहकत्वं प्रसिद्धं अष्टसंख्याकैरेकविंशस्तोमैर्युक्तं राजक्रतुमनुतिष्ठन् तेष्वष्टसु वीरपुरुषेष्वभिषिक्तो भवति ॥ ४ ॥

एकविंशस्तोमप्रयुक्तं फलमाह ।

क्षत्रं वा एकविंशः प्रतिष्ठा क्षत्रस्येवास्य प्रकाशो भवति प्रतितिष्ठति य एवं वेद ॥ ५ ॥

योऽयमेकविंशस्तोमः सोऽयं प्रतिष्ठा प्रकृतस्य क्रतोः समाप्तिस्थानं अतोऽयमन्येषु स्तोमेषु क्षत्रं वै क्षत्रियजातिवत् स्तोमः राजएव तस्माद्यथा लोके क्षत्रस्य विप्रवैश्यजातिषु प्रकाशः शौर्यप्रसिद्धिरधिका एवमेवास्यैकविंशस्तोमस्यान्येषु त्रिवृदादिषु स्तोमेषु प्रकाशः प्रतिष्ठात्वप्रसिद्धिरस्ति यः पुमानेवं वेद सोऽयं धनधान्यादिभिः प्रतिष्ठां लभते ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य

प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

विराट्संज्ञकं क्रत्वन्तरं विधत्ते ।

अथैष विराडन्नाद्यकामो यजेत ॥ १ ॥

राट्संज्ञस्य क्रतोः कथनादनन्तरमेष वक्ष्यमाणविशेषो विराट्संज्ञकः क्रतुरुच्यते दशाक्षरोपेतेन विराट्छन्दसा सह संख्यासाम्यादेष क्रतुर्विराट्संज्ञकः तच्च साम्यमुत्तरत्र स्पष्टीभविष्यति तस्मिन् अन्नाद्यकामोऽधिकारी नतु सोमयागेषु प्रकृति-

भूतस्य ज्योतिष्टोमस्यापि संख्यासाम्याद्विराट्छन्दोरूपत्वमस्ति तथाच तैत्तिरीया आमनन्ति विराजमभिसम्पद्यते तस्मात्तज्ज्योतिरुच्यते इति एवमन्येष्वपि यज्ञेषु विराट्सम्पत्तिरस्ति तत्र श्रूयते नच तेषां यज्ञानां विराडिति संज्ञास्ति ॥ १ ॥

अस्य तु यज्ञस्य तेभ्योऽन्यः कोविशेषोविद्यते येन विराडिति संज्ञा स्यादित्याशङ्क्याह ।

परोक्षमन्ये यज्ञाविराजꣳ सम्पद्यन्ते प्रत्यक्षमेषविराजꣳ सम्पन्नः ॥ २ ॥

ज्योतिष्टोमे द्वादशस्तोत्राणि तेष्वाद्यस्य बहिष्पवमानस्तोत्रस्य त्रिवृदाख्यस्तोमो भवति तस्मिंश्च स्तोमे नव स्तोत्रीयाः सन्ति चत्वार्याज्यस्तोत्राणि माध्यन्दिनपवमानस्तोत्रमेकं तेषु पञ्चसु प्रत्येकं पञ्चदशस्तोमार्थमावर्त्यमानेषु पञ्चसप्ततिस्तोत्रीया भवन्ति चत्वारि पृष्ठस्तोत्राणि आर्भवपवमानस्तोत्रमेकं तेषु प्रत्येकं सप्तदशस्तोमार्थमावर्त्यमानेषु पञ्चाशीतिसंख्याः स्तोत्रीया भवन्ति एकस्मिन् यज्ञायज्ञीयस्तोत्रे एकविंशस्तोमार्थमावर्त्यमाने सत्येकविंशसंख्याकाः स्तोत्रीया भवन्ति ताः सर्व्वा मिलित्वा नवत्यधिकं शतं सम्पद्यते तासु दशभिर्दशभिरेकैकसाहे सम्पादिते सति दशसंख्यया विराट्छन्दःसारूप्यं भवेत् तस्य साम्यं बुद्धिविशेषेण सम्पादनीयत्वात् परोक्षं अस्मिंस्तु क्रतौ प्रतिस्तोत्रमाम्नातानामेव दशानां स्तोत्रीयाणां व्यवस्थितत्वाद्विराट्सम्पत्तिः प्रत्यक्षा सोऽयमन्येभ्यो यज्ञेभ्योऽस्य विशेषः ॥ २ ॥

एतद्वेदनं प्रशंसति ।

प्रत्यक्षमेतेनान्नाद्यमवरुन्धेऽन्नादो भवति य एवं वेद ॥ ३ ॥

एतेन स्वतःसिद्धायाः विराट्सम्पत्तेर्वेदनेन प्रत्यक्षं यथा भवति तथाग्निनैव जन्मनि फलं भवति ॥ ३ ॥

प्रत्यक्षविराट्सम्पत्त्यर्थं प्रतिस्तोत्रं दशसंख्यां विधत्ते ।

सर्वोदशदशी भवति दशाक्षरा विराड् वैराजमन्नमन्नाद्यस्यावरुध्यै ॥ ४ ॥

तत्तदीयेषु स्तोत्रेषु योयः स्तोमो विद्यते स सर्वोदशदशी भवति प्रतिस्तोत्रं विवक्षितत्वाद्दशदशेति; सा प्रयुज्यते तादृशी दशसंख्या यस्मिन् सर्वस्मिन् स्तोमे विद्यते स सर्वोदशदशीत्युच्यते स प्रकारः स्तुवे द्रष्टव्यः; विराडाख्ये छन्दसि दशाक्षरत्वं प्रसिद्धं तेन छन्दसा साध्यत्वादन्नं वैराजं तस्मादियं संख्या भक्षितुं योग्यस्यान्नस्य प्राप्त्यै भवति ॥ ४ ॥

तामेतां दशसंख्यां समभागेन विभज्य प्रशंसति ।

ताउ पञ्च पञ्च भवन्ति पाङ्क्तोयज्ञः पाङ्क्ताः पशवो यज्ञ एव पशुषु प्रतितिष्ठति ॥ ५ ॥

दशत्वसंख्यायां साम्येन विभक्तायां पञ्चकद्वयं भवतीत्यभिप्रेत्य ता उ ता एव स्तोत्रीयाः पञ्चपञ्चेत्युच्यते पङ्क्तिछन्दस्कः पञ्च-

पादोपेतत्वाद्यजमानपञ्चमैश्चतुर्भिर्ऋग्भिरुपेतत्वात् पशूनाञ्च पुच्छसहितैश्चतुर्भिः पादैरुपेतत्वात्तच्छ्या पङ्क्तिसम्बन्धे सति तादृशे यज्ञे तादृशेषु पशुषु चार्यं यजमानः प्रतितिष्ठति अस्मिन् क्रतावन्नाद्यकामोऽधिकारी वर्णितः ॥ ५ ॥

इदानीं प्रतिष्ठाकाममधिकारिणमाह ।

एतेनैव प्रतिष्ठाकामो यजेत दशभिर्वा इदं पुरुषः प्रतिष्ठितोऽस्यामेव प्रतितिष्ठति ॥ ६ ॥

इदमस्मत्प्रत्यक्षं यथा भवति दशभिरेवाङ्गुलीभिः प्रतिष्ठितः पुरुषोऽस्मिन्नेव लोके धनधान्यादिभिः प्रतिष्ठितो भवति ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य
द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

औपशदाख्यं क्रतुं विधत्ते ।

अथैष औपशदः ॥ १ ॥

दशभिर्वातुर्ब्बिनाशार्थे वर्त्तते उपसंप्राप्तस्य प्रजोत्पत्तिप्रतिबन्धस्य विनाश उपशदः स यस्मिन् क्रतावस्ति सोऽयमौपशदः ॥ १ ॥

तस्य प्रजोत्पत्तिप्रतिबन्धविनाशात्तेन प्रजोत्पादनलक्षणं फलं दर्शयति।

गन्धर्वाप्सरसां स्तोमः प्रजाकामो यजेत गन्धर्वाप्सरसो वै मनुष्यस्य प्रजाया वा प्रजस्याया वेशते तेषामेव सोमपीथस्तान् स्वेन भागधेयेन प्रीणाति तऽस्मै तृप्ताः प्रीताः प्रजां प्रयच्छन्ति ॥ २ ॥

ये गन्धर्वा देवानां गायका याश्चाप्सरसो देवानान्नर्त्तक्यस्तेषां तासाञ्च स्तोमो यज्ञोऽयमौपगवाख्यः कृतः तेन स्वार्थेन दृष्टत्वात्तद्रूपत्वोपचारः एतेन क्रतुना प्रजाकामो यजेत अन्तरिक्षायतना गन्धर्वाप्सरस एव मनुष्यसम्बन्धिन्या उत्पाद्यायाः पुत्रपौत्रादिरूपायाः प्रजाया ईशते स्वामित्वेन वर्त्तते या च मनुष्याणामप्रजस्या प्रजोत्पादनसामर्थ्यराहित्यं तस्यापीशते वा शब्दौ समुच्चयार्थौ तेषां तेषां गन्धर्वाप्सरसरूपाणां देवानामत्राग्निष्टौपगवाख्ये क्रतौ सोमपीथः सोमपानं भवति ते हि तदृष्टे क्रतौ सोमं पिबन्ति तयोर्यजमानस्तान् देवान् स्वोचितेन भागेन तोषिते च देवाः सोमपाने तृप्ताः प्रीतिमापन्नाः प्रयच्छन्ति वा तस्मै यजमानाय पुत्रपौत्रादिरूपां प्रजां प्रयच्छन्ति ॥ २ ॥

तस्मिन् क्रतौ किञ्चिद्विशेषं विधत्ते।

एकैका स्तुतीयोपजायते प्रजामेवास्मा उपजनयति ॥३॥

विकृतरूपेऽस्मिन् क्रतौ यानि द्वादशस्तोत्राणि अतिदेशेन प्रकृतितः प्राप्तानि तेषु सर्वेषु स्तोत्रेषु एकैका नूतनस्तोत्रीया कर्त्तव्या सा चोपजाता स्तोत्रीया प्रजामेव यजमानार्थमुत्पादयति ॥ ३ ॥

विशेषान्तरं विधत्ते।

ककुभं प्राचीमुदूहति पुरुषो वै ककुब्गर्भ एव स मध्यतो धीयते ॥ ४ ॥

माध्यन्दिने पवमाने स्वतः प्राप्तायां गायत्र्याः प्राचीमुपरिवर्त्तिनीं पवस्व मधुमत्तमइत्येतां ककुभमुदूहति प्रयुञ्जीत ककुभः पुरुषोत्पादकत्वेन पुरुषरूपत्वात् स एव पुरुषरूपात्मकः ककुप्रूपो गर्भो मध्यतो माध्यन्दिनसवनाख्ये क्रतुशरीरस्थानीये मध्यभागे स्थाप्यते ॥ ४ ॥

अन्यं विशेषं विधत्ते।

अथ यदेषा द्विपदा ककुभो लोके क्रियते गर्भमेव तद्विते प्रजनयति ॥ ५ ॥

तृतीयसवने आर्भवपवमाने स्वतः प्राप्तायाः पादत्रयोपेतायाः ककुभो लोके स्थाने द्विपदा क्रियते परिप्रधन्वेत्येषा द्विपदा ककुप् कर्त्तव्या तद्धि ककुप्करणं गर्भएव परिपक्करूपो भवति तच्च गर्भमनेन द्विपदाकरणेन प्रजनयत्युत्पादयति ॥ ५ ॥

तस्यां द्विपदां ककुभि प्लावनं नाम साम विधत्ते।

च्यावनं भवति प्रजातिर्वै च्यावनं ॥६॥

पक्वो हि गर्भः उदरात् च्यवते बहिःपतति अतश्च्यावनाख्यं साम प्रसवहेतुत्वात् प्रजापतिः प्रजोत्पादनरूपं भवति ॥ ६ ॥

एतद्वेदन प्रशंसति ।

प्रजायते बहुर्भवति य एवं वेद ॥ ७ ॥

स्पष्टोऽर्थः ॥ ७ ॥

पुरा स्वयमेकोऽपि प्रकर्षेण पुत्रादिस्वरूपेण जातः तत् स्वयं बहुविधो भवतीति प्रकृत्य सामद्वयं विधत्ते ।

वसिष्ठस्य जनित्वे भवतो वसिष्ठो वा एते पुत्रहतः सामनी अपश्यत् स प्रजया पशुभिः प्राजायत यदेते सामनी भवतः प्रजात्यै ॥ ८ ॥

जनित्वनामके हे सामनी वसिष्ठसम्बन्धिनी विद्येते ते उभे अत्र भवतः प्रयोक्तव्ये इत्यर्थः नौधसस्यैतु जनित्वमेकं ब्रह्मसाम भवति पुरोजिती वो अन्धस इत्यस्मिन्नार्भवे द्वितीयं जनित्वं इत्येते हे वसिष्ठस्य सम्बन्धिनी पुरा कदाचित् पुत्रहतो मृतपुत्रो वै वसिष्ठो वै प्रजार्थी यत् तत्साधनभूते एते हे सामनी अपश्यत्ततः स वसिष्ठः ताभ्यां सामभ्यां प्रजापशुयुक्तः प्रकृष्टोऽभवत् अन्यस्यापेते सामनी प्रजोत्पादनाय सम्पद्येते ॥ ८ ॥

अथ स्तोत्रीयाणां संख्यां प्रशंसति ।

द्वे सप्तुतानां विराजमतिरिच्येते द्वे स्त्रिया ऊने प्रजननाय प्रजननमेव तत्क्रियते प्रजात्यै ॥ ६ ॥

प्रकृतौ द्वादशसु स्तोत्रेषु नवत्यधिकं स्तोत्रीयाणां शतमिति पूर्वमेव परिगणितं अत्र तु ततोऽप्यधिका द्वादशस्तोत्रीया एवं सति प्रकृतिगताः स्तोत्रीयाः प्रत्येकं दशसंख्यया विभक्ताः संख्यासाम्यादेकोनविंशतिसंख्याका विराजः सम्पद्यन्ते अधिकास्वपि द्वादशसु स्तोत्रीयासु दशसंख्यया विराडेका सम्पन्ना ततोऽत्र संस्तुतानां स्तोत्रीयाणामध्ये द्वे स्तोत्रीये विराट्रूपत्वमतिक्रम्याधिके सम्पन्ने ते च द्वे पुरुषावयवभूताण्डलिङ्गस्थानीये लोकेऽपि स्त्रियास्ते द्वे अण्डलिङ्गे ऊने तच्छोनत्वं प्रजननाय प्रजोत्पादनाय अन्यथा ताभ्यां पिहिते छिद्रे कथं प्रजोत्पद्यते तस्मात्तेनातिरिक्तकरणेन प्रजोत्पादनमेव कृतं भवति ततोऽयमतिरेकः प्रजात्यै भवति ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

पुनःस्तोमाख्यं क्रतुं विधत्ते ।

अथैष पुनःस्तोमः ॥ १ ॥

स्तोमोपलक्षितात्स्तोमयागात् केनापि निमित्तेन प्रच्युतस्य पुनरप्यधिकारं सम्पादयतीत्यसौ क्रतुः पुनःस्तोमनामकः ॥ १ ॥

तत्राधिकारिणं दर्शयति।

यो वज्रं प्रतिगृह्य गरगोरिव मन्येत स एतेन यजेत ॥ २ ॥

यागस्योपनीयस्य वापरहितन्यायजित्वोपनीयो वा प्रकारान्तरेण वा यो निषिद्धं द्रव्यं वज्रं प्रतिगृह्य नरकाङ्गीतो विषभक्षीव नष्टोऽस्मीति यश्चिन्तयति स एतेन पुनःस्तोमेन यजेत अत्र सवनत्रयस्तोमप्रकारः कल्पे दर्शितः ॥ २ ॥

द्वादशस्माध्यन्दिनं सवनं त्रिवृता अभितइति माध्यन्दिनसवनगतेषु द्वादशस्तोत्रीयासु येयमेकादशी स्तोत्रीया तस्याः फलं दर्शयति।

यैकादशी यदेव पूर्ववयसे वज्रं प्रतिगृह्णाति यद्गरं गिरति यदनन्नमत्ति प्रातःसवनाय तन्निहरति ॥ ३॥

येयं स्तोममध्य एकादशी स्तोत्रीयास्ति स तत्सर्व्वं दोषजातं निहरति नितरां नाशयति किमर्थं प्रातःसवनानुष्ठाने मुख्याधिकारसिध्यर्थं किं किं नाशयतीति चेत् तदुच्यते पूर्व्ववयसे वूर्व्वस्मिन्वयसि स्वकीयस्यायुषः पूर्व्वभागे यदेव निषिद्धं द्रव्यं वज्रं प्रतिगृह्णाति तथा क्षेत्रादिविषयविवादेषु कोपेन मर्त्तुं गरं विषं गिरति भक्षयति यदन्नं नातिद्विषमन्नमत्तीति यदन्नं तत्सर्व्वन्नाशयति ॥ ३॥

उत्तरस्याः द्वादश्याः स्तोत्रीयायाः फलमाह।

अथ या द्वादशी यदेवोत्तरवयसे वज्रं प्रतिगृह्णाति

यद्वरं गिरति यदनन्नमत्ति तृतीयसवनाय तन्निह्नरति ॥ ४ ॥

पूर्ववद्व्याख्येयं ॥ ४ ॥

यासु दशसङ्ख्याकाः स्तोत्रीया अवशिष्टास्तासां फलमाह ।

वैराजो वै पुरुषः स मध्यतोऽशुद्धो मध्यत एवैनं पाप्मनो मुञ्चति ॥ ५ ॥

पुरुषस्य हस्ताङ्गुलीषु पादाङ्गुलीषु च विराट्छन्दसाञ्च दशसङ्ख्यासद्भावाद्वैराजत्वञ्च स पुरुषो मध्यमे वयस्यशुद्धः पूर्वोत्तरयोर्वयसोरुक्तप्रकारेण प्रतिग्रहाद्यशुद्धिपरिहारेऽपि मध्यगता शुद्धेरपि परिहृतत्वात् एनं शुद्धिरहितं पुरुषमयं दशसंख्यासङ्गोयुक्तः स्तोत्रीयसङ्गो मध्यमे वयसि पापान्मोचयति ॥ ५ ॥

अथ सामद्वयं विधत्ते ।

शुद्धाशुद्धीये भवतः ॥ ६ ॥

नौधसस्यर्चु पदेत्यनेन निधनेनोपेतं यच्छुद्धाशुद्धीयनामकं साम तद्ब्रह्मसाम भवेत् ऊर्ङ्खिडेत्यनेन निधनेनोपेतं यदपरं शुद्धाशुद्धीयनामकं साम तत् स्वकीयास्वृक्षु भवेत् तदेतदुभयं कल्पकारेणोक्तं ॥ ६ ॥

नौधसस्यर्चु शुद्धाशुद्धीयं ब्रह्मसाम पदनिधनमिति तथा शुद्धीयं स्वासु यदैडमिति सामद्वयं प्रशंसितुमाख्यायिकामाह ।

इन्द्रो यतीन् सालावृकेभ्यः प्रायच्छत्तमस्त्रीला वागभ्यवदत्सोऽशुद्धोऽमन्यत स एते शुद्धाशुद्धीये अपश्यत्ताभ्यामशुध्यत् ॥ ७ ॥

केचन यतयः सर्वकर्मसंन्यासं कृत्वा कदाचिदपि स्वमुखे वेदान्तशब्दोच्चारणरहिताः काष्ठदण्डमात्रधारिणो विवेकज्ञानरहिता यत्र तत्रान्नं भक्षयन्तो नरकयोग्या वर्त्तन्ते तथा चान्यत् श्रूयते ज्ञानदण्डो धृतो येन एकदण्डी स उच्यते। काष्ठदण्डो धृतो येन संन्यासी ज्ञानवर्जितः। स याति नरकान् घोरान् महारौरवसंज्ञकानिति। सालावृका अरण्यश्वानः तेषामपत्यभूता बालकाः श्वानः सालावृकेयास्तेभ्यस्तान्यतीनिन्द्रोमारणार्थं प्रायच्छत् ते च यतयो वेदान्तशब्दरहिता इत्येतदर्थमिन्द्रवाक्यरूपेण कौषीतकिनश्चामनन्ति अत्यन्मुखान् यतीन् सालावृकेयेभ्यः प्रायच्छदिति तथादत्तवन्तं तमिन्द्रं अस्त्रीला निन्दारूपा काचिद्वागभ्यवदत् इन्द्रो ब्रह्महत्यां कृतवानित्येवं निन्दा लोके सर्वत्र प्रसृता ततः स इन्द्रः स्वयमशुद्धोऽस्मीत्यमन्यत सोऽशुद्धिपरिहारोपायं वेदेष्वपि स्थिते शुद्धाशुद्धीयनामके द्वे सामनी अपश्यत् ताभ्यां सामभ्यां सर्वैः शुद्धोभूतः ॥ ७ ॥

प्रकारान्तरेण सामद्वयं प्रशंसति।

यदेव वस्तु प्रतिगृह्णाति यदन्नमत्ति यदशुद्धोमन्यते तदेताभ्याꣳ शुध्यति ॥ ८ ॥

प्रतिग्रहे वा निषिद्धान्नभक्षणे वा निमित्तान्तरेण वा यद् शुद्ध्यापादकं पापमस्ति तत्सर्व्वमेताभ्यां शुध्यति विनश्यति ॥ ८ ॥

अन्यत् सामद्वयं विधत्ते।

गौपूक्तञ्चाश्वसूक्तञ्च भवतः ॥ ९ ॥

स्वादिष्ठयेत्यत्र गौपूक्तनामकं साम भवति इन्द्रमच्छेत्यत्राश्व-सूक्तनामकं साम भवति ॥ ९ ॥

तदेतत्सामद्वयं प्रशंसितुमाख्यायिकामाह।

गौपूक्तिश्च श्वसूक्तिश्च बज्रं प्रतिगृह्य गरगिरा-वमन्येतां तावेते सामनी अपश्यतां ताभ्यां गरन्निर-घ्नातां यदेव बज्रं प्रति गृह्णाति यद्गरं गिरति यदन-न्नमत्ति तदेताभ्यां निर्हते ॥ १० ॥

गौपूक्तस्यापत्यं गौपूक्तिः अश्वसूक्तस्यापत्यमाश्वसूक्तिः तावुभौ बज्रं प्रतिग्रहरूपं विषं भक्षितवन्तावावामिति तत्परिहारोपायं वेदेष्वन्विष्यैते उभे सामनी दृष्ट्वा ताभ्यां सामभ्यां प्रतिग्रहरूपं निरघ्नातां निःशेषेण नाशयतीत्यर्थः ॥ १० ॥

पुनःस्तोमाख्यक्रतोरुक्थसंस्थारूपं विधत्ते।

पञ्चदशस्तोत्राणि भवन्त्योजो वीर्य्यं पञ्चदशः पाप्मनएवैनं मुक्त्वौजसा वीर्य्येण समर्द्धयति ॥ ११ ॥

यद्यस्मिन् पुनःस्तोमे माध्यन्दिनसवनस्य द्वादशस्तोमोपेतत्वात्प्रातःसवनतृतीयसवनयोश्च त्रिवृत्स्तोमोपेतत्वान्नास्त्यत्र पञ्चदशस्तोमस्य प्रसङ्गः तथापि स्तोत्रगतसंख्यया तं स्तोमं सम्पाद्य वीर्यरूपेण प्रशंसा क्रियते पञ्चदशस्तोमस्य प्रजापतिवाङ्मयामृत्यन्नत्वात् चक्षियवीर्यहेतुत्वं वीर्यस्यैव व्याख्यानमोजइति तेन वीर्येण यजमानं पापान्मोचयित्वा सेयं स्तोत्रसंख्या धनधान्यादिसमृद्धं करोति ॥ ११ ॥

इति तण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य
चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

चतुष्टोमाख्यं क्रतुं विधत्ते ।

अथैष चतुष्टोमः ॥ १ ॥

पूर्वस्मात्पूर्वस्मादुत्तर उत्तरस्तोमश्चतसृभिश्चतसृभिः स्तोत्रीयाभिरस्मिन् क्रतौ अधिको भवति अतोऽयं क्रतुश्चतुष्टोमः ॥ १ ॥

अत्राधिकारिणमाह ।

पशुकामो यजेत ॥ २ ॥

स्पष्टोऽर्थः ॥ २ ॥

प्रथमस्तोत्रगतां स्तोमसंख्यां प्रशंसति ।

यच्चतसृभिर्बर्हिष्यवमानं भवति चतुष्पादाः पशवः पशूनेवावरुन्धे ॥ ३ ॥

अयं पूषा रयिर्भग इत्येतासिस्रोऽनुष्टुभस्ताश्चतुरक्षरसंख्याः चतस्रो गायत्रीः सम्पाद्य ताभिर्निष्पन्ने बर्हिष्यवमाने स्तोत्रे चतुःसंख्यया पशुप्राप्तिरुच्यते ॥ ३ ॥

आभ्यः स्तोत्रगतां स्तोमे पूर्वस्मादधिकत्वेन वर्तमानया चतुःसंख्यया सम्पन्नामष्टसंख्यां प्रशंसति ।

यदष्टाभिराज्यान्यष्टाशफाः पशवः शफशस्तत् पशूनाप्नोति ॥ ४ ॥

अष्टाभिः स्तोत्रीयाभिराज्यानि निष्पाद्यन्त इति यदस्ति तेन पशूनाप्नोति पशुषु शफानामष्टत्वात् शफशः शफद्वारा साम्यसम्भवात् ॥ ४ ॥

तत ऊर्ध्वं चतुःसंख्यया वर्तमानां स्तोमसंख्यां प्रशंसति ।

यत् द्वादशो माध्यन्दिनः पवमानो द्वादशमासाः संवत्सरः संवत्सरं पशवोऽनु प्रजायन्ते तानेवावरुन्धे ॥ ५ ॥

संवत्सरमनु प्रतिसंवत्सरं गवादिपशूनां वत्सोत्पादकत्वं प्रसिद्धं ॥ ५ ॥

ततोऽपि चतुःसंख्याधिकं स्तोमान्तरं प्रशंसति ।

यत् षोडशानि षष्ठानि षोडशकलाः पशवः कलाशस्त्वमूनाप्नोति ॥ ६ ॥

गोमहिष्यादीनां पशूनां शिरो ग्रीवा मध्यदेहः पुच्छमिति चत्वार्यङ्गानि चत्वारः पादाः अष्टौ शफाः इत्येवं षोडशसंख्याका अवयवाः कला इत्युच्यन्ते चत्वारः कलाद्वारा संख्यासामान्यात् षोडशस्तोमः पशुप्राप्तिर्भवति ॥ ६ ॥

ततोऽपि चतुःसंख्याधिकं स्तोमान्तरं प्रशंसति।

यद्विंशऽआर्भवः पाङ्क्तत्वमेषां तदाप्नोति ॥७॥

आर्भवपवमाने विंशः स्तोम इति यदस्ति तत्तेनैवैषां पशूनां यत् पाङ्क्तत्वमस्ति तदाप्नोति विंशतिसंख्यावयवेषु चतुर्षु भागेषु प्रत्येकं पञ्चसंख्योपेतत्वात् पाङ्क्तत्वमस्ति पशूनां पाङ्क्तत्वं पुरैवोक्तं अतः तत्प्राप्तिर्युक्ता ॥ ७ ॥

ततोऽपि चतुःसंख्याधिकं स्तोमान्तरं प्रशंसति।

यच्चतुर्विंशोऽग्निष्टोमश्चतुर्विंशत्यक्षरा गायत्री तेजो ब्रह्मवर्चसं गायत्री तेजएव ब्रह्मवर्चसमवरुन्धे॥ ८ ॥

अग्निष्टोमो द्वादशस्तोत्रस्य स्पष्टमन्यत् ॥ ८ ॥

चतुर्विंशसंख्या द्वारा स्तोमस्य यद्गायत्रीत्वं तत्प्रकारान्तरेण प्रशंसति।

प्राणो गायत्री प्रजननं प्राणादेव गायत्र्याः प्रजायत ॥ ९ ॥

रेचकपूरककुम्भकैः प्राणस्त्रिधा भिद्यते गायत्री च त्रिभिः पादैरुपेता तस्माद्गायत्री प्राणबलेन हि गर्भाधानकाले वीर्य्यमाधीयते तस्मात्प्राणः प्रजननं तथाविधप्राणरूपाया गायत्र्याः प्रजोत्पादकत्वं यजमानस्य भवति ॥ ९ ॥

तदेतदुक्तमग्निष्टोमसाम प्रकारान्तरेण प्रशंसति।

एकꣳ साम बह्वृनि छन्दाꣳसि तस्मादेको बह्वृन् पोषान् पुष्यति ॥ १० ॥

अत्र वारवन्तीयाख्यमेकमग्निष्टोमसाम तस्य वारवन्तीयस्याधारभूतान्यृग्गतानि छन्दांसि बह्वृनि भवन्ति तद्यथा यज्ञायज्ञीयस्यर्चः साकमश्वस्यर्चो हारिवर्णस्यर्चस्तैरश्वस्यर्च इति तस्मात्कारणाद्वारवन्तीयसामस्थानीय एकः पुरुषो बह्वृन् पोषान् पुत्रपौत्रादिरूपान् पोषणीयान् प्राणिनो बह्वृन् पुष्यति ॥ १० ॥

पुनरपि प्रकारान्तरेण प्रशंसति।

आत्मा वा अग्निष्टोमः पशवश्छन्दाꣳस्यात्मन्येव तत्पशून् प्रतिष्ठापयति नोक्थ्यो नाग्निष्टोमो न हि ग्राम्याः पशवो नारण्याः ॥ ११ ॥

योऽयमग्निष्टोमान्तो द्वादशस्तोत्रयुक्तः क्रतुभागः सोऽयं सर्वेषु

सोमयागेष्वनुक्तत्वादात्मा सोमयागदेहः यान्यतिरिक्तान्युक्थस्तोत्रगतानि छन्दांसि तानि पशवो गवादिपशुस्थानीयानि तत्तेनोक्थछन्दोऽनुष्ठानेन पशून् प्रतिष्ठापयति सोमयुक्तश्चतुष्टोमः क्रतुर्न तावदुक्थ इति वक्तुं शक्यते अग्निष्टोमसाम्ना समापयितत्वात् नाप्यग्निष्टोम इति वक्तुं शक्यते उक्थस्तोत्रीयाणामत्वानुष्ठानात् पशवोऽपि गोमहिष्यादयो न तावद्ग्राम्या इति वक्तुं शक्या अहन्यरण्ये सञ्चरमाणत्वात् तथारण्या इति वक्तुं न शक्यते रात्रौ ग्रामे तन्निवासदर्शनात् तस्मादीदृशानां पशूनामीदृशेन क्रतुना प्राप्तिर्युक्तेत्यर्थः ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य
पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

द्वितीयं चतुष्टोममाह ।

अथ यस्य चत्वारि स्तोत्राणि चतस्रभिश्चत्वार्यष्टाभिश्चत्वारि द्वादशभिश्चत्वारि षोडशभिस्तमाग्नातिवदति ॥ १ ॥

पूर्वोक्तश्चतुष्टोमोऽग्निष्टोमरूपत्वात् द्वादशस्तोत्रैरुपेतः तत्रैकेन प्रकारेणोत्तरोत्तरं चतुःसंख्या वृद्धियुक्ता अयं चतुष्टोमः षोडशभीरूपत्वात् षोडशभिः स्तोत्रैरुपेतः अतोऽनेन प्रकारेणो-

त्तरोत्तरं चतुःसंख्याधिक्यमुच्यते तथा बहिष्पवमानस्तोत्राज्यानि चेत्येतानि चत्वारि स्तोत्राणि चतसृभिः स्तोत्रीयाभिर्निष्प्राद्यन्ते अच्छावाकाख्यं माध्यन्दिनपवमानौ द्वौ पृष्ठ्यश्चेत्येतानि चत्वारि स्तोत्राणि अष्टस्तोत्रीयाभिर्निष्प्राद्यन्ते उत्तरे द्वे पृष्ठे आर्भवपवमानाग्निष्टोमसाम चेत्येतानि चत्वारि स्तोत्राणि द्वादशभिः स्तोत्रीयाभिर्निष्प्राद्यन्ते एवं तीव्रक्थानि षोडशिसाम चेत्येतानि चत्वारि स्तोत्राणि षोडशभिः स्तोत्रीयाभिर्निष्प्राद्यन्ते एवं स्तोमेषु चतुःसंख्याऽऽवृत्तियुक्तत्वाच्चतुष्टोम इत्युच्यते यस्य चतुष्टोमाख्यस्य क्रतोरीदृशी चतुःसंख्याऽऽवृत्तिः सगान्नातिवदति ज्योतिर्गौरायुरित्युक्थेषु क्रतुषु यो गोनामकः क्रतुस्तमतिक्रम्य अधिकं न भवति तत्सफल इत्यर्थः यद्वा गां गोजातिं नातिवदति गोप्राप्तिफलं प्रयच्छतीत्यर्थः तस्मादनेन पशुकामो यजेतेत्युक्तं भवति एतदेव निदानेऽभिहितं पशुकामयज्ञ एवोत्तर इति ॥१॥

स्तोत्रगतां षोडशसंख्यां प्रशंसति ।

षोडशकलाः पशवः कलाश्चन्द्रमास्तत्प्रभूनाप्नोति ॥२॥

पूर्ववद्व्याख्येयं ॥ २ ॥

अग्निष्टोमसाम्न उपरितनानि प्रशंसति ।

उक्थः षोडशिमान् भवति पशवो वा उक्थानि वज्रः षोडशी वज्रेणैवास्मै पशून् परिगृह्णात्यनपक्रामुका अस्मात्पशवो भवन्ति नोक्थ्योनातिरात्रो न हि ग्राम्याः पशवो नारण्याः ॥३॥

त्रिभिरुक्थस्तोत्रैरुपेतत्वादयं क्रतुः उक्थः षोडशिस्तोत्रेणोपेतत्वात् षोडशिमान् उक्थानां पशुप्राप्तिहेतुत्वात्पशुरूपत्वं षोडशिनः पशुविरोधिचौरव्याघ्रादिनिवारकत्वाद्वज्रत्वं तत्रोक्थे परिगृहीताः पशवश्चौराद्युपहरणाद्वज्रेण रक्षिताः सन्तः कदाचिदप्यस्माद्यजमानादनपक्रामुका भवन्ति अयं क्रतुरुक्थसंस्थो न भवति उक्थस्तोत्रयोरसमाप्तित्वात् अतिरात्रोऽपि न भवति षोडशिनि च समाप्य रात्रिपर्य्यायाणां सन्धेश्चाप्रयोगात् न हि ग्राम्या इति पूर्ववद्व्याख्येयं ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य षष्ठः खण्डः।

अथ सप्तमः खण्डः।

उद्भिद्बलभिन्नामकौ द्वौ क्रतू विवक्षुस्तत्प्रशंसार्थमाख्यायिकामाह।

असुराणां वै बलस्तमसा प्रावृतोऽग्नापिधानश्चासोत्तस्मिन् गव्यं वस्वन्तरासीत्तं देवानाग्क्रुवन् भेत्तुं ते बृहस्पतिमब्रुवन्निमान्न उत्सृजेति स उद्भिदैव बलं व्यचाययद्बलभिदाभिनत्तानुत्सेधेनैवोदसृजन्निपेधेन पर्य्यगृह्णात् ॥ १ ॥

असुराणामेव मध्ये बलनामकः कश्चिदसुरो यदा देवैर्न्नातुं

न शक्यते तथान्धकारेण प्रावृतः परितोऽग्न्यभिधानः प्राकाररूपेण स्थापितैः पाषाणैराच्छादितः कस्मिंश्चिद्विलेऽतिष्ठत् तस्मिन्विले अन्तर्मध्ये गव्यं गोसमूहरूपं वसुस्वासीत् देवानां सम्बन्धि गो जातमपहृत्य विले गोपितवात् तं बलनामानमसुरं भेत्तुं शस्त्रैर्विदारितुं देवाः शक्नानाभवन् ततो बृहस्पतिं प्रार्थितवन्तः हे बृहस्पते अस्मदर्थं इमान् पशूनुत्सृज विलान्निःसारयेति ततः बृहस्पतिरङ्गिद्यागमनुष्ठाय तत्सामर्थ्येनैव बलनामासुरं विलाद्वियुज्य प्रच्यावितवान् बलभिन्नामानं क्रतुमनुष्ठाय तत्सामर्थ्येन बलनामानमसुरं अभिनत् शस्त्रैर्विदारयन् तान् विलस्थितानपि पशूनुत्सेधाख्येन साम्ना एवोदहृजत् बिलात् उद्गतानकरोत् ततो निषेधेन साम्ना पशूनां पलायनं निषेधेन पर्य्यगच्छात् परितः स्वाधीनानकरोत् ॥ १ ॥

तयोः क्रत्वोरधिकारिणमाह ।

पशुकामो यजेत ॥ २ ॥

उङ्गिद्बलभिद्यामिति शेषः सङ्घानुष्ठानं सूत्रकारो दर्शयति उङ्गिद्बलभिद्यामविप्रयोगेण यजेतेति ॥ २ ॥

पशुफलप्राप्त्यर्थमुभयोरुपयोगमाह ।

यदुङ्गिदा यजते बलमेवास्मै विच्यावयति यद्बलभिदा बलमेवास्मै भिनत्ति ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

अस्मै पशुलाभाय सामद्वयं विधत्ते।

उत्सेधनिषेधौ ब्रह्मसामनी भवत उत्सेधेनैवास्मै पशूनुत्सिध्य निषेधेन परिगृह्णाति ॥ ४ ॥

पिबासु तस्य रसिन इत्यस्यामचि उत्सेधनिषेधाख्ये द्वे सामनी तयोरुत्सेध उद्विदि ब्रह्मसाम निषेधो बलभिदि ब्रह्मसाम तत्र त्सेधेन पशुप्राप्तिप्रतिबन्धकात्पशूनुत्सिध्य निःसार्य्य निषेधेन पलायनं निषिध्य स्वाधीनान् करोतीति ॥४॥

अस्मै यजमानार्थं अन्यत्सामद्वयं विधत्ते।

यन्नइन्द्रमवर्द्धयदिति ब्रह्मणआज्यꣳ रूपेण सम्मृद्धम् ॥ ५ ॥

पूर्वोक्तावुत्सेधनिषेधौ माध्यन्दिनसवने ब्रह्मसाम यन्न इन्द्रमित्यस्यामचि सम्पन्नं साम तयोः क्रत्वोः प्रातःसवने ब्रह्माणं प्रति प्रयोक्तव्यमाज्यस्तोत्रं तस्यामचीन्द्रो यदभिनबलमिति बलभेदनलिङ्गसङ्गावादिदमाज्यस्तोत्रमनुकूलेन रूपेण सम्मृद्धं ॥५॥

अथ कश्चित्सङ्घाविशेषमुपायेन सम्पाद्य तमुपजीव्य प्रशंसति।

सप्तिसप्तदशौ भवतो यत्सप्तभिः स्तुवन्ति सप्त ग्राम्याः पशवः पशूनेवावरुन्धे सप्तपदा शक्करी पशवः शक्करी पशूनेवावरुन्धेऽथ यत्सप्तदशभिः प्रजापतिर्वै सप्तदशः प्रजापतिमेवाप्नोति ॥ ६ ॥

अत्रैवं कल्पे दर्शितं एकविंशं वहिष्यमाणं तिसृभिर्होतुराज्यं सप्तसप्तदशमिति अत्रैकविंशतिसंख्या त्रिसंख्या च मिलित्वा चतुर्विंशतिः सम्पद्यत इति संख्या सम्पद्यते तस्माच्च विच्छेदविशेषेणैका सप्तसंख्या अपरा तु शप्तदशसंख्या तयोर्मध्ये सप्तसंख्या यासां स्तोत्रीयाणां सङ्घे विद्यते सोऽयं सप्तीं अवशिष्टः सप्तदशः तत्र सप्तिना संघेन संख्यासाम्याद्गवादीन् पशून् प्राप्नोति तथा शक्करीछन्दसः सप्तभिः पादैरुपेतत्वात् पशुसाधनत्वाच्च सप्तसंख्यया पशुप्राप्तिः अथावशिष्टाभिः सप्तदशभिः स्तुवन्तीति यदस्ति तेन प्रजापतिं प्राप्नोति प्रजायते: सप्तदशाक्षररूपत्वं तैत्तिरीया आमनन्ति ऊर्ध्वावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेति ह्यक्षरं ये यजामह इति पञ्चाक्षरं ह्यक्षरो वषट्कारः एष वै सप्तदशः प्रजापतिरिति ॥६॥

पुनरपि संख्याद्वयं मिलित्वा प्रशंसति।

गायत्रीꣳ सम्पद्यते तेजो ब्रह्मवर्चसं गायत्रो तेज एव ब्रह्मवर्चसमवरुन्धे प्राणो गायत्रो प्रजननं प्राणादेव गायत्राः प्रजायते ॥ ७ ॥

या सप्तसंख्यास्ति या चान्या सप्तदशसंख्या ते उभे मिलित्वा चतुर्विंशतित्वेन गायत्रीं प्राप्नुतः तेजो ब्रह्मवर्चसमित्यादि पूर्ववद्व्याख्येयं ॥७॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य

सप्तमः खण्डः।

अथ अष्टमः खण्डः ।

अपचित्याख्यं क्रतुं विधत्ते ।

अथैषोऽपचितिरपचितिकामो यजेतापचित्यवास्मा अपचितिं विन्दति ॥ १ ॥

अपचितिः पूजा तद्धेतुत्वात्क्रतुरप्यपचितिनामकः अपचित्यैव अपचितिना क्रतुना अस्मै यजमानार्थमुद्गाता पूजां लभते ॥ १ ॥

तत्र बहिष्पवमानमाध्यन्दिनपवमानयोः स्तोमविशेषं विधत्ते ।

तस्य चतुर्विꣳशौ पवमानौ चतुर्विꣳशत्यक्षरा गायत्री तेजो ब्रह्मवर्चसं गायत्री तेजसैवास्मै ब्रह्मवर्चसेनापचितिं विन्दति ॥ २ ॥

स्पष्टोऽर्थः ॥२॥

पृष्ठस्तोत्रे सामद्वयं विधत्ते ।

उभे बृहद्रथन्तरे भवत उभाभ्यामेवास्मै बृहद्रथन्तराभ्यामपचितिं विन्दति ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३॥

अपरं सामद्वयं विधत्ते ।

भर्गयशसौ भवतो भर्गेणैवास्मै भर्गोदधाति यशसा यशः ॥ ४ ॥

पुरोजिती वो अन्धस इत्यस्यामचि यथा श्याकाश्वान्धीगवे सामनी तथा भर्गाख्यं साम त्वमिन्द्र यशसा असीत्यस्यामचि यशो नामकं साम भवति .तत्र भर्गाख्येनैव साम्ना यज्ञे यजमानार्थं भर्गो दधाति तेजः सम्पादयति यशोनामकेन साम्ना कीर्त्तिं सम्पादयति ॥४

अत्र विद्यमानान् स्तोमान् प्रशंसति ।

उभये स्तोमा युग्मन्त्यायुजश्चोभयैरेवास्मै स्तोमैरर्पचितिं विन्दति ॥ ५ ॥

युग्मन्तोयुग्मसंख्यया समसंख्ययोपेताः चतुर्विंशस्तोमाः यद्यप्येक एव चतुर्विंशस्तथापि जात्यभिप्रायेण बहुवचनं अयुजो विषमसङ्ख्योपेताः त्रिवृत्पञ्चदशादयः स्पष्टमन्यत् ॥५॥

अत्र ब्रह्मवादिनामाक्षेपं दर्शयति ।

तदाहुर्विलोमानस्तोमा ईश्वरा यजमानं विच्चेतोर्व्यु ह्यतियन्तीति ॥ ६ ॥

त्रिवृदादिक्रमेण ह्यनुष्ठाने सत्यानुलोम्यं स्यात् अत्र चतुर्विंशमारभ्य तत ऊर्द्धं अर्वाचीनानां पञ्चदशादीनामनुष्ठानाद्विलोमत्वं प्रातिलोम्येन प्रवृत्ताः स्तोमा यजमानं विच्चेतोर्विच्चेपयितुमीश्वराः समर्थाः हि यस्मादेते स्तोमा व्यतियन्ति विपरीतक्रमाः सन्तः स्वोचितं क्रममतिलङ्घ्य प्रवर्त्तन्ते इतिशब्दो ब्रह्मवाद्याक्षेपसमाप्त्यर्थः ॥ ६ ॥

समाधानं विधत्ते ।

एकविꣳशोऽग्निष्टोमो भवति प्रतिष्ठा वा एकविꣳशोऽन्नतएव यज्ञस्य प्रतितिष्ठति ॥ ७ ॥

स्पष्टोऽर्थः ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य

अष्टमः खण्डः ।

अथ नवमः खण्डः ।

द्वितीयमपचितिनासकं कर्तुं विधत्ते ।

अथैष सर्वस्तोमोऽपचितिरपचितिकामो यजेत सर्वैरेवास्मै स्तोमैरपचितिं विन्दति ॥ १ ॥

अतीतयोर्द्वितीयतृतीययोरध्याययोर्निरूपितास्त्रिवृदादिस्तोमा येऽष्टाचत्वारिंशत्ताः स्तोमास्ते सर्वेऽप्यत्र विद्यन्ते अतोऽयं सर्वस्तोमः तैः सर्वैरुद्गाता यजमानार्थं पूजां लभते ॥ १ ॥

स्तोमगतस्तोत्रीयाणां सङ्ख्यामुपजीव्य प्रशंसति ।

विराजꣳ सम्पद्यत एष वा अपचितोयोऽन्नादोऽन्नं विराडन्नाद्यमेवास्मिन्दधाति ॥ २ ॥

अयमपचितिकर्तुर्दृश्यसंख्यया स्तोत्रीयासु विच्छेदितासु संख्यासामान्याद्विराट्छन्दोरूपत्वं सम्पद्यते तथा हि त्रिवृद्-

बर्हिष्पवमानं पञ्चदशं होतुराज्यं सप्तदशे द्वे आज्ये एकविंश-मच्छावाकस्याज्यं त्रिणवो माध्यदिनः पवमानः त्रीणि पृष्ठानि चतुर्विंशं चतुश्चत्वारिंशमष्टाचत्वारिंशरूपाणि चतुर्थं पृष्ठन्तु चतुर्विंशं आर्भवस्त्रयस्त्रिंशमग्निष्टोम एकविंशः अत्र स्थिताः सर्वाः स्तोत्रीयास्त्रीणि शतानि भवन्ति ३०० ततश्च दशकत्वेन विच्छिन्नाः सत्यस्त्रयस्त्रिंशद्विराजः सम्पद्यन्ते विराजश्चान्नरूपत्वं अन्नहेतुत्वात् लोके यः पुमानन्नादो भवति सोऽपचितो राडिति रोगरहितत्वात् पूजितो भवति तस्मादुद्गातास्मिन् यजमाने विराट्रूपेणान्नाद्यं सम्पादयति ॥२॥

द्वे सामयुगसे द्विविधांश्च स्तोमान् विधाय प्रशंसति।

उभे बृहद्रथन्तरे भवतो भर्गयशसो भवत उभये स्तोमाश्छन्दोमाश्च पृष्ठाश्चोभयैरेवास्मै स्तोमैरपचितिं विन्दति ॥ ३ ॥

चतुर्विंशचतुश्चत्वारिंशाष्टाचत्वारिंशास्तोमा गायत्रीत्रिष्टुप्-जगत्याख्यैश्छन्दोभिर्गीयन्ते संख्ययोपमीयन्त इति छन्दोमाः त्रिवृत्पञ्चदशसप्तदशैकविंशत्रिणवत्रयस्त्रिंशाख्यास्तोमाः शडहे पृष्ठस्तोत्रसम्बन्धाः पृष्ठा इत्युच्यन्ते तैश्चतुर्भिः सामभिर्ऋग्भिः स्तोमैश्च यजमानाय पूजां लभते ॥३॥

पुनरपि स्तोमान् प्रशंसति।

तस्य छन्दोमाः पृष्ठानि पशवो वै छन्दोमा अन्नं

पृष्ठान्यभिपूर्वमेवास्मिन्नन्नाद्यं पशून्दधाति यच्छन्दो मवाꣳस्तेन द्वादशाहयाजिनमाप्नोति ॥ ४ ॥

तस्यापचितेः क्रतोर्यच्छन्दोमा विद्यन्ते यानि च त्रिवृदादीनि पृष्ठानि तेषामध्ये छन्दोमानां पशुसाधनत्वात् पशुत्वं पृष्ठान्नहेतुत्वादन्नत्वं एवं सत्यन्नस्य प्रथममपेक्षितत्वादभिपूर्वमनुक्रमेणैवान्नमुत्कृष्टं सम्पाद्य ततः पशून् सम्पादयति किञ्च द्वादशाहे छन्दोमसद्भावात् द्वादशाहयाजिनं प्राप्नोति तस्य यत् फलं तदस्यापि भवतीत्यर्थः ॥ ४ ॥

अत्र ब्रह्मवादिनामाक्षेपं दर्शयति ।

तदाहुर्नानालोकाः स्तोमाश्छन्दोमाश्च पृष्ठाश्च यदेकस्मिन् यज्ञक्रतौ समवरुध्यन्त ईश्वरा यजमानोऽप्रतिष्ठातोरिति ॥५॥

उक्ताः स्तोमा लोका भिन्नाश्रयान त्वेकक्रतुवर्त्तिनः तथा सति यद्येकस्मिन्नेव क्रतौ स्वीक्रियेरन् यदा यजमानोऽप्रतिष्ठातोरप्रतिष्ठातुमीश्वरो भवति प्रतिष्ठान्न लभत इत्यर्थः ॥५॥

उक्ताक्षेपं परिहरति ।

एकविꣳशोऽग्निष्टोमो भवति प्रतिष्ठा वा एकविꣳशः प्रतिष्ठामेव तदभ्यायन्ति ॥ ६ ॥

तक्तेनैकविंशानुष्ठानेन यजमानस्य प्रतिष्ठामभिलक्ष्य सर्वे सोमा आयन्ति गच्छन्ति ॥६॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य नवमः खण्डः ।

—२—

अथ दशमः खण्डः ।

पक्ष्याख्यं क्रतुं विधत्ते ।

पक्षो वा एष स्तोमः ॥ १ ॥

स्तोमशब्देन तद्वान् क्रतुरुपलक्ष्यते स च पक्षिसादृश्यात् पक्षिनामकः तस्य पूर्वभागे त्रिवृदादित्रयस्त्रिंशान्तः स्तोमसङ्घः एकः पक्षः उत्तरभागे त्रयस्त्रिंशादित्रिवृदन्तः स्तोमसङ्घोऽपरः पक्षः ॥ १ ॥

अस्य क्रतोः पक्षिनामानुकूलं सामविशेषं दर्शयति ।

पक्ष्येषु निधीयते ॥ २ ॥

सुपर्णेन दृष्टः सौपर्णाख्यः सामविशेषो नाम तस्य साम्यात् पक्षीत्युच्यते सोऽस्मिन् क्रतौ निधीयते तथा च कल्पेऽभिहितं स्वारश्च सौपर्णमग्नेश्च व्रतं योजयात् पूर्वमिति सामविशेषस्य क्रतोश्चोभयोरपि पक्षित्वात् सम्बन्धो युक्त इत्यर्थः ॥ २ ॥

तमेव सम्बन्धमन्वयव्यतिरेकाभ्यामुपपादयति ।

न वा अपक्षः पक्षिणमाप्नोत्यथ यदेष पक्षी पक्षिणि निधीयते तस्मात्पक्षिणः पक्षैः पतन्ति ॥३॥

लोके पक्षरहितो मनुष्यः पशुर्वा कश्चिदाकाशे गच्छन्तं पक्षिणमाप्तुं नैव शक्नोति अथ तद्विपर्ययेणान्वय उच्यते अपक्षिणि पक्षरहिते साम्नि सौपर्णनामवशादेषसामविशेषः पक्षी पक्षवान् भवति तथा भूत्वा क्रतौ निधीयते यद्यस्मादेवं तस्मात्लोके पक्षिणः पक्षैराकाशे पतन्ति यद्वा क्रतौ च पक्षिणि पक्षरहिते पक्षसाहित्यसिद्ध्यर्थमेव पक्षिपक्षकल्पना युक्ता सामविशेषो निधीयत इति क्रतोः पक्षित्वं सम्पन्नं यस्मादेवं तस्मात्लोके पक्षिणो वायसादयः पक्षैराकाशे पतन्ति ॥३॥

एतद्वेदनं प्रशंसति ।

पक्षी ज्योतिष्मान् पुण्यान् लोकान् सञ्चरति य एवं वेद ॥४॥

अस्य क्रतोर्वेदिता पक्षी स्वयं पक्षवानिव भूत्वाऽग्निसञ्चयिनः क्रतोर्वेदनेन ज्योतिष्मान् भूत्वा स्वर्गादीनुत्तमलोकान् प्राप्नोति ॥ ४ ॥

अस्य क्रतोः स्तोमान् विधत्ते ।

त्रिवृतावभितो भवतस्तेजो ब्रह्मवर्चसं त्रिवृत्तेज एव ब्रह्मवर्चसमवरुन्धे ॥५॥

अभितः क्रतोरादन्तयोर्वह्निप्रवमानाग्निष्टोमाख्ययोः प्रथम-

द्वादशयोस्त्रिवृत्स्तोमौ कर्त्तव्यौ तस्य च स्तोमस्य शरीरकान्ति-श्रुताध्ययनसम्पत्तिहेतुत्वात्तेजस्त्वं ब्रह्मवर्चसत्वञ्च अतस्तेनोभय-प्राप्तित्वाद्वीर्य्यत्वं ॥ ५ ॥

द्वितीयैकादशयोः स्तोत्रयोर्विशेषं विधत्ते।

अथ पञ्चदशौ वीर्य्यं वै पञ्चदशो वीर्य्यमेवाव-रुन्धे ॥६॥

आज्यादयः ॥ ६ ॥

तृतीयदशमयोः स्तोमविशेषं विधत्ते।

अथ सप्तदशौ पशवो वै सप्तदशः पशूनेवाव-रुन्धे ॥ ७ ॥

स्तोमस्य पशुप्राप्तिसाधनत्वात् पशुत्वं ॥ ७ ॥

चतुर्थनवमयोः स्तोत्रयोः स्तोमविशेषं विधत्ते।

अथैकविंशौ प्रतिष्ठा वा एकविंशो मध्यतएव यज्ञस्य प्रतितिष्ठति ॥८॥

उक्थस्तोत्रयोर्यज्ञमध्यवर्त्तित्वात् यजमानोऽपि यज्ञमध्य-एव प्रतितिष्ठति तदनुष्ठानेन स्थिरो भवति ॥ ८ ॥

यज्ञमाष्टमयोः स्तोत्रयोः स्तोमविशेषं विधत्ते।

अथ त्रिणवाविमे वै लोकास्त्रिणव एष्वेव लोकेषु प्रतितिष्ठति ॥९॥

त्रिणवस्तोमेन त्रयाणां भागानां लोकत्रयप्राप्तिहेतुत्वात्तद्रूपत्वं ॥ ९ ॥

षडसप्तमयोः स्तोमविशेषं विधत्ते ।

अथ त्रयस्त्रिंशौ वर्ष्म वै त्रयस्त्रिंशः ॥ १० ॥

उक्तेषु स्तोमेषु त्रयस्त्रिंशस्य प्रौढत्वादयं यज्ञस्य वर्ष्म शरीरमेव इतरे त्ववयवसदृशाः ॥ १० ॥

एतद्भेदनं प्रशंसति ।

अर्ष्म स्वानां भवति य एवं वेद ॥ ११ ॥

स्वानां ज्ञातीनां वर्ष्म शरीरमिव मुख्यो भवति ॥ ११ ॥

उक्तौ त्रयस्त्रिंशौ प्रशंसति ।

एष वाव ब्रध्नस्य विष्टपो यदेतौ त्रयस्त्रिंशौ मध्यतः सन्धीयेते तेन ब्रध्नस्य विष्टपमारोहति ॥ १२ ॥

क्रतोर्मध्यभागे क्रतुषु षडसप्तमयोः स्तोत्रयोः त्रयस्त्रिंशाख्यौ स्तोत्रौ सन्धीयेते अनुष्ठीयेते इति यदस्ति एष एवानुष्ठानप्रकारो ब्रध्नस्यादित्यस्य विष्टपः स्थानविशेषः ब्रध्नशब्दार्थोऽन्यत्र श्रूयते असौ वा आदित्यो ब्रध्न इति आदित्यस्य च मध्यंदिनवर्त्तित्वं मध्याह्नकाले प्रत्यक्षं अतस्तेन त्रयस्त्रिंशानुष्ठानादादित्यस्य स्थानमारोहति ॥ १२ ॥

प्रकारान्तरेण स्तोमान् प्रशंसति ।

मध्यतो वा अग्निर्वरिष्ठस्तस्मादेते स्तोमा मध्यतो वरिष्ठाः क्रियन्ते ॥१३॥

अग्निर्हि ज्वलनात् पूर्वोत्तरयोरल्पत्वान्न श्रेष्ठः ज्वलनदशायां प्रौढत्वात् श्रेष्ठः अग्निसम्बन्धिस्त्र्यं क्रतुः अस्य च वक्ष्यमाणक्रतोश्च सूत्रकारेणाग्नेः स्तोमाविति संज्ञाया उक्तत्वात् ऐकाहिकेन व्रतेनोक्त उपायोऽग्नेः स्तोमयोरिति हि सूत्रं अतोऽग्निसादृश्यादस्य क्रतोर्मध्यप्रौढाः स्तोमाः क्रियन्ते ॥ १३ ॥

मध्यवर्त्तिनः स्तोमान् प्रशस्याद्यन्तौ स्तोमौ प्रशंसति ।

चिट्टता प्रैति चिट्टतोदेति प्राणो वै चिट्टत्प्राणेनैव प्रैति प्राणमभ्युदेति ॥ १४ ॥

प्राणस्य रेचकपूरककुम्भकरूपेण वा प्राणापानव्यानवृत्तिरूपेण वा त्रिवृत्त्वं अयञ्च क्रतुस्त्रिवृता प्रैति समाप्यते त्रिवृतोदेति प्रारभ्यते तद्वदेव लोकेऽपि जीवत्पुरुषः प्राणेनैव देहान्निर्यतेन प्रैति म्रियते प्राणमेवाभिलक्ष्य तद्युक्तः सन् उदेत्युत्पद्यते ॥ १४ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य

दशमः खण्डः ।

अथ एकादशः खण्डः ।

सूत्रकारेणाग्नेः स्तोमाविति नाम्ना यौ क्रतू विवृतौ तयोर्मध्ये पञ्चिनामकः प्रथमः क्रतुरुक्तः ज्योतिर्नामकं क्रतुं विधत्ते।

अथैष ज्योतिः ॥१॥

स्पष्टोऽर्थः ॥ १ ॥

स्तोमान्विधत्ते ।

तस्य त्रिष्टुब्हिष्मवमानं पञ्चदशान्याज्यानि चतुर्विंशो माध्यन्दिनः पवमानः सप्तदशानि पृष्ठानि ॥ २ ॥

स्पष्टोऽर्थः ॥ २ ॥

तत्राद्यौ द्वौ स्तोमौ प्रशंसति ।

प्राणो वै त्रिष्टदात्मा पञ्चदशः ॥३॥

पूर्वोक्तरीत्या प्राणस्य त्रिष्टुत्वं आत्मा देहः स च पञ्चदशभिरवयवैरुपेतः अत्यन्तरे सप्त शीर्षण्याः द्वावर्वाञ्चौ नाभिर्दशमीत्युक्तत्वात् दश प्राणाः द्वौ हस्तौ द्वौ पादौ मध्यभागश्चेत्येते पञ्चावयवाः अतः सङ्ख्यासाम्यात् पञ्चदशस्तोमस्य देहरूपत्वं तस्मादेताभ्यां स्तोमाभ्यां देहे प्राणः स्थिरो भवतीत्यर्थः ॥ ३ ॥

उत्तरौ द्वौ स्तोमौ प्रशंसति ।

मुखं गायत्र्यन्नꣳ सप्तदशो मुखत एव तदन्नं धत्ते ॥४॥

चतुर्विंशस्तोमस्य संख्यासाम्याद्गायत्रीत्वं छन्दसाग्ग्रे प्रथमत्वाद्गायत्र्या मुखं सप्तदशस्तोमस्य प्रजापतिशरीरमध्यगतादन्न-

धारणस्थानादुदराद्युत्पन्नत्वादन्नरूपत्वं तत्तेन स्तोमद्वयेन मुखेऽन्नं धत्त एव कदाचिदपि दरिद्रो न भवतीत्यर्थः ॥ ४ ॥

वेदनं प्रशंसति ।

अन्नमत्त्यन्नादो भवति य एवं वेद ॥५॥

अन्नादो रोगरहितः ॥ ५ ॥

माध्यन्दिनपवमानस्तोमप्रशंसां प्रपञ्चयति ।

माध्यन्दिनेन वै पवमानेन देवाः स्वर्गं लोकमायन्यदेष चतुर्विꣳशो माध्यन्दिनः पवमानो भवति स्वर्गस्य लोकस्याक्रान्त्यै चतुर्विꣳशत्यक्षरा गायत्री तेजो ब्रह्मवर्चसं गायत्री तेज एव ब्रह्मवर्चसमवरुन्धे प्राणो गायत्री प्रजननं प्राणादेव गायत्याः प्रजायते ॥ ६ ॥

व्याख्यातप्रायमेतत् अत्रार्भवपवमानाग्निष्टोमसाम्नोर्वैश्येषानभिधानात्तदुभयं प्रजतावितरवानुष्ठेयं ॥ ६ ॥

सर्वान् स्तोमान् मेलयित्वा प्रशंसति ।

उभये स्तोमा युग्मन्तश्चायुजश्च तन्मिथुनं तस्मान्मिथुनात् प्रजायते ॥७॥

एकस्मिन्नपि चतुर्विꣳशस्तोमे युग्मत्वजात्यभिप्रायेण मान्यत्वाभिप्रायेण वा युग्मन्त इति बहुवचनं अथ वात्र वचनव्यत्ययः

स्त्रीपुरुषवदुभयविधत्वेन स्तोमानामिथुनत्वं ॥ ७ ॥

पूर्व्वत्र सौपर्णाख्यसामसम्बन्धात् पक्षित्वमुक्तं अत्रापि तदे-वाभिप्रेत्य प्रशंसति।

पक्षि वा एतच्छन्दः पक्षी ज्योतिष्मान् पुण्यान् लोकान् सञ्चरति य एवं वेद ॥८॥

छन्दःशब्देनात्र तदाश्रितं सौपर्णाख्यं साम विवक्षितं माध्य-न्दिने यच्चतुर्विंशस्तोमोऽस्ति सोऽयमितरौ पवमानगतौ ॥ ८ ॥

त्रिवृत्सप्तदशस्तोमावपेक्ष्य प्रौढ इत्यभिप्रेत्य प्रशंसति।

मध्यतो वा अग्निर्वरिष्ठस्तस्मादेते स्तोमा मध्यतो वरिष्ठाः क्रियन्ते ॥९॥

अत्रापि स्तोमा इति वचनव्यत्ययः अन्यत् पूर्व्ववत् ॥ ९ ॥

अत्रैकायाः स्तोत्रीयायाः प्रकृतिगताभ्य आधिक्यात्तां प्रशं-सति।

एका संस्तुतानां विराजमतिरिच्यत एकाकिन-मेवैनमन्नाद्यस्याध्यक्षं करोति ॥१०॥

संस्तुतानां स्तोत्रीयाणां दशसंख्याविच्छेदेन प्रकृताविव वि-राजं प्राप्तानां मध्ये एका स्तोत्रीया विराजमतिरिच्यते तद्यथा प्रकृतौ तावन्नवत्यधिकं शतं स्तोत्रीयाः याः सन्ति ताश्चैकोनविं-शतिसंख्या विराजः अत्रापि तद्वत्प्राप्तौ सत्यां मैत्रावरुणस्याध्य-

ष्टयोः पञ्चदशसप्तदशावप्योद्य त्रिवृच्चतुर्विंशौ कर्त्तव्यौ तथा च निदानेऽभिहितं त्रिवृच्चतुर्विंशावाज्यपृष्ठेषु सम्पत्तृतीयेन कुर्म इति एकातिरिच्यत इति श्रुतेरर्थसम्पादनवशेनेत्यर्थः एकयातिरिक्तया स्तोत्रीयया यजमानमेव कृत्स्नस्यान्नाद्यस्याध्यक्षं स्वामिनमुद्गाता करोति ॥ १० ॥

अस्य क्रतोरग्निसम्बन्धिरूपत्वेन ज्योतिर्नामास्ति तत्प्रशंसति।

ज्योतिर्वा एषोऽग्निष्टोमो ज्योतिष्मन्तं पुण्यं लोकञ्जयति य एवं विद्वानेतेन यजते ॥११॥

स्पष्टोऽर्थः ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य एकादशः खण्डः।

अथ द्वादशः खण्डः।

ऋषभाख्यं क्रतुं विधत्ते।

अथैष ऋषभः ॥१॥

स्पष्टोऽर्थः ॥ १ ॥

तदेतन्नाम प्रशंसति।

ऋषभो वा एष स्तोमानामृषभतां गच्छति य एवं वेद ॥२॥

एषः क्रतुः सोमानामितरक्रतूनामध्ये ऋषभतां श्रेष्ठतां प्रापयितुमस्ति ॥ २ ॥

तत्र अधिकारिणमाह ।

राजन्यं याजयेदृषभो वै पशूनामधिपतीराजन्यो मनुष्याणां यो वा अस्ति सोऽधिपतिः ॥ ३ ॥

ऋषभो वत्सोत्पादनसमर्थः पुङ्गवः स यथा पशूनामधिपतिस्तद्वदृषभाख्यो यज्ञः क्रत्वन्तराणामधिपतिरित्यभिप्रायः राजन्यस्याप्यधिपतित्वोक्तेः यज्ञेन सम्बन्धो युक्तः ॥ ३ ॥

उत्तमवर्णं विप्रं परित्यज्य राजन्ये कुतः पक्षपात इत्यतआह ।

अधिपतिः समानानां भवति य एवं वेद ॥ ४ ॥

स्पष्टं ॥ ४ ॥

सामविशेषं विधत्ते ।

तस्य सदोविशीयं माध्यन्दिने पवमाने भवति विशमेवास्मै सवनाद्यां परिगृह्णात्यनपक्रामुकास्मा-द्विड्भवति ॥ ५ ॥

पुनानः सोमधारयेत्यस्यामृचि सदोविशीयकन्नाम साम भवति नान्नि विशीयशब्दस्य श्रुतत्वात्तन्नामकसामोपेतो माध्यन्दिनपवमानो विरूपतां विशमस्मै यजमानाय पार्श्वद्वय-

वर्त्तिभ्यां प्रातःसवनतृतीयसवनाभ्यां स्वाधीनां करोति सा च विड्स्मान्नापक्रामति ॥ ५ ॥

अन्यत्साम विधत्ते ।

समन्तं भवति समन्तामेवास्मै विशं करोत्यनपक्रामुकास्माद्विड्भवति ॥ ६ ॥

दुहान ऊध इत्यस्यां विष्टारपङ्क्तौ समन्तनामकं साम विशं प्रतिजनरूपां प्रजां समन्तां परितोऽवस्थितां करोति ॥ ६ ॥

अपरं सामद्वयं विधत्ते ।

उभे बृहद्रथन्तरे भवत इयं वै रथन्तरं द्यौर्बृहदेवास्माल्लोकाद्गायत्येवामुष्मादुभयोरनयोर्लोकयोः प्रतितिष्ठति ॥ ७ ॥

पृष्ठस्तोत्रे रथन्तरं साम कुर्य्यात् बृहत्साम त्वनुष्टुभीति वक्ष्यते अनयोः साम्नोरधरोत्तरसाम्नां भूर्लोकद्युलोकरूपत्वं एवमस्माल्लोकात् भूर्लोकनिमित्तमेव रथन्तरं गायति तद्वदत्रापि योज्यं ॥ ७ ॥

बृहत्सामाश्रयं विधत्ते ।

अनुष्टुभि बृहद्भवत्यन्तो वा अनुष्टुप् छन्दसामन्तो बृहत्साम्नामन्तो राजन्यो मनुष्याणामन्त एव तदन्तं

प्रतिष्ठापयति तस्माद्यो राजन्यानाꣳ ह्रीयते न स पुनरग्रं पर्य्येति ॥ ८ ॥

इहानुष्टुभि बृहत्साम भवति अनुष्टुप्बृहतोरन्तरत्वसाम्यात् उक्थे षोडशिनश्च सकलछन्दःसामान्तेऽनुष्टुप् क्रियते वाजपेयस्यान्ते बृहत्साम क्रियते ऐश्वर्य्यवतां मनुष्याणामग्र्ये राजन्यान्तः ऐश्वर्य्यसमाप्तिस्थानं अतस्तमन्तं राजन्यं तत्तेनानुष्टुभि बृहतः करणेनान्त एवोभयविधे प्रतिष्ठापयति यस्माद्राजन्यस्य ऐश्वर्य्यस्य सीमा तस्माद्राजन्यानामग्र्ये यः पुमान् ह्रीयते ऐश्वर्य्याद्भ्रष्टो भवति स पुनः कदाचिदपि अग्रं राज्ञामग्र्ये श्रेष्ठत्वं न प्राप्नोति ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य
द्वादशः खण्डः ।

अथ त्रयोदशः खण्डः ।

गोसवाख्यं क्रतुं विधत्ते ।

यो वै वाजपेयः स राजसूयो यो राजसूयः स वरुणसवोऽथैष गोसवः स्वाराज्यो यज्ञः ॥ १ ॥

यएव वाजपेयः पूर्व्वाध्यायोक्तः सएव राजसूयः तयोरुभयोः स्वाराज्यप्राप्तिहेतुत्वसाम्यात् तथैव राजसूयवरुणसवयोरैक्यं योज्यं सूयतेऽभिषूयते सोमो यस्मिन्निति सवः सोमयागः स च पश्चाद्वरुणकर्त्तृकः वरुणस्य वै सुषुवाणस्येति श्रुतत्वात् अथानन्त-

रमेष पुरतो वक्ष्यते गोसवाख्यो यज्ञः सोऽपि यज्ञः स्वाराज्याय वाजपेयराजसूयवरुणसवा इव स्वाराज्यफलोपेतः १ ॥

एतद्वेदनं प्रशंसति ।

स्वाराज्यं गच्छति य एवं वेद ॥ २ ॥

स्पष्टोऽर्थः ॥ २ ॥

स्वाराज्यशब्दस्यार्थमाह ।

प्रजापतिर्हि स्वाराज्यं परमेष्ठी स्वाराज्यं ॥ ३ ॥

प्रजापतिर्हिरण्यगर्भो न तु कश्यपादिर्विवक्षितः तदेव विशदीकर्तुं परमेष्ठीत्युक्तं तदीयमैश्वर्यं स्वाराज्यमिति ॥ ३ ॥

तयोरभेदोपचारवेदनं प्रशंसति ।

परमेष्ठितां गच्छति य एवं वेद ॥४॥

स्पष्टं ॥ ४ ॥

पृष्ठस्तोत्रे सामद्वयं तद्वेदनप्रशंसाञ्च दर्शयति ।

उभे बृहद्रथन्तरे भवतस्तद्धि स्वाराज्यꣳ स्वाराज्यं गच्छति य एवं वेद ॥५॥

सामद्वयस्य स्वाराज्यहेतुः तथा तद्रूपत्वोपचारः ॥ ५ ॥

दक्षिणाविशेषं तद्वेदनप्रशंसाञ्च दर्शयति ।

अयुतं दक्षिणास्तद्वि स्वाराज्यꣳ स्वाराज्यं गच्छति य एवं वेद ॥६॥

अयुतं सहस्रदशकं तत्संख्याका गावोऽत्र दक्षिणाः ॥६॥

अभिषेकसाधनं द्रव्यं तद्देवनप्रशंसाञ्च दर्शयति ।

प्रतिदुहाभिषिच्यते तद्वि स्वाराज्यꣳ स्वाराज्यं गच्छति य एवं वेद ॥७॥

सद्योदुग्धं पयः प्रतिधुगित्युच्यते तेन प्रतिदुहा पयसाऽत्राभिषेकः ॥ ७ ॥

तस्य कालं तद्देवनप्रशंसाञ्च दर्शयति ।

बृहतः स्तोत्रं प्रत्यभिषिच्यते तद्वि स्वाराज्यꣳ स्वाराज्यं गच्छति य एवं वेद ॥८॥

पृष्ठेषु साम्नः सम्बन्धि यत् स्तोत्रमस्ति तत्प्रति ततः पूर्व्वं तद्योग्यत्वायेत्यर्थः ॥ ८ ॥

अभिषेकस्य देशविशेषं विधत्ते ।

अनुद्वते दक्षिणत आहवनीयस्याभिषिच्यतेऽस्यामेवानन्तर्हितेऽध्यभिषिच्यते ॥९॥

आहवनीयस्य दक्षिणभागे भूमावनुद्वते कम्बलपीठादिभिरनन्तर्हिते देशेऽभिषेकः तथा सति कृत्स्नायामपि भूमावन्तर्हितैरपि यजुभिरनवच्छिन्ने देशेऽभिषिक्तो भवति ॥ ९ ॥

• स्तोमविशेषं विधत्ते ।

सर्वः षट्त्रिंशस्तेन गोसवः ॥१०॥

अस्य क्रतोः स्तोत्रेषु यः स्तोमोऽस्ति सर्वोऽपि षट्त्रिंशएव कर्त्तव्यः षट्त्रिंशदक्षरा बृहती बार्हताः पशव इति श्रुत्यन्तरात् संख्याद्वारा पशुसम्बन्धोऽस्ति तेन सम्बन्धेनायं क्रतुः गोसवनामको भवति तैत्तिरीया अपि तथैवामनन्ति पशुस्तोमो वा एष तेन गोसव इति अन्यदपि सर्वं तैः संगत्यान्नातं एष गोसवः षट्त्रिंशउक्थ्यो बृहत्साम पवमाने क्रियतेरथन्तरं भवति यो वै वाजपेयः स सम्राट्सवः यो राजसूयः स वरुणसवः प्रजापतिः स्वाराज्यं परमेष्ठीति उभे बृहद्रथन्तरे भवतः तद्धि स्वाराज्यमयुतं दक्षिणास्तद्धि स्वाराज्यं प्रतिदुहाभिषिच्यते तद्धि स्वाराज्यं अनुब्रुते दक्षिणत आहवनीयस्य बृहतः स्तोत्रं प्रत्यभिषिञ्चतीति ॥ १० ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य
त्रयोदशः खण्डः ।

अथ चतुर्दशः खण्डः ।

मरुत्स्तोमाख्यं क्रतुं विधत्ते ।

अथैष मरुत्स्तोम एतेन वै मरुतोऽपरिमितां पुष्टिमपुष्यन्नपरिमितां पुष्टिं पुष्यति य एवं वेद ॥१॥

मरुद्भिर्दृष्टत्वाच्चायम्मरुत्स्तोमः अपरिमितामतिबऋतुं धनधान्यादिपुष्टिमकुर्व्वन्॥ १॥

स्तोमेषु किञ्चिद्विशेषं विधत्ते।

यद्गणशः स्तोमास्तेन मरुत्स्तोमो गणशो हि मरुतः॥ २॥

गणशः सङ्घरूपेणात्र स्तोमाः प्रवर्त्तन्ते त्रिवृतां सङ्घः पञ्चदशानां सङ्घः सप्तदशानां सङ्घ एकविंशानां सङ्घ इति तत्प्रवृत्तिरेकोनपञ्चाशत् ४९ मरुतो विभक्ता अपि गणरूपेणैव वर्त्तन्ते सप्तगणा वै मरुत इति श्रुत्यन्तरात् यद्यस्मान्मरुत इव स्तोमा अत्र गणशो वर्त्तन्ते तेनायं क्रतुर्मरुत्स्तोमनामकः॥ २॥

अत्र यजमानसङ्घस्याधिकारित्वमाह।

एतेनैव त्रीन् याजयेत्॥ ३॥

अनेकं त्रैकमित्यर्थः तथा सूत्रं सखायो भ्रातरो वा ये सम्प्रदेयुस्ते मरुत्स्तोमेन यजेरन्निति॥ ३॥

प्रथमं स्तोमसङ्घं विधत्ते।

यत् त्रीणि त्रिवृन्ति स्तोत्राणि भवन्ति नाना ब्रह्मवर्चसे प्रतितिष्ठन्ति॥ ४॥

बऋविधशास्त्ररूपे ब्रह्मवर्चसे यजमानास्त्रयः प्रतितिष्ठन्ति॥ ४॥

द्वितीयं स्तोमसङ्घं विधत्ते।

यत् त्रीणि पञ्चदशानि नाना वीर्य्यं ॥ ५ ॥

ब्रह्मण आज्यमच्छावाकस्याज्यं माध्यन्दिनः पवमान इत्येतानि पञ्चदशस्तोमोपेतानि तत्साध्यञ्च वीर्य्यं शारीरं वाचिकं मानसञ्चेति नानाविधं तस्मिन् प्रतितिष्ठतीति ॥ ५ ॥

तृतीयं स्तोमसङ्घं विधत्ते।

यत् त्रीणि सप्तदशानि नाना पशुषु ॥ ६ ॥

होतुः पृष्ठं मैत्रावरुणस्य पृष्ठं ब्रह्मणः पृष्ठमित्येतानि त्रीणि सप्तदशस्तोमोपेतानि साध्याः पशवो गवाश्वमहिष्यादिरूपेण नानाविधाः ॥ ६ ॥

चतुर्थं स्तोमसङ्घं विधत्ते।

यत् त्रीण्येकविंशानि नाना प्रतितिष्ठन्ति ॥ ७ ॥

अच्छावाक आर्भवः पवमानोऽग्निष्टोमसामेत्येतानि त्रीण्येकविंशस्तोमोपेतानि तत्साध्याः प्रतिष्ठिताः धनधान्यपुत्रभृत्यादिरूपेण नानाविधाः ॥ ७ ॥

वेदनं प्रशंसति।

प्रतितिष्ठति य एवं वेद ॥ ८ ॥

स्पष्टं ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य
चतुर्थः खण्डः।

अथ पञ्चदशः खण्डः ।

कुलायाख्यं क्रतुं विधत्ते ।

अथैष इन्द्राग्न्योः कुलायः प्रजाकामो वा पशुकामो वा यजेत प्रजा वै कुलायं पशवः कुलायं गृहाः कुलायं कुलायमेव भवति ॥ १ ॥

इन्द्राग्निभ्यां दृष्टत्वात्तदीयोऽयं क्रतुः स च कुलायप्राप्तिहेतुः प्रजापशुगृहाणां निवासनिमित्तत्वात् कुलायत्वं ॥ १ ॥

अत्र सङ्ख्याधिकारमाह ।

एतेनैव द्वौ याजयेत् ॥ २ ॥

द्वावेव न त्वेकमित्यर्थः ॥ २ ॥

अथ स्तोमसङ्ख्यान्विधत्ते ।

यत् षट् त्रिष्टुभ्ति स्तोत्राणि भवन्ति नाना ब्रह्मवर्चसे प्रतितिष्ठतो यत् द्वे पञ्चदशे नानावीर्ये यत् द्वे सप्तदशे नाना पशुषु यत् द्वे एकविंशे नाना प्रतितिष्ठतः प्रतितिष्ठति य एवं वेद ॥ ३ ॥

पूर्ववद्व्याख्येयं ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य पञ्चदशः खण्डः ।

अथ षोड्यः खण्डः ।

इन्द्रस्तोमाख्यं क्रतुं विधत्ते ।

अथैष पञ्चदश इन्द्रस्तोम उक्थ्यः ॥ १ ॥

सोऽयं क्रतुः सर्वेष्वपि स्तोत्रेषु पञ्चदशस्तोमयुक्तः उक्थस्तोत्रैरुपेतत्वादुक्थसंस्थारूपस्येष्टत्वादिन्द्रस्तोम उक्थ्य इति नामकः स्तोमः क्रतुः ॥ १ ॥

तद्वेदनं प्रशंसति ।

एतेन वा इन्द्रोऽत्यन्या देवता अभवदत्यन्याः प्रजा भवति य एवं वेद ॥ २ ॥

एतेनैव क्रतुना इन्द्रः स्वयमन्या अग्निवरुणाद्या देवता अत्यभवत् अतिक्रम्य समर्थोऽभवत् वेदितुरपि तथैव फलं ॥ २ ॥

तत्राधिकारिणमाह ।

राजन्यं याजयेत् ॥ ३ ॥

इन्द्रस्य क्षत्रियाभिमानिदेवतात्वात्तदीये यज्ञे क्षत्रियस्याधिकारः ॥ ३ ॥

सर्वेषु स्तोत्रेषु विहितं पञ्चदशस्तोममनूद्य प्रशंसति ।

सर्वः पञ्चदशो भवत्योजो वीर्यं पञ्चदश ओजसैवैनं वीर्येण समर्द्धयति ॥ ४ ॥

स्पष्टोऽर्थः ॥ ४ ॥

ऋग्विशेषान्विधत्ते ।

ऐन्द्रीषु भवन्तीन्द्रियेणैवैनं वीर्येण समर्द्धयति ॥ ५ ॥

इन्द्रो देवता यासामृचां ता ऐन्द्र्यः तासु द्विविधाः प्रत्यक्षाः परोक्षाश्च इन्द्रायेन्दो मरुत्वत इत्याद्याष्विन्द्रशब्दश्रवणात् एताः प्रत्यक्षा ऐन्द्र्यः वृषा सोम द्युमां असीत्याद्यासु वृषखल्यलिङ्गेन ऐन्द्रत्वानुमानादेव ऐन्द्र्यः तासु सर्वासु पञ्चदशस्तोमे सति इन्द्रियेण वीर्यसमृद्धिर्भवति ॥५॥

उक्थसंस्थारूपत्वं प्रशंसति ।

उक्थ्यो भवति पशवो वा उक्थानि विड्उक्थानि विशमेवास्मै पशूननुनियुनक्त्यनपक्रामुकास्माद्विड् भवति ॥ ६ ॥

उक्थस्तोत्राणां पशुसाधनत्वेन पशुत्वं बहुत्वसाम्येन प्रजारूपत्वं अस्मै यजमानाय प्रजां पशूननुकूलान् कृत्वा सम्पादयति सा च पुत्रादिप्रजा कदाचिदप्यस्मान्नापक्रामति ॥६॥

स्तोत्रगतां स्तोमगताञ्च पञ्चदशसंख्यां प्रशंसति ।

पञ्चदशस्तोत्राणि पञ्चदशानि भवन्त्योजो वीर्यं पञ्चदशोऽभिपूर्वमेवास्मिन्नोजो वीर्यन्दधाति ॥७॥

अस्मिन् यजमाने अभिपूर्वं शरीरं वाङ्मनश्चेत् तेनानुपूर्व्येण प्रबलं सामर्थ्यं तेषु सम्पादयति ॥७॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य षोड्शः खण्डः ।

अथ सप्तदशः खण्डः ।

इन्द्राग्निस्तोमनामकं क्रतुं विधत्ते ।

अथैष इन्द्राग्न्योः स्तोम एतेन वा इन्द्राग्नी अत्यन्या देवता अभवतामत्यन्याः प्रजा भवति य एवं वेद ॥ १ ॥

पूर्ववद्व्याख्येयं ॥१॥

सर्वेषु स्तोत्रेषु पर्य्यायेण स्तोमद्वयं विधत्ते ।

त्रिवृत् पञ्चदशो भवति ॥ २ ॥

प्रथमतृतीयपञ्चमसप्तमनवमैकादशस्तोत्रेषु त्रिवृत्स्तोमः द्वितीयचतुर्थषष्ठाष्टमदशमद्वादशस्तोत्रेषु पञ्चदशस्तोमो भवति एतदेवाभिप्रेत्य कल्पेऽभिहितं त्रिवृत्पञ्चदशौ स्तोमौ विपर्य्यासमिति ॥२॥

उक्तं स्तोमद्वयं तद्वेदनञ्च प्रशंसति ।

ब्रह्म वै त्रिवृत् क्षत्रं पञ्चदशो ब्रह्मण एव क्षत्र

क्षत्रस्येव च प्रकाशो भवति य एवं वेद ॥ ३ ॥

त्रिवृत् स्तोमस्य ब्राह्मणस्य च प्रजापतिमुखजन्यत्वसाम्यात् एकत्वोपचारः पञ्चदशस्तोमस्य क्षत्रियस्य सोऽयं प्रसिद्धिः तथा वेदितुः प्रसिद्धिद्वयं भवति ॥३॥

तत्रोभयोर्ह्यधिकारमाह ।

राजा च पुरोहितश्च यजेयातां ॥ ४ ॥

स्पष्टोऽर्थः ॥४॥

अत्रोभयोर्ब्राह्मक्षत्रिययोराभिरूप्यकथने सम्पत्तिद्वयमिति चेत् तदुच्यते ।

गायत्रीञ्च जगतीञ्च सम्पद्यते ॥ ५ ॥

षट् त्रिवृन्ति स्तोत्राणि तैः चतुःपञ्चाशत् स्तोत्रीया षट् पञ्चदशानि स्तोत्राणि तैर्भवन्ति स्तोत्रीयाः वर्गद्वयं मिलित्वा चतुश्चत्वारिंशदधिकं शतं स्तोत्रीया भवन्ति तासु चतुर्विंशति विभज्यमानाः षट् गायत्र्यो भवन्ति द्वाभ्यां गायत्रीभ्यामेका जगतीति तिस्रो जगत्यः तथा चोपग्रन्थेऽभिहितं उद्भिद्बलभित् ऐन्द्राग्नीषु चतुश्चत्वारिंशदधिकं शन्तताः षट् गायत्र्यस्तिस्रो जगत्य इति ॥५॥

उभयविधसम्पद्युक्तं फलं दर्शयति ।

तेजो ब्रह्मवर्चसं गायत्र्या ब्राह्मणोऽवरुन्धे विशं राजा जगत्या प्रविशति ॥ ६ ॥

गायत्रीसम्पत्तिनिमित्तं ब्राह्मणस्य तेजोब्रह्मवर्चसप्राप्ति-फलं जगतीसम्पत्तिनिमित्तं राज्ञः प्रजाप्राप्तिफलं ॥६॥

अस्मिन् क्रतावन्यमप्यधिकारिणमाह ।

पुरोधाकामो यजेत ॥७॥

पुरोधा राजपौरोहित्यं ॥७॥

तमेतमधिकारिणं तद्वेदनञ्च प्रशंसति ।

बृहस्पतिरकामयत देवानां पुरोधां गच्छेयमिति स एतेनायजत स देवानां पुरोधामगच्छद्गच्छति पुरोधां य एवं वेद ॥८॥

स्पष्टोऽर्थः ॥८॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य सप्तदशः खण्डः ।

अथ अष्टादशः खण्डः ।

विघनाख्यं क्रतुं विधत्ते ।

अथैष विघनः ॥१॥

स्पष्टोऽर्थः ॥१॥

एतस्य नाम्नो निमित्तं स्तूयते ।

इन्द्रोऽकामयत पाप्मानं भ्रातृव्यं विहन्यामिति

स एतं विघनमपश्यत्तेन पाप्मानं भ्रातृव्यं व्यहन् विपाप्मानं भ्रातृव्यं हते य एवं वेद ॥२॥

पुरा कदाचिदिन्द्रं राजानं मरुदादिगणदेवताः प्रजा उद्दण्डा भूत्वा नापूजयन् तदानीं पूजाप्रतिबन्धहेतुं पापरूपं शत्रुमेतेन क्रतुना विशेषेण हतवान् अतो विहननहेतुत्वादस्य विघननामकत्वं सोऽयमर्थस्तैत्तिरीयैर्विशदीकृत्वाम्नायते इन्द्रं वैश्वानरो मरुतेनोपाचयेत् सोऽनुपचय्यमान एनं विघनमपश्यत् तमाहरत् तेनायजत् तेनैवास्मान्तं संरूम्णं व्यहन् यद्व्यहन् तद्विघनस्य विघनत्वं विपाप्मानं भ्रातृव्यं हते य एतेन यजते य उ चैनमेवं वेदेति ॥ २ ॥

अस्मिन् क्रतौ विधित्सितान् स्तोमविशेषान् क्रमेण प्रशंसति।

यत् त्रिवृद्भवति प्राणाꣳ स्तेनावरुन्धे यत् द्वादशः संवत्सरं तेन यत् पञ्चदशो वीर्यं तेन यत् सप्तदशोऽन्नाद्यं तेन यदेकविंशः प्रतिष्ठा तेन यन्नवदशः प्रजननं तेन यच्चतुर्विंशो ब्रह्मवर्चसं तेन यत्त्रिणवो वज्रं भ्रातृव्याय प्रहरति ॥३॥

प्राणापानव्यानरूपेण प्राणानां त्रित्वात् त्रिवृता तत्प्राप्तियुक्ता संवत्सरस्य द्वादशमासात्मकत्वात् द्वादशस्तोमेन संवत्सरप्राप्तिः वीर्यहेतुना पञ्चदशेन वीर्यप्राप्तिः अन्नाद्यहेतुना सप्त-

दशेनान्नाद्यप्राप्तिः प्रतिष्ठाहेतुनैकविंशेन प्रतिष्ठाप्राप्तिः अस्मिन्नेकविंशस्तोमे द्वयोः स्तोत्रीययोरुपरितनयोः सत्योस्ताभ्यां न्यूने नवदशाख्यः स्तोमः सम्पद्यते तेन च न्यूनेन च प्रजोत्पत्तिर्लभ्यते तथाच श्रुत्यन्तरं न्यूनाद्वै प्रजापतिः प्रजा असृजतेति चतुर्विंशस्तोमस्य गायत्रीसाम्यात्तेन ब्रह्मवर्चसप्राप्तिः त्रिणवस्तोमस्य खड्गधारासमानत्वात् वज्रधारोपेतवज्रत्वोपचारः तेन च वज्रेण वैरी प्रहियते ॥ ३ ॥

अस्मिन् क्रतावधिकारिणमाह।

पशुकामो यजेत बृहतीꣳ सम्पद्यते पशवो वै बृहती पशूनेवावरुन्धे ॥ ४ ॥

अयं क्रतुः स्तोत्रीयासङ्ख्यायां पर्य्यालोच्यमानायां बृहती सम्पद्यते कथमिति चेत् उच्यते द्वाभ्यां त्रिवृद्भ्यामष्टादशस्तोत्रीया द्वाभ्यां द्वादशाभ्यां चतुर्विंशतिः द्वाभ्यां पञ्चदशसप्तदशाभ्यां द्वात्रिंशत् द्वाभ्यां एकविंशनवदशाभ्यां चत्वारिंशत् द्वाभ्यां चतुर्विंशाभ्यामष्टाचत्वारिंशत् द्वाभ्यां त्रिणवाभ्यां चतुःपञ्चाशत् इत्येवं द्वे शते षोडशाधिके स्तोत्रीयाणां भवतः तासु षट्त्रिंशदक्षरा बृहत्यः षट्सम्पद्यन्ते पशवश्च बृहतीसम्बन्धाच्छन्दसां पशुविषये मात्सर्य्ये सति मर्य्यादाधानं प्रतिज्ञाय बृहती विजयं प्राप्य पशून् स्वकीयानकरोत् तस्मात् बृहतीसम्पत्तिद्वारा पशुप्राप्तिर्युक्ता ॥ ४ ॥

बृहतीगतषट्संख्याद्वारापि पशुप्राप्तिमाह।

षडेता बृहत्यो भवन्ति षडृतवः संवत्सरः संवत्सरं पशवोऽनु प्रजायन्ते तानेवाप्नोवरुन्धे ॥ ५ ॥

षट्संख्यानामृतूनां संवत्सरवर्त्तित्वात्प्रतिसंवत्सरं गवादिपशूनां वत्सोत्पादनाच्च तद्द्वारा पशुप्राप्तिस्त्र स्वाधीनताकरणस्त्र सम्भवत्येव ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य
अष्टादशः खण्डः ।

अथ ऊनविंशः खण्डः ।

द्वितीयं विघनाख्यं क्रतुं विधत्ते ।

इन्द्रमदेव्यो मायाऽसचन्त स प्रजापतिमुपाधावत्तस्मा एतं विघनं प्रायच्छत्तेन सर्वान्मधो व्यहत यद्व्यहत तद्विघनस्त्र विघनत्वं ॥ १ ॥

अदेवा असुरास्तेषां सम्बन्धिन्यो याश्चा अदेव्यः माया वञ्चना असुरैः प्रयुक्ता इन्द्रमसचन्त इन्द्रेण संयुक्ता अभवन् सचेन्द्रोमायापरिहारोपायार्थं प्रजापतिं सेवित्वा विघनाख्यं क्रतुं लब्ध्वा तेन क्रतुना सर्वान्मधः सर्वाञ्छत्रून् व्यहत विशेषेण हतवान् यस्मात् व्यहत अतेन व्युत्पत्त्या क्रतोर्विघननामकत्वं सम्पन्नं ॥ १ ॥

वेदनपूर्वकयोर्यजमानयोः फलसमानमाह ।

सर्वोऽधो विहृते य एवं विद्वान्विघनेन यजते यमेवं विद्वान्विघनेन याजयति ॥ २ ॥

स्पष्टोऽर्थः ॥ २ ॥

यथात्र शत्रुविघातः फलं तथा पशुषु प्रतिष्ठाप्यस्य फलमित्याह ।

पशुकामो यजेत पशवो वै बृहती पशुष्वेव प्रतितिष्ठति ॥ ३ ॥

अत्रापि पूर्ववत् स्तोत्रेषु बृहतीसम्पत्त्या पशुप्रतिष्ठामुपपादयेत् स्तोत्रेषु स्तोत्रस्तोमविशेषप्रवृत्तिप्रकारः कल्पे दर्शितः द्वे विष्टती स्तोत्रे द्वे द्वादशे द्वे पञ्चदशसप्तदशे द्वे चतुर्विंशे द्वे त्रिणवे इति पूर्वोत्तरयोः स्तोमसृष्टिसाम्येऽपि ऋक्विशेषसामविशेषाभ्यामवान्तरभेदः कल्पादिषु द्रष्टव्यः एकैकस्य स्तोमस्य स्तोत्रद्वये प्रवृत्तिस्तैत्तिरीयब्राह्मणेऽपि सूचिता तस्य द्वे द्वादशे स्तोत्रे भवतः द्वे चतुर्विंश इति अस्मिन्नध्याये विहितानां क्रतूनां आनुपूर्वीं संगृह्य पूर्वाचार्यैरेवमुक्तं ।

राट् विराजाख्यौपयजः पुनः स्तोमस्ततः परः ।
प्रोक्तौ चतुष्टोमौ तु चतुष्टोमः प्रथमस्तयोः ।
उत्तरस्तु चतुष्टोम उद्भिद्बलभिदौ ततः ।
अथापचितिपक्ष्याख्यौ ज्योतिराख्यस्ततः परः ।
त्रयोऽभो गोसवः पश्चान्मरुत्वतीयस्ततः परः ।

कुलाय इन्द्रस्तोमः स्यादिन्द्राग्निस्तोम इत्यपि।
विघनौ द्वाविहाध्याये यागा एकोनविंशतिः।
वेदार्थस्य प्रकाशेन तमोहार्हन्निवारन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ३॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे एकोनविंशाध्यायस्य एकोनविंशः खण्डः।

एकोनविंशोऽध्यायः समाप्तिमगमत्।

अथ विंशोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं ॥
विंशाद्यैस्त्रिभिरध्यायैरहीनानां प्रकल्पनं ।
ह्यहः प्रभृतयोऽहीना द्वादशाहान्तिमाः सवाः ॥
अहान्ता अतिरात्रान्ता द्वितीयेऽह्नि समापनात् ।
त्रयोदशातिरात्रास्तु विंशाध्याये प्रकल्पिताः ॥
ह्यहास्त्रयस्तथा गर्गैरतिरात्रस्यापि किञ्चन ।
ज्योतिष्टोमोऽतिरात्रोऽथ सर्व्वस्तोम उदीरितः ॥
आप्तोर्य्यामस्तृतीयोऽत्र नवसप्तदशस्तुतः ।
पञ्चमोविषुवान् स्तोमो गोष्टोमश्च ततः परः ॥
आयुष्टोमस्ततः पश्चादभिजिद्विश्वजित्ततः ।
चत्वारस्त्रिवृदाद्या येऽतिरात्रास्त्रयोदशः ।
ह्यहेष्वङ्गिरसः पूर्व्वमुक्थ्यैत्वरथस्ततः ।
ततः कपिवनो गर्गैरतिरात्रं किञ्चिदीर्य्यते ॥

आदौ तावत् ज्योतिष्टोमस्यातिरात्रस्य स्तोमकृप्तिमाह ।

त्रिवृद्विष्टुवमानं पञ्चदशान्याज्यानि पञ्च-

दशोमाध्यन्दिनः पवमानः सप्तदशानि पृष्ठानि सप्तदश आर्भव एकविंशोऽग्निष्टोमः सोक्थः पञ्चदशी रात्रिस्त्रिवृत्सन्धिः ॥ १ ॥

अत्राग्निष्टोमान्तेषु स्तोमेषु प्रकृतवदेव स्तोमकृप्तिः त्रिष्वुत्तरस्तोत्रेष्वपि अग्निष्टोमवदेकविंशः स्तोमः त्रिषु पर्य्यायेषु यानि द्वादशस्तोत्राणि तैर्युक्ता रात्रिः पञ्चदशस्तोमोपेता सन्धिस्तोत्रे त्रिवृत् स्तोमः एतैर्युक्ते ज्योतिष्टोमेऽवान्तरभेदः ॥ १ ॥

तत्रस्थमतिरात्रं विधत्ते ।

ज्योतिष्टोमेनातिरात्रेणर्द्धिकामो यजेताभिक्रमो वा एषस्तोमानामभिक्रान्त्या अभिक्रान्ते हि यज्ञस्यर्द्धोति ॥ २ ॥

एषोऽतिरात्रः स्तोमानां यज्ञानां मध्ये अभिक्रमो वै अभितः क्रमणस्य फलप्राप्तेर्हेतुरतस्मादेतदनुष्ठानमभिक्रान्त्यै फलप्राप्त्यै भवति तस्मादनुष्ठाताऽभिक्रान्तेन फलप्राप्तियुक्तेन यज्ञस्यानुष्ठानेन ऋध्नोति सर्व्वसमृद्धिं प्राप्नोति ॥ २ ॥

अस्य क्रतोरवयवद्वारकांस्त्रीन् प्रकारान् प्रशंसति ।

एषोऽग्निष्टोम एष उक्थ एषोऽतिरात्रोऽग्निष्टोमेन वै देवा इमं लोकमभ्यजयन्नुक्थैरन्तरिक्षमतिरात्रेणामुं लोकमजयन्नहोरात्राभ्यामभ्यवर्त्तन्त ॥ ३ ॥

आद्यो द्वादशस्तोत्रगतो योऽग्निष्टोमरूपस्तेन भूर्लोकजयः मध्यम उक्थस्तोत्रभागः उक्थ्यक्रतुरूपस्तेनान्तरिक्षलोकजयः तृतीयोऽतिरात्रस्तोत्रभागोऽतिरात्रस्तेन स्वर्गलोकजयः एवमनुष्ठातारोऽहोरात्राभ्यां लोकत्रयमभिप्राप्यावस्थिताः ॥ ३ ॥

सन्धिस्तोत्रं प्रशंसति।

पराच्योवा अन्या व्युच्छन्ति प्रतीच्योऽन्या एषा वाव प्रतीचो व्युच्छति याश्विनेन व्युच्छति प्रतीचीरेवास्मा उषसोविवासयति ॥ ४ ॥

अन्याः काश्चिदुषसः सूर्योदयप्राचीनकालावस्थाः पराच्यः पुनरागमनरहितेन पराङ्मुखत्वेन युक्ता वर्त्तन्ते पुनरावृत्तेरादित्यादायुःक्षयहेतवो भवन्ति ताभ्योऽन्याः काश्चिदुषसः प्रतीच्यः पुनरावृत्तिरूपेण प्रत्यङ्मुखत्वेन युक्ता आयुषः क्षयन्न कुर्वन्ति तादृगुषा कति चेत् उच्यते येयमुषा आश्विनशस्त्रेण सह व्युच्छति विशेषेणाविर्भवति एषा वाव एषा वोषा प्रतीची संमुखेत्युच्यते तस्मादाश्विनशस्त्रेण दिनद्वयसन्धिवर्त्तिना सर्वा उषसो यजमानार्थं प्रतीचीरेव प्रत्यङ्मुखा एव कृत्वा विवासयति प्रकटीकरोति ॥ ४ ॥

अत्र स्तोत्रीयाणां सङ्ख्यां प्रशंसति।

द्वे सꣳस्तुतानां विराजमतिरिच्येते एषा वै स्तनवती विराड् यं कामकामयते तमेतां दुग्धे ॥ ५ ॥

अस्मिन् क्रतौ संस्तुतानां स्तोत्रीयाणां मध्ये स्तोत्रीये विराजमतिक्रम्य वर्त्तेते तद्यथा द्वादशस्तोत्रेषु प्रकृतिवन्नवत्यधिकशतमित्येकोनविंशतिविराजस्त्रिषूक्थस्तोत्रेष्वेकविंशस्तोमे सति त्रिषष्टिस्तोत्रीयाः तत्र षड्विराजस्त्रिसप्तस्तोत्रीया अतिरिच्यन्ते द्वादशस्तोत्रेषु पञ्चदशस्तोमे सति अशीत्यधिकं शतं स्तोत्रीयास्तत्राष्टादशविराजः सन्धिस्तोत्रे त्रिवृत्स्तोमे सति नव स्तोत्रीयाः तत्र पूर्वोक्तानां तिसृणामध्ये एकया स्तोत्रीयया सह विराट् भवति ततो द्वे स्तोत्रीये अवशिष्येते तेन विराड्रूपाया योषितस्तत्स्थानीयाः तस्मादेषा विराट् स्तनवती सम्पन्ना एतां विराजं कामधेनुसदृशीं यजमानस्यापेक्षितं सर्वं कामं दुग्ध ॥ ५ ॥

वक्ष्यमाणस्य सन्धिस्तोत्रगतौ स्तोमौ प्रशंसति।

त्रिवृता प्रैति त्रिवृतोदेति प्राणो वै त्रिवृत्प्राणेनैव प्रैति प्राणमभ्युदेति ॥ ६ ॥

त्रिवृत्स्तोमेनेमं क्रतुं प्रैति प्रारभते उदेति समापयति प्राणवृत्तित्रयसाम्ये त्रिवृता प्राणमेव प्रारम्भसमाप्ती सम्पद्येते ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य
प्रथमः खण्डः।

अथ द्वितीयः खण्डः।

सर्वस्तोमाख्यस्यातिरात्रस्य स्तोमकृप्तिं दर्शयति।

त्रिष्टुब्बृहिष्प्रवमानं पञ्चदशान्याज्यानि सप्तदशो-माध्यन्दिनः पवमान एकविंशानि पृष्ठानि त्रिणव आर्भवस्त्रयस्त्रिंशोऽग्निष्टोमः प्रत्यवरोहोऽयुक्थानि त्रिणवं प्रथमं द्वे एकविंशे सप्तदशिके पञ्चदशी रात्रिस्त्रिष्टत्सन्धिः ॥ १ ॥

अत त्रीण्युक्थानि प्रत्यवरोहीणि विपरीतक्रमोपेतानि स एव क्रमस्त्रिणवमित्यादिना स्पष्टीक्रियते त्रिषु प्रथमं स्तोत्र-मधिकसंख्यायुक्तेन त्रिणवस्तोमेनोपेतं उत्तरे द्वे स्तोत्रे न्यून-संख्यायुक्तेनैकविंशस्तोमेनोपेते ते च द्वे स्तोत्रे सप्तदशिके अतः षोडशिस्तोत्रेऽप्येकविंशस्तोमः पूर्वोक्तक्रतुः षोडशिरहितः अयं त्वतिरात्रः सप्तदशिकः स्पष्टमन्यत् ॥ १ ॥

अथाधिकारिणमाह ॥

सर्वस्तोमेनातिरात्रेण बुभूषन्यजेत सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाप्नोति सर्वञ्जयति ॥ २ ॥

यः पुमानेवमर्थमिच्छति सोऽत्राधिकारी अयञ्च क्रतुरैहि-कस्यामुष्मिकस्य प्रापणीयस्य सर्वस्य प्राप्तौ समर्थः तथा जेतव्यस्य च सर्वस्य शत्रुसमूहस्य जयाय पर्य्याप्तः तस्मादेतेन क्रतुना प्राप्तव्यं सर्वमपि प्राप्नोति जेतव्यं सर्वं जयति ॥ २ ॥

अस्मिन् क्रतौ विद्यमानान् स्तोमान् विद्यमानानि छन्दांसि च प्रशंसति ।

यत्त्रिवृद्बहिष्पवमानं भवति तत्त्रिवृतꣳ स्तोममाप्नोति गायत्रीं छन्दो यत् पञ्चदशान्याज्यानि तत् पञ्चदशꣳ स्तोममाप्नोति त्रिष्टुभं छन्दो यत्माध्यन्दिनः पवमानस्तत्सप्तदशꣳ स्तोममाप्नोति जगतीं छन्दोयदेकविꣳशानि पृष्ठानि तदेकविꣳशꣳ स्तोममाप्नोत्यनुष्टुभं छन्दोयत्त्रिणव आर्भवस्तत्त्रिणवꣳ स्तोममाप्नोति पङ्क्तिं छन्दोयत्त्रयस्त्रिꣳशोऽग्निष्टोमस्तत्त्रयस्त्रिꣳशꣳ स्तोममाप्नोति विराजं छन्दोयदुक्थ्यक्ककुभौ क्रियेते तदुक्थ्यक्ककुभावाप्नोति यद्बृहतीषु सन्धिना स्तुवन्ति तद्बृहतीमाप्नोति यदाग्निनꣳ शस्यते तत्सर्वमेवैतेनाप्नोति सर्व्वञ्जयति ॥३॥

पृष्ठे षडहे षट्सु दिनेषु क्रमेण त्रिवृत्पञ्चदशसप्तदशैकविंशत्रिणवत्रयस्त्रिंशाख्याः सर्वे स्तोमा विद्यन्ते यथा गायत्र्यादीनि छन्दांसि भवन्ति गायत्रं प्रथममहरुष्णिहं द्वितीयञ्जागतं तृतीयमानुष्टुभं चतुर्थं पाङ्क्तं पञ्चमं सर्व्वछन्दस्कं षष्ठं तथा चातिरात्रबहिष्पवमानादिस्तोत्रैस्सङ्गतत्रिवृदादिस्तोमाभिमानिदेवताः स्तोमसहभाविगायत्र्यादिछन्दोऽभिमानिदेवताश्च प्राप्नोति अत सर्व्वछन्दःसमष्टिरूपत्वेन विराजोऽभिप्रेत्य तत् प्राप्तिरुच्यते विश्वरूपेण राजमानत्वात्तद्रूपत्वोपचारः ॥ ३ ॥

अथास्मिन् सर्वस्तोमेऽतिरात्रे पञ्चैकादशिनीं विधत्ते ।

प्राङ्चं वै त्रयस्त्रिंशोयज्ञं प्रभुजति तमध्वर्युरेकादशिन्या पुरस्तात्प्रत्युद्यच्छत्येकादश रशना एकादश पशव एकाग्र यूपा भवन्ति तत्त्रयस्त्रिंशे त्रयस्त्रिंशं प्रतिष्ठापयति ॥ ४ ॥

योऽयं त्रयस्त्रिंशः स्तोमः सोऽन्यं सर्वेषां स्तोमानां समाग्निस्थानीयः त्रयस्त्रिंशो वै स्तोमानां प्रतिष्ठेति श्रुतेः स चास्य क्रतोर्मध्येऽग्निष्टोमसाम्नि प्रयुक्तः सन् पाञ्चमजुल्वेन गच्छन्नमेतं यज्ञं प्रभुजति प्रकर्षेण कुटिलं यज्ञं अध्वर्युः पुरस्तात् प्रातःकाले क्रतया पक्षेकादशिन्या प्रत्युद्यच्छति पुनः कौटिल्यपरिहारेणोद्यतं करोति एकोत्तराणां दशानां समाहार एकादशिनी यूपस्तम्बवेष्टनहेतवो रज्जवो रशनास्तासां रशनानाञ्च प्रत्येकमेकादशसंख्योपेतत्वान्मिलित्वा त्रयस्त्रिंशत् संख्या सम्पद्यते तथास्मिंस्त्रयस्त्रिंशत्सङ्ख्ये यज्ञकौटिल्यकारिणं त्रयस्त्रिंशस्तोमं प्रतिष्ठापयति ॥ ४ ॥

उक्तक्रत्वनुष्ठायितद्वैदिनोः समानफलमाह ।

तया समुद्यतया रात्र्या यं यङ्कामं कामयते तं तमध्यश्नुते यं यङ्कामं कामयते तं तमध्यश्नुते य एवं वेद ॥ ५ ॥

समुद्यतया सम्यगनुष्ठितेनानेनातिरात्रक्रतुना सप्टमन्यत् ॥ ५

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य
द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

आप्नोर्य्यामाख्यं क्रतुं विवक्षुस्तत्र स्तोमकृप्तिं दर्शयति ।

त्रिवृद्बृहिष्मवमानं पञ्चदशान्याज्यानि सप्तदशो माध्यन्दिनः पवमान एकविंशश्च हारियोजनं पृष्ठं छन्दोमा इतराणि त्रिणव आर्भवस्त्रयस्त्रिंशोऽग्निष्टोमः प्रत्यवरोहण्युक्थानि त्रिणवं प्रथममथैकविंशमथ सप्तदशमेकविंशः षोडशी पञ्चदशी रात्रिस्त्रिवृत् सन्धिस्त्रिवृत् प्रथममतिरिक्तस्तोत्रमथ पञ्चदशमथ सप्तदशमथैकविंशं ॥ १ ॥

इयञ्च स्तोमकृप्तिः पूर्व्वाचार्य्यैरित्थं संगृहीता, आद्यस्तु त्रिवृतः पञ्चदशस्तोत्रचतुष्टयं। ततः सप्तदशश्चैकविंशं तस्मात्परस्त्रयः। छन्दोमास्त्रिणवस्यापि त्रयस्त्रिंशं ततः परं। त्रिणवश्चैकविंशश्च तथा सप्तदशः परः। एकविंशं पञ्चदशस्तोत्रेषु द्वादशस्त्रयः। त्रयोस्त्रिवृत् ततः पञ्चदशः सप्तदशस्ततः। एकविंश इति प्रोक्तमाप्नोर्य्यामे प्रकल्पनमिति पूर्व्वस्मिन् सर्व्वस्तोमातिरात्रे एतस्मिन्नाप्नोर्य्यामे च त्रयाणां प्रत्यवरोहीये सान्नि सत्यपि तत्र तृतीयस्योक्थस्यैकविंशस्तोमः अत्र तु सप्तदश इति विशेषः सन्नेरुपरि षडार्भवातिरिक्तानि ततोऽत्र त्रयस्त्रिंशस्तोत्राणि ॥ १ ॥

यथोक्तकल्पनोपेतस्य क्रतोराप्नोर्य्यामनामनिर्व्वचनस्यानुकूलामाख्यायिकामाह ।

प्रजापतिः पशूनसृजत तेऽस्मात् सृष्टा अपाक्रामन् स्तानग्निष्टोमेन नाप्नोत्तानुक्थैर्नाप्नोत्तान् षोडशिना नाप्नोत्तानाप्त्वा नाप्नोत्तान् सन्धिना नाप्नोत्तानाश्विनेन नाप्नोत्तानग्निमब्रवीदिमान्म ईप्सेति तानग्निस्त्रिवृता स्तोमेन जराबोधीयेन साम्ना नाप्नोत्तानिन्द्रमब्रवीदिमान्म ईप्सेति तानिन्द्रः पञ्चदशेन स्तोमेन सत्वासाहीयेन साम्ना नाप्नोत्तान् विश्वान् देवानब्रवीदिमान्मईप्सतेति तान्विश्वे देवाः सप्तदशेन स्तोमेन मार्गीयवेण साम्ना नाप्नुवन्स्तान्विष्णुमब्रवीदिमान्म ईप्सेति तान् विष्णुरेकविंशेन स्तोमेनाप्नोद्वारवन्तीयेनावारयतेदं विष्णुर्विचक्रम इति व्यक्रमत ॥२

अग्निष्टोमस्तोत्रादिकैराश्विनशस्त्रान्तैः प्रयोगविशेषैः पशुप्राप्त्यभावात्प्रजापतिरग्निमब्रवीत् हे अग्ने तानिमान् पशून् केनाप्युपायेन त्वन्मदर्थमीप्से प्राप्तुमिच्छ एवमुक्तः स अग्निः जराबोधतद्विविड्ढीत्येतस्याम्नश्च्युत्पन्नं जराबोधीयनामकं साम त्रिवृत् स्तोमयुक्तं प्रयुज्य पशून्न प्राप्नोत् तथैवेन्द्रो विश्वे देवाश्च नाप्नुवन् त्यसुवः सत्वासाहमित्यस्याम्नश्च्युत्पन्नं साम सत्वासाहीयं तद्गायेत्यस्याम्नश्च्युत्पन्नं साम मार्गीयवं अश्वन्नत्वा इत्यस्याम्नश्च्युत्पन्नं साम वारवन्तीयं तेनैकविंशस्तोमयुक्तेन विष्णुः पशून् प्राप्यापक्रमणान्निवारितवान् प्राप्तौ स्तोमसाधननिवारणे साम

साधनं इदं विष्णुरित्येतया स्तोत्रीयया यथोचितसामोपेतया विष्णुर्व्यक्रमत विशेषेण पशूनामन्तः प्रविवेश ॥ २ ॥

उक्तक्रतावधिकारिणमाह ।

यस्मात्प्रेव पशवोभ्रऽश्नेरन् स एतेन यजेत ॥३॥

पशवो गवाश्वाद्यो यस्मात् पुरुषात् प्रप्रेवात्यन्तप्रकर्षेणैव स्रष्टा अभवन् स एतेन क्रतुनेष्ट्वा संज्ञानिवार्थं पशुसमृद्धिं प्राप्नुवन्निति ॥ ३ ॥

अस्य क्रतोः सर्वकामप्राप्तिहेतुत्वमाह ।

एतेन वै देवा जैत्वानि जित्वा यं यं काममकामयन्त तं तमाप्नुवन्यं कामङ्कामयते तमेतेनाप्नोति ॥ ४

जैत्वानि जेतव्यान्यसुरसैन्यानि देवदन्योऽपि कामितं फलमाप्नोति ॥ ४ ॥

क्रतुनाम्नोनिर्वचनं दर्शयति ।

तदाप्नोर्याम्नोऽप्नोर्यामत्वं ॥ ५ ॥

तत्तस्मादेतेन सर्वमाप्नोतीति व्युत्पत्तेः सङ्गावादित्यर्थः तैत्तिरीयाश्च प्रजापतिः पशूनसृजतेत्याख्यातं सर्वमाम्नायन्ते निर्वचनमेवमामनन्ति यदाप्नोत् तदाप्नोर्यामत्वमिति यामन्शब्दो

यामशब्दस्य नियमनार्थः अयं क्रतुरामव्यानां फलानां नियामक इत्यर्थः ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य
तृतीयः खण्डः।

अथ चतुर्थः खण्डः।

नवसप्तदशाख्येऽतिरात्रक्रतौ स्तोमकृप्तिमाह।

त्रिष्टुब्बहिष्पवमानं पञ्चदशꣳ होतुराज्यन्नव सप्तदशानि स्तोत्राण्येकविꣳशोऽग्निष्टोमः स्तोक्थः पञ्चदशी रात्रिस्त्रिष्टुत्सन्धिः ॥ १ ॥

अत्र मैत्रावरुणस्याज्यमारभ्याभिप्लवपवमानपर्यन्तं नवसंख्याकानि स्तोत्राणि सप्तदशस्तोमोपेतानि अतएवायं क्रतुर्नवसप्तदशाख्यः ॥ १ ॥

तस्मिन्नधिकारिणमाह।

नवसप्तदशेनातिरात्रेण प्रजाकामो यजेत नव वै प्राणाः प्रजापतिः सप्तदशः प्राणेभ्य एव तदधि प्रजापतेः प्रजाः प्रजायन्ते ॥ २ ॥

नवच्छिद्रवर्त्तित्वान्नवसङ्ख्याकाः प्राणाः द्वादशमासपञ्चर्तु

द्वादशसंवत्सरसप्तदशावयवोपेतः स एव कालात्मकः प्रजापतिस्तेन नवसप्तदशाख्यक्रत्वनुष्ठानेन प्राणेभ्य एव निमित्तभूतेभ्यः प्रजापतेः कालात्मकादधि वाङ्मुख्येन पुत्रपौत्रादिरूपाः प्रजा उत्पद्यन्ते ॥ २ ॥

कस्याश्चित् स्तोत्रीयायाः स्थाने विशेषं विधत्ते ।

ककुभं प्राचीमुदूहति पुरुषो वै ककुब्गर्भो वा एष मध्यतो धीयते ॥ ३ ॥

तृतीयसवने योऽयमार्भवः पवमानस्तत्र पवस्व मधुमत्तम इति या ककुब्भवति तां प्राचीमुदूहति स्वस्थानादुद्धृत्य ततः पूर्वभाविनां माध्यन्दिनसवनगतां कृत्वा प्रयुञ्जीत ककुभः पुत्रोत्पत्तिहेतुत्वात् पुरुषत्वं स च ककुप्रूपः पुरुषो वै गर्भ एव भूत्वा यज्ञस्योदरस्थाने माध्यन्दिनसवनेऽवस्थाप्यते ॥ ३ ॥

ककुप्छन्दस्थायामुक्तायामृचि साकमश्वनामकं सामविशेषं विधत्ते ।

तस्याꣳ साकमश्वꣳ ॥ ४ ॥

भवतीति शेषः ॥ ४ ॥

तत्साम प्रशंसति ।

प्रजापतिः प्रजा असृजत तान् प्राजायन्त स एतत् सामापश्यत्ता अश्वो भूत्वाभ्यजिघत्ताः प्राजायन्त प्रजनं वा एतत् साम ॥ ५ ॥

प्रजापतिना सृष्टाः प्रजाः पुत्रपौत्रादिप्रकर्षेण प्राप्ताः प्रजापतिरिदं साम दृष्ट्वा तेन साम्नाऽयमखो भूत्वा ताः प्रजास्तेनेष्ट्वा अभ्यजिघ्नत् सर्वत आघ्राणन्तदाक्रतवान् तेन प्रतिबन्धापाये सति ताः प्रजाः प्रकर्षेण पुत्रपौत्रादिरूपेणाभिवृद्धिं प्राप्ताः तस्मात् साकमश्वनामकं साम प्रजोत्पत्तिसाधनं भवत्येव अश्वरूपेण प्रजापतिना वर्त्तत इति साम्नः साकमश्वनाम सम्पन्नं ॥ ५ ॥

एतद्वैदनं प्रशंसति।

प्रजायते बह्वृर्भवति य एवं वेद ॥ ६ ॥

पुत्रपौत्रादिरूपेण प्रजननाद्बह्वृभावः ॥ ६ ॥

परिप्रधन्नेत्येतां द्विपदास्तुतिं विधत्ते।

द्विपदां ककुभो लोके करोति गर्भमेव तद्धितं मध्यतः प्रजनयति ॥ ७ ॥

आर्भवपवमानाद्या ककुबुद्भूता तस्माल्लोके स्थाने द्विपदां कुर्य्यात् तत्तेन द्विपदायाः करणेन यज्ञस्य मध्यतो हितमुदरे स्थापितं पुरुषरूपं गर्भमुत्पादयत्येव ॥ ७ ॥

अस्य क्रतोरतिरात्रत्वं प्रशंसति।

अतिरात्रो भवत्यहोरात्रे वा अनुप्रजाः प्रजायन्तेऽहोरात्रे एवानुप्रजया पशुभिः प्रजायते ॥ ८ ॥

रात्रिमत्यतीत्य परदिनपर्य्यन्तं वर्त्तत इत्ययं क्रतुरतिरात्रः लोके हि जायमानाः प्रजाः अहश्च रात्रिञ्चानुसृत्यैवोत्पद्यन्ते उभयातिरिक्तस्य कालस्याभावात् कालद्वयव्यापिक्रतोरनुष्ठाने सत्यहनि रात्रौ च सर्व्वदा पशुप्रजासमृद्धो भवति ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य

चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

विषुवदतिरात्राख्यक्रतोः स्तोमक्लृप्तिमाह ।

विषुवद् बहिष्पवमानं पञ्चदशान्याज्यानि पञ्चदशो माध्यन्दिनः पवमानः सप्तदशानि पृष्ठानि सप्तदश आर्भव एकविंशोऽग्निष्टोमः सप्तदशान्युक्थानि पञ्चदशो रात्रिस्त्रिवृत्सन्धिः ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

अस्मिन् क्रतावधिकारिणमाह ।

विषुवतातिरात्रेण ज्येष्ठं ज्यैष्ठिनेयं याजयेद्विषुवान् वा एष स्तोमानां विषुवानेव भवति ॥ २ ॥

विल्लेव्याप्ताविति धातोरुत्पन्नो विषुवशब्दः सत्यन्तः मध्यवर्त्तिनमेकविंशमग्निष्टोममाचष्टे तस्यैकविंशस्योभयत आरोहावरोह-

रूपाभ्यामवस्थितैः स्तोमैर्व्याप्तत्वात् पूर्व्वत्र त्रिवृत्पञ्चदशाना-मनुक्रमादारोहः उत्तरत्र सप्तदशत्रिवृतान्तं व्युत्क्रमेणावरोहा-दवरोहः एवमुभयतो व्याप्तत्वाद्विष्णुनामकएकविंशोयस्मिन् क्रतावस्ति सोऽयं विष्णुवान् यस्या योषितो ज्येष्ठो भ्राता विद्यते सा ज्यैष्ठिनी तस्याः पुत्रो ज्यैष्ठिनेयः यः पुमान् भ्रातॄणां मध्ये ज्येष्ठः सोऽत्राधिकारी एष क्रतुः स्तोमानां यज्ञानां मध्ये पूर्व्वोक्तरीत्या विष्णुवानेव तदनुष्ठातापि विष्णुवानेव भवति अत्र पुरस्तात् पश्चाच्च बहुभिः सेवकैः व्याप्तः प्रभुः पुरुषो विपुरित्यु-च्यते तादृशस्य पुरुषस्य स्वामी विष्णुवान् प्रभुपुरुषैः सेव्यो भवती-त्यर्थः ॥ २ ॥

मध्यवर्त्तिनमेकविंशस्तोमं प्रशंसति ।

यदेक एकविꣳशो भवत्येकविꣳशो वा दूतोऽसा-वादित्यो द्वादशमासाः पञ्चर्त्तवस्त्रय इमे लोका असावादित्य एकविꣳश आदित्यस्यैवैनन्मात्रां गम-यति ॥ ३ ॥

त्रिवृदादयः स्तोमाः आरोहावरोहाभ्यामावर्त्तितत्वात् प्रत्येकं द्वित्वमापन्नाः एकविंशस्त्वनावर्त्तितएकएवादित्यवदवति-ष्ठत इति यदस्ति तेनैनं यजमानं आदित्यस्यैव मात्रां गमयति यावानादित्यस्य महिमास्ति तावन्तं महिमानमाप्नोति कथमादि-त्यवदवस्थानमिति चेत् संख्यासाम्यादिति ब्रूमः मासर्तुलोका-

दित्यरूपेणावस्थिते जगति तदवयवेषु मासादिकमेण परिगणि-
तेष्वादित्य एकविंशो भवति ॥ ३ ॥

तदिदं संख्यासाम्यं आदित्यस्य महिमानं दर्शयति ।

एष वा उदेति न वा एनमन्यत् ज्योतिषां ज्योतिः प्रत्युदेति ॥ ४ ॥

एष एवादित्योऽन्धकारं निवर्त्तयन् प्रतिदिनं प्राच्यां दिश्यु-
दयं गच्छति ज्योतिषामग्निचन्द्रनक्षत्रादीनां मध्ये यत्किमप्यन्य-
दादित्यव्यतिरिक्तं ज्योतिरेनं प्रत्येतस्यादित्यप्रतिनिधिरूपेण
न वा उदेति सर्व्वथा नोदेति ॥ ४ ॥

ईदृगादित्यमहिम्नो वेदनं प्रशंसति ।

नैनमन्यः स्वेषु प्रत्युदेति य एवं वेद ॥ ५ ॥

एनं वेदितारं स्वेषु ज्ञातिषु मध्ये कोऽन्यः पुरुषो न प्रत्युदेति
प्रतिकूलो भूत्वा नोद्गच्छति किन्तु सर्व्वोऽप्येनमनुवर्त्तत एव ॥ ५ ॥

इति तात्पर्यमहाब्राह्मणे विंशाध्यायस्य
पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

गोष्टोमातिरात्राख्यस्य क्रतोः स्तोमसंपत्तिमधिकारिणं फल-
माह ।

पञ्चदशं बर्हिष्प्रवमानं त्रिवृत्स्याज्यानि सप्तदशं माध्यन्दिनꣳ सवनमेकविꣳशं तृतीयसवनꣳ सोक्थं पञ्चदशो राविस्त्रिवृत्सन्धिर्गोष्टोमेनातिरात्रेण भ्रातृव्यवान्यजेत गत्वा वै देवा असुरानेभ्यो लोकेभ्योन्दन्त रात्र्यानपजय्यमजयन्नेभ्यो लोकेभ्यो भ्रातृव्यं प्रणुद्य रात्र्यानपजय्यञ्जयति ॥ १ ॥

अस्य क्रतोरहनि प्रयुज्यमानो गोष्टोमभागोऽत्र गोशब्देनाभिधीयते तेन गोष्टोमेनासुरापनोदनं सम्पन्नं यदप्यन्यदनपजय्यञ्जेतुमशक्यमसुरसम्बन्धिनगरधनादिकमस्ति तत्सर्वं रात्रौ प्रयुज्यमानेनातिरात्रभागेन जिते देवानामिवानुष्ठातुरणुभ्य सिध्यति ॥ १ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य

षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

आयुष्टोमातिरात्राख्यस्य क्रतोः स्तोमसंपत्तिमधिकारिणं पूर्वोत्तरभागयोर्विभज्य फलञ्चाह ।

त्रिवृत् बर्हिष्प्रवमानं पञ्चदशान्याज्यानि सप्तदशं माध्यन्दिनꣳ सवनमेकविꣳशं तृतीयसवनं सोक्थं

पञ्चदशी रात्रिस्त्रिवृत्सन्धिरायुष्टोमेनातिरात्रेण स्वर्गकामो यजेतोर्ध्वाः स्तोमायन्त्यनपभ्रंशाय यदतिरात्रो भवत्यहोरात्राभ्यामेव स्वर्गं लोकमेति ॥ १ ॥

पूर्वभागेन त्रिवृदाद्या एकविंशान्ताः स्तोमा उर्ध्वा अनुक्रमेण प्रवृत्ता इति नास्त्यपभ्रंशः उत्तरभागेन सहाहोरात्रानुष्ठानं स्वर्गसाधनं ॥ १ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य
सप्तमः खण्डः।

अथ अष्टमः खण्डः।

अभिजिदतिरात्राख्यस्य क्रतोः स्तोमकृप्तिमधिकारिणं भागद्वयफलञ्चाह।

त्रिवृत् बर्हिष्पवमानं पञ्चदशꣳ होतुराज्यꣳ सप्तदशस्यैवावरुणस्य पञ्चदशं ब्राह्मणाच्छꣳसिनः सप्तदशमच्छावाकस्यैकविंशो माध्यन्दिनः पवमानः सप्तदशं होतुःष्ठमेकविꣳशस्यैवावरुणस्य त्रिणवं ब्राह्मणाच्छꣳसिन एकविꣳशमच्छावाकस्य त्रिणव आर्भवस्त्रयस्त्रिꣳशोऽग्निष्टोमः प्रत्यवरोहोऽयुक्थानि त्रिणवं प्रथमं द्वे एकविंशे सप्तोडशिके पञ्चदशी

राचिस्त्रिवृत्सन्धिरभिजितातिरात्रेण भ्रातृव्यवान्यजेताभिजिता वै देवा असुरानिमान् लोकानथ्यजयन्नाच्यानपजय्यमजयन्नभिजितैव भ्रातृव्यमिमान् लोकानभिजित्य रात्र्यानपजय्यञ्जयति ॥ १ ॥

इमान्लोकान् पृथिव्यन्तरिक्षद्युलोकानभिलक्ष्यासुरानजयन् लोकेभ्योऽसुरान्निःसारितवन्तः स्पष्टमन्यत् ॥ १ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य
अष्टमः खण्डः ।

अथ नवमः खण्डः ।

विश्वजिदतिरात्राख्यस्य क्रतोः स्तोमकृप्तिमधिकारिणश्चाह ।

त्रिवृत्बर्हिष्पवमानं पञ्चदशꣳ होतुराज्यꣳ सप्तदशम्मैत्रावरुणस्यैकविꣳशं ब्राह्मणाच्छꣳसिनः पञ्चदशमच्छावाकस्य सप्तदशो माध्यन्दिनः पवमान एकविꣳशं होतुः पृष्ठं त्रिणवम्मैत्रावरुणस्य सप्तदशं ब्राह्मणाच्छꣳसिन एकविꣳशमच्छावाकस्य त्रिणव आर्भवस्त्रयस्त्रिꣳशोऽग्निष्टोमः प्रत्यवरोहोऽग्न्युक्थानि त्रिणवं प्रथमं द्वे एकविꣳशे सपोडशिके पञ्चदशी

राचिः चित्पत्न्विर्विश्वजितातिरात्रेण पशुकामो यजेत ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

अनेन पशुप्राप्तिः कथमित्याशङ्क्य शस्त्रद्वारेणेत्यभिप्रायेणाह।

रेतोहि नाभानेदिष्ठीयं पशवो बालखिल्या यन्नाभानेदिष्ठीयं पूर्वेऽहन्शस्यत उत्तरा बालखिल्यारेतसस्त्पशवः प्रजायन्ते रूपाणि विकरोति यद्वार्षाकपस्तुषु प्रतितिष्ठति यदेवयामरुत् ॥ २ ॥

विश्वजितस्तृतीयसवने शस्त्रिणां मध्ये होता नाभानेदिष्ठीयं शंसति इदमित्यारौद्रं गूर्तवता इत्येतत् सूक्तं नाभानेदिष्ठीयं नाभानेदिष्ठेन मुनिना दृष्टत्वान्नैतावरुणस्य अभिष्टवः सुराधसमित्याद्याः बालखिल्याख्या ऋचः शंसति तत्र नाभानेदिष्ठीयं रेतोरूपं तल्लिङ्गस्य स्तूयमाणत्वात्तथा हि काचिद्गवेव पश्यते मनागग्रेतोऽहतुर्व्रियन्ता सानौ निषिक्तं सुकृतस्य योनौ पिता यत् स्वां दुहितरमधिष्कन्नृचरेयौनः सञ्जग्मानो निषिञ्चदिति बालखिल्यासु पशुरूपाः तासां बृहतीछन्दस्त्वात् बार्हताः पशव इति श्रुत्यन्तरे श्रवणात् अतो नाभानेदिष्ठीयेन रेतसि सिक्ते सति तस्माद्रेतसो बालखिल्याभिः साध्याः पशवः प्रजायन्ते ब्राह्मणाच्छंसी तु विहितोरसा ऋतेति सूक्तं शंसति तच्च वार्षा-

कपं दृषाकपिना दृष्टत्वात् तेन वार्षाकपेन पशुषु गोमहिषाश्व धेनुबलीवर्दवृषादिरूपाणि विकरोति विशेषेण सम्पादयति अच्छावाकस्तु प्रवोमहेमतयोर्यं तु विषाव इत्येतत् सूक्तं शंसति तच्च सूक्तमेव यामरुन्नामकं केनचिदेव यामरुता मुनिना दृष्टत्वात् यदिदं सूक्तमस्ति तेन वसन्ताद्यनुषु प्रतितिष्ठति ॥ २ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य

प्रथमः खण्डः ।

अथ दशमः खण्डः ।

अथैकस्तोमकाश्चतुरोऽतिरात्राः सन्ति तेषु त्रिवृदतिरात्रः प्रथमः पञ्चदशातिरात्रो द्वितीयः सप्तदशातिरात्रस्तृतीय एकविंशातिरात्रश्चतुर्थः; तानेतान् चतुरोऽतिरात्रान् तत्तदधिकारिणस्तत्फलानि च क्रमेणाह ।

त्रिवृतातिरात्रेण ब्रह्मवर्चसकामो यजेत तेजो वै त्रिवृत् ब्रह्मवर्चसं तेजएव ब्रह्मवर्चसमवरुन्धे तेजसि ब्रह्मवर्चसे प्रतितिष्ठति पञ्चदशेनातिरात्रेण वीर्यकामो यजेतौजो वीर्यं पञ्चदश ओजएव वीर्यमवरुन्धओजसि वीर्ये प्रतितिष्ठति सप्तदशेनातिरात्रेणान्नाद्यकामो यजेतान्नं वै सप्तदशोऽन्नाद्यमेवावरुन्धे एकविंशेनातिरात्रेण प्रतिष्ठाकामो यजेत प्रतिष्ठा

वा एकविंशो यदतिरात्रो भवत्यहोरात्रयोरेव प्रतितिष्ठति ॥ १ ॥

अत्र विष्टदादीनां ब्रह्मवर्चसादिफलहेतुत्वं यच्छ्रुतं तत् पूर्वमसकृदुपपादितं स्पष्टमन्यत् ॥ १ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य
दशमः खण्डः ।

अथ एकादशः खण्डः ।

उक्तास्त्रयोदशप्रकारा अतिरात्राः अथाहीनेषु द्विरात्रा वक्तव्यास्तेष्वङ्गिरसां द्विरात्रं विधत्ते ।

ज्योतिष्टोमोऽग्निष्टोमः पूर्वमहः सर्वस्तोमोऽतिरात्र उत्तरं ॥ १ ॥

पूर्वस्मिन्नहनि प्रकृतितो विशेषो नास्ति ॥ १ ॥

उत्तरस्याह्नः स्तोमकृत्तिमाह ।

तस्य चतुर्विंशं वहिष्पवमानं पञ्चदशान्याज्यानि सप्तदशो माध्यन्दिनः पवमान एकविंशानि पृष्ठानि त्रिणव आर्भवस्त्रयस्त्रिंशोऽग्निष्टोमः प्रत्यवरोहोऽष्टकथानि त्रिणवं प्रथममथैकविंशमथ

सप्तदशमेकविंशः षोडशी पञ्चदशी राचित्स्विष्टत् सन्धिः ॥ २ ॥

अस्याध्यायस्य द्वितीयखण्डे यः सर्वस्तोमोऽतिरात्र उक्तः तस्मिंस्विष्टद्वहिष्पवमानं अत्र चतुर्विंशं तथा तृतीयसुक्थं तत्रैकविंशं अत्र तु सप्तदशमिति विशेषः ॥ २ ॥

अनयोरह्नोः क्रमेण सामद्वयविधिमभिप्रेत्योपाख्यानमाह।

अङ्गिरसः स्वर्गं लोकमायꣳ स्तेषाꣳ हविष्माꣳश्च हविष्कृच्चाङ्गिरसा त्वहोयेतान्तावागच्छतां यतोऽङ्गिरसः स्वर्गं लोकमायꣳ स्तावतप्येतां तावेते सामनी अपश्यतां ताभ्यां द्विरात्रमतन्वातां तेन स्वर्गं लोकमैतां ॥ ३ ॥

अङ्गिरसो नामका ऋषयः सत्रमनुष्ठाय तेन सत्रेण स्वर्गं लोकं प्राप्नुवन् तथा च तैत्तिरीया आमनन्ति अङ्गिरसो वै सत्रमासत ते स्वर्गं लोकमायन्निति तेषामङ्गिरसां मध्ये हविष्मान्नामक एक ऋषिः हविष्कृन्नामकोऽपरस्तावभावहीयेतां तयोरुभयोः सत्रानुष्ठानं स्वर्गप्राप्तिश्च नासीत् इतरेऽङ्गिरसो यतो यस्माद्देशात् स्वर्गं प्राप्नुवन् सदेशः स्वर्गप्राप्तिहेतुरिति मन्वानावुभौ तं देशमागतौ तावेतौ स्वर्गप्राप्त्यभावे सति तत्प्राप्तिसाधनमिच्छन्तौ तपोऽकुरुतां तेन च तपोबलेन स्वर्गप्राप्तिके सामनी अपश्यतां ताभ्यां सामभ्यां द्विरात्रनामकं क्रतुमतन्वातां विस्त-

रेणानुष्ठितवन्तौ तयोः सान्नोर्मध्ये हविष्कृन्नामकं साम प्रथमेऽह्नि स्वादिष्ठयेत्यस्यां गेयं अथ द्वितीयं हविष्मन्नामकं यत्साम तदेतत् द्वितीयेऽहन्यस्य प्रतामनुद्युतमित्यस्यामृचि गातव्यं उक्तसामोपेतेन द्विरात्रेण तावुभौ स्वर्गं लोकं प्राप्नुतां तस्मात् द्विरात्रक्रतौ सामद्वयं गायेदित्यभिप्रायः ॥ ३ ॥

उक्तक्रतावधिकारिणमाह ।

यः पौरयोहीन इव स्यात् स एतेन यजेताप्नोति पूर्वेषां प्रहामाप्नुताꣳ हि तावङ्गिरसः ॥ ४ ॥

औतस्नात्तेषु पुण्येषु कर्म्मसु साधुः पौरयस्नाद्गोऽपि मदन्यः पुमान् हीन इव स्यात् पुण्यात्मनां सर्वेः पूज्यानां पुरुषाणां मध्ये हीन इव पूजारहित इव भवेत् स पुमानेतेन द्विरात्रेण यजेत इष्ट्वा पूर्वेषां पूज्यानामग्रे प्रहां प्रकृष्टगतिं प्राप्नोति ओहाङ्गताविति धातोरयं शब्दः हि यस्मात् कारणात् अङ्गिरसः वचनव्यत्ययेनान्वयः अङ्गिरसां स्वर्गं प्राप्तानां गतिं द्विरात्रेणानेन तावुभौ हविष्मद्धविष्कृतौ प्राप्नुतां तस्मादेतेनोक्तसमगतिर्युक्ता ॥४॥

अस्य क्रतोः फलान्तरमाह ।

प्रजाकामो यजेत द्वितीयं ह्येतद्यत्प्रजा ॥ ५ ॥

पुत्रपौत्रादिरूपाः प्रजा यदस्ति तदेतत् स्वापेक्षया द्वितीयं तस्मादनेन द्वितीयपरातिरात्रयुक्तेन क्रतुना प्रजासिद्धिरुपपन्ना ॥ ५ ॥

पुनः फलान्तरमाह।

स्वर्गकामो यजेत द्वितीयाद्वि लोकात्परोलोकोऽभिप्रक्रम्यो दुराधो द्विरात्र इत्याङ्गुर्यदग्निष्टोमः पूर्वमहर्भवत्युक्थ्यमन्तर्य्यन्ति यदुक्थोऽग्निष्टोमं॥ ६॥

भूर्लोकः प्रथमः अन्तरिक्षलोको द्वितीयस्तस्मात्परः ऊर्ध्वभावी स्वर्गोलोकोऽभिप्रक्रम्याभिलक्ष्य प्रकर्षेण गन्तव्यः हि यस्मादेवं तस्मात् लोकद्वयस्थानीयेन द्विरात्रेण तृतीयलोकस्थानीयस्य स्वर्गस्य प्राप्तिर्युज्यते ब्रह्मवादिनां द्विरात्रक्रतुरस्तीति सोऽयं दुराधः दुःखेनाराधनीय इति ब्रह्मवादिन आहुः कथमिति चेत् तदुच्यते उत्तरमहस्तावद्तिरात्र इति स्थितं पूर्वमहः किमग्निष्टोमान्तः स्यादुक्थ्यो वा अग्निष्टोमश्चेदुक्थ्यमन्तर्य्यन्ति परित्यजन्ति उक्थ्यश्चेदग्निष्टोमं परित्यजन्ति सोऽयं दुःखो दुःखपरिहार इत्यभिप्रायः॥ ६॥

तस्याश्चेपस्य परिहारमाह।

यज्ज्योतिरुक्थ्यः पूर्वमहर्भवति नाग्निष्टोममन्तर्यन्ति नोक्थानि॥ ७॥

तिष्ठतु तावत्पूर्वस्मादग्निष्टोमत्वपक्षः यद्यदि पूर्वमहरुक्थो ज्योतिरुक्थ्यः संस्थारूपो ज्योतिष्टोमो भवति तदानीं पञ्चदशस्तोत्रयुक्ते तस्मिन् द्वादशस्तोत्रयुक्तं अग्निष्टोमं न अन्तर्यन्ति न परित्यजन्ति उत्तराणि च त्रीण्युक्थस्तोत्राणि न परित्यजन्ति तस्मान्नोक्थशेषोऽस्ति॥ ७॥

ननु वक्ष्यमाणे द्विरात्रे चैत्ररथं पूर्वस्याह्न उक्थ्यत्वादयं दोषपरिहारः स्तुत्याङ्गिरसे तु द्विरात्रे कथं दोषपरिहार इत्याशङ्क्याह।

तदाङ्गिरेषा वाव यज्ञस्य मात्रा यदग्निष्टोमो यदग्निष्टोमः पूर्वमहर्भवति यज्ञस्य मात्रान्नातिक्रामत्यथोत्तरस्याह्न उक्थ्येभ्योऽधिरात्रिमुपयन्ति तेनोक्थान्यनन्तरितानि ॥ ८ ॥

तत्तस्य चोदितदोषस्याभिज्ञा ये ब्रह्मवादिनः परिहारमाहुः कथमिति चेत्तदुच्यते अग्निष्टोम इति यदस्ति एषा वाव यज्ञस्य मात्रा सर्वस्य सोमयागस्य तावत्येव स्वरूपपरिमितिः अग्निष्टोमस्य सर्वं सोमयागप्रकृतित्वेन सर्वस्वरूपस्योपपत्तेः एवं सति यद्यग्निष्टोमस्य पूर्वमहर्भवेत् तदानीं सर्वस्य यज्ञस्य मात्रां स्वरूपपरिमाणमनुष्ठाता नातिक्रामति नोद्वमयति अथानन्तरमुत्तरस्याह्नः उक्थ्येभ्योऽधिरात्रिमुपयन्ति रात्रिसोत्रायणमनुतिष्ठन्ति तस्मादुक्थानामव्यतिक्रमो नास्ति इत्यग्निष्टोमत्वपक्षेऽपि दोषपरिहारः ॥ ८ ॥

उत्तरेऽहनि प्रथमस्तोमं प्रशंसति।

चतुर्विंशं वहिष्यमानं भवत्युत्तरस्याह्नश्चतुर्विंशत्यक्षरा गायत्रो प्रजननं गायत्री प्रजात्यै ॥ ९ ॥

स्पष्टोऽर्थः ॥ ९ ॥

सर्वान् स्तोमान् प्रशंसति ।

उभये स्तोमा युग्मन्तश्चायुजश्च तन्मिथुनं तस्मान्मिथुनात्प्रजायते ॥ १० ॥

चतुस्त्रिंशस्य समसंख्योपेतत्वादुग्मत्वं बहुवचनं पूजार्थं सप्तमन्यत् ॥ १० ॥

अस्यातिरात्रस्य त्रिष्टदादित्रयस्त्रिंशान्तं निखिलस्तोमयुक्तत्वं प्रशंसति ।

सर्वस्तोमोऽतिरात्रो भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाप्नोति सर्वं जयति ॥ ११ ॥

अतिरात्रस्य सर्वस्तोमयुक्तत्वं यदस्ति तदेतत् सर्वस्य प्रायणीयस्य प्राप्त्यर्थं अपरं व्याख्यातं ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य
एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

आङ्गिरसं द्विरात्रमुक्त्वा चैत्ररथं द्विरात्रमाह ।

अथ यस्य ज्योतिरुक्थ्यः पूर्वमहर्भवत्यायुरतिरात्रउत्तरं ॥ १ ॥

पूर्वस्मिन् द्विरात्रे अग्निष्टोमः पूर्वमहः अस्मिन् द्विरात्र-

उक्थ्यसंस्थो ज्योतिष्टोम उत्तरमहर्य्यस्य द्विरात्रस्य एकमहः-कृप्तिः तं द्विरात्रमनुतिष्ठेदिति शेषः ॥ १ ॥

अस्य द्विरात्रस्य स्तोत्रीयसंख्यामुपजीव्य प्रजोत्पत्तिहेतुत्वं दर्शयति।

तिस्रः पूर्वस्माद्वा विराजमतिरिच्यन्ते द्वाभ्यामुत्तरमहर्विराज ऊनमूनातिरिक्तं वा अनुप्रजाः प्रजायन्ते ॥ २ ॥

अत्र यदेतत् पूर्व्वमहरुक्थसंस्थज्योतिष्टोमरूपं तस्य सम्बन्धिनीषु स्तोत्रीयासु दशसंख्यया विच्छिद्य विराट् रूपत्वेन विद्यमानेषु तिस्रः स्तोत्रीया विराट्रूपत्वमतीत्य वर्त्तन्ते ते अग्निष्टोमभागे तावत्यवयधिकं शतं अत एकोनविंशतिविराजः सम्पद्यन्ते त्रिपूक्थस्तोत्रेष्वेकविंशस्तोमयुक्तेषु षष्टिस्तोत्रीयाः तासु षड्भ्यो विराड्भ्य उपरि तिस्रः स्तोत्रीया अतिरिक्ता भवन्ति तथा द्वितीयेऽहनि स्तोत्रीयाणां स्वरूपं विराजो द्वाभ्यां न्यूनं भवति तद्यथा उक्थ्यस्तोत्रपर्य्यन्त आयुष्टोमभागे स्तोत्रीयाणामेकोनषष्ट्यधिकं शतद्वयमिति पूर्व्वत्रैव व्यवस्थितं तथा सति पञ्चविंशतिसंख्याभ्यो विराड्भ्य ऊर्द्धं नवस्तोत्रीयशेषादेकोना विराड् भवति आषोडशिको ह्येवमतिरात्रः तस्मात् षोडशस्तोत्रगता संख्या नादरणीया रात्रिपर्य्यायस्तोत्रेषु द्वादशसु पञ्चदशस्तोमयुक्तेष्वशीत्यधिकं शतं स्तोत्रीया भवन्ति तत्राष्टादशविराजः सम्पद्यन्ते सन्धिस्तोत्रस्य त्रिवृत्स्तोमः तत्र

नवसंख्याकाः स्तोत्रीयाः प्रत्येकोना विराड् भवति एवं सत्युत्तरेऽहनि द्वयोर्विराजस्वरूपे प्रथमेऽहनि विराजस्वरूपं तिसृभिरतिरिक्तं ऊनातिरिक्तात्मकं तदुभयस्वरूपमतु प्रजानामुत्पत्तिः भवति लोके हि योषितो गुह्येन्द्रियमतु * लिङ्गरहितत्वात् द्वाभ्यां न्यूनं, पुंसस्तु द्वाभ्यां लिङ्गेन वातिरिक्तं, तदुभयं यथा प्रजोत्पादकं ॥ २ ॥

तदेतदनं प्रशंसति।

प्रप्रजया प्रपशुभिर्ज्जायते यएवं वेद ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

प्रकारान्तरेणातिरिक्तं सम्पाद्य प्रशंसति।

एका सप्तस्तुतानां विराजमतिरिच्यत एकाक्षिन-मेवैनमन्नाद्यस्याध्यक्षं करोति ॥ ४ ॥

प्रथमेऽहनि यास्तिस्रोऽतिरिक्तास्तासां मध्ये द्वयमानीय द्वितीयेऽहनि विराजः पूरणीयाः तथा सति सप्तस्तुतानां स्तोत्रीयाणां मध्ये विराजमेका स्तोत्रीयातिलङ्घ्य तिष्ठति तथा यजमानमेवान्नाधिपतिं करोति अयमेव सर्वेभ्यो बन्धुभृत्येभ्योऽन्नप्रदो भवतीत्यर्थः ॥ ४ ॥

अस्य द्विरात्रस्य चैतरथत्वं सम्पादयितुमाख्यायिकामाह।

* असंस्कृतोऽनुमीयते किन्तु सर्वपुस्तकेषु पाठः समानएव दृष्टः।

एतेन वै चित्ररथं कापेया अयाजयꣳस्तमेका-
क्षिनमन्नाद्यस्याध्यक्षमकुर्व्वꣳ स्तस्माच्चैत्ररथीनामेकः
क्षत्रपतिर्ज्जायते नुलम्ब इव द्वितीयः ॥ ५ ॥

कपिगोत्रे समुत्पन्ना महर्षयः कापेयास्ते ह्येतेनैव द्विरात्रेण चित्ररथनामकं राजानं याजयित्वा तमेवमन्नाद्यस्याध्यक्षमकुर्व्वन् तस्मात्कारणाद्यापि चित्रवंशोत्पन्नानां मध्ये एक एव राजा क्षत्रपतिर्वेलाधिपतिर्भवति द्वितीयस्तु तस्माद्वेतोः नुलम्ब इव तस्यानुचर इव भवति चित्ररथेनानुष्ठितत्वादयं क्रतुश्चैत्ररथ इत्यभिप्रायः ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य
द्वादशः खण्डः ।

अथ त्रयोदशः खण्डः ।

कापिवनं द्विरात्रमाह ।

अथ यस्य विष्टत्यञ्चदशोऽग्निष्टोमः पूर्वमहर्भव-
त्यायुरतिरात्र उत्तरं ॥ १ ॥

विष्टत्स्तोमसहितपञ्चदशस्तोमे यस्मिन्नग्निष्टोमोऽस्ति सोऽयं विष्टत्यञ्चदशः तत्र सर्व्वेषु स्तोत्रेषु विष्टत्पञ्चदशौ स्तोमौ पर्य्यायेण प्रयोक्तव्यौ अग्निष्टोमः पूर्व्वमहः पूर्व्ववदायुष्टोमोऽतिरात्रो द्वितीयमहः यस्यैवमहःक्रमिणः सोऽनुष्ठेयः ॥ १ ॥

तत्र प्रथममहः प्रशंसति।

मिथुनाभ्याꣳ स्तोमाभ्यामुत्तरमहः प्रजनयन्ति तत्प्रजातꣳश्व आरभन्ते चक्रे वा एते साकं हृतो यत् त्रिवृत्पञ्चदशौ स्तोमौ यं कामं कामयते तमेतेनाप्नुते यत्र यच्च हि चक्रीवता कामयते तत्तदाप्नुते ॥ २ ॥

प्रथमेऽहनि मिथुनवत् द्वन्द्वभूतौ द्वौ स्तोमौ ताभ्यामत्रिजः उत्तरमहरुत्पादयन्ति यथा लौकिकमिथुनात् प्रजोत्पत्तिस्तद्वदुत्पन्नं तदहः परेद्युरधिष्ठानं प्रारभन्ते किञ्च त्रिवृत्पञ्चदशौ स्तोमौ यौ विद्येते एते उभे चक्रे हे रथस्थानीयेन प्रथमेनाप्नोति यत्रेत्यादिर्लौकिकदृष्टान्तः चक्रयोः समाहारश्चक्री स यस्यास्तीति सोऽयं रथः चक्रीवान् लोके पुमान् यत्र स्थाने गन्तुं कामयते तत्र स्थानं चक्रीवता रथेन प्राप्नोति तद्वदीत्यर्थः ॥ २ ॥

द्वितीयमहः प्रशंसति।

अथ यदायुरतिरात्रो भवति प्रतिष्ठित्यै ॥ ३ ॥

योऽयमायुष्टोमोऽतिरात्रोऽस्ति सोऽयं प्राप्तेषु कामेषु प्रतिष्ठायै स्थैर्याय सम्पद्यते ॥ ३ ॥

अस्य द्विरात्रस्य कापिवनत्वं दर्शयति।

एतेन वै कपिवनो भौवायन इष्ट्वोत्तामगच्छत् ॥ ४ ॥

भूनामकस्य महर्षेः पुत्रोभौवायनः कापिवन इति तस्य नाम स एतेन द्विरात्रेण स्वयमरूक्षतामगच्छत् रूक्षः उग्रः औषणोपलक्षितो हरिद्रो वा तद्विपरीत्येन शान्तः समृद्धो वा अभवत् कापिवनेनानुष्ठितत्वात् कापिवनइत्यर्थः ॥ ४ ॥

वेदनपूर्वकानुष्ठानस्य फलमाह।

अरूक्षो भवति यएवं विद्वानेतेन यजते ॥ ५ ॥

स्पष्टोऽर्थः ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य

त्रयोदशः खण्डः।

अथ चतुर्दशः खण्डः।

उक्तास्त्रयो द्विरात्राः अथ त्रिरात्रेषु प्रथमं गर्गत्रिरात्रमाह।

त्रिवृत्प्रातस्सवनं पञ्चदशम्माध्यन्दिनꣳ सवनꣳ सप्तदशं तृतीयसवनं पञ्चदशं प्रातःसवनꣳ सप्तदशं माध्यन्दिनꣳ सवनमेकविꣳशं तृतीयसवनꣳ सोक्थ्यमेकविꣳशं प्रातःसवनं त्रिणवं माध्यन्दिनꣳ सवनं त्रयस्त्रिꣳश आर्भवश्चतुस्त्रिꣳशोऽग्निष्टोम एकविꣳ-

**ग्यान्युक्थानि षषोडशिकानि षोडशं प्रथमꣳ रात्रि-
षाम पञ्चदशी रात्रिस्त्रिवृत्सन्धिः ॥ १ ॥**

अथ त्रीण्यहानि क्रमेणाग्निष्टोमोक्थातिरात्ररूपाणि ॥१॥

तमेतं त्रिरात्रं स्तोतुमन्तरिक्ष इत्येतस्याहस्त्रयस्य सृष्टि-
माह ।

**प्रजापतिर्वा इदमेक आसीत्तस्य वागेव स्वमा-
सीद्वाग् द्वितीया स ऐक्षतेमामेव वाचं विसृजा इयं वा
इदꣳ सर्वं बिभवन्त्येष्यतीति स वाचं व्यसृजत मेदꣳ
सर्वं बिभवन्त्यैत् सोर्ध्वोदातनोद्यथापां धारा मन्तवं
तस्या एति तृतीयमच्छिनत्तङ्गूमिरभवद्भूदिव वा
इदमिति तङ्गूमेर्भूमित्वं केति तृतीयमच्छिनत्तदन्त-
रिक्षमभवदन्तरेव वा इदमिति तदन्तरिक्षस्यान्त-
रिक्षत्वꣳ हो इति तृतीयमूर्ध्वमुदास्यत् तत् द्यौरभव-
द्द्युतदिव वा अदइति तद्दिवो दिवत्वं ॥ २ ॥**

इदं प्रतीयमानं जगच्छब्दरूपमर्थरूपञ्च तयोः शब्दा-
र्थयोः सृष्टेः पुरा प्रजापतिर्वा एक आसीत् प्रजापतिशब्देनात्र
चिदेकरसरूपोमायाशक्तियुक्तः परमेश्वर उच्यते स एवैक-
स्मादानीमासीत् स एवैक आसीत् ततः सपरमेश्वर एकः स्वामी
तस्य प्रभुत्वे द्वितीयेत्येवं स्वस्वामिरूपं द्वयमासीत् तदानीं

परमेश्वर ऐक्षत मनसि विचारितवान् कथं विचारितवानिति चेत् तदुच्यते इमामेव मम स्वभूतां द्वितीयां वाचं विसृजे विविधत्वेन सृजामि तत इयमेव वाङ्मनःसंकल्पवशादिदं प्रतीयमानं सर्व्वजगदिदं भवन्ती विशेषेण भवन्तीति सर्व्वजगदाकारेण भासमाना सती मासेष्यति प्राप्स्यतीति स इत्थं विचार्य्य शब्दसामान्यरूपां वाचं व्यसृजत विविधत्वेन सृष्टवान् ततः सा शब्दसामान्यरूपा वाक् इदं सर्व्वं शब्दजातं विशेषेण भवन्ती प्रजापतिमैत् प्राप्नोत् ततः सा वागूर्ज्जा मायाविशिष्टादव्यक्तादुद्गता सती स्वतश्छन्दविशेषेण रूपेणोदातनोत् उत्कर्षेण समन्ताद्विस्तृतः भवेत् तत्र दृष्टान्तः यथा दृष्टात्रयां धारा मेघादुद्गता सन्तता भूमौ सर्व्वतो व्याप्ता भवति तद्वदेदशास्त्रलौकिकभाषारूपेण या वाक् सन्तता तस्याः सकाशाद्ऋृणां गानभागमनपेक्ष्य तृतीयं भागं सप्रजापतिरक्षिनत् पृथक्कृतवान् स भाग एतीत्यस्यार्थ्य प्रदर्श्यते अकार इतिशब्दपरः सन् एतीति निर्द्दिश्यते अकारस्तृतीयो भाग इत्यर्थः तदकारस्वरूपश्चात्र वाक्यार्थरूपा भूमिरभवत् तदानीं प्रजापतिः स्वमनस्येवं चिन्तयामास इदं पृथिवीरूपमभूदिव वै पूर्व्वमविद्यमानं सदिदानीं विद्यमानमेवासीत् इत्येवं यस्माच्चिन्तितवान् तत्तस्मात् कारणादस्या भूतेरभूदिति व्युत्पत्त्या भूमिनाम सम्पन्नं ओमित्यस्मिन् वाग्व्यवहारे योऽयमादिरकारः सोऽयं वाचकः भूमिर्वाच्याभूदिति तात्पर्य्यार्थः, स प्रजापतिर्वाचः प्रसादकरं तृतीयभागं दृष्ट्वा पुनः केत्यन्तं तृतीयभागमक्षिनत् पृथक् कृतवान् तत् कशब्द-

रूपवाचकं भूत्वा पुनर्वाच्यमन्तरिक्षमभवत् तदानीं प्रजापतिरेवं चिन्तितवान् इदं प्रतीयमानं अन्तरिक्षाख्यमन्तरा द्यावापृथिव्योर्मध्ये इव वै स्थितमेवेत्यर्थः यस्मादेवं चिन्तितवान् तत् तस्मादन्तरिक्षलोकस्यान्तरवस्थितमिति व्युत्पत्यान्तरिक्षनाम सम्पन्नं तस्मिन्नाग्नि पकारात् पूर्वं कोऽस्ति तस्मादसावन्तरिक्षवाचक इत्यभिप्रायः भूम्यन्तरिक्षवाचकावधारकशब्दौ निर्माय तदपेक्षया तृतीयं वाचो भागं हो इति शब्दमूर्ध्वमुदास्यत् ऊर्ध्वदेशमुद्दिश्य तद्वाचकत्वेनोत्कर्षेण प्रक्षिप्तवान् उच्चारितवानित्यर्थः तदुच्चारणं हो इति शब्दरूपमूर्ध्वदेशवाचकं भूत्वा द्यौरभवत् तदा प्रजापतिरेवं चिन्तितवान् अहो द्युलोकरूपं वस्तु अद्यतदिव चन्द्रसूर्य्यादिप्रकाशो द्योतमानमेवेति यस्मादेवं तस्मात् द्युलोकस्य दिवत्वं द्युनामकत्वं सम्पन्नं ॥ २ ॥

प्रजापतिना यान्यक्षराणि वाचः सकाशात् छिन्नानि तानि पुनः प्रशंसति ।

एषा वाव प्रत्यक्षं वाग्यज्जिह्वाग्रेणैतद्वाचो वदति यदेति मध्येनैतद्वाचो वदति यत् केति सर्वयैतद्वाचो रसोऽधूर्ध्व उद्वदति यद्वो इति ॥ ३ ॥

यदक्षरं एषैव त्रिरूपा वागस्माकं प्रत्यक्षा यथा भवति तथोपलभ्या इति शेषः यदेति जिह्वेत्यादिना स्पष्टीकरोति एति यदस्ति आकाररूपं यदक्षरमस्ति एतद्वाचः सम्बन्ध्यक्षरं जिह्वाग्रेण मात्रकामन्त्रोच्चारणेन जिह्वयोः प्रथमव्यापारेण लोको

वदति, केति यत् द्वितीयमक्षरमस्ति एतदक्षरं मध्येऽत्र मात्रका-मन्ते षोडशस्वरेभ्य ऊर्ध्वगतेन मध्येन जिह्वाव्यापारेण लोको वदति, ह्वो इति यदक्षरमस्ति तदक्षरस्वरूपं वाचः सर्वो रसः अतएवाध्वर्युः मात्रकामन्त्र अधिकत्वेनोर्ध्वभागे मन्त्रावसाने ह-कारः पठितः तदिदं ह्वो इत्यक्षरं लोकस्तूद्गीति उच्चस्वरेण पठति ॥ ३ ॥

उक्तानां त्रयाणामक्षराणां सृष्टिप्रशंसाद्वोक्ता त्रिरात्रक्रतु-सम्बन्धमाह ।

यद्येतानि रूपाण्यन्वहं व्यज्यन्ते मुखतएव तद्वाचं विसृजन्ते मुखतो यज्ञियं कर्म्म ॥ ४ ॥

एतान्यक्षरो इति त्रीण्यक्षररूपाणि त्रिरात्रक्रतावन्वहं प्रतिदिनं व्यज्यन्ते विशेषेणाज्यस्तोत्रेषु प्रक्षिप्यन्ते अजगति-क्षेपणयोरिति धातुः आज्यस्तोत्रेषु कथं विक्षेप इति चेत् उच्यते प्रथमेऽहन्यग्न आयाहि वीतय इत्यादावकारः पठितः द्वितीये-ऽहनि कयाते अग्ने अङ्गिरस इति शब्द आदौ पठितः तृतीये-ऽहनि होता देवो अमर्त्य इति ह्वो शब्द आदौ पठितः यद्यस्मादेवं तस्मान्मुखत एव आज्यस्तोत्ररूपे यज्ञस्य मुखभाग एव वाच-मक्षरत्रयरूपां विसृजन्ते विशेषेण सम्पादयन्ति किञ्च यज्ञियं यज्ञसम्बन्धि यत् प्रोक्ताक्षरसाध्यमाज्यस्तोत्ररूपं कर्म्म तन् मुख-तो यज्ञमुखे सम्पादयन्ति ॥ ४ ॥

अथैतस्य त्रिरात्रस्य पुष्टिहेतुत्वं विवक्षुराह ।

प्रजापतिर्वा इदमेकाक्षरां वाचꣳ सतीं त्रेधा-
व्यकरोत्तदमे लोका अभवन् रूक्षा अनुपजीवनाः स
ऐक्षत कथमिमे लोकालोम गृह्णीयुः कथमुपजीव-
नीयाः स्युरिति स एतं विराजमपश्यत्तमाहरत्ते-
नेमान् लोकानन्वातनोत्ततो वा इमे लोकालोमा-
गृह्णꣳ स्तत उपजीवनीया अभवꣳस्विराजस्य वा इदं
पुष्टं विराजस्योदरणं यदिदमेषु लोकेष्वधि ॥ ५ ॥

प्रजापतिशब्देनाचिन्त्यशक्तिः परमेश्वरः इदमित्यस्य लिङ्ग-
व्यत्ययः स ईश्वरः इमां वाचं त्रेधा भागत्रयरूपेण व्याकरोत्
विकारमापादितवान् कीदृशीं वाचं एकां अक्षरां सतीं वागि-
त्यनेन शब्देन व्यवह्रियमाणत्वात् एकाक्षरा ककारस्य हल्-
मात्रस्य पृथगक्षरत्वव्यवहाराभावाद्वागिति शब्दस्यैकाक्षरस्य
ये विकारास्ते पृथिव्यन्तरिक्षद्यूरूपा इमे त्रयो लोका अभवन्
यथा क्षीरं दधि भवति तथा विधिवाक्योपेतत्वात् एवमीश्व-
रस्याचिन्त्यशक्तिवशाच्छब्दस्य लोकत्रयरूपापत्तिर्द्रष्टव्या ते च
त्रयो लोका अनुपजीवना जीवनहेतुभोग्यद्रव्यरहिताः अतएव
रूक्षाः शुष्काः सन्तापहेतवोऽभवन् तदा स प्रजापतिरित्थं
विचारयन् इमे लोकाः कथं लोम ग्रहीयुः लोम प्रकृते व्रीहि-
यवादिभोग्यं वस्तु कथं स्वीकुर्युः स्वीकृत्यच प्राणिनामुपभोगेन
योग्याः कथं भवेयुः स प्रजापतिरित्थं विचार्य्य वेदान् पर्या-

लोच्य व्रीहियवाद्युत्पादनसाधनमेतद्वर्गत्रिरात्रमपश्यत्तं क्रतुमाहरदन्वतिष्ठत् तेनानुष्ठितेन क्रतुना त्रीनिमान् लोकानानुक्रमेण सर्व्वतो व्याप्नवान् पर्य्यालोच्य व्रीहियवानेषु लोकेषु चोत्पादयन् सामर्थ्यं सम्पादितवान् तदनन्तरमेव प्रथमेनाह्ना भूलोके सामर्थ्यमभूत् मध्यमेनान्तरिक्षे उत्तमेन दिवि ततो वै तदनन्तरमेवेमे लोका लोमोत्पाद्यं तं भोग्यजातमगच्छन् ओषधिवनस्पतयः पृथिव्या लोमेनेष्ट्वा अन्तरिक्षस्य लोम चन्द्रतारकाद्या दिवो लोम ततो भोग्यसद्भावात् लोका उपजीवनयोग्या अभवन् यदिदं भोग्यजातमेषु लोकेष्वधि वनस्पतीन् लोकान् अधितिष्ठति तदिदं भोग्यवस्तु त्रिरात्रक्रतोरेवं सम्बन्धि पुष्टं पुष्टिकारणं यतस्त्रिरात्रस्य सम्बन्धित्वेन उदरणं भोग्यवस्तुवदुद्गममभूत् ततस्त्रिरात्रस्य पुष्टिहेतुत्वं युक्तं ॥ ५ ॥

एतद्वेदनं प्रशंसति ।

गच्छति पशूनां भूमानं द्विपदां चतुष्पदां य एवं वेद ॥ ६ ॥

द्विपदो मनुष्याः पुत्रभृत्यादयो मयादिवद्भोग्यत्वात्पशवः भूमानं बाहुल्यं गच्छति प्राप्नोति ॥ ६ ॥

पूर्व्वमुक्तो इत्यृचत्रयमुपजीव्य यथा त्रिरात्रः प्रशस्तः तथैवाचरेति शब्दमुपजीव्य त्रिरात्रं प्रशंसति ।

प्रजापतिर्यज्ञाचं व्यसृजत साचरदेवेति प्रथमं

चेति द्वितीयं रेति तृतीयं येन येन वै रूपेण प्रजापतिर्वाचं व्यसृजत तेन तेन रूपेणाज्यानि चारभ्यन्तेऽहानि चाप्यन्ते ॥ ७ ॥

प्रजापतिः पुनरपि वाचं स्वीकृत्य विविधत्वेन सृष्टवानिति यदस्ति सा सृष्टा वाक् भिन्नभाण्डस्थितोदकवदक्षरदस्रवदेव तस्याः सृताथा वाचः प्रति प्रथमं रूपं अकार इति शब्दपर एतीति निर्दिश्यते चेति द्वितीयं रूपं रेति तृतीयमेतदक्षरशब्दनिष्पत्तिः एवं सति प्रजापतिः येन येन रूपेण वाचं विधत्ते तेन तेन रूपेणाज्यस्तोत्रारम्भाः त्यक्तफलभूतलोकत्रयप्राप्तिश्च सम्पद्यते कथमिति चेदुच्यते अकचो इत्येतत्त्रयसृष्टिमुपजीव्याज्यस्तोत्रारम्भाः पूर्वमुदाहृतः अक्षरेत्येतत् त्रयमुपजीव्य लोकत्रयप्राप्तिमुदाक्रियते अकारो भूर्लोकः अयं लोक इति वाक्यस्यादावकारसद्भावात् क्षित्यन्तरिक्षलोक इत्यत्र चकारसद्भावात् द्यौरिति द्युलोक इत्यत्र रेफसद्भावात् एवञ्च सति त्रयाणामक्षां फलभूतास्त्रयो लोका अक्षरेति त्रिभिर्वाग्भवैः प्राप्यन्ते ॥ ७ ॥

पुनरपि तमेतं विराजं पुरुषसादृश्यसम्पादनेन प्रशंसति।

तदाहुर्ब्रह्मवादिनोऽक्षरेत्या वै विराज इत्येकाक्षरा वै वाक् चाक्षरमक्षरं चाक्षरः पुरुषः सवा एनं वेदेत्याहुर्य्य एनं पुरुषसम्मितं वेदेति ॥ ८ ॥

कथमित्याशङ्क्य तदेवैकेत्यादिना सृष्टीकृतं वागेकाक्षरा

वे ककारस्य पृथगक्षरत्वाभावाद्वाचो निष्पन्नमक्षरमिति पूर्वोक्त-नीत्या विराजेऽयमक्षरे स्थितो भवति मन्त्ररूपया वाचा निष्पन्नत्वात् एकाक्षरायां वाचि स्थितिः एति चेति रेति विराजः फलानां लोकानामुक्तत्वादक्षरनाम्नि त्र्यक्षरे स्थितिः पुरुष इत्येतदपि नाम त्र्यक्षरं ततः पुरुषतुल्यत्वं वेद स पुमानिदं विराजं वेद इति शब्द उक्तार्थसमाप्त्यर्थः ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य
चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः ।

प्रकारान्तरेण गर्गविराजं स्तौति ।

एतेन वै देवा एषु लोकेष्वार्ध्नुवन्नेतेन स्वर्गं लोकमायन् ॥ १ ॥

ये पुरुषादेवत्वं वाञ्छन्ति ते पुरा एतं विराजमन्वतिष्ठन् ते एतेनैव विराजेणेषु लोकप्रदेशेषु भोग्यवस्तुसमृद्धिं प्राप्य तत एतेन विराजेण देहपातादूर्ध्वं देवा भूत्वा स्वर्गं लोकं प्राप्नुवन् ॥ १ ॥

पूर्वखण्डोक्तमर्थमनूद्याग्निवाय्वादित्यानामक्षरादुत्पत्तिमाह।

वाग्वै विराचो वाचो रूपेणाज्यानि चाहानि च विभज्यन्त एकाक्षरा वै वाक् त्र्यक्षरमक्षरमक्ष-

रस्य रूपेण विभज्यन्ते त्रयो गन्धर्वास्तेषामेषा भक्तिरग्नेः पृथिवी वायोरन्तरिक्षमसावादित्यस्य द्यौस्त्र-योघर्मास उषसꣳ सचन्ते ॥ २ ॥

वाग्रूप एव आज्यस्तोत्राणामयमकहो इति तत् तत्र उत्पन्नो ऽक्षरशब्दस्त्र्यक्षरः तस्य शब्दस्य त्रिविधेन रूपेण त्रयो देवा अनेन वाचो रूपेण निष्पद्यन्ते त्रीण्यक्षराणि अक्षरोत्पत्तिस्त्रिर्वा-चो रूपैर्लोकत्रयात्मकैर्विगमय्य सम्पाद्यन्ते एतावाननुवादः अथा-ग्न्याद्युत्पत्तिरुच्यते तत्रत्यवागेकाक्षरैः ककारस्यार्द्धमात्रस्य पृथ-गक्षरत्वाभावात् तत्र उत्पन्नोऽक्षरशब्दस्त्र्यक्षरः तस्य शब्दस्य त्रिविधेन रूपेण त्रयो देवा विभागेनोत्पद्यन्ते देवा गन्धर्वाः अथाग्न्याद्युत्पत्तिरुच्यते तस्य शब्दस्य त्रिविधेन रूपेणेमां वाचं त्रेधा रवतीति व्युत्पत्तेः यौगिक इत्यर्थः एतेषां त्रयाणां देवानां एषा वक्ष्यमाणाविभक्तिर्भजनं स्थानं अग्निवाय्वा-दित्यदेवतानां पृथिव्यादिकं स्थानमित्येतत्प्रसिद्धमेव अस्मि-न्नर्थे सम्बन्धाय कस्यचिन्मन्त्रस्य पादं पठति त्रयो घर्मास उषसं सचन्त इति घर्मासो दीप्यमानादेवास्त्रयोऽग्निवाय्वा-दित्या उषसं उषाकालरूपी तमोनिवारणेनोत्पन्ना देवाः सचन्ते सेवन्ते ॥ २ ॥

मन्त्रार्थं विविच्य दर्शयति ।

अग्निरुषसꣳ सचते वायुरुषसꣳ सचतेऽसावा-दित्य उषसꣳ सचते ॥ ३ ॥

अग्निर्द्यौः पृथिव्यां उषो देवीं सेवते तया कृतं तमोनिवारणमनुभवतीत्यर्थः एवं वाय्वादित्यावयन्तरिक्षलोकयोरिति द्रष्टव्यं ॥ ३ ॥

अस्त्येवमग्न्यादीनामुषः सेवा प्रकृते किमायातमित्याशङ्क्याह।

त्रीणि मिथुनानि तान्येषः ॥ ४ ॥

अग्निवाय्वादित्यास्त्रयो गन्धर्वाः पुरुषा लोकत्रयेऽपि उषसो योषितस्तान्मिलितेन त्रीणि मिथुनानि भवन्ति तानि चैषः त्रयस्त्रिरात्रस्त्रित्वसंख्यायाः समानत्वात् तस्मादयं प्रमिङ्क्त इत्यर्थः ॥ ४ ॥

किञ्च मिथुनावयवौ द्वौ तत्पुत्रश्चैक इत्यनेनापि प्रकारेण त्रित्वसाम्यात् प्रगस्त इत्याह।

मिथुनं वै सम्भवतो मिथुनाद्यत्प्रजायते तत्तृतीयं ॥ ५ ॥

वै स्त्रीपुरुषशरीरे सम्भवत इति यदस्ति तदेतन्मिथुनमुच्यते स्पष्टमन्यत् ॥ ५ ॥

अथास्य त्रिरात्रस्य यागे सहस्रदक्षिणास्ति तासोतुमाख्यायिकामाह।

इन्द्रो वृत्राय वज्रमुदयच्छत्सोऽब्रवीन्मामे प्रहार्षीरस्ति वा इदमयि वीर्यन्तत्ते प्रदास्यामीति तदस्मै प्रायच्छत्तद्विष्णुः प्रत्यगृह्णात् स द्वितीयꣳ स तृतीयमुदयच्छत्स एवाब्रवीन्मामे प्रहार्षीरस्ति वा इदं मयि वीर्यन्तत्ते प्रदास्यामीति तदस्मै प्रायच्छत्तद्विष्णुः प्रत्यगृह्णादेतद्वाव तदभ्यनूच्यते ॥ ६ ॥

लोकत्रयमावरीतुं प्रतिक्षणं वर्द्धमानेन देहेनोपेतस्त्वष्टुः पुत्रो वृत्रनामकः कश्चिदसुर आसीत् तद्वधार्थं इन्द्रः कदाचिद्वज्रमुद्यम्यावस्थितः तमिन्द्रं दृष्ट्वा स वृत्र एवमब्रवीत् हे इन्द्र कदापि मे शरीरं माप्रहार्षीः मयि वृत्रे वीर्यं सारभूतं इदं वस्त्वस्त्येव मच्छरीरे रक्षिते सति तदहं तुभ्यं प्रदास्यामीत्युक्त्वा प्रहारादुपरतायास्मा इन्द्राय तदहं प्रायच्छत् इन्द्राय प्रदत्तं तद्वीर्यरूपं वस्तु अस्येन्द्रस्य सखा विष्णुस्तस्मादिन्द्रात्प्रतिगृह्य रक्षितवान् वृत्रवधार्थं प्रदत्तस्येन्द्रस्य वज्रोद्यमे विष्णुः साहाय्यं कृतवान् तदिदं तैत्तिरीया आमनन्ति इन्द्रो वज्रमुदयच्छत् विष्णुरनुष्ठित इति विष्णुः साहाय्यादनुष्ठित उपविष्ट एव सन् वज्रमुद्यतवानित्यर्थः वृत्रेण दत्तं तद्वीर्यं इन्द्रः प्रतिगृह्य सख्ये विष्णवे प्रायच्छत् एतदपि त एवामनन्ति तद्विष्णवे प्रायच्छत्तद्विष्णुः प्रत्यगृह्णादस्मात्त्विन्द्र इन्द्रियं दधात्विति तत्तस्मा इन्द्राय दत्तस्य विष्णुना प्रतिग्राह्यत्वं युक्तं स इन्द्रः पुनरपि वृत्रं हन्तुं

द्वितीयं द्वितीयवारं अस्मिन्वाक्ये पूर्वोक्तं वज्रमुदयच्छदित्यादिकं विष्णुः प्रतिगृह्णादित्यन्तं अनुवर्त्तते पुनरपि स इन्द्रस्तृतीयवारं उदयच्छत् तदापि स इतः पूर्ववदेव अब्रवीत् मामे प्रहार्षीरित्यादिकं पूर्ववद्योज्यं तद्वावं त्रिवारञ्च तद्वलमिन्द्रवीर्य्येण विष्णुना च प्रतिगृहीतं तदेतत्सर्वमेव कयाचिद्दृचाभ्यनूच्यते ॥ ६ ॥

तामेतामृचमुदाहरति।

उभा जिग्यथुर्न पराजयेथे न पराजिग्ये कतरश्चनैनोरिन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वितदैरयेथामिति ॥ ७ ॥

हे इन्द्रविष्णू युवामुभौ जिग्यथुः सर्व्वत्र जितवन्तौ न पराजयेथे क्वापि पराजयं न प्राप्नुथ एतयोर्मध्ये कतरश्च न एकतरोऽपि पराजिग्ये द्वितीयं प्रत्यक्षं विनापि क्वापि युद्धे पराजयं न प्राप्तवान् हे विष्णो त्वमिन्द्रश्चोभौ यदपस्पृधेथां यदा परस्परं स्पर्द्धितवन्तौ तत्र इतस्तव्यं गोसहस्ररूपं वीर्य्यं त्रेधा विभज्य इन्द्रस्य द्वौ भागौ विष्णोरेको भाग इत्येवमैरयेथां प्राप्तवन्तौ इति शब्दः समाप्त्यर्थः ॥ ७ ॥

नन्विन्द्राविष्णुभ्यां इतो वीर्य्यं प्रायच्छदिति ब्राह्मणे श्रुतं तत्संवादार्थमुदाहृतायां ऋचि सहस्रं श्रितमिति वैयधिकरण्यमाशङ्क्याह।

एतद्वा आभ्यां तत्सहस्रं प्रायच्छत् ॥ ८ ॥

तदेतदेव गोसहस्रमभिहितं यत्त आभ्यां विष्णविन्द्राभ्यां प्रायच्छत् तस्माद्वैयधिकरण्यं उदाहृतायामृच्यभिहिता येयमिन्द्राविष्णो: परस्परस्पर्द्धा यश्चेन्द्रस्य भागद्वयं विष्णोरेको भाग इत्येतादृशो गोसहस्रस्य त्रेधा विभागस्तदुभयं तैत्तिरीये: विस्पष्टमाम्नायते अथ या सहस्रं तस्यासीद्यस्यामिन्द्रश्च विष्णुश्च व्यायच्छेतां स इन्द्रोऽमन्यत न वा इदं विष्णु: सहस्रं प्रार्ध्यत इति तस्यामकल्पेतां द्विभाग इन्द्रस्तृतीयो विष्णुस्तदेव एषाभ्यनूच्यत उभा जिग्यथुरितीति अस्यान्नानस्यायमर्थ: पुरा कदाचित् प्रजापति: वसूनिन्द्रादित्यांश्च ससर्ज्ज एते सर्व्वे संवत्सरं तपस्तप्त्वा गामेकामसृजत सा च गौर्व्वसूनां गवामेकोनसहस्रे सम्पन्ने सति स्वयं सहस्रसंख्यापूरणी सम्पन्ना तस्यां गवि ममैवेयं इति विष्णुरिन्द्रश्च परस्परं स्पर्द्धितां तदानीमिन्द्र एवं विचारयन् अनया सहस्रतमया सहितं गोसहस्रं विष्णुर्ममात्मकाशात् चर्कारिष्यतीति तत इन्द्राविष्णू स्पर्द्धां परिहर्तुं अन्याभिर्गोभि: सहितायां तस्यां सहस्रतमं विभागं कल्पितवन्तौ तत्रेन्द्रो भागद्वयेऽवस्थित: विष्णुस्तृतीये भागेऽवस्थित: तस्मिन्नेवोक्तार्थे उभाजिग्यथुरित्यृगभ्यनूच्यते इति इत्यं अस्मान् दक्षिणारूपेण दातव्यस्य गोसहस्रस्येन्द्रविषयोपाख्यानेन प्रशंसा कृता ॥ ८ ॥

तत्र गोसहस्रं त्रिषु दिनेषु विभज्य दातव्यं तत्र प्रथम-

दिने प्रतिग्रहोत्तविशेषं दर्शयति ।

तस्यैषा भक्तिर्य आर्षेयो विद्वाꣳस्तस्मै प्रथमेऽहनि देयं यथा वा इयमेवꣳ स प्रतिष्ठितेयं प्रतिष्ठितः सः ॥ ९ ॥

तस्य दातव्यस्य द्रव्यस्य एषा वक्ष्यमाणा भक्तिर्भागः विभज्य दानप्रकारः कथ्यते ऋषेर्गोत्रप्रवर्त्तकस्य भरद्वाजकश्यपादेः सम्बन्धी पुमानार्षेयः प्रख्यातकुलगोत्र इत्यर्थः विद्वान् वेदशास्त्राभिज्ञः तादृशेयः प्रतिग्रहीता तस्मै प्रथमेऽहनि दक्षिणा दातव्या प्रथमस्याङ्गः पृथिवीरूपत्वं पूर्व्वमुक्तं इयं प्रथमाङ्गस्वरूपा पृथिवी यादृशी तादृशेव स आर्षेयः उभयोः प्रतिष्ठासम्बन्धस्य तुल्यत्वात् प्रतिष्ठितः ॥ ९ ॥

द्वितीयेऽहनि प्रतिग्रहोत्तविशेषं दर्शयति ।

योनार्षेयो विद्वाꣳस्तस्मै द्वितीयेऽहनि देयं यथा वा अन्तरिक्षमेवꣳ सोऽन्तरिक्षमित्यन्तरिक्षं विदुर्वेदं तस्य विदुः ॥ १० ॥

अज्ञातकुलगोत्रो वैदेशिकोनार्षेयः, द्वितीयाङ्गान्तरिक्षरूपत्वादन्तरिक्षहारेण वैदेशिकस्य साम्यत्वमेतं शक्यं अन्तरिक्षमित्यनेन शब्देनान्तरिक्षं द्यावापृथिव्योरन्तरा क्षयति निवसति इति व्युत्पत्त्या सर्व्वे जना मध्यवर्त्तिनं लोकं विदुः वैदेशिकोऽपि ज्ञाताज्ञातयोर्म्मध्ये वर्त्तते तदीयकुलगोत्रयोरज्ञातत्वात् वेदपाठन्तु तदीयं सर्व्वे विदुः अतो द्वितीयेऽहनि प्रतिग्रहयोग्यः ॥ १० ॥

तृतीये प्रतिगृह्यैतयोगं दर्शयति।

य आर्षेयोविद्वाꣳस्तस्मै तृतीयेऽहनि देयं यथा वै द्यौरेवꣳ सद्यौरिति दिवं विदुर्वन्धु तस्य विदुः ॥ ११ ॥

तृतीयाहःस्वरूपत्वेनोक्तस्य द्युलोकस्यार्षेयेण सह जातत्वमाभ्यमस्ति दीव्यति इति द्यौरित्येवं दिवं सर्वे जानन्ति तस्यार्षेयस्य बन्धुजातं भ्रातृपुत्रादिकं च जानन्ति ॥ ११ ॥

दातव्ये गोसहस्रे या संख्यान्तर्भूतास्ति तथा तस्यां शतसंख्यायामन्तर्भूता या संख्यास्ति तदुभयं क्रमेण प्रशंसति।

शतान्यन्वहन्दीयन्त एषा वाव यज्ञस्य मात्रा यच्छतं सैव सा विच्छिन्ना दीयते दशतोऽन्वहं दीयन्ते दशाक्षरा विराड्वैराजोयज्ञः सैव सा विच्छिन्ना दीयते ॥ १२ ॥

प्रतिदिनं गवां शतानि दीयन्ते तद्विशेषस्तूत्तरत्र वक्ष्यते शतमिति यदस्ति एषैव संख्या यज्ञस्य मात्रा सोमयागस्य दक्षिणाद्रव्यप्रमाणं प्रकृतौ हि द्वादशाधिकं शतं विहितं तस्य द्वादशं शतं दक्षिणेत्याम्नातत्वात् ततः शतादर्वाचीनसंख्यायामभावाच्छतसंख्यामात्रेत्युच्यते सैव शतसंख्या सा यज्ञस्य मात्रा भूत्वा प्रतिदिनमवच्छिन्ना दीयते दशइत्यनेन शकारान्तशब्देन दशानां समूहोऽभिधीयते पञ्चदशतो वर्गो वेति पाणिनिः आर्षेयादिभ्यः प्रतिगृह्यैतभ्यो दशतो दशसंख्योपेताः वर्गाः प्रतिदिनं दीयन्ते ते च वर्गाः संख्यासाम्याद्विराट्छन्दोरूपाः सोमयागस्य वैराजः प्रकृतिगतास्तु स्तोत्रीयास्त्रिकोनविंशतिविराट्

रूपस्यासकृदर्शितत्वात् अतः सैवं संख्या विराड्रूपा भूत्वा प्रतिदिनमविच्छिन्ना दीयते ॥ १२ ॥

एकोनसहस्रसंख्याकानां गवां दिनत्रयसाम्येन विधानं दर्शयति।

त्रयस्त्रिंशच्च त्रीणि च शतानि प्रथमेऽहनि देयास्तथा द्वितीये तथा तृतीये।१३।

स्पष्टोऽर्थः। १३।

सहस्रतम्यां गोदानप्रकारमाह।

अथैषा द्विदेवत्या विरूपा ब्रह्मणो द्वे तृतीये तृतीयमग्नीधः॥ १४ ॥

एकोनसहस्रकथनानन्तरमेषां सहस्रतमी कथ्यते सा चेन्द्रविष्णुरूपदेवताद्वयोपेता शुक्लकृष्णसहितवर्णास्त्रिरूपा च तेषु त्रिरूपेषु शुक्लं रूपमितरापेक्षया तथा कृष्णमपि द्वितीयं रोहितमपि तृतीयं तत्र तृतीये ब्रह्मणो योग्ये तस्य द्विभागोपेतेन्द्रस्थानीयत्वात् अवशिष्टं तृतीयमग्नीधस्य योग्यं तस्यैकभागोपेतविष्णुस्थानीयत्वात् ॥ १४ ॥

अथ सहस्रतम्यामनुमन्त्रणे मन्त्रमाह।

काम्यासि प्रियासि व्यासीडे रन्ते सरस्वति मह्वि विश्रुत एतानि तेऽग्नेव नामानि देवेषु नः सुकृतो ब्रूयात्॥१५॥

हसस्रतमो षड्भिः पादैः सम्बोध्यते हे इडे मननरूपे हे

रन्ते रमणीये हे सरस्वति सरणात्सरः क्षीरन्तहति हे महि महति हे विश्रुते प्रख्याते हे अघ्न्ये हन्तुमयोग्ये त्वं काम्या कमनीयासि प्रिया प्रीतिविषयासि हव्या दानयोग्यासि एतानीडादीनि काम्यादीनि तव नामानि तादृशी त्वं नो अस्मान् सुकृतः शोभनस्य कर्त्तॄन् देवेषु ब्रूतात् देवसमीपे कथय॥ १५॥

इति ताण्ड्यमहाब्राह्मणे विंशाध्यायस्य
पञ्चदशः खण्डः।

अथ षोड़शः खण्डः।

पुनरपि त्रिरात्रं बहुधा तुष्टुषुरादौ तावत् त्रैलोक्यवर्त्तिपदार्थसमष्टिहेतून् दर्शयति।

इदं वाव प्रथमेनाङ्गा व्यकरोद्यदिदमस्यामध्यायत्तमूलमिदं द्वितीयेन यदिदं प्राणद्देवत्यदस्तृतीयेन यद्वर्षति यन्नक्षत्राणि यदमुं लोकं भेजे॥ १॥

अस्यां पृथिव्यामध्युपरि यदिदं गिरिवृक्षादिकमायत्तमूलमष्ठीनमूलं वर्त्तते स्थावराणां हि मूलानि भूमौ प्रविश्य तिष्ठन्ति तदिदमेतत् स्थावरस्वरूपमयन्त्रिरात्रः प्रथमेनाङ्गा व्यकरोत् विशिष्टं समृद्धं करोति प्रथमस्याङ्गोऽनुष्ठानेन जनितमपूर्वं तत् सभृद्धेः कारणमित्यर्थः यदिदं जङ्गमं मनुष्यवृक्षादिरूपं* प्राणान् श्वासं कुर्वन् एजति कम्पते भूम्यन्तरिक्षयोश्चलति

* मनुष्यपक्ष्यादिरूपमिति पुस्तकान्तरपाठः।

तदिदं द्वितीयेनाङ्गा व्यकरोत् द्यौलोकवर्त्तिदृष्टिनक्षत्रदेवताविग्रहादिकं यदस्ति तावद एवं तृतीयेनाङ्गा व्यकरोत् ॥ १ ॥

अथ महाव्रतरूपतामापाद्य प्रशंसति ।

तदाहुर्ब्रह्मवादिनो महाव्रतं वा एतद्यदेष विराज इति तस्यै तदेव मुखं यदेतेषामङ्गां वक्ष्यमाणानं ये अभितोऽहनी तौ पक्षौ यन्मध्यममहः सः आत्माग्निष्टोमसामानि पुच्छं ॥ २ ॥

अग्निचयनोपेतस्य महाव्रतक्रतोः सम्बन्धी योऽयं चित्योऽग्निस्तस्य मुखपक्षद्वयमध्यदेहपुच्छरूपाः पञ्चावयवाः तस्य सर्वस्य विराजे सम्पादितत्वादयं विराजो महाव्रतगतचित्याग्निभावतया कर्म्मफलसमृद्धिं ब्रुवतीत्यभिप्रायः ॥ २ ॥

प्रकारान्तरेण मुखपुच्छे निरूपयति ।

यदेवासावुदेति तन्मुखं ये अभितोऽहनी तौ पक्षौ यन्मध्यममहः स आत्माग्निः पुच्छं ॥ ३ ॥

वक्ष्यमानस्तोत्रात् प्रागेवासावादित्य उदेतीति यदस्ति तदेव मुखं आहवनीयाद्यग्निः पुच्छं ॥ ३ ॥

पुनरपि प्रकारान्तरेण पुच्छनिरूपयति ।

यदेवासावुदेति तन्मुखं ये अभितोऽहनी तौ पक्षौ यन्मध्यममहः स आत्मा यदस्तमेति तत्पुच्छं ॥ ४ ॥

आदित्योऽस्तमेतीति यदस्ति तत्र पुच्छमिति द्रष्टव्यम् त्रिरात्रस्य यदिदमहाव्रतत्त्वसम्पादनन्तदिदमनुतिष्ठासोः प्ररोचनायोपयुक्तं अनुष्ठातुमशक्तस्य तु भावनया तत्र कश्चित्सुकृतविशेषो भवति अयमेव न्यायः सर्व्वेष्वर्थवादेष्वनुसन्धातव्यः एतदेवाभिप्रेत्य तत्र य एवं वेदेत्याम्नायते ॥ ४ ॥

अथ त्रिरात्रे प्रकारान्तरेण भावनां दर्शयति।

एतावान्वाव त्रिरात्रो गायत्रः प्राणास्त्रैष्टुभं चक्षुर्जागतं श्रोत्रं सर्व्वमायुरेति य एवं वेद ॥ ५ ॥

यावान् गायत्रादिरस्ति एतावानेव त्रिरात्र इति भावयेत् त्रिरात्रे यानि गायत्रीत्रिष्टुब्जगतीरूपाणि सम्पद्यन्ते तत् सम्बन्धीनि पुरुषमुखवर्त्तीनि प्राणचक्षुःश्रोत्राणि तेषु छन्दःसु प्राणादीनां भावनीयत्वात् यः पुमानेवं वेद मनसा भावयति स पुमान् सर्व्वमायुरेति अस्यापमृत्युः न भवतीत्यर्थः ॥ ५ ॥

पुनरप्युत्तरोत्तराभ्यां त्रिरात्रस्य महिमानं विशदयति।

तदाऽऊर्ह्म वादिनः कियꣳस्त्रिरात्रइतीयानिति ब्रूयादियध्येतदभ्यथो इयानिति ब्रूयादियध्येवैतदभिपराऽङ्वाऽङित्याऽङः पराङिति ब्रूयात्पराङ्हि वदति पराङ् पश्यति पराङ्प्राणित्येकाऽद्वाऽउत्तयाऽइत्याऽऊरेक इति ब्रूयात् समानो ह्येष यत् प्राणोपानोव्यानस्तद्यथा अदोमनौ ह्यत्र मोतमेवमेषु लोकेषु त्रिरात्र श्रोतः शोभतेऽस्य मुखं य एवं वेद ॥ ६ ॥

कियानिति पृच्छतां ब्रह्मवादिनां अयमभिप्रायः इदं वाव प्रथमेनाङ्गा इत्यादिना त्रैलोक्यवर्त्तिभोग्यपदार्थसमष्टिहेतुस्त्रिरात्र इत्युक्तम् किन्तावानेव त्रिरात्राभावयितव्यः किम्वा ततोऽप्यधिक इति इयानेव त्रिरात्रोध्यातव्यो नत्वधिक इति ब्रह्मवादिनां गुरुरुत्तरं ब्रूयात् तत्रोपपत्तिरियत्येति वाक्येनोच्यते यस्मादयं लोकत्रयपरिमितमेतद्भोग्यजातमभिलक्ष्य त्रिरात्रः श्रुतः तस्मादियानेव ध्यातव्यः अथो अपिच महाव्रतरूपत्वेन च विधानमुक्तं तत् सर्व्वत्र कियानिति प्रश्नश्चेदाशंक्य तत्तदानीमियानित्येवोत्तरमुक्तोपपादयेत् वाचनिकेषु ज्ञानादिषु यथावचनमनुतिष्ठेत नपुनः संशयः कर्त्तव्यइत्यर्थः अयं त्रिरात्रः पराङ् चार्वाङ् चेति प्रश्नस्य पराङित्युत्तरं परमुत्कर्षमञ्चति गच्छत्यनेनेति पराङुत्कृष्टफलप्राप्तिहेतुरिति ध्यायेत् नत्वर्व्वाङधमइत्यर्थः हि यस्मादयमनुष्ठाता फलकाले पराङुत्कर्षप्राप्तः सन् वदनदर्शनप्राणनादिव्यवहारं करोति नतु कस्मिंश्चिदपि व्यवहारे प्रकृष्टो भवति तस्मात्फलहेतुः त्रिरात्रः पराङिति ध्यायेत् एकोहोत्रयमयं त्रिरात्रात्मकः क्रतुः एकएव उत तिसृषु रात्रिषु त्रयः क्रतवइति प्रश्नः तस्यैकइत्युत्तरं हि यस्मात्प्राणापानोव्यान इत्येवं वृत्तित्रयरूपेण वायुः स्वरूपं वर्त्तते सवायुस्तिसृष्वपि वृत्तिषु समान एकस्तद्वयं क्रतुरित्यर्थः यथेत्यादिनात्रो दृष्टान्त उक्तः अदः कार्पासादिजनितं सूत्रं मणौ मणिसमूहे यथा ओतमनुस्यूतं तद्वत् क्रतुफले लोकत्रयसाधनभूते क्रतुरनुगतः य एवं वेद ध्यायति अस्य देवताशरीरं प्राणस्य मुखं शोभते ॥ ६ ॥

सर्व्वत्र त्रिरात्रस्य त्रैष्टुभं जागतमित्येव क्रमेण तीव्रहानि

न्यायतः प्राप्नोति अत्र तु मध्यममहर्जागतमित्येकदेशवैलक्षण्यं दर्शयति।

यद्वै त्रिरात्रस्य सलोम तदस्य विलोम यदस्य विलोम तदस्य सलोम तद्यदेतत्परं सदहरवरं क्रियते यजमानायैव तत्पशून् परिगृह्णाति प्रजननाय नह्यमुष्मिन् लोके पशवः प्रजायन्ते ॥ ७ ॥

अनुकूलमनुष्ठानं सलोमेत्युच्यते तद्विपरीतं तु विलोमेति तथा मति तस्य सर्व्वस्य त्रिरात्रस्य न्यायप्राप्तं यत् सलोमानुष्ठानं जागतावसानमस्ति तदस्य गर्गत्रिरात्रस्य विलोम भवति अत्रास्मिन् गर्गत्रिरात्रे जागतस्याङ्गोमध्यमत्वात् यत् पुनरस्येतरं त्रिरात्रस्य विलोमरूपं जागतं मध्यमत्वमस्ति तदस्य गर्गत्रिरात्रस्य सलोम भवति तस्मिन् गर्गत्रिरात्रे परं स तृतीयप्राप्तियुक्तं सज्जागतमहरवरं मध्यमं क्रियतइति यदेतदस्ति तत्तेन मध्यमत्वकरणेन यजमानार्थमेव पशून् पशुसमूहं परिगृह्णाति पशूनां जागतत्वात् जगतीछन्दसां पशव्यतामिति श्रुत्यन्तरात् सच पशुपरिग्रहः प्रजननाय बहुपशूत्पादनाय संपद्यते जागतस्याङ्गस्तृतीयत्वेतु तस्य तृतीयस्याङ्गोद्युलोकरूपत्वात्पशुप्रजननं सम्भवति द्युलोके ह्यमृतं पीत्वा तृप्ता देवा गवादिपशून् सम्पादयति ॥ ७ ॥

प्रकारान्तरेण प्रशंसति।

एते वाव छन्दसां वीर्य्यवत्तमे यद्गायत्री च त्रिष्टुप् च

यदेते अभितो भवतो मध्ये जगतीवीर्य्यवतीभ्यामेव तच्छन्दोभ्यां पशून् परिगृह्णाति प्रजननाय न च्यमुस्मिन् लोके पशवः प्रजायन्ते ॥ ८ ॥

गायत्रीत्रिष्टुप् चेति यत् छन्दोद्वयमस्ति एते छन्दसी उभे एव सर्व्वेषां छन्दसां वीर्य्यातिशयेपेते तत्र गायत्र्याः सीमाहरणेन वीर्य्यवत्त्वं द्रष्टव्यं त्रिष्टुभस्तु वीर्य्यवत्त्वं सर्व्वश्रुतिप्रसिद्धं एते गायत्रीत्रिष्टुभावभितस्तृतीययोरङ्गीभवतः मध्यमेऽहनि जगती भवति इति यदस्ति तत्तेन त्रिविधानुष्ठानेन मध्यदिनवर्त्तिजगतो सम्पादितवान् पशूनुभाभ्यां वीर्य्यं तच्छन्दोभ्यां परिगृह्णाति परिपालयति अन्यत् पूर्व्ववत् ॥ ८ ॥

अथ त्रिराचम्यादित्यरूपेण ध्यानमाह।

असौ वाव त्रिराचो यथोदेत्येवं प्रथममहर्यथा मध्यन्दिन एवं द्वितीयं यथास्तमेत्येवं तृतीयङ्कृत्यमुष्य सायुज्यङ्गच्छति सावेश्यं य एवं वेद ॥ ९ ॥

असौ द्युलोकवर्त्ती सूर्य्य एव त्रिराचस्वरूपः यथादित्योदयमध्यन्दिनास्तमयास्तथास्यापि क्रतोस्त्रीण्यहानि सन्ति क्रतावादित्यस्य दृष्टिः कर्त्तव्या त्रिष्वहःसु उदयादिदृष्टिरित्यर्थः यः पुमानेवं वेद ध्यायति स पुनर्ध्यानेनामुष्य सूर्य्यस्य सायुज्यं गच्छति इति ॥

वेदार्थस्य प्रकाशेन तमोहार्दन्निवारयन्।
पुमर्थांश्चतुरोदेयात् विद्यातीर्थमहेश्वरः ॥ ९ ॥

श्रुतिस्मृतिसदाचारप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे

विंशाध्यायस्य षोडशः खण्डः।

विंशोऽध्यायः समाप्तिमगमत्॥

अथैकविंशोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलञ्जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथैकविंशोध्याय आरभ्यते । तत्र गर्गत्रिरात्रस्य यद्दक्षिणारूपं गोसहस्रं पूर्व्वमुक्तं या चोक्ता सहस्रतमी तयोः प्रशंसार्थमाख्यायिकानाम आह ।

इन्द्रोमरुतः सहस्रमजिनात् स्वां विशं सोमाय राज्ञे प्रोच्य तस्माद्राज्ञे प्रोच्य विशं जिनन्ति तौ यमोऽभ्रुणोन्मरुतोह सहस्रमिज्याह्वष्टामिति स आगच्छत्सोऽब्रवीदुपमास्मिन् सहस्रे क्रयेथामिति तमुपाक्रयेतां सयमोऽपश्यद्देकाङ्गाꣳ सहस्रेपि सहस्रस्य पयोबिभ्रतीꣳ सोऽब्रवीदियमेव ममास्तु सहस्रं युवां विकल्पयेथामिति तावब्रूतां यथावाव त्वमेतां पश्यस्येवमावमेतां पश्याव इति ॥ १ ॥

इन्द्रः पूर्वं सोमाय राज्ञे प्रोच्य गोसहस्रजयलक्षणं फलमावयोः सहास्त्विति कथयित्वा सहस्रं .सहस्रसंख्याकामरुतः अजिनात् क्षीणानकरोत् व्यावयोरहानौ अत्र क्षानिमात्रे प्रवर्त्तते जितवानित्यर्थः तदेवाह स्वां विशमिति स्वीयां प्रजामित्यर्थः

एतदुक्तं भवति स्वप्रजाभूतमरुत्सहस्रं जित्वा गोसहस्रं लब्धवानित्यर्थः यद्वा मरुतः सहस्रमिति अधिकरणनिर्देशः मरुतः सकाशात् गोसहस्रमजिनादित्यर्थः यस्मादेवं तस्मादिदानीमेता अपि राज्ञे प्रोच्य विज्ञप्यैवं विशः स्वां प्रजां गवादिधनार्थं निरुन्धन्ति तावेन्द्रसोमौ यमोऽशृणोत् किमिति मरुतः खलु सहस्रं इज्यास्रष्टामलभेतामिति स यमस्तु आगच्छत् तयोरन्तरितो यमस्तावब्रवीत् अस्मिन् गोसहस्रे मा मां उपह्वयेथामिति तौ च तमुपाह्वयेतां स उपह्रतोयमः अपश्यत् किं एकाङ्गां सहस्रेपि कोट्यगीं सहस्रस्य पयः गोसहस्रे यावत्पयोस्ति तावत् समृद्धं पयोबिभ्रतीं स तां दृष्ट्वा इयमेव ममास्तु युवां सहस्रं विकल्पयेथां विभजेथामित्यब्रवीत् तावपि पुनरेवाब्रूतां तु यथा वावत्वमेतां पश्यसि एवमेवास्मदर्थं पश्याव इति ॥ १ ॥

अथ तेषां ममविभागकल्पनाप्रकारमाह ।

तया वा इदꣳ सहस्रं विकल्पयामहा इत्यब्रुवꣳस्तामुदके प्रावेशयꣳस्तेऽब्रुवन्नꣳशानाहरामहै यस्मै न इयं प्रथमायोदेष्यति इति तेꣳशानाहरन्त सोमस्य प्रथम एदथेन्द्रस्याथ यमस्य ॥ २ ॥

विभागभेद इति विविधमेतास्ति ममविभागप्राप्त्यर्थतया चैतया सहस्रतम्या सह इदं गोसहस्रं विकल्पयामहै विभजामहाइत्यब्रुवन् तथोक्तां तामेकाङ्गां विभागकल्पनायोदके प्रावेशयन् तदनन्तरन्तेऽंशायैवमब्रुवन् किमिति नो अस्माकमध्ये यस्मै प्रथमायो

प्रथमविभागाय उदेष्यति जलादुद्गमिष्यति ते वयं गोसहस्रस्य सहस्रतम्यायांगानाहरामहै कल्पयामहाइति एवमिमयः सम्भाष्य अंगानाहरन्त तत्र प्रथमे अंगे सोमं ऐत् सोममागच्छत् अथ इन्द्रस्य अथ यमस्य ॥ २ ॥

अथ गोसहस्रस्य सहस्रतम्यास्य भागत्रयसाम्ये च सोमप्राप्तिं दर्शयति।

तेऽब्रुवन् सोमाय राज्ञ उदेहि तृतीयेन चात्मनस्तृतीयेन च सहस्रस्य पयस इति सावभ्रुः पिङ्गाक्ष्येकवर्षादैत्तृतीयेन चात्मनस्तृतीयेन च सहस्रस्य पयसः सा या सोमक्रयणी सैव सा ॥ ३ ॥

ते विभागक्रमकल्पनानन्तरमब्रुवन् हे सहस्रतमि सोमराज्ञे प्रथमं उदेहि जलादुद्गच्छ किं विशिष्टा सती आत्मनस्तव तृतीयेनांगेन च गोसहस्रस्य च पयसः तृतीयेनांगेन सहिता सती इति एवमुक्ते सा सहस्रतमी स्वतृतीयांगेन बभ्रुरुणवर्णा पिङ्गाक्षी एकवर्षा सती उदेत् तैर्यथा प्रार्थितं तथैवेत्युक्तं भवति तृतीयेन चात्मन इत्यादिना अस्याः सोमांगरूपत्वात् सोमक्रयणीत्वमाह या सा सोमक्रयणी इदानीन्तनैः सोमक्रेतृभिः तत्साधनत्वं तु कल्पते सैव सोमक्रयणी सा जलादुद्गता बभ्रादिलक्षणोपेतेत्यर्थः ॥ ३ ॥

अथोक्तार्थज्ञानपुरःसरं क्रयणं प्रशंसति।

तृतीयेन चास्य तस्या आत्मनस्तृतीयेन च सहस्रस्य

पयसः सोमः क्रीतो भवति य एवं विद्वान् सोमं क्रीणाति यस्मा एवं विदुषे सोमं क्रीणन्ति ॥ ४ ॥

तस्याः बभ्रुादिलक्षणाया अस्या आत्मनः स्वरूपस्य तृतीयेन भागेन गोसहस्रस्य पयसस्तृतीयांशेन च सोमः क्रीतो भवति इदानीन्तनैः योगवा क्रीतोपि यएवमादि स्पष्टं ॥ ४ ॥

अथेन्द्रभागप्राप्तिं दर्शयति।

तेऽब्रुवन्निन्द्रायोदेहि तृतीयेन चात्मनस्तृतीयेन च सहस्रस्य पयस इति सा शबलीपष्ठौ ह्यदैत् तृतीयेन चात्मनस्तृतीयेन च सहस्रस्य पयसः सा येन्द्रियैष्या सैव सा ॥५॥

पूर्ववद्याख्येयं इयांस्तु विशेषः इन्द्रियैष्या इन्द्रियं इन्द्राय हितं वा तदेतावगम्यते पिङ्गाख्येकहायन्या सोमः क्रेतव्य इति तदर्थतेस्या एषणीया दातव्येत्यर्थः पष्ठौहीतु प्रसिद्धा त्रिवर्षा गौरिति ॥ ५ ॥

अथोक्तार्थवेदनपुरःसरमिन्द्रियैष्यादत्तं प्रशंसति।

तृतीयेन चास्य तस्या आत्मनस्तृतीयेन च सहस्रस्य पयस इन्द्रियैष्या दत्ता भवति य एवं विद्वानिन्द्रियैष्यां ददाति यस्मा एवं विदुष इन्द्रियैष्यां ददति ॥ ६ ॥

अन्यस्या अपि इन्द्रियैष्यायाः गोदानेऽपि गोसहस्रतृतीयांशपयोयुक्ता सहस्रतमो तृतीयांशमूतोक्तलक्षणैरेव दत्ता भवति ॥ ६ ॥

अथ यमस्य स्वांशप्राप्तिं दर्शयति।

तेऽब्रुवन्यमायोदेहि तृतीयेन चात्मनस्तृतीयेन च सक्थस्य पयस इति सा जरती कुष्टाऽष्टग्यूदैधूम्रा वादित्यौ धौर्म्यतोऽसोयसो तृतीयेन च सक्थस्य पयसः सा यानुस्तरणी सैव सा ॥७॥

पूर्ववद्व्याख्येयं जरतीति जरसा युक्ता कुष्टा कुष्टवर्णा अभृङ्गी शृङ्गरहिता उदैत् उदगच्छत् वर्णावान्तरप्रसिद्धतरं दर्शयति वा अथवा धूम्रा धूम्रवर्णादित्यौ द्यौर्मत ईर्म्मतो जघनप्रदेशतोऽसीयसी अत्यन्तं क्षासयुक्ता करोतीत्यर्थः ईर्म्मन्तासः सिलिकमध्यमासदित्यादौ तथा दर्शनात् यद्वा ईर्म्मं व्रणं तत् करोतीत्यर्थः सोदैदिति सम्बन्धः अनुस्तरणीं मृतसंस्कारार्थमुपाकरणीया गौरमृतमनुहन्यत इत्यनुस्तरणीति च निरुक्तपत्नी भवति ॥ ७ ॥

उक्तार्थस्यानुस्तरणीकरणं प्रशंसति।

तृतीयेन चास्य तस्या आत्मनस्तृतीयेन च सक्थस्य पयसोनुस्तरणीन्नता भवति य एवं विद्वाननुस्तरणीं करोति यस्या एवं विदुषेऽनुस्तरणीङ्कुर्वन्ति नाचक्राव्यान्यते ॥८॥

यदुक्तार्थाभिज्ञोऽनुस्तरणीं ददाति अन्यस्मै वा दुरुक्तार्थकायानुस्तरणीं कुर्वन्ति तेनोभयविधेनोपलक्षणानुस्तरण्येव न्नता भवति किञ्च सोऽर्थज्ञः स्वयं आत्मानं उक्तलक्षणानुस्तरणीदान-

मक्रत्वा चक्रवानिति न मन्यते किन्तु विहितामेव कृतवानस्मीति मन्यते ॥ ८ ॥

अथ ब्रह्मवादिनः प्रस्रावतारणमुखेन गर्गचिराचस्य गोसहस्रदक्षिणादात्प्रशंसादारेण चिराचगतं दानं प्रशंसति ।

तदाहुर्ब्रह्मवादिनो न वा अमुष्मिन् लोके सहस्रयाड्लोकोस्तीति तद्यावदितः सहस्रमस्य गौर्गवि प्रतिष्ठिता तावदस्माल्लोकादसौ लोकः सहस्रयाजी वा इमान् लोकान् व्याप्नोत्यथो यावत् सहस्रं योजनान्यथो यावत् सहस्रसमाश्वीनान्यथो यावत् सहस्रमङ्गयानि तद्गवा गवास्पृणोति समाक्रयणाय वा एतादोयन्ते ॥ ९ ॥

तत्र गोसहस्रदक्षिणकस्चिराचविषये आहुः ब्रह्मवादिनः अमुष्मिन् लोके भूलोकव्यतिरेके फलत्वेन प्राप्तव्येषु लोकेष्वित्यर्थः सहस्रयाट् सहस्रदक्षिणोपेतगर्गचिराचावयवा अलोकः प्राप्तव्यलोकरहित इत्यर्थः तादृगो नैवास्ति सर्वोऽप्यस्य च भोगोपविषयो भवति तद्य इत्युक्तं भवति तत्तस्मात् यावदिमान् लोकान् सहस्रस्य सम्बन्धिनो एकैका गौः एकस्यामेकस्यामङ्गवि प्रतिष्ठिता तावत्तावन्तोऽस्मात् लोकादारभ्यासौ लोक अमी गन्तव्या उपर्य्युपरि लोका इत्यर्थः अस्त्वेवं किं तत इत्याह सहस्र याजी खलु इमान् गोसंख्यापरिमितान् लोकान् क्रमेण भोगाय व्याप्नोति तदेवोपयादर्यति अथो अपि च योजनानि सहस्र यावत्परिमाणं भूस्वर्गयोरन्तरालमस्ति अथो अपि च आश्वीनानि

एकस्मिन्दिने एकस्य शीघ्रगामिनोऽश्वस्य सम्बन्धीनि योजनाश्वीनानि तेषाञ्च सहस्रं यावद्भवति अथो अपि च अङ्गानि अङ्गसम्बन्धीनि एकस्मिन्नहनि शीघ्रगामिना पुरुषेण गन्तव्यानि योजनान्यहानि तेषाञ्च सहस्रं यावत्परिमाणं भवति तावद्योजनानि गवा गवां सहस्रमध्ये एकैकया गवा एकैकयोजनस्याक्रमणं युक्तमित्यर्थः ॥ ९ ॥

अथ दक्षिणारूपस्य गोसहस्रस्य परि तार्य्याच्छादनं विधत्ते।

सहस्रं यदसृजत तस्य तार्यं योनिरामोदत्तार्यं प्रत्यस्य नयति सयोनित्वाय ॥ १० ॥

यद्गोसहस्रमसृजत तद्दक्षिणार्थं सृष्टमतु तत्तस्य तार्य्यं घृतादिकं वस्तु तार्थ्यमाहुः अन्ये चाहतं वस्त्रमाहुः तद्योनिर्योनिवदाच्छादक आमोदतस्तार्य्यं गोसहस्रस्य तर्पणभूतस्य सहस्रतमीरूपस्य वा तार्य्यं प्रत्यस्य विधानं नयति नाग्नीध्रं प्रापयति सयोनित्वाय अत्रापस्तम्बः तामुदीचीमाग्नीध्रं नीत्वा तस्याश्रमतार्य्य प्रथ्यास्यति इति ॥ १० ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य
प्रथम खण्ड ।

अथ द्वितीयः खण्डः।

अथ चोष्णांज्यदोहानि प्रशंसितुमाख्यायिकामाह।

प्रजापतिः प्रजा असृजत ता अस्मान् सृष्टाः पराच्य

आयन्नत्स्यति न इति विभ्यत्यः सोऽब्रवीदुप मावर्त्तध्वं तथा वै वोत्स्यामि यथाद्यमाना भूयस्यः प्रजनिष्यथ इति ताभ्यो वैन ऋतं ब्रूहीत्यब्रवुस्ताभ्य ऋतनिधनेनर्त्तमब्रवीदै निधनेनावयत्त्रिणिधनेन प्राजनयदेतै र्ह्वा इदꣳसामभि र्मृत्युः प्रजा अत्ति च प्रजनयति ॥ १ ॥

पूर्व्वं प्रजापतिः ताः सृष्टाः प्रजाः स्वयमेव नः अस्मान् अत्स्यति संहरिष्यति इति तद्भक्षणाद्भिभ्यत्यः पराच्यः आयन् आगताः प्रजापतिरेवमब्रवीत् मा मामुपावर्त्तध्वमिति एवमुक्ते ताः प्रजाः ताभ्यो बिभ्यतीभ्यो नो अस्माकं वै खलु ऋतं सत्यं शपथं ब्रूहीत्यब्रुवन् ताभ्यः प्रजापति आज्यदोहे गतेन ऋतनिधनेन ऋतं सत्यं वचनमब्रवीत् तत ई इति निधनेनावयत् पुनश्च त्रिणिधनेन प्राजनयत् उक्तनिधनवता मात्मा सहास्रृणोत् साधनत्वमिदानीमस्तनप्रसिध्या ह्वयति एतैः खल्वाज्यदोहैः सामभिर्मृत्युः प्राणिहिंसोपाधिकः प्रजापतिः प्रजामत्ति च एतैरेव प्रजनयति पुनरुत्पादयति ॥१॥

इदानीमपि उक्तार्थवेदेनं प्रशंसति ।

अद्यमानमस्य भूयो भवति य एवं वेद ॥ २ ॥

उक्तार्थज्ञेनाद्यमानमप्यसम्भूय पुनः पुनः प्रकृतमेव भवति न कदाचिदपि क्षीयते ॥ २ ॥

तानि पुनः प्रकारान्तरेण प्रशंसति ।

ज्येष्ठसामानि वा एतानि श्रेष्ठसामानि प्रजापतिसामानि ॥ ३ ॥

एतान्याज्यदोहानि साम्नामध्ये ज्येष्ठानि प्रथमभूतानि खलु तथा श्रेष्ठसामानि गुणैः प्रशस्तानि तत् कथमिति तदाह आदित एतानि प्रजापतिसामानि अतः प्रजापतेर्ज्येष्ठत्वाच्च तत्सम्बन्धादेवान्यान्यपि तथाविधानीत्यभिप्रायः ॥ ३ ॥

वेदनं प्रशंसति ।

गच्छति ज्यैष्ठ्यꣳ श्रैष्ठं य एवं वेद ॥ ४ ॥

स्पष्टोऽर्थः । ४ ।

अथ निर्वचनद्वारा एतानि प्रशंसति ।

एतैर्वै सामभिः प्रजापतिरिमान् लोकान् सर्वान कामान् दुग्ध यदाच्या दुग्ध तदाच्या दोहानामाच्या दोहत्वं ॥ ५ ॥

पूर्वं प्रजापतिरेतैः सामभिरिमान् लोकान् तेषां जीवनाय सर्वान् कामान् कमनीयान् भोगान् दुग्ध यदयस्मादाच्या लौकिको दोग्धा जानुनोमाच्य दुग्धे तत् प्रजापतिरपि जानुनी चक्रे कृत्वा सामाभ्यां दुग्ध तत् तस्मादाज्यदोहानां साम्नामाज्यदोहत्वं सम्पन्नं ॥ ५ ॥

उक्तार्थज्ञानपूर्वकमुक्तसाम्नां प्रयोगं प्रशंसति ।

सर्वानिमान् लोकान् कामान् दुग्धे य एवं विद्वानेतैः सामभिः स्तुते ॥ ६ ॥

एतावता एतैः स्तोतव्यमिति विधिरुक्तोभवति ॥ ६ ॥

अथ विहितसामत्रयं लोकत्रयरूपत्वेन प्रशंसति।

इमे वै लोका एतानि सामान्ययमेवर्त्तंनिधनमन्तरि क्षमीनिधनं द्यौस्त्रिणिधनं ॥ ७ ॥

भूलोकस्य सर्व्वैरनुभूयमानत्वेन सत्यत्वादृतो निधनसाम स्थानत्वं युक्तमन्तरिक्षस्य निराश्रयत्वात् ईनिधनं स्वरैकाक्षरत्वेन ऋतनिधनहयं वैषम्येणास्ते तत्साट्टश्यं द्युलोकस्य त्रित्वपेक्षया तृतीयत्वात् त्रिणिधनसाम्यम् ॥ ७ ॥

अथोक्तार्थज्ञानं प्रशंसति।

यथा क्षेत्रज्ञः क्षेत्राण्यनुमञ्चरत्येवमिमान् लोकाननु मञ्चरति य एवं वेद ॥ ८ ॥

स्पष्टं। ८।

अथैतेषां गाने अग्निसान्निध्यं विवक्षुराह।

अग्नेर्वा एतानि वैश्वानरस्य सामानि यत्र वा एतैरग्नी न्तैः स्तुवन्ति तत् प्रजा देवोघातुको भवत्यग्निमुपनिधाय स्तुवते स्वाया एव तद्देवतायाः साम्येत्ताय नमस्कृत्योद्गा यति शान्तैः स्तुवन्ति ॥ ९ ॥

एतान्याज्यदोहानि अग्नेर्वैश्वानरस्य सम्बन्धीनि खलु अतो यत्र यत्र हि यज्ञे अशान्तैः सामभिः स्तुवन्ति तत्र तत्र देवोग्निः प्रजाघातुको हि प्रजाहिंसनशीलोभवति अतस्तत्परिहारायाग्नि

मुपनिधाय स्तवते स्तुयुरित्यर्थः तत् किं ह्रातं भवति तत्राह तथा मति स्वाया एव एतेषां साम्नां या देवता तस्या एव साम्येच्छाय ममदृष्टित्वाय नमस्कृत्योद्गायति तथा सति शान्तैरेव स्तुवन्ति कस्य स्तोत्रसमये कः पुनरग्निः कथं वा तस्य निधनमिति तत्सर्वं सूत्रकार आह आज्यदोहानामग्निमुपनिधाय स्तुवते ह्रातृर्द्विषोऽग्निं धारयेयुः प्रथमेऽहनि यन्माध्यन्दिन आनयेयुः प्रातःसवन उत्तरयोरङ्गाः स्तोत्रवेलायामेनं प्रज्वलयेयुरिति आज्यदोहानामित्यादेरयमर्थः गर्गत्रिरात्रमग्निमुपनिधाय स्तुवत इति यत् तदेतदाज्यदोहानान्तदङ्गत्वेनाग्निनिधानमित्यर्थः ह्रोतृर्द्विषोऽ इति प्रथमेऽहनि अर्भवपवमाने ऋतनिधनमाज्यदोहस्तस्य गानकाले ह्रोतृर्द्विषोऽ अग्निं धारयेयुः यमग्निं माध्यन्दिन पवमाने अग्नोनग्नोन्विह्रेति प्रैषकाले ह्रोतृर्द्विषोऽ आनयति तमग्निस्तदा प्रभृत्याज्यदोहकालं यावद्धारयेयुरित्यर्थः प्रातः-सवन उत्तरयोरिति उत्तरयोरङ्गाः प्रातःसवने यमग्निं धारयन्ति तन्माध्यन्दिनं पवमानं यावद्धारयेयुः तत्र स्थानत्वादाज्यदोह-योरिति त्रिष्वहःसु स्तुतिकालेग्निं प्रज्वलयेयुरिति ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य
द्वितीयः खण्डः।

अथ तृतीयः खण्डः।

अथ शबलीहोमं विधित्सुराह।

वाग्वै शबली तस्यास्त्रिरात्रो वत्सस्त्रिरात्रो वा एनां प्रदापयति ॥ १ ॥

शबली कामधेनुः सा वाग्वै स्तुतिरूपभागाभिमानिदेवतैव तस्यायो गर्ग्गत्रिरात्रः स एव वत्सस्थानीयः कथमिति तदुपपादयति एतां शबलीं त्रिरात्रः खलु प्रदापयति पयःस्थानीयफलमिति शेषः तत् त्रिरात्रयाजिनायं होमः कर्त्तव्य इत्युक्तं भवति ॥ १ ॥

उक्तार्थवेदनं प्रशंसति।

तद्य एवं वेद तस्मा एषा प्रत्ता दुग्धे ॥ २ ॥

यत् शबल्या वाग्रूपत्वं त्रिरात्रस्य वाग्रूपवत्सत्वं योवेद तस्मा एषा कामधुग्रूपा शबली अप्रत्ता स्वादुपायसादिप्रदाननिरपेक्षैव सती दुग्धेइति मतं फलं ॥ २ ॥

अथास्य फलमाह।

योलमन्नाद्याय सन्नथान्नाद्यात् ॥ ३ ॥

अन्नाद्यन्नाम पश्वाद्युपभोगः योविद्यातपोभ्यां सहस्रपोषा हीपि सहस्रं न प्राप्नोति स जुहुयादित्यर्थः। अत्र धानञ्जयः या वाग्वै शबली तस्यास्त्रिरात्रोवत्स इति श्रुतेः त्रिरात्रयाजिनएव सहस्रपोषका अस्यायं होम इति मन्यते, शाण्डिल्यस्तु प्रजापतिर्वा इदमेक आसोत्तस्य वागेव स्वमासीदित्यादिना त्रिरात्रस्य वत्सत्वं शबल्या मातृत्वं यत्पूर्वं दर्शितं तस्य विज्ञानप्रशंसार्थं वाग्वै शबलीतिश्रुतिः अतोऽधिकारवाक्ये विशेषाश्रवणादादिष्टत्रिरात्रस्यापि सहस्रपोषकार्योयं होम इत्याह, तथा च सूत्रं सहस्रपोषकामः शबलीहोमं कुर्व्वीत न त्रिरात्रयाजीति शाण्डिल्यस्त्रिरात्रो वा एतां प्रदापयतीति ह्याह यः कश्च सहस्र-

पोषकाम इति धानञ्जय्योऽयोऽलमन्नाद्याय मन्नयान्नाद्यादिति॥३॥

अथ शबलोहोमाङ्गं व्रतमाह।

बरासौ परिधाय तप्तं पिबन् द्वादशरात्रीरधः शयीत ॥ ४ ॥

अहतं वासो बरासो तप्तं क्षीरमिति शेषः अत्र सूत्रं वमन्ते प्रथमायां पूर्वपक्षस्य केशश्मश्रूणि वापयित्वाऽहतं वसनं परिधायानन्तर्हिते स्थण्डिले द्वादशरात्रीरधः शयीत तप्तं क्षीरमित्यन्वित्याभ्याहितोस्याग्निरात्रमध्ये स्यात्रैनमन्यमहदः प्रेषं कृत्वान् प्रतिशेदित्यव्याहारी च स्यादिति प्रेषकृत् कर्मकरं सकृत् अल्पव्याहारी यावदर्थभाषो स्पष्टमन्यत् ॥ ४ ॥

अथ शबलोहोमन्तदाह्वानञ्चाह।

या द्वादशी स्यात्तस्या उपव्यूषं शबलोहोमं हुत्वा पुरा वाग्भ्यः सम्प्रवदितोर्यच्च ग्राम्यस्य पशोर्न्नाशृणुयात्त दरण्यं परेत्य दर्भस्तम्बमालभ्य शबलि शबलीति त्रिराह्वयेद्यदन्यच्छुनश्च गर्दभाच्च प्रतिबाध्यते सा समृद्धा ॥ ५ ॥

पूर्वमुक्तस्य द्वादशरात्रस्य यान्त्या रात्रिः स्यादवद्यु पुरुषकाले एव शबलोहोमं हुत्वा अनन्तरमेव वाक्प्रदानात् पूर्वमेव ग्राम्यस्य पशोः ध्वनिर्न श्रूयते तदरण्यं उच्यते तत्परेत्य दर्भस्तम्बं समृश्य शबलीति त्रिराह्वयेत् यदि पुनः गर्दभाच्चान्यः पशुः जात्या यः प्रतिबाध्यते प्रतिशब्दं करोति साह्वानं किल समृद्धेति जानीयात् ॥ ५ ॥

अथोक्तप्रतिवासनाभावउपायमाह ॥

यदि न प्रतिवाश्येत संवत्सरे पुनराङ्क्येत् ॥ ६ ॥

स्पष्टोऽर्थः। अत्र सूत्रम् द्वादश्या उपव्यूषं परिसमुह्याग्निं परिस्तीर्य्यौदुम्बरइडः स्यात् स्रुक्स्रुवौ च तथा चमसस्तस्माद्धि मधुसर्प्पिरिति स्रुवेण स्रुचि गृह्णीयाच्चतुर्गृहीतमष्टगृहीतं वा जुहुयाच्छबलि ममुद्रोसीति स्वाहाकारेणोत्तरां स्रुचि यः शेषः स्यात्तं चमस आनीय प्राश्नीयात् प्रक्षाल्य स्रुक्स्रुवौ चमसञ्च निद धात्तत्रैवानुप्रहरेदिति शाण्डिल्यायनः प्राङ्वोदङ्वा ग्रामान्निष्क्रम्य ग्राम्यस्य पशोर्नाशृणुयात्तदरण्यं परेत्य दर्भस्तम्बमालभ्य शबलि शबलीति त्रिः परमकष्टेन क्रोशेदयदन्यक्कुनोगर्दभोवा प्रतिवाश्येत ममृङ्कर्म्मेति विद्यादेवमाद्यतीयं संवत्सराभ्यामप्रतिवाश्यमाने कुर्व्वीत प्रथमतश्चेत्तु श्वा गर्दभोवा प्रतिवाश्येत नपशूनामा शास्तीति विद्यादाद्यतीयं चाप्रतिवाश्यमाने शान्तिर्व्वामदेव्य मिति ॥ ६ ॥

अथ होममन्त्रमाह ॥

शबलि समुद्रोसि विश्वव्यचा ब्रह्म देवानां प्रथमजा ऋतस्यान्नमसि घृतक्रमसि तेजोस्यमृतमसि तां त्वा विद्म शबलि दोद्यानान्तस्यास्ते पृथिवी पादोन्तरिक्षं पादोद्यौः पादः समुद्रः पाद एषामि शबलि तां त्वा विद्मसानइष मूर्जधुक्ष्व वसोर्द्धाराश्शबलि प्रजानाश्श्चिष्ठा व्रतमनु गेषश्श्वाहा ॥ ७ ॥

हे गवलि विश्वव्यचा सर्व्वत्र व्याप्ता च समुद्रोसि समुद्रस्थानीया भवसि फलानां समुद्रवर्णसाधना भवसीत्यर्थः यद्वा वाग्वै गवलीत्युक्तत्वाद्वाग्वै समुद्रइति श्रुतेरतः समुद्ररूपत्वम् तथा ब्रह्म परिमूढ़ासि देवानामग्ध्ये ऋतस्य सत्यभूतस्य ब्रह्मणः प्रथमजा प्रथमोत्पन्ना भवसि हिरण्यगर्भः समवर्त्तताग्रे इत्यादिश्रुतेः ब्रह्मणऋतस्य प्रथमजत्वं तस्य स्वभूतत्वादेवापि प्रथमजा इत्युच्यते किञ्च त्वं अन्नमसि धेनुरूपत्वात् शुक्रं दीप्तमसि अतएव तेजोसि अमृतमसि कदाचिदपि मरणरहितासि हे गवलि दीप्यानां द्योतमानानामुक्तमहिमोपेतां त्वा त्वां विजानीमस्त स्याउक्तरूपायास्ते पृथिव्यादिसमुद्रान्ताश्चत्वारः पादाः हे गवलि त्वं एषा निर्दिष्टप्रकारासीति तां तादृगीं विद्म वयं सा तादृगी त्वं नो अस्मभ्यं इषमन्नं ऊर्जञ्च धुक्ष्व किञ्च हे गवलि शचिष्ठा अतिशयेन शक्तिमती ह्यस्माकं प्रजानाञ्च सर्व्वेषु नो धारां धुक्ष्व यद्वं व्रतमनुगेषं अनुगच्छेयम् अस्य होमस्य कालं आपस्तंब आह उत्तमदक्षिणां नीत्वोदवसाय वा गवलि समुद्रीमित्युपक्रम्य गवलिहोमञ्जुहोतीति ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य
तृतीयः खण्डः ॥

अथ चतुर्थः खण्डः ।

उक्तोगर्गत्रिरात्रः अथाग्निचित्याचमाह ।

चतुष्टोमोग्निष्टोम एकविंश उक्थः सर्व्वस्तोमोनिरात्रः ॥ १ ॥

त्रिवृदादिचतुष्टोमोग्निष्टोमः **प्रथममहरेकविंशस्तोमोपेतो द्वितीयमहः सर्वस्तोमकोतिरात्रः संस्थास्ततीयमिति ॥ १ ॥**

अथैतदश्वमेधत्रिरात्रं प्रजापतेरत्तिसमाधानत्वेन प्रशंसति।

प्रजापतेर्वा अत्त्यश्वयत्तत्परापतत्तदश्वोऽभवत्तदश्वस्याश्वत्वं तद्देवा अश्वमेधेन प्रत्यदधुरेषवाव प्रजापतिं सर्वङ्करोति योश्वमेधेन यजते ॥ २ ॥

प्रजापतेर्लोचनमत्ति अश्वयत् तदश्वोभवत् तदधः परापतत् पतितं तदत्ति अश्वत्वेन अशोचयत् तदश्वस्याश्वत्वं सम्पन्नम् तद्देवा तमत्ति देवा अश्वमेधयागेन परिगते अश्वेन यागं कृत्वा प्रत्यदधुः प्रतिसन्धानमकुर्वन् अश्वमेधेन यजते एष वाव प्रजापतिः सर्वं अन्यूनं सम्पूर्णं करोति ॥ २ ॥

पुनरप्यश्वमेधयाजिनः प्रशंसाद्वारा तत् प्रशंसति।

एष वाव सशरीरः सम्भवत्यमुष्मै लोकाय योश्वमेधो ॥ ३॥

योऽश्वमेधवान् अश्वमेधयाजी अस्ति एष अमुष्मै धर्माय लोकाः सशरीरः शरीरसहितः सम्भवति ॥ ३ ॥

अथ प्रथमं चतुष्टोममहः प्रशंसति।

सरघा वा अश्वस्य सक्थ्या बृहत्तद्देवाश्चतुष्टोमेन प्रत्यदधुर्यच्चतुष्टोमो भवत्यश्वस्य सर्वत्वाय ॥ ४ ॥

सरघा मक्षिका क्रमयः अश्वस्य सक्थिप्रदेश आ बृहत् ब्रण चकारेत्यर्थः तद्देवाश्चतुष्टोमेन समदधुः यस्मादेवं तस्मादश्वस्य सर्वत्वाय सम्पूर्णतायै चतुष्टोमः कर्त्तव्यः ॥ ४ ॥

अथ प्रथमस्याङ्गो बर्हिष्यवमानस्य प्रतिपत्तुचचतुष्टयं गायत्रीचतुष्टयं कर्त्तव्यमिति विधाय प्रशंसति।

यत्तिस्रोनुष्टुभश्चतस्रो गायत्रीः करोति तस्मात्त्रिभिस्तिष्ठन् प्रतितिष्ठति सर्वान् पलायमानः प्रतिदधाति ॥ ५ ॥

पवस्व वाजसातय इति योयं प्रतिपत्तुचस्तस्य यास्तिस्रोनुष्टुभः स्तोचोयाः सन्ति ताः पादतयपरिगणनया चतस्रो गायत्रीः कुर्य्यात् यस्मात् प्रकृत्या तिस्रः अतस्तिसृभिः पादैस्तिष्ठन् प्रतितिष्ठति यस्माच्चतस्रो गायत्रीः तस्मात् सर्वान् चतुरः पादान् पलायमानः सन् प्रतिदधात्यश्वः यद्यप्यश्वायगल्दीन अगते तथापि तैत्तिरीयके स्पष्टमाम्नातं पवस्व वाजसातय इति अनुष्टुप् प्रतिपद्यति तिस्रोनुष्टुभश्चतस्रो गायत्रीःयत्तिस्रोनुष्टुभस्तस्मादश्वस्तिसृभिस्तिष्ठति यच्चतस्रो गायत्रीस्तस्मात् सर्वाश्चतुरः पादाः प्रतिदधत्पलायत इति ॥ ५ ॥

अथाश्वमनूद्यानुष्टुभां वैष्णवत्वं प्रशंसति।

अन्तो वा अश्वः पशूनामन्तो नुष्टुप्छन्दसामन्तो विष्णुर्देवतानामन्तश्चतुष्टोमस्तोमानामन्तस्त्विरात्रो यज्ञानां यदैन्द्र्योनुष्टुभः प्रतिपदो भवन्ति चतुष्टोमस्तोमस्त्विरात्रा यज्ञोन्त एव तदन्तं प्रतिष्ठापयति ॥ ६ ॥

अजादिपशूनामध्ये अश्वस्यैवान्तत्वं अपशवोन्ये गोभ्येभ्य इत्यादि श्रुतिषु प्रसिद्धं यद्वा प्रशस्तवीर्य्यत्वात् प्रजापतिरश्वं

रूपत्वाद्वा परमत्वं छन्दसां मध्येऽनुष्टुभः परमत्वं असक्रदुक्तं देवतानामध्ये विष्णोरन्तत्वं अग्निर्देवतानामवमोविष्णुः परम इत्यादिश्रुतिषु प्रसिद्धं स्तोमानान्त्रिवृदादीनां मध्ये चतुष्टोम एवान्तः परमः प्रकृतिभूताग्निष्टोमगतत्वात् प्रजापतेः सकाशादुत्पन्नत्वाच्च यज्ञानां मध्ये त्रिरात्रोन्तः ब्रह्महत्याश्वमेधाभ्यां नापरं पुण्यपापयोरितिवदन्ति यद्वा त्रयो वा एते त्रिरात्रा यदेष द्वादशाह इति द्वादशाहस्यापि त्रिरात्रत्वेन प्रशंसा दर्शनात्त्रिरात्रस्यान्तत्वमवगन्तव्यं एवं सति यद्यनुष्टुभस्तिस्रोवैप्रथमप्रतिपदो भवन्ति चतुष्टोमस्तोमस्त्रिरात्रो यज्ञस्वोभावन्तभूतो तत् तथा सति अन्तत एव अन्तर्भूतेष्वेषश्वादिषु अन्तर्भूतं विष्णुं प्रतिष्ठापितवान् भवति ॥ ६ ॥

अथ मध्यममेकविंशमहरनूद्य प्रशंसति ।

एकविंशमहर्भवति यस्मिन्नश्व आलभ्यत एकविंशो वा इतोमावादित्यो द्वादशमासाः पञ्चर्त्तवस्त्रय इमे लोका असावादित्य एकविंश आदित्यस्यैवैनं मात्राङ्गमयति ॥७॥

यस्मिन् हितीयेहनि अश्व आलभ्यते तदहरेकविंशस्तोमकं भवति इतः पृथिवीमारभ्य द्वादशमासादिगणनया आदित्योप्येकविंशः तथा सति मध्यममहरेकविंशस्तोमन्तत् यज्ञं आदित्यस्यैव मात्रां परिमाणं गमयति ॥ ७ ॥

अथ मध्यमस्याङ्गः पृष्ठमाह ।

तस्य महानाम्न्यः पृष्ठं भवन्ति ॥ ८ ॥

महानाम्नाः शर्क्कर्यः शार्करं पृष्ठं भवतीत्यर्थः तथाचापस्तम्बः त्रयाणामङ्गां पृष्ठान्यहरन्यतरं महानाम्नो बृहदिति पृष्ठानीति ॥ ८ ॥

तत्रायं देवानां छन्दः प्रशंसति ।

अन्यदन्यद्वा एताश्छन्दोन्योन्य एते पशव आलभ्यन्त एता वा एतꣳ समाप्नुवन्ति यन्महानाम्न्यः पृष्ठं भवन्त्यश्वस्य मर्त्वाय ॥ ९ ॥

एताः महानाम्नाः ऋचः अन्यदन्यच्छन्दोवै विच्छन्दस्का इत्यर्थः तथा हि अनुष्टुप् गायत्रो द्विपदादिपदे नानाच्छन्दस्का प्रचेतनप्रचेतयेति निर्वहन्तीत्यर्थः अनुष्टुप् त्रिकित्वो अभिनोनयेति गायत्रोविदा मघवन्निति द्विपदा एवं सर्वेष्वपि द्रष्टव्यं अथात्र अन्योन्येनानाविधा एते पशव आलभ्यते तथाह्यापस्तम्बः अश्वेन सार्द्धमुपाकरणमाह प्लक्षशाखान्तरितान् पशून् स्वपर्य्यंग्यानाग्नेयं कृष्णग्रीवं पुरस्तात्ललाटे पौष्णमनं च मैत्रापौष्णमुपरिष्टाग्नेवास्याग्नेयौ कृष्णग्रीवौ बाह्मोपिस्थानेपि पशुः अश्वरूपः गौरीमृग इत्यादयो नानापशुकथन गर्क्करीछन्दो नानार्थप्रशंसार्थं एताः खलु महानाम्न्यस्त्रिरात्रं समाप्नुवन्ति निर्वहन्तीत्यर्थः अतो महानाम्नाः पृष्ठं भवन्तीति यत् तदश्वस्य सर्वत्वाय सम्पूर्णत्वाय भवति ॥ ९ ॥

अथास्य ब्रह्मसाम विधत्ते ।

पार्थुरश्मं ब्रह्मसाम भवति ॥ १० ॥

ब्रह्मसाम ब्राह्मणाच्छंसिनः साम पार्थुरश्मं पृथुरश्मिना दृष्टं साम कार्य्यं ॥ १० ॥

एतत् सामास्याङ्गोचितमिति प्रशंसति ।

ईश्वरा वा एषो यतोधृतः पराम्परावतमेतो रश्मिना वा अश्वोधृतो यत्पार्थुरश्मं ब्रह्मसाम भवत्यश्वस्यैव यत्यै ॥११॥

यतो नियमितो यज्ञार्थं अधृतः पाशादिभिरधार्य्यमाणोऽश्वः पराम्परावत अत्यन्तदूरदेशं गन्तुं तूर्णं पलायितुमीश्वरो वै समर्थः खलु येन रश्मिना प्रग्रहेण खल्वश्वोधृतो भवति तथा सति यत्पार्थुरश्मं ब्रह्मसाम भवति तदश्वस्यैव यत्यै नियमनाय भवति पार्थुरश्मशब्देन रश्मिरूपोर्थः स्तूयते तच्छब्दसाम्येन स्तुतिरिति द्रष्टव्या ॥ ११ ॥

अथ सर्वस्तोमोतिरात्रं स्तौति ।

सर्वस्तोमोतिरात्रो भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाप्नोति सर्वं जयति ॥ १२ ॥

सर्वस्तोमोतिरात्रः सर्वस्याप्त्यै प्रापणाय सर्वस्य जित्यै जयाय सर्वं एतेनाप्नोति ॥ १२ ॥

अथ यूपविषये किञ्चिदाह ।

एकयूपोवैकादशिनो वान्येषां यज्ञानां भवत्येकविंशिन्यश्वमेधस्य खादिरो वा वैल्वो वा पार्णवान्येषां यज्ञानां

भवति नैचुदार एकविंशत्यरत्निरश्वमेधस्य नान्येषां पशूनान्तेदन्या अवद्यन्त्यवद्यन्त्यश्वमेधस्य दक्षिणतोन्येषां पशूनामवद्यन्त्युत्तरतोश्वमेधस्य प्रक्षणाखास्वन्येषां पशूनामवद्यन्ति वेतस शाखास्वश्वमेधस्य येग्राम्यान्पशून्नियूंजन्त्यारोकेस्वारण्यां धारयन्त्या ग्राम्यान्पशून् लभन्ते प्रारण्यां सृजन्ति* ॥ १३ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

अथ वेदत्रिरात्रमाह ।

त्रयस्त्रिवृतोतिरात्राः सर्व्वे षोड़शिमन्तः ॥ १ ॥

त्रीण्यहानि त्रिवृतस्तोमकानि सषोड़शिकान्यतिरात्रसंस्थानि ॥ १ ॥

अथास्याधिकारिणमाह ।

यो राज्यआशंसेत स एतेन यजेत ॥ २ ॥

राज्ये राज्यविषये आशंसत इच्छति स राजा एतेन यजेत स्वाराज्यफलमित्युक्तं भवति अत्रापस्तवः वेदत्रिरात्रेण स्वाराज्यकामस्त्रयस्त्रिवृतोतिरात्राः षोड़शिमन्तोरथन्तरं वामदेव्यं बृहत् पृष्ठानीति ॥ २ ॥

* अस्य टीका पुस्तकद्वयेपि नास्ति ।

अस्य त्रिरात्रस्य यत् त्रिवृत्स्तोमत्वं तत्र राज्यफलसंयुक्तं प्रशंसति।

राजा वा एष स्तोमानाꣳराज्यमेवास्मिन्दधाति ॥ ३ ॥

एषत्रिवृत्स्तोमः स्तोमानामध्ये राजा सर्व्वेषां प्राथम्यात् अतस्तत्प्रयोगादस्मिन् यजमाने राज्यमेवाभिलषितं दधाति ॥३॥

अथ प्रथमस्याङ्ग आर्भवान्ते यदाज्ञारं सामास्ति तत् प्रशंसति।

यदाज्ञाराणि प्रथममहर्भजन्त एकाक्षरा वै वाग्वाचो-नतिवादाय ॥ ४ ॥

स्तोत्रीयापेक्षया आज्ञाराणीति बहुवचनं पवतेहर्य्यतोज्ञरि रित्यवाज्ञार एकाज्ञरणिधनं वागपि हलपरित्यागे सत्येकाज्ञरा खलु स एवन्निधनं सर्व्वस्यावाचोनतिवादाय साम्याय भवति यद्यपि कल्पकारेण आज्ञारं साम नादिष्टं सामान्तरं प्रथमेनाङ्गा गर्गत्रिरात्रस्यातिदेशादुक्तमेव तत् ॥ ४ ॥

अथ प्रथमेङ्ग तृतीयसवने पदनिधनमाज्यदोहमनूद्य प्रशंसति।

अथ यत् द्व्याज्ञरणिधनमाज्यदोहं भवत्युत्तरयोरङ्गोरभि सन्तत्या अन्वहमाज्यदोहानि भवन्त्यन्वहमेवैनं पशुभिः सभर्द्धयन्ति ॥ ५ ॥

प्रथमं आज्यदोहे ऋतमिति द्व्याज्ञरणिधनमस्ति अतस्तदुक्त

सामप्रयोगे उत्तरयोर्हयोरङ्गोः सन्तत्यै अविच्छित्त्यै भवति उभयत्र द्वित्वसाम्यादित्यभिप्रायः ॥ ५ ॥

अथोक्तमाज्यदोहमतियुक्त्या त्रिष्वहःसु विधाय प्रशंसति।

सर्व्वे षोड़शिमन्तो भवन्तीन्द्रियं वीर्य्यꣳ षोड़शीन्द्रियेणैवैनान्वीर्य्येण समर्द्धयति ॥ ६ ॥

सर्व्वेऽतिरात्रा इति शेषः इन्द्रियमित्यस्य व्याख्यानं वीर्य्यमिति अतिरात्राणां वीर्य्यैः समर्थनत्राम फलजनकत्वलक्षणसामर्थ्यसम्पादनम् अथ प्रसामासोविषयित इति गायत्रमेकस्या माध्वमेकस्याञ्जराबोधीयमेकस्यां प्रमोमदेवबोधीय इति पौंगवमेकस्यामित्यादिकः कल्पोद्रष्टव्यः ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य पञ्चमः खण्डः।

अथ षष्ठः खण्डः।

अथ कुन्दोमपवमानाख्यं पशुफलसाधनं चतुर्थं विराजमाह।

चतुर्विꣳशाः पवमानास्त्रिवृत्त्याज्यानि पञ्चदशानि पृष्ठानि सप्तदशोग्निष्टोमश्चतुश्चत्वारिꣳशाः पवमानाः पञ्चदशान्याज्यानि सप्तदशानि पृष्ठान्येकविꣳशोग्निष्टोमः सोक्थ्योष्टाचत्वारिꣳशाः पवमानाएकविꣳशान्याज्यानि त्रिणवानि पृष्ठानि त्रयस्त्रिꣳशोग्निष्टोमएकविꣳशान्युक्थानि सपोड़शिकानि पञ्चदशी रात्रिस्त्रिवृत्सन्धिश्छन्दोमपवमानः ॥१॥

पृष्ठस्तोमः क्लृप्तः गायत्रीत्रिष्टुब्जगतीनामक्षरसंख्याभिर्मिलित्वा चतुर्विंशात्यास्त्रयश्छन्दोमास्तेषु त्रयः पवमानाभवन्तीति छन्दोमपवमानोयन्तिराचः ॥ १ ॥

अथास्याधिकारिणमाह ॥

पशुकामोयजेत ॥ २ ॥

स्पष्टोऽर्थः । २ ।

अथ छन्दोमपवमानान्तं पशुसाधनमिति प्रशंसति

पशवो वै छन्दोमा यच्छन्दोमाः पवमाना भवन्ति पशूने वावरुन्धे ॥ ३ ॥

स्पष्टं ॥ ३ ॥

उभये स्तोमायुग्मन्तश्चायुजश्च तत् मिथुनं तस्मान् मिथुनात्प्रजायते ॥ ४ ॥

अहस्त्रयगतं पवमानान्तत्वात् युक्संख्यामितरस्तोमगत युग्मसंख्याकास्तोमा इत्यर्थः अयुजः स्तोमाः तत्र युग्मन्तु पुंसो रू अयुग्मं स्त्रियाः तदुभयम् मिथुनं तस्मान् मिथुनाद्यजमानः प्रजाय अत्र साम्वत्सरिकस्य विषुवतोबर्हिष्पवमानमुभौ पर्य्यायावित्या दिकः कल्पोद्रष्टव्यः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य

प्रथमः खण्डः ॥

अथ सप्तमः खण्डः।

अथ तुर्व्वसनामानं पशुसाधनं पञ्चमन्त्रिरात्रमाह।

त्रिवृत्यातःसवनं पञ्चदशम्माध्यन्दिनꣳ सवनं सप्तदशं तृतीयसवनं चतुर्विꣳशं प्रातःसवनं चतुश्चत्वारिꣳशम्माध्यन्दिनꣳ शवनमष्टाचत्वारिꣳशं तृतीयसवनꣳ सोक्थमेकविꣳशं प्रातः सवनं त्रिणवम्माध्यन्दिनꣳ सवनं त्रयस्त्रिꣳशं तृतीयसवनꣳ सोक्थमेकविꣳशः षोड़शी पञ्चदशो रात्रि स्त्रिवृत् सन्धिरन्तर्वसुः॥ १॥

अत्र चीण्यहानि क्रमेणाग्निष्टोमोक्थातिरात्रसंस्थानि यथं तरं वामदेव्यं बृहदिति क्रमेण पृष्ठानि स्तोमाः सप्ताः अष्टाच त्वारिंशं तृतीयसवनं सोक्थमिति उक्थान्यपि अष्टाचत्वारिंश स्तोमकानीत्यर्थः त्रयस्त्रिंशं तृतीयसवनं सोक्थमप्यत्राप्युक्था न्यपि त्रयस्त्रिंशस्तोमकानीत्युक्तं भवति छन्दोमानां पशुरूपत्व साधनश्च मध्यमेऽहनि सम्भवादेवं विराजोऽन्तर्व्यसरित्युच्यते॥ १॥

छन्दोमानां मध्यमाहर्भाक्त्वं प्रशंसितुमस्य विराजस्य लोक त्रयात्मकत्वमाह।

इमे लोकास्त्रिराजः॥ २॥

इमे लोकास्त्रिरात्रातिक्रमेण चीण्यहानि भूरादिलोकस्था नीयानीत्यर्थः॥ २॥

विराजस्वरूपप्रतिपादनाय स्वरूपमाह।

अस्तोव वा अयं लोकोस्तोवासो छिद्रमिवात्तरिक्षं॥३॥

मूलोकस्यास्तित्वं सिद्धं स्वर्गस्यापि ग्रहनक्षत्रताराधिष्ठानत्वेन तदर्थं ज्योतिष्टोमादिभिः प्रयतमानत्वेन चास्तित्वं मध्यमं त्वन्तरिक्षं छिद्रमिव निराश्रयमिवामूर्त्तत्वात् अस्त्वेव ॥ ३ ॥

कथमेतदङ्गां लोकसाम्यमित्याह।

अस्तीव विरात्रस्य प्रथममहरस्तीवोत्तमं छिद्रमिव मध्यतः ॥ ४ ॥

अङ्गां क्षयाद्यात्मकत्वोपन्यासान्मध्यमस्याङ्गोन्तरिक्षस्थानीयत्वेन छिद्रत्वं ॥ ४ ॥

तस्य कः परिहार इति तत्राह।

पशवो वै छन्दोमायछन्दोमामध्यतो भवन्त्यपिधित्या एवाछिद्रतायै ॥ ५ ॥

छन्दांसि पशुष्वाजिमयुस्तात् बृहत्युदजयतोति श्रुतेर्बृहतो द्वारा च्छन्दांसि पशवः स्तोमनिर्म्मितत्वात् छन्दोमा अपि पशवः पशूनां जीवनं छिद्रक्षमिसाधनं प्रसिद्धं अतो यच्छन्दोमामध्यतो मध्यमेऽहनि भवन्ति तदपिधित्यै अपिधानाय तच्चापिधानं अच्छिद्रतायै सम्पूर्णत्वाय भवति ये गर्गत्रिरात्रस्य प्रथमोत्तमे अहनो ते अन्तर्व्वसोरुपीषु जातमन्नरमित्यादिकल्पो द्रष्टव्यः ॥५॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य
सप्तमः खण्डः।

अथ अष्टमः खण्डः।

अथ पराकाख्यं स्वर्गसाधनं षष्ठं विरात्रमाह।

त्रिवृत् प्रातःसवनं पञ्चदशं माध्यन्दिनꣳ सवनꣳ सप्तदशं तृतीयसवनं एकविꣳशं प्रातःसवनं त्रिणवमाध्यन्दिनꣳ सवनं त्रयस्त्रिꣳशं तृतीयसवनꣳ सोक्थ्यं चतुर्विꣳशं प्रातःसवनं चतुश्चत्वारिꣳशमाध्यन्दिनꣳ सवनमष्टाचत्वारिꣳशं तृतीयसवनꣳ सोक्थ्यमेकविꣳशः षोडशी पञ्चदशी रात्रिस्त्रिवृत्सन्धिः पराकः ॥ १ ॥

स्तोमक्रमेण प्रागुपर्युपर्यारोहणादयं विरात्रः पराक इत्युच्यते ॥ १ ॥

अत्राधिकारिणमाह।

पराकेण वै देवाः स्वर्गं लोकमायन् स्वर्गकामो ह्येत पराङ्वैतेन स्वर्गं लोकमाक्रमते ॥ २ ॥

यत् स्तोमाः पराञ्चः सन्ति एतदनुष्ठातापि पराङ्वैव स्वर्गमाक्रमते ॥ २ ॥

अथ विरात्रनामनिर्वचनेन प्रशंसति।

यदा एतस्याकन्तदस्य पराक् तत् पराक्तस्य पराकत्वम् ॥ ३ ॥

यदेवतस्य भूलोकस्य तत्स्थस्य पुरुषस्य अकन्दुःखन्तदस्य स्वर्गस्य तत्प्राप्नवतः पुरुषस्य पराक्तं न्यग्भूतं भवति परागभूतमकन्दुःखं त्रिरात्रेण भवति परागित्युत्पत्तिः ॥ ३ ॥

न वै तत्र जग्मुषे किञ्चनाकं ॥ ४ ॥

तं स्वर्गं प्राप्नवते पुरुषाय किञ्चन अकन्दुःखं नैव खलु ॥ ४ ॥

अथोक्तार्थवेदनफलमाह ।

नास्मा अकस्मभवति य एवं वेद ॥ ५ ॥

स्पष्टं । ५ ॥

अथ तस्य षोडशिन एकविंशस्तोमस्य तत्परिहारार्थं रात्रिपर्यायसन्धिस्तोत्राणां पञ्चदशी रात्रिस्त्रिवृत्स्तोमकत्वमिति प्रशंसति ।

प्रजायास्त्वक्लप्तः पराङ् ह्येवैतेन स्वर्गं लोकमाक्रमते तद्यदेकविꣳशं षोडशी भवति पञ्चदशी रात्रिस्त्रिवृत्सन्धिस्तेनास्मिन् लोके प्रतितिष्ठति ॥ ६ ॥

तत् तत्र तृतीयेऽहनि षोडशी एकविंशस्तोमको भवति तुशब्दो विशेषोत्तोति द्योतनार्थः षोडशिनामेकविंशं कुर्वन् यजमानः प्रजायाः सकाशादक्लप्तः सन्नप्रजाभिः सहेहस्थितिं चिरकालमलभमान एव एतेन एकविंशकरणेन पराङ्त्वेवाभिमुखमेव स्वर्गमाक्रमते अतस्तत्परिहाराय यदि रात्रिः पञ्चदशी स्यात् सन्धिः सन्धिसाम त्रिवृत्स्तोमकं स्यात् तद्यथानु-

ष्टाताऽस्मिन् लोके प्रतितिष्ठति प्रजादिभिः सह अयमर्थः अपराद्धत्तैः स्तोमैरनुष्ठानात्पराङ्ङेव स्वर्गमाप्नोति अतोन्ते परावृत्तिरूपाभ्यां हृताभ्यामेव पञ्चदशत्रिवृद्भ्यां समापनेन इहलोके चिरकालं पुत्रादिभोगमनुभूय पश्चात् स्वर्गमाप्नोतीत्यर्थः अत्र कल्पः, यान्तर्वसोः प्रथमा सास्य परोक्षस्य हृषामोमधुमां अमोत्यादिकः कल्पोद्रष्टव्यः ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य
अष्टमः खण्डः।

अथ नवमः खण्डः।

उक्ताः षट्त्रिरात्राः अथ चतूरात्रायत्त्वार उच्यते तत्र प्रथमं चतुर्वीराख्यं वीरोत्पत्तिसाधनं चतूरात्रमाह।

चतुर्विꣳशाः पवमानास्त्रिवृत्त्याज्यानि पञ्चदशानि पृष्ठानि सप्तदशोऽग्निष्टोमश्चतुर्विꣳशाः पवमानाः पञ्चदशान्याज्यानि सप्तदशानि पृष्ठान्येकविꣳशोऽग्निष्टोमः सोक्थश्चतुर्विꣳशाः पवमानाः सप्तदशान्याज्यान्येकविꣳशानि पृष्ठानि त्रिणवोऽग्निष्टोमः सोक्थश्चतुर्विꣳशाः पवमाना एकविꣳशान्याज्यानि त्रिणवानि पृष्ठानि त्रयस्त्रिꣳशोऽग्निष्टोम एकविꣳशान्युक्थानि सपोडशिकानि पञ्चदशी रात्रिस्त्रिवृत्सन्धिः ॥ १ ॥

आद्यमग्निष्टोमसंस्थं द्वितीयं तृतीयमुक्थसंस्थं चतुर्थमति रात्रसंस्थं सर्वत्र पवमानाश्चतुर्विंशाः त्रिष्वहःसु पवमानव्यतिरिक्तेषु त्रिवृदादिक्रमेण एकैकस्तोमपरित्यागेनाज्यादीनि कल्पनीयानि प्रथमेऽहनि त्रिवृदाद्यास्त्रय आज्यपृष्ठान्येषु द्वितीये पञ्चदशाद्यास्त्रयः तृतीये सप्तदशाद्याः उभयत्राग्निष्टोमस्तोमक उक्थ्योपि तत्स्तोमक एव चतुर्थः एकविंशाद्यास्त्रयः रात्रिसन्धि प्रकृतवत् पञ्चदश त्रिवृती ॥ १ ॥

अथास्य प्रयोगकृतोवीरसाधनत्वमाह।

अचिरकामयत चत्वारो मे वीरा आजायेरन्निति स एतमपश्यत्तस्य चत्वारोवीरा आजायन्तास्य चत्वारोवीरा जायन्ते य एवं वेद ॥ २ ॥

अपश्यदिष्टौ अन्वतिष्ठदित्यर्थः ॥ २ ॥

तत् प्रशंसति।

एकꣳस्तोममुत्सृज्यैकमभ्यारभते वीरजननं वै स्तोमो वीरमेवास्मै तत् प्रजनयति ॥ ३ ॥

स्तोमं स्तोमप्रयोगोवीरजननं वै वीरोत्पादनमेवमेतदुत्तरोत्तरादतः पूर्वस्माच्च वीरलक्षणं वीरोत्पत्त्यर्थो भवति ते च वीराः तैत्तिरीये दर्शिताः य एवं विद्वांश्चतूरात्रेण यजत अस्य चत्वारो वीराजायन्ते ॥ ३ ॥

अथ पवमानस्य चतुर्विंशं प्रशंसति।

चतुर्विंशाः पवमाना भवन्ति चतुर्विंशत्यक्षरा गायत्री प्रजननं गायत्री प्रजात्यै ॥ ४ ॥

सर्वेष्वहःसु पवमानाश्चतुर्विंशाभवेयुः तेन गायत्र्यापि चतुर्विंशत्यक्षरा साच प्रजननसाधना अतो गायत्रीसंख्यासह स्तोमावोरागां प्रजननाय भवन्ति ॥ ४ ॥

अथास्मिन् यत्पवमानगतं युग्मस्तोमकत्वं यच्च स्तोत्रगतमयुग्मस्तोमकत्व तदुभय प्रजननसाधनमिति प्रशंसति ।

उभये स्तोमायुग्मन्त्सायुजश्च तन्मिथुन तस्मान्मिथुनात् प्रजायते ॥ ५ ॥

स्पष्टं ॥ ५ ॥

चतुर्णामङ्गां संख्यानं विदधाति ।

अग्निष्टोमः प्रथममहरुक्थोद्वितीय षोड़शी तृतीयमतिरात्रश्चतुर्थन्नानावीर्य्यतायै ॥ ६ ॥

पुरुषाणां नानावीर्य्यलाभाय अहान्यपि नानावीर्य्याणि कर्त्तव्याणि ॥ ६ ॥

उक्तक्रमानुष्ठानवतो यजमानस्य नानावीर्य्यतां कथं तत्राह ।

नानावीर्य्याण्यहानि करोति ॥ ७ ॥

यतोऽयं सस्थानानात्वेनाहान्यपि नानावीर्य्याणि करोति यतो नानावीर्य्यत्वमपि सिद्धमिति ॥ ७ ॥

मानान्तरप्रसिद्धा षोड़शी तृतीयमिति यदुक्तं तन्निराकर्तुं प्रसिद्धानामङ्गां स्थितिमनुवदति।

गायत्रं वै प्रथममहस्त्रैष्टुभं द्वितीयं जागतं तृतीयमानुष्टुभं चतुर्थं ॥ ८ ॥

स्पष्टोऽर्थः। ८।

इदानीं तृतीयेऽहनि षोड़शिनिराकरणविषयं ब्रह्मवादिनः प्रश्नमवतारयति।

तदाङ्गर्यात् तृतीयेऽहनि षोड़शिनं गृह्णीयुस्तृतीयेनाह्नानुष्टुभमाप्नुयुरच्छन्दश्चतुर्थमहः स्यादानुष्टुभो वै षोड़शीति ॥ ९ ॥

तत्र षोड़शिविषये ब्रह्मवादिन आहुः किमिति यद्यदि तृतीयेऽहनि षोड़शिनं गृह्णीयुः तदानीं तृतीयेनाह्नानुष्टुभमेवाप्नुयुः प्राप्ता भवेयुः अस्तु नाम तथा किं छिद्रमिति तत्राह चतुर्थमहरच्छन्दः छन्दोविरहितं स्यात् कुर्वन्ति तत्राह यत् षोड़शिनमहर्मिस्तैः षाड्यनुष्टुभो अनुष्टुप्छन्दःसम्बन्धी खलु षोड़शिसंस्थायां ग्रहणायोक्तस्याग्निष्टोमोक्थादिक्रमेण चतुर्थत्वात् षोड़शिमान्नः षोड़शिग्रहाङ्गत्वात् तस्य च प्रकृतत्वात्तदेवाच्छिद्रमिति वेदितव्यम् इतिशब्दस्तेषामाक्षेपसमाप्तिद्योतनार्थः ॥ ९ ॥

अथ तत्परिहारलक्षणं सिद्धान्तमाह।

चतुर्थेऽहनि षोड़शी गृह्यतव्यः स्वयायतने षोड़शी गृह्यते ॥ १० ॥

यत्र हि षोड़शी गृह्यते तत्रैव षोड़शी क्रियत इत्यर्थः ॥ १० ॥

कथं मध्यमयोरङ्गोरुक्तत्वेन नानावीर्य्याण्यहानि क्रियते तदाह ।

छन्दोभिरहानि नानावीर्य्याणि करोति ॥ ११ ॥

यथाभिहितं उक्थसंस्थं क्र भविष्यत्यस्मिन् पक्षे तथापि छन्दसां पृथक् पृथक्समाम्नानात्तैस्तानि विलक्षणवीर्य्याणि कृतवान् भवति ॥ ११ ॥

अथ चतुर्थेऽहःसु माध्यन्दिनसवने क्रमेण ब्रह्मसाम विदधाति ।

नौधसं प्रथमस्याह्नो ब्रह्मसाम भवति द्वितीयस्य आयन्तीयं तृतीयस्य त्रैशोकं चतुर्थस्य ॥ १२ ॥

स्पष्टं ॥ १२ ॥

अनुष्टुप्सम्बन्धिनः षोड़शिग्रहस्य चतुर्थेऽहनि कर्त्तव्यविधानाज्जागतं तृतीयमहरानुष्टुभं चतुर्थमहरिति स्थितं तत्र ब्रह्मवादिनामाक्षेपमवतारयति ।

तदाहुरपभ्रष्टा इव वा एष यत् ज्यायसः छन्दोधिकनीयस्छन्दउपैतीति ॥ १३ ॥

तृतीयस्याङ्गोजागतत्वाच्चतुर्थस्यानुष्टुभत्वात्त्र्यायसम्छन्दसोनन्तरं कनीयस्छन्द उपक्रान्तः भवति तथापगतछन्दोनुक्रमः स्यात्॥ १३॥

तत्र परिहारमाह।

तद्यदेषा चतुर्थेहन्यतिजगती क्रियतेऽनपभ्रंशाय॥ १४॥

त्रैलोकस्य विश्वाः पृतनाइत्येषा सावतिजगती अतः छन्दसोवरोहग्रहणादपभ्रंशदोषोनास्ति॥ १४॥

अथ चतुर्थमहःसु अछावाकसाम विदधाति।

कालेयं प्रथमस्याह्नोच्छावाकसाम माधुच्छन्दसं द्वितीयस्य रौरवं तृतीयस्य समन्तं चतुर्थस्य नानावीर्यतायै नानावीर्याण्येवैतानि करोति॥ १५॥

स्वर्गस्य विलक्षणवीर्य्यपुत्रलाभाय प्रत्यहमच्छावाकसाम्नः पृथक्करणं तेन तदर्थान्यहान्यपि नानावीर्य्याणि कृतवान् भवति चतुर्णामह्नां ब्रह्मसामान्यच्छावाकसामानि च विहितान्यथ होतुः पृष्ठानि मैत्रावरुणसामानि विधातव्यानि तत्र प्रथमद्वितीययोर्होतूरथन्तरबृहत्पृष्ठेखेव एवमप्यङ्गोवामदेव्यमैत्रावरुणसामस्वाखेव॥ १५॥

अथोत्तरयोरह्नोर्होतुःपृष्ठं मैत्रावरुणसाम च विदधाति।

अभित्वावृषभासुत इति तृतीयस्याह्नोरथन्तरं कस्त्वमिन्द्रत्वावसविति वामदेव्यं यज्ञा यथा अपूर्वेति चतुर्थ

ग्राह्मो बृहदेदुमधोर्मदिन्तरमिति वामदेव्यं छन्दसां नानावीर्यतायै नानावीर्याण्येवैतानि करोति ॥ १६ ॥

अभित्वाशूषभास्तुतेति गायत्रो तृतीयस्याङ्गोरन्तरं होतुः पृष्ठम् कस्त्वमिन्द्रेति बृहती प्रगाथेषु वामदेव्यं मैत्रावरुणपृष्ठं भवति गायत्रेत्यनुष्टुप् बृहत् होतुः पृष्ठम् एदुमधोरित्युष्णिक्वामदेव्यं मैत्रावरुणं साम नानावीर्यतायाइति पञ्चम्यर्थे चतुर्थी छन्दसां लक्षणे नानावीर्यत्वादहान्यपि नानावीर्याणि उपाप्तै गायत्रानरोवभ्रवेनुस्तवसे प्रयज्ञावोन भूर्णय आशुरर्षबृहन्मत इत्यादेकत्योद्रष्टव्यः ॥ १६ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य नवमः खण्डः ।

अथ दशमः खण्डः ।

अथ द्वितीयं जमदग्नेश्चतूरात्र माह तत्र प्रथमस्याङ्गः क्रमि माह ॥

त्रिवृत्पञ्चदशौ अग्निष्टोमः प्रथममहः ॥ १ ॥

अग्निष्टोमसंस्थम् तस्य त्रिवृत्पञ्चदशौ स्तोमौ व्यत्यासेन स्याताम् आद्यानि स्तोत्राणि त्रिवृन्ति अन्यानि पञ्चदशानीति विभागः ॥ १ ॥

अथ द्वितीयस्याङ्गमाह ।

अथोत्तरस्याङ्गस्यतुर्विꣳशं बर्हिष्यवमानं पञ्चदशानि त्रीण्याज्यानि सप्तदशमच्छावाकस्यैकविꣳशोमाध्यन्दिनः पवमानः सप्तदशे द्वे पृष्ठे एकविꣳशं तृतीयसवनꣳसोक्थं ॥२॥

द्वितीयस्याङ्गः स्तोत्रमुखं चतुर्विंशस्तोमकं तत आज्यानि त्रीणि पञ्चदशानि चतुर्थमच्छावाकस्याज्यं सप्तदशमाध्यन्दिनसवनमेकविंशः पवमानः हेतामित्रावरुणयोः पृष्ठे द्वे सप्तदशे ब्राह्मणाच्छंस्यच्छावाकयोरेकविंशे द्वे पृष्ठे उक्थसहितं तृतीयसवनं सर्वमप्येकविंशस्तोमकं ॥ २ ॥

अथ तृतीयस्याङ्ग आह।

तृतीयस्याङ्ग एकविꣳशं बर्हिष्यवमानं त्रीणि चाज्यानि पञ्चदशमच्छावाकस्य चतुर्विꣳशोमाध्यन्दिनः पवमान एक विꣳशानि पृष्ठानि त्रिणवं तृतीयसवनं द्वे चोक्थे एव विꣳशमच्छावाकस्य ॥ ३ ॥

तृतीयस्याङ्गः आज्यत्रयबर्हिष्यवमानत्वं च एकविंशस्तोमकं चतुर्थमाज्यं पञ्चदशं माध्यन्दिनं सवनं पवमानपृष्ठानि च क्रमेण चतुर्विंश एकविंशानि तृतीयसवनं सर्वमपि त्रिणवं मैत्रावरुणब्राह्मणाच्छंसिन उक्थे द्वे अपि त्रिणवे अच्छावाकीयं तूक्थमेकविंशं ॥ ३ ॥

अथ चतुर्थस्याङ्ग आह।

चतुर्थस्याङ्गस्यतुर्विꣳशाः पवमानाः पञ्चदशꣳ होतु राज्यꣳ सप्तदशानि चौष्णेकविꣳशानि पृष्टानि त्रयस्त्रिꣳशोग्निष्टोम एकविꣳशोक्थानि स षोडशिकानि पञ्चदशी रात्रिस्त्रिवृत्सन्धिः ॥ ४ ॥

स्पष्टं । ४ ।

अथास्य पुष्टिलक्षणं फलं सप्रपञ्चमाह ।

जमदग्निः पुष्टिकाम एतमाहरत्स इमान्पोषानपुष्यत् ॥ ५ ॥

पूर्वं जमदग्निः पुष्टिकामस्तदर्थमेतं चतूरात्रमाहरत् स इमान् लोके प्रसिद्धान् पशुपुत्रादिलक्षणान् पोषान् अपुष्यत् प्राप्नोत् ॥ ५ ॥

अथ यान् पोषानपुष्यत्तेन मल्लानमानिनः आमन्त्रित्याह ।

यदिदमाहुर्नर्वा ऊर्वापत्नी सं जानाते इति ॥ ६ ॥

यदिदमाहुर्लौकिका ऊर्वा ऊर्वपुत्री जामदग्न्यौ पत्नी मल्लौ नसंजानाते ॥ ६ ॥

इदानीं तत्प्रति तस्यार्थे तदनुष्ठातुस्तदाख्यं भवतीत्याह ।

तन्नर्वानेवैनेन पोषान् पुष्यति ॥ ७ ॥

एतेन चतूरात्रेण एतान् सर्वान् जमदग्नेः पोषान् पुष्यति इदानीन्तनोपि ॥ ७ ॥

अथास्मिन् चतूरात्रे विद्यमानस्तोत्रीयापरिगणनयाजगतीछन्दःसम्पत्तिर्भवतीत्याह।

जगती छन्दोभिः सम्पद्यते ॥ ८ ॥

एतेषामङ्गां स्तोत्रीयामायाजगत्याख्यं छन्दः सम्पद्यते तथा हि प्रथममग्निष्टोममहस्तच्च द्वादशस्तोत्राणि तानि त्रिहतच्च द्वयाभ्यां यानि षट्त्रिंहतं षट्पञ्चद्वयानि तेषां स्तोमगत स्तोत्रीयापरिगणनायां चतुश्चत्वार्यधिकं शतं स्तोत्रीया भवन्ति तावतस्त्रीजगत्यः एवं द्वितीयेहनि अष्टाशीत्यधिकं शतद्वयं स्तोत्रीयाः स्युस्ताश्च षट्जगत्य तृतीयेहनि षट्त्रिंशदधिक शतानि स्तोत्रीयास्ताः सप्तजगत्यः उत्तमेऽहनि अष्टाविंशत्यधिक पञ्चशतानि स्तोत्रीयाः स्युः ता एकादशजगत्य इति जगतो सम्पत्तिः अत्रोपपद्यते यज्ञामदग्न्यः प्रत्यहं त्रिषट्सप्तैकादश जगत्य इति एवं जगतीति सम्पत्तिः ॥ ८ ॥

किञ्चेत इत्याह।

जगती वै छन्दसां परमं पोषं पुष्टा परममेवैतेन पोषं पुष्यति ॥ ९ ॥

गायत्र्यादीनां सप्तछन्दसामध्ये उत्तमा जगती परमं पोषं पुष्टा स्तत्सम्पत्तिः यदेतच्चतूरात्रं कुर्वन्नपि परममविशेषं पोषं पुष्यति प्राप्नोति यद्यदितरकृतु गतास्पमत्सम्राज्यं द्रव्यं भवति ॥ ९ ॥

अत्र पुरोडाशं द्रव्यं कर्त्तव्यमिति सप्त रोचनं विदधाति।

पुरोडाशिन्य उपसदो भवन्ति पशवो वै पुरोडाशाः पशूष्वेव प्रतितिष्ठति ॥ १० ॥

स्पष्टं। पशुभ्यो वै मेधादुदक्रामत् सोत्रोर्हिश्चैव यवश्च भूतावाजोपेतामित्येतरेयकश्रुतेः पशवो वै पुरोडाशाः, अत्रायं विवेकः, इतरयज्ञगतासूपसत्स्वग्निसोमविष्णवस्तिस्रोदेवताः तेषां आज्यं द्रव्यं यथावत्तन्तिस्रः षट् द्वादशेत्यादि संख्यया मायं प्रातर्होमः अत्रतु प्रत्यहं देवताभेदपुरोडाशोद्रव्यं कपालसंख्या प्रत्यहमिष्टिः अन्यत्तेष्टिविकारा उपसदः अत्र तु हविर्होमा इति सूत्रं त्रयोदश्यामपरपक्षस्य दीक्षित जामदग्न्याय तस्य विंशतिर्दीक्षा द्वादशोपसदस्तत्रोपसत्सु पृथग्होमानध्वर्युर्जुहुयात्पुरोडाशास्तूक्ताब्राह्मणेन समानदेवतौ पूर्वाह्णापराह्णयोरग्नेर्वैश्वानरमित्येतत् प्रभृतय एषां होमा इति तत्र आग्नेय एककपाल आश्विनो द्विकपाल इत्यादिना अग्न्यादिदेवताकमेककपालादिपुरोडाशं विधास्यति ॥ १० ॥

तेषां क्रमेण मन्त्रानाह ॥

अग्ने वेर्होत्रं वेरध्वरमापितरं वैश्वानरमवसेकुरिन्द्राय देवेभ्योजुह्वताहविः स्वाहा ॥ ११ ॥

हे अग्ने होत्रं होतुः कृत्यं वेः विद्धि तथा अध्वरं यज्ञञ्च विद्धि होतारमधिष्ठाय होत्रं कुरु हविःप्रापणेन यज्ञन्निर्वर्त्तयेत्यर्थः विदेर्ईकारस्य दृश्येति कुत्वं किञ्च पितरं सर्व्वस्य पालकं वैश्वानरं

विश्वेषां नराणां हितारं मा मामवसे अस्माकं रक्षणाय अकः अभिमुखं कुरु हे ऋत्विजो यूयमपि इन्द्राय सर्व्वदेवाधिपतये देवेभ्योन्येभ्योवस्वादिभ्यश्च हविर्जुहुतः प्रयच्छतः यद्वा व्यत्ययेन जुहोमीति व्याख्येयं स्वाहेति हविस्त्यागाभिधानं इदं हविर्हुत्तमस्तु ॥ ११ ॥

अथाश्विनोद्विकपालमन्त्रमाह ॥

देवावश्विनौ मधुकशयाद्येमं यज्ञं यजमानाय मिमिक्षतमिन्द्राय देवेभ्योजुह्वताहविः स्वाहा ॥ १२ ॥

हे देवौ द्योतमानौ अश्विनौ युवां मधुकशया वृष्ट्यर्थं मेघताड़नेनोदकवत्या कशया अद्यास्मिन्दिने इमं यज्ञं यजमानाय मिमिक्षतं सेक्तुमिच्छतं वृष्ट्यादिफलोपेतं कुरुत इत्यर्थः शिष्टं पूर्व्ववत् ॥ १२ ॥

अथ वैष्णवस्य त्रिकपालस्य मन्त्रमाह ।

देव विष्णउर्व्व द्यास्मिन्यज्ञे यजमानायाधिविक्रमस्वेन्द्राय देवेभ्यो जुह्वताहविः स्वाहा ॥ १३ ॥

हे देव द्योतमान विष्णो अद्येदानीमस्मिन् यज्ञे यजमानाय उरु विस्तीर्णं यथा अधिगम्य विक्रमस्व स्वपादप्रक्षेपं कुरु उपविशेत्यर्थः शिष्टमन्यत् ॥ १३ ॥

अथ सौम्यस्य चतुष्कपालमन्त्रमाह ।

देव सोम रेतोधा अद्यास्मिन्यज्ञे यजमानायैधीन्द्राय देवेभ्योजुह्वताहविः स्वाहा ॥ १४ ॥

हे सोम देव इदानीमस्मिन्यज्ञे यजमानार्थं रेतोधाता एधि भव ॥ १४ ॥

अथ सावित्रस्य पञ्चकपालस्य मन्त्रमाह ।

देव सवितः सुसावित्रमद्यास्मिन्यज्ञे यजमानायासुवस्वेन्द्राय देवेभ्योजुहुताहविः स्वाहा ॥ १५ ॥

हे सवितः विश्वस्य प्रेरयितः देव सुसावित्रं शोभनं सवितुः कृत्यं इदानीमस्मिन्यज्ञे यजमानायासुवस्वानुजानीहि कुर्व्वित्यर्थः ॥ १५ ॥

अथ धातुः षट्कपालस्याह ॥

देव धातः सुधाताद्यास्मिन्यज्ञे यजमानायैधीन्द्राय देवेभ्योजुहुताहविः स्वाहा ॥ १६ ॥

हेधातः ब्रह्मन् देव मन्त्राभिमानी बृहस्पतिरित्यर्थः ब्रह्मा वै बृहस्पतिरिति श्रुतेः एवं भूतस्त्वं यजमानार्थं सुधाता सुष्ठुकामानां दाता एधि भव ॥ १६ ॥

अथ मारुतस्य सप्तकपालस्याह ।

देवा ग्रावाणो मधुमतीमद्यास्मिन्यज्ञे यजमानाय वाचं वदतेन्द्राय देवेभ्योजुहुताहविःस्वाहा ॥ १७ ॥

अत्र मरुतः सदा यजमाना वर्षं सृजन्तीत्यभिप्रक्रमकाले अभिपवताहत्यसि वाक्शब्दाविद्यन्त इति यत्र तच्छब्दमाम्नात् ग्राव-

रूपेण मरुतां स्तुतिः हे ग्रावाणो मरुतां विभूतिभूता देवा यूयं यजमानार्थं मधुमतीं माधुर्य्योपेतां वाचं वदता ग्रावभ्यो वाचं वदता वदङ्गाइति हि निगमान्तरम् ॥ १७ ॥

अथ बार्हस्पत्यस्याष्टाकपालमाह।

देव्यनुमतेन्वद्येमं यज्ञं यजमानाय मन्यस्वेन्द्राय देवेभ्यो जुङ्ताद्दविः स्वाहा ॥ १८ ॥

हे देव्यनुमते अनुजाकर्त्तृदेवते इमं यज्ञं यजमानायानुमन्यस्व अनुमतिं कुरु नन्वयं मन्त्रो बार्हस्पत्यस्य पुरोडाशस्य मन्त्रे त्वनुमतिरेव प्रकाश्यते कथं वैयधिकरण्यमिति नायं दोषः ब्रह्म वै ब्रह्मणस्पतिरिति श्रुतेः बृहस्पतिमन्त्राभिमानित्वान् मन्त्रेण क्रियमाणानां कर्म्मणां बृहस्पत्यनुज्ञाया अपेक्षितत्वादनुमत्या एव ब्रह्मणस्पतित्वात् ॥ १८ ॥

अथ मैत्रस्य नवकपालस्य मन्त्रमाह।

देव्यदितेस्यादित्यमद्यास्मिन्यज्ञे यजमानायासुवस्येन्द्राय देवेभ्योजुङ्ताद्दविः स्वाहा ॥ १९ ॥

हे अदिते देवमातः अदितिरदीना देवमातेति निरुक्तात् मित्राख्यस्यादित्यमूर्त्यन्तरस्यापि सेवमाना हे देवि सुशोभनमादित्यस्तव पुत्रभूतं अद्यास्मिन्यज्ञे यजमानायासुवस्व आभिमुख्येन प्रेरय ॥ १९ ॥

अथ वारुणस्य दशकपालस्य मन्त्रमाह।

देव्य आपोनन्नम्यध्वमद्यास्मिन्यज्ञे यजमानायेन्द्राय देवेभ्यो जुङ्धताहविः स्वाहा ॥ २० ॥

हे देव्य आपोनन्नम्यध्वं भृशं सस्यादिसमृद्धये प्रणता भवतः वारुणस्यापामधिपतित्वादभेदेनैवोच्यते ॥ २० ॥

अथेन्द्राग्नस्यैकादशकपालस्य मन्त्रमाह।

सदः सदः प्रजावानभुर्जुषाण इन्द्राय देवेभ्योजुङ्धताहविः स्वाहा ॥ २१ ॥

सदः सदः तत्तद्यागगृहे प्रजावान् मरुदादि प्रजाभिस्तद्वान् ऋभुः उरुभासमान एवं महिमा जुषाणो अस्मद्यज्ञं सेवमानो भवन्तु अस्येन्द्रस्य प्राधान्येन स्तुतिः ॥ २१ ॥

अथ वैश्वदेवस्य द्वादशकपालस्य मन्त्रमाह।

देव त्वष्ट सुरेतोधा अद्यास्मिन्यज्ञे यजमानायैधीन्द्राय देवेभ्यो जुङ्धताहविः स्वाहा ॥ २२ ॥

त्वष्टा देवशिल्पी स विश्वेषां देवानामुचितानि कर्माणि करोतीति स एव वैश्वदेवस्थाने श्रूयते सुरेतोधा सुष्ठु रेतसो विधाता विकर्त्ता रेतसः सिक्तस्य त्वष्टा रूपाणि विकरोति तयास्था वै तत् प्रजापतिः इति श्रुतेः ॥ २२ ॥

उक्ता द्वादशमन्त्राः तेथेते मन्त्राः स्युः ताः पुरोडाशाः क्रमेण विदधाति।

आग्नेय एककपाल आश्विनो द्विकपालो वैष्णवस्त्रि-
कपालः सौम्यश्चतुष्कपालः सावित्रः पञ्चकपालो धात्रः
षट्कपालो मारुतः सप्तकपालो बार्हस्पत्योष्टाकपालो
मैत्रो नवकपालो वारुणो दशकपाल ऐन्द्र एकादश कपा-
लो वैश्वदेवो द्वादश कपालः ॥ २३ ॥

अग्निर्देवतास्य पुरोडाशस्याग्नेय इति एकस्मिन् कपाले संस्कृतः पुरोडाशः एककपालः एकस्यैवाग्नेर्गार्हपत्यादिषु रूपे वर्त्तमानाद्धस्तुत एकत्वादेककपालोयुक्तः, अश्विभ्यां द्वित्वेन व्यपदेशात् द्विकपालः, वैष्णवस्त्रिः इदं विष्णुर्विचक्रमेतिश्रुतेः विष्णोस्त्रिकपालः सम्मतः, जरायुजाण्डजस्वेदजोद्भिज्जानाञ्चतुःप्राणिजातानामुत्पत्त्यर्थं रेतो धारकत्वाद्दालतावीरुधावनस्पतयो वानस्पत्य इति सोमस्य चतुर्विधानां स्वामित्वाद्वा चतुःकपालो युक्तः, सवितुः सम्वत्सरस्याधिपतित्वात्पञ्चकपालः सम्वत्सरो वै धातेति श्रुत्यन्तरात् धाता सम्वत्सरात्मकः, सम्वत्सरे च षड् ऋतवः सन्तीति धातुः षट्कपालो युक्तः, सप्तगणा इति श्रुतेर्मरुतां सप्तकपालो युक्तः, तैत्तिरीयके अग्निरेकाक्षरेण वाचमुदजयदश्विनौद्वयक्षरेण न प्राणी पानी व्युदजयतां विष्णुः अक्षरेण त्रिलोकानुदजयत इत्युक्ता बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयन्मित्रो नवाक्षरेण त्रिवृत्स्तोममुदजयद्वरुणो दशाक्षरेण विराजमुदजयत् इन्द्र एकादशाक्षरेण त्रिष्टुभमुदजयद्विश्वे देवा द्वादशाक्षरेण जगतीमुदजयन्निति श्रुतित्वात् तत् कपालसंख्यायोगो द्रष्टव्यः अत्र

उपोषु जातमप्तुरमित्यनुरूपो नौधसं ब्रह्मसाम सुज्ञानस्य लोके पौष्कलमित्यादिकः कल्पो द्रष्टव्यः ॥ २३ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य दशमः खण्डः ॥

अथ एकादशः खण्डः ।

अथ वसिष्ठस्य चतूरात्रमाह ।

त्रिवृत् प्रातःसवनं पञ्चदशं माध्यन्दिनꣳ सवनꣳ सप्तदशं तृतीयसवनं पञ्चदश प्रातःसवनꣳ सप्तदश माध्यन्दिनꣳ सवनमेकविꣳशꣳ तृतीयसवनꣳ सोक्थꣳ सप्तदशं प्रातः सवनमेकविꣳशं माध्यन्दिनꣳ सवनं त्रिणवं तृतीयसवनꣳ सोक्थमेकविꣳशं प्रातःसवनं त्रिणवं माध्यन्दिनꣳ सवनं त्रयस्त्रिꣳशं तृतीयसवनं प्रत्यवरोहीण्युक्थानि त्रिणवं प्रथमं द्वे एकविꣳशे सपोडशिके पञ्चदशी रात्रिस्त्रिवृत् सन्धिः ॥ १ ॥

आदितः पूर्वपूर्वस्य परित्यागेनोत्तरस्तोमेनेज्याभ्युपक्रान्तव्यानि तृतीयानि त्रीण्युक्थानि प्रत्यवरोहीणि तद्यथा प्रथमतः त्रिणवस्तोमकत्ततो द्वे एकविंश इति ॥ १ ॥

अथैतच्चतूरात्रं कर्तुः प्रशंसनद्वारा समृद्धिफलसाधनमित्यत आह ।

वसिष्ठः पुत्रहतो हीन इवामन्यत स एतमपश्यत्सोम्यं पर्यैद्धीन इव मन्येत स एतेन यजेत ॥ २ ॥

वसिष्ठः पुत्रहतः पुत्रोहीन इव कुलक्षयः पुत्राभावेन विच्छिन्नत्वादात्मानं हीन इवामन्यत सोयं मनुष्यलोकः पुत्रेणैव जय्य इति शक्तेः पश्यादेतं चतूरात्रं होनत्वपरिहारायापश्यत् ज्ञात्वायं पर्येत् माकल्पेनानुष्ठितत्वात्तस्माद्यः पुत्रादिभिः होनमात्मानं मन्येत स एतेन यजेतेति ॥ २ ॥

अथायतस्तोमात् स्तोमान्तरारम्भः श्रुतस्तत् प्रशंसति ।

यत् स्तोमात् स्तोममभिसंक्रामत्यग्नेर्वाग्यꣳ रोहति वसिष्ठस्य जनित्रे भवतः प्रजात्यै ॥ ३ ॥

वसिष्ठो वा एतं पुत्रहतोऽपश्यत्स प्रजया पशुभिः प्रजायते त्युक्तत्वाद्वसिष्ठः पुत्रजननसाधनत्वेन वसिष्ठस्य जनित्रे इति नामतया कुत्र प्रयोग इति तत्र वक्तृन् पक्षानाह तेषु प्रथमं पक्षमाह सूत्रकारः वसिष्ठस्य जनित्रे भवत इति संसर्पस्य चतुर्थेऽहनि बृहदनुष्टुभोः पृथगनुपूर्वमनुकल्पयेत् चतुर्थं हि जनित्रस्थानमिति अस्यायमर्थः वसिष्ठस्य चतूरात्रस्य शाखान्तरप्रसिद्धा ससर्प इति नामधेयं तथा च कारव्राह्मणं वसिष्ठो वा अकामयत स इमान् लोकान् सर्पेयमिति स एतं चतूरात्रमपश्यत्ता इमान् लोकान् सर्प तस्मात्सर्पस्य संसर्पत्वमित्यर्थः तस्य चतुर्थेऽहनि माध्यन्दिनपवमाने बृहत्यां प्रथमञ्जनित्रं अभिसोमास इत्यत्र मध्ये अर्भवेनुष्टुभि द्वितीयन्तं चोदस्य सूतीषहमित्यत्र गायेत् यद्यपि जनित्रे भवत इति सहैव पठिते तथापि

जनित्रा जनित्रा इत्यभ्यारोरन्त्यस्यैकरूपत्वादजामितायै पृथगेव पर्यायाख्ये इति विशेषेण विहितयोः जनित्रयोः कथं चतुर्थेऽहनि नियम इति अत्रोपपत्तिरुच्यते चतुर्थमहर्जनित्रस्य स्थानं दृष्टं मम्रदे षडहे सोमः पवते जनितामतोनामिति जनित्रमन्त्यं मध्यन्दिनस्येति कर्त्रकारवचनात् तदन्यापि युक्तमित्यर्थः अथ द्वितीयं पक्षमाह राथन्तरबृहत्योर्वामिष्टं प्रजननोक्तं रथन्तरमिति अयमर्थः यागज्ञः पक्षान्तरार्थं अथ वा राथन्तरबृहत्पृष्ठयोः प्रथमतृतीययज्ञयोः पक्षयोर्ये बृहत्यौ तयोर्जनित्रे कुर्यात् पुनरनुष्टुभि छन्दःसाम्यात् बृहत्याश्च जनित्रोत्पत्तिहेत्वन्तरमुच्यते प्रजननेन रथ संस्तुतं रथन्तरं वसिष्ठस्य रथन्तरं दृष्ट्वा तादृगे च जनित्रे इति मा दृष्यते तयोरुक्तः कल्पः तृतीय पक्षमाह वार्हतयोर्विकल्पे तयोर्विकल्पः स्यादर्पेयकल्पेनेति बृहत्यबृहत्यार्द्वितीयचतुर्थयोरहार्य्ये बृहत्यौ तयोः कुर्यादित्यर्थः आर्पेयकल्पे तु मामनो नोक्ते इति तयोर्विकल्पः स्यादेतेनार्पेयकल्पेनेत्युक्तं प्रत्यक्षब्रह्मविहितत्वेन त्वयोगाद्विकल्पायुक्त इत्यभिप्रायः ॥ ३ ॥

अथ चतुर्थेऽहनि प्रत्यवरोहोक्थ्युक्थानि तानि प्रशंसति ।

प्रत्यवरोहोक्थ्युत्तमस्याऽऽ उक्थानि भवन्ति प्रतिष्ठित्यै ॥ ४ ॥

एकविंशाहर्हयकर्त्तव्यत्वात् प्रतिष्ठितहेतुत्वं अत्र या जामदग्न्यस्य प्रथमा सा संमर्पस्य न वा सौपर्णे उद्गच्छति परितोषिश्च तासुतमिति वार्हदुक्थमित्यादि कल्पो द्रष्टव्यः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य
एकादश खण्डः ।

अथ द्वादशः खण्डः ।

अथ विश्वामित्रस्य सञ्जयाख्यं चतूरात्रमाह ।

त्रिवृदग्निष्टोमः पञ्चदशउक्थः सप्तदशउक्थ एकविंशो निरात्रो विश्वामित्रस्य सञ्जयः ॥ १ ॥

विश्वामित्रस्य सञ्जयसाधनत्वात् सञ्जयं नाम ॥ १ ॥

कथमेतन्नाम सम्पन्नमिति तदुपपादयति ।

जह्नुवृचीवन्तोराष्ट्र आहिंसन्त स विश्वामित्रो जाह्नवो राजैतमपश्यत् स राष्ट्रमभवद्राष्ट्रमितरे ॥ २ ॥

जह्नोः पुत्रा ऋचीवन्नामकाः केचन राजानः आसन् ते च राष्ट्रे राष्ट्रविषये राज्यस्वामित्वाय अहिंसन्त परस्परं हिंसां कलहं सर्वतोऽकुर्वन् तेषां मध्ये जाह्नवः जह्नुपुत्रो विश्वामित्र एतं चतूरात्रमपश्यत् दृष्ट्वा स्थितवानित्यर्थः स तत्सामर्थ्यात् राष्ट्रमभवत् राष्ट्रं सर्वं विश्वामित्र एव पर्य्यगृह्णादित्यर्थः इतरे ऋचीवन्त अराष्ट्रं अराष्ट्रनामका इतरराज्यस्थाः पुरुषानाङ्गी चक्रुरित्यर्थः ॥ २ ॥

एतस्याधिकारिणमाह ।

भ्रातव्यवान्यजेत ॥ ३ ॥

यस्माद्भ्रातव्याणां मध्ये वसिष्ठेन इतरलक्षणेन अतीजयत् साधनमभूत् अतो भ्रातव्यवानधिकारी ॥ ३ ॥

उक्तार्थवेदनं प्रशंसति ।

भवत्यात्मना परास्य भ्रातव्यो भवति य एवं वेद ॥ ४ ॥

स्वयं यजनवान् भवति अस्य भ्रातव्यः पराजितो भवतीत्यर्थः ॥ ४ ॥

अथ चतुर्थाभङ्गां यच्चिद्वदादिस्तोमचतुष्टयात्मकत्वमस्ति तत् प्रशंसति ।

ज्योतिर्वा एषविद्वृतः ॥ ५ ॥

त्रिवृत्पञ्चदशसप्तदशैकविंशतानेव तानि ज्योतींषीति श्रुत्यन्तरादेष चतूरात्रविद्वृतो ज्योतिरेव ॥ ५ ॥

अथ वेदनं प्रशंसति ।

ज्योतिः प्रजानां भवति य एवं वेद ॥ ६ ॥

स्पष्टं ॥ ६ ॥

प्रकारान्तरेणैतं चतूरात्रं प्रशंसति ।

चतुष्टोमो वा एष चतुष्पादाः पशवः पशुष्वेव प्रतितिष्ठति ॥ ७ ॥

एष चतूरात्रश्चतुष्टोमः खलु क्रमेण त्रिवृदादीनां विधानात् ॥ ७ ॥

अथ चतुर्थाभ्यङ्गां यदेकविंशात् स्तोमादतिक्रमणमस्ति तत् प्रशंसति ।

एकविꣳशꣳस्तोमानानियन्ति प्रतिष्ठा वा एकविꣳ-शोन्तत एव यज्ञस्य प्रतितिष्ठति ॥ ८ ॥

प्रजापतेः पादत उत्पन्नत्वात्पादयोः प्रतिष्ठाहेतुत्वात् असा वादित्य एकविंश इति श्रुतेः तस्य च प्रतिष्ठितत्वाच्चास्य प्रतिष्ठितत्वं अत्र प्रसोमासो विपश्चित इति गायत्रमेकस्यामाश्वमेकस्यां जरा-बोधीयमेकस्यां प्रसोम देववीतय इति यौधाजयन्तिस्रषु समान मितरं प्रथमेनाङ्गा संसर्पस्येत्यादिकः कल्पोद्रष्टव्यः ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य
द्वादशः खण्डः ।

अथ त्रयोदशः खण्डः ।

अथ त्रयः पञ्चरात्राः तत्राभ्यासंख्याख्यं पञ्चरात्रमाह ।

द्वे त्रिवृतौ सवने पञ्चदशमेकं द्वे पञ्चदशे सवने सप्त दशमेकं द्वे सप्तदशे सवने एकविꣳशमेकं द्वे एकविꣳशे सव ने त्रिणवमेकं द्वे त्रिणवे सवने त्रयस्त्रिꣳशमेकं प्रत्यवरोहो ण्युक्थानि त्रिणवं प्रथमं द्वे एकविꣳशे षोडशिके पञ्चद शो रात्रिस्त्रिवृत्सन्धिः ॥ १ ॥

त्रिवृत्स्तोमके प्रातर्मध्यन्दिने सवने तृतीयं सवनं पञ्चदश स्तोमकं पुनर्द्वितीयस्मिन्नहनि द्वे पञ्चदशस्तोमके सवने तृतीयं सप्तदशस्तोमकमित्येवं क्रमेण द्रष्टव्यं अत्राप्युक्थानि त्रीण्यपि

प्रत्यवरोहस्तोमकानि तत्रायं विभागः त्रिणवं प्रथममुक्थं हे उक्थ्ये एकविंशे रात्रिः सन्धिः प्रकृतिवदेव ॥ १ ॥

अस्मिन् पञ्चरात्रे यत्पञ्चरात्रत्वमस्ति तत् प्रशंसितुमाह ।

देवाश्च वा असुराश्चास्पर्द्धन्त ते न व्यजयन्त ते ब्रुवन् वाचो मिथुनेन विजयामहै यतरेनो वाचो मिथुनन्नप्रतिविन्दाँस्ते परा भवानिति ते देवा एक इत्यब्रुवन्नेकेत्यसुरा वाचो मिथुनं प्रत्यविन्दं द्वाविति देवा अब्रुवन् द्व इत्यसुरा वाचो मिथुन प्रत्यविन्दँस्त्रय इति देवा अब्रुवँस्तिस्र इत्यसुरा वाचो मिथुनं प्रत्यविन्दँश्चत्वार इति देवा अब्रुवँश्चतस्र इत्यसुरा वाचो मिथुनं प्रत्यविन्दन् पञ्चेति देवा अब्रुवन्नासुरा अविन्दँस्ततो देवा अभवन परासुराः ॥२॥

पूर्वं देवाश्चासुराश्चास्पर्द्धन्त ततो अन्येषामपि जयं यः अप्राप्तः तदर्थं देवा इत्यब्रुवनसुरान् वयं वाचो मिथुनेन स्त्री पुंलिंगात्मकेन विजयामहै जयं प्राप्नुमः अस्माकं मध्ये वाङ्मिथुनं प्रयोक्तुं न शक्नुवन्ति ते पराभूता इति मिथुनः ममयमकुर्वत एवं मति ते देवा एक इति पुंलिङ्गां वाचं अब्रुवन् तस्याः प्रतियोगित्वेन एके तिस्त्रोलिङ्गा वाचमब्रुवन् एवं हि वित्तः संख्यावाचकं वाचो मिथुनं परस्परमब्रुवन् ततो देवाः पञ्चेत्यब्रुवन् तस्य स्त्रीलिङ्गे रूपाविशेषात् विलक्षणशब्दं कर्तुंनाविन्दन् नालभन्त ततो

वाचो मिथुनजया देवा अभवन् समर्धुवन् असुरास्तु पराभवन् एवं देवानां जयहेतुरयं पञ्चरात्र इति तस्य स्तुतिर्द्रष्टव्या ॥ २ ॥

उक्तार्थवेदनं प्रशंसति।

भवत्यात्मना परास्य भ्रातृव्यो भवति य एवं वेद ॥ ३ ॥

स्पष्टं ॥ ३ ॥

पुनः प्रशंसति।

संवत्सरं वा एषान्तद्वीर्यमन्नाद्यमवृञ्जत ॥ ४ ॥

तत्तदा वाग्विवादकाले एषामसुराणामन्नाद्यं वीर्यं आग्नि ष्टवलक्षणं यद्वा वह्नपुत्रपोषणसामर्थ्यं मध्यं संवत्सरं संवत्सर-मूर्त्तिपर्य्यन्तमवृञ्जत अवर्जयन् देवाः संवत्सरस्य पञ्चात्मकत्वात् पञ्चसंख्यायां वाचो मिथुनत्वाविन्दन् यतः अतः संवत्सरं वीर्येण वृञ्जतेत्यर्थः ॥ ४

उक्तार्थञ्च प्रशंसति।

संवत्सरं वीर्यमन्नाद्यं भ्रातृव्यस्य वृङ्क्ते य एवं वेद ॥ ५ ॥

स्पष्टं ॥ ५ ॥

पुनरत्र यत् पञ्चत्वं तत् प्रशंसति।

पञ्चरात्रो वा एष पाङ्क्तः पुरुषः पाङ्क्ताः पशवस्तेन पुरुषञ्च पशूꣳश्चाप्नोति ॥ ६ ॥

एषयज्ञः पञ्चरात्रः खलु पाङ्क्तः पुरुषः द्वौ पादौ द्वौ

हस्तौ मध्यदेहयेति पुरुषः पञ्चसंख्यायोगात्पाङ्क्ताः पशवोपि पाङ्क्तास्तत्प्रयोगेन पुरुषं पुत्रभृत्यादिरूपं पशून् प्राप्नोति यजमानः ॥ ६ ॥

अथैतत्सवनत्रयस्तोमं द्वित्वसंख्याद्वारेण प्रशंसति।

अस्थूरिर्वा एष सन्ततो यज्ञो द्वौ द्वौ हि स्तोमावृहद्बृहतोयं कामं कामयते तमेतेनाभ्यश्नुते ॥ ७ ॥

एष उक्तः पञ्चरात्रः सन्ततोऽस्थूरिर्वै यदा अस्थूरिः सन् सन्ततः अविच्छेदेन प्रवृत्तः अस्थूरित्वमेव दर्शयति द्वौ द्वावेव त्रिवृदादिस्तोमौ खलु एकैकमहर्बृहतः स्तोमहयेनाहर्वहनप्रकारो द्वे त्रिवृती सवने पञ्चदशमेकमित्यादिना स्पष्टं अतोप्राप्तिसाधनविषयसंख्याया अत्राभावाद्यजमानोयं कामं कामयते तदस्थूरिणा पञ्चरात्रेणाप्नोति ॥ ७ ॥

तदेव प्रसिद्धोक्त्याह।

यत्र यत्र ह्यस्थूरिणा कामयते तत्तदभ्यश्नुते ॥ ८ ॥

यस्मिन् देशे अस्थूरिणाभ्यश्नुत इत्युक्तं भवति ॥ ८ ॥

अथ पुनः प्रशंसति।

अभ्यासंग्यः पञ्चाहो भवति सन्त्यै ॥ ९ ॥

अभ्यासञ्जनप्रयुक्तेन स्तोमेन पुनरनन्तरे यत्कुर्म इत्यर्थः तद्ताच्चाहःकर्त्तव्यः सचाङ्गः सन्त्या अविच्छेदाय भवति ॥ ९ ॥

अथोक्थानां यः प्रत्यवरोहः प्रयोगोस्ति तं प्रशंसति।

प्रत्यवरोहीण्युत्तमस्याङ्ग उक्थानि भवन्ति प्रतिष्ठित्यै ॥१०॥

स्पष्टं। अथ वैश्वामित्रोदाहरो जरावोधीयस्य लोकमोम-सामस्वाग्निरामर्कस्य मोक्षं सोरभस्योपगवं द्वादशाहिकं तृतीय-महरित्यादिकः कल्पोत्र द्रष्टव्यः ॥ १० ॥

इति षाण्ड्यमहात्राह्मणे एकविंशाध्यायस्य
त्रयोदशः खण्डः।

अथ चतुर्दशः खण्डः।

पञ्चशारदीयाख्यं पञ्चरात्रमाह।

चित्रुदग्निष्टोमः पञ्चदश उक्थः सप्तदश उक्थः पञ्च-दश उक्थः सप्तदशोतिरात्रः पञ्चशारदीयोमरुतां स्तोमः ॥ १ ॥

यः पञ्चसु शरत्खङ्गभूतैः पशुवन्धैरिष्ट्वा पश्चाद्य आरभ्यते स पञ्चशारदीयो नाम स एव मरुतां स्तोमः ॥ १ ॥

अस्याधिकारिणमाह।

यः कामयेत वङ्ग स्यामिति स एतेन यजेत ॥ २ ॥

स्पष्टं ॥ २ ॥

उक्तं फलं प्रयोगद्वारा प्रशंसति।

मरुतो वै देवानां भूयिष्ठा वङ्गरेव भवति ॥ ३ ॥

देवानां मध्य अतिगयेन बह्वः अत एतदनुष्ठातापि पुत्रादिभिर्बहुरेव भवति ॥ ३ ॥

अथ यत् स्तोमानां सप्तदशादनतिक्रमणमस्ति तत् प्रशंसति ।

सप्तदश॰ स्तोमानातियन्ति प्रजापतिर्वै सप्तदशः प्रजापतिमेवाप्नोति ॥ ४ ॥

यः स्तोमः सप्तदशं स्तोमं नातिक्रामति प्रजापतिर्वै सप्तदशः स्तोमः अतः स्तोतारः प्रजापतिमेवाप्नुवन्ति ॥ ४ ॥

अथ विधास्यमानसप्तदशोपलक्षणस्तुत्यर्थं कयाशुभीयस्य सामो विधानार्थं पुराकल्पमाह ।

अगस्त्यो वै मरुद्भ्य उक्थःप्रौक्षत्तानिन्द्रायावघ्नात्ते वज्रमादायाभ्यपतत्ता एतत्कयाशुभीयमपश्यत्तेनाशमयत् ॥ ५ ॥

पूर्वं अगस्त्योमरुद्भ्यो देवेभ्य उक्थः प्रौक्षत् मरुद्भ्यो देवेभ्यो यज्ञान् प्रोक्षानीति प्रोक्षितवान् अस्मि प्रोक्षणसमये देवताहेडः यथापस्तम्बः उपकरणेतियोगप्रोक्षणे वषा यदुपकरणे इति एवं मरुद्भ्यः प्रोक्षितानेवेन्द्रायावघ्नात् उपेत्य न्ययोजयत् नियोजनेपि देवताहेडः प्रदर्शितः ते मरुतः क्रुद्धा वज्रमुद्यम्यागस्त्यमभ्यपतत् अपोडयन् सो अगस्त्य एतत्कयाशुभीयं साम मरुतां शान्त्यर्थं अपश्यत् तेन तेषां कोपं अशमयत् तैत्तिरीयके अपि अगस्त्य इन्द्रावुभावपि मरुतां कोपमशमयतामगस्त्येनेन्द्रय कयाशुभीयेनाशमयतामिति ॥ ५ ॥

इदानीमुत्तरद्विधत्ते।

यत्र कयाग्नुभीयं शस्यते शान्त्या एव ॥ ६ ॥

स्पष्टं। ६।

अथ यत्र संवत्सरेषु ये पशुबन्धाः सन्ति तत्र प्रयोगमंत्र हः सप्तदशोक्षाणः प्राजापत्यं कृत्वा विसृजेत् तत् स्थाने त्रिवृत्स्तोमः आलभेत एवं पञ्च संवत्सरापितं परिव्यक्तानाम नूबन्ध्यान् कुर्यादिति तत्सर्वं प्रदर्शयति।

सप्तदश पृश्नीनुक्षणः पञ्चवर्षात् सप्तदश पृश्नीस्त्रिवत्सा अप्रवीतास्तान् पर्यग्निकृतान् प्रोक्षितानेतरानालभन्ते प्रेतरान् सृजन्ति ॥ ७ ॥

सप्तदशसंख्यान् पञ्चवर्षीयानुक्षलक्षणान् सवनसमर्थान् ऋषभान् सप्तदशसंख्याका स्त्रिवत्सा वपेवत्सका अप्रवीता वीर्गति प्रजनकान्त्यशनखादनेषु धातोः अत्र प्रजननार्थः अगर्भिणीरित्यर्थः ताश्चानीय सहैवापाकृत्य तानुभयानपि प्रोक्षितान् पर्य्यग्निकृतान् कृत्वा इतरा दक्षतरोत्तरेरन् इतरानुक्षणा विसृजेयुः प्रोक्षिता निति स्वापंवर्जेति पंवङ्गावः पंक्तिकृता आधारार्थं पदविभागः आलभन्ते प्रेतरान् सृजन्तीति समन्वयः ॥ ७ ॥

अथ द्वितीयादिसंवत्सरचतुष्टयेष्वेवमेकत्वमित्याह।

ततः संवत्सरे नवनीतपृश्नीरुक्षणा आनयन्ति ता श्चैवोक्षणस्तान् पर्यग्निकृतान् प्रोक्षितानेतरानालभन्ते प्रेतरान्

सृजन्ति ततः संवत्सरे राजीवा आनयन्ति ताꣳ श्वैवोद्गण-
स्तान् पर्यग्निकृतान् प्रोक्षितानेतरालभन्ते प्रेतरान् सृजन्ति
ततः संवत्सरे पिशङ्गीरानयन्ति ताꣳ श्वैवोद्गणस्तान् पर्यग्नि-
कृतान् प्रोक्षितानेतरालभन्ते प्रेतरान् सृजन्ति ततः संव-
त्सरे मारङ्गीरानयन्ति ताꣳ श्वैवोद्गणस्तान् पर्यग्निकृतान्
प्रोक्षितानेतरालभन्ते प्रेतरान् सृजन्ति ॥ ८ ॥

आलभ्यानां स्वोपशूनां वर्णं प्रतिसंवत्सरं विशेषः तद्वर्ण विशेषाः स्पष्टाः उक्तानेव वर्णविशेषानापस्तम्बानुचक्राम वर्णान्न क्रमिष्यामो राजीवानवनीतपृश्निरुरुणपिशङ्गो मारङ्ग उक्त मोरालभ्य दीक्षन्त इति अत्र ब्राह्मणः पञ्चशारदीये पशुबन्धे यजेत त उक्ता ब्राह्मणेन सप्तस्यामष्टम्यां वाश्वयुजोपक्षित् वत्सतरी-रेवालभेरन्नृक्षो विसृजेयुस्तेषां यावन्तोभ्रेषमापदोरंस्तावतोन्यान यजुष्ट तानपि सृजेयुस्तथारूपां स्तावद्दर्शान् पक्षां शरदि कार्त्तिके मासि यजेत तस्य द्वादशोपसदः ॥ ८ ॥

अस्य विहितपञ्चरात्रस्य यः कालस्तन्दर्शयति ।

ततः संवत्सरे सोमाभवन्ति ॥ ९ ॥

पञ्चसु शरत्सु पशुबन्धेरिष्ट्वा ततोनन्तरं समानान्तरं स एव सोमा भवन्ति पञ्चसोमान् यागान् कुर्य्युः तत्रापि कालविशेषः षष्ठ्यां शरदि कार्त्तिकइति ॥ ९ ॥

तत्प्रदर्शितपञ्चवर्षसंपूर्त्तिपर्य्यन्ताः ये सप्तदशोक्तमः पर्य्यग्नि-

कृत्य युक्ताः तेषां मध्ये प्रत्यहं कियन्त आलभ्याइति विवेके प्राप्तमाह ॥

त्रीँस्त्रीनन्वहमालभन्ते पञ्चोत्तमेऽहनि ॥ १० ॥

स्पष्टं ॥ १० ॥

सवनीयपशुवदग्नीषोमीयस्येत्यकृष्टतिरिति क्षयरोगाभिमानिनो पापदेवता प्रसक्तौ अजः कर्त्तव्य इत्याह ॥

अजोऽग्नीषोमीयः ॥ ११ ॥

स्पष्टं ॥ ११ ॥

अथ उक्थपशूनां उक्तान्तपशुवन्ययोगाद्वत्सतरीणाञ्च देवतामाह ॥

ऐन्द्रामारुता उक्षाणो मारुत्यो वत्सतर्य्यः ॥ १२ ॥

इन्द्रस्य मरुताञ्च पशुसम्बन्ध अगस्त्योवै मरुद्भ्य उक्षण: प्रौक्षदित्यादिकः ॥ १२ ॥

अथालम्भात् पुरा कस्यचिदुक्षो रुद्रेणातियातः तस्योपायमाह ॥

यदि रुद्रोऽभिमन्येताग्नये रुद्रवते पुरोडाशमष्टाकपालन्निरुप्याथान्यमालभेत ॥ १३ ॥

यद्यदि किञ्चिदुक्षणं रुद्रेण रुद्रः पशुस्वामी अभिमन्येत रोगोत्पादनेन प्राणाशयेत् सज्ञानमन्यत् ॥ १३ ॥

अथ प्रमादादरपतनादिना अभूमावेव कश्चित् संशीर्य्येत तदा कथमिति तत्राह ।

यदि सꣳशीर्य्येत भौममेककपालं निरूप्याथान्यमालभेत ॥ १४ ॥

भौमो भूमिदेवताकः तस्य एकत्वादेककपालोयुक्तः ॥ १४ ॥

पोषार्थं मुक्तानां मध्ये यदि कश्चिदत्यन्तक्रुग्णःस्यात्तत्राह ।

यद्यवसीदेन्नैर्ऋतञ्चरुन्निरूप्याथान्यमालभेत यद्यप्सु म्रियेतापोनप्त्रीयञ्चरुन्निरूप्याथान्यमालभेत यद्यन्धः स्यात् सौर्यं चरुन्निरूप्याथान्यमालभेत ॥ १५ ॥

सूर्य्यश्चक्षुरभिमानिदेवत्वात्तदीयोयुक्तः ॥ १५ ॥

त्वग्दोषशृङ्गाद्यङ्गयोरित्याह ।

यदि श्लवणो वा कूटोवा स्यादार्क्षस्यन्यञ्चरुन्निरूप्याथान्यमालभेत ॥ १६ ॥

श्लवणोरक्तवर्णो विडहारः त्वग्दोषः कूटः शृङ्गहीनः ॥ १६ ॥

अथ कस्यचित्पलायमानमाह ।

यदि पलायेत वायव्यं चरुन्निरूप्याथान्यमालभेत ॥१७॥

पलायनस्य वायुनयनाधीनत्वादायव्यश्चरुर्युक्तः ॥ १७ ॥

अथ वीर्य्यादिभिः कस्यचिद्बलादपहारे आह ।

यदि प्रासह्नाजयेयुरिन्द्राय प्रसङ्कन एकादशकपालन्निरुप्याथान्यमालभेत ॥ १८ ॥

बलात्कारस्येन्द्राधीनत्वादैन्द्र एकादशकपालोयुक्तः ॥ १८ ॥

अथ रुद्रस्य व्यतिरेकेण मृत्युनैव यदि कश्चित् मृतः स्यात्त त्राह।

यद्यन्येन मृत्युना म्रियेत प्राजापत्यं द्वादशकपालन्निरुप्याथान्यमालभेत ॥ १९ ॥

मृत्योरिति प्रजापत्यधीनत्वात् प्रजापतेः संवत्सरात्मकत्वात् द्वादशमाससङ्गावात् प्रजापतेस्तत्संख्याकपालः पुरोडाशो युक्तः ॥ १९ ॥

अथास्य सर्वसिद्धिसाधनत्वं प्रयोगद्वारेणोपपादयति।

एतेन वा एकया वा गान्दमो वेतस्वतीष्ट्वा सर्वामृद्धिमार्ध्नात् ॥ २० ॥

एतेन खलु पञ्चरात्रेण एकया वा एक एव सहायः सन् मित्रयत्यमित्रानित्येकया वा गान्दरेषां वाचं भूमिवादमयतीति गान्दमः वेतस्वति सहुवेतासुतीर्थविशेष इष्ट्वा सर्वामृद्धिं कृत्स्नां भूमिं स्वामित्वलक्षणामार्ध्नात् प्राप्तवान् ॥ २० ॥

सर्वामृद्धिमृद्धोति य एवं वेद ॥ २१ ॥

स्पष्टं ॥ २१ ॥

इति ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य
चतुर्दशः खण्डः ॥

———

अथ पञ्चदशः खण्डः।

अथान्तर्महाव्रतस्य पञ्चरात्रमाह।

ज्योतिष्टोमोग्निष्टोमो गौरुक्थो महाव्रतं गौरुक्थ आयुरतिरात्रः॥ १॥

सुगमं॥ १॥

यन्महाव्रतं मध्यमहस्तत् प्रशंसितुमाह।

संवत्सरो वै व्रतं तस्य वसन्त ऋतुर्मुखं ग्रीष्मश्च वर्षाश्च पक्षौ शरन्मध्यं हेमन्तः पुच्छं २॥

यन्महाव्रतमस्ति तत् संवत्सरो वै संवत्सरमस्य गवामयन स्योत्पत्तिमाह तस्य महाव्रतस्य संवत्सररूपत्वमुक्तं अतः संवत्स रावयवेन महाव्रतावयवे योजयति ऋतुषु वसन्तस्य प्राधान्यात् अङ्गेषु मुखस्य प्राधान्यात् वसन्तस्य मुखकल्पनं ग्रीष्मवर्षयोः पर स्परप्रतियोगित्वेन पक्षद्वयकल्पना शरदः ऋतुषु मध्यमत्वात् मध्य त्वकल्पनं हेमन्तस्यान्तिमत्वात् पुच्छकल्पनं॥ २॥

शरदो मध्यत्वे उपपत्तिं दर्शयति।

तस्माच्छरदमोषधयोभिसंपच्यन्ते शरद्विमध्यं संव त्सरस्य॥ ३॥

यस्माच्छरत् महाव्रतस्य मध्यदेशः तस्माच्छरदमभिलक्ष्य ओषधयो व्रीहियवाद्यः पच्यन्ते यथापलिता भवन्त्यस्तथा क्रियन्ते

ऋषीवलैः मध्यतोस्यत्वं धीयते अतः शरदि अत्रसिद्धिस्तस्य मध्यदेहकल्पनमिति प्रसिद्धिदर्शनार्थं एतत् प्रासङ्गिकं ॥ ३ ॥

अथास्मिन् पञ्चरात्रे महाव्रतमनुक्रममित्याक्षिपति ।

अकृतं वा एते कुर्वन्ति ये पुरा संवत्सरात् व्रतमुपयन्ति ॥ ४ ॥

महाव्रतस्य संवत्सरमत्र एवाभिप्रायेण सम्भवात् संवत्सरात्पुरा पञ्चरात्रे व्रतं महाव्रतं यदुपयन्ति अकृतकार्य्यमेव कुर्वन्ति अतो न युक्तमत्र महाव्रतमित्यर्थः । ४ ।

अथास्य परिहारमाह ।

एतद्वै व्रतमाप्तं यत्पञ्चरात्रे पञ्चह्युतवः ॥ ५ ॥

अस्मिन् पञ्चरात्रे यद्व्रतमस्ति एतत् खलु आप्तं आप्तव्ययुक्तं व्रतं अतोऽकृतकरणत्व भवति अत्र ज्यातिष्टोमोग्निष्टोमो गौरुक्थ्यो महाव्रतं गौरुक्थ्य आयुरतिरात्र एकाह क्लप्ता इति कल्पो द्रष्टव्यः कथमस्याप्तत्वमिति तदर्शयति पञ्चह्युतव इति संवत्सरे हेमन्तशिशिरव्यतिरेकेण पञ्चऋतवः खलु अयमपि पञ्चरात्र अतः पञ्चत्वसंख्यासाम्यात् पञ्चरात्रस्य संवत्सरसत्रसदृशत्वात् आप्तमेव व्रतमित्यर्थः ॥ ५ ॥

उक्तार्थवेदनं प्रशंसति ।

आप्तेन व्रतेन स्तुते सर्वमायुरेति य एवं वेद ॥ ६ ॥

व्रतमिति प्राधान्यं न महाव्रताहर्गतानां राजनादिपञ्च

मान्नान्तत्सम्बन्धीनां तदाश्रयस्याङ्गोपि नामधेयं अतो यो व्रतस्याप्तत्वयुक्तरूपेण जानाति स आप्नेनैतद्व्रतेनैव च स्तुते सर्वं सम्पूर्णं व्रतं संवत्सरलक्षणमायुरेति प्राप्नोति।

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ६॥

इति श्रीमहाराजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्क-भूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे

ताण्ड्यमहाब्राह्मणे एकविंशाध्यायस्य
पञ्चदशः खण्डः।

एकविंशोध्यायः समाप्तिमगमत्।

अथ द्वाविंशोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निःश्वसितं वेदायोवेदेभ्योखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं ।
एकविंशे गर्गशेषस्तथा पञ्चत्रिरात्रकाः ।
चतूरात्राश्च चत्वारः पञ्चरात्रास्त्रयः क्रमात् ।
प्रोक्ता द्वाविंशकेऽध्याये षड्रात्राह्यथ वर्ण्यते ।
त्रयः षड्रात्राः तत्र प्रथमं प्रतिष्ठासाधनं ऋतूनां षड्रात्रमाह

पृष्ठ्यः षडहः ॥ १ ॥

ते च षडहाः कल्पकारः पृष्ठ्यः षडहः समूढो वा व्यूढोवेत्यु क्तवान् उभयोरन्यतरप्रकृतिकत्वं ॥ १ ॥

अथास्य ऋतुसम्बन्धं ब्रूवन् अधिकारिणमाह ।

ऋतवो न प्रत्यतिष्ठन्नस्त एतेन प्रत्यतिष्ठन् प्रतिष्ठाकामो यजेत प्रत्येव तिष्ठति ॥ २ ॥

स्पष्टोर्थः ॥ २ ॥

पुनः प्रकारान्तरेण प्रशंसति ।

षड्वा ऋतव ऋतुष्वेवैतेन प्रतितिष्ठति पृष्ठः षडहो भवति प्रत्यक्षमृध्यै ॥ ३ ॥

यस्मिन् षडहे रथन्तरादि रैवतान्तं पृष्ठानि क्रमेण होतुः पृष्ठानि स्युः स पृष्ठ्यः षडहः स चेतरक्रतुवदतिशयफलत्वाभावात् प्रत्यक्षमृध्या एव भवति ॥ ३ ॥

अस्य कथं प्रत्यक्षर्द्धिहेतुत्वमिति तत्राह।

प्रत्यक्षं ह्येतेनर्त्तव आर्ध्नुवन्नृध्या एव ॥ ४ ॥

एतेन पृष्ठषडहेन ऋतवः खलु प्रत्यक्षमिदानीं दृश्यमानप्रकारेण शाखोचितपुष्पफलादिलक्षणेनार्ध्नुवन् अतोयमृध्या एव भवति कल्पः पृष्ठ्यः षडहः समूढो वा गव्यूढो वा समूढस्त्वेव तस्योपाग्ने गायतानर उपोषु जातमप्तुरः पवमानस्यते कव इति प्रथमस्याङ्गोवहिष्यवमानमौदलमासितं त्वाष्ट्रोसामेत्यादिकः कल्पो द्रष्टव्यः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
प्रथमः खण्डः।

अथ द्वितीयः खण्डः।

अथोपरिष्टात् त्रिकद्रकाख्यं द्वितीयं षड्वात्रमाह।

त्रिवृदग्निष्टोमः पञ्चदशउक्थः सप्तदशउक्थो ज्योतिर्गोरायुरतिरात्रः ॥ १ ॥

ज्योतिरादय ऐकाहिका द्रष्टव्याः ॥ १ ॥

अथास्मिन्नधिकारिणमाह।

यः कामयेत सर्वमायुरियामिति स एतेन यजेत ॥ २ ॥

स्पष्टं ॥ २ ॥

पूर्वन्त्राहः प्रशंसति।

यत्त्रयहः पुरस्ताद्भवति त्रयः प्राणापानव्यानास्त एव तत्सन्धीयन्ते ॥ ३ ॥

यद्यदि त्रिवृत्पञ्चदशसप्तदशस्तोमात्मकस्त्राहः षडहस्य पुरस्ताद्भवति प्राणापानव्यानात्मकाः प्राणा अपि तेन त्राहेन त एव प्राणादयः सन्धीयन्ते संयोजिता भवन्ति ॥ ३ ॥

उत्तरं त्राहं प्रशंसति।

अथ यत् ज्योतिर्गौरायुरतिरात्रो भवति प्रतिष्ठित्यै ॥ ४ ॥

स्पष्टः तत्रैष एव त्राहो यद्वतूनां यथाव्यूह इत्यादिकः कल्पो द्रष्टव्यः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
द्वितीयः खण्डः।

अथ तृतीयः खण्डः।

अथाभ्यासंग्याख्यं तृतीयं षड्रात्रमाह।

अभ्यासंग्यः पञ्चाहोविश्वजिदतिरात्रः ॥ १ ॥

आदौ पञ्चाहो द्वे त्रिवृती सवने पञ्चदशमेकं द्वे पञ्चदशे

सवने सप्तदशमेकं हे सप्तदशे सवने एकविंशमेकमित्याद्यभ्यासंख्यः क्रमेणानुष्ठेयः षष्ठमहर्बिश्वजिदतिरात्रः कर्त्तव्यः ॥ १॥

अथ तं षड्रात्रक्रतुं सत्रात्मना स्तौतुं सत्रपत्त्योः फलवैलक्षण्यं दर्शयति।

अन्यस्मै वै कामाय सत्रमन्यस्मै यज्ञो न तत्सत्रेणाप्नोति यस्मैकं यज्ञोन तद्यज्ञेनाप्नोति यस्मैकꣳ सत्रं ॥ २ ॥

अन्यस्मै कामाय खलु सत्रमनुष्ठीयते तथा यज्ञोपि तदेव सृष्टयति यस्मैकं यस्मै फलाय स्वर्गादिलक्षणाय वै यज्ञो ज्योतिष्टोमादिरनुष्ठीयते तदेव फलं सत्रेणाप्नोति फलस्य प्रतिनियतत्वात् सत्रेण यत्तत् फलं यज्ञेनाप्नोति उभयत्र कमित्यनर्थको यस्मैकं युनेन च्छाकार्यमित्यादिवत् ॥२॥

अस्त्वेवमुभयोः फलवैलक्षण्यं प्रकृते किमायातमित्याह ॥

सत्रमिव वा एतद्यदनुलोमं पृष्ठानि यदेकधा पृष्ठानि भवन्त्येकधैवास्मिꣳस्तदोजोवीर्य्यन्दधाति ॥ ३ ॥

अनुलोमं षड्हःसु क्रमेण रथन्तरं बृहदित्येवं पृष्ठानि यद्यदि स्युः एतत्सत्रमिववै सत्रवत्या खलु गव्यादिसत्रे क्रमेण दृष्टानां सम्भवात् एवं सति यद्यदि एकधैव पृष्ठानि षडपि भवन्ति अस्मिन् यजमानोप्येकधैव तेजोदधाति प्रयोक्ता ॥ ३ ॥

अन्नं पष्ठान्यन्नाद्यमेवास्मिन्दधाति ॥ ४ ॥

पृष्ठानां षट्संख्याकत्वात् अन्नस्यापि षट् सामात्मकत्वात्

षट्राचप्रभवत्वाच्च पृष्ठान्यन्नमित्युपचर्यते अतः पृष्ठप्रयोगात् तानि यजमाने अदनीयं व्रीह्याद्यन्नमेव स्थापयति ॥ ४ ॥

अथ तानि पशुसाधनत्वेन प्रशंसति।

पशवः पृष्ठानि पशूष्वेव प्रतितिष्ठति ॥ ५ ॥

स्पष्टं। स्पृशतेरिति निरुक्तात् पृष्ठानि यथा ऋतुषु प्रकाशितानि एवं पशूनामपि सर्वैः स्पर्शनीयत्वात् पृष्ठानि पशव इति व्यपदेशः ॥ ५ ॥

अथादितः पञ्चाहस्य यदभ्यासङ्गित्वं तत् प्रशंसति ॥

अभ्यासंग्यः पञ्चाहो भवति सन्तत्यै ॥ ६ ॥

पूर्वमहर्येन स्तोमेन समापितं तेनैव स्तोमेनाहरन्तरस्याप्युपक्रमादङ्गां सान्तत्यं ॥ ६ ॥

अथान्त्यस्याङ्गो विश्वजिदतिरात्रत्वं प्रशंसति ॥

विश्वजिदतिरात्रो भवति विश्वस्याभिजित्यै ॥ ७ ॥

स्पष्टं। एष एव पञ्चाहो यः ऋतूनां समूढोभ्यासङ्गः इत्यादिकः कल्पो द्रष्टव्यः ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य तृतीयः खण्डः ॥

अथ चतुर्थः खण्डः।

अथ सप्त सप्तरात्राः तत्र प्रथमं सप्तर्षीणां सप्तरात्रं सप्तर्षिफलसाधनं वा यज्ञमाह ॥

पृष्ठः षडहोमहाव्रतमतिरात्रः ॥ १ ॥

स्पष्टं। महाव्रतस्यैकाहिकः ॥ १ ॥

अथास्य सप्तर्षिसम्बन्धं समृद्धिफलसाधनं यज्ञं चाह ॥

सप्तऋषय एतेनार्ध्नुवꣳ स्तेनर्द्धिस्तस्मादेतेन यजन्त-ऋद्धया एव ॥ २ ॥

एतेन सप्तरात्रेणार्ध्नुवन् पुत्रपश्वादिभिरत्यन्तसमृद्धा अभवन् तस्मादेतेन ऋद्धा एव यजन्ते एकः द्वौ बहव इति बहुनामप्यधिकारे सम्भवाद्यजन्त इति बहुवचनं यजेरन्नित्यर्थः ॥ २ ॥

अथैतमहर्गतसप्तसंख्याद्वारेण प्रशंसति।

सप्त शिरसि प्राणाः प्राणाइन्द्रियाणीन्द्रियाण्येवैतेनाप्नोति ॥ ३ ॥

शिरसि चक्षुरादि सप्तच्छिद्रगतानि सप्त इन्द्रियानि प्राणसंवादे प्राणस्येव इह धारकत्वात् प्रशस्तत्वेनेन्द्रियाण्यपदेशं प्राणव्यपदेशं लभन्ते इतीन्द्रियाणि प्राणाइत्युच्यन्ते तदेवाह प्राणा इन्द्रियाणीति प्राणाः प्राणव्यपदेशात्पूर्वं स्वरूपेणेन्द्रियाणीत्यर्थः अत एतेन सप्तरात्रेण इन्द्रियाण्याप्नोति चक्षुरादिपाटवत्रयतीति ॥ ३ ॥

पुनः सप्तसंख्याद्वारेण प्रशंसति।

सप्त ग्राम्याः पशवस्तानेतेनाप्नोति ॥ ४ ॥

ग्राम्याः पशवो गवाश्वादयः ॥ ४ ॥

सप्तमस्याङ्गोयन्महाव्रतपृष्ठत्वं तत् प्रशंसति ।

व्रतꣳ सप्तमस्याङ्गः पृष्ठं भवति तद्व्रतमन्नाप्तमन्नं वै व्रत-मन्नाद्यमेवैतेनाप्नोति ॥ ५ ॥

व्रतं महाव्रतं सप्तमस्याङ्गः पृष्ठं भवति तद्धि अन्नाप्तं सत्रेष्वेव प्राचुर्येण सम्भवात् किं च महाव्रतमन्नं वै अन्नमेव तत्साधनत्वात् अतएव तत् पृष्ठकरणेनादनीयमन्नमाप्नोति ॥ ५ ॥

अथ महाव्रतातिरात्रमतिरिक्तमहःषट्कं प्रशंसति ।

पृष्ठः षडहो भवति प्रत्यक्षमृध्यै ॥ ६ ॥

यत्र प्रयोगलक्षणं समृध्युपभंगेन जायते केवलमृद्धिकामो यजेतेत्येवं स्तूयते स परोक्षसमृद्धिः ॥ ६ ॥

ऋद्धेः प्रत्यक्षत्वमेव दर्शयति ।

प्रत्यक्षꣳह्येतेन सप्त ऋषय आर्ध्नुवन्नृद्ध्यैव ॥ ७ ॥

अत्र एष एव षडहोयः ऋतूनां समूढो वा व्यूढो वा समूढस्वै-वैकाहिकं महाव्रतं तस्य ज्योतिष्टोमोतिरात्रः षोडशिमानिति कल्पो द्रष्टव्यः ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यास्य
चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

अथ प्रजापतेः सप्तरात्राख्यं प्रजादिफलसाधनकं द्वितीयं सप्तरात्रमाह ।

पृष्ठः षडहः सप्तदश महाव्रतमतिरात्रः ॥ १ ॥

षडहः स्पष्टः । सप्तदशस्तोमकमतिरात्रसंस्थमहाव्रतं प्रथमं भवति ॥ १ ॥

अथान्तिमस्याङ्गः शिर आद्यङ्गस्य स्तोमव्यवस्थामाह ।

तस्य त्रिवृच्छिरः पञ्चदशौ पक्षौ सप्तदश आत्मैकविंशं पुच्छं ॥ २ ॥

महाव्रतस्तोत्रस्य शिरसः अवयवास्त्रिवृदादिस्तोमकाः कर्त्तव्याः ॥ २ ॥

अथैतस्य प्रजापतेः सृष्टिसाधनत्वेन प्रजासृष्टिसाधनत्वमिष्टमाह ।

एतेन वै प्रजापतिः प्रजा असृजत ॥ ३ ॥

सुगमं ॥ ३ ॥

उक्तार्थञ्च प्रशंसति ।

प्र प्रजया प्र पशुभिर्जायते य एवं वेद ॥ ४ ॥

स्पष्टोऽर्थः ॥ ४ ॥

अथास्याङ्गः आत्मभागस्य यत् सप्तदशस्तोमत्वं तदनूद्य प्रशंसति ।

सप्तदशो वै प्रजापतिर्यत् सप्तदशं व्रतं भवति प्रजापतिमेवाप्नोति ॥ ५ ॥

प्रजापतेः सप्तदशं असक्तदुक्तं ॥ ५ ॥

अथ शिरोभागस्य त्रिवृत्त्वं प्रशंसति।

यत् त्रिवृच्छिरो भवति नव प्राणाः प्राणेष्वेव प्रतितिष्ठति ॥ ६ ॥

त्रिवृत्स्तोमस्तोत्रीया नवकात्मकाः प्राणा अपि शीर्षण्या सप्त द्वावधोवाञ्चाविति नव अतस्त्रिवृत्करणेन प्राणेष्वेव प्रतितिष्ठति ॥ ६ ॥

अथ पक्षयोः पञ्चदशत्वं प्रशंसति।

यत्पञ्चदशौ पक्षौ सवीवधत्वाय ॥ ७ ॥

वीवधवृत्युभयतो भारयुक्तः स्कन्धेनोह्यः काष्ठविशेषः स यथा समभारो भवति तद्वदुभयपक्षयोः पञ्चदशत्वे वैषम्याभावात् सवो वधता भवति ॥ ७ ॥

अथात्मभागस्य सप्तदशत्वं प्रशंसति।

सप्तदश आत्मा भवति प्रजापतिर्वै सप्तदशः प्रजापतिमेवाप्नोति ॥ ८ ॥

स्पष्टोऽर्थः ॥ ८ ॥

अथ यः पुच्छभागस्यैकविंशत्वं तत् प्रशंसति॥

एकविंशं पुच्छं भवति प्रतिष्ठित्यै ॥ ९ ॥

प्रजापतेः पादत उत्पन्नत्वात् सप्त प्रकृतिभूतोग्निष्टोमः समा

प्रतिष्ठित्यै पक्षिणां पुच्छयोः प्रतिष्ठात्वं प्रसिद्धं अत एष एव षडहोयः ऋतूनां समूढो वा व्यूढोवा समूढस्त्वेव सप्तदशं व्रतं तस्योपास्यै गायतानरः पवस्व वाचो अग्रियोद्विद्युतत्यारुचेत्यादिकः कल्पो द्रष्टव्यः ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
पञ्चमः खण्डः।

अथ षष्ठः खण्डः।

अथ क्रन्दोमपवमानाख्यं पशुफलं तृतीयं सप्तरात्रमाह।

पृष्ठः षडहश्छन्दोमपवमानं महाव्रतमतिरात्रः ॥ १ ॥

षडहः स्पष्टः। छन्दोमपवमानमिति अस्य चतुर्विंशं बहिष्पवमानं चतुश्चत्वारिंशो माध्यन्दिनः पवमानोऽष्टाचत्वारिंश आर्भवः कर्त्तव्यः तदेव महाव्रतमिति प्रथमसप्तरात्रमहाव्रतं तदेवं तदेवातिरात्रमहः अग्निष्टोमपर्यन्तान्याहुत्तिस्तोत्राणि उक्थानि पञ्चविंशस्तोत्राणि पञ्चदशोरात्रिस्त्रिवृत्सन्धिः ॥ १ ॥

अस्याधिकारिणमाह।

पशुकामोयजेत ॥ २ ॥

स्पष्टं ॥ २ ॥

कथमस्य पशुसाधनत्वं तदाह।

पशवो वै छन्दोमाः ॥ ३ ॥

छन्दोमानां चतुर्विंशादीनां गायत्र्याक्षरसंख्यासाम्यात्तेषां च छन्दांसि पशुत्वाजिमयुरिति श्रुतेः छन्दोमाः पशवः ॥ ३ ॥

अस्त्वेवं किमत इति अत आह।

यच्छन्दोमाः पवमाना महाव्रतस्य भवन्ति पशूनेवावरुन्धे ॥ ४ ॥

स्पष्टं ॥ ४ ॥

अथान्यपवमानानामन्येषां स्तोत्राणां च यत् स्तोमद्वैविध्यमस्ति तत् प्रपंचयति।

उभये स्तोमा युग्मन्तश्चायुजश्च तन्मिथुनन्तस्मान्मिथुनात् प्रजायते ॥ ५ ॥

गतं। अत्र एष एव षड्होयः ऋतूनां समूढो वा व्यूढोवा समूढस्त्वेव छन्दोमपवमानं व्रतं तस्य पवमानस्य ते वयमिति चतुर्ऋचस्य लोके तृचंव्यपरिवहति सत्रासाहीयजरावोधीय वृत्रादिकः कल्पोद्रष्टव्यः ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य षष्ठः खण्डः ॥

अथ सप्तमः खण्डः।

अथ पुष्टिसाधनं जामदग्न्यं चतुर्थसप्तरात्रमाह।

अभ्यासंग्यः पञ्चाहोथ त्रयस्त्रिꣳशमहस्तस्य चतुस्त्रिꣳशोग्निष्टोमः सप्तदशं महाव्रतमतिरात्रस्तस्य चतुर्विꣳशं वहिष्यवमानं त्रिवृच्छिरः पञ्चदशौ पक्षौ सप्तदशश्चात्मैकविꣳशं पुच्छं ॥ १ ॥

द्वे त्रिवृती सवने पञ्चदशं तृतीयसवनमित्यादाक्तक्षण आदावभ्यासंग्यः पञ्चाहः पूर्ववत् अथ षष्ठमहः क्रतुस्त्रमपि त्रयस्त्रिꣳशस्तोमकं तस्याग्निष्टोमश्चतुस्त्रिꣳशः अथ सप्तममहः सप्तदशस्तोमकं महाव्रतमतिरात्रसंस्थं चतुर्विꣳशं वहिष्यवमानं भवति महाव्रतस्य तस्य पृष्ठविभागः प्रजापतेः सप्तरात्रवदवगन्तव्यः ॥ १ ॥

अथास्य जमदग्निसम्बन्धहारेण पुष्टिसाधनमाह ।

एतेन वै जमदग्निः सर्वान् पोषानपुष्यत्सर्वानेवैतेन पोषान्पुष्यति ॥ २ ॥

अनेन सर्वविषयकामोधिकारीत्युक्तं भवति ॥ २ ॥

आदितः पञ्चाहं प्रशंसति ।

यदभ्यासंग्यः पञ्चाहः पुरस्ताद्भवति सन्तत्यैव ॥ ३॥

अभ्यासङ्ग्यस्याङ्गः सन्ततिप्रकारः पूर्वमेव प्रदर्शितः ॥ ३ ॥

अथ षष्ठस्याङ्गो यत् त्रयस्त्रिंशस्तोमकल्पदनूद्य प्रशंसति ।

अथैतत्त्रयस्त्रिꣳशमहस्त्रयस्त्रिꣳशद्देवता देवता एवाप्नोति ॥ ४ ॥

अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्चेति त्रयस्त्रिंशद्देवताः ॥ ४ ॥

अथ तस्यैवाङ्गोक्तिष्टोमसाम्नो यच्चतुस्त्रिंशत्त्वं तत् प्रशंसति।

तस्य चतुस्त्रिंशोग्निष्टोमः प्रजापतिश्चतुस्त्रिंशो देवतानां प्रजापतिमेवाप्नोति ॥ ५ ॥

यद्यपि त्रयस्त्रिंशमध्ये एकः प्रजापतिरपि गतः तथापि व्यष्टिसमष्टिभेदेन प्रजापतेस्त्रयस्त्रिंशद्देवताः समात्मकत्वाच्चतुस्त्रिंशत्त्वं अथ वा ये देवाः तदित्येकादशस्य पृथिव्यामधीत्यादिमन्त्रवर्णात् पृथिव्यादिस्थानत्रयवासिनस्तत्त्रिंशद्देवाः तदपेक्षया प्रजापतिश्चतुस्त्रिंश इत्यवगन्तव्यं ॥ ५ ॥

अथान्तिमस्याङ्गो वहिष्पवमानगतां स्तोमसंख्यां प्रशंसति।

चतुर्विंशं वहिष्पवमानं भवति महाव्रतस्य चतुर्विंशत्यक्षरा गायत्री प्रजननं गायत्री प्रजात्यै ॥ ६ ॥

स्पष्टं। एते अस्यामिति गायत्र्याः सकाशात् देवादिकृत्स्नजगदुत्पत्तेः गायत्र्याः प्रजननसाधनत्वं यद्वा सर्व्वच्छन्दसामादिभूतत्वेनास्या एव चतुश्चतुरक्षराधिकेन पृथक्पृथगुत्तरोत्तरच्छन्दसामुत्पत्तेर्गायत्र्याः प्रजननत्वं ॥ ६ ॥

उभये स्तोमा युग्मंतश्चायुजश्च तन्मिथुनं तस्मान् मिथुनात् प्रजायते ॥ ७ ॥

स्पष्टं ॥ ७ ॥

अथान्यस्याङ्गः पवमानानामितरस्तोत्राणां च यत् युग्मा-युग्मस्तोमकत्वं तत् प्रशंसति ।

यत्त्रिवृच्छिरो भवति नव प्राणाः प्राणेष्वेव प्रतितिष्ठति यत् पञ्चदशौ पक्षौ सवोवधत्वाय सप्तदश आत्मा भवति प्रजापतिर्वै सप्तदशः प्रजापतिमेवाप्नोत्येकविंश पुच्छं भवति प्रतिष्ठित्यै ॥ ८ ॥

सप्टोऽर्थः । अत्र एष एव षडहो यः ऋतूनां समूढो वा व्यूढो वा समूढत्वेव तस्यैवाभ्यासङ्गः पञ्चाहो यथा पृष्ठ्यावलंबत्वतृर्थ-स्याङ्ग एवैकविंशः षोड़शी पञ्चमस्याङ्गः पार्थुरस्य लोकस्य आकू-पारमित्यादिकः कल्पोद्रष्टव्यः ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
सप्तमः खण्डः ॥

अथ अष्टमः खण्डः ।

अथ प्रजापतेरवधानमेन्द्रं पञ्चमं समराज्यमाह ।

ज्योतिष्टोमोग्निष्टोमो गौरुक्थ आयुरुक्थोभिजिदग्नि ष्टोमोविश्वजिदग्निष्टोमः सर्वजिदग्निष्टोमः सर्वस्तोमोति-रात्रः ॥ १ ॥

त्रिकद्रुकाः अभिजिद्विश्वजितौ पञ्चमाहः स्पृष्टः महाव्रत-मेकाहः सर्व्वजित् षष्ठमहः सर्व्वस्तोमातिरात्रः सप्तममहः ॥१॥

अथास्य फलं सार्थवादमाह।

एतेन वा इन्द्रोत्यन्या देवता अभवदत्यन्या प्रजा भवति य एव वेद ॥ २ ॥

स्पष्टं ॥ २ ॥

आद्यमहः प्रशंसति ॥

यत् ज्योतिर्गौरायुरित्यहः पुरस्ताद्भवति प्रज्ञातान् स्तोमानुपैतीमानेव लोकानेष्वेव लोकेषु प्रतितिष्ठति ॥ ३ ॥

प्रज्ञातान् स्तोमान् त्रिवृदादिकानित्यर्थः किं तदिमानेव लोकानुपैति अयं वै लोकोज्योतिरन्तरिक्षं गौरसौ लोक आयुरिति ज्योतिरादीनां भूरादिलोकात्मकत्वात् ज्योतिराद्यनुष्ठाता एषु त्रिषु लोकेष्वपि क्रमेण प्रतिष्ठितो भवति ॥ ३ ॥

अथाभिजिद्विश्वजित्सर्वजिताख्यानि त्रीण्यहानि प्रशंसति।

अथाभिजिदभिजिता वै देवा इमान् लोकानभ्यजयन्विश्वजिता विश्वमजयन् सर्वजिता सर्वमजयन् ॥ ४ ॥

अत इदानीन्तनानामप्येतान्यहानि तज्जयाय भवन्तीत्यर्थः ॥ ४ ॥

अन्त्यमहः प्रशंसति।

सर्वस्तोमोतिरात्रो भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाप्नोति सर्वञ्जयति ॥ ५ ॥

स्पष्टोऽर्थः, अत्र कल्पः, ज्योतिष्टोमोग्निष्टोमः प्रथममितरौ द्वावुक्थ्यौ विश्वजिन्महाव्रतं विश्वजिदग्निष्टोमः सर्वस्तोमोतिरात्र एकाहक्रतुमुखा इति ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
अष्टमः खण्डः ।

अथ नवमः खण्डः ।

अथान्नाद्यकामं जनकसप्तरात्रं षष्ठं यज्ञमाह ।

चत्वारि त्रिवृन्त्यह्नान्यग्निष्टोममुखानि विश्वजिन्महाव्रतं ज्योतिष्टोमोतिरात्रः ॥ १ ॥

तच्चत्वार्यह्नानि त्रिवृन्त्यग्निष्टोममुखानि अग्निष्टोमः प्रथममितरे चयउक्थ्यौविश्वजिन्महाव्रतं चाग्निष्टोमोतिरात्रस्तूत्तममहः ॥ १ ॥

अथास्य फलं सप्रयोजनमाह ।

एतेन वै प्रजापतिः पुरुषमसृजत समर्वस्यान्नाद्यस्याधिपत्यमगच्छत् ॥ २ ॥

प्रजापतिः सर्वस्य जनकः पुरुषं विराडाख्यं असृजत स्पष्टमन्यत् अनेनान्नाद्यकामोधिकारीत्युक्तं भवति ॥ २ ॥

उक्तार्थवेदनं प्रशंसति।

सर्वस्यान्नाद्यस्याधिपत्यङ्गच्छति य एवं वेद ॥ ३ ॥

स्पष्टं ॥ ३ ॥

अथैतत् क्रतुत्रं सप्तरात्रं पुरुषजनकमित्युक्तं तत्राद्यश्चतुरहः शिरस्थानीयो विश्वजिन्मध्यस्थानीय इति प्रशंसति।

शिरोवा अग्रे सम्भवतः सम्भवति चतुर्धा विहितं वै शिरः प्राणश्चक्षुः श्रोत्रं वागात्मा वै पृष्ठानि यत्पृष्ठान्युपैति शिरएवात्मानमनुसन्दधाति ॥ ४ ॥

सर्वे प्राणिनः प्राणेन शिरःप्रमुखा एवोत्पद्यन्ते अतः शिरसः प्रथमं सम्भवतः स्वस्य चक्षुः श्रोत्रं वाक्त्वग्भेदेन चतुर्धाविहितत्वा दङ्गाच्च चतुष्टयस्तोषां चित्रत्स्तोमकत्वान्नवकपालं शिरसि यदस्य चतुरहः पुरुषशिरःस्थानीयः विश्वजिति तस्य सर्वपृष्ठाश्रयस्य मध्यमत्वेनात्मस्थानीयत्वाच्चतुरहानन्तरं विश्वजित् प्रयोक्ता आत्मानमध्यदेहं शिरश्चानुसंयोजितवान् भवति ॥ ४ ॥

अथ महाव्रतं उत्पन्नस्य पञ्चरात्रात्मकपुरुषस्यान्नत्वेन प्रशंसति।

एतद्वै पुरुषमकस्तस्मा अन्नमेव व्रतमपिदधाति ॥ ५ ॥

एतत् खलु पञ्चरात्रं पुरुषं कृतवान् तस्मात्पञ्चरात्रादनन्तरं महाव्रतप्रयोक्ता पुरुषेऽन्नमेव स्थापितवान् भवति ॥ ५ ॥

अथोत्पन्नज्योतिष्टोमातिरात्रं उत्पन्नस्य पुरुषस्यान्नव्यतिरिक्तसर्वभोगस्थानीयमिति प्रशंसति।

अथ यत् ज्योतिष्टोमोतिरात्रोभवत्यक्रृप्तस्य क्रृप्त्यै ॥६॥

अथ कल्पः, या देवानां पञ्चरात्रस्य प्रथमा सा जनकसप्तरात्र स्यान्यभ्यासक्ता द्वितीयस्याङ्गः स्तोत्रीयानुरूपौ पर्य्यासौ ह्वपापवस्व धारयेति गायत्रं ह्याविषातमाजिगन्त एकर्चाः पुनानः सोमधार येति त्रिस्त्रिणिधनमयास्यमित्यादिकः कल्पोद्रष्टव्यः ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य

नवमः खण्डः ।

अथ दशमः खण्डः ।

अथान्नाद्यफलसाधनपृष्ठस्तोमाख्यं सप्तरात्रं सप्तमाह ।

पृष्ठयः स्तोमः षडहोविश्वजिदतिरात्रः ॥ १ ॥

बृहद्रथन्तरपृष्ठ्याः षडहः अतिरात्रसंस्थो विश्वजित्सप्तमः ॥ १ ॥

अथैतदितरवैलक्षण्येनानुलोम्यपृष्ठत्वेन सत्रवान् भवतीति प्रशंसति ।

अन्यस्मै वै कामाय सत्रमन्यस्मै यज्ञेन तत्सत्रेणाप्नोति यस्मैकं यज्ञेन तद्यज्ञेनाप्नोति यस्मैकं सत्रꣳ सत्रमिव वा एतद्यदनुलोमं पृष्ठानि यदेकधा पृष्ठानि भवत्येकधैवास्मिꣳ-स्तदोजोवीर्य्यं दधात्यन्नं पृष्ठान्यन्नाद्यमेवास्मिन् दधाति पशवः पृष्ठानि पशूष्वेव प्रतितिष्ठति ॥ २ ॥

अथाभ्यासङ्गःषड्भावंपूर्ववद्व्याख्येयं ॥ २ ॥

उक्तेषु षट्सु सप्तरात्रेषु प्रत्यक्षं महाव्रतमस्ति अचतु विश्वजिदतिरात्र एव स एव परोक्षं महाव्रतमहरिति प्रशंसितुमाह।

यद्वै मनुष्याणां प्रत्यक्षन्तद्देवानां परोक्षमथ यन्मनुष्याणां परोक्षन्तद्देवानां प्रत्यक्षं ॥ ३ ॥

सप्टोऽर्थः ॥ ३ ॥

किमत इति चेत्तदुच्यते।

एतद्वै परोक्षं व्रतं यद्विश्वजित् प्रत्यक्षमेवैतेनान्नाद्यमवरुन्धे ॥ ४ ॥

अस्माकं प्रत्यक्षेण महाव्रतभूतं प्रत्यक्षं विश्वजिदतिरात्रं अहर्यदस्ति तद्देवानां व्रतं परोक्षमेव अतो यद्देवानां परोक्षं महाव्रतं तस्य महाव्रतस्य सर्वत्रान्नरूपेण स्तुतित्वेन प्रयोक्तापि प्रत्यक्षमन्नाद्यमवरुन्धे प्राप्नोति विश्वजिन्महाव्रतयोरुभयोरपि नानाविधानां बह्वृनां स्तोत्राणां सम्भवाद्विश्वजिदेव महाव्रतमित्युपचारः अथैष एव षड्होय ऋतूनां समूहोभ्यासङ्गो बृहद्रथन्तरपृष्ठयतुर्थस्याङ्गः प्रत्यस्मै पिपीषत इति गौरीवितमित्यादि कल्पोद्रष्टव्यः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
दशमः खण्डः ॥

अथ एकादशः खण्डः।

अथ देवत्वप्राप्तिसाधनमष्टरात्रमाह।

पृष्ठः षडहोमहाव्रतं ज्योतिष्टोमोतिरात्रः॥ १॥

महाव्रतमग्निष्टोमः अतिरात्रः षोड़शिमान् स्पष्टमन्यत् ॥१॥

अस्य फलं सप्रयोजनमाह।

एतेन वै देवा देवत्वमगच्छन्॥ २॥

इदानीन्तनेनापि देवत्वप्राप्तिकामेनैतत् कर्त्तव्यमित्युक्तं भवति॥ २॥

उक्तार्थञ्चं प्रशंसति।

देवत्वं गच्छति य एवं वेद॥ ३॥

स्पष्टोऽर्थः॥ ३॥

अथ महाव्रतस्य यदग्निष्टोमसंस्थात्मकत्वं तत् प्रशंसति।

एतद्वै व्रतमाप्तं यदष्टरात्रेऽग्निष्टोमोहि व्रतꣳसम्पद्यते॥ ४॥

अस्मिन् अष्टरात्रे यन्महाव्रतमस्ति देवैः प्राप्तं महाव्रतं आप्तत्वमेव दर्शयति अग्निष्टोमरूपं संस्थं खलु महाव्रतरूपं सम्पद्यते एतद्वै व्रतस्याप्तत्वं स्वकीयाग्निष्टोमसंस्थानतिक्रमणात्॥ ४॥

अथान्त्याज्योतिरात्रसंस्थत्वं प्रशंसति।

अथ यत् ज्योतिष्टोमोतिरात्रो भवत्यक्षण्वस्य क्षत्त्यै॥५॥

अथ यत् ज्योतिष्टोमसंस्थः क्लृप्तः तमकृत्वातिरात्रसंस्थः कर्त्तव्यः तच्च करणं अक्लृप्तस्य फलविशेषस्य क्लृप्त्यै भवति ॥ ५ ॥

एवं स्तुत्वा सर्वाप्तये स्तौति।

अष्टरात्रेण वै देवाः सर्वमाप्नुवत ॥ ६ ॥

स्पष्टं। यद्वा अष्टरात्रे याष्टत्वसंख्याप्ति तद्द्वारेणास्य स्तुति र्द्रष्टव्या आप्नोतेर्हि अष्टन्निति अष्टनवत्यर्थे अष्टनशब्दस्य व्याप्तिवचनः अतस्तत्संख्योपेतेनाष्टनशब्दस्य व्याप्नुतोक्तं ॥ ६ ॥

उक्तार्थञ्च प्रशंसति।

सर्वमाप्नुते य एवं वेद ॥ ७ ॥

अस्य कल्पः। एष एव षडहोयः ऋतूनां समूढो वा व्यूढो वा समूढत्वे वैकाहिकं व्रतं ज्योतिष्टोमोतिरात्रः षोडशिक इति ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
एकादशः खण्डः।

अथ द्वादशः खण्डः।

उक्तोष्टरात्रः, द्वौ नवरात्रौ, तत्र शतायुष्त्वसाधनं प्रथमं देवानान्नवरात्रमाह।

पृष्ठयः षडहोज्योतिर्गौरायुरतिरात्रो देवा वै मृत्योरबिभयुस्ते प्रजापतिमुपाधावꣳस्तेभ्य एतेन नवरात्रेणामृतत्वं प्रायच्छत् ॥ १ ॥

अतोऽमृतत्वकाम्यधिकारीत्युक्तं भवति ॥ १ ॥

ननु सर्वत्र शक्यमेव फलं काम्यं अत्र त्वमृतकामानां फलं देवानां युक्तं न मनुष्याणामित्याशंक्य मनुष्याचितममृतत्वं दर्शयति।

एतद्वाव मनुष्यस्यामृतत्वं यत् सर्वमायुरेति वसीयान् भवति ॥ २ ॥

यत् सर्वं शतवर्षलक्षणमायुरिति एतदेव खलु मनुष्यस्यामृतत्वं नाम न केवलं सर्वमायुःप्राप्तिरेवामृतत्वं किन्तु जीवनकालेपि वसीयस्त्वं श्रेष्ठत्वमपि सर्वश्रेष्ठो भूत्वा शतवर्षजीवनमेव मनुष्यस्यामृतत्वमित्यर्थः ॥ २ ॥

अथोक्तार्थज्ञानं प्रशंसति।

सर्वमायुरेति वसीयान् भवति य एवं वेद ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

नवरात्रो वा एष नव प्राणाः प्राणेष्वेव प्रतितिष्ठति ॥ ४ ॥

सुगमं ॥ ४ ॥

पृष्ठ्यः षडहो भवति प्रत्यक्षमृद्धया अथ यत् ज्योतिर्गौरायुरतिरात्रो भवति प्रतिष्ठित्यै ॥ ५ ॥

अथास्य कल्पः। एष एव षडहोय ऋतूनां समृद्धौ वा व्यृद्धौ वा समूढस्त्वेव ज्योतिर्गौरायुरतिरात्र एकाहकृत्या इति ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
द्वादशः खण्डः ॥

अथ त्रयोदशः खण्डः ।

अथ पशुसाधनं द्वितीयत्रवरात्रमाह ।

ज्योतिष्टोमोग्निष्टोमो गौरुक्थ आयुरुक्थोभ्यासंग्यः पञ्चाह्नो विश्वजिदतिरात्रः पशुकामोयजेत ॥ १ ॥

प्रथमं त्रिकद्रकाः, तत्र ज्योतिष्टोमोग्निष्टोमसंस्थोगो आयुषो उक्थसंस्थे अभ्यासंग्यः पञ्चाहलक्षणं द्वे त्रिवृती सवने पञ्चदशमेकमित्यादिकममक्रहर्शितं अतिरात्रसंस्थो विश्वजित्रवममहः ॥१॥

प्रथमं त्रिरात्रं प्रशंसति ।

यत् ज्योतिर्गौरायुस्त्रयहः पुरस्ताद्भवति प्रज्ञातान् स्तोमानुपैतीमानेव लोकानेष्वेव लोकेषु प्रतितिष्ठति ॥ २ ॥

एतेषां प्रकृतौ क्रमस्तोमत्वात् प्रज्ञातान् स्तोमत्वं ॥२॥

अथ सवनेन्तराभाविनं पञ्चाहं प्रशंसति ।

अथ यदभ्यासंग्यः पञ्चाह्नोमध्यतो भवति पाङ्क्ताः पुरुषः पाङ्क्ताः पशवस्तेन पुरुषं च पशूंश्चाप्नोति ॥ ३ ॥

पुरुषस्य पशूनाञ्च पञ्चसंख्यायोगोभ्यासंग्यः पञ्चरात्रे दर्शितः ॥ ३ ॥

अथात्यमहः प्रशंसति ।

विश्वजिदतिरात्रो भवति विश्वस्याभिजित्यै ॥ ४ ॥

स्पष्टं। अस्य कल्पः, ज्योतिष्टोमोऽग्निष्टोमो गौरुक्थ्य आयुरुक्थ्यस्तस्यायुषः पुरोजितोवी अन्यस इति श्यावाश्वमेकस्यामाग्नीगवमेकस्यामाकूपारमेकस्यां बृहत्तिसृषु बृहद्विधनं वा आर्कजभं पृष्ठावलम्बस्य पञ्चाहो विश्वजिदतिरात्र इति ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
त्रयोदशः खण्डः

अथ चतुर्दशः खण्डः।

अथ चत्वारो दशरात्राः। तत्र त्रिवृदुक्थाख्यं प्रथमं दशरात्रमाह।

त्रिवृदग्निष्टोमः पञ्चदश उक्थ्यस्त्रिवृदग्निष्टोमः सप्तदशोग्निष्टोम एकविंश उक्थ्यः सप्तदशोग्निष्टोमस्त्रिणवोग्निष्टोमस्त्रयस्त्रिंश उक्थ्यस्त्रिणवोग्निष्टोमो विश्वजिदतिरात्रः ॥ १ ॥

स्पष्टं। १।

अथैतत् प्रशंसति।

इन्द्रोसुरान् हत्वाकार्यञ्चकृवाꣳ अमन्यत तं देवा एतेन स्तोमेनायाजयन् सपाप्मनो नैर्दृश्यमगच्छत् ॥ २ ॥

इन्द्रः पूर्वं प्राजापत्यानसुरान् हत्वा भ्रातृवधादकार्यं कृतवानहं इत्यमन्यत तं देवा एतेन त्रिवृदुक्थाग्निष्टोमेन यज्ञेनाया-

जयन् स एतेनेष्ट्वा पाप्मनो भ्रातृव्यवधनिमित्तस्य नैर्दश्यन्निर्गत-दशरात्रत्वं अगच्छत् विश्वस्य हि दशरात्रादूर्ध्वं वेदना निवर्त्तत इति नैर्दश्यशब्देन दुःखनिवृत्तिर्लक्ष्यते ॥ २ ॥

इदानीमपि व्यथितस्य दशरात्रेतीति व्यथापगम एतं निव-न्धमाह।

तस्मादिन्द्रुतो वा दण्डहतो वा दशमीं नैर्दश्यं गच्छति ॥ ३ ॥

यस्मादिन्द्रो दशरात्रेण पाप्मनोनैर्दश्यमगच्छत्तस्मादि त्यर्थः ॥ ३ ॥

अथास्य संख्यायोगं प्रशंसति।

दश दशिनी वा एषा विराडन्नं विराडन्नाद्यमेवा स्मिन् दधाति ॥ ४ ॥

एषा विराट् इयं विराट् संख्यानिबन्धो दशरात्र इत्यर्थः विराडपेक्षया दशरात्रस्येति स्त्रीलिङ्गता दशदशिनी वै दशि-कानुबन्धदशकं दशदशो दशादशभ्यां विश्वजित इति दशदशिनी विराट् चिह्नति व्यतिरिक्तेषु पञ्चदशादिस्तोमेषु दशसंख्यायोगाः सन्तीति दशदशिनीति दशरात्राभिधानं ॥ ४ ॥

अथ षट्कृत्वोग्निष्टोमः क्रियते मध्यतस्त्रीणि उक्थ्यानि तदिदं प्रशंसति।

अग्निष्टोमेन वै देवा असुरान्निरुह्य मध्यत उक्थ्यैः प्रज-

या पशुभिः प्राजायन्ताग्निष्टोमेनैव भ्रातव्यन्निगृह्य मध्यत उक्थ्यैः प्रजया पशुभिः प्रजायते ॥ ५ ॥

स्पष्टं । ५ ।

अथाग्निष्टोमानन्तरं यत् त्रिःकृत्वः उक्थानुष्ठानमस्ति तत् प्रशंसति ।

त्रिककुब्वा एष यज्ञः ॥ ६ ॥

ककुबेव ककुप् उत्थितोपदेशस्य नाम प्रकृतिभूताग्निष्टोमा उत्थिता उक्थानां चयाणां उक्थ्यककुप् अत एतेन यजमानोपि समानानां प्रजानाञ्च मध्ये श्रुतशीलाचरणैस्त्रिभिः स्वयमप्युत्थितो भवतीत्यर्थः ॥ ६ ॥

उक्तार्थज्ञस्याप्येतत् फलं भवतीत्याह ।

त्रिककुप् समानानाञ्च प्रजानाञ्च भवति य एवं वेद ॥ ७ ॥

स्पष्टोऽर्थः । अथास्य कल्पः, अग्न आयूंषि पवस इत्यनुरूप यग्धूषु शचीपत इत्यभीवर्त्तो ब्रह्मसाम प्रसन्वानायान्यस इत्यौ दलदेवोदासे अभिप्रियाणीति यज्ञायज्ञीयमन्त्यं नमस्ते अग्न ओजस इति जरावोधीयमग्निष्टोममसामस्वामवा समानमितरं प्रथमेनाङ्गा जनकसप्तरात्रस्येत्ययं प्रथमः कल्प एवमितरेषान्नवानामङ्गां कल्पस्तवैव क्रमेण द्रष्टव्यः ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य

चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः।

अथ बहुभावफलसाधनकं द्वितीयं कुसुरुविन्ददशरात्रमाह।

त्रयस्त्रिवृतोग्निष्टोमास्त्रयः पञ्चदश उक्थास्त्रयः सप्तदश उक्थ्या एकविंशोतिरात्रः कुसुरुविन्ददशरात्रः ॥१॥

स्पष्टं। तथाविधानां त्रयाणामुक्थ्यानामत्र सम्भवाद्दशं दशरात्रः त्रिककुप्। १।

अथाधिकारिणमाह।

यः कामयेत बहुः स्यामिति स एतेन यजेत ॥ २ ॥

पुत्रपौत्रद्वारा स्वयमेव बहुविधः स्यामिति यः कामयेत ॥२॥ तत्राधिकृतः सम्यक् कथनं बहुलसाधनत्वमिति तस्योत्पत्तिं दर्शयति।

यज्ञमुखः स्तोमा बहुरेव भवति ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

अस्य गणस्तोमत्वं दर्शयति।

सह त्रिवृतः सह पञ्चदशाः सह सप्तदशाः ॥ ४ ॥

त्रयस्त्रिवृतः आदौ सह भवन्तीति ततस्त्रयः पञ्चदशाः सहसप्तदशाः सहेति स्तोमानाङ्गत्वं ॥ ४ ॥

अथान्त्यस्याङ्गः एकविंशत्वं प्रशंसति।

एकविंशोतिरात्रो भवति प्रतिष्ठित्यै ॥ ५ ॥

सिद्धमिदं ॥ ५ ॥

अथैतत् ज्योतिष्टोमत्वेन प्रशंसति।

ज्योतिर्वा एष विहृतः ॥ ६ ॥

विहृतपञ्चदशमसदशएकविंशा एतानि वाव तानि ज्योतीं-षीति श्रुतेः ज्योतिष्टोमे चतुर्णां सम्भवात् षट्दशरात्रो विहृतो ज्योतिष्टोम एव खलु ॥ ६ ॥

उक्तार्थत्वं प्रशंसति।

ज्योतिष्मजानां भवति य एवं वेद ॥ ७ ॥

स्पष्टं ॥ ७ ॥

अस्य चतुष्टोमत्वं प्रशंसति।

चतुष्टोमो वा एष चतुस्यादाः पशवः पशुष्वेव प्रति-तिष्ठति ॥ ८ ॥

स्पष्टं ॥ ८ ॥

अस्य चतुष्टोमत्वमेव प्रकारान्तरेण प्रशंसति।

एकविꣳशꣳ स्तोमानातियन्ति प्रतिष्ठा वा एकविꣳशः प्रत्येव तिष्ठति ॥ ९ ॥

सिद्धप्रायमेतत् ॥ ९ ॥

अथास्य फलं सप्रयोजनमाह।

एतेन वै कुसुरुविन्द औद्दालकिरिष्ट्वा भूमानमाश्नुत ॥ १० ॥

उद्दालकस्यापत्यमौद्दालकिः स च कुसुरुविन्दनामकः ॥ १० ॥

उक्तार्थञ्च प्रशंसति।

भूमानमश्नुते यः एवं वेद ॥ ११ ॥

अस्य कल्पः। या बृहस्पतिसवस्य सा कुसुरुविन्दस्य प्रथमा तस्यैजनुषैकर्चाहाविषतस्य लोके यौक्ताश्वं स्वाशिरामर्कस्य हाविषतं कुसुज्ञानयोरित्यादिकल्पः ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य
पञ्चदशः खण्डः।

अथ षोड़शः खण्डः।

अथ फलपशुसाधनं तृतीयं दशरात्रमाह।

अभ्यासंग्यः पञ्चाहश्चत्वारश्छन्दोमा विश्वजिदतिरात्रः पशुकामोयजेत ॥ १ ॥

स्पष्टं। १।

प्रथमपञ्चाहं स्तौति।

यदभ्यासंग्यः पञ्चाहः पुरस्ताद्भवति पाङ्क्ताः पुरुषः पाङ्क्ताः पशवस्तेन पुरुषञ्च पशूंश्चाप्नोति ॥ २ ॥

गतमिदं ॥ २ ॥

अथानन्तरभाविचतुरहं प्रशंसति।

छन्दोमामधतो भवन्ति पशवो वै छन्दोमाः पशूनाम वरुध्यै ॥ ३ ॥

स्पष्टं। ३।

अथान्यमहः प्रशंसति।

विश्वजिदतिरात्रो भवति विश्वस्याभिजित्यै ॥ ४ ॥

अथास्य कल्पः। पृष्ठ्यावलम्बः पञ्चाहः प्रथमस्याङ्गः प्रतवद्बहिष्पवमानं पञ्चमस्याङ्गोऽसच्चतेत्यनुरूप इत्यादिकः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य षोडशः खण्डः।

अथ सप्तदशः खण्डः।

अथ देवपुराख्यं चतुर्थं दशरात्रमाह।

त्रिष्टोमोग्निष्टोमो ज्योतिरुक्थ्य स्त्रिष्टोमोग्निष्टोमो गौरुक्थ्योभिजिदग्निष्टोमो गौरुक्थ्यो विश्वजिदग्निष्टोम आयुरुक्थ्यो विश्वजिदग्निष्टोमस्य सर्वस्तोमोतिरात्रः ॥ १ ॥

स्पष्टं। १।

अथैतत् प्रशंसति।

देवा वा असुरैर्हन्यमानास्ते प्रजापतिमुपाधावंस्तेभ्य एतान्देवपुरं प्रायच्छत् तां प्राविशन् ॥२॥

पूर्वं प्रजापतिरसुरैर्हन्यमानेभ्यो देवेभ्यस्तत्कृतोपद्रवपरिहारार्थं पुरस्थानीयमेतं दशरात्रं प्रायच्छत् यथा पुरन्त्रिवर्वाराहृतेः प्राकारपरिवारादिभिरन्यैर्दुरवगाहं भवति एवं त्रिः स्थानीयं त्रिष्टोमोग्निष्टोमोज्योतिरादिभिर्वेष्टितन्त एव पुरस्थानीयं यज्ञन्ते देवाः प्राविशन्नन्वतिष्ठन्नित्यर्थः तेन शत्रूनजयन्नित्यभिप्रायः ॥ २ ॥

अभिचार्यमाणं याजयेदेतामेव देवपुरं प्रविश्यत्स्तित्यै ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य सप्तदशः खण्डः।

अथ अष्टादशः खण्डः।

अभ्यासंग्यः षडहस्त्वयश्छन्दोमाश्चतुष्टोमोग्निष्टोमो विश्वजिदतिरात्रः ॥ १ ॥

स्वराजोवा एष यज्ञः ॥ २ ॥

स्वाराज्यं गच्छति य एवं वेद ॥ ३ ॥

प्रजापतिर्हि स्वाराज्यं परमेष्ठी स्वाराज्यं ॥ ४ ॥

परमेष्ठितां गच्छति य एवं वेद ॥ ५ ॥

उभे बृहद्रथन्तरे भवतस्तद्वि स्वाराज्यमजुतं दक्षिणा-स्तद्वि स्वाराज्यं षड्विंशस्तोमो भवति स हि स्वाराज्यं चतुष्टोमस्तोमः सच्चन्तोऽन्तꣳ श्रिया गच्छति य एवं वेद ॥ ६ ॥

एतेन वै क्षेम धृत्वा पौण्डरीक इष्ट्वा सुदामूस्तीर उत्तरे ॥ ७ ॥

सर्वामद्विमाद्रोत् सर्वामद्विमाद्रीति य एवं वेद* ॥ ८ ॥

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्।
पुमर्थांश्चतुरोदेयात् विद्यातीर्थमहेश्वरः ॥ ८ ॥

इति श्रीमहाराजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीर-बुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे द्वाविंशाध्यायस्य अष्टादशः खण्डः।
द्वाविंशोऽध्यायः समाप्तिमगमत्।

---

* सप्तदशखण्डस्य तृतीयमन्त्रावधि अष्टादशखण्डस्य सप्तपर्य्यन्तं द्वाविंशाध्याय समाप्ति यावत् ग्रन्थभागः श्रीकाशीपुस्तके नास्ति मूलपुस्तके तु एते मन्त्राः वर्त्तन्ते।

अथ त्रयोविंशोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

द्वादशाहप्रभृतिसत्रभेदोऽथ वर्ण्यते । द्वौ त्रयोदशरात्रौ तत्र प्रथमं आप्तद्वादशाख्यं सर्वद्विसाधनं सत्रमाह ।

अतिरात्रः पृष्ठ्यः षडहः सर्वस्तोमोतिरात्रश्चत्वारश्छन्दोमा अतिरात्रः ॥ १ ॥

आद्यन्तावतिरात्रौ मध्येपि त्रिवृदादिसर्वस्तोमकोतिरात्रः तस्य पृष्ठ्यः षडहः पूर्वः उपरिष्टाच्च चत्वारश्छन्दोमाः अविवाक्यमहश्चतुर्थः छन्दोमं भवति ॥ १ ॥

अथैतत् प्रशंसति ।

एष वा आप्तो द्वादशाहो यत् त्रयोदशरात्रयः ॥ २ ॥

त्रयोदशरात्रौ यदस्ति एष खलु आप्तः सम्पूर्णो द्वादशाहः यथा लोके धनादिके दिश्यति सति न्यूनताशङ्कापरिहाराय क्लृप्तसंख्यात ईषदधिकं संख्याकं वस्तुनो यत् तद्वत् द्वादशाहस्य यदि द्वादशैव स्युरहानि ततो द्वादशाहः सम्पूर्णोन्युनोवेति सन्दिग्धे

अहानि त्रयोदश स्युरेत् निःशङ्कं द्वादशाहः सम्पूर्णो भवति अतो अस्य त्रयोदशरात्रत्वात् अयमासो द्वादशाह उच्यते ॥ २ ॥

आद्यन्तावतिरात्राभ्यामेव तत् प्रशंसति।

समानोह्येष यत् प्रायणीयश्चोदयनीयश्चातिरात्रौ यं कामं कामयन्ते तमेताभिरभ्यश्नुवते ॥ ३ ॥

एष त्रयोदशरात्रः समानो हि आद्यन्तयोरेकरूपः खलु तदेवोपपादयति तत् प्रायणीयश्चोदयनीयश्चेत्यादिना असममान तालोको भवति तदुच्यते यं कामं कामयन्त इत्यादिना ॥ ३ ॥

अथ मध्यमस्यातिरात्रस्य सर्वस्तोमत्वं प्रशंसितुमाह।

गृहपतेस्तु वाग्पदासुका भवति तद्यन्मध्ये सर्वस्तोमो निरात्रो भवति तेन गृहपतेर्वाग्नपदासुका भवति ॥ ४ ॥

वाग्वै द्वादशाह इति श्रुतेः द्वादशाहात्मकस्य वाचोमध्ये ऽतिरात्रस्य श्रुतत्वात् यद्यपि समानत्वात् सम्पूर्णकाममाधनोयन्त तथापि गृहपतेर्यजमानस्य वाग्पदासुका उपलभ्यगोला भवति तस्य कः परिहार इत्युच्यते तन्मध्येतिरात्रः सर्वस्तोमो भवति तत्तेन तस्य वागतथाभूता भवति विच्छिन्नाया वाचः परिहाराय सर्वस्तोमस्य कारितत्वादित्यभिप्रायः ॥ ४ ॥

अथास्य रात्रीणां सर्वर्द्धिफलसाधनत्वं प्रयोगद्वारोपपादयति

एता वा अर्य्यल गृहपतय आरुणि होतारः सुभगा सूपयन्ति ते सर्वामृद्धिमार्ध्नुवन् सर्वामृद्धिमृध्नुवन्ति य एता उपयन्ति ॥ ५ ॥

पूर्वमेताः खलु त्रयोदशरात्रीरर्थ्यल गृहपतयोर्यलं गृहपतिं कुर्व्वाणा आरुणि होतारः आरुणिं होतारं कुर्व्वाणाः सत्रिणः सुभगासु प्रजासु हृद्येषु जनपदेष्वित्यर्थः यद्वा कुलत्वणासु नदीषु एतारात्रीरुपयन्ति उपेयुरित्यर्थः सर्वमृद्धिमित्यादि स्पष्टं अत्र दीक्षाक्रयप्रसवोत्थानानि सर्वसत्रेषु पूर्वपक्ष उपपादयेयुरित्यादिकं सत्रसामान्यविषयं सूत्रे द्रष्टव्यं अत्र पृष्ट्यः षडहश्छन्दोमाश्च विद्यन्ते षडहः प्रकृतिक इति तद्विचारं वक्ष्यति छन्दोमा व्यूढा समूढाश्चिता विशेषश्रवणादिति प्राप्ते सूत्रकार आह पूर्वस्मिंस्त्रयोदशरात्रे व्यूढाश्छन्दोमाः सोममासादेशाद्गौरीवितस्य चानादेशादिति यदि समूढाश्छन्दोमाः स्युस्तदानीं प्रथमस्य छन्दोमकर्णस्य तस्य चोक्तं सोममासमिति कल्पकारोऽत्र वक्ष्यते पूर्वमेव छन्दोमदशरात्रे छन्दोमानां समूहकृतौ तथेवोक्तत्वात् तथा समूढपक्षे गौरीवितलोकेसामान्तरमात्रेयादिकं पूर्वमुक्तं तदिदानीन्निर्वर्त्य गौरीवितं पुनरादेष्टव्यं सर्वसत्रेष्वार्भवे गौरीवितनियमात् नच तदादिष्टत्वदिदं व्यूढपक्षे एवोपपद्यते तदानीं यथा ब्राह्मणं गौरीवितस्य सिद्धत्वादिति भवत्येवं पृष्ट्यास्तु कथन्तत आह गवामयनन्यायेन तु पृष्ट्या इति यथा गवामयने प्रतिमाससमूहाः पृष्ट्यः तद्वदिति कुत इत्याह अविच्छिन्नो हि तथा प्रवर्त्तत इति छन्दोमेत्यवच्छिन्ने पृथक्कृतः पृष्ट्यः समूहानेव सर्वत्र प्रवर्त्तते अत्र सर्वस्तोमेन त्रायेत पृथक्कृत इति सिद्धान्तमाह दशरात्रचतुश्छन्दोमत्वादिति यथा गवामयने दशरात्रे पृष्ट्योव्यूढस्तद्वदत्रापि स्यात् छन्दोमसहितत्वात् छन्दोमाभावेहि केवलषडहव्यूढः स्यात् अपूर्णत्वात् समूढो भवति तथा च ब्राह्मणे निदानकारेणोदाहृत

नरर्त्विक्छन्दोभ्यः पृष्ठ्योव्यूहं मानस इति हेत्वन्तरमाह व्यूह-ममाध्यव्यतिरेकादिति समाधिः साम्यव्यतिरेको व्यतिपर्य्ययः व्यूहसाम्यस्य क्वचिदपि विपर्य्ययाभावात् एतदुक्तं भवति यदिदं छन्दोभिषु व्यूहः स्यात् तदा पृष्ठ्योपि व्यूहः कार्य्यः यदि नस्यात् तदा पृष्ठ्योपि न कार्य्य इति तदिदं व्यूहसाम्यं सर्वस्तोभेन व्यवायो नादरणीय इति भाव इति, अथास्य कल्प., त्रयोदशरात्रे प्रथ मस्य छन्दोमस्य कणुरथन्तरस्य लोके सीमसाम पुनानः सीमधारयेत्येतदिति अत्रातिरात्रानन्तरं पृष्ठ्याः षडहः सम्भवादत्रातिरात्रात् पृष्ठ्यमुपर्यन्ति प्रथमस्याङ्गोऽस्य प्रत्नानुरूप इति साधारणकल्पो भवितव्यः तथापि प्रत्नवच्चाद्यवहिष्यपमानं परेण ह्येतदस्य प्रत्नानुरूप इत्याहेत्यादि सूत्रकारेण चतुर्दशप्रभृतिषु चायं कल्प इति व्यवस्थापितत्वान्नात्र प्रवर्त्तते ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
प्रथमः खण्डः।

अथ द्वितीयः खण्डः।

अथ द्वितीयं त्रयोदशरात्रं प्रतिष्ठासाधनं सत्रमाह।

अतिरात्रो द्वादशाहस्य दशाहानि महाव्रतं चातिरात्रश्च ॥ १ ॥

गवामयनिकं महाव्रतं गिष्टान्यहानि स्पष्टानि ॥ १ ॥

अथ तत् पूर्ववैलक्षण्येन स्तौति।

वाग्वा एषा प्रतायते यदेष द्वादशाहस्तां विच्छिन्द्यन्मध्येतिरात्रं कुर्युः ॥ २ ॥

द्वादशाहस्य वायूपत्वात् तस्यानुष्ठानेनैव वाक्सन्तानमेव यतो यन्मध्ये पूर्ववदतिरात्रं कुर्युः तदानीं सन्ततां वाचं विच्छिन्दुः ॥२॥

अथातिरात्राभावे वाग्विदः तथापि तदभावे वाग्विच्छेदः तथापि तदभावेऽङ्गान्न जनकत्वादिच्छेदस्तदवस्थ एवेत्यागङ्क्य तत्परिहारमाह।

यदुपरिष्टाद् व्रतमुपयन्ति न वाचं विच्छिन्दन्त्याप्नुवन्ति त्रयोदशम्मासं ॥ ३ ॥

अतिरात्रप्रतिनिधित्वेन द्वादशाहस्तेन महाव्रतस्य करणात् अङ्गां त्रयोदशत्वमिदरूपे युवामीपि त्रयोदशं मासमाप्नोति माम त्रयोदशकोपलक्षितान्वङ्गन् संवत्सरान् जीवन्तीत्यर्थः ॥ ३ ॥

अथास्य फलमाह।

एता वै प्रतिष्ठितास्त्रयोदशरात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥ ४ ॥

प्रतिष्ठितसंवत्सरावयवभूतत्रयोदशमासा मासगतसंख्यासाम्यादेतासां रात्रीणां प्रतिष्ठितत्वं सत्पत्ते संवत्सरस्य त्रयोदश मासस्य कलाः सांवत्सरिकं व्रतमिति ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
द्वितीयः खण्डः।

अथ तृतीयः खण्डः ।

अथ त्रयस्त्रयस्त्रिंशरात्रयस्तत्र प्रथमं सर्वफलसाधनं चतुर्दशरात्रमाह ।

अतिरात्रः पृष्ठ्यः षडहः पृष्ठ्यः षडहस्त्रयस्त्रिंशारम्भणोतिरात्रः ॥ १ ॥

आवृत्तः षडह इत्यर्थः ॥ १ ॥

अथैताः प्रशंसति ।

कामसनयो वा एतारात्रयः ॥ २ ॥

स्पष्टं ॥ २ ॥

तत् कथमिति तद्विभज्य दर्शयति ।

विराड्ढिदशात्मैकादशी प्रजा द्वादशी पशवस्त्रयोदशी कामाय चतुर्दशी ॥ ३ ॥

आदित्यतः दशरात्रो विराट् खलु साक्षाद्दशमित्यर्थः दशसंख्यासाम्यात् विराट् एकादशी रात्रिः सा आत्मस्थानीया द्वादशी रात्रिः प्रजास्थानीया त्रयोदशी रात्रिः पशवः चतुर्दशी रात्रिः उक्तव्यतिरिक्तसर्वफलस्थानीया ॥ ३ ॥

एवं कामसनित्वमस्योपपाद्यानुष्ठातॄणामपि सर्वकाममित्वं भवतीत्याह ।

सर्वानेवैताभिः कामानवरुन्धते ॥ ४ ॥

स्पष्टं ॥ ४ ॥

अथैतान्यहान्यस्य छन्दोमस्य कणुरथन्तरस्य लोके सोम साम पुनान: सोमधारयेत्येतदिति आरोहं प्रशंसति।

एता वाव ब्रध्नस्य विष्टपोयदेतौ त्रयस्त्रिंशौ मध्यतः सन्धीयेते तेन ब्रध्नस्य विष्टपꣳ रोहन्ति ॥ ५ ॥

ब्रध्नस्य यस्मिन् ब्रह्ममूत आदित्ये बद्धा लोकावर्त्तन्ते स ब्रध्नस्य विष्टपो लोकाः एता वाव एता एव रात्रयः खलु इति अस्वेवं किन्नत इति तदुपपादयति यद्यस्मादेतौ त्रयस्त्रिंशौ स्तोमौ मध्यतः चतुर्विंशरात्रस्य मध्ये प्रथमषडहः स्यात्तत्द्वितीयषड्हस्यादौ च सन्धीयते अव्यवधानेन प्रयुज्यते तेन ब्रध्नस्यादित्यविष्टपं लोकं रोहन्ति सचिवः ॥ ५ ॥

अथ यत् पृष्ठानां द्विरावर्त्तनमस्ति तत् प्रशंसति।

द्विःपृष्ठान्युपयन्त्यभिपूर्वमेवैताभिरन्नाद्यं दधते ॥ ६ ॥

अन्नं वै पृष्ठानीतिश्रुतेः तत् क्रमेण पृष्ठानि द्विरुपजन्ति तेनानुवर्त्तते तेनान्नाद्यं अन्नयोग्यं व्रीहियवादिरूपमन्नं दधते ॥ ६ ॥

अथ प्रकान्तारेण स्तौति

पक्षिण्यो वा एता रात्रयो यद्कामकामयन्ते तमेताभिरभ्यश्नवते ॥ ७ ॥

अतिरात्रौ अभिहितौ द्वौ पृष्ठः षड्हपक्षौ तद्वत्य एव चतुर्विंशरात्रयः खलु अस्वेवं किं तत इत्याह अतः पक्षिणीभिरेवाहोरात्रिभिः ऐहिकं आमुष्मिकञ्च यद्कामकामयन्ते तं प्राप्नुवन्ति ॥ ७ ॥

रात्रीणां पक्षिणीत्वेन कथं कामप्राप्तिरिति तदर्शयति।

यत्र यत्र हि पक्षी कामयते तत्तदभ्यश्नुते ॥ ८ ॥

गतमिदं ॥ ८ ॥

आद्यन्तावतिरात्रौ प्रशंसति।

त्रिवृता प्रयन्ति त्रिवृतोद्यन्ति प्राणा वै त्रिवृत् स्तोमानां प्राणैरेव प्रयन्ति प्राणेषु प्रतितिष्ठन्ति ॥ ९ ॥

प्राणाः शीर्षण्याः सप्त द्वावर्वाञ्चाविति त्रिवृदपि नव स्तोत्रीयात्मक इति प्राणास्त्रिवृदित्युच्यते यदा त्रिवृति त्रित्वसंख्यास्ति प्राणापानोव्यान इति प्राणोपि त्रयात्मकः अतः प्राणास्त्रिवृत् साधारणः कल्पः ॥ ९ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य तृतीयः खण्डः।

अथ चतुर्थः खण्डः।

अथ द्वितीयं चतुर्हगरात्रमाह।

अतिरात्रो ज्योतिर्गौरायुस्तुवहः पृष्ठ्यः षड़ह आयुर्गौर्ज्यौतिरतिरात्रः ॥ १ ॥

अनुलोमप्रतिलोमौ द्वौ विकल्पौ कल्पे पृष्ठ्यः षड़ह आद्यन्तयोरतिरात्र इति चतुर्हगरात्रः ॥ १ ॥

आसामधिकारिणमाह।

याऽस्तल्पे वोदके वा विवाहे वा मीमाऽसेरऽस्त एता उपेयुः॥ २॥

यान् पुरुषान् तल्पे शयान् वा उदके अभिषेकार्थं विवाहे वा मीमाऽसेरन् विवदेयुरन्ये ते मीमांसमाना एतद्रात्रीरुपेयुः तल्पाद्यर्थेनाधिकरण इत्यर्थः॥ २॥

आद्यत्वाहं प्रशंसति।

यत् ज्योतिर्गौरायुस्तदहः प्रज्ञाताऽस्तोमानुपयन्ति॥३॥

स्पष्टं॥ ३॥

कथं प्रज्ञातत्वमिति तत्राह।

इमानेव लोकानेषु एव लोकेषु प्रतितिष्ठन्ति॥४॥

ज्योतिरादीनां भूरादिलोकात्मकत्वाद्भूरादीनां सर्वैः प्रज्ञातत्वात् स्तोमाअपि प्रज्ञाता इत्युच्यते॥ ४॥

अनन्तरभाविनं षड्हं प्रशंसति।

अथ यत् पृष्ठयः षड्होमध्यतो भवत्येष वाव देवतल्पो देवतल्पमेव तदारोहन्ति तल्पा भवन्ति॥ ५॥

यथा लोकाः तल्पमारुह्य सुखेन शेरते एवं देवा अपि षड्हमाश्रित्य तुष्यन्तीति षड्हो देवतल्पः यद्वा यथा गृहस्य मध्ये वर्त्तते एवमहोमध्ये संस्थानात्तल्प इत्युपचारः अतः षड्हं क्रमेण प्रयु-

ज्ञानास्तेन षड्हेन देवतल्पमेवारोहन्ति स्वयञ्च तल्पाः शोभन-तल्पार्हा भवन्ति ॥ ५ ॥

किञ्च।

प्रवसीयस्तल्पमाप्नुवन्ति ॥ ६ ॥

सप्तमस्य सुकृतिनो देवास्तल्पं प्राप्नुवन्ति कर्म्मणि षष्ठी प्रश-स्ततल्पमित्यर्थः ॥ ६ ॥

अथावृत्तं त्रिकद्रुकं प्रशंसति।

अथ यदायुर्गौर्ज्योतिरतिरात्रोयेनेतोयन्ति तेन पुनरा-यन्ति ॥ ७ ॥

येन ज्योतिरादिक्रमेण इतोऽस्माल्लोकात् यन्ति स्वर्गं प्राप्नुवन्ति तेनैवावरोहक्रमेण पुनरायन्त्यमूं लकं स्वर्गं चिरकालसुषित्वा पुनरागच्छन्ति सत्रिणः प्रयोगारोहावरोह एव स्वर्गारोहावरोहणं अथास्य कल्पः रात्रातिरात्रात् पृष्ठमुपयन्ति प्रथमस्याह्नोस्य प्रत्या-नुरूपोयत्र वा त्रिकद्रुकस्य यत्र ज्योतिर्गौरायुस्त्र्याहा ऐहिकास्ते गौरोवितस्त्रा एत एवावृत्तायुर्गौर्ज्योतिरतिरात्र इत्यादिकः साधारणः कल्पोद्रष्टव्यः। ७।

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
चतुर्थः खण्डः।

अथ पञ्चमः खण्डः।

अथ तृतीयचतुर्हगत्रं प्रतिष्ठासाधनं सत्रमाह।

अतिरात्रो गौश्चायुश्च द्वे अहनी द्वादशाहस्य दशाहान्यतिरात्रः ॥ १ ॥

स्पष्टं । १ ।

द्वितीये द्वे अहनी प्रशंसति ।

यद्गौश्चायुश्च द्वे अहनी भवतो मिथुनौ स्तोमावुपयन्ति प्रजात्यै ॥ २ ॥

गोरायुषी इति द्वौ स्तोमौ स्त्रीपुंसात्मकौ मिथुनौ अतस्तदनुष्ठानं प्रजात्यै पुत्रादिप्रजननाय भवति । २ ।

अथानन्तरभाविनं दशाहं प्रशंसति ।

अथ यानि द्वादशाहस्य दशाहानि वाचमविच्छिन्नामुपयन्ति प्रजननाय ॥ ३ ॥

द्वादशाहस्य वागात्मकत्वात्तदन्तःपाती दशाहोपि वागात्मकः अतस्तस्या विच्छिन्नप्रयोगेणाविच्छिन्नां वाचमुपयन्ति तत्र प्रजननाय सन्तत्यविच्छेदाय भवतीत्यर्थः । ३ ।

अथ सर्वाश्चतुर्ह्गरात्रीः प्रशंसति ।

एतावै प्रतिष्ठिताश्चतुर्ह्गरात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥ ४ ॥

रात्रीणां समसंख्यासद्भावात् समसंख्याश्रयाच्च द्विपाद्यजमानः प्रतिष्ठित्वा इत्यादि प्रतिष्ठात्मकत्वाद्रात्रीणां प्रतिष्ठितत्वं यदा

द्वादशाहे प्रतिष्ठितानां रात्रीणां अद्यापि क्रियमाणत्वात् प्रतिष्ठितत्वं सिद्धमन्यत् अत्र ज्योतिर्गौरायुस्त्वाह एकाहिकाम्तइत्युक्ता एतएव गोआयुषी इत्युक्ताः साधारणः कल्पोद्रष्टव्यः । ४ ।

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

चत्वारः पञ्चदशरात्राः तेषु देवत्वप्राप्तिसाधनं प्रथमं पञ्चदशरात्रं सत्रमाह ।

अतिरात्रः पृष्ठ्यः षडहो महाव्रतं पृष्ठ्यः षडहस्त्रय-स्त्रिꣳशारम्भणोति रात्रः ॥ १ ॥

त्रयस्त्रिंशारम्भण इत्यनुवर्त्तत इत्यर्थः ॥ १ ॥

अथास्य फलं सप्ररोचनमाह ।

एताभिर्वै देवा देवत्वमगच्छन् देवत्वङ्गच्छन्ति य एना उपयन्ति ॥ २ ॥

स्पष्टं ॥ २ ॥

अथैतद्देवसम्बन्धद्वारेण प्रशंसति ।

एतद्वै देवानाꣳ सत्रन्तद्यापि देवाः सत्रमासते ॥ ३ ॥

यस्मादेतत् पूर्वं देवैरनुष्ठितं तत् तस्मादद्यापि तत् सत्रं देवा अथासते तत इदं प्रशस्त इत्यर्थः ननु देवानान्तदाभावाद्यनुपपत्या यद्यपि कर्माधिकारोनास्ति तथापि स्तुत्यर्थत्वादिति न विरोधः ॥ ३ ॥

अथासां पञ्चदशरात्रीणां क्रमेणाहर्विधिमाह।

पौर्णमास्यतिरात्रोऽथ यानि षडहानि स पृष्ठ्यः षड्ह एकाष्टका महाव्रतमथ यानि षडहानि स पृष्ठ्यः षडहोऽमावास्यातिरात्रः ॥ ४ ॥

पौर्णमास्यां प्रायणीयातिरात्रः ततः प्रतिपदाद्यहःषट्के क्रमेण पृष्ठ्यः षडहः कर्त्तव्यः अपरपक्षाष्टम्येकाष्टका तत्र महाव्रतमहर्भवति ततोहःषट्क पृष्ठ्यः षडह आमावास्यामुदयनीयोतिरात्र इति देवैरनुष्ठितत्वादयं यागोदेवसुतएवमनुष्यसुत इत्यर्थः ॥ ४ ॥

तस्मात्तर्हि मनुष्याणान्नसुतो देवानां हि तर्हि सुतः प्रत्यक्षमेवै ताभिर्देवता अभ्यारोहन्ति ॥ ५ ॥

तस्मात् देवैरनुष्ठितत्वात् कृष्णपक्षे सत्रसमापनत्वाद्वा तर्हि तथा सत्ययं मनुष्याणामुचितः सोमयागो भवति किन्तु तर्हि तथा सति देवानां सुतो हि अतः प्रत्यक्षमेवैताभिः रात्रीभिर्देवता अभ्यारोहन्ति सचिवोमनुष्याः देवैरनुष्ठितस्यैतैरपि कृतत्वाद्यद्यपि देहान्ते देवप्राप्तिः स्वर्गादेव तुल्या तथाप्यस्य देवसत्रत्वात् प्रत्यक्षमेव मशरीरमेते देवता आभिमुख्येन गच्छन्ति

अथास्य सत्रस्य सामान्यप्राप्तदीक्षोपसदो द्वादशत्वाङ्गीकारे प्रथमस्तुल्याङ्गभूतपौर्णमास्याः पूर्वं चतुर्विंशतिदिवसादर्वाक् दीक्षोपक्रमे सति कृष्णपक्षे दीक्षारम्भः स्यात्॥ ५॥

तं पक्षविराकृत्य पूर्वपक्षे दीक्षोपक्रमं विदधाति।

प्रतिनोदात्तु भय्यमितरमनुपक्षो दीक्षेरन्नप्रतिनोदाय॥६॥

तुशब्दो वैलक्षण्यद्योतनार्थः सत्रत्वसामान्यप्रयुक्तद्वादशदीक्षा अस्मिन् पक्षे पौर्णमासीसुत्योपक्रमापेक्षं कृष्णपक्षपक्ष्यां योदीक्षोपक्रमस्तस्मिन् पक्षे प्रतिनोदाहेयत्वं प्राप्नवतां सत्रिणां देवकर्तृकत्वात् स्वर्गान्निष्कासनाङ्गयं भवति अतस्तत्परिहारायेतरमनुपक्षः इतरं पक्षमनु शुक्लपक्षे दीक्षेरन् सा च स्वर्गादप्रतिनोदाय भवति अयमर्थः सर्वोपि सूत्रेण स्पष्टो भवति अत्र सुत्यारम्भे मतभेदसिद्ध्यर्थं दीक्षारम्भे दर्शयति सूत्रकारः प्रथमे पञ्चदशरात्र एकान्नविंशतिर्दीक्षा इति धानञ्जय इति स्पष्टं तच्छ्रुत इत्यत आह एकाष्टकामहाव्रतममावास्यातिरात्र इति ह्याहेति अयमर्थः अपरपक्षाष्टम्येकाष्टका तस्यां महाव्रतं अमावास्यायामुदयनीयातिरात्र इति ब्राह्मणे अतस्तदानुगुण्येन कृष्णःप्रतिपदि प्रायणीयं ततः पूर्वं द्वादशोपसदः ततः पूर्वमेकान्नविंशतिर्दीक्षा पौर्णमस्या सहेति सामर्थ्यात् सिद्धमिति अष्टादशेति गौतमः पौर्णमास्यतिरात्र इति ह्याहेति अयमर्थः पौर्णमास्यां प्रायणीयोतिरात्र इति वचनात् पञ्चदश्यामेव सुत्यारम्भान प्रतिपदि तथा सति पौर्णमासीसिद्धः प्रतिपत्तिणार्थः स्यात् तच्चायुक्तं तेन पञ्चदश्याः पूर्वन्नूपसद्यतिरिक्तान्यष्टादशेवेति गौतममतं नन्वेव-

मैकाष्टका यः शब्दः सप्तमीलक्षणार्थः स्यात् अमावास्याशब्दश्चतुर्दशीं लक्षयेदिति पदद्वयस्य श्रौतार्थभङ्गः स्यात् सत्यं पदद्वयेपि तावल्लक्षणा दुर्वारा सत्यं तत्र पौर्णमासीशब्दः प्रथमश्रुतत्वादमज्ञातविरोधीमुख्यस्य इति गौतमस्याभिप्रायः भूयसोन्यायेन पदद्वयस्य मुख्यार्थलाभीयुक्त इति धानञ्जय्यस्याशयः एवं दीक्षायां मतद्वयं प्रदर्श्यान्यं स्वमतं दर्शयति सूत्रकारः जातिकल्पो वेति सर्वेति सामान्यज्ञातिः तत् प्रयुक्तकल्पो जातिकल्पः तेषां द्वादश दीक्षा द्वादशोपसदः ता एवात्रापि स्युरित्यर्थः नन्वेवमितरमनुपक्षो दीक्षेरन्निति वचनविरोधः अवगतः नायं विरोधः कृष्णपक्षे दीक्षामभ्युपगम्य देवैः प्रतिनोदशङ्कया पक्षान्तरत्वेन विधानात् तेन विकल्प एव युक्तः न च कृष्णपक्षे दीक्षोपक्रमकल्पो ब्राह्मणे निर्दिष्ट इति वाच्यं प्रतिनोदशेषस्योपन्यस्तत्वात् कृष्णपक्षे दीक्षोपक्रमाङ्गीकाराभावे प्रतिनोददोषस्यैवानुदयात् कृष्णपक्षोपक्रमः सत्रसामान्यविहितो द्वादशदीक्षापक्षो ब्राह्मणे निर्दिष्टप्रायएवेति अतः पूर्णमास्यां प्रतिपदि वा युक्तोपक्रम इति मतद्वयं सिद्धं एतज्जातिकल्पपक्षेपि समानं अथाग्रहादशाहप्रभृतीनां सत्राणां सामान्यकल्पः सर्वेषु स्यादतिरात्रात् पृष्ठ्यमुपयन्ति प्रथमस्याङ्गीरस्य प्रजानुरूपो यज्ञ वा त्रिकद्रुकेभ्यो यज्ञ ज्योतिर्गोरायुस्त्राहं ऐकाहिकास्ते गौरीवितस्वरा एत एवाहत्ता यदायुर्गोर्ज्योतिरतिरात्र एते एव गो आयुषो रात्रिसत्रेष्वन्यतमयमतिरात्राभ्यः संवत्सरसंमिताभ्यश्चेति कृत्स्नं प्रथमं पञ्चदशरात्रमिति ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
षष्ठः खण्डः ।

अथ सप्तमः खण्डः।

अथ ब्रह्मवर्चसफलसाधनं द्वितीयं पञ्चदशरात्रं मन्त्रमाह।

अतिरात्रस्त्रिवृदग्निष्टुदग्निष्टोमो ज्योतिर्गौरायुरुक्थ्यः पृष्ठ्यः षडह आयुर्गौर्ज्योतिरतिरात्रः॥ १॥

सर्वाग्नेये कश्चित् त्रिवृत्स्तोमक एवाहर्विशेषस्त्रिवृदग्निष्टुदग्निष्टोमः श्रिष्टानि स्पष्टानि॥ १॥

अथैता रात्रयः प्रशंसति।

क्षत्रं वा एतारात्रयोभिनिर्वदन्ति॥ २॥

एताः पञ्चदशरात्रयः क्षत्रमित्यभिनिर्वदन्त्यभिज्ञाः क्षत्रमित्यकत्वमत्राङ्गां पञ्चदशस्तोमगनां संख्यामाहुरयात्तस्य चोरमो बाहुभ्यां पञ्चदशत्रिरमिमीतेत्युपक्रम्य राजन्योमनुष्याणामिति युतत्वेन क्षत्रसम्बन्धात् क्षत्रमिति अङ्गां स्तुतिः॥ २॥

अथ सोमाधिकारिणमाह।

ब्रह्मवर्चसकामाउपेयुः॥ ३॥

स्पष्टं॥ ३॥

प्रथममहस्तत्र त्रिवृद्द्वारा प्रशंसति।

यत्त्रिवृदग्निष्टुदग्निष्टोमो भवति ब्रह्म तद्यशसार्द्धयति॥४॥

त्रिवृदग्निष्टुदग्निष्टोमकरणं यदस्ति तत्तेन ब्राह्मणजातिमेव यशसार्द्धयति समर्द्धयति॥ ४॥

त्रिवृत्स्तोमब्राह्मणयोः सम्बन्ध इति तत्राह।

ब्रह्म वै त्रिवृत् ॥ ५ ॥

प्रजापतिमुखात् त्रिवृतो ब्राह्मणस्य च सहोत्पत्तिसम्बन्धः ॥५॥

अथ त्रिकद्रुकमध्यभाजं पृष्ठ्यः षडहः आहृतं त्रिकद्रुकं च क्रमेण प्रशंसति।

यत् ज्योतिर्गौरायुरित्यहः प्रज्ञातान् स्तोमानुपयन्ती-मानेव लोकानेष्वेव लोकेषु प्रतितिष्ठन्त्यथ यत् पृष्ठ्यः षड-हो मध्यतो भवत्यन्नं वै पृष्ठान्यन्नमेव तन् मध्यतो धीयते तस्मान् मध्ये सदन्नन्धिनोत्यथ यदायुर्गौर्ज्योतिरतिरात्रो-येनेतोयन्ति तेन पुनरायन्ति ॥ ६ ॥

गतोऽर्थः ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
सप्तमः खण्डः।

अथ अष्टमः खण्डः।

अथाहीनसत्रोभयफलसाधनं तृतीयं पञ्चदशरात्रमाह।

त्रिवृदग्निष्टुदग्निष्टोमो ज्योतिर्गौरायुरित्यहो द्वादशाहस्य दशाहान्यतिरात्रः ॥ १ ॥

एकतोतिरात्रत्वमहीनलिङ्गं ॥ १ ॥

अहःसङ्घातात्मकत्वं सत्रलिङ्गं तदुभयस्यापि सङ्घावादेतदुभयात्मकमिति प्रशंसितुमहीनसत्रयोर्विलक्षणप्रकृतिकत्वं दर्शयति।

अन्यस्मै वै कामाय सत्रमन्यस्मै यज्ञेन तत् सत्रेणाप्नोति यस्मैकं यज्ञेन तद्यज्ञेनाप्नोति यस्मैकꣳसत्रं ॥ २ ॥

गतोर्थः ॥ २ ॥

एवं वैलक्षण्यमुपन्यस्य तदुभयलिङ्गं दर्शयति।

यदन्यतोतिरात्रास्तेन यज्ञोऽथ यानि द्वादशाहस्य द्वादशाहानि तेन सत्रं ॥ ३ ॥

स्पष्टं ॥ ३ ॥

अस्तूभयात्मकत्वं ततः किमित्यत आह।

उभावेवैताभिः कामावरुन्धते ॥ ४ ॥

त्रयो ज्योतिर्गोरायुस्त्र्यह इत्यादिकः साधारणः कल्पोद्रष्टव्यः ॥ ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य अष्टमः खण्डः।

अथ नवमः खण्डः।

अथ प्रजाफलसाधनं चतुर्थं पञ्चदशरात्रमाह।

अतिरात्रो ज्योतिर्गौरायुरित्यहो द्वादशाहस्य दशाहान्यतिरात्रः प्रजाकामा उपेयुः ॥ १ ॥

स्पष्टं ॥ १ ॥

अथास्य प्रजाफलसाधनत्वं सप्रपञ्चमाह।

एताभिर्वै प्रजापतिः प्रजा असृजत प्र प्रजया प्रपशुभिर्जायन्ते य एता उपयन्ति ॥ २ ॥

सुगमं ॥ २ ॥

अथादौ त्र्यहं प्रशंसति।

यत्ज्योतिर्गौरायुरित्यहः प्रज्ञातान् स्तोमानुपयन्तीमानेव लोकानेष्वेव लोकेषु प्रतितिष्ठन्ति ॥ ३ ॥

भूरादिलोकानां प्रज्ञातत्वादादित्यं वै ज्योतिरित्यादिश्रुतेर्ज्योतिरादीनां भूरादिलोकात्मकत्वाच्चैषां स्तोमानां प्रज्ञातत्वं ॥ ३ ॥

अनन्तरभावीनि दशाहानि प्रशंसति।

अथ यानि द्वादशाहस्य दशाहानि वाचमविच्छिन्नामुपयन्ति प्रजननाय ॥ ४ ॥

वाग्वै द्वादशाह इति श्रुतेः तत्रत्यानां द्वादशानामङ्गानामविच्छेदेनानुष्ठानाद्विच्छिन्नामेव वाचमुपयन्तीति साचोपलब्धिः प्रजननाय सन्तत्यविच्छेदाय फलोत्पत्तये वा भवति ॥ ४ ॥

एवमहानि विभज्याथ समुच्चित्य प्रशंसति।

एता वै प्रतिष्ठिताः पञ्चदशरात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥ ५ ॥

विप्रकीर्णत्वाभावेनान्यत्र व्यवस्थितानामेवाहःसङ्घातानामत्र प्रयोगादङ्गां प्रतिष्ठितत्वं यद्वा पञ्चदशवार्धमासस्य रात्रय इति श्रुतेः प्रतिष्ठितसंवत्सरान्तर्भूताऽर्धमासरात्रिसंख्यासाम्यादासां प्रतिष्ठितत्वं ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
नवमः खण्डः।

अथ दशमः खण्डः।

अथ परमविजयसाधनमन्द्रं षोडशरात्रं सत्रमाह।

एता एव स महाव्रताः ॥ १ ॥

एता एवातीतपञ्चदशरात्रगता उभयतोरात्रगुणात्मिकद्विकसहिता द्वादशाहरूपा एव महाव्रतोपेताः षोडशरात्रमहाव्रतमुपान्त्य वेदितव्यं ॥ १ ॥

आसां फलं सप्रशंसनमाह।

एताभिर्वा इन्द्रः परमां विजितिं व्यजयत परमामेवैताभिर्विजितिं विजयन्ते ॥ २ ॥

सर्वलोकजयः परमोजयः विपराभ्याङ्जेरित्यात्मनेपदं ॥ २ ॥

अथ पूर्वोक्तं पञ्चाहं वज्रत्वेन प्रशस्य महाव्रतं षोडशमहर्वज्रस्य धारणस्थानीयत्वेन प्रशंसति ।

पञ्चदशो वै वज्रोन वा अगृह्येतेन वज्रेण वीर्यङ्करोति या षोडश्यारभ्भणमेव तद्गृह्येतेन वज्रेण वीर्यङ्करोति ॥ ३ ॥

पूर्वोक्तः पञ्चदशरात्रः पञ्चदशस्तोमान् संख्यासामान्यात् पञ्चदशस्तोमेन सह प्रजापत्यरसो बाहुभ्यामेत्यस्योत्पत्तेस्तस्य वज्रसम्बन्धात् पञ्चदशोवज्र इत्युच्यते तस्य महाव्रतं षोडशमहरारभ्भणस्थानीयं सुज्ञानमत्वात् तृतीयपञ्चदशरात्रप्रभृति षोडशरात्रपर्यन्तस्य क्लप्तद्वादशरात्रादिकः कल्पः द्रष्टव्यः ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
दशमः खण्डः ।

अथ एकादशः खण्डः ।

अथ प्रजापतेः सप्तदशरात्रं सप्तमाह ।

अतिरात्रो ज्योतिर्गौरायुर्गौरायुः पञ्चाहो द्वादशाहस्य दशाहान्यतिरात्रः ॥ १ ॥

स्पष्टं ॥ १ ॥

आसां फलं सप्ररोचनमाह ।

एताभिर्वै प्रजापतिरनन्ताꣳश्रियमजयदनन्ता वा एता यत् पञ्चाहविधाः ॥ २ ॥

अनन्तां श्रियञ्जयहेतुत्वोपपत्तित्वमर्थं अनन्ता वा एता इत्यादुपन्यासः पञ्चाहविधाः पञ्चाहमष्टगाः तत्संख्याका रात्रय इत्यर्थः अनन्तश्रीकामाश्चात्राप्यधिकारिण इत्यर्थः ॥ २ ॥

अथाद्यं पञ्चाहं प्रशंसति।

यत् पञ्चाहोनन्तादेव प्रजायन्ते ॥ ३ ॥

पञ्चाहानामनन्तत्वादनन्तादेवैश्वर्य्यादयः प्रजायन्तेऽनुष्ठातारो अपि अथ वैताभिर्वेत्यादिकः सर्वोपि पञ्चाहार्थवादपरो द्रष्टव्यः ॥ ३ ॥

अथानन्तरभावि द्वादशाहं प्रशंसति।

अथ यानि द्वादशाहस्य दशाहानि वाचमविच्छिन्नामुपयन्ति प्रजननाय ॥ ४ ॥

गतार्थीयं ॥ ४ ॥

सप्तदशरात्रीः प्रशंसति।

एता वै प्रतिष्ठिताः सप्तदशरात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥ ५ ॥

सप्तदशो वै प्रजापतिरिति श्रुतेः प्रजापतेः प्रतिष्ठितत्वाच्च तत्समानसंख्याका एताः सप्तदशरात्रयोऽपि प्रतिष्ठिता इत्युच्यते एता वा इत्यादेः पञ्चाहस्तुतिपरत्वे प्रतिष्ठाकामा उपयन्तीत्येतदधिकारवाक्यं द्रष्टव्यं सप्तदशरात्रे चत्वार्यभ्रविकान्य-

हानि श्वैतनौधसं ब्रह्मणाम पौष्कलशुध्योषिहानीत्यादिकः कल्पो द्रष्टव्यः ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे वयोविंशाध्यायस्य
एकादशः खण्डः ॥

अथ द्वादशः खण्डः ।

अथ सर्वायुर्लक्षणसाधनं देवानामष्टादशरात्रं सत्रमाह ।

अतिरात्रोभिप्लवः षडहो द्वादशाहस्य दशाहान्यतिरात्रः ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

अस्यामृतत्वसाधनत्वं सप्ररोचनमाह ।

देवा वै मृत्योरबिभयुस्ते प्रजापतिमुपाधावंस्तेभ्य एतेनाष्टादशरात्रेणामृतत्वं प्रायच्छत् ॥ २ ॥

युक्तममृतत्वप्राप्तिरनेन देवानां तेषां मरणाभावात् ॥ २ ॥

कथन्तत् मनुष्याणां फलं स्यादित्याशंक्य तदुचितममृतत्वं दर्शयति ।

एतद्वाव मनुष्यस्यामृतत्वं यत् सर्वमायुरेति वसीयान् भवति ॥ ३ ॥

स्पष्टं ॥ ३ ॥

इदानीममृतत्वकामैरेतदनुष्ठेयमित्याह ।

सवमायुर्य्यन्ति वसीयाꣳसो भवन्ति य एता उपयन्ति ॥

॥ ४ ॥

सुगमं ॥ ४ ॥

अथासां रात्रीणां सर्वायुःसाधनत्वमुपपादयति।

द्विर्वा एता नव नव प्राणा अभिपूर्वमेवैताभिरायुर्द-

धते ॥ ५ ॥

एता अष्टादशरात्रयोहिर्न्नव भवति खलु प्राणाश्च नव शिरो-गताः सप्त द्वावर्व्वाञ्चाविति तथा सति अभिपूर्वमेव प्रथमं नवरा-त्रेण पूर्वं पञ्चाशद्वर्षलक्षणं आयुर्योगञ्च द्वितीयेन चरममायु-रित्यनुक्रमेणैवं ताभीरात्रीभिः सर्वमायुर्द्धारयन्ति अथ यत्राति-रात्रादभिप्लवमुपयन्ति तत्र प्रथमस्याङ्ग एष प्रत्तानुरुप इत्यादि-कः कल्पोद्रष्टव्यः ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य

द्वादशः खण्डः।

अथ त्रयोदशः खण्डः।

अथ पञ्चाधिपत्यसाधनं वायोरेकोनविंशतिरात्रमाह।

एता एव समह्नाव्रताः ॥ १ ॥

एताः पूर्वोक्ताः अष्टादशैवातिरात्रात् पूर्वभाविनैकेन महा-व्रतेनाङ्गा सहैकोनविंशतिरात्रयो भवन्ति ॥ १ ॥

अथासां पशुसाधनत्वं सप्रपञ्चमाह।

एताभिर्वै वायुरारण्यानां पशूनामाधिपत्यमाश्नुतोभयेषां पशूनामाधिपत्यङ्गच्छन्ति य एता उपयन्ति ॥ २ ॥

एताभिरेकोनविंशतिरात्रीभिर्वायुरारण्यानां द्वीपिशूकरश्वापदपक्षिसरीसृपहस्तिपर्कटादीनां सप्तानामारण्यानां पशूनामाधिपत्यमाश्नुत प्राप्नोत् यद्यप्येताभिरुभयविधाः पशव उपलभ्यन्ते तथापि वायोर्गौष्ठेषु गवादिषु नैरपेक्ष्यादारण्येषु विशेषसम्बन्धाद्वायोरारण्यपश्वाधिपत्यमुक्तं उभयेषामित्यादि स्पष्टं तत्रारण्याः दर्शिताः ग्राम्यास्तु गोजाविकपुरुषाश्वगर्दभोष्ट्राः एतेन पश्वर्थिनोधिकारिण इत्युक्तं भवति ॥ २ ॥

प्रकारान्तरेणैतां प्रशंसति।

मृगसत्रं वा एतत् ॥ ३ ॥

मृगार्थं वायुनानुष्ठितं सत्रं मृगसत्रं ॥ ३ ॥

तदेव समर्थयते।

एताभिर्वा आरण्याः पशवो नाकृताः प्रजायन्ते ॥ ४ ॥

एताभिः खलु रात्रीभिर्वायर्थमारण्याः पशवोनाकृताः आ ईषदर्थे कृतमिति भावे निष्ठा नविद्यते ईषदपि कृतं कारणं रक्षणादिप्रयत्नोयेषान्ते यथोक्ताः तादृशाः सन्तः प्रजायन्ते यदेवं व्याख्येयं मृगैर्वासप्रदानादपालनप्रयत्नराहित्येन प्रजननार्थमनुष्ठितं सत्रं अस्ति मृगादीनामपि गवादीनामिवाधिकारः गावो

वा एतत् सत्रमासतेत्यादि श्रुतेः सर्वार्थवादत्वान्न विरुध्यते एताभिर्वा इत्यादि मृगसत्रसमर्थनं ॥ ४ ॥

अस्त्वस्य मृगसत्रत्वं किमतोभिवदतोत्यत आह ।

अनाक्रतमेषां प्रजायते य एता उपयन्ति ॥ ५ ॥

अस्यानुष्ठातॄणां अपि पुत्रपश्वादिकमप्रयत्नेनैवोत्पद्यत इत्यर्थः अग्न्याधेयादशरात्रिप्रभृतीनां साधारण्यः कल्पः, यत्राभिप्लवोरात्रिसत्रेषु श्यैतनौधमब्रह्मसामानः पौष्कलयुध्योग्निहोत्रसंवत्सरमिताभ्यः क्लृप्तमाविंशतिरात्रादिति अयमर्थः अभिप्लवस्य प्रथमोत्पत्तौ प्रत्यहमभीवर्त्तौ ब्रह्मसाम तथा प्रत्यहमुणिक्तु सुज्ञानं रात्रिसत्रेष्वभीवर्त्तस्थाने श्यैतनौधसेन व्यत्यासं कुर्यात् सुज्ञानस्थाने पौष्कलयुध्यौणिहे व्यत्यासङ्कुर्यादिति तथापि रात्रिसत्रेष्वभीवर्त्तस्थाने श्यैतनौधसयोरन्यतरत् साम किमभीवर्त्तस्तोत्रीये स्यात् उत स्वस्तोत्रीया इति सूत्रकारः समाद्य पूर्वोत्तरौ पक्षौ दर्शयति तत्र पूर्वपक्षमाह अभीवर्त्तस्थाने श्यैतनौधसे तास्वेवेति तास्वभीवर्त्तस्तोत्रीयास्वेवेत्यर्थः दृष्टान्तमाह तथोणिहेयासु सुज्ञानमिति यथा सुज्ञानस्य स्थाने विहितपौष्कलयुध्येयासु सुज्ञानं तास्वेव भवतस्तद्वदत्रापि भवत इति सिद्धान्तमाह स्वासु त्वावर्त्तानि सामानि कस्यचित् स्थाने विहितानि स्वास्वेव भवन्तीत्यर्थः दृष्टान्तमाह यथा बृहतो वषट्कारनिधनं स्वकीयास्वेव भवति बृहद्रथन्तरञ्च तत् पृथ्यः षडहः इति अयमर्थः इषुर्वामकाक्षः कल्पकारेण श्येनमधर्म्यः क्लृप्तः तत्र श्यैनिकस्य बृहतः स्थाने वषट्कारनिधनं स्वकीयास्वेव भवति तथा बृहद्रथन्तरे पृथ्यः षडह इत्युक्तं वैरूप-

वैराजादिस्थानेष्वेव बृहद्रथन्तरे भवतः तद्वदत्रापीति श्यैत-नौधमे यदि परकीयासु स्तोत्रीयासु स्यातां तदा विशेषतस्ता निर्दिशेदेव यथा नौधसस्यर्क्षु जनित्रं ब्रह्मसामेत्यादि निर्दिशित स्तस्मात् स्वास्वेवेति सिद्धान्तः ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य त्रयोदशः खण्डः।

अथ चतुर्दशः खण्डः ॥

अथ पुरुषफलसाधनं विंशतिरात्रं सत्रमाह।

अतिरात्रोभिप्लवः षडहोभिजिच्च विस्वजिच्च द्वे अहनी द्वादशाच्चस्य दशाच्चान्यतिरात्रः ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

अथासां पुरुषफलसाधनत्वं सप्ररोचनमाह।

पुरुषकामा उपेयुरेताभिर्वै प्रजापतिः पुरुषमसृजत ॥२॥

स्पष्टं ॥ २ ॥

अथ पुरुषस्य फले तत् साध्यन्तस्यार्थवादमाह।

स सर्वस्यान्नाद्यस्याधिपत्यमगच्छत् सर्वस्यान्नाद्यस्याधिपत्यं गच्छन्ति य एता उपयन्ति ॥ ३ ॥

सुगमं ॥ ३ ॥

अथैतत् सत्रं रात्रिसंख्याद्वारा प्रशंसति।

पुरुषमत्रं वा एतत् ॥ ४ ॥

स्पष्टोऽर्थः ॥ ४ ॥

तत् कथमिति तदुपपादयति ॥

विंशतिर्वै पुरुषे दश हि हस्त्या अङ्गुल्यो दश पाद्याः ॥ ५ ॥

स्पष्टं ॥ ५ ॥

अस्त्वेवं एतावता प्रकृते किमित्यतआह ।

यदेता विंशती रात्रयो भवन्त्येष्वेवैताभिर्लोकेषु पुरुषं प्रतिष्ठापयन्ति ॥ ६ ॥

पुरुषांगुलिसंख्यासाम्यादिंशतिरात्रात्मकं सत्रमुपयन्ति ते पुरुषमेष्वेव लोकेषु प्रतिष्ठापयन्ति ते लोकेषु प्रतितिष्ठन्तीत्यर्थः ॥ ६ ॥

पुनरेताः रात्रीः प्रशंसति ।

एतावै प्रतिष्ठिता विंशतीरात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥ ७ ॥

रात्रीणां पुरुषांगुलिसंख्यासाम्यात्तस्य प्रतिष्ठितत्वादासामपि प्रतिष्ठितत्वं अथात्र विंशतिरात्रे सांवत्सरिकौ विश्वजिदभिजितावित्यादिकः कल्पोद्रष्टव्यः ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः।

अथ ह्यो एकविंशतिरात्रौ तत्र पशुफलसाधनं प्रथमं एकविंशतिरात्रमाह।

अतिरात्रोभिप्लवः षडहोतिरात्रोभिप्लवः षडहोभिप्लवः षडहोतिरात्रः पशुकामा उपेयुः॥ १॥

स्पष्टं॥ १॥

पशुफलं सार्थवादं दर्शयति।

एताभिर्वा आदित्याः सप्त ग्राम्यान् पशूनुदसृजन्त पशूनवैताभिरुत्सृजन्ति॥ २॥

उत्सृजन्ति उत्पादयन्ति लभन्त इत्यर्थः पशवोगोजाश्वादयः एकविंशतिरात्रीणां पशुसाधनत्वमुक्तं॥ २॥

एकविंशतेः सप्तसंख्यायाश्च कथं वैषम्यं स्यादिति तत् समर्थयते।

त्रिर्वै सप्त सप्तादित्याः॥ ३॥

यद्यप्येता एकविंशतिस्तथापि विभागस्त्रिसप्त भवन्ति वस्तुतोऽतिरात्रः षडहश्चेति सप्तैव आदित्याश्च सप्त आरोगभ्राजादयः देवा आदित्याः सप्तेति सप्तवर्णाऽत्र तूभयसंख्यासाम्यं॥ ३॥

रात्रीणामादित्यसमसंख्यात्वेन कथं पशुफलकत्वमिति तदुपपादयति।

पशव आदित्याः ॥ ४ ॥

आदित्यानां पशूनाञ्च सृष्टिविभागसम्बन्धः सच प्रदर्शित एव यद्वा संख्यासाम्यसम्बन्धः ॥ ४ ॥

न केवलं रात्रीणामादित्यसंख्यासाम्यात् पशुफलसाधनत्वं किन्तु लोकद्वयसमृद्धिहेतुरिति भवतीति वक्तुमाह।

आदित्या अस्मिल्लोकऋद्धा आदित्या अमुष्मिन् ॥५॥

स्पष्टं ॥ ५ ॥

कथं लोकद्वयेषु तेषां समृद्धित्वमिति तदुपपादयति।

पशवोस्मिन् ऋतवोमुष्मिन् ॥ ६ ॥

पशव आदित्या इत्युक्तत्वात् पशूनामस्मिल्लोके समृद्धिः आदित्या अप्यत्र समृद्धा एव तथा अमुष्मिन् द्युलोके ऋतवः समृद्धाः सन्तादित्या नित्य इत्यमुष्मिन् द्युलोकेऽदित्याः समृद्धाः ॥ ६ ॥

इदानीमादित्यसंख्याकैकविंशतिरात्रीरुपेयुषामपि लोकद्वयसमृद्धिर्भवतीत्याह।

उभयोरनयोर्लोकयोर्ऋध्नुवन्ति देवलोके च मनुष्यलोके च य एता उपयन्ति ॥ ७॥

अथास्य कल्पः पूर्वस्यैकविंशतिरात्रस्य षोडशिकावतिरात्रावभितः षोडशिमान्मध्ये सर्ववा षोडशिकाः तेच सर्वे तेचाषोडशिमन्तइति अत्रैकविंशतिरात्रे त्रयोभिप्लवाः षडहास्तत्र तृतीयः

प्रतिलोमानुलोमा वेति संशये मतद्वयं दर्शयति सूत्रकारः तथा-हि पूर्वस्मिन्नेकविंशतिरात्रे अभिप्लवं तृतीयमनुलोमं व्याहृत्तिरिति कुतइत्यादि नव्याहृत्तिं विज्ञायत इति आवृतस्तृतीयोभिप्लवः कुत इति नास्ति वचन इत्यर्थः प्रतिलोमं शारिङ्ग्योहावभिप्लवावित्येक-वचनादिति द्वितीयतृतीययोरभिप्लवयोर्व्यवधानाभावात् हावभि-प्लवावित्येकशेषं कृत्वा वक्तव्यं न च तथाकृतं ब्राह्मणे किंत्वभि-प्लवोभिप्लवइति पृथगेव निर्दिष्टाः तेन नूनं पृथगधर्म्माः तृतीयः प्रतिलोमः यथा प्रथमे चतुर्दशरात्रे द्वयोः पृष्ठ्ययोः सह वक्तव्यात् प्रातिलोम्यादेव पृथङ्निर्दिशः तद्यथा पृष्ठ्यः षडहस्त्रयस्त्रिंशा-रंभण इति तद्वदत्रापीति युक्तं ॥ ७ ॥

इति षाण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
पञ्चदशः खण्डः ॥

अथ षोड़शः खण्डः।

अथ द्वितीयमेकविंशतिरात्रं ब्रह्मवर्चसफलसाधनमाह।

अतिरात्रः पृष्ठ्यः षड़हस्त्रयः स्वरसामानो दिवाकीर्त्य-महस्त्रयः स्वरसामानः पष्ठ्यः षड़हस्त्रयस्त्रिꣳशारम्भणो-तिरात्रो ब्रह्मवर्चसकामाउपेयुः ॥ १ ॥

ब्रह्मवर्चसन्नाम तेजोविशेषः सच तमोहननमन्तरेण नोदेति ॥१॥

अतस्तद्रूपं फलं सार्थवादमस्य दर्शयितुमाह।

स्वर्भानुर्वा आसुरः सूर्य्यं तमसाविध्यत्तस्मै देवाः प्राय-श्चित्तिमैक्षꣳस्तृणताअविन्दꣳस्ताभिरस्मात्तमोपाघ्नन् ॥ २ ॥

पूर्वमासुरः असुरसम्बधी स्वर्भानुर्नामकः मूर्ध्यन्तमसा मायया अविध्यत् आवृतवान् यद्वा आसुरः असुरः स्वार्थिकस्तद्धितः तथा च मन्त्रसाधनवर्णः तस्मै तमोविद्धाय सूर्य्याय देवाः प्रायश्चित्तिमन्तमोहननसाधनमैच्छत् विचारितवन्तः ते तदा एता एक विंशतिरात्रीः साधनत्वेनाविदन् लब्धवन्तः ताभिरनुष्ठिताभिरस्मात् मूर्ध्यात्तमोपाघ्नन् ॥ २ ॥

तदनुष्ठातॄणामप्येतत् फलं भवतीति दर्शयति ।

अपतमोघ्नते य एता उपयन्ति ॥ ३ ॥

प्रतिबन्धकपापरूपतमोपहत्य ब्रह्मवर्चसमन्तेजोऽनभन्त इत्यर्थः अत्र राजने रुद्रदेवस्य एतासां रात्रीणामनुष्ठानेन किंलाभो भवतीति वक्तुप्राणत्वात्तत्परिहाराय केचित् प्रयोगविशेषाः कर्त्तव्याः ॥ ३ ॥

तत्र किञ्चित् पशुविशेषमालभ्यं दर्शयति ।

सोमपीथं पशुमुपालंभ्यमालभेरन् ॥ ४ ॥

सोमपूषणौ ताभ्यां देवता अस्य स पशुः सोमपीथः स चोपालंभ्यः सवनीयपशोः पश्चादालभनीयः तं पशुमालभेरन् ॥ ४ ॥

अथ पशोरुक्तदेवतात्वं प्रशंसति ।

सोमोवै ब्राह्मणः पशवः पूषा स्वामेव तद्देवतां पशुभिर्व्वीर्य्यंहयन्ते त्वचमेवाक्रत ॥ ५ ॥

सोमोस्माकं ब्राह्मणानां राजा इति श्रुतेः ब्राह्मणस्वामित्वात्

स्वयमपि च ब्राह्मणएव वैराजरथन्तरप्रसिद्धिद्योतनार्थः तन्त्रे णोक्तदेवतापशुकरणेन तस्यामेव देवतां सोममेव पशुभिर्वर्द्धयन्ते बहुकुर्व्वन्ति यद्वा वर्हेति वर्द्धनार्थः किञ्च त्वचमेव सन्तत्तिं रज्जामेव दीर्घे त्वग्यातुं वा कृतवन्तो भवन्ति तथा च सोमपौष्णं पशुं प्रकृत्य श्रुत्यन्तरं सोमोवै देवता पुरुषः पौष्णाः पशवः स्वयैवात्मानं देवतया पशुभिस्त्वचं करोति न दुःखमाभजतीति ॥ ५ ॥

अत्र सामिधेनीषु विशेषमाह।

मनो ऋचः सामिधेन्यो भवन्ति ॥ ६ ॥

स्पष्टं। ६।

मनुसम्बन्धं प्रशंसति।

मनुर्वै यत् किञ्चावदत्तद्भेषजम्भेषजतायै ॥ ७ ॥

रागद्वेषादिशोकापनोदकस्य मनोः परानुग्रहार्थं स यत् किञ्चापि धर्म्मविषयं वाक्यमवदत् तद्भेषजं हितं अथ यस्तदीयधर्म्मः सामिधेनीकरणं भेषजतायै सकलदोषस्यौषधाय भवति ॥ ७ ॥

अस्य सत्रस्य कालविशेषमाह।

नैदाघीय उपेयुः ॥ ८ ॥

नैदाघीये निदाघसम्बन्धिनि काले ग्रीष्मर्त्तावित्यर्थः ॥ ८ ॥

तं कालं प्रशंसति।

तद्वेष प्रतितेजिष्ठन्तपति ॥ ९ ॥

तत्र तस्मिन् निदाघे एषः सूर्य्यः तेजिष्ठं अत्यन्ततेजोयुक्तं खलु तपति इति ॥ ९ ॥

अस्त्वेवं ततः सत्रिणां किं स्यादित्यत आह।

किलासत्वात्तु भयमतिच्छेभ्योपहन्ति ॥ १० ॥

सुविशेषोवास्त एते तत् सत्रेण किलासः सिद्धाः किलासत्वात् दुश्चर्म्मावयवस्याधिसम्भवात् भयत्र भवति अतो यौक्षेनुष्ठानाविष्टपन्नादित्य एभ्यः सत्रिभ्यः सकाशादति अत्यधिकां अपहतिं खलु भयं अतो अयं कालोचित इत्यर्थः ॥ १० ॥

कथमस्य किलाससाधनत्वमिति तत् समर्थयते।

एतावाउग्रदेवो राजन्निरुपैत् सकिलासोभवत् ॥ ११ ॥

एता रात्रेः खलु राजनिः रजनस्यापत्यमुग्रव उपैति उपेत्य सोग्रदेवाः किलासः किलासवानभवत् ॥ ११ ॥

अथोक्तार्थज्ञानपुरःसरमेव सत्रानुष्ठानं प्रशंसति।

अकिलासो भवति य एवं विद्वानेता उपैति ॥ १२ ॥

उग्रदेवस्यैकस्यैव प्रयोगग्रामविहानुवोत्थैककर्तृकत्वविधानं तेनास्मिन् सत्रे एकोप्यधिकरोतीति वेदितव्यं यद्वा उपेतीति उभयत्र बहुवचनं कर्त्तव्यं अत्र कल्पः उत्तरस्यैकविंशतिरात्रस्य संवत्सरक्लृप्तान्यहान्यनु क्लृप्ताभोवर्त्तकाले यः पृष्ठ्यः श्वेतनौधसब्रह्मसामानः पौष्कलसुध्यौषिणहोविषुवतः तस्य सामतश्चस्य लोक आभोग्रव आयन्त इव सूर्य्यमिति विकर्ण समानमितरमिति तथा यस्मादतिरात्रात् पृष्ठ्यमुपयन्ति प्रथमस्याङ्गस्य प्रत्नानुरूप इति साधारणः कल्पः ॥ १२ ॥

इति ताण्ड्यमहाब्राह्मणे चयोविंशाध्यायस्य
षोडशः खण्डः।

अथ सप्तदशः खण्डः।

अथान्नाद्यफलसाधनं द्वाविंशतिरात्रं सत्रमाह।

अतिरात्रो ज्योतिर्गौरायुष्ट्वहोभिप्लवः षडहो द्वादशाहस्य दशाहानि महाव्रतञ्चातिरात्रश्चान्नाद्यकामा उपेयुः॥ १॥

स्पष्टं। १।

आसां रात्रीणां उक्तफलसाधनत्वं प्रदर्शयन् प्रशंसति

पञ्चर्त्तवो द्वादशमासास्त्रयइमे लोका असावादित्य एकविंशोऽन्नं द्वाविंशमेभ्यो लोकेभ्यः संवत्सरादमुष्मादादित्यादन्नाद्यमवरुन्धते य एता उपयन्ति॥ २॥

ऋतव आदित्यपर्यन्तादेवाः अन्नहेतवः स्वस्थानीया एकविंशतीरात्रयः द्वाविंशमहः तत् मध्यन्यत्रं अन्नत एताभिरत्रावरोधोयुक्तः अत्र यत्रातिरात्रादभिप्लवमुपयन्ति प्रथमस्याङ्ग एष प्रजापुरुषो यत्र वा विकद्रुकेभ्यो यत्राभिप्लवोरात्रिसत्रेषु श्वेतनौधसब्रह्मसामानः पोष्कलशुध्योर्णिहोन्यत्र संवत्सरसंमितादिति सामान्यकल्पोद्रष्टव्यः॥ २॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
सप्तदशः खण्डः।

अथ अष्टादशः खण्डः।

अथ प्रतिष्ठासाधनं त्रयोविंशतिरात्रम् मन्त्रमाह।

अतिरात्रो ज्योतिर्गौरायुर्गौरायुः पञ्चाहोभिप्लवः षडहोद्वादशाहस्य दशाहान्तिरात्रः प्रतिष्ठाकामाउपेयुः॥ १॥

स्पष्टं॥ १॥

प्रतिष्ठासाधनत्वं सप्ररोचनमाह।

एताभिर्वै प्रजापतिरेषु लोकेषु प्रत्यतिष्ठत्॥ २॥

एषु भूरादिलोकेषु॥ २॥

पुनस्त्रित्वद्वारैतारात्रीः प्रतिष्ठाफलस्योचिता इति प्रशंसति।

यदेतास्त्रयोविंशतीरात्रयो भवन्ति त्रय इमे लोका एष्वेवैताभिर्लोकेषु प्रतितिष्ठन्ति॥ ३॥

स्पष्टं॥ ३॥

रात्रीणां प्रतिष्ठितत्वादपि सत्रिणामपि प्रतिष्ठाफलं भवतीत्याह।

एता वै प्रतिष्ठितास्त्रयोविंशतीरात्रयः प्रतितिष्ठन्ति य एता उपयन्ति॥ ४॥

प्रजापतेः प्रतिष्ठामाधनत्वाद्वा प्रतिष्ठितलोकत्रयसममंख्याकरात्रीणामाधिक्याद्वा एता अपि प्रतिष्ठिता इत्युच्यन्ते ॥४॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
अष्टादशः खण्डः।

अथ ऊनविंशः खण्डः।

द्वौ चतुर्विंशतिरात्रौ तत्र स्वर्गोत्पत्तिसाधनं प्रथमं चतुर्विंशतिरात्रं सत्रमाह।

अतिरात्रः पृष्ठ्यः स्तोमः षड़हस्त्रयस्त्रिंशमहरनिरुक्तमुपहव्यस्य तन्त्वे क्लृप्तस्य कर्णरथन्तरमाध्यन्दिनेऽथ त्रयस्त्रिंशं निरुक्तं त्रिणवन्द्वे एकविंशे त्रिणवन्त्रयस्त्रिंशमहरनिरुक्तं त्रयस्त्रिंशमहरनिरुक्तं पृष्ठ्यः स्तोमः षड़हः प्रत्यङ्त्रिवृदहरनिरुक्तं ज्योतिष्टोमोग्निष्टोमोतिरात्रः ॥ १ ॥

पृष्ठ्यः स्तोमः षडहइति वैरूपादिपृष्ठचतुष्टयरहितोरथन्तरबृहद्वामेव निर्वर्त्यः रथन्तरपृष्ठान्यनुजानि बृहत्पृष्ठानीतराणीति व्यवस्था सच द्वितीयः प्रत्यङ्डिति त्रयस्त्रिंशारम्भण इत्यर्थः प्रथमं त्रयस्त्रिंशमहरनिरुक्तं तदोपहव्यस्य तन्त्वे क्लृप्तं उपहव्योनामैकाहतन्त्वेणैव तदतिक्लृप्तं इत्यांस्ततो विशेषः माध्यन्दिनसवने पवमाने कर्णरथन्तरं पुनानस्सोमधारयेत्येतासु कर्त्तव्यं शिष्टं स्पष्टं ॥ १ ॥

अस्य स्वर्गोत्पत्तिसाधनत्वं सप्ररोचनमाह।

एताभिर्वै देवाः स्वर्गं लोकं समसोदन् स्वर्गं लोकं सीदामेत्येताः ॥ २ ॥

पूर्वमेताभीरात्रिभिः स्वर्गं लोकं सोदामेत्यभिसन्धायेता रात्रीरनुष्ठाय देवसंलक्षणे स्वर्गं समसोदन् अत एताः स्वर्ग्याइति शेषः तथा च तैत्तिरीयकं यथा वै मनुष्या एवं देवा अथ आसन् ते कामयन्त्यवर्त्तिपाप्मानं मृत्युमुपहत्य देवै समसोदवाच्छामेति त एतं चतुर्विंशतिरात्रमपश्यन्नित्यर्थः ॥ २ ॥

अथासां स्वर्गत्वं साधयति ।

एता वाव ब्रध्नस्य विष्टपोयदेते त्रयस्त्रिंशा मध्यतः सन्धीयन्ते तेन ब्रध्नस्य विष्टपमेवारोहन्ति ॥ ३ ॥

एता वाव एता एव चतुर्विंशतीरात्रयोब्रध्नस्यादित्यस्य विष्टपोद्युलोक इत्यर्थः असौ वा आदित्योब्रध्नइति हि श्रुत्यन्तरं एवं सति ब्रध्नस्य विष्टपस्थानीयासु रात्रिषु यद्यपि एते त्रयस्त्रिंशा-स्त्रयस्त्रिंशस्तोमकान्यहानि मध्यतः सन्धीयन्ते सम्यक् प्रयुज्यन्ते तेन साधनेन ब्रध्नस्य विष्टपमेव रोहन्ति सचिवः ॥ ३ ॥

अथासामध्ये यत् पृष्ठ्यः स्तोमः षड्हदयन्तत् प्रशंसति ।

मध्यतः पृष्ठान्युपयन्त्यन्नं वै पृष्ठान्यन्नमेव तन्मध्यतोधीयते तस्मान्मध्ये सदन्नम्भिनोति ॥ ४ ॥

अन्नसाधनत्वात् षट्सामात्मकान् संख्यामाम्नात पृष्ठानां साम्ये न स्तुतिः ॥ ४ ॥

अथातिरात्रमग्निष्टोममुक्ता शिष्टा एकविंशतिरात्रीः सप्तधा विभज्य प्रशंसति।

सप्ताक्षरा वा एते ॥ ५ ॥

स्पष्टं ॥ ५ ॥

ततः किमित्यत आह।

अतो वै प्रजाः प्रजायन्ते ॥ ६ ॥

अतः सप्ताक्षरसंकाशात् ॥ ६ ॥

ततश्च किमित्यत आह।

प्रप्रजया प्रपशुभिर्जायन्ते य एता उपयन्ति ॥ ७ ॥

स्पष्टं ॥ ७ ॥

अथ पुनः सप्ताक्षररूपत्वमेव छन्दोमस्थानीयत्वेन प्रशंसति।

अपशव्यं वा एतत् सत्रं यदच्छन्दोमं यत्सप्ताक्षरास्तेन छन्दोमवत्यस्तेन पशव्याः ॥ ८ ॥

पशवश्छन्दोमाइति श्रुतेस्तद्राहित्यादेतत्सत्रमपशव्यङ्कलु तथा सति यत्सप्ताक्षराभवन्ति तेन छन्दोमवत्यः अतः पशव्याः मुख्यसप्तछन्दःसंख्यासाम्यात् छन्दोमत्वस्तुतिः ॥ ८ ॥

अत्र त्रयस्त्रिंशदित्योश्च यदक्षरत्तरा व्यवहितमस्ति तत् प्रशंसति।

त्रयस्त्रिꣳशस्त्रयस्त्रिꣳशमन्वेति त्रिवृत्त्रिवृतमन्वेति

रोहन्ति यत्त्रयस्त्रिꣳशत्त्रयस्त्रिꣳशमन्वेति प्राणान् प्राणेषु प्रतितिष्ठन्ति ॥ ९ ॥

त्रयस्त्रिंशस्य त्रिवृदादिषट्कावामग्रत्वात्तयोरानन्त्यात्मकलस्य स्वर्गादेरग्ररोहणं युक्तं त्रिवृच्छस्तोमस्तोत्रीयानवकात्मकत्वात् प्राणानां च नवकात्मकत्वात् प्राणेषु प्रतितिष्ठन्ति प्राणेषु प्रतिष्ठा नाम चिरकालजीवनं त्रयस्त्रिंशयोरनुगतिः स्पष्टा ॥ ९ ॥

यत्त्रिवृत्त्रिवृतं ॥१० ॥

त्रिवृतो द्वितीयस्य पृष्ठ्यस्तोमषडहस्य प्रत्यक्त्वादन्तिमं त्रिवृदहर्भवति तत उत्तरमेकं त्रिवृदनिरुक्तमहः स्तुत एवमतस्तयोरनुगतिः ॥ १० ॥

अथान्तिममग्निष्टोममहस्तदितरसम्पत्त्यर्थमिति प्रगंगति ।

विलोमानो वा एतारात्रयो यत्ज्योतिरग्निष्टोम उत्थानीयमहर्भवत्यक्लृप्तस्य क्लृप्त्यै ॥ ११ ॥

त्रयस्त्रिंशानन्तरं त्रिणवमहस्ततः पञ्चादेकविंशे द्वे इत्यादिव्युत्क्रमादेता रात्रयोविलोमानः अस्य स्तोत्रिङ्ग्येवं रूपं तासां यद्यदि ज्योतिष्टोमोग्निष्टोम उत्थानीयः सक्रोत्थानसम्बन्धाहर्भवति तदक्लृप्तस्य अनिर्दिष्टस्य प्रजापश्वादिव्यतिरिक्तस्य फलस्य क्लृप्त्यै पम्पद्यते ज्योतिष्टोमस्याङ्गः एष प्रजानरूपो गौरोवितमनुष्टुभ्यन्वहमविक्लृप्तस्य सर्वसाधनत्वादिति भावः अथ काल्यः, अत्र संसदामतिरात्रः पृष्ठ्यः स्तोमः षडहः प्रथमक्लृप्तं चतुर्थमहः

पञ्चमस्याङ्ग आकूपारस्य लोके त्वाष्ट्री साम यद्यनुतोदमित्यादिकल्पो द्रष्टव्यः ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
एकोनविंशः खण्डः ।

अथ विंशः खण्डः ।

अथ द्वितीयं चतुर्विंशतिरात्रं प्रजापशोरन्यतरकामानां मत्रमाह ।

अतिरात्रोद्वावभिप्लवौ षड्हौ द्वादशाहस्य दशाहान्यतिरात्रः प्रजाकामा वा पशुकामावोपेयुः ॥ १

स्पष्टं । १ ।

आद्यं षडहद्वयं प्रशंसति ॥

क्लृप्तादै योनेः प्रजाः पशवः प्रजायन्ते यत् क्लृप्तौ षडहावुपयन्ति क्लृप्तादेव योनेः प्रजया पशुभिः प्रजायन्ते ॥ २ ॥

लोके खलु क्लृप्तादेवोत्पादनयोग्यादेव प्रच्छाद्यो न प्रजाः पशवश्चोत्पद्यन्ते अस्तु तथा लोके किन्तत आह यद्यदि क्लृप्तौ गवामयने सिद्धौ षडहावुपयन्ति सचिवः; तर्हि क्लृप्तादेव योनेः स्वयमपि प्रजाः पशुभिश्च प्रजायन्ते समृद्धाभवन्ति ॥ २ ॥

अथ दशाहं प्रशंसति ।

अथ यानि द्वादशाहस्य दशाहानि वाचमविच्छिन्नामुपयन्ति प्रजननाय ॥ ३ ॥

गतार्थमिदं ॥ ३ ॥

अथ सर्वा रात्रीः प्रशंसति।

एतावै प्रतिष्ठिताश्चतुर्विꣳशतीरात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥ ४ ॥

प्रतिष्ठितस्य संवत्सरस्यावयवभूतानामर्द्धमासानां समानसंख्योपेतत्वादासामपि प्रतिष्ठितत्वमिति ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य
तृतीयः खण्डः।

अथ एकविंशः खण्डः।

अथान्नाद्यफलसाधनं प्रजापतेः पञ्चविंशतिरात्रं सत्रमाह।

एता एव स महाव्रताः ॥ १ ॥

एता एव द्वितीयचतुर्विंशतिरात्रोक्ता एव ॥ १ ॥

आसामन्नाद्यफलाय सम्प्रयोजनमाह।

एताभिर्वै प्रजापतिः सर्वमन्नाद्यमवारुन्ध ॥ २ ॥

अत इदानीं अन्नाद्यमवरुन्धते इति ॥ २ ॥

अथादिष्टमहाव्रतमिलित्वान्नाद्यफलसाधनमिति प्रशंसति।

चतुर्विꣳशतिः संवत्सरस्यार्द्धमासाः संवत्सरः पञ्चविंशोऽन्नं व्रतं संवत्सरादेताभिरन्नाद्यमवरुन्धते य एता उपयन्ति ॥ ३ ॥

संवत्सरावयवभूताश्चतुर्विंशतिरर्धमासस्थानीयाश्चतुर्विंशतिरात्रयः पञ्चविंशोऽवयवी संवत्सरः तत्स्थानीयं महाव्रतमन्नं एवं सत्येताभिः सप्तिभिः संवत्सरादेवान्नाद्यमवरुन्धते संवत्सरे क्रतूस्नान्निष्पत्तेः के अवरुन्धत इति चेत् य एता उपयन्ति ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
एकविंशः खण्डः ।

अथ द्वाविंशः खण्डः ।

अथ षड्विंशतीरात्रं प्रतिष्ठासाधनं सत्रमाह ।

अतिरात्रो गौश्चायुश्च द्वे अह्नी द्वावभिप्लवौ षडहौ द्वादशाहस्य दशाहान्यतिरात्रः ॥ १ ॥

स्पष्टं ॥ १ ॥

आसां प्रतिष्ठासाधनत्वं सप्ररोचनमाह ।

ऋतवोनप्रत्यतिष्ठꣳस्त एताभिः प्रत्यतिष्ठन् प्रतिष्ठाका माउपेयुः प्रत्येव तिष्ठन्ति ॥ २ ॥

स्पष्टं । २ ।

प्रतिष्ठामेव प्रयोक्तृगतसंख्यया प्रशंसति ।

षडवा ऋतव ऋतुष्वेवैताभिः प्रतितिष्ठन्ति ॥ ३ ॥

दृश्यं । ३ ।

आद्यौ द्वे अहनो प्रशंसति।

यद्गौश्चायुश्च द्वे अहनो भवतो मिथुनौ स्तोमावुपयन्ति प्रजात्यै॥ ४॥

गौः स्त्री आयुः पुरुष इति मिथुनौ परस्परं प्रजात्यै प्रजननाय॥ ४॥

अथ षडहौ प्रशंसति।

यत्क्लृप्तौ षड्हावुपयन्ति क्लृप्त्या एव॥ ५॥

विप्रकीर्णत्वाभावेन गवामयनं एतत् क्लृप्तौ प्रजादिक्लृप्तौ सम्पद्यते॥ ५॥

अथ दशाहं प्रशंसति।

अथ यानि द्वादशाहस्य दशाहानि वाचमविच्छिन्नामुपयन्ति प्रजननाय॥ ६॥

स्पष्टं। ६।

अथ सर्वामिलित्वा प्रशंसति।

एता वै प्रतिष्ठिता षड्विंशतीरात्रयः प्रतितिष्ठन्ति य एता उपयन्ति॥ ७॥

ऋतूनां प्रतिष्ठासाधनत्वात्तेषां च संवत्सरात्मकत्वेन प्रतिष्ठितत्वादासामपि प्रतिष्ठितत्वं॥ ७॥

इति ताण्ड्यमहाब्राह्मणं चयोविंशाध्यायस्य

द्वाविंशः खण्डः।

अथ त्रयोविंशः खण्डः।

अथ सिद्धसाधनत्वेनाग्नां सप्तविंशतिरात्रमाह।

अतिरात्रो ज्योतिर्गौरायुस्त्र्यहो द्वावभिप्लवौ षड्हौ द्वादशाहस्य दशाहान्यतिरात्र ऋद्धिकामा उपेयुः॥ १॥

गतार्थमेतत्॥ १॥

ऋद्धिफलं प्रयोगद्वारोपपादयति।

एताभिर्वै नक्षत्राणि सर्वामृद्धिमार्ध्नुवन् सर्वामृद्धिमृध्नुवन्ति य एता उपयन्ति॥ २॥

अत एता उपेयुः समृद्धाभवन्ति॥ २॥

प्रयोक्तृसंख्यासाम्यादप्येताः प्रशस्ता इत्याह।

यदेताः सप्तविंशतीरात्रयोभवन्ति सप्तविंशतिर्नक्षत्राणि नक्षत्रसम्मिता वा एता रात्रयो नक्षत्राणामेवर्द्धिमृध्नुवन्ति॥ ३॥

स्पष्टं॥ ३॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
त्रयोविंशः खण्डः।

अथ चतुर्विंशः खण्डः।

अथ पशुफलसाधनमष्टाविंशतिरात्रं सत्रमाह।

एता एव स महाव्रताः पशुकामा उपेयुर्यदेता अष्टा-

त्रिंशतीरात्रयो भवन्त्यष्टाशफाः पशवः शफशएवैताभिः पशूनवरुन्धते ॥ १ ॥

सुगमं ॥ १ ॥

इति ताण्ड्यमहाब्राह्मणे वयोविंशाध्यायस्य चतुर्विंशः खण्डः ॥

अथ पञ्चविंशः खण्डः।

अथानन्तकश्रीफलसाधकं प्रजापतेरेकोनत्रिंशद्रात्रं मन्त्रमाह।

अतिरात्रो ज्योतिर्गौरायुर्गौरायुः पञ्चाह्नोद्वावभिप्लवौ षड्ह्नौ द्वादशाहस्य दशाह्नान्यतिरात्रः ॥ १ ॥

स्पष्टं ॥ १ ॥

आसां श्रीफलं सप्ररोचनमाह।

एताभिर्वै प्रजापतिरनन्ताꣳश्रियमजयत् ॥ २ ॥

स्पष्टं ॥ २ ॥

कथमनन्तश्रीफलसाधकत्वं अस्येति तदुपपादयति।

अनन्ता वा एता या एकयानत्रिꣳशन्नेति वै वाचोनन्त ॥ ३ ॥

एता रात्रयोऽनन्ता वज्रः खलु यद्वा अनन्ताः पञ्चाहषडहाद्याः

अनन्तसङ्ख्यात्मकासु तथा ततः कीर्तिश्चयइति तच्चोच्यते यदा नैकयानेति न अयत तदेव वाचोऽनल्पं तदभाव आनन्त्यं वा प्रतीतिः ॥ ३ ॥

अस्त्वेवं सत्रिणां किमायातमिति तदुच्यते।

यदेता एकयानत्रिंशद्रात्रयोभवन्त्यनन्तामेवैताभिः श्रियं जयन्ति ॥ ४ ॥

स्पष्टं ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य पञ्चविंशः खण्डः।

अथ षड्विंशः खण्डः।

अथात्रान्नाद्यफलसाधनं त्रिंशद्रात्रं सत्रमाह।

अतिरात्रस्त्रयोभिश्ववाः षडहाद्दशाहस्य दशाहान्य तिरात्रोन्नाद्यकामाउपेयुः ॥ १ ॥

स्पष्टं ॥ १ ॥

अथैता अन्नाद्यसाधनाइति स्तौति।

परोक्षमन्यानि सत्राणि विराजं सम्पद्यन्ते प्रत्यक्षमेता-विराजःसम्पन्नाः ॥ २ ॥

अन्यानि सत्राणि स्तोमपरिगणनादिना विराजं संपद्यन्ते एतत् सत्रगतासु रात्रयः प्रत्यक्षं विराजं त्रिंशत्संख्योपेतत्वात् त्रिंशदक्षरा विराडिति श्रुतेः ॥ २ ॥

अस्त्वेवं किं ततः सन्निष्णामित्यत आह।

प्रत्यक्षमेताभिरन्नाद्यमवरुन्धते य एताउपयन्ति ॥३॥

अन्नं विराडिति श्रुतेरेताभिरन्नावरोधइति ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य
षड्विंशः खण्डः।

अथ सप्तविंशः खण्डः।

अथान्नाद्यसाधनं प्रजापतेरेकविंशद्रात्रंसत्रमाह।

एता एव समहाव्रता एताभिर्वै प्रजापतिरभिपूर्वमन्नाद्यमवारुन्ध ॥ १ ॥

अभिपूर्वमनुक्रमेणैव ॥ १ ॥

कथमाभिरन्नाद्यस्याभिपूर्व्वमिति तदुपपादयति।

अन्नं विराडन्नं व्रतं ॥ २ ॥

पूर्वोक्तं त्रिंशद्रात्राख्यमेवमत्रस्य महाव्रतस्थानसाधनत्वं अमुक्तदुक्तं अत उभयोरप्यत्रात्मकत्वादुभयानुष्ठानक्रमेणान्नलाभः ॥ २ ॥

अथान्येषामपि एतदनुष्ठायिनामेतत् फलं भवतीत्याह।

अभिपूर्व्वमेवैताभिरन्नाद्यमवरुन्धते ॥ ३ ॥

स्पष्टं ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे त्रयोविंशाध्यायस्य
सप्तविंशः खण्डः।

अथ अष्टाविंशः खण्डः।

अथ पशुफलसाधनं द्वाविंशद्रात्रं सत्रमाह।

अतिरात्रोगौश्चायुश्च वे अहनी त्रयोभिन्नवाः षडहा द्वादशाहस्य दशाहान्यतिरात्रः पशुकामाउपेयुः ॥ १ ॥

स्पष्टं ॥ १ ॥

अथास्य पशुसाधनत्वं वक्तुमन्तरतसंख्यामनुष्टुप्संपादनेन प्रशंसति।

अनुष्टुब्वा एतारातयः ॥ २ ॥

स्पष्टं ॥ २ ॥

कथमिति तदुपपादयति।

द्वात्रिंशदक्षरानुष्टुप् ॥ ३ ॥

स्पष्टं ॥ ३ ॥

अतः किमित्याह।

वागनुष्टुप् ॥ ४ ॥

स्पष्टं ॥ ४ ॥

वागात्मकत्वेन पश्वात्मकत्वं दर्शयति।

चतुष्पादाः पशवः ॥ ५ ॥

अनुष्टुभश्चत्वारः पादाः पशूनामपि तावन्त एव अतस्तयाः सम्बन्धः ॥ ५ ॥

अस्त्येवं किं तत इत्याह।

वाचा पशून्दाधार ॥ ६ ॥

पूर्वं प्रजापतिः वाचानुष्टुवात्मना यान् पशून् दाधारेति अनुष्टुभोवाग्रूपत्वमसकृदर्शितं ॥ ६ ॥

कयावाचेति सोच्यते।

एताभीरात्रीभिः ॥ ७ ॥

रात्रीणां अनुष्टुभाञ्च संख्यासाम्याद्वाचा दाधारेत्युपचर्यते ॥ ७ ॥

इदानीमपि पशूनां वाचा आगमनादिव्यवहार एतत्सम्भवइत्याह।

तस्मात्ते वाचा सिद्धा वाचा हूता आयन्ति ॥ ८ ॥

यस्मात् प्रजापतिः वाचा पशून् धृतवान् तस्मादिदानीमपि स्वस्वामिवाचा सिद्धा वाङ्मात्रव्यवहारा आसन् किञ्च वाचा एह्येत्यादिरूपया वाचा आहूताः स्वामिसकाशमायान्ति इदानीन्तनप्रतिग्रहा प्रजापतेर्वाचा पशुधारणं सम्मतं भवति अत एवाभीरात्रीभिः पशुकामानामुचित इत्यर्थः।

वेदार्थस्य प्रकाशेन तमोऽहार्दं निवारयन्।
पुमर्थांश्चतुरोदेयाद् विद्यातीर्थमहेश्वरः ॥ ८ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्क-
भूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माध-
वीये सामवेदार्थ-प्रकाशे ताण्ड्यमहाब्राह्मणे
त्रयोविंशाध्यायस्य अष्टाविंशः खण्डः।
त्रयोविंशाध्यायः समाप्तिमगमत्।

अथ चतुर्विंशोध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निश्वसितं वेदायो वेदेभ्योखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

त्रयोविंशत्यध्याये द्वाविंशद्द्राविंपर्य्यन्तानि सत्राणि निगदि तानि अथास्मिंश्चतुर्विंशोध्याये तत्रास्तिंशद्द्रात्रमारभ्य संवत्सर पर्य्यन्तानि सत्राणि निरूप्यन्ते तत्रादौ प्रतिष्ठाकामाय त्रयस्तिं-शद्द्रात्रसंज्ञकं सत्रमाह ।

अतिरात्रस्त्रयः पञ्चाहा विश्वजिदतिरात्र एकः पञ्चा-हो द्वादशाहस्य दशाहान्यतिरात्रः ॥ १ ॥

स्पष्टं । १ ।

एतस्मिन् सत्रे अधिकारिणो दर्शयति ।

प्रजापतिः प्रजा असृजत तान् प्रत्यतिष्ठत्ता एताभिः प्रत्यतिष्ठन्निमे लोकान प्रत्यतिष्ठत्त एताभिः प्रत्यतिष्ठन् प्रतिष्ठाकामा उपेयुः प्रत्येव तिष्ठन्ति ॥ २ ॥

प्रजापतिना सृष्टा देवमनुष्याद्याः प्रजाः पृथिव्यादिलोकाश्च न प्रत्यतिष्ठन् स्थैर्य्यन्नालभन्त ततः प्रजापतिनानुष्ठिताभिरेताभिस्त्रयस्त्रिंशद्रात्रीभिः प्रतिष्ठामलभन्तः तत्तस्मात् प्रतिष्ठाकामिनामस्मिन्नधिकारः ॥ २ ॥

अत्र पञ्चाहे बृहद्रथन्तरयोः साम्नोरन्योन्यस्थानव्यत्ययेनानुष्ठानमभिप्रेत्य तत् प्रशंसति ।

अरूपेण वा एताः सरूपा अरूपेण प्रजाः सरूपा अरूपेणेमे लोकाः सरूपा यद्रथन्तरस्य लोकं बृहदापद्यते बृहतो रथन्तरमरूपेणैवैभ्यस्तत् सरूपं प्रजनयन्ति ॥ ३ ॥

सत्रावयवभूतास्त्रयस्त्रिंशद्रात्रयो याः सन्ति एता अरूपेणैव सरूपाः सम्पन्नाः इयं प्रथमा रात्रिरियं द्वितीयेत्येवं व्यत्ययं रूपमनुष्ठानात् पूर्वं नास्ति पश्चात्तु सम्पत्तेः तस्मादरूपं कारणं सरूपं कार्य्यं प्रजाश्च हस्तपादादिरूपरहितेन शुक्रशोणितात्मना बीजनियोजनोत्पादिता हस्तपादादिरूपोपेताः सम्पन्नाः पृथिव्यादिलोकाश्च रूपरहितेन परत्रह्मणोत्पादितरूपवन्तोऽभवन् तद्वत्बृहद्रथन्तरसाम्नोरपि परस्परस्थानव्यत्यये सति स्वकीयस्थानराहित्यलक्षणं कृत्वा तदरूपमस्ति तत्तेनारूपेणैवैभ्यः यजमानोपकारार्थं सामगानलक्षणा उद्गातारः प्रजनयन्ति ॥ ३ ॥

अत्र पञ्चाहप्रयुक्तं किञ्चिद्दोषमाशंक्य परिहरति ।

लुप्यते वा एतत् षष्ठमहर्यत् पञ्चाहानुपयन्ति नर्त्तवः

कल्पन्ते यत् पृष्ठ्यः षडहस्तेन षष्ठमहर्न्न लुप्यते तेनर्त्तवः कल्पन्ते ॥ ४ ॥

पञ्चाहानुपयन्त्यनुतिष्ठन्तीति यदस्ति एतदेतेनानुष्ठानेन षष्ठ स्याङ्गोलोपे सति षट्संख्याका ऋतवो न कल्पन्ते स्वस्वकालोचितफलदानसमर्थान भवन्ति सोऽय दोषः द्वादशाहमध्ये पृष्ठ्यषडहानुष्ठानादुक्तदोषपरिहारो द्रष्टव्यः ॥ ४ ॥

षड्हानुष्ठाने पञ्चाहानुष्ठानं विच्छिद्यतेत्यागंक्य दशाहस्य पञ्चाहद्वाररूपत्वान्न विच्छेद इत्यभिप्रायेणाह।

अथ यानि द्वादशाहस्य दशाहानि तेन पञ्चाहेभ्यो नयन्ति ॥ ५ ॥

अहर्लोपदोषसमाधानानन्तरं पञ्चाहविच्छेददोषसमाधानं द्रष्टव्यमिति शेषः, कथमिति चेत्तदुच्यते द्वादशाहस्य यानि दशाहानि विद्यन्ते तेषां द्वौ द्वौ विभागे सति द्वौ पञ्चाहौ सम्पद्येते तेन पञ्चाहद्वयसम्पत्तिनैव सत्रानुष्ठायिन पञ्चाहेभ्यो न यन्ति नापगच्छन्ति ॥ ५ ॥

अथास्य यत् चयस्त्रिंशद्रात्रसत्रस्य मध्ये याज्यो विश्वजिदतिरात्रस्तमेव प्रशंसितुं दृष्टान्तत्वविवक्षया लोकत्रये किञ्चिद्रूपकं परिकल्योपन्यस्यति।

ऊर्ध्वा अन्तरिक्षꣳ स्तनावभितोनेन वा एष देवेभ्यो दुग्धेऽमुना प्रजाभ्यः ॥ ६ ॥

द्यावापृथिव्योर्मध्ये यदिदमन्तरिक्षमस्ति तदिदं ब्रह्माण्डक-

पाया अजाया ऊधर्बै अजाधेनुमहिषादीनां प्रभूतक्षीरसन्देशादू-धरित्युच्यते अजासम्बन्धिन ऊधसः पार्श्वयोर्द्वौस्तनौ भवतः एवं ब्रह्माण्डरूपस्याजाशरीरस्यान्तरिक्षमूधस्थानीयं प्रभूतवर्षो-पसंग्रहस्तनत्वात्तस्य चान्तरिक्षस्य ऊधस इति तदुपरि अध-स्ताच्च द्यावापृथिव्याख्यौ द्वौ स्तनौ भवतः तयोर्मध्ये अनेन वै द्यावापृथिवीरूपेणैव स्तनेन देवेभ्य इन्द्रादिदेवार्थमेषजगदीश्वरो दुग्धे यागसम्बन्धिहविर्लक्षणं क्षीरं सम्पादयति अमुना द्यूलोक-रूपेण स्तनेन प्रजाभ्यो मनुष्यपश्वाद्यर्थं दुग्धे दृश्युदकरूपं सम्पा-दयति ॥ ६ ॥

नन्वन्तरिक्षस्य कथमूधस्त्वं कथंवा द्यावापृथिव्योस्तनद्वय-रूपत्वमित्याशंक्याह ।

इयं वा अन्तरिक्षं वियदिमौ स्तनावभितः ॥ ७ ॥

इयं वै दृश्यमानमेवान्तरिक्षं वियत् व्यगमयत् द्यावापृथिव्यौ स्तनसंश्लेषवद्वर्त्तेते तस्मादस्योधस्त्वात् देवमनुष्यापेक्षितस्य हवि-र्दृष्टिरूपस्य क्षीरद्वयस्य श्रवणादन्तरिक्षस्याभितोवर्त्तमानयोः द्या-वापृथिव्योः स्तनत्वं स्यात् एतत् द्यावापृथिव्योः स्तनद्वयत्वमुक्तं ब्राह्मणवाक्येन ॥ ७ ॥

तस्य दार्ढ्यार्थं विसंवादिनीं काञ्चिदेव ऋचमीरयति ।

तदभ्यनूक्ता ॥ ८ ॥

तदुभे द्यावापृथिव्यौ देवमनुष्यदृष्टिहेतुत्वलक्षणं स्तनत्वं य-दन्ति तदभिलक्ष्य उक्ता ॥ ८ ॥

अनुकूला काचिदृक् समाम्नाता तामेतार्चं पृच्छति ।

त्रिंशति त्रयः परोये देवावर्हिरासतव्यं नह द्वितात-

नेति ॥ ९ ॥

हविर्भुजो ये देवा बर्हिरासतव्यं सत्रूपं यज्ञमवस्थिताः ते देवास्त्रिंशति त्रिंशत्संख्याकाः तथा त्रयः परः अपरेपि त्रिसंख्याकाः एते त्रयस्त्रिंशत्संख्याकाः देवा लोकत्रये विभज्य वर्त्तते एतच्च ये देवा दिव्येकादशस्थेत्यादिमन्त्रे स्पष्टमाम्नाताः तनशब्दो धननामसु पठितः द्वितेतिशब्दः द्वैविध्यमावष्टेइशब्द एवकारार्थः व्यतिशब्दोवीगतिप्रजननकान्त्यशनखादनेष्विति धातोरुत्पन्नः अत्र प्रजननार्थमाचष्टे तस्य वाक्यस्यायमर्थः त्रयस्त्रिंशत संख्याका देवा हविर्दृष्टिलक्षणं धनं लोकद्वयवर्त्तिनं द्विधाकृत्वा प्राजनयन्ति इतिशब्दः समाप्त्यर्थः इत्यन्तामन्त्राः अन्तरिक्षस्थो धस्त्वं द्यावापृथिव्योः स्तनद्वयत्वं च मन्त्रादयन्ति ॥ ९ ॥

तद्दृष्टान्तेन प्रकृतकृतावपि तत् सर्वं मन्त्रादयति ।

ऊर्ध्वं मध्यमोतिरात्रः स्तनावभितः ॥ १० ॥

अस्मिन् कृतावाद्यन्तयोरतिरात्रयोर्मध्यवर्त्ती योयं विश्वजिदतिरात्रः सोयं ऊर्ध्वं कृतुफलाख्यस्य बहुत्वोरस्य धारणस्थानमूधस्तस्य विश्वजिदतिरात्रस्याभितः पुरस्तात्पश्चाच्च यौ पक्षौ विद्येते तौ स्तनस्थानीयौ कृतुफलदोहनहेतुत्वात् ॥ १० ॥

उक्तस्य विश्वजिदतिरात्रस्याभावे बाधमाह ।

यदेषोनतिरात्रः स्याद्यूधः प्रतिहरेत् ॥ ११ ॥

यद्येष त्रयस्त्रिंशदतिरात्ररूपः क्रतुरनतिरात्रो विश्वजिदतिरात्ररहितः स्यात् तदानीमेतस्याः सत्ररूपायाः कामधेनोरूधःस्थानीयं फलदानसामर्थ्यं प्रतिहरेत् ॥ ११ ॥

अन्वयव्यतिरेकाभ्यां विश्वजिदतिरात्रं प्रोच्य कर्त्तव्यमुपसंहरति।

तस्मादतिरात्रः कार्य्य ऊधसो प्रतिहाराय ॥ १२ ॥

यस्मात् कारणादयं विश्वजिदतिरात्रः ऊधःस्थानीयः तदभावे फलसामर्थ्याख्यमूधो विनश्यति तस्मात् कारणाद्विश्वजिदतिरात्रः ऊधसो विनाशायानुष्ठेयः ॥ १२ ॥

अस्य क्रतोः समृद्धिहेतुत्वं दर्शयति।

त्रयस्त्रिंशद्वेवता एताभिरार्ध्नुवंस्तेनर्द्धिस्तस्मादेताभिर्यजन्त ऋध्या एव ॥ १३ ॥

याः त्रयस्त्रिंशत्संख्याका देवता हविर्भुजः सन्ति ताः सर्व्वा एताभिः सत्रगताभिस्त्रयस्त्रिंशद्राचिभिरार्ध्नुवन् समृद्धिं प्राप्ताः तेनेदं सत्रं ऋद्धिसंज्ञकं भवति यस्माद्देवता आर्ध्नुवन् तस्मादन्येपि एताभिर्यथोक्ताभिस्त्रयस्त्रिंशद्राचिभिर्यजन्ते ॥ १३ ॥

एतत्सत्रगतासु त्रयस्त्रिंशद्राचिषु ब्रह्मसाम्नां नानाविधत्वं प्रशंसति।

नाना ब्रह्मसामान्युपयन्त्यङ्गां नाना वीर्यतायै नानैव वीर्याण्यवरुन्धते ॥ १४ ॥

अस्मिन् क्रतौ बहवः पञ्चाहाः सन्ति तेषु ब्रह्मसामानि नाना परस्परविलक्षणानि उपयन्त्यनुतिष्ठेयुः तद्यथा प्रथमं पञ्चसु दिनेषु क्रमेण बृहद्रथन्तरवैरूपं शैतमहावैष्टम्भमित्येतानि ब्रह्मसामानि द्वितीयपञ्चाहस्य प्रथमतो बृहत्पश्चाद्रथन्तरं ततो मानवं कुन्दस्यं वासिष्ठमिति ब्रह्मसामानि यद्यपि द्वितीयतृतीययोर्मानवमस्ति तथापि द्वितीये त्वामिदाह्योनरइत्यस्यामृचि मानवतृतीयेतु शग-ध्यूषु शचीपत इत्यस्यामृचीतिशेषः तदेवं ब्रह्मसाम्नावानाविधत्व-मङ्गावानाविधवीर्यतायै सम्पद्यते ततो यजमानाश्चापि नाना-विधान्येव वीर्याणि प्राप्नुवन्ति ॥ १४ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्थे त्र्याख्यायस्य प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

अथापरं त्रयस्त्रिंशद्रात्रमृद्धिकामानां सत्रमाह ।

अतिरात्रोऽभिप्लवः षडहोऽतिरात्रोऽभिप्लवः षडहोऽति-रात्रोऽभिप्लवः षडहोद्दशाहस्य दशाहानि महाव्रत-स्याऽतिरात्रश्च ॥ १ ॥

स्पष्टं । १ ।

तमेतं त्रयस्त्रिंशद्रात्रक्रतुं द्वेधा विभज्य तत्र द्वयरूपत्वं सम्पाद्य तेन सत्रद्वयेन समानं फलं दर्शयति।

आदित्याश्चाङ्गिरसश्चैतत् सत्रꣳसमदधतादित्याना-मेकविꣳशतिरङ्गिरसां द्वादशाह आदित्या अस्मिल्लोक आसन्द्वा आदित्या अमुष्मिन्नङ्गिरसोऽस्मिन्नङ्गिरसोमुष्मिन् द्वयꣳ सत्रं यावन्द्वयेन सत्रेणार्ध्नुवन्ति तावत्येतासामृद्धिः॥ २॥

यदिमे आदित्याः सन्ति ये चान्येऽङ्गिरसः सन्ति तदुभयेपि मिलित्वा एतत् सत्रमन्वतिष्ठन् अस्मिन् सत्रे त्रिभिरतिरात्ररूपो पेतास्त्रयोभिप्लवाः षडहाभिलित्वा एकविंशतिरात्रं सत्रं सम्पद्यते स आदित्यानां भागः अतिशिष्टं द्वादशाहरूपं सत्रं सोयमङ्गिरसां भागः तत्रादित्याः स्वकीयेन भागेन लोकद्वयसमृद्धिं प्राप्ताः अङ्गिरसो अपि स्वभागेन लोकद्वयसमृद्धिं प्राप्नुवन् तदेतदादित्यानामङ्गिरसाञ्च द्विविधं सत्रं यावद्भवति तावतीय कृतसत्रगतानामेतासां त्रयस्त्रिंशद्रात्रीणां समृद्धिद्वयं सत्रमित्यस्यर्द्वयनेतिव्याख्यानं एकविंशतिरात्रद्वादशाहरूपेण द्विविधेन सत्रेणादित्या अङ्गिरसश्च समृद्धिं यथा प्राप्नुवन्ति तथैव त्रयस्त्रिंशद्रात्रेण लोकद्वये द्विगुणां समृद्धिं प्राप्नुवन्ति॥ २॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य द्वितीयः खण्डः।

अथ तृतीयः खण्डः।

अथ तृतीयं त्रयस्त्रिंशद्रात्रं सर्वकाममाधनमाह।

अतिरात्रस्त्रयः पञ्चाहा विश्वजिदतिरात्रस्त्रयः पञ्चाहा अतिरात्रः॥ १॥

स्पष्टं। १।

अस्मिन् सत्रे किञ्चिद्दोषमुद्भाव्य परिहरति।

अपशव्यं वा एतत् सत्रं यदच्छन्दोमं यद्विश्वजिति छन्दोमानुपर्यन्ति तेन छन्दोमवत्यस्ते न पशव्याः॥ २॥

चतुर्विंशचतुश्चत्वारिंशाष्टाचत्वारिंशनामकाः स्तोमाः गायत्रीत्रिष्टुब्जगतीछन्दोभिरक्षरसंख्याभिर्मानत्वाच्छन्दोमा इत्युच्यन्ते ते च पशुप्राप्तिहेतुत्वात् पशव्यास्तैः छन्दोमैर्विरहितत्वादेतत् सत्रं अपशव्यं पशुप्राप्तिसाधनत्र भवतीति दोषोद्भावनं अनुष्ठातारोत्र विश्वजिदतिरात्रे छन्दोमाननुतिष्ठन्ति तेनैतत् सत्रगतारात्रयः छन्दोमवत्यो भवन्ति तेन कारणेन पशुप्राप्तिहेतवश्च भवन्ति यद्यप्यस्मिन् विश्वजिदतिरात्रे साक्षात्छन्दोमा नसन्ति तथाप्युपायेन छन्दोमाः सम्पादयितुं शक्यन्ते कथमिति चेत् तदुच्यते त्रिवृत्पञ्चदशयोः स्तोमाश्चतुर्विंशः सप्तदशत्रिणवयोश्चतुश्चत्वारिंशः पञ्चदशसप्तदशयोरष्टाचत्वारिंश इति सम्पादनं॥ २॥

उक्तस्य सत्रस्य पशुरूपत्वसम्पादनेन सर्वकामप्राप्तिहेतुत्वं दर्शयति।

पञ्चिण्यो वा एता रात्रयो यङ्कामङ्कामयन्ते तमेताभिरभ्यश्नुवते यत् यत्र हि पञ्ची कामयते तत्तदभ्यश्नुते ॥ ३ ॥

अस्य सत्रस्य मध्ये विश्वजिदतिरात्रः पञ्चिदेहं वर्धयते तस्याभितो द्वौ पञ्चाहौ पञ्चाविव स्थितौ तस्मात् पञ्चिसम्बन्धात् सत्रगतारात्रयः पञ्चिण्य एव भवन्ति तथा सत्येतत् सत्रानुष्ठायिनीयङ्कामङ्कामयन्ते तं काममेताभिः पञ्चसमानरात्रीभिः सर्वतः प्राप्नुवन्ति लोकेपि हि पञ्ची यत्र यत्र कामयते तत्र तत् स्थानमभितः प्राप्नोति तद्वदत्रापि कामप्राप्तिरित्यर्थः ॥ ३ ॥

अत्र विश्वजिदतिरात्रात् पूर्वेषूत्तरेषु च या त्रिवत्संख्यास्ति तां प्रशंसति।

त्रिवृता प्रयन्ति त्रिवृतोद्यन्ति प्राणावै त्रिवृत् स्तोमानां प्राणैरेव प्रयन्ति प्राणेषु प्रतितिष्ठन्ति ॥ ४ ॥

नात्र त्रिवच्छब्दः स्तोमवाची किंत्व अहर्गतत्रिसंख्यामुपलक्षयति तथा च निदाने यत् त्रिवृता प्रयन्ति त्रिवृतोद्यन्तीति त्रयः पञ्चाहाः पुरस्तात् त्रय उपरिष्टादिति त्रिसंख्यायोगात् त्रिवृदित्युक्तं भवतीत्यर्थः त्रिवत्त्वात् पूर्वभाविपञ्चाहगतया त्रिसंख्यया प्रयन्ति प्रारभन्ते त्रिवत्त्वात्पश्चाद्भाविपञ्चाहगतया त्रिसंख्यायोगादुद्यन्ति समापयन्ति तस्मादिदं सत्रं प्रशस्तं ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य तृतीयः खण्डः।

अथ चतुर्थः खण्डः।

अथ चतुस्त्रिंशद्रात्रमृद्धिकामानां मत्रमाह।

अतिरात्रो ज्योतिर्गौरायुस्तत्पञ्चम्यो ऽभिप्लवाः षडहा द्वादशाहस्य दशाहानि महाव्रतञ्चातिरात्रमृद्धिकामा उपेयुः ॥ १ ॥

ज्योतिर्गौरायुरिति तेषां त्रयाणामङ्गां समाहार एवात्र त्रा-ह्मी द्रष्टव्यः ॥ १ ॥

अस्य मत्रस्य समृद्धिफलं कथयन्तद्विगदयति।

एताभिर्वै प्रजापतिः सर्वामृद्धिमार्ध्नोत्सर्वामृद्धिमृध्नुवन्ति य एना उपयन्ति ॥ २ ॥

एताभिः मत्रगताभीरात्रिभिः स्पष्टमन्यत् ॥ २ ॥

रात्रिगतश्चतुस्त्रिंशत्संख्यां प्रशंसति।

यदेनाश्चतुस्त्रिंशद्रात्रयो भवन्ति त्रयस्त्रिंशद्देवताः प्रजापतिश्चतुस्त्रिंशो देवतानां प्रजापतेरेवर्द्धिमृध्नुवन्ति ॥३॥

यदेनाः या एनाश्चतुस्त्रिंशत्संख्याकारात्रयो भवन्ति तासु विद्यमानाः संख्या ऋविर्भोजादत्रयस्त्रिंशद्देवतास्तदुत्पादके प्रजापतौ च विद्यते अतः संख्यामाम्याद्देवतानां प्रजापतेश्च मत्रस्थिनी येयमृद्धिरस्ति तां सर्वामृद्धिमृध्नुवन्ति प्राप्नुवन्ति ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य
चतुर्थः खण्डः।

अथ पञ्चमः खण्डः।

अथ पञ्चत्रिंशद्रात्रं पशुकामानां सत्रमाह।

अतिरात्रो ज्योतिर्गौरायुर्गौरायुः पञ्चाहस्तयोभिप्लवाः षडहा द्वादशाहस्य दशाहान्यतिरात्रः पशुकामा उपेयुः॥ १॥

द्वे अहनो तत्समाहाररूपः पञ्चाहोवगन्तव्यः स्पष्टमन्यत्॥ १॥

रात्रिगतां पञ्चत्रिंशत्संख्यां प्रशंसति।

यदेताः पञ्चत्रिंशद्रात्रयो भवन्ति पाङ्क्ताः पशवः पशूनेवैताभिरवरुन्धते॥ २॥

पाङ्क्ताः पञ्चत्रिंशत्संख्याकारात्रयः सन्ति तास्वन्तर्भूताः पञ्चसंख्याविद्यन्ते पशवश्चतुर्भिः पादैःशिरसा च पञ्चभिरवयवैरुपेतत्वात् पाङ्क्ता इत्युच्यन्ते तस्मात् पञ्चसंख्याद्वारकसम्बन्धसम्भवादेताभीरात्रीभिर्यजमानः पशूनवरुन्धत एव प्राप्नुवन्त्येव॥ २॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य पञ्चमः खण्डः।

अथ षष्ठः खण्डः

अथ षट्त्रिंशद्रात्रं पशुकामानां सत्रमाह।

अतिरात्रश्चत्वारोऽभिप्लवाः षडहा द्वादशाहस्य दशाहान्यतिरात्रः पशुकामा उपेयुः ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

फलान्तरमाह ।

एताभिर्वै देवा आदित्यमस्तभ्नुवन्नादित्यलोकञ्जयन्ति य एता उपयन्ति ॥ २ ॥

पुरा देवा एतत्सत्रमनुष्ठाय एताभिः षट्त्रिंशद्रात्रीभिः आदित्यमस्तभ्नुवन् आदित्य आकाशगामी मन् भूमौ यथा नपतति तथास्तां इति समवनक् तस्मादेताभीरात्रीभिरनुष्ठातारो यजमाना आदित्यलोकं प्राप्नुवन्ति ॥ २ ॥

स्वाराज्यलक्षणं फलान्तरमाह ।

बृहती वा एता रात्रयः स्वाराज्य छन्दसां बृहती यो वै पशूनां भूमानञ्छति स स्वाराज्यं गच्छति प्र स्वाराज्यमाप्नुवन्ति य एता उपयन्ति ॥ ३ ॥

एतत्सत्रगतासु रात्रीषु षट्त्रिंशत्संख्या विद्यन्ते तथाच तैत्तिरीयकाः इष्टकाचयनब्राह्मणे बृहत्या विजयं स्वाराज्यप्राप्तिं च समामनन्ति अस्मिन्नपि सामब्राह्मणे प्रथमोत्तराभ्यां बृहत्याः श्रेष्ठत्वं पुरस्तादाम्नातं यच्चित्याहुरन्यानि च्छन्दांसि वर्षीयांसि क-

स्माद्बृहत्युच्यत इति प्रश्नः एषा ह्येमान् लोकान् व्याप्नोत्यन्यच्छन्दः किञ्च नेत्युत्तरं एवं सति रात्रीणां बृहतीसाम्यात् स्वाराज्यप्राप्तिहेतुत्वं सम्भाव्यते किञ्च लोके यो वै यः कोपि पुमान् 'पशूनां भूमानं लक्षकोटिसंख्यारूपं बाहुल्यं गच्छति स पुमानन्येषामधिपतिः सन् स्वाराज्यं प्राप्नोति तद्वदेतासां रात्रीणां अनुष्ठातारोपि बहुपशुलाभेन स्वाराज्यं प्राप्नुवन्ति ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य षष्ठः खण्डः।

अथ सप्तमः खण्डः।

अथ सप्तविंशद्रात्रिमन्त्रपशुरूपफलद्वयकामानां सत्रमाह।

एता एव समहाव्रताः ॥ १ ॥

याः षट्त्रिंशद्रात्रयः पूर्वखण्डे भिहिताः एता एव महाव्रतेनाङ्गा सहिताः सप्तविंशद्रात्रयो भवन्ति ॥ १ ॥

एतासां रात्रीणां फलं दर्शयति।

एताभिर्वै प्रजापतिरुभौ कामावावारुन्धान्नं व्रतं पशवो बृहत्युभावेवैताभिः कामावरुन्धते ॥ २ ॥

व्रतमहाव्रताख्यमहरन्नं बृहती पशुसाधनत्वात् एतावुभौ

अन्नपशुरूपौ कामौ प्रजापतिरेताभिरेव सप्तत्रिंशद्रात्रिभिरेवावरुन्धते प्राप्नोति तस्मादन्येपि यजमाना उभौ कामौ प्राप्नुवन्ति॥ २ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य
सप्तमः खण्डः ॥

अथ अष्टमः खण्डः।

अथाष्टात्रिंशद्रात्रं पशुकामानां सत्रमाह।

अतिरात्रो गौश्चायुश्च द्वे अह्नो चत्वारोभिप्लवाः षडहा द्वादशाहस्य दशाहान्यतिरात्रः पशुकामा उपेयुः॥१॥

स्पष्टोर्थः। १।

एतासां रात्रीणां पशुसाधनत्वं विशदयति।

यदेता अष्टात्रिंशद्रात्रयोभवन्त्यष्टाशफाः पशवः शफश्च एवैताभिः पशूनवरुन्धते॥ २ ॥

या एता अष्टात्रिंशद्रात्रयः सन्ति तास्वष्टसंख्या विद्यन्ते गोमहिषादिपशवश्चाष्टसंख्याशफोपेताः अतः शफश्च एव संख्यासाम्योपेतशफद्वारेणैव एताभिरष्टात्रिंशद्रात्रिभिर्यजमानाः पशून् प्राप्नुवन्ति॥ २ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य
अष्टमः खण्डः।

अथ नवमः खण्डः।

एकोनचत्वारिंशद्रात्रं अनन्तश्रीजयकामानां सत्रमाह।

अतिरात्रो ज्योतिर्गौरायुस्त्र्यहस्त्वारोभिप्लवाः षड्-हादशाहस्य दशाहान्यतिरात्रः ॥ १ ॥

स्पष्टार्थः। १।

अहादावनन्तश्रीजयरूपं फलं वक्तुं तत्सद्भावमाह।

एताभिर्वै प्रजापतिरनन्ताꣳ श्रियमजयदनन्ता वा एता या एकया न चत्वारिꣳशन्नेति वै वाचीनन्तं ॥ २ ॥

या रात्रय एकया रात्रया अस्मिन् क्रतावविद्यमानया चत्वारिंशन्न भवन्ति एता एकोनचत्वारिंशद्रात्रयोऽनन्ता एव कथमिति चेत्तदुच्यते नेति वै निषेधवाचकं नेत्येतत्पदमेव वाचीनन्तं वाचः सम्बन्धिषु पादेषु अन्तरहितार्थवाचकं तथाहि याचकैर्दीने याच्यमाने बहवः पुरुषा लोभयुक्ताः सन्तो नेति चोच्चार्य परिहरन्ति स चानन्तार्थवाचकोनेत्यसौ शब्दः एकयानचत्वारिंशदित्यत्र विद्यते तस्मादेताभीरात्रिभिः प्रजापतेरनन्तश्रीजयः सम्भाव्यते ॥ २ ॥

सम्भावितन्तत्फलं यजमानानां दर्शयति।

यदेता एकया न चत्वारिꣳशद्रात्रयो भवन्त्यनन्तामेवैताभिः श्रियञ्जयन्ति ॥ ३ ॥

स्पष्टार्थः। ३।

इति ताण्ड्यमहाब्राह्मणे चतुर्थे ग्राध्यायस्य

नवमः खण्डः।

अथ दशमः खण्डः।

अथ चत्वारिंशद्रात्रं परमराज्यप्रतिष्ठाकामानां सत्रमाह।

एता एव समहाव्रताः ॥ १ ॥

एताः पूर्वखण्डोक्ता एवैकोनचत्वारिंशद्रात्रयो महाव्रतेन सहानुष्ठेयाः ॥ १ ॥

अस्य क्रतोः फलं वक्तुमत्र स्थितानां रात्रीणां विराड्रूपत्वमाह।

सर्वा वा एताविराजोदग्निनी प्रथमा विंशिनी द्वितीया त्रिंशिनी तृतीयैषा वै परमा विराट् यच्चत्वारिंशद्रात्रयः पङ्क्तिर्वै परमा विराट् ॥ २ ॥

अस्मिन् क्रतौ या रात्रयः सन्ति ताः सर्वा विराज एव कथमितिचेत् तदुच्यते दशानां रात्रीणां समावेशनी प्रथमा विराट् भवति दशाक्षरा विराडिति श्रूयमाणाया दशसंख्यायास्तत्र विद्यमानत्वात् विंशतिसंख्याकानां रात्रीणां समष्टिर्विंशिनी सा द्वितीया विराट् द्विगुणीकृताया दशसंख्यायास्तत्र विद्यमानत्वात् त्रिंशत्संख्याकानां रात्रीणां समष्टिस्त्रिंशिनी त्रिगुणायादशसंख्यायास्तत्र सद्भावात् चत्वारिंशद्रात्रीणां समष्टिरेषैवात्र विद्यमानानां विराजां मध्ये परमोत्तमा विराट् चतुर्गुणायाः दशसंख्यायास्तत्र सद्भावात् किञ्चेयं परमा विराट् पङ्क्तिर्वै पिपीलिकापङ्क्तिं च इन्द्रायमानोनुष्ठीयमानत्वात् ॥ २ ॥

तादृशीं परमाविजयमनुतिष्ठतां यजमानानां वैराजप्रतिष्ठारूपं फलमाह।

परमायामेव विराजि प्रतितिष्ठन्ति ॥ ३ ॥

अत्रं विराडिति अन्तरा विराट्शब्देन विवक्षितमत्यन्तसमृद्धेन प्रतितिष्ठन्तीत्यर्थः यद्वा परमायां विराजि उत्तमे विशिष्टराज्ये प्रतिष्ठिताभवन्ति ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे तुर्यविंशाध्यायस्य
दशमः खण्डः ।

अथ एकादशः खण्डः ।

अथ विधृतिसंज्ञकानामेकोनपञ्चाशद्रात्रीणां समानाम्मध्ये प्रथमं सत्रं पापव्यावृत्तिफलायाह ।

अतिरात्रस्त्रीणि त्रिवृन्त्यच्चान्यग्निष्टोममुखान्यतिरात्रो दश पञ्चदशा उक्थ्याः षोडशिमद्दशममहरतिरात्रो द्वादश सप्तदशा उक्थ्या अतिरात्रः पृष्ठ्यः षडहोतिरात्रो द्वादशैकविंशा उक्थ्याअतिरात्रः ॥ १ ॥

अत्र प्रथमं पञ्चमं षोडशं एकोनचिंशत् षट्त्रिंशमेकोनपञ्चाशदेतानि षट्संख्यकान्यतिरात्ररूपाणि तेषु प्रथमपञ्चमयोर्म्मध्ये त्रिवृत्स्तोमेनोक्तानि त्रीण्यहानि तानि चाग्निष्टोममुखानि अग्निष्टोममुखं रूपं प्रथममहरुक्थ्यरूपे द्वे अहनी इत्यर्थः पञ्चमषोडशयोर्म्मध्ये पञ्चदशस्तोमयुक्ता उक्थ्याः दशसंख्याकाः प्रयोक्तव्याः तेषु यद्दशममहरस्ति तत् षोडशिस्तोत्रयुक्तं कर्त्तव्यं

षोडशैकोनत्रिंशयोर्म्मध्ये सप्तदशस्तोमयुक्ता उक्थ्या द्वादशसंख्याका अनुष्ठेयाः एकोनत्रिंशषट्त्रिंशयोर्म्मध्ये षृष्ठाः षडहोनुष्ठेयः षट्त्रिंशैकोनपञ्चाशयोर्म्मध्ये एकविंशस्तोमयुक्ता उक्थ्या द्वादशसंख्याकाः कर्त्तव्याः तदेकोनपञ्चाशद्रात्रं सत्रं भवति ॥ १ ॥

अत्र पापव्यावृत्तिरूपं फलं विवक्षुस्तत्सम्भावयितुमर्थवादमाह ॥

प्रजापतिः प्रजा असृजत ता अविधृता असञ्ज्ञानाना अन्योन्यामाद्यंस्तेन प्रजापतिरशोचत्स एता अपश्यत्तती वा इदं व्यावर्त्तत गावो गावोभवन्नश्वा अश्वाः पुरुषाः पुरुषाश्चगाश्चगाः ॥ २ ॥

प्रजापतिना सृष्टा गवाश्वमनुष्यादयः प्रजा अविधृताः अनियमिताः प्रजापतिना नियन्तुमशक्या असञ्ज्ञानाना ऐकमत्यरहिता अन्योन्या मादन् परस्परविरोधात् प्रबला दुर्बलानां भक्षणमकुर्वन् तेन नियन्तुमशक्यत्वेन प्रजापतिरशोचत् खिन्नोभूत् सखिन्नः प्रजापतिस्तदावृत्त्युपायं पर्य्यालोच्य एता उक्ता एकोनपञ्चाशद्रात्रीस्तदुपायत्वेन दृष्ट्वानुष्ठितवान् ततोयोऽयितदनुष्ठानादनु इदं अन्योन्यभक्षं व्यावर्त्तत व्यावृत्तमुपरतमासीत् तदनन्तर गावः परद्रोहरहिता गावोभवन् इतरभक्षणरूपस्याभावात् स्वकीयेन गोरूपेणैव व्यवस्थिताः एवमश्वपुरुषसृगेषु योज्यं ॥ २ ॥

इदानीं यजमाननां पापव्यावृत्तिरूपं फलं दर्शयति ।

विपाप्मना वर्त्तन्ते य एता उपयन्ति ॥ ३ ॥

स्पष्टोर्थः ॥ ३ ॥

यदतिरात्रा अन्तरा विधर्त्यै तस्मान्नेतर इतरस्मिन्रेतो दधाति ॥ ४ ॥

अत्राहर्गणानामध्ये अन्तरालेष्वनुष्ठिता अतिरात्रा विधृत्यै विभज्य धारणाय गणद्वयसाङ्कर्यपरिहाराय सम्पद्यन्ते तस्मात् कारणादितरो गोजातीयपशुरितरस्मिन् महिषादिजातीयपशा-रेतो न दधाति गर्भधारणन्न करोति तथा महिषादिरपि जात्य-न्तरे ॥ ४ ॥

अतिरात्रान् प्रशस्य पृष्ठ्यषडहं प्रशंसति ।

यत् पृष्ठ्याः स्तोमाः सꣳसृष्टास्तस्मादजावयः पशूनाꣳ सह चरन्ति तस्मादु गर्दभोवडवायाꣳरेतोदधाति ॥ ५ ॥

पृष्ठ्यषडहस्य प्रथमेऽहनि त्रिवृदाद्यास्त्रयस्त्रिंशत्पर्यन्ताः स्तोमाः क्रमेणानुष्ठीयन्ते एवं द्वितीयादिष्वहःसु पञ्चदशादि तथा सति यद्यस्मात् कारणात् पृष्ठ्यषडहगताः स्तोमाः संसृष्टाः सर्वष्वहः-स्वेकविधा अनविलक्षणाः तस्मात् कारणात् फलभूतानां पशू-नामपि केचित् पशवोऽजाश्चावयश्च सहचरन्ति न तु परस्परं विरुध्यन्ते तस्मादु तस्मादेव पृष्ठ्यस्तोमसंसर्गकारणाद्गर्दभोजात्य-न्तरयुक्तः पुमान् वडवायां अश्वयोषिति रेतोऽवस्थापयति ॥ ५ ॥

अस्मिन् सत्रे किञ्चिद्दोषमुद्भाव्य परिहरति ।

अपशव्यं वा एतत्सत्रं यदच्छन्दोमं यत्सन्धिषामनु छन्दाꣳस्युपयन्ति तेन छन्दोमवत्यस्तेन पशव्याः ॥ ६ ॥

अतीते तृतीये खण्डे छन्दोमराहित्यादपशुत्वात् दोषो यद्योङ्गावितः तथात्राप्युङ्गाख्यते तस्य परिहारः यद्यस्मात् कारणादतिरात्राणामन्येषु सन्धिः सन्धिस्तोत्रेषु यानि सामानि सन्ति तेषु सामसु गायत्र्यादीनि बृहत्यन्तानि सप्त छन्दांस्युपयन्ति यजमाना अनुतिष्ठन्ति तेन कारणेनैतत् सत्रगतारात्रयः छन्दोमवत्योभवन्ति छन्दोमशब्दस्य मुख्यार्थानां चतुर्विंशचतुश्चत्वारिंशाष्टाचत्वारिंशद्रूपाणां स्तोमानामभावेपि तत्समानाक्षरसंख्यानाङ्गायत्रीत्रिष्टुब्जगतीनामनुष्ठितत्वात् छन्दोमशब्देन तानि त्रीणि छन्दांसि उपलक्ष्यन्ते तथा सत्यस्य सत्रस्य छन्दोमवत्त्वं सिध्यति तेन छन्दोमवत्त्वेनैतारात्रयः पशव्याभवन्ति ॥ ६ ॥

ननु सन्धिसामसु किं सामास्मिंश्छन्दसि प्रयुज्यते इत्यागङ्क्याह ।

गायत्रीषु जराबोधीयमुष्णिक्षु अध्यमनुष्टुप्सु नानदम्बृहतीषु रथन्तरं पङ्क्तिषु रायोवाजीयं त्रिष्टुप्स्वोशनञ्जगतीषु कावं ॥ ७ ॥

स्पष्टोर्थः । यद्यपि षट्स्वतिरात्रेषु नानदव्यतिरिक्तानि जराबोधीयादीनि कावपर्य्यन्तानि षडेव सन्धिपासानि तथा दशसूत्रेषु दशमेऽहनि सूर्य्यास्तमयवेलायां षोडशिस्तोत्रं नानदं प्रयुज्यते तदपि सन्धिपासत्वेनोपचर्य्यते ॥ ७ ॥

गायत्र्यादीनां जगत्यन्तानां क्रमेणानुष्ठानं प्रदर्शयति ।

ऊर्ङ्नि छन्दाꣳस्युपयन्त्यनपभ्रꣳशाय ॥ ८ ॥

गायत्र्याऊर्ङ्मुष्णिक्चतुर्भिरक्षरैरधिका अत ऊर्ङ्मनुष्टुप् एव

मुत्तराणि तेन क्रमेणैतान्यूर्ध्वानीत्युच्यन्ते तेषां क्रमानुष्ठाने सति तस्यापि छन्दोमानपभ्रंशोभवति औशनकावयोः साम्नोः स्वरशब्दो निधनभागो भवति ॥ ८ ॥

तमेतं प्रशंसति।

प्राणो वै स्वरोयत् स्वरावन्ततो भवतस्तस्मात् द्वावन्ततः प्राणी ॥ ९ ॥

निधनरूपः स्वरशब्दोगमनक्रियामाचष्टे स्वरति गच्छतीति व्युत्पत्तेः प्राणोपि गतिमान् सात्मस्वरशब्दरूपन्निधनं प्राण एव भवति यद्यस्मात् स्वरशब्दरूपौ निधनविशेषौ अन्ततो भवतः अनयोरौशनकावयोः साम्नोर्यद्विद्यते तस्मात्तौकेप्यन्ततो मरणकाले द्वौ प्राणौ उच्छ्वासनिश्वासौ तोव्रौ भवतः ॥ ९ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य
एकादशः खण्डः।

अथ द्वादशः खण्डः।

अथ द्वितीयमेकोनपञ्चाशद्रात्रं श्रीकामानां सत्रमाह।

अतिरात्रौ द्वावभिप्लवौ षडहौ गौश्चायुश्चातिरात्रौ द्वावभिप्लवौ षडहावभिजिच्च विश्वजिच्चातिरात्रावेकोऽभिप्लवः षडहः सर्वस्तोमश्च नव सप्तदशश्चातिरात्रौ द्वादशाक्षस्य द्वादशानि महाव्रतच्चातिरात्रस्य ॥ १ ॥

अत्र द्विवचनान्तमतिरात्राविति पदन्निःप्रयुक्तं तत्रादां गौश्चायुश्चेत्यनयोर्विशेषणं द्वितीयं अभिजिद्विश्वजितोरनयोर्विशेषणं तृतीयन्तु सर्व्वस्तोमश्च नवसप्तदशश्चेत्यनयोर्विशेषणं स्पष्टमन्यत् ॥ १ ॥

एतत्सत्रगतानां रात्रीणां फलविशेषं कथयितुं तदनुकूलं संज्ञाविशेषमाह ॥

आदित्यानां यमातिरात्राः ॥ २ ॥

आदित्यैर्दृष्ट्वादेतारात्रयः आदित्यानां संबन्धिन्यः ॥ २ ॥

तासां यमातिरात्रा इति संज्ञानुकूलं फलमाह ॥

यमेवैषाꣳश्रीर्भवति यएता उपयन्ति ॥ ३ ॥

ये यजमाना एतारात्रीरनुत्तिष्ठन्ति तेषां यजमानानां यमेव श्रीर्भवति यमशब्दः सहोत्पन्नयोर्द्वयोः पुरुषयोर्लोके प्रसिद्धः सचात्र द्वैगुण्यमुपलक्षयति इवशब्द एवकारार्थः यमा द्विगुणा श्रीर्भवतीत्यर्थः ॥ ३ ॥

फलान्तरमाह ।

एताभिर्वा आदित्या इंद्वमार्ध्नुवन्मित्रश्च वरुणश्च धाता चार्य्यमा चाꣳशश्च भगश्चेन्द्रश्च विवस्वाꣳश्चैतासामेव देवतानामृद्धिमृध्नुवन्ति य एताउपयन्ति ॥ ४ ॥

मित्राद्या विवस्वदन्ता अष्टावदितेः पुत्रा आदित्याः ते च इन्द्रं यथाभवति तथार्ध्नुवन् द्वौद्वौ मिलित्वा सर्व्वे समृद्धिं प्राप्ताः तान्येव

चत्वार्यादित्यानां छंदांसि मित्रश्चेत्यादिना स्पष्टीक्रियन्ते ये यजमाना एतारात्रीरनुतिष्ठन्ति ते यजमाना एतासामेव मित्रादीनां देवतानां सर्व्वां समृद्धिं प्राप्नुवन्ति ॥ ४ ॥

नन्वष्टौ वसव एकादश रुद्रा द्वादशादित्या इत्यादिश्रुत्यादित्यानां द्वादशसंख्या प्रसिद्धा इहतु मित्रश्चेत्यादिना कथमष्टावादित्या उच्यन्ते इत्याशंक्य द्वादशानां मध्ये मुख्यानामष्टानां श्रुतिप्रसिद्धिं दर्शयितुं काञ्चिदृचमवतारयति ।

तदभ्यनूक्ता ॥ ५ ॥

तत् पूर्व्वोक्तमादित्यानामष्टसंख्योपेतत्वमभिलक्ष्यानूक्तेति काचिदृक् समाम्नाता ॥ ५ ॥

तामेव ऋचं पठति ।

अष्टौ पुत्रासो अदितेर्य्ये जातास्तन्वं परि देवाꣳउप प्रैत् सप्तभिः परामार्त्ताण्डमास्यदिति ॥ ६ ॥

अदितेर्देवतायाः पुत्राः पुत्रासः अष्टौ सन्ति ये पुत्राः जाताः सन्तस्तन्वं परि अदितिशरीरं परितोव्याप्य स्तनपानाद्यर्थमास्थिताः तेषामध्ये मित्रादयैरिन्द्रान्तैः सप्तभिः पुत्रैः सहेदिति देवानुपसेवितुं प्रैत् प्रागकृत् विवस्वत्संज्ञकमष्टममार्त्ताण्डं सूर्य्यं परास्यत् परित्यक्तवती अस्य देवसेवाप्रयासोमाभूदिति क्वचिन्नोपितवतीत्यर्थः इतिशब्दोऽृक्समाप्त्यर्थः ॥ ६ ॥

आदित्यवद्यजमानानां लोकद्वये समृद्धिरूपं फलं दर्शयति ।

आदित्या अस्मिल्लोक ऋद्धा आदित्या अमुष्मिन्नुभयोरनयोर्ल्लोकयोर्ऋध्नुवन्ति देवलोके च मनुष्यलोके च य एता उपयन्ति ॥ ७ ॥

मित्राद्या अष्टावादित्या अतः सत्रानुष्ठानेन इयोर्ल्लोकयोः ऋद्धा यजमाना अपि ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्त्रिंशाध्यायस्य द्वादशः खण्डः ॥

अथ त्रयोदशः खण्डः।

अथ तृतीयमेकोनपञ्चाशद्रात्रं सुरभिद्रव्याभ्यञ्जनकामानां सत्रमाह।

अतिरात्रश्चत्वारोभिप्लावाः षडहाः सर्व्वस्तोमोतिरात्रो द्वावभिप्लवौ षडहौ द्वादशाहस्य दशाहान्यतिरात्रः ॥ १ ॥

अत्र मध्यपठितातिरात्रपदं सर्व्वस्तोमपदस्य विशेषणं स्पष्टमन्यत्। १।

अत्राञ्जनाभ्यञ्जने विधातुन्नयोस्तावकमर्थवादमाह।

प्रजापतिः प्रजा असृजत सरूक्षीभवत्तꣳरुक्षन्नाजानन् स आचाङ्क्ताभिचाङ्क्त ॥ २ ॥

पुरा कदाचित् प्रजापतिः प्रजाः सृष्ट्वा रूक्षः शुष्कोऽभवत

सर्गप्रयासेन शरीरगतपुष्टिकान्तिरहितोऽभूदित्यर्थः तं प्रजापतिरूपं पुष्टिकान्तिहीनं नाजानन् प्रजापतिरयमिति प्रजाः सर्व्वानज्ञातवत्यः ततः स प्रजापतिः प्रजानां स्वप्रज्ञातार्थमाचाङ्क्त च स्वकीययोरुक्षणे रञ्जनमपि प्रक्षिप्तवान् अभ्यङ्क्ता च स्वशरीरे सुगन्धिद्रव्यैरभ्यङ्गमपि कृतवान् ॥ २ ॥

इत्थं प्रशस्य एतत्सत्राधिकारिणां मन्त्रवर्ज्जनाभ्यञ्जनं विधत्ते ।

य आत्मानन्नेव जानीरꣳस्तएता उपेयुर्यदा चाञ्जतेऽभिचांजते शुभमेवात्मन्दधते जानन्त्येनान् ॥ ३ ॥

ये पुरुषा आत्मानन्नैव जानीरन् इवशब्द एवकारार्थः अन्नाभिधातुरत्ते वा वितरणार्थः तज्ज्ञापयेयुरेव ये पुरुषाः सभामध्ये स्वात्मानं न प्रख्यापयितुं शक्ताइत्यर्थः ते पुरुषा एता एकोनपञ्चाशद्रात्रीरनुतिष्ठेयुः तासु रात्रिषु अञ्जने चाभ्यञ्जनेच अक्षणोरञ्जणं शरीराभ्यङ्गञ्च सम्पादितवन्तः यद्यवसरादेवं कृतं तस्मात्ते यजमानाः शुभमेवात्मन् धत्ते शोभनं स्वस्थापनचिह्नमेव स्वशरीरे धारयन्ति तेन चिह्नेन समागताः प्रजाएतान्यजमानान् जानन्ति विद्याधनादिसम्पन्ना इत्यवगच्छन्ति ॥ ३ ॥

अञ्जनाभ्यञ्जनसाधनद्रव्याणि विधत्ते ।

गौग्गुलवेन प्रातःसवने सौगन्धिकेन माध्यन्दिने सवने पैतुदारवेण तृतीयसवने ॥ ४ ॥

धूपसाधनविवासहेतोः गुग्गुलः प्रसिद्धः तदीयेन विलेपना

ञ्जनमञ्जनञ्च प्रातःसवने कुर्युः सुगन्धिशब्दः लवणविशेषवाची तद्र-
सयुक्तेन विलेपेन माध्यन्दिनसवने तदुभयङ्कुर्युः पेतुदारव उदु
म्बरइति केचिद्देवदारुरन्ये तदीयतैलेन तृतीयसवने तदुभयं
कार्य्यं ॥ ४ ॥

विहितानिगुग्गुल्वादीनि उत्पत्तिप्रदर्शनञ्च प्रशंसति।

**अग्निर्वै देवानाꣳ हौत्रमुपैष्यꣳश्चरीरमधूनुत तस्य यन्मा-
ꣳसमासीत्तद्गुग्गुल्वभवद्यत् स्नाव तन्मगन्धि तेजनं यदस्थि
तत् पीतुदार्वेतानि वै देवसुरभीणि देवसुरभिभिरेव तद-
भ्यञ्जते ॥ ५ ॥**

पूर्वमग्निर्देवानां यज्ञे हौत्रं होतृकर्म्म उपैषन् स्वशरीरमधूनु-
ताकम्पयत तथा कुर्वतस्तस्य यन्मांसं सोमांसलक्षणः तत्क्षणात्
शरीरावयवोधूत आसीत् एतत् गुग्गुल्वभवत् एवं स्नायुस्थिनो
प्रक्षिपतोः सुगन्धितेजनम्पीतुदारुणी चाभूतां अतो देवस्याग्नेः
शरीरसम्बन्धादेतानि खलु देवसुरभीणि अस्त्वेवं किं तत इत्याह
ततो गुग्गुल्वादिभ्यंजनेन देवसुरभिरेवाभ्यञ्जने सचिवः अत्र सूत्रं
आञ्जनाभ्यञ्जनासु गार्हपत्य उपमस्म सर्पींषि फाणयेयुः पृथग्देव-
सुरभिभिर्व्याख्यातानि ब्राह्मणेन तैस्तुल्यासूपाकरणवेलायां मन-
नानां पूर्व्वेण हविर्द्याने आसीना आञ्जीरन्नभ्यञ्जीरंश्च भुङ्क्ता-
ग्नोध्रीय एवेति गौतमः उत्तमानुपूर्व्वं ब्राह्मणेनाहरहरेतत् कुर्य्यु-
रिति धानञ्जय्यशाण्डिल्यौ सर्व्वस्तोमएवेति गौतमः पृष्ठ्य इत्येक
इति ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्व्विंशाध्यायस्य
तथोदशः खण्डः।

अथ चतुर्दशः खण्डः।

अथ चतुर्थमेकोनपञ्चाशद्रात्रं संवत्सरसम्मिताख्यं ऋद्धिकामानां सत्रमाह।

अतिरात्रश्चतुर्विंशः प्रायणीयमहस्तयोऽभिप्लवाः षडहा अभिजित्त्रयः स्वरसामानोदिवाकीर्त्यमहस्त्रयः स्वरसामानो विश्वजिदेकोभिप्लवः षडह आयुश्च गौश्च द्वे अहनी द्वादशाहस्य दशाहानि महाव्रतं चातिरात्रश्च संवत्सरसम्मिता यावती संवत्सरस्यर्द्धिस्तावत्येतासामृद्धिः॥ १॥

कल्पनं स्पष्टं। अहःसंघमाध्यं सत्रं संवत्सरसम्मिता गवामयनसंवत्सरत्वेन समः तत्त्वानामङ्गामत्व सद्भावादित्यभिप्रायः तदेवोच्यते यावतो संवत्सरस्यर्द्धिः संवत्सरस्यर्द्धिरहःल्कृप्तिः तावतो वै आसां रात्रीणामस्यर्द्धिः ल्कृप्तिरित्यर्थः संवत्सरसत्वेत्वावृत्ते अहाभ्यधिकानि स्युः तथापि प्राधान्येन यानि सन्ति तान्येवाचापोत्यर्थः॥ १॥

प्रायणीयमहश्चतुर्विंशङ्कार्य्यमित्युक्तं तत्रिरस्य त्रिवृत्कार्य्यमिति सप्रपञ्चमाह।

तदाहुर्यच्चतुर्विंशमहः प्रायणीयङ्कुर्युः संवत्सरमारभ्य न समापयेयुरिति त्रिवृदेव कार्य्यं प्राणावै त्रिवृत् प्राणां नेवोपयन्ति॥ २॥

तत्र प्रायणीयविषये आहुर्योदयन्तीति ब्रह्मवादिनः यद्यदि प्रायणीयमहश्चतुर्विंशं कुर्य्युः तदा तेन संवत्सरमारभ्योपक्रम्य न समापयेयुः यथा गवामयने चतुर्विंशमारभ्य द्वादशमासान् समाप्नुयुः न तथाचेत्यर्थः अतस्तत्परित्यज्य त्रिवृदेव कार्य्यः अत्र त्रिवृच्छब्दः केचिद्दशरात्रस्य प्रथमं पृष्ठ्यमहस्त्रिवृत्स्तोमकमस्ति तदेवात्र कार्यं तस्यापि प्रायणीयत्वादिति व्याचक्षते. अपरे सांवत्सरिकं चतुर्विंशमहर्मातिदेशतः प्राप्तं तत्र चतुर्विंशत्वमपोह्य त्रिवृत्स्तोमकं कर्त्तव्यमिति दशान्यस्तरेण केवलस्यैकस्याङ्गोतिदेशायोगादिति प्राणइत्यादि स्पष्टं ॥ २ ॥

अथोक्तं पक्षत्रितस्य पूर्व्वोक्तमेव पक्षं पुनः सिद्धान्तयति।

अथो खल्वाहुश्चतुर्विंशमेव कार्य्यमसमृद्ध्यै ॥ ३ ॥

अस्यायमभिप्रायः संवत्सरे गवामयने प्राधान्येन पञ्चविंशतिरेवाहानि विद्यन्ते इति तेषां सर्व्वेषामत्र प्रयोगात् संवत्सरसमापितः स्यात् अतः सत्रासमाप्तिलक्षणदोषाभावादुक्तमसमृद्ध्यर्थं चतुर्विंशमेव कार्य्यं त्रिवृत्करणे चतुर्विंशस्यैवाभावात् संवत्सरो न समाप्यते ॥ ३ ॥

अत्र यद्दिवाकीर्त्याहस्तदुभयस्वरसामत्वं तत् प्रशंसति।

अथैते स्वरसामानः शिरोव दिवाकीर्त्यं प्राणाः स्वरसामानोयद्दिवाकीर्त्यमभितः स्वरसामानो भवन्ति शिरस्येव तत् प्राणाधीयन्ते ॥ ४ ॥

अथाभिजिदनन्तरं एते वक्ष्यमाणाः स्वरसामानो भवन्ति

तदनन्तरं दिवाकीर्त्यमहरस्ति तच्छिरो वै शिरो वै प्रथममहः खलु सर्वेषु तस्य मध्यमत्वेन प्रधानत्वात् तथा सति प्राणरूपाः स्वरसामानः शिरःस्थानीयस्य दिवाकीर्त्यस्याभितो भवन्ति तत्तेन शिरस्यवस्थानत्वात् समङ्कृत्वा प्राणाश्चक्षुरादयः धीयन्ते स्थापिता भवन्ति एकत्वात् प्राधान्यपरिवारकत्वात्तस्य शिरस्त्वकल्पनं बहुत्वसंख्यायोगादन्याश्रयत्वेनोपसर्जनत्वाच्च स्वरसाम्नां प्राणत्वकल्पनं ॥ ४ ॥

अथैतेषां स्वरसाम्नामभितोयौ विश्वजिदतिरात्रौ खलु अभिप्लवः षड्हानन्तरं ये गो आयुषो अहनी ते प्रशंसति।

अथ यावन्त्यौ प्राणौ तौ विश्वजिदभिजितावथैतं गो आयुषो मिथुनौ स्तोमावुपयन्ति प्रजात्यै॥ ५ ॥

गोनामकं यद्दहस्तत्स्त्रियाः रूपं आयुस्तु पुरुषस्थानीयत्वयोः साम्यत्वं प्रजात्यै भवति ॥ ५ ॥

अथोक्ताहःसमनन्तरभावीनि दशाहानि प्रशंसति।

अथैतानि द्वादशाहस्य दशाहानि वाचमविच्छिन्नामुपयन्ति प्रजननाय ॥ ६ ॥

वाचा स्तावभस्त्वलक्षणया निष्पाद्यत्वाद्दशाहान्यपि वाग्रूपाणि तान्यनुक्रमेण यदुपयन्ति तेनाविच्छिन्नां वाचमेवोपयन्ति प्रजननार्थं ॥ ६ ॥

अथानन्तरभाविमहाव्रतं प्रशंसति।

अथैतद्व्रतमन्नं वै व्रतन्नं वा अन्यत्र मुखादन्नम्भिनोति यदुपरिष्टाद्व्रतमुपयन्ति मुखत एव तदन्नाद्यन्धीयते तस्मान् मुखे सदन्नम्भिनोति ॥ ७ ॥

अथ वायूपदग्राहानन्तरं एतद्व्रतमहाव्रतमुपयन्ति तदन्नं वै अन्नरूपं खलु लोकमुखादन्यत्र मुखाद्यतिरिक्ताऽवयवान्तरेण वा धिनोति नैव प्रीणयत्यात्मानं अत एतदुपरिष्टादग्राहानामनन्तरं व्रतमुपयन्ति शिष्टं स्पष्टं ॥ ७ ॥

अथाद्यन्ते अहनी प्रशंसति ।

अथैतौ प्रायणीयोदयनीयावतिरात्रौ येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥ ८ ॥

यद्येतौ प्रायणीयोदयनीयावुभावप्यतिरात्रौ भवतः प्रायेण प्राणेन प्रयन्तुमुपक्रमते सत्वं तमेव प्राणमभिलक्ष्याभ्युद्यन्ति ऊर्द्धं प्रापयन्ति ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशे प्रायश्चित्तस्य
चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः ।

अथ सवितुः ककुभ इति मंत्रं पञ्चममेकोनपञ्चाशद्रात्रं प्रजाप्रसवत्वकामानां सत्रमाह ।

अतिरात्रेणैव त्रिवृत्यज्ञान्यग्निष्टोममुखः षडहोथ यानि

स्पष्टं ॥ १ ॥

अथाधिकारिणो दर्शयति ।

ऋतवोन प्रत्यतिष्ठ॒ꣳस्तएताभिः प्रत्यतिष्ठन् प्रतिष्ठाकामा उपेयुः ॥ २ ॥

ऋतूनां प्रतिष्ठासाधनत्वादेतासां प्रतिष्ठार्थिनः साधिकारिणः ॥ २ ॥

अत्र षड्हचतुष्टयं विद्यते तत्र षट्संख्याहारेताः रात्रीः प्रशंसति ।

प्रत्येव तिष्ठन्ति षड्वा ऋतव ऋतुष्वेवैताभिः प्रतितिष्ठन्ति यत् क्रुप्तान् षडहानुपयन्ति क्रुप्तया एव ॥ ३ ॥

स्पष्टं ॥ ३ ॥

अथ महाव्रतस्य मध्यमस्थानत्वं प्रशंसति ।

अथैतद्व्रतमन्नं वै व्रतं नवा अन्यत्र मध्यादन्नन्धिनोति यद्व्रतम्मध्यत उपयन्ति मध्यत एव तदन्नाद्यन्धीयते तस्मान् मध्ये सदन्नन्धिनोति ॥ ४ ॥

स्पष्टं ॥ ४ ॥

अथ महाव्रतान्तरभाविषड्हद्वयं प्रशंसति ।

यत् क्रुप्तौ षड्हावुपयन्ति क्रुप्तया एव ॥ ५ ॥

स्पष्टं ॥ ५ ॥

अथ द्वादशाहस्य दशान्यतिरात्रौ च क्रमेण प्रशंसति।

अथैतानि द्वादशाहस्य दशाहानि वाचमविच्छिन्नामुपयन्ति प्रजननायाथैतौ प्रायणीयोदयनीयावतिरात्रौ येनैव प्राणेन प्रयन्ति तमभ्युद्यंति ॥ ६ ॥

उक्तार्थं ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्थि प्रपाठकस्य
षोडशः खण्डः।

अथ सप्तदशः खण्डः।

अथ सप्तसप्तमेकोनपञ्चाशद्रात्रिसत्यं प्रजाभिभवकामानां सत्रमाह।

अतिरात्रः षड्भिष्षवः षडहा द्वादशाहस्य दशाहानि सहाव्रतं चातिरात्रस्य ॥ १ ॥

स्पष्टं ॥ १ ॥

अथासां प्रजातिक्रमणसाधनत्वं प्रदर्शयधिकारिणमाह।

एताभिर्वा इन्द्राग्नी अत्यन्यादेवता अभवतामत्यन्याः प्रजा भवन्ति य एताउपयन्ति ॥ २ ॥

इन्द्राग्नी पूर्वं एताभिरावाभिः अन्यादेवता अभिभवतां देवानां श्रेष्ठावभूतामित्यर्थः अत इदानीमेतेता अमूता अपि अन्याः प्रजाश्च भवन्ति अभिक्रामन्त्यधिकाभवन्तीत्यर्थः ॥ २ ॥

एताभ्योजोद्वारा प्रशंसति।

इन्द्राग्नी वै देवानामोजिष्ठाभ्योजिष्ठाभवन्ति य एता उपयन्ति ॥ ३ ॥

स्पष्टं ॥ ३ ॥

अथ षड्हादीन् क्रमेण प्रशंसति।

यत् क्रृप्तान् षडहानुपयन्ति क्रृप्ता एवाथैतानि द्वादशाहस्य द्वादशाहानि वाचमविच्छिन्नामुपयन्ति प्रजननायाथैतद्धतमथैती प्रायणीयोदयनीयावतिरात्रौ येनैव प्राणेन प्रयंति तमभ्युद्यंति ॥ ४ ॥

उक्तप्रायमेतत् ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य सप्तदशः खण्डः।

अथ अष्टादशः खण्डः।

अथ ऋत्विक्कामनायामेकषष्टिरात्रं सत्रमाह।

अतिरात्रश्चतुर्विंशं प्रायणीयमहस्तयोभिप्लवाः षडहाः पृष्ठ्यः षडहोभिजित् त्रयः स्वरसामानोदिवाकीर्त्यमहस्त्रयः स्वरसामानोविश्वजित्पृष्ठ्यः षडहस्त्रयस्त्रिंशारम्भण एकोभिप्लवः षडहआयुश्च गौश्च द्वे अहनी द्वादशाहस्य

दशाहानि महाव्रतञ्चातिरात्रश्च तदेतदेकषष्टिरात्रं दैवानां व्रात्यानां ॥ १ ॥

मध्येऽभिजित्प्रभृतीनि नवरात्राणि ततः पूर्वं पृष्ठ्यः षडहः ततः पूर्वं चय अभिप्लवाः षडहाः ततः पूर्वं आद्यो प्रायणीयचतुर्विंशो नवरात्रात्परमाहर्त्तः षडहः ततस्त्रयस्त्रिंशस्तोमप्रमुखः एकोभिप्लवः षडहस्ततः षायुष गोष ये अहनी ततो द्वादशाहस्य दशाहानि ततोन्त्योपान्त्यौ व्रतोदयनीयाविति क्रमः एतदेकषष्टिरात्रं व्रात्यानां सङ्घात्मकानां वस्त्रादीनां सर्वं दैवानामिति स्वार्थिकस्तद्धितः ॥ १ ।

देववरुणेति मन्त्रेण देवयजनाध्यवसानानन्तरं होमः कर्त्तव्य इति विधास्यति तदर्थमाख्यायिकामाह ।

दैवा वै व्रात्याः सत्रमासत वृधेन स्थपतिना ते ह वा अनिर्याच्य वरुणꣳ राजानं देवयजनन्दिदीक्षुस्तान् ह वरुणो राजानुव्याजहारान्तरेमि वोयज्ञियाद्भागधेयान्न देवयानं पन्थानं प्रज्ञास्यथेति तस्मात्तेभ्यो न हविर्गृह्णन्ति न ग्रहं ॥ २ ॥

पूर्वं व्रात्या देवाः वृधेन स्थपतिना यजमानेन उक्ताः सत्रमासत ततो यद्वरुणं देवराजानमवाचयित्वैव दिदीक्षुर्दीक्षियमाणान् देवान् वरुणो व्याजहारोक्तवान् हे देवाः यतोयूयन्देवयजनमयाचित्वैव दीक्षिताः स्थितास्ततो वोयुष्मान् यज्ञियाद्भागधेयात् सोम-

चर्वादिरूपादिकं भागं अन्तरेमि वियोजयामि किञ्च देवयानं पन्थानं देवैर्गन्तव्यं यज्ञमार्गान्न प्रज्ञास्यथ इति व्याजहार तस्मात्तेभ्यो न हविर्गृह्णन्ति तथा सोमग्रहं न गृह्णन्ति तस्माद्देवयजनायाचनेन देवान्वरुणः शशाप अतः सत्रिभिर्वक्ष्यमाणमन्त्रेण होतव्यमित्यर्थः ॥ २ ॥

अथैतत्सत्रं सर्वनिधिसाधनमिति विवक्षुराह ।

अथ ह वै तर्हि नौषधीषु पय आसीन्न क्षीरे सर्पिर्न्न मांसे मेदो न त्वचि लोमानि न वनस्पतिषु पलाशानि तद्यत एतदेकषष्टिरात्रं दैवाव्रात्या उपायꣳ स्ततोवै तानि तान्येतैर्व्वीर्य्यैः समसृज्यन्त तेजस्वन्त्येवासन् पयस्वन्ति ॥ ३ ॥

अथ ह वै एवं सति पूर्वं वरुणायाचितदेवयजने सत्रेऽनुष्ठिते सति तर्हि तदानीं ओषधीः पयः सारभूतारसानासीत् नक्षीर इत्यादि स्पष्टं मेदोमांसरस. तथा सति यद्युवा यतो यस्मादुक्त एकषष्टिरात्रं व्रात्यादेवानुपायन् ततस्तस्मात् स खलु तानि भूतकार्य्याण्योषध्यादीनि एतैर्व्वीर्यैः पयआदिलक्षणैः स्वसामर्थ्यैः सहिता असृज्यन्त सृष्टा अभूवन् तदेव तेजस्वन्त्यासन् तेजोयुक्तान्यभवन् पयस्वन्ति च प्रशस्तपयोयुक्तानि च ॥ ३ ॥

उक्तार्थविश्वासाय पूर्वसिद्धं श्लोकबद्धं ब्राह्मणमुदाहरति ।

तदेष श्लोकोभ्यनूच्यत ॥ ४ ॥

श्लोक इति जात्येकवचनं व्यत्ययेन चाश्लोको अभ्यनूच्यतेत्यर्थः ॥ ४ ॥

तत्र प्रथमं श्लोकमाह ।

किमकर्त्तेति यत्पुत्रान् मुहुर्देवाः अपृच्छत महोबुधस्यासीद्दीक्षा सचीरे सर्पिराहरत् ॥ ५ ॥

देवा यद्यदा पुत्रान् गणदेवान् किमकर्त्तकं कृतवन्तोयमयमिति मुहुरभीक्ष्णमोषध्यादीनाम्य आदिप्राप्तिविषयं पृच्छतः पृच्छन्तेति वचनव्यत्ययः यदा हे देवाः यूयं पुरा पृच्छतेत्यपेक्षायां तत् यदा अपृच्छन्त अत आत्मादेवास्तत्प्रश्नादुत्तरमवदन्निति शेषः बुधस्य महोमता दीक्षा आसीत् वरुणतादित्यगणलाभार्थनपूर्विकाऽभूत् बुधः क्षीरे अपगतं सर्पिराहरत् स्थापितवान् इति ॥ ५ ॥

अथ द्वितीयमाह ।

महोन्दीक्षां सोमायनोबुधोयदुदयच्छदनन्दत्सर्वमाप्नोन्मा मे मेदोधा इति ॥ ६ ॥

सोमायनः सोमसुतः महतोन्दीक्षां उदयच्छत् कृतवान् तदा सर्वं जगदनन्दत् तत्संज्ञाज्ञानमाप्नोत् पय आदि किंच मन्मांसं मेदोयमांसं मेदः पूर्वमपगतं अधाः अधत्त स्थापितवान् पुरुषव्यत्ययः एवं यद्यताऽब्रुवन्निति शेषानुसारेण ॥ ६ ॥

अथ तृतीयमाह ॥

दरिद्रा आसन् पशवः कृशाः सन्तोव्यस्थकाः सौमाय-नस्य दीक्षायाꣳसमसृज्यन्त मेदसेति ॥ ७ ॥

व्यस्थका अस्थिभीरहिताः शिष्टं स्पष्टं स वरुणप्रार्थनं सत्र-मुषित्वा पय आदीनि पुनर्लब्धवन्तः तस्मै इत्युत्तरं भवति ॥ ७ ॥

एवमर्थवादेन वरुणतोदेवयजनप्रार्थनं प्रशस्येदानीं समन्त्रकं देवयजनाध्यवसायाङ्गहोमं विधत्ते ॥

तद्यएतदेकषष्टिरात्रमुपेयुस्ते देवयजनमध्यवसाय गार्हपत्याआहुतिञ्जुहुयुर्देव वरुण देवयजनन्नोदेहि स्वाहेति ते दत्ते देवयजनेन यजन्ते ॥ ८ ॥

तत्तस्मादे यजमाना एतत् निर्दिष्टमेकषष्टिरात्रमुपेयुः ते देवयजनमिदं भविष्यतीत्यध्यवसाय निश्चित्य गार्हपत्येऽग्नौ देववरुणेति मन्त्रेणाहुतिञ्जुहुयुः प्रथमन्ते इति पदं ये इति वाक्यादिभूतस्य सम्बन्धार्थं तत्तदा होमः देवयजने वरुणानुज्ञाते यजन्ते ॥ ८ ॥

उक्तार्थोपसंहारपूर्वकमधिकारिणो दर्शयति ।

ते सर्व्वामृद्विमार्ध्नुवन् सर्वामृद्विमृध्नुवन्ति य एतदुप-यन्ति ॥ ९ ॥

ते ब्रात्यादेवा उत्तैकषष्टिरात्रं नापत्य सर्व्वामृद्धिमार्ध्नुवन् अतः समृद्धार्थिनो अत्राधिकारिण इत्यृक्तं भवति ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य अष्टादशः खण्डः।

अथ एकोनविंशः खण्डः ॥

अथामृतत्वसाधनं शतरात्रं सत्रमाह।

अतिरात्रोज्योतिर्गौरायुस्त्र्यहस्त्रयस्त्रिंशाभिप्लवाः षड्हा द्वादशाहस्य द्वशाहानि महाव्रतञ्चातिरात्रश्च ॥ १ ॥

स्पष्टं ॥ १ ॥

अस्य फलं सार्थवादमाह।

देवा वै मृत्योरबिभयुस्ते प्रजापतिमुपाधावंस्तेभ्य एतेन शतरात्रेणामृतत्वं प्रायच्छदेतदाव मनुष्यस्यामृतत्वं यत् सर्व्वमायुरेति वसीयान् भवति सर्वमायुर्य्यन्ति वसीया᳕सोभवन्ति य एतदुपयन्ति ॥ २ ॥

मृत्योर्भीतिभ्योदेवेभ्यः प्रजापतिरेतेन शतरात्रमत्रेणामृतत्वं प्रायच्छत् अमृतत्वायैतत् साधनमिति प्रायच्छदित्यर्थः अमृतत्वमनालक्षणं देवानां मनुष्याणान्तु किममृतत्वमिति तत्राह सर्व्वं प्रजापतिना कृत्स्नं शतमायुरेति वसीयान् भवति जीवनकाले एतदाव एतदेव मनुष्यस्यामृतत्वं एतदुपयन्तीत्यादि स्पष्टं ॥ २ ॥

अस्यानुष्ठाने किञ्चिन्नियममाह।

अभिप्रयायमभिषुण्वन्त्यभिक्रान्त्यै समानत्राभिषुण्वन्ति प्रतिष्ठित्यै ॥ ३ ॥

अभिप्रयायं सारस्वतसत्रादभिगत्याभिगत्य प्रतिदिनमभिषुण्वन्ति उत्तरोत्तरमभिक्रान्त्यै अभिद्रुद्वा भवति समानत्रवेति विकल्पः स्यात् अत्र सूत्रं शतरात्रेभिप्रयायमभिषुण्वन्त्यभिक्रान्त्यै समानत्राभिषुण्वन्ति प्रतिष्ठित्याइति स विकल्पः स्याद्यात्तःसुनुयुर्यथा सारस्वतेषु यत्र तु क्व च समानदेशे वा यथान्येषामयान्त एव चक्रोवन्ति सहोहविर्द्धानानि कारयित्वाहःसंस्थासु चक्राणि विपरिवर्त्तयेयुरित्याचार्य्यास्तदभिप्रयातरूपमप्रयाणं च समानत्राभिषवोऽहरहरेतत् कुर्य्युरिति धानञ्जय्यशाण्डिल्यावभिप्लवेवेति गौतमस्त्विकद्रुकेष्वित्येक इति अभिप्रयायमभिषुण्वन्त्यस्मिन् पक्षेऽहरहरेतत् कुर्य्युरित्यादि द्रष्टव्यम् ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्विंशाध्यायस्य
एकोनविंशः खण्डः ॥

अथ विंशः खण्डः ॥

अथ सर्वकामसाधनं गवामयनाख्यं संवत्सरं सर्व्वप्रकृतिभूतं सत्रमाह।

अतिरात्रश्चतुर्विंशं प्रायणीयमहश्चत्वारोऽभिप्लवाः षड्हाः पृष्ठ्यः षड्हः स मासः स द्वितीयः स तृतीयः स चतुर्थः स पञ्चमस्त्र्योभिप्लवाः षडहाः पृष्ठ्यः षड होऽभिजित् त्रयः

स्वरसामानोदिवाकीर्त्यमहस्तृयः स्वरसामानो विश्वजित् पृष्ठ्यः षडहस्तृयस्त्रिरात्रस्त्रयोभिप्लवाः षडहाः पृष्ठ्यः षडहस्त्रयस्त्रिरात्रश्चत्वारोभिप्लवाः स मासः स द्वितीयः स तृतीयः स चतुर्थस्त्रयोभिप्लवाः षडहा आयुश्च गौश्च द्वे अहनी द्वादशाहस्य दशाहानि महाव्रतञ्चातिरात्रश्च ॥ १ ॥

स्पष्टं ॥ १ ॥

अथ पूर्वविहितं गवामयनिकं ब्राह्मणमत्रादिशति ।

संवत्सरब्राह्मणं ब्राह्मणमिति ॥ २ ॥

यत् संवत्सरब्राह्मणं गावो वा एतत् सत्रमासत इत्यारभ्य प्रथमपञ्चिकायां चतुर्थपञ्चमाध्यायाभ्यामुक्तं तदेवाचापि ब्राह्मणमिति द्रष्टव्यं ननु किमर्थमत्र विधानं पूर्वमेव विहितत्वात् न अत्र प्रसङ्गः संवत्सरप्रकृत्यर्थं विधातव्यत्वात् तर्हि पूर्वत्र वा किमर्थं विधानं तत् सर्वं प्रकृतिभूतान्यहानि गवामयने विद्यन्ते अतोऽग्निष्टोमादीनां तदपेक्षत्वात् पूर्वं वक्तव्यमेव तत्रेत्यतिदेशमात्रेणैवालं किमहःकल्पनया सत्यमेवं तथापि सुखबोधनार्थं सहस्रेण प्रदर्शितमित्यदोषः ॥ २ ॥

वेदार्थस्य प्रकाशेन तमोहार्दिविवारयत् ।
पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीर-
बुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते
माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे
चतुर्विंशाध्यायस्य विंशः खण्डः।
चतुर्विंशोध्यायः सम्पूर्णः।

पञ्चविंशोऽध्यायः।

अथ प्रथमः खण्डः।

यस्य निश्वसितं वेदा योवेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं॥

अथ स्वर्गसाधनमादित्यानां मध्ये पृष्ठ्यमयनमाह।

अतिरात्रषडहं प्रायणीयमहर्दो त्रिवृत्पञ्चदशौ षडहौ पृष्ठ्यः षडहोदौ त्रिवृत्पञ्चदशौ षडहौ स मासः स द्वितीयः स तृतीयः स चतुर्थः स पञ्चमस्तयास्त्रिवृत्पञ्चदशाः षडहाः पृष्ठ्यः षडहस्त्रिवृद्बृहत्स्यतिस्तोमस्तयः स्वरसामा-

नोदिवाकीर्त्यमहस्त्रयः स्वरसामानः पञ्चदश इन्द्रस्तोम उक्थ्यः पृष्ठ्यः षडहस्त्रयस्त्रिंशारम्भण एकः पञ्चदशस्त्रिवृत् षडहो द्वादशाहस्य दशाहानि व्यूढा अग्निष्टोमास्त्रिवृत उद्भिच्च बलभिच्च द्वे अहनी द्वौ पञ्चदशत्रिवृतौ षडहौ पृष्ठ्यः षडहो द्वौ पञ्चदशत्रिवृतौ षडहौ स साणः स द्वितीयः स तृतीयः स चतुर्थः पञ्चदशत्रिवृत्षडहः पृष्ठ्यः षडहः पञ्चदशत्रिवृत्षडहोगौश्चायुश्च द्वे अहनी छन्दोमदशाहोऽष्टाचत्वारिंशं प्रथममहरथ चतुश्चत्वारिंशं चत्वारिंशत्षट्त्रिंशं द्वात्रिंशं त्रिंशं द्वे अष्टाविंशे पञ्चविंशं चतुर्विंशमहाव्रतञ्चातिरात्रश्च ॥ १ ॥

अतादिनो द्वे अहनी षडहसास्यान्तोपान्त्ये भवत द्वौ त्रिवृदित्यादिना पञ्चमासाः पूरणीयाः तत्रायुग्मान्यहानि त्रिवृन्ति युग्मानि तु पञ्चदशानीति षडहेषु त्रिवृत्पञ्चदशयोर्विवेकः चयस्त्रिवृत्पञ्चदश इत्यादि स्वरसामान इत्यन्तेन षडहसाम्याद्यानि त्रिंशत्यहानि आद्ये द्वे इति तत्पूर्त्तिः तत्राभिजित्स्थानीयस्त्रिवृद्बृहत्स्तोमः दिवाकीर्त्यन्तु मध्यममहर्न मासान्तर्भावि अयं प्रथमः पक्षः सप्तमे मासि चयः स्वरसामानः अतो विश्वजित्स्थानीयः पञ्चदशस्तोम उक्थ्यसंस्थ इन्द्रस्तोमः। तत आवृत्तः पृष्ठ्यः षडहः एकः पञ्चदशत्रिवृत्षडहः अतपूर्व्वपरोत्थेनायुग्मानि अहानि

पञ्चदशानि युग्मानि तु त्रिवृन्ति ततो द्वादशाहस्य दशाहानि तानि च व्यूढच्छन्दस्य त्रिवृत्स्तोमकान्यग्निष्टोमसंस्थानि तत उद्भिदलभिदौ ततान्ते महाव्रतोदयनीये अत्र मिलित्वैकोमासः ततो द्वौ द्वौ पञ्चदशत्रिवृतावित्यादिसंख्याया अष्टमनवमदशमैकादशमासाः पूरणीयाः ततः पञ्चदशत्रिवृत्षडहो प्रथमतृतीयौ द्वितीयः पृष्ठ्यः षडह इत्यष्टादशाहानि ततो गोष्टोम आयुष्टोमाविति विंशत्यहानि ततश्छन्दोमदशाह इति द्वादशमासपूर्त्तिः छन्दोमदशाह इत्थं अष्टाचत्वारिंशं जागतं प्रथमं महश्चतुश्चत्वारिंशं त्रैष्टुभं द्वितीयञ्चत्वारिंशं पाङ्क्तं तृतीयं षट्त्रिंशं बार्हतञ्चतुर्थं द्वात्रिंशमानुष्टुभं पञ्चमन्त्रिंशं वैराजं षष्ठं अष्टाविंशे आर्ष्णिहे सप्तमाष्टमे पञ्चविंशं पाङ्क्तं नवमं पूर्वन्तु पाङ्क्तं अष्टाक्षरपादपञ्चकापेक्षया द्वितीयपञ्चाक्षरपादपञ्चकापेक्षयेति चतुर्विंशं गायत्रं दशममिति ॥ १ ॥

अथास्य नाम दर्शयति ।

आदित्यानाम्मध्ये पृष्ठं ॥ २ ॥

स्पष्टं ॥ २ ॥

अस्य फलमाह ।

मध्ये पृष्ठेन वा आदित्याः स्वर्गं लोकमाक्रमन्त यन्मध्ये पृष्ठान्युपयन्ति स्वर्गस्य लोकस्याक्रान्त्यै ॥ ३ ॥

स्पष्टार्थः ॥ ३ ॥

अथ पृष्ठानि प्रशंसति।

अन्नं वै पृष्ठान्यन्नमेव तन्मध्यतोधीयते तस्मान्मध्ये सदन्नन्धिनोति ॥ ४ ॥

पृष्ठानां प्रयोगेणान्नस्य सिद्धेः पृष्ठान्यन्नमित्युपचर्य्यते तेषां मध्ये प्रयोगेण अन्नमेव मध्यदेशे स्थापितं भवति ॥ ४ ॥

अथ तानि पुनः पशुरूपेण प्रशंसति।

पशवः पृष्ठानि पशूष्वेव प्रतितिष्ठन्ति ॥ ५ ॥

स्पष्टं ॥ ५ ॥

अथ पृष्ठगतं त्रिवृत्पञ्चदशस्तोमत्वं प्रशंसति।

चक्रे वा एते साकं वृतोयत् त्रिवृत् पञ्चदशौ स्तोमौ यं कामं कामयन्ते तमेतेनाभ्यश्नुवते यत्र हि चक्रीवता काम्यते तत्तदभ्यश्नुते ॥ ६ ॥

त्रिवृत्पञ्चदशौ स्तोमाविति यत् यौ स्तः तौ एते कामं वृतोयत् सहैव वर्त्तमाने हि चक्रे खलु यथा रथस्य चक्रे परिभ्रमतः एवं सर्वेष्वहःसु एतौ प्रायेण परिभ्रमतः एतेन स्तोमद्वयेनेत्यर्थः चक्रीवता चक्रस्थानीयोक्तस्तोमद्वयवता पृष्ठे यत्र यत्र यद्यत् कामयते तत्र तत्र तत्काम्यमश्नुते ॥ ६ ॥

अथ बृहत्स्तोमं स्तौति।

अथैष त्रिवृद्बृहस्पतिस्तोम एतेन वै बृहस्पतिर्देवानां पुरोधामगच्छत् पुरोधाकामानुपेयुर्गच्छन्ति पुरोधामुर एनान्दधते ॥ ७ ॥

स्पष्टोऽर्थः ॥ ७ ॥

अथ स्वरसामानोदिवाकीर्त्यौ च सह प्रशंसति ।

अथैते स्वरसामानः शिरोवै दिवाकीर्त्यं प्राणाः स्वरसामानोयद्दिवाकीर्त्यमभितः स्वरसामानो भवन्ति शिरस्येव तत्प्राणाधीयन्ते ॥ ८ ॥

उक्तार्थमिदं ॥ ८ ॥

अथेन्द्रस्तोमं प्रशंसति ।

अथैष पञ्चदश इन्द्रस्तोम उक्थ्य एतेन वा इन्द्रोत्यन्या देवता अभवदत्यन्याः प्रजाभवन्ति य एतदुपयन्ति ॥ ९ ॥

अथ स्वरसामानन्तरं पञ्चदशस्तोमक उक्थ्यसंस्थ इन्द्रस्तोमः कर्त्तव्यः ॥ ९ ॥

अथ द्वादशाहस्य दशाहानि स्तोमसंस्थाविकृतीनि प्रशंसति ।

अथैतानि द्वादशाहस्य दशाहानि व्यूढा अग्निष्टोमास्त्रिवृतोमध्यतः पाप्मनोमुच्यन्त एष वाव देवतल्पो देवत-

ल्यमेव तदारोहन्ति तल्पयाभवन्ति प्रवमीयमस्तल्पमाप्नुवन्ति ॥ १० ॥

अग्निष्टोमत्वात् त्रिवृत्त्वाच्च दशाहानि तेजोरूपाणि अत एतदनुष्ठानात्तमोरूपात् पाप्मनोमुच्यन्त इत्यर्थः किञ्च एष दशरात्रः समग्रान्तर्वर्त्तित्वात्तल्प इत्युपचर्य्यते यथा लौकिकस्तल्पो गृहस्यान्तः यद्वा देवानां निवासयोग्यत्वात्तल्पत्वं अतस्तदेतदनुष्ठातारोपि देवतल्पमेव रोहन्ति अस्त्वेवं किन्तत इत्याह तल्पयातल्पाभवन्ति तस्यैव विवरणमुत्तरं वाक्यं ॥ १० ॥

अथोद्भिद्बलभिदौ स्तूयेते।

अथैतावुद्भिद्बलभिदावेताभ्यां वै बृहस्पतिर्देवेभ्य पशून्दृंहजत्यपशूनेवैताभ्यामुत्सृजन्तः ॥ ११ ॥

उद्भिद्यते गवादिलक्षणं फलमिति उद्भित् तथा बलेन भिद्यते उत्पाद्यते फलमिति बलभित् अथवा बलनामानमसुरन्देवागवार्थं बृहस्पतिः भिन्नवाननेनेति बलभिदेतावेकार्थौ शिष्टं स्पष्टं ॥ ११ ॥

अथ गोआयुषी प्रशंसति।

अथैते गो आयुषी मिथुनौ स्तोमावुपयन्ति प्रजात्यै ॥१२॥

एकया गौरतिरिक्तः एकया आयुरूनः अतिरिक्तः पुमान् ऊनः स्त्रिया इत्यनयोर्मिथुनत्वं ॥ १२ ॥

अथ क्षुद्रोमदशाहः स्तूयते।

अथैष छन्दोमदशाहश्छन्दसान्दोहोर्व्वाञ्चि च्छन्दाꣳस्यपयन्ति तस्मादर्व्वाञ्चोभुञ्चन्तः पशव उपतिष्ठन्ते ॥१३॥

छन्दोमः छन्दोभिर्निर्मितोदशाह एष एव च्छन्दसां दोहः एवं सति अष्टाचत्वारिंशं जागतं प्रथममहरित्यादिक्रमेण छन्दसामवरोहेणोपयन्ति सचिवस्तस्माद्भुञ्जते पयसादिना पालयन्तोगवादिपशवः अर्व्वाञ्चोऽधोमुखाः सायं स्वामिगृहमुपतिष्ठन्ति ॥१३॥

अथ महाव्रतं प्रशंसति।

अथैतद्वै तमन्नं वै व्रतन्नं वा अन्यत्र मुखादन्नन्धिनोति यदुपरिष्टाद्व तमुपयन्ति मुखत एव तदन्नाद्यन्धीयते तस्मान्मुखे सदन्नन्धिनोति ॥ १४ ॥

गतमिदं ॥ १४ ॥

अथाद्यन्ते अहनी प्रशंसति।

अथैतौ प्रायणीयोदयनीयावतिरात्रौ येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥ १५ ॥

एतदपि गतं अयादित्यानामयनस्य कल्पोमध्ये पृष्ठस्य क्रमोतिरात्रः क्रमं चतुर्विंशमहराभिप्लविकस्य प्रथमस्याङ्गः प्रसोमासोविपश्चित इत्यादिकं द्रष्टव्यं ॥ १५ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
प्रथमः खण्डः।

अथ द्वितीयः खण्डः।

अथ पुरस्तात् पृष्ठ्याख्यमङ्गिरसामयनमाह।

अतिरात्रश्चतुर्विꣳशं प्रायणीयमहः पृष्ठ्यः षडहश्चत्वारस्त्रिवृतोभिप्लवाः षडहाः स मासः स द्वितीयः स तृतीयः स चतुर्थः स पञ्चमस्त्र्यस्त्रिवृतोभिप्लवाः षडहा पृष्ठ्यः षडहस्त्रिवृद्बृहस्पतिस्तोमस्त्र्यः स्वरसामानोदिवाकीर्त्यमहस्त्र्यः स्वरसामानः पञ्चदश इन्द्रस्तोम उक्थ्यः पृष्ठ्यः षडहस्त्र्यस्त्रिꣳशारम्भण एकस्त्रिवृदभिप्लवः षडहो द्वादशाहस्य दशाहानि व्यूढा अग्निष्टोमास्त्रिवृत उद्भिच्च बलभिच्च द्वे अहनी चत्वारस्त्रिवृतोभिप्लवाः षडहाः पृष्ठ्यः षडहः समासः स द्वितीयः स तृतीयः स चतुर्थो द्वौ त्रिवृतावभिप्लवौ षडहौ पृष्ठ्यः षडह आयुश्च गौश्च द्वे अहनौ क्रन्दोम दशाहश्चतुर्विꣳशं प्रथममहर्द्वे अष्टाविꣳशे त्रिꣳशं द्वात्रिꣳशꣳ षट्त्रिꣳशच्चत्वारिꣳशच्चतुश्चत्वारिꣳशमष्टाचत्वारिꣳशच्चतुर्विꣳशमहश्चातिरात्रश्चाङ्गिरसां पुरस्तात् पृष्ठ्यं ॥ १ ॥

आद्ये अहनी पूर्ववत् षष्ठसामानौ भवतः पृष्ठ्यः षडहस्त्रयस्त्रिꣳशतुर्भिरभिप्लवषड्हैरेकोमास इत्येवमादितः पञ्चमासाः स्युः ते चा-

भिप्लवाः सर्वेऽपि त्रिवृत्स्तोमकाः षष्ठे मासि त्रयस्त्रिवृदभिप्लवाः पृष्ठ्यः षडहोभिजित्स्थानीयको बृहस्पतिस्तोमस्ततस्त्रयः स्वरसामानः आद्ये अहनो इति षष्ठोमाः ततोदिवाकीर्त्यमहः पूर्ववदेव सप्तमोमासत्रयः स्वरसामान इन्द्रस्तोमश्च तत आवृत्तः पृष्ठ्यः षडहस्त्रिवृदभिप्लव एकस्ततो द्वादशाहस्य दशाहानि व्यूढादीनि पूर्ववदशाहविशेषणानि तत उद्भिदलभिदौ ततोन्ये महाव्रतोदयनीये द्वे अहनो इति त्रिंशदहानि अथाष्टमादित्वारोमासाश्चतुर्भिरावृत्तैरभिप्लवैरेकेन पृष्ठ्येन चैकैकमासकल्पनया आप्तव्याः द्वादशस्तु मासः द्वाभ्यां त्रिवृदभिप्लवाभ्यां आवृत्तैकेन पृष्ठ्यषडहेन सायुर्गोभिष्कन्दोजनद्वाहैः पूर्यते छन्दोमदशाहेषु चतुर्विंशप्रभृतीनामष्टाचत्वारिंशत्पर्यन्तान्यनुक्रमेणैव पञ्चविंशं नविद्यते तत् स्थाने चतुर्विंशं तच्चान्ततोदशमं भवति एतत्सचमङ्गिरसां पुरस्तात् पृष्ठ्यमित्युच्यते प्रथमत एव पृष्ठ्यषडहस्य प्रयोज्यत्वात् ॥ १ ॥

अथास्य फलं सप्ररोचनमाह ।

पुरस्तात् पृष्ठ्येन वा अङ्गिरसः स्वर्गं लोकमाक्रमन्त यत् पुरस्तात् पृष्ठान्युपयन्ति स्वर्गस्य लोकस्याक्रान्त्यै ॥२॥

स्पष्टं ॥ २ ॥

अथ पशुत्वात् पृष्ठान्यन्नपशुत्वेन प्रशंसति ।

अन्नं वै पृष्ठान्यन्नमेव तन्मुखतोधीयते तस्मान् मुखे सदन्नमिनोति पशवः पृष्ठानि पशुष्वेव प्रतितिष्ठन्ति ॥ ३ ॥

स्पष्टं ॥ ३ ॥

अथ छन्दोमदशाहपर्य्यन्तस्याहर्व्विधानं सम्प्राप्य पूर्वसत्रस्यादित्यानामयनस्यार्थवादमतिदिशति।

यदन्यच्चक्राभ्याꣳ साकं वृद्भ्यान्तत्समानमाछन्दोमदशाहात् ॥ ४ ॥

अत्राभिप्लवे पञ्चदशस्याभावात् पूर्ववेषम्याच्चक्रे वा एते साकं वृतीयत् त्रिवृत्पञ्चदशौ स्तोमाविति यत्किञ्चादश्यछन्दोमदशाहपर्य्यन्तं ब्राह्मणमत्रापि समानमित्यर्थः यद्यप्यत्रागुर्गौरिति क्रमः तथापि मिथुनत्वादर्थवादः समानएव ॥ ४ ॥

अथ छन्दोमदशाहं प्रशंसति।

अशैष छन्दोमदशाहश्छन्दसान्दोह ऊर्द्धानि छन्दाꣳस्यपयन्त्यनपभ्रꣳशायैष वाव देवयानः पन्थाः प्रदेवयानं पन्थानमाप्नुवन्ति य एतदुपयन्त्यशैतद्व्रतं ॥ ५ ॥

छन्दसामवरोहक्रमेणात्यल्पे क्रमेण कस्यचिच्छन्दसोनयभंगः स्यात् अतस्तदभावाय भवत्यैमं छन्दसामवरोहः एष एव छन्दोनुक्रमो देवलोकगमनमार्गः देवयजनमार्गः अथैतद्व्रतमित्यत्र प्रतीकग्रहणं पूर्वोक्तार्थवादानुकर्षणार्थं ॥ ५ ॥

आद्यन्ते अहनो प्रशंसति।

अथैतौ प्रायणीयोदयनीयावतिरात्रौ येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति॥ ६॥

गतमिदं। अस्यायनस्य पुरस्तात् पृष्ठस्य क्लप्तोतिरात्रः क्लप्तश्चतुर्विंशमहः क्लप्तः पृष्ठ्यः क्लप्तं प्रथममहरभिप्लवस्य यथा मध्ये पृष्ठ्य इत्यादिकल्पोद्दृष्टव्यः॥ ६॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
द्वितीयः खण्डः।

अथ तृतीयः खण्डः।

अथ द्वितिवातवतीरयनमाह।

अतिरात्रस्त्रिवृता मासं पञ्चदशेन मासꣳ सप्तदशेन मासमेकविꣳशेन मासन्त्रिणवेन मासन्त्रयस्त्रिꣳशेन मासम्महाव्रतं त्रयस्त्रिꣳशेन मासं त्रिणवेन मासमेकविꣳशेन मासꣳ सप्तदशेन मासं पञ्चदशेन मासं त्रिवृता मासमतिरात्रः॥ १॥

प्रथमं प्रायणीयोतिरात्रस्ततस्त्रिवृदादित्रयस्त्रिंशान्ताः आदितः षण्मासा आप्त्याः विषुवतः स्थाने महाव्रतं भवति तएव त्रिवृदादिमासा उत्तरस्मिन् पञ्चसि द्वादशादिसप्तमासान्ताः षण्मा-

सा: स्यु: तत्तदयनीयमहः एतानि त्रिषष्युत्तरशततत्रयमहानि स्युः अधिकयोर्हयोरङ्गोर्व्यवस्थाविषये सूत्रकारः इतिवातवतो-रयने द्वावेकोनौ मासौ सुनुयुस्त्रिवृतावितिं गौतमस्त्वयस्त्रिं-शावितिं धानञ्जयः उभौ वा त्रिंशिनौ स्यातां यद्येतद्ब्राह्मणमि-ति त्वयस्त्रिंशावेकोनाविति कल्पकारस्य मतं ॥ १ ॥

अथास्य फलं सप्रशंसनमाह ।

ऋतवोन प्रत्यतिष्ठ॰स्त एतेन प्रत्यतिष्ठन् प्रतिष्ठाकामा उपेयुः प्रत्येव तिष्ठन्ति षड्वा ऋतव ऋतुष्वेवैतेन प्रतितिष्ठन्ति ॥ २ ॥

स्पष्टं । ऋतुषु प्रतिष्ठानं नाम तत्तदृतुचितभोगास्पदत्वं ॥२॥

अथ मध्यमं महाव्रतमहः प्रशंसति ।

यद्व्रतम्मध्यत उपयन्ति मध्यत एव तदन्नाद्यन्नीयते तस्मान्मध्ये सदन्नन्धिनोति ॥ ३ ॥

गतमेतत् ॥ ३ ॥

अथ क्रतुसमयनं पक्षिरूपेण प्रशंसति ।

पक्षि वा एतत्समायणं यद्कामं कामयन्ते तमेते नाभ्य-श्नुवते यत्र यत्र हि पक्षी कामयते तत्तदभ्यश्नुते ॥ ४ ॥

पूर्वोत्तरमासषट्करूपपक्षद्वयमयुक्तमेतत्समायणं अस्त्येवं किं-त्वत इत्याह यद्कामं कामयन्ते इत्यादिना अथ सर्वकामसाधनमे-

वोपपादयति यत्र यत्र हि पत्नी इत्यादिना यद्वा पत्निवेत्यादि महाव्रतस्यैव स्तुतिः तच्च मध्यमाहस्त्वेन प्रधानत्वात् पत्न्यपि भवति अत एव सत्रनिर्व्वाहकत्वात् सत्रायणमित्युच्यते ॥ ४ ॥

आद्यन्तयोर्म्मासयोर्यत् त्रिवृत्त्वन्तत् प्रशंसति ।

त्रिवृता प्रयन्ति त्रिवृतोद्यन्ति प्राणा वै त्रिवृत् स्तोमानां प्राणैरेव प्रयन्ति प्राणेषु प्रतितिष्ठन्ति ॥ ५ ॥

त्रिवृतः प्राणत्वमसकृदुक्तम् ॥ ५ ॥

अथैतदयनं कर्त्तृद्वारा प्रशंसति ।

एतद्वै दृतिवातवन्तौ खाण्डव उपेतोविषुवति वातवानुत्तिष्ठति समापयति दृतिस्तस्मात्तनीयाꣳसोवातवता भूयाꣳसोदार्त्तेयाः ॥ ६ ॥

एतत्सत्रायणन्दृतिश्च वातवांश्चेत्यभौ यजमानौ खाण्डवे वने उपेतः अन्वतिष्ठतामित्यर्थः भूतकाले व्यत्ययेन वर्त्तमानप्रत्ययः एवमुत्तरयोरप्याख्यातयोर्द्रष्टव्यं तयोरनुष्ठानप्रयुक्तं किञ्चित् फलवैषम्यं वक्तुमाह वातवान् विषुवति महाव्रते सम्पूर्णे उत्तिष्ठति उदतिष्ठत् सत्रं समापितवान् दृतिस्तु तादृशमपि मासानाम्भार समापयन् यस्मादेवं तस्मादातवता वातवती वंशस्तनीयांसः अल्पार्थं तनवः कृशा अभवन् दार्त्तेया इतरवंश्यास्तु [illegible] प्रवृद्धा अभवन् अत उभयस्यानुष्ठानसद्भावे-

पि कृत्स्नानुष्ठानं प्रशस्तफलवदित्युक्तं भवति अत्र विधृतिभिः क्लृप्तं इति वातवतोरयनमाचिणवेभ्यस्त्रिवृद्वा उद्वत्युक्थानि पञ्चदशेभ्यः षोडशिनमित्यादिकं द्रष्टव्यं ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तविंशाध्यायस्य तृतीयः खण्डः।

अथ चतुर्थः खण्डः।

अथ सर्व्वर्द्धिसाधनं कुण्डपायिनामयनमाह।

मासन्दीक्षिताभवन्ति ते मासि सोमं क्रीणन्ति तेषां द्वादशोपसद उपसङ्गिश्चरित्वा सोममुपनह्य मासमग्निहोत्रञ्जुह्वति मासं दर्शपूर्णमासाभ्यां यजन्ते मासं वैश्वदेवेन मासं वरुणप्रघासैर्म्मासꣳ साकमेधैर्म्मासꣳ शुनासीर्य्येण त्रिवृता मासꣳ पञ्चदशेन मासꣳ सप्तदशेन माममेकविꣳशेन मासं त्रिणवेन मासमष्टादशत्रयस्त्रिꣳशान्यहानि द्वादशाहस्य दशाहानि महाव्रतञ्चातिरात्रश्च ॥ १ ॥

मासं मासमपूर्व्वेदीक्षिताभवन्ति दीक्षितधर्म्माननुतिष्ठेयुः तएव मासि दीक्षासम्बन्धिनि सम्पूर्णे प्रायणीयायां कृतायां प्रथमप्रवर्ग्योपसद्दिवसे सोमं क्रीणन्ति क्रीणीयुः तेषां द्वादशोपसदो

भवन्ति ततः क्रतोपसदहःपूर्व्वक्रीतं सोममुपनह्य उपरि देशे संरह्य ततः मासमग्निहोत्रमित्यारभ्य त्रिणवेन मासमित्यन्तत्रिगदसिद्धं आदितः षण्मासाहविर्य्यज्ञकाइतरेनुसौमिकाः द्वादशस्य मासस्य त्रयस्त्रिंशकान्यष्टादशान्यहानि ततो द्वादशाहस्य दशाहानि ततो महाव्रतं चातिरात्रश्चेति त्रिंशदहानीति द्वादशः ॥ १ ॥

अथ क्रमेणानुष्ठेयं अग्निहोत्रादिचतुष्टयं प्रशंसति।

अग्निहोत्रं दशहोता दर्शपूर्णमासौ चतुर्होता चातुर्म्मास्यानि पञ्चहोता सोम्योध्वरः सप्तहोता ॥ २ ॥

यदेतत् प्रथमे मास्यनुष्ठेयमग्निहोत्रमस्ति तच्च वित्तस्येत्यनुवाकोक्तोदशहोता तेन यो होमोस्ति सोमेन क्रतो भवतीत्यर्थः एवमुत्तरवाक्येष्वपि द्रष्टव्यं दर्शपूर्णमासौ द्वितीयमास्यनुष्ठेयावेव चतुर्होता तथा मासचतुष्टये क्रमेणानुष्ठेयानि चातुर्मास्यान्येवं पञ्चहोता यः सौम्योध्वरः उत्तरमासषट्कसम्बन्धी सएव सप्तहोता अग्निहोत्रादि चतुष्टयमध्वर्य्युब्राह्मणे स्पष्टमाम्नातं पृथिवी होता अग्निर्होता महाहविर्होतेति तानि क्रमेण चतुर्होतृपञ्चहोतृसप्तहोतृणां प्रतीकाः दशहोतुः प्रतीकस्तु प्रदर्शित एव ॥ २ ॥

अथैतेषां फलमाह ॥

एते वाव सर्वेण यज्ञेन यजन्ते यएतदुपयन्ति सर्वएव भवन्ति ॥ ३ ॥

ये सत्रिण एतदुपयन्ति एते वाव एतगव सर्व्वे अग्निहोत्रादि-भेदेन प्रकृतिविकृत्यात्मना च यो यज्ञोस्ति तेन क्रतुक्षेनाभीष्टा भवन्ति अत एव पशुपुत्रधनस्वर्गादिफलैः समृद्धाभवन्ति ॥ ३ ॥

अथैषां शेषभक्षणे किञ्चिद्विशेषमाह ।

ते सर्वे कुण्डपायिनोत्मरुकैश्चमसैर्भक्षयन्ति ॥ ४ ॥

सर्वे सत्रिणः कुण्डे: पातारो भवन्ति अत एवास्मैतन्नाम सम्यक्त्वम् अत्मरुकैः अत्मरुर्वामदण्डरहितो मध्येत्यन्तमवनतः स्थूलः पात्रविशेषस्तादृशैश्चमसैर्भक्षयन्ति कुतः शिष्टसोमं ॥ ४ ॥

अत्रार्त्विज्यसमानतां विधत्ते ।

योहोता मीध्वर्युः मपोता य उद्गाता सनेष्टा सो-च्छावाकोयोमैत्रावरुणः सब्रह्मा सप्रतिहर्त्ता यः प्रस्तोता सब्राह्मणाच्छंसी सयावस्तूयः प्रतिप्रस्थाता सोग्नीत्त उन्ने-ता गृहपतिर्गृहपतिः सुब्रह्मण्यः सुब्रह्मण्यः ॥ ५ ॥

सुगमं ॥ ५ ॥

इति ताण्डामहाब्राह्मणे पञ्चविंशाध्यायस्य
चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

अथ सर्व्वसमृद्धिसाधनं तपश्चितामयनं सत्रमाह ।

संवत्सरन्दीक्षिताभवन्ति संवत्सरमुपसङ्गिश्वरन्ति संवत्सरं प्रसुतोभवति ॥ १ ॥

संवत्सरं प्रसुतो भवति संवत्सरं प्रसुनुयुरित्यर्थः सिद्धमन्यत् अत्राङ्गां विशेषकल्पनामात्रा सत्रप्रकृतिभूता गवामयनाहक्लृप्तिः यद्वा सर्वप्रकृतिभूतज्योतिष्टोमेनाङ्गां क्लृप्तिर्दृष्ट्वा तथा चार्षेयकल्पः गवामयनेन क्लृप्तं तपश्चितामयनं ज्योतिष्टोमेन वा विकृतिमेनेति ॥ १ ॥

तत्संवत्सरन्दीक्षिताभवन्ति तप एव तेन तप्यन्ते यत्संवत्सरमुपसङ्गिश्वरन्ति पुनत एव तेन यत्संवत्सरं प्रसुतोभवति देवलोकमेव तेनापियन्ति ॥ २ ॥

दीक्षायां पयोव्रतादिनियमसद्भावात् दीक्षा संवत्सरेण तप एव तप्तं भवति ततः संवत्सर पसदनुष्ठानेन देवत्वप्राप्तये सत्कृता भवन्त्येव ततः संवत्सरसोमयागेन पूताः देवलोकं देवनिवासस्थानं प्राप्नुवन्ति ॥ २ ॥

अस्य फलं सप्ररोचनमाह।

एतेन वै तपश्चितोदेवाः सर्व्वामृद्धिमार्ध्नुवन् सर्व्वामृद्धिमृर्ध्नुवन्ति य एतदुपयन्ति ॥ ३ ॥

स्पष्टोर्थः ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
पञ्चमः खण्डः।

अथ षष्ठः खण्डः।

अथ सर्व्वर्द्धिसाधनं प्रजापतेर्द्वादशसंवत्सराख्यं सत्रमाह।

त्रयस्त्रिवृतः संवत्सरास्त्रयः पञ्चदशास्त्रयः सप्तदशास्त्रय एकविꣳशाः प्रजापतेर्द्वादशसंवत्सरं ॥ १ ॥

सुज्ञानमिदं ॥ १ ॥

अथास्य फलं सप्ररोचनमाह।

एतेन वै प्रजापतिः सर्व्वस्य प्रसवमगच्छत्सर्वस्य प्रसवं गच्छन्ति य एतदुपयन्ति ॥ २ ॥

सर्व्वस्य प्रसवं प्रेरणं तत्सर्व्वमसदस्यैव नान्यस्येति सर्व्वसृष्टिकामा अत्राधिकारिणः ॥ २ ॥

अथ विहितसंवत्सरत्रयचतुष्टयं क्रमेण प्रशंसति।

यत् त्रयस्त्रिवृतः संवत्सराभवन्ति तेजोब्रह्मवर्चसन्त्रिवृत्तेज एव ब्रह्मवर्चसमवरुन्धते यत् त्रयः पञ्चदशा ओजोवीर्यं पञ्चदशओज एव वीर्यमवरुन्धते यत्त्रयः सप्तदशा अन्नं वै सप्तदशोन्नाद्यमेवावरुन्धते यत्त्रय एकविꣳशाः प्रतिष्ठा वा एकविꣳशोन्तत एव यज्ञस्य प्रतितिष्ठन्ति ॥ ३ ॥

अग्निना सह त्रिवृतः प्रजापतिमुखादुत्पन्नस्यच गायत्रीसंबन्धाद्गायत्रा ब्रह्मवर्चससाधनत्वाद् ब्रह्मवर्चसन्तेज एव त्रिवृत् अतस्तदनुष्ठातारोपि तावदेवावरुन्धते एवं पञ्चदशादिष्वपि द्रष्टव्यं॥३॥

अथास्य प्रयोक्तृप्रशंसादारेण सर्व्वसिद्धिलक्षणं फलं दर्शयति ।

एतेन वै नैमिशीयाः सर्व्वान्मृद्धिमार्ध्नवन् सर्व्वामृद्धिमृध्नुवन्ति य एतदुपयन्ति ॥ ४ ॥

नैमिशीया नैमिशारण्यवासिनः ॥ ४ ॥

अथास्य सत्रस्य नववार्षिकप्रयोगोपि विद्यत इत्याह ।

ते ह सप्तदशेभ्य एवाध्युत्तस्थुस्त उ होचुर्यान प्रजायाम ध्यातै स एतत्सत्रꣳ समापयादिति तदेतत्समीप्सन्तो ब्राह्मणाः सत्रमासते ॥ ५ ॥

ते नैमिशीयाः सप्तदशेभ्य एव सप्तदशस्तोमकेभ्यस्त्रिभ्यः संवत्सरेभ्यः सप्तदशं समाप्येवाध्युत्तस्थुः सत्रादुत्थिता आसन् तउ ह त एव खलु तदेवमूचुः योदीचितोनोस्माकं प्रजायां पुत्रपौत्रादिलक्षणायां ऋद्धातैः यज्ञार्द्धैः समृद्धः स्यात् स एतत् सत्र एकविंशवर्षत्रयमप्यननुष्ठाय समापयेदिति एतावतास्य नवसंवत्सरानुष्ठानं विद्यते तथापि साधनसमृद्धावप्यनापदि सप्तदशेभ्य उत्थापनं कुर्य्यादित्युक्तं भवति यस्मादयोनः प्रजायामृद्धात इति नैमिशीयैरुक्तं तस्मादित्यर्थः तत्सत्रं समीप्सन्तः समापयितुमिच्छन्तो ब्राह्मणा द्वादशसंवत्सरमेव सत्रमासते ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य षष्ठः खण्डः ।

अथ सप्तमः खण्डः।

अथ सर्व्वर्द्धिसाधनं षट्त्रिंशत्संवत्सराख्यं शाक्त्यानां सत्रमाह।

नव त्रिवृतः संवत्सरा नव पञ्चदशा नव सप्तदशा नवैकविंशाः शाक्त्यानाꣳ षड्विंशत्सम्वत्सरं ॥ १ ॥

शाक्त्या शक्तिगोत्रोत्पन्नाऋषयः ॥ १ ॥

अथास्यानुष्ठाने किञ्चिद्विशेषसमृद्धिसाधनं दर्शयति।

एतेन वै गौरीवितिः शाक्त्यस्तरसपुरोडाशीयव्यावत्याꣳ सर्व्वामृद्धिमार्ध्नोत् सर्व्वामृद्धिमृध्नुवन्ति य एतदुपयन्ति ॥ २ ॥

गौरीवितिर्नामऋषिः तरसं मांसमन्तर्देव सवनीयं पुरोडाशं यस्यासौ तरसपुरोडाशः यव्यावतीनाम नदी मिश्रन्यत् ॥ २ ॥

अथैतत् संवत्सरगतसंख्याद्वारा प्रशंसति।

बृहती वा एतत्सत्रायणꣳ स्वाराज्यञ्छन्दसां बृहती प्रस्वाराज्यमाप्नुवन्ति य एतदुपयन्ति ॥ ३ ॥

सत्रञ्च तदयनञ्च सत्रायणं एतत् सत्रायणं बृहती वै बृहत्यपि षट्त्रिंशदक्षरा अस्यापि संवत्सरगता षट्त्रिंशत्संख्यास्ति अतस्तद्द्वारा एतत् बृहती अस्त्वेवं किन्नतदित्यतआह बृहती छन्दसां मध्येस्वाराज्यमित्युक्तं अत एतदनुष्ठातारोपि स्वाराज्यमाप्नुवन्ति ॥ ३ ॥

अथैतद्दशपुत्रसाधनत्वेन प्रशंसति ॥

तदेतक्क्षात्त्यानां दशवीरमेषां दशवीराजायन्ते य एतदुपयन्ति ॥ ४ ॥

तदेततुक्तं सत्रं शात्त्यानां दशवीरं वीरयन्त्यमित्रानिति वीराः पुत्रास्तेषां दशसंख्यानां साधकं अतीये दीक्षिता एतदुपयन्ति तेषामपि दशवीराः पुत्राजायन्ते ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
सप्तमः खण्डः ॥

अथ अष्टमः खण्डः

अथ स्वर्गसाधनं साध्यानां शतसंवत्सरं सत्रमाह ।

पञ्चविꣳशतिस्त्रिवृतः संवत्सराः पञ्चविꣳशतिः पञ्चदशाः पञ्चविꣳशतिः सप्तदशाः पञ्चविꣳशतिरेकविꣳशाः साध्यानाꣳ शतसंवत्सरम् ॥ १ ॥

स्पष्टं ॥ १ ॥

अथैतस्य प्रयोक्तृप्रशंसनद्वारा स्वर्गसाधनत्वमाह ।

साध्या वै नाम देवेभ्यो देवाः पूर्व आमꣳ स्त एतत्सत्रायणमुपायꣳस्तेनाध्नुवꣳस्ते सगवः सपुरुषाः सर्व्वएव सन्त स्वर्गं लोकमायन्नेवं वाव ते सन्त स्वर्गंलोकं यन्ति य एतद् पयन्ति ॥ २ ॥

पूर्वं साध्याख्यादेवाः तस्मादयोदेवेभ्यः इदानीं ज्योतिष्टोमादिकर्मकर्त्तृत्वात् देवतात्वं प्राप्नुवन्नाः पूर्वा आमन्ते स्वदेवत्व प्राप्त्यर्थं एतच्छतसंवत्सरं सत्रायणमुपेत्य समृद्धा अभवन्निह लोकात्पश्चात्तैः सपुरुषाः सपरिचारकाः सर्व्वएव कात्स्न्ये न स्वर्गं लोकमायन्नेवमेवेदानीमपि ते स्वर्गमित्यादिस्पष्टं अतएव साध्यानां सम्बन्धात् साध्यानां शतसंवत्सरमिति नाम सम्पन्नं ॥ २ ॥

अथैतच्छतसंवत्सरगतसंख्याद्वारेण प्रशंसति ।

आयुर्व्वा एतत्सत्रायणꣳ शतायुः पुरुषोयावदेवायुस्तदवरुन्धे नच्छत्यायुषꣳसत्रमस्ति ॥ ३ ॥

यतः शतायुः पुरुषो अतस्तत्संख्याकः संवत्सरसङ्गवादितत्सत्रायणमायुरित्युच्यते अतोयावदेवायुः पुरुषस्य प्रजापतिना शतमिति लक्षं तत्कात्स्न्येनावरुन्धते नमध्येम्रियते तच्छत्यायुषं आयुरतिक्रान्तं आयुषोमध्ये मरणसाधनं सत्रं नास्ति अतः शतमायूंषि पुरुषस्यावेत्तितानि ॥ ३ ॥

उक्तार्थे ऋचमुदाहरति ।

तदभ्यनूक्ता तानीदहानि बहुलान्यासन्या प्राचीनमुदिता सूर्य्यस्य यतः परिजार इवाचरन्त्यूषा दहशे न पुनर्यतीवेति ॥ ४ ॥

अस्यासृचि बहुपेक्षितमित्येतावदेव निदर्शनं क्रियते उषसः स्तुतिरेषातानोत्तानि तेजांस्येवाहनि बहुलान्यासन् अङ्गामपेक्षितत्वादामन्त्रिताग्नेरर्थे अतोऽस्माकं मन्त्रित्यर्थः तानीत्यृक् या यानि तेजांसि प्राचीनं पूर्व्वस्मिन् काले सूर्य्यस्य उदिता उदिते उदये सति उत्पन्नानीत्यः एकस्तपनः परिस्यन्दजनितं तेजःसमूहः एवैकमहः खलु अतस्तथाविधानि बहूनि सन्त्वित्यभिप्रायः अतोयेभ्यस्तेजोभ्यस्तदर्थं जारे पत्यौ परित आचरन्ती पतेः समीपं सञ्चरन्ती नारी जोषा जारे रात्रेर्जरयितरि आदित्ये पर्य्याचरन्ती सती दहशे सर्व्वैः किन्तु नपुनर्यती पुरुषान्तरं प्रति गच्छन्ती पुंश्चलीव नदहशे तानीति सम्बन्धः ॥ ४ ॥

अथैतत् ज्योतिष्टोमस्य साहश्येन प्रशंसति ।

ज्योतिष्टोमस्यायनेन यन्ति ज्योतिरेव भवन्ति ॥ ५ ॥

ज्योतिष्टोमस्य यदयनं प्रायणं त्रिष्टुब्दादिस्तोमचतुष्टयरूपमस्ति तेनैवैतं यत्र यन्ति अतस्तेपि ज्योतिरेव तेजोरूपा एव भवन्ति ॥ ५ ॥

अथैतदंत्यहारेण प्रशंसति ।

एकविंशोन्ततः स्तोमानां भवति प्रतिष्ठा वा एकविंशोन्तत एव यज्ञस्य प्रतितिष्ठन्ति ॥ ६ ॥

स्तोमानां त्रिवृदादीनां मध्ये अन्ततः सवान्ते एकविंशस्तोमो भवति सिद्धमन्यत् ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
अष्टमः खण्डः ।

अथ नवमः खण्डः ।

अथाग्नेः महस्रसाव्यं महस्रराचं सर्वाभाव्यफलमधनं सत्रमाह ।

अतिरात्रः सहस्रमहान्यतिरात्रोऽग्नेः सहस्रसाव्यं ॥ १ ॥

सहस्राख्यहानि कार्त्स्न्येन स्तूयते अभिषूयते सोम इति सहस्रसाव्यं एतदग्नेः सम्बन्धि सहस्रसाव्यं सत्रं अस्मादावन्ते चातिरात्रौ भवत इति केचित् अस्मेवाद्यन्ते अहनी अतिरात्रा इत्यपरे तथा च सूत्रं सहस्रसाव्ये महातिरात्राभ्यां सहस्रमहनीत्याचार्याः सहस्रसाव्यमिति ह्याहेत्यन्तरेणेति शौचिवृत्तिरिति ॥ १ ॥

अथास्य फलं सप्ररोचनमाह ।

एतेन वा अग्निः सर्व्वस्य प्रसवमगच्छत् सर्व्वस्य प्रसवं गच्छन्ति य एतदुपयन्ति ॥ २ ॥

स्पष्टं ॥ २ ॥

अग्नाम्य कर्त्तुर्द्वारा फलान्तरं दर्शयति ।

अग्नेर्वै सर्वमाद्यꣳ सर्व्वमेषामाद्यं भवति य एतदुपयन्ति ॥ ३ ॥

एतत्पूर्व्वमनुष्ठितवतोऽग्नेः खलु एतदनुष्ठानमामर्थ्यात् सर्व्वमपि आद्यं अदनीयमासीत् अतः सर्व्वमित्यादिस्पष्टं ॥ ३ ॥

अस्याहर्गतसंख्याद्वारेणैतत्प्रशंसति ।

अथ यत् सहस्रमाद्यं भवति सहस्राक्षरा वै परमा विराट् परमायामेव विराजि प्रतितिष्ठन्ति ॥ ४ ॥

परमा विराट् संख्यानामध्ये गतं हि परमं अतस्तावत् संख्या वा विराट्परमेत्युच्यते सहस्राक्षराविराडिति श्रुतेरेकैकस्यादश संख्यात्वात् सहस्राक्षरा भवति सिद्धमन्यत् ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
नवमः खण्डः ।

अथ दशमः खण्डः ।

अथ त्रीणि सारस्वतानि सत्राणि, मित्रावरुणयोः प्रथममिन्द्राग्न्योर्द्वितीयमर्थ्यमस्तृतीयं, तत्र मित्रावरुणयोः प्रथमं सत्रमाह।

सरस्वत्या विनशने दीक्षन्ते ॥ १ ॥

सरस्वतो नाम नदी प्लक्ष्यो ता प्रवहति तस्याः प्रागपरभागौ सर्व्वलोकप्रत्यक्षौ मध्यमस्तु भागो भूम्यामन्तर्निमग्नः प्रवहति नासौ केनचिद्दृश्यते तद्विनशनमित्युच्यते तस्योपक्रमे दक्षिणे तीरे दीक्षन्ते ॥ १ ॥

सत्रस्य सारस्वतोयस्य दीक्षोपसदोरियत्तामाह ।

तेषां द्वादश दीक्षा द्वादशोपसदः ॥ २ ॥

अथ कस्मिन् दिवसे दीक्षारम्भ इति जिज्ञासायां सूत्रकारो मतभेदमाह षष्ठ्यां पक्षस्येति गोतमोमावास्यायामतिरात्रः स्यादिति पूर्व्वपक्षस्य षष्ठ्यामित्यर्थः तत्रोपपत्तिं स्वपक्षे चाह एवं स्वस्थानमामावास्यं प्रयुज्यत इति अस्यायमर्थः एवं सति शुक्लपक्षस्य प्रथमायां सान्नाय्यब्राह्मणविहितं प्रयुक्तं स्यात्पक्षान्तरमाह सप्तम्यां वा दीक्षित्वामावास्यायां यजनीयेहन्यतिरात्रः स्यादिति धानञ्ज्यसमाधय उत्तराभ्यां सुत्याभ्यामिति अस्यायमर्थः अमावास्यायामुत्तरेद्युर्यजनीये शुक्लप्रथमायामेवातिरात्रः कुतः उत्तराभ्यां गोष्टोमायुष्टोमाभ्यां ब्राह्मणोक्ताभ्यां साम्यमिष्टयर्थं प्रथमायामेव हि तयोरनुष्ठानमिति नन्वेवं सति द्वितीयायां करणात् सान्नाय्यस्य स्थानभ्रंशः स्यादित्याशंक्य स्वयमेव परिहर-

ति स्वस्थानं चैवामावास्यं प्रयुज्यत इति अतः कारणात् न सान्नाय्यस्यापभंग इत्यर्थः तदपि कुत इति तत्राह पूर्वपक्षो-ह्यामावास्यस्थानमिति अयमभिप्रायः पूर्वपक्षोहि कार्त्स्न्येन सान्नाय्यस्य स्थानं न केवलं प्रथमैवेति दीक्षोपसदोर्मध्ये अथ प्रयोगक्रमः पूर्वोक्तदीक्षोपक्रमयोरन्यतरं परिगृह्य द्वादशदिवस-दीक्षान्ते प्रायणीयया प्रचर्य्य राजानं क्रीत्वोपनह्य निधाय पश्चात् द्वादशोपसद इति ॥ २ ॥

अथोपसदनन्तरमतिरात्रमनुष्ठाय तस्मिन् दिवसे सान्ना-य्यार्थं वत्सानपाकृत्य श्वोभूते तेन यष्टव्यमित्याह।

यदहरतिरात्रो भवति तदहर्व्वत्सानपाकुर्व्वन्ति सꣳ-स्थितेतिरात्रे सान्नाय्येन यजन्ते ॥ ३ ॥

यदहर्यस्मिन्नहनि प्रायणीयोतिरात्रो भवति तस्मिन्नहनि सान्नाय्यार्थं वत्सानपाकुर्य्युः पश्चादस्तमयात् पूर्वं स्वकाले दोहये-युरित्यर्थं पुनश्च रात्रौ वत्सानपाकृत्य श्वः संस्थितेतिरात्रे इष्ट्यन्तं प्रक्रम्य पात्रासादनप्रोक्षणानन्तरं प्रातर्होमं दोहयेयुरित्यर्थः प्रकृतौ तु दर्शे पुरोडाशसद्भावात् कपालोपधानानन्तरं प्रात-र्होमः अत्र द्राह्यायणः पुरा रात्रेः सायं दोहं दोहयेरन् संस्थि-तेतिरात्रे प्रातर्दोहमिति अतिरात्रसमाप्त्यनन्तरं तत्रैव देशे सान्नाय्येन यजेरन् ॥ ३ ॥

अथ सान्नाय्यानुष्ठानानन्तरमुपरिभूतानुष्ठानाय गार्हपत्या-हवनीययोर्निर्म्माणप्रकारमाह।

सान्नाय्येनेष्ट्वाध्वर्य्युः ग्रम्यां परास्यति सा यत्र निपतति

तद्गार्हपत्यस्ततः षट्त्रिंशतं प्रक्रमान् प्रक्रामति तदाहवनीयः ॥ ४ ॥

सान्नाय्ययागानन्तरं तस्मिन्नेवाहनि आहवनीयसमीपेऽध्वर्युस्त्रिः प्राङ्मुखः शम्यां परास्यति स्वशक्त्या सा शम्या यत्र निपतति तत्र गार्हपत्यः कर्त्तव्यः ततोऽध्वर्युः षट्त्रिंशत् प्रक्रमान् प्रक्रामति तत्राहवनीय औत्तरवेदिकः अत्र द्राह्यायणः सान्नाय्येनेष्ट्वाध्वर्युः शम्या परास्यतीत्याहवनीयान्तेन तिष्ठन् प्राङ्मुखो नित्यमिष्टिसंस्थासु प्रास्येदिति आहवनीयान्तेनेत्यतः पूर्वं ब्राह्मणप्रतीकोपादानं न्यन्तेन समीप इत्यर्थः ॥ ४ ॥

अथ सदः प्रभृतीनां निर्म्माणप्रकारमाह।

चक्रीवत् सदश्चक्रीवद्बर्हिर्दानं चक्रीवदाग्नीध्रमुलूखलं वृध्नीयूपः प्रक्रम्य उपोप्त एव नोपरवान् खनन्ति ॥ ५ ॥

चक्रीवत् चक्री चक्रं अत्तुत्रचक्रोरित्यादौ तथा दर्शनात् सद आदिकं चक्रं चतुःफलकादिनिर्म्मितं कार्य्यमिति केचित् अपरे तु चक्री रथः शकटो वा तद्युक्तं सद आदि आदिकार्य्यमिति प्रथमनिर्म्मितैरेव सदःप्रभृतिभिरुत्थानमनुष्ठानादुपर्य्यतिदेश प्रायणाय सदआदिषु पृथक् पृथक् रथोवा नोवा सम्पादयेयुरित्यर्थः अत्रानुक्तयोरपि पत्नीशालाग्नामित्रयोश्चक्रीवतोर्निर्म्माणमाह सूत्रकारः तथापि पत्नीशाला स्याद्वाग्नामित्रवच्चेति एतेषां प्रायणे विशेषं सूत्रकारआह समर्थेभूमिभागः स्यादनुपूर्व्वं विषमे वेदेः पांसून् हरेयुस्तथोत्तरवेदेर्द्विणोऽभ्यश्च तान्विविध्य यथायतनं निव

पेयुरिति पुरोदेशोयदि समः स्यात्तदा सद आदिकं यथा संस्थानमेवोपेयुर्विषमदेशश्चेत् तदानीं शकटगमनयोग्येन प्रदेशेन पृष्ठतः पृष्ठतोनयेयुरित्यर्थः ततः सदः प्रभृतिषु स्थापितेषु यथायतनं पूर्व्वमानीतान् पांशून् निवपेयुः न तत्र मन्त्रपूर्वकं वेद्यादेः करणमस्ति तथा यूपोपि उलूखलबुध्नः उलूखलस्य मूलभागो यथास्थविष्ठस्तथैव कर्त्तव्यः सएव प्रक्रम्य पुरोदेशं प्रति भूम्यामेवाकर्षणीयः नतूपरि धारणीयः सच वेदिदेशे उपोप्यएव पांशुभिः परितः प्रक्राम्य एव नतु खातयीत तथा उपरवान् अधिषवणफलकयोरधस्तात् न खनेयः किञ्च रेखाएव कुर्य्युः अत्र सूत्रं उलूखलबुध्नोयूप इति पृथुबुध्नः स्यात् प्रक्रम्य इति तं पूर्व्वं कर्षेयुरेवानुद्यच्छन्त उपोप्यएवेत्यनिखातस्तिष्ठेत् पांसुभिः पर्य्युप्तोनोपरवान् खनन्तोत्यधिषवणफलकयोरधस्तादुपरवानमखन्भास्तेषां प्रतिषेध आलिखेयुरिति ॥ ५ ॥

अथ सान्नाय्येनैव स शुक्लपक्षे समापनीय इत्याह ।

ते तमापूर्य्यमाणमामावास्ये नयन्ति ॥ ६ ॥

ऐन्द्रेण माहेन्द्रेण वा प्रत्यहं यजमानाः सान्नाय्येन यजन्तीत्यर्थः ॥ ६ ॥

अथ तदनन्तरभाविपूर्णिमायामनुष्ठेयं विदधाति ।

तेषां पौर्णमास्यां गोष्टोमस्तोमो भवत्युक्थ्यो बृहत्सामा ॥ ७ ॥

तेषां सान्नाय्येन यजतां पौर्णमास्यां गोष्टोमेन स्तोममुक्थ्य-

संस्थो बृहत्सामा बृहत्पृष्टः ऐकाहिकः कर्त्तव्य इति क्वचिदाच क्ष्यन्ते कुतोलक्षणस्वीकरणमिति तदाहुः यस्मात् संस्थिते गोष्टोमे पौर्णमासमिति हि संस्थानान्तादिदधाति गोष्टोमसमामिदिवस एव पौर्णमासं कर्त्तव्यतां विदधाति तच्च आमावास्यं कर्म्म कृत्वा पूर्य्यमाणपक्षस्यनुष्ठितः स्यात् पौर्णमास्यं तदनुष्ठानमिति सूत्रकारस्तु पौर्णमास्यामेव गोष्टोमः कर्त्तव्यः कृतस्तेषां पौर्णमास्यां गोष्टोमस्तोमो भवतीति मुख्यपौर्णमासोश्रवणात् अतःसंस्थित गोष्ठोम इति वचनेन पौर्व्वापर्य्यत्वं चोद्यते नतु तस्मिन्नेवाहनि कर्त्तव्यतां ब्रूते तच्च पौर्व्वापर्य्यं पौर्णमास्यां गोष्टोमे प्रतिपदि पौर्णमासोपक्रमोपि नविरुध्यते तथापूर्य्यमाणमिति वचनमपि भूयोभिप्रायिकमिति अयज्ञायस्तेषाममावास्यायामायुष्टोममित्यत्रापि समानः अत्र तेषां पौर्णमास्यां गोष्टोमस्तोमो भवतीति यजनीये हनि स्यादित्याचार्य्या इत्यादिकं सूत्रं द्रष्टव्यं ॥ ७ ॥

अथ गोष्टोमानन्तरं यदनुष्ठेयन्तदिदधाति।

सꣳस्थिते गोष्टोमे पौर्णमासन्निर्व्वपन्ते ते तमपत्नीयमाणं पौर्णमासेन यन्ति तेषाममावास्यायामायुष्टोमः स्तोमो भवत्युक्थ्योरथन्तरसामा ॥ ८ ॥

आयुष्टोमे यद्यैकाहिका सिद्धमन्यत्। अत्रेष्ट्ययनेषु विनान्वाधानं पत्नीसंयाजान्तं तन्त्रं ॥ ८ ॥

उक्त्याहःसाध्यस्यास्य सत्रस्य नाम प्रदर्शयति।

मित्रावरुणयोरयनं ॥ ९ ॥

स्पष्टं ॥ ९ ॥

एतत् सत्रमित्रावरुणसम्बन्धप्रदर्शनद्वारा प्रदर्शयति।

एतेन वै मित्रावरुणाविमान् लोकानाजयतामहोरात्रौ वै मित्रावरुणावहर्मित्रोरात्रिर्वरुणोऽर्द्धमासौ वै मित्रावरुणौ य आपूर्य्यते समित्रो योपक्षीयते सवरुणः सएष मित्रो वरुणोरेतः सिञ्चति ॥ १० ॥

मित्रोहःशुक्लपक्षयोः अभिमानी देवोरात्रिः कृष्णपक्षयोरभिमानीवरुणे रेतः स्वसामर्थ्यं सिञ्चति शिष्टमुक्तप्रायं ॥ १० ॥

अथ बृहतीप्रशंसनद्वारेण सरस्वत्याः नुञ्जत्वं प्रशंसति।

सरस्वत्या वै देवा आदित्यमस्तम्भ्नवन् सा नायक्त् साभ्यव्लीयत तस्मात् सा नुञ्जिमती वतं वृहत्यास्तम्भ्नुवन् सायक्त्तस्माद्बृहती क्रन्दसां वीर्य्यवत्तमादित्यश्हि तयास्तम्भ्नुवन् ॥ ११ ॥

पूर्वं भूम्यां वर्त्तमानमादित्यं द्युलोके निधाय सरस्वत्या अस्तम्भ्नुवन् स्तम्भितुमैच्छत् सा नायक्त् नियन्तुं नाशक्नोत् किन्तु अभ्यव्लीयत शिथिलाभूत् तस्मात्सारस्वती नुञ्जिका वक्रोपेताभूत् तं बृहत्या स्तुम्भुवन्नित्यादिस्पष्टं ॥ ११ ॥

अथान्यं विशेषमाह।

प्रतीपं यन्ति नड्वान्वीपमष्ट वै पूर्व्वेण पक्षमा यन्ति ॥ १२ ॥

प्रत्यङ्मुखी खलु सरस्वती प्रवहति अतस्तद्दक्षिणे कूले प्रतीपं प्रतिलोमं प्राञ्चोयन्ति ॥ १२ ॥

तदेव व्यतिरेकासम्भवेन द्रढयति।

तद्वि प्रत्येकाप्येति ॥ १३ ॥

तद्वि पूर्वं पक्षं प्रति तस्यान्ते एका नदी सरस्वतीमप्येति एकेत्युक्तं ॥ १३ ॥

सा विशेष्यते।

दृषद्वत्येव ॥ १४ ॥

सरस्वत्या विनशनादारभ्य प्लक्षः प्रास्रवणपर्य्यन्तोनुष्ठानोदेशः तस्यार्द्धप्रदेशदेशेपि दृषद्वत्या अप्ययः तावत्पर्य्यन्तं पूर्व्वेण पक्षमा, यज्ञानुतिष्ठन् गच्छेयुरित्यर्थः ॥ १४ ॥

तदप्यये कर्त्तव्यमाह।

दृषद्वत्या अप्ययेऽपोनप्त्रीयञ्चरुन्निरूप्यातियन्ति ॥ १५ ॥

तत्सङ्गमप्रदेशे अपोदेवलाकं चरुं जलातिक्रमदोषपरिहारार्थं निरूप्य पश्चादतिक्रम्य यन्ति अत्र सूत्रं दृषद्वत्या अप्यये-

पोनप्त्रीयामिष्टिर्निर्वपेदन्यदि सोदका स्यादप्यनुदकायामिति धानञ्जयः ॥ १५ ॥

अथ विनशनादारभ्य प्लक्षं प्रास्रवणपर्यन्तानुष्ठानं प्रशंसति।

चतुश्चत्वारिंशदाश्वीनानि सरस्वत्या विनशनात् प्लक्षः प्रास्रवणस्तावदितः स्वर्गोलोकः सरस्वती सम्मिते नाध्वनाः स्वर्गलोकं यन्ति ॥ १६ ॥

सरस्वतीविनशनप्रदेशादारभ्य गतां चतुश्चत्वारिंशदाश्वीनः प्रमाणप्लक्षः प्रास्रवणः एकोप्यश्व एकेनाहोरात्रेण यावन्तमध्वानं गच्छति तावानेकाश्वीनः तथाविधश्चत्वारिंशदाश्वीनैर्यावानध्वा भवति प्लक्षप्रस्रवणो भवति आश्वीन इत्यस्यैकाहगताश्वीनैरिति स्वर्गोलोक इत्युक्तं नैष दोषः सहस्राश्विनोस्यान्तर्भावात् ॥ १६ ॥

अथास्मात् प्लक्षादुत्थानं चतुर्विधत्वं चैकमुत्थानं विवक्षुराह।

एतेन वै नमी साप्योवैदेहोराजाञ्जसा स्वर्गं लोकमैदञ्जसागामेति तदञ्जस्कीयानामञ्जस्कीयत्वं ॥ १७ ॥

पूर्वमेतेन सत्रेण साप्यपुत्रोवैदेहोविदेहदेशाधिपतिर्नमीनाम राजा अञ्जसा शीघ्रं स्वर्गं लोकमैत् तस्मादयमपि स्वर्गमञ्जसा आगमेमेति ब्रुवन् तत् तस्मादञ्जस्कीयानां सारस्वतसत्रावयवभूतानामञ्जस्कीयत्वं ॥ १७ ॥

अथ साप्यस्य सत्रोत्थानविधिं दर्शयति।

स एतद्वभृथमभ्यवैद्य एष उत्तरेण स्थूलार्म्मꣳ ह्रद-
स्तद्वास्य शतङ्गावः सहस्रꣳ सम्पेदुः ॥ १८ ॥

स नमो एतत् एतस्मादवभृथमभ्यवैदेवागच्छत् एतच्छब्दो-
क्तं विवृणोति य एष प्रसिद्धः सरस्वत्या उत्तरेण स्थूलार्म्मन्देश-
मतुलो ह्रदोवर्त्तते तस्मिन्नित्यर्थः कुतस्तस्मिन्नेव नमो प्राप्तवा-
निति तदुच्यते तद्वा अस्मिन् हि शतसंख्याकागावो ब्राह्मणभो-
जनाद्यर्थमानीताः अपत्योत्पादनद्वारा सहस्रं सम्पेदुः सम्पन्ना
अभवन् ॥ १८ ॥

तदुत्थानमाह ।

शते गोषु वृषभमप्युजन्ति ता यदा सहस्रꣳ सम्पद्यन्तेथो
त्थानं ॥ १९ ॥

ये शते गोषु शतं वत्सतरीषु गवां प्रजननार्थं वृषभमप्युत्सृ
जन्ति अतिसृजन्ति स्पष्टमन्यत् अथोत्थाने सूत्रकारः किञ्चिदिङ्ग-
षमाह शते गोष्वृषभमप्युत्सृजन्तीति वत्सतरीगते गर्भिणीषु ता
यत्र गव्यमभयं स्यात्तत्र रक्षेयुः पुङ्क्वैस्तामां भुञ्जीरन् सर्पिषा च
तासु सहस्रं सम्पन्नासु पूर्व्वपक्षे गामतिरात्रं ज्ञात्वा दत्त्वेता
उत्तिष्ठेयुरिति पुङ्क्वैर्भोगः स्वोपकरणवाहनाद्यिहारकं ॥ १९ ॥

अथ द्वितीयमुत्थानं दर्शयति ।

यदा सर्व्वज्यानिं जीयन्तेथोत्थानं यदा गृहपतिर्म्म्रियते-
थोत्थानं ॥ २० ॥

मध्वज्यानिः सर्वहानिः ॥ २० ॥

अथ तृतीयमुत्थानं दर्शयति।

यदा प्लक्षं प्रास्रवणमागच्छन्त्यथोत्थानं ॥ २१ ॥

यच्च प्लक्षं प्रास्रवणं तद्धि सरस्वत्या उत्पत्तिस्थानन्तदागत्य पूर्वोक्तनिमित्ताभावेपि सत्रादुत्तिष्ठेयुः ॥ २१ ॥

अस्मिन्नुत्थानेनुष्ठेये विशेषमाह।

प्लक्षं प्रास्रवणमागम्याग्नये कामायेष्टिं निर्वपन्ते तस्या मध्वाच्च पुरुषोच्च धेनुके दत्वा ॥ २२ ॥

तं समागम्यातिरात्रात् पूर्वमग्नये कामायेष्टिः कर्त्तव्येत्येके अतिरात्रात्परमन्ये पुरुषी दासी धेनुके नवप्रसूतिके सवत्से इत्यर्थः तथा च सूत्रं यदा प्लक्षं प्रास्रवणमागच्छन्त्यथोत्थानमिति तदा प्रास्थेयुरिति धानञ्जयः प्लक्षं प्रास्रवणं प्राप्य पुरस्तादतिरात्रस्याग्नये कामायेष्टिः स्यादिति शाण्डिल्यः उपरिष्टादिति धानञ्जयस्तस्या मध्वाच्च पुरुषीच्च धेनुके यज्ञोपकरणशेषांश्चाभिरूपायान्यस्मै दद्याः स्वामिनो हि सर्व्वे सत्रेषु तेषां प्रतिग्रहणन्न विद्यत उत्तीर्णभृथो ब्राह्मणेनाष्टश्रमनीयमेतदिति ॥ २२ ॥

अथावभृथे शेषमाह।

कारपचवं प्रति यमुनामवभृथमभ्यवयन्ति ॥ २३ ॥

कारपचवीजनपदविशेषः तन्मध्ये यमुना गच्छति तां प्राप्य

तत्रावभृथत्र कुर्य्युः कदाचिदपि सरस्वत्यामवभृथेन कर्त्तव्यः तथा च सूत्रकारः न सकृत्तन सरस्वत्यामवभृथमभ्यवेयुर्देवयजनभूता ह्येषा भवत्यविद्यमाने सरस्वत्या एवोदारं पार्श्वतस्त्विति अविद्यमाने सरस्वतीप्रान्ते नद्याद्यसम्भवे सरस्वत्या एव जलमुद्धृत्यावभृथार्थं उद्धृत्यापि जलं पार्श्वत एवावभृथः कर्त्तव्यः न तत्रेत्यर्थः ॥ २३ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
दशमः खण्डः ।

अथ एकादशः खण्डः ।

अथेन्द्राग्न्योरयनाख्यं प्रजापतिभवनसाधनं सारस्वतं द्वितीयं सत्रमाह ।

अतिरात्रस्त्रिवृत्पञ्चदशमिन्द्राग्नयोरयनं गोआयुषी इन्द्रकुश्री अतिरात्रः ॥ १ ॥

प्रायणीयोतिरात्रः प्रथममहः अथ त्रिवृत् पञ्चदशौ व्यत्यासेन पञ्चविंशेष्वनुष्ठातव्यौ तदिन्द्राग्नोरयनं अत्र गोआयुषी पक्षयोरन्ते इत्यङ्गा क्रमइति केचित् अपरे तु पक्षयोस्त्रिवृत्पञ्चदशयोः व्यत्यासः त्रिवृत्पक्षान्ते गोष्टोमः पञ्चदशपक्षान्ते आयुष्टोम इत्याहुः चतुर्विंधोत्थानमप्यत्रापि पूर्ववदेव ॥ १ ॥

अथास्य फलं सप्ररोचनमाह।

एतेन वा इन्द्राग्नी अत्यन्यादेवता अभवतामत्यन्या प्रजा भवन्ति य एतदुपयन्ति ॥ २ ॥

सिद्धमिदं ॥ २ ॥

अथ कर्त्तृहारा प्रशंसति।

इन्द्राग्नी वै देवानामोजिष्ठा ओजिष्ठा भवन्ति यएतदुपयन्ति ॥ ३ ॥

गतमिदं ॥ ३ ॥

अथ विहितक्रमेणैवानुष्ठेयं प्रशंसति।

अथ यत् त्रिवृत्यञ्चदशमिद्राग्न्योरयनं गोआयुषी इन्द्रकुक्षी भवतोसंव्याथाय ॥ ४ ॥

असंव्याथाय दार्ढ्यायेत्यर्थः केवलं त्रिवृत्पञ्चदशाभ्यामेव सत्र-समापने अदार्ढ्यः स्यात् अतस्तत्परिहाराय गोआयुषी भवतः ताभ्यां वै कथं दृढ़त्वमिति तदुच्यते गोआयुषी ऐकाहिके गौरीवितस्वरे इति कल्पकारेणोक्तत्वादैकाहिके अतस्तत्र त्रिवृदादीनाञ्चतुर्णामनुष्ठानसम्भवादसम्बाधत्वं अत्र सत्रान्तविषये सूत्रं एतेनैवोत्तरे व्याख्याते तत्राग्नये कामायेष्टिरपोनप्त्रीयञ्च स्रुवहोमौ स्यातामिष्टिरेवाग्नये कामायोपरिष्टाच्चेदतिरात्रस्येति शाण्डिल्यः अनयोः सारस्वतयोः पूर्ववदित्ययनाभावादन्तिमातिरात्रमध्य-

एवोक्तेष्टिविधानमिति सूत्रकारमते अग्नये कामाय स्वाहा अपान्नपाते स्वाहेति सुवेणैवापरहोमा नत्विष्टितन्त्वमस्ति अन्यथा सत्याव्यवधानां स्यादतिरात्रात्परमिति शाण्डिल्यपक्षे इष्टिरेव कर्त्तव्या पुनः सुत्याभावादिति सूत्रार्थः त्रिवृत्पञ्चदशयोः पक्षयोर्व्यत्यासवतोरेवमङ्गां व्यत्यास इति पक्षावुक्तौ तत्र सूत्रकारः पर्वणोरिन्द्रकुत्तौ पूर्वस्याग्निष्टोमौ त्रिवृतौ राथन्तरबार्हते पूर्वपक्ष उक्थे पञ्चदशे राथन्तरबार्हते अपरपक्ष इति गौतमस्तेन पक्षयोः सञ्चारयेत्सर्वत्र खेव त्रिवृत्पञ्चदशे व्यत्यासं स्यातां तयोर्य्यस्मिन्ननुपेते पर्व्वा गच्छेत्तेनोत्तरं पक्षमुपक्रमेतैते नोक्तमुत्तरस्य त्रिकद्रुकेष्विति गोआयुषोविश्वजिदभिजितोयेन्द्रस्य कुत्तिस्थानीयत्वादिन्द्रकुत्तौ इति नामधेयं तावनयोः सारस्वतयोः क्रमेण पर्वणोर्भवतः उत्तरस्मिन् सारस्वते तु व्यत्यासे पौर्णमास्यामभिजिदमावास्यायां विश्वजिदिति क्रमः अथ गौतमस्य पक्षव्यत्यासं दर्शयति द्वयोः पूर्व्वस्य सत्रस्य पूर्व्वपक्षे सर्व्वत्र त्रिवृदग्निष्टोमएव कार्य्यः अपरपक्षे पञ्चदश उक्थ्य इति ब्राह्मणार्थः तत्र राथन्तरं प्रथममहः द्वितीयन्तमिति व्यत्यासमजामितार्थं तेन पक्षयोः सञ्चारयेदित्यस्यायमर्थः त्रिवृत्पञ्चदशेन कदाचिदपि पक्षयोः सञ्चारयेत् तत्र नियतावेव भवतामित्यर्थः अथ पूर्वस्मिन् पक्षे दर्शपौर्णमासस्य निपतेत् तद्वदत्रापि त्रिवृतं पञ्चदशाविति गौतमः अथ स्वमतमाह सर्वत्र त्रित्वादिना तस्यायमर्थः यथा पूर्वपक्षमुभावपि साम्येन व्यत्यसेदिति यदा द्वद्विचयवत् स्यादेकस्मिन् पक्षे समप्रयोगेन सिध्यति तदा कथमित्याह तयोर्य्यस्मिन्ननुपेते इत्यादिनानयोरेव व्यत्यासकरणे यस्मिन्ननुष्ठिते पर्वागच्छेत् तत्रेन्द्रकुत्तिं कृत्वा तदनन्तरं

पूर्वमहः तमुपक्रमेत न पुनः प्रथमप्रवृत्तेरिति अयं न्यायः उत्तरत्रिकद्रुकेष्वपि समानः अथ द्वितीयस्य सारस्वतस्य षोड़शिमन्तावतिरात्रौ दृतिवातवतोरयनेन क्लृप्ते त्रिवृतं पञ्चदशे अग्निष्टोमस्त्रिवृदुक्थ्यं पञ्चदशं राथन्तरं त्रिवृद्वार्हतं पञ्चदशं ऐकाहिके गोआयुषी इत्यादि मशककल्पोद्रष्टव्यः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

अथार्थ्यग्नीरयनाख्यं स्वर्गसाधनं तृतीयं सारस्वतं सत्रमाह ।

अतिरात्रोज्योतिर्गौरायुस्त्रयश्चोविश्वजिदभिजितावि-ष्ण्वुक्त्री अतिरात्रः ॥ १ ॥

अमावास्यायामुपक्रम्य आपरिसमाप्तेः ज्योतिर्गौरायुरिति अहः एवानुष्ठेयः पञ्चाद्विश्वजिदभिजितातिरात्र इति केचित् सूत्रकारमतन्तु पर्वणीरेवाभिजित्यश्चाद्विश्वजिदभित्रिरूपे ते पर्वागच्छेदित्यादिकं पूर्वमेव प्रदर्शितं अत्र तृतीयस्य सारस्वतस्य षोडशिमन्तावतिरात्रावैकाहिकास्त्रिकद्रुकाः विश्वजिदभिजितौ वा गौरोवितः स्वरा इत्यादिकः कल्पोद्रष्टव्यः ॥ १ ॥

अथ विहितसत्रस्य स्वर्गसाधनत्वं वक्तुमर्थिनस्तेनेन स्वर्गप्राप्तिं दर्शयति।

एतेन वार्य्यमैतं लोकमजयत् ॥ २ ॥

स्पष्टं ॥ २ ॥

एतेनेत्युक्तं विवृणोति ॥

यमाऊरर्य्यम्नः पन्था इत्येषवाव देवयानः पन्थाः ॥ ३ ॥

यदि अर्य्यम्न आदित्यमूर्त्तिभेदस्य पन्था अयमित्याहुः सएष एव खलु देवयानः पन्थाः ॥ ३ ॥

अस्त्वेवं किन्ततो भवतीत्याह।

प्रदेवयानं पन्थानमाप्नुवन्ति य एतदुपयन्ति ॥ ४ ॥

स्पष्टं ॥ ४ ॥

अनेन देवयानप्राप्तिं प्रत्यक्षदर्शनेन साधयति।

तस्मादेषोरुणतम इव दिव उपदृश्यरुणतमइव हि पन्थाः ॥ ५ ॥

देवयानमार्गस्यार्चिरादिरूपत्वात्तेन गतोऽयमर्य्यमा अरुणतमोदिवि दृश्यते प्रातःकालेनआदित्योऽयमरुणतमो भवति ॥ ५ ॥

अत्र विहितान्यहान्यनूद्य प्रशंसति।

अथ यत् ज्योतिर्गौरायुस्त्रयश्चो विश्वजिदभिजिताविन्द्रकुत्ती भवतोसंव्याथाय ॥ ६ ॥

सिद्धमिदं ॥ ६ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
द्वादशः खण्डः।

अथ त्रयोदशः खण्डः।

उक्तानि त्रीणि सारस्वतानि अथ दार्षदृतमित्ययनमेकयजमानकं विवक्षुराह।

संवत्सरं ब्राह्मणस्य गारक्षेत् संवत्सरं व्यर्णेनैतन्भवेग्निमिन्धीत संवत्सरे परीणह्यग्नीनादधीत ॥ १ ॥

अस्योत्तरस्य चेष्टयनयोः साधारणं नियममाह सूत्रकारः दार्षदृततौरयोः व्रतानि तिष्ठेद्दिवासीत नक्तं हविरुच्छिष्टभोजी स्यादधः सर्व्वेभ्य मांसाश्यलवणाशी न स्त्रियमुपेयाद्यथा प्रकृत्याहिताग्निवृत्तिं वर्त्तयेदिति एवं सामान्य नियमोपेतः संवत्सरं ब्राह्मणस्य श्रुताध्ययनसम्पन्नस्य ऋत्विजः आचार्य्यस्य वा प्रायश्चित्तार्थं गारक्षेत् दार्षदृते संवत्सरं ब्राह्मणस्य गारक्षेत् ऋत्विज आचार्य्यस्य वेति द्राह्यायणः तदनन्तरमेकसंवत्सरं स-

रस्वत्यास्तीरे नैतस्यवे नानापुराणि ग्रामाः सन्ततेषु मध्ये अर्ष्णे नैतस्यवे एकाग्नेरौपासनस्य परिचर्य्यया संवत्सरमग्निं परिचरेत् पूर्व्वमाहिताग्निश्चेत् अग्निहोत्रेण परिचरेत् ततः संवत्सरादूर्द्ध्वं परीणं नाम स्थली कुरुक्षेत्रे तस्यामग्नीनादध्यात् आधाय च यथाकालमन्वारम्भणीयेष्ट्या दर्शपूर्णमासावकृत्वैव दार्षद्वतं कर्त्तुं तत् स्थानं विसृजेदिति केचिद्दर्शपूर्णमासाभ्यामेवेष्ट्वेत्यपरे दार्षद्वतानङ्गत्वेपि तयोर्नित्यत्वादिति तेषामभिप्रायः पक्षद्वयेपि दार्षद्वतार्थगमनमाहितानग्नीन् परिणह्यैव कुर्य्यात् पूर्व्वमेवाहिताग्निश्चेत्तदुक्तपक्षवानुतिष्ठेत् किन्तु तदानीं तानेवाग्नीन् दृष्टार्थं परिणह्यानीयाग्निहोत्रमेव गृहीत्वा गच्छेत् ॥ १ ॥

इदानीमिष्ट्ययनोपक्रमं दर्शयति ।

स दक्षिणेन तोरेण दृषद्वत्या आग्नेयेनाष्टाकपालेन ग्रम्यापरासीयात् ॥ २ ॥

सरस्वतीदृषद्वत्योः संभेदं दृषद्वतीदक्षिणेन तोरेणोपक्रम्याष्टाकपालद्रव्येणाग्निदेवताकेनेष्ट्वा तत्प्रभृति षट्त्रिंशत् प्रक्रमवर्ज्जं ग्रम्यापरासे प्रासन् तत्र तत्रेष्टिं कुर्व्वन्नेव सारस्वतवद्गच्छेत् ॥ २ ॥

कुरुक्षेत्रस्य देवयजनत्वं प्रतिपादयितुमाख्यायिकामाह ।

इन्द्रश्च रुशमा चाऽशं प्रास्पेतां यतरोनौ पूर्वो भूमिं पर्य्येति स जयतीति भूमिमिन्द्रः पर्य्येत् कुरुक्षेत्रꣳ रुशमा साब्रवीदजैषन्वेत्यहमेव त्वामजैषमितीन्द्रोब्रवीत्तौ देवेषु

पृच्छेतां ते देवा अब्रुवन्नेतावती वाव प्रजापतेर्वेदिर्या-वत् कुरुक्षेत्रमिति तौ न व्यजयेतां ॥ ३ ॥

पूर्वं इन्द्रश्च रुशमा च ब्रह्मवादिनौ क्षत्स्नाभूमिपरिभ्रमणस्य शीघ्रकरणार्थमंशं पणं प्रास्येतां प्रक्षिपतां जयप्रकारमुच्यते तावावयोर्मध्ये यतरः पूर्वभावी सन् भूमिं परिगच्छति स जयतीत्येवं समयमाधत्थेन्द्रो भूमिं पर्य्येत् रुशमा तु कुरुक्षेत्रं तौ तथा कृत्वा पुनरागत्य परस्परमेव जयोममैव जय इत्यब्रूतां तौ विवदमानौ देवेष्वपृच्छेतां तौ देवा इदमब्रवीत् कुरुक्षेत्रमेव प्रजापतेर्वेदिः तत्रैव सर्वा भूमिः वसिता एतावती वै पृथिवी यावती वेदिरिति श्रुतेरित्यभिप्रायः अतउभाभ्यामपि भूपरिगमनस्य समत्वादुभयोरपि जयः समान एवेति अतस्तौ नव्यजयेतां एतावता कुरुक्षेत्रमेव भूमेः प्रशस्ततरोदेवयजनप्रदेश इत्युक्तं भवति तस्मादुत्थानकालः ॥ ३ ॥

अवभृथस्नानमाह ।

स य आग्नेयेनाष्टाकपालेन दक्षिणेन तीरेण दृषद्वत्याः शम्यापरास्येति त्रिप्लक्षान् प्रति यमुनामवभृथमभ्यवैति तदेव मनुष्येभ्यस्तिरोभवति ॥ ४ ॥

यदुक्तप्रकारेणेति सः त्रिः प्लक्षात् जनपदं प्राप्य तत्रैव यमुनायामभ्यवैति तत्रैव हि देशे दृषद्वती मनुष्येभ्यस्तिरोभूता बहुदकापि सती तत्रैवान्तर्हिता भवतीत्यर्थः अत्र सूत्रं तत्र शम्याप्रासनं यथा सारस्वतेषु नतु प्रक्रमान् प्रक्रामेत् कामिष्टिमेकैकेनाङ्गा

संस्थापयेत् दृषदुपलयोः दक्षिणेन तीरेणेयात्तस्याः प्रभव्यमर्मं प्राप्येतयेष्ट्वा चिःप्लवावहरणं प्रति यमुनामवभृथमभ्यवेयाद्यत्र क्व च ततोदूरे यमुना स्यात्तत्रैतयेष्ट्वा स्वयं सामगायन्नवभृथमभ्यवेयादगायन्वा प्रव्रजिष्यतोयनमिदमन्य इति धानञ्जप्यस्तदेव मनुष्येभ्यस्तिरोभवतीति नग्रामं पुनरेयादितीव स्वर्गल्लोकमाक्रमते व्यावर्त्तते श्रेयान् भवतीति चोदकान्तर्द्धानाद्वा यथासरजसमिति ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य त्रयोदशः खण्डः ॥

अथ चतुर्दशः खण्डः।

अथ तुरायणनामेष्ट्ययनं सर्व्वर्द्धिसाधनं सत्रमाह।

आग्नेयोष्टाकपाल ऐन्द्र एकादशकपालो वैश्वदेवश्चरुः ॥ १ ॥

आग्नेयोष्टाकपाल इत्यादयस्मिन्न इष्टयोऽनवनं क्रमेण [illegible] संवत्सरपर्य्यन्तमहरहः कर्त्तव्याः एका च हविष्केष्टिरियं दर्शपूर्णमासवत् तथाच सूत्रं तत्र तिस्र इष्टयः पूर्व्वाह्ण एका पृथक्च मध्यन्दिनापराह्णयोस्तासु पृथगनुपूर्व्वं हवींषि यान्युक्तानि ब्राह्मणेनैका

वैव स्यात्तस्यां तानि सर्वाणि स्युः संवत्सरादूर्ध्वमवभृथमभ्यवेयात्तत्र सामगानमिति तएवं सतः स्वयमेव कृष्णाजिनं प्रतिमुञ्चते ॥ १ ॥

तद्विधाय स्तौति।

अदीक्षितः कृष्णाजिनं प्रतिमुञ्चते यददीक्षितः कृष्णाजिनं प्रतिमुञ्चते या मानुष्यृद्धिस्तान्तेनर्द्धोति ॥ २ ॥

दीक्षानाम हि देवविशेषभावजन्मस्वीकारः अतस्तद्राहित्येन कृष्णाजिनप्रतिमोक्षात् मानुषीं ऋद्धिमाप्नोति तिष्ठेद्दिवारात्रावासीतेत्यादीष्ट्ययनद्वयसाधारणं यत्तत्परः सूत्रकारेणोक्तं अस्माभिः पूर्व्वायणादाबुदाहृतं ॥ २ ॥

तत्स्तुतिवदनूद्य प्रशंसति।

अथ यत्तपस्तप्यते या दैवी तां तेन ॥ ३ ॥

तपसा देवभावप्रतिबन्धकपापक्षयाद्दैवीसमृद्धियुक्ता ॥ ३ ॥

अथ विहिता इष्टी क्रमेणानूद्य प्रशंसति।

यदाग्नेयोष्टाकपालो भवत्यग्निमुखा वै देवता मुखतएव तद्देवताऋद्ध्नोत्यथो प्रातःसवनमेव तेनाप्नोत्यथ यदैन्द्रएकादशकपालो भवत्यैन्द्रं वै माध्यन्दिनꣳसवनम्माध्यन्दिनमेव सवनं तेनाप्नोत्यथ यदैश्वदेवश्चरुर्भवति वैश्वदेवं वै तृतीयसवनं तृतीयसवनमेव तेनाप्नोति ॥ ४ ॥

निगदसिद्धमेतत् ॥ ४ ॥

अथैतस्य प्रयोक्तृसम्बन्धप्रदर्शनद्वारेण फलं दर्शयति।

एतेन वै तुरोदेवमुनिः सर्व्वामृद्धिमार्द्नोत्सर्व्वामृद्धिमृद्नोति य एतदुपैति ॥ ५ ॥

स्पष्टं। अत्रसूत्रं संवत्सरमहरहस्तौरेण यजेत षष्ठ्याञ्चैवोपवसथस्य पञ्चम्यामिति गौतमो व्रतोपायनीयमोदनमग्नित्वाकेशश्मश्रूणि वापयित्वाहतं वसनं परिधाय परिसमुह्याग्नीन् परिस्तीर्य्येत्यादि द्रष्टव्यं ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
चतुर्दशः खण्डः।

अथ पञ्चदशः खण्डः।

अथ प्रतिष्ठासाधनं सर्पाणां सत्रमाह।

अतिरात्रावभितोग्निष्टोमामध्ये सर्व्वोदशदशी संवत्सरीद्वादशोविषुवान्सर्पसामानि विषुवति क्रियन्ते ॥ १ ॥

प्रायणीयोदयनीयौ सषोडशिकावतिरात्रावुभयतो भवतः मध्ये सर्व्वाण्यहानि अग्निष्टोमसंस्थानि अतिरात्रद्वयसहितः सर्व्वोपि

संवत्सरोदशस्तोमको भवति मध्यमन्तु विषुवद्दोहाद्दशस्तोमकः तत्र सर्पसामानि क्रियन्ते व्रतानि कल्पे निर्दिष्टानि अत्र द्वादशो विषुवानिति विषुवत्संकीर्त्तनादभिगरापगरयोश्च गवामयनं महाव्रतएव वर्त्तमानयोरिह विधानाद्गवामयनिकान्यहान्यग्निष्टोममात्रविकृतीनि दशस्तोममात्रविकृतीनि च लिङ्गाद्दत्र भवितव्यानि तथाहि तत्रत्यं ब्राह्मणं अभिगरापगरौ भवतो निन्दत्येनानन्यः प्रान्यः शंसतीति नैवं सूत्रकारेणैवमाशङ्क्य कल्पानुसारेणैव परिहृतत्वादाह सूत्रकारः सर्पसत्रङ्गवामयनं स्तोमसंस्थाविकृतं स्यादित्येके षण्डकुषण्डावभिगरापगराविति ह्याहेति प्रत्यक्षविहितं त्वार्षेयकल्पेन तत्रानुमानन्न विद्यतेऽभिगरापगरावेवोपोत्तमेहनि स्यातामिति अतः कल्पकारेणैकेनैव विराजा द्वन्देन पुनः पुनः अभ्यासेन सर्पसत्रस्य कल्पितत्वादभिगरापगरावप्युत्तमेहन्येव सर्व्वाण्यहानि तु विराजद्वन्देन सर्व्वोदशीति कल्पवचनात्तथैवानुष्ठेयानि अतआश्वलायनः सर्पाणामयनङ्गो आयुषोदशीस्तोममनुलोमेन षण्मासान् प्रतिलोमेन षट्ज्योतिः द्वादशस्तोमोविसुवतस्थाने प्रकाशमापेयुरिति ॥ १ ॥

अथैतस्य फलं सप्ररोचनमाह।

एतेन वै सर्पाण्षु लोकेषु प्रत्यतिष्ठन्नेषु लोकेषु प्रतितिष्ठन्ति यएतदुपयन्ति ॥ २ ॥

स्पष्टं ॥ २ ॥

अथास्य सर्पायणत्वमुपपादयितुं पूर्व्वदृत्तं सर्पाणां गृहपत्यादिविभागं तत्रामनिर्देशपुरःसरं दर्शयति।

जर्व्वरो गृहपतिर्धृतराष्ट्र ऐरावतो ब्रह्मा पृथुश्रवा-दौरे अवसउद्गातारावश्वाजगावश्च प्रस्तोतृप्रतिहर्त्तारौ दत्तस्तापसोद्गोता शितिपृष्ठो मैत्रावरुणस्तक्षको वै शालेयो ब्राह्मणाक्षसी शिखानुशिखौ नेष्टा पोतारावरुण आटो-क्षावाकस्तिमिर्घोदौरे श्रुतोग्रीत् कौतस्तावध्वर्यु अरिमेज-यश्च जनमेजयश्चार्व्वुदो ग्रावस्तृदजिरः सुब्रह्मण्यश्च कपि शंगावुन्नेतारौ षण्डकुषण्डावभिगरापगरौ ॥ ३ ॥

कौ तु स्तौ कुतस्तस्य पुत्रौ अध्वर्य्युप्रतिप्रस्थातारौ इत्यर्थः चक्रपिशङ्गावपि मिलित्वा उन्नेतृकार्य्यकर्त्तारौ अभिगरस्तुतिरप-गरो निन्दिता तौ महाव्रते ब्राह्मणशूद्राभ्यां कर्त्तव्यौ तदुक्तवाप्यु-पोत्तमेहनि अभिगरापगरयोः कर्त्तारौ षण्डकुषण्डौ भवतः सुब्रा-नमन्यत्। ३ ॥

अथ सप्तरोचनानि फलान्तराण्याह।

एतेन वै सर्पा अपमृत्युमजयन्नपमृत्युञ्जयन्ति यएतदुप-यन्ति तस्मात्ते छित्वा जीर्णान्त्वचमतिसर्पन्त्यपक्षिते मृत्युम-जयन् सर्पावा आदित्याआदित्यानामिवेषां प्रकाशो भवति य एतदुपयन्ति ॥ ४ ॥

स्पष्टोर्थः अत्र सर्पसत्रस्य षोड़शिमतावतिरात्रौ जनमेजयस्य

सफपौष्कले श्यावाश्वस्तस्य वै लोके गौरीवितं समानमितरं विराजा छन्देन सर्व्वोदग्गीत्येवमादिकः कल्पोद्रष्टव्यः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चविंशाध्यायस्य
षोडशः खण्डः।

अथ षोड़शः खण्डः।

अथ प्रजातिसाधनत्वेसंवत्सरं सत्रमाह।

गवामयनं प्रथमः संवत्सरोऽथादित्यानामथाङ्गिरसां ॥ १ ॥

स्पष्टं ॥ १ ॥

अथ क्रमेण विहितसंवत्सरत्रयं प्रशंसति।

एतेन वै गावः प्रजातिं भूमानमगच्छन्प्रजायन्ते बह्वयो भवन्ति यएतदुपयन्त्येतेन वा आदित्या एषु लोकेषु प्रतितिष्ठन्ति य एनदुमयन्त्येतेनवा अङ्गिरसः स्वर्गं लोकमायन् स्वर्गं लोकं यन्ति य एतदुपयन्ति ॥ २ ॥

सर्व्वत्रैतेनेत्येतच्छब्देन स्वस्वसंवत्सरसत्रं परिगृह्यते तथानुष्ठायिनां फलत्रयसंकीर्त्तनमवबुद्धानुवादः ॥ २ ॥

अथ मुख्य फलं सप्ररोचनमाह।

परआङ्गारस्तसदृस्यः पौरुकुत्सोवीतहव्यः आयसः कक्षीवानौशिजस्त एतत्प्रजातिकामाः सत्रायणमुपायꣳ स्ते सहस्रꣳ सहस्रं पुत्रानपुथन्नेवं वाव ते सहस्रꣳ सहस्रं पुत्रान् पुष्यन्ति य एतदुपयन्ति॥ ३॥

अङ्गारस्य ऋषेरपत्यमाङ्गारः स च परनामकः आयसः पुत्र आयसः देविकाशिंशुपेत्यादिना आत्वं उशिपुत्रः कक्षीवान् शिष्टं निगदसिद्धं अत्र कल्पः त्रिसंवत्सरस्य गवामयनेन न क्लृप्तः प्रथमः संवत्सरः आदित्यानामयनेन हितीयोऽङ्गिरसामयनेन तृतीय इति अत्र सूत्रकारः प्रथमोत्तमसंवत्सरयोर्व्यत्यासमाह पौर्णमासी प्रसवं त्रिसंवत्सरन्तस्य याथाकामी दीक्षाणां पशिरिति शाण्डिल्यः प्रथमोत्तमौ संवत्सरौ व्यतिहरेदिति धानञ्जय्योऽभिप्लवस्तोमपृष्ठादेगरोहार्थइति दीक्षाणां याथाकाम्यं हारद्वगदीक्षाप्रवृत्तिश्चिन्त्यः अभिप्लवः स्तोमः पृष्ठादेगरोहार्थ इति व्यत्यासे प्रमाणद्वयोपन्यासः अभिप्लवस्य स्तोमोभिप्लवस्तोमः पृष्ठस्य स्थानं पृष्ठादेगः तयोरुभयोरपि रोहामिद्यर्थमित्यर्थः तथा हि रोहो नाम कनीयसः स्तोमस्य प्रथमकरणं ज्यायसः पश्चात्करणं तद्विपरीतस्य प्रत्यवरोहः सच निन्दितः तथा हि तैत्तिरीयकं जामि वा एते कुर्वन्ति यज्ज्यायांसं स्तोममुपेत्य कनीयांसमुपयन्तीति अत्र व्यवहारे सति प्रथमोऽङ्गिरसामयने त्रिवृतोभिप्लवाः मध्यमे आदित्यानामयने त्रिवृत् पञ्चदशाः उत्तमे गवामयने सप्तदशादयोऽभिप्लवेषु क्रियन्त

इत्येवं स्तोमरोहसिद्धिः तथा प्रथमेङ्गिरसामयने पुरस्तात् पृष्ठाः सामा भवन्ति आदित्यानामयने मध्यतः पृष्ठाः गवामयने उपरिष्टात् पृष्ठाइति पृष्ठादेयरोहः सिध्यति तथा निदानमपि अत्रैके गवामयनमन्तः कुर्वन्ति प्रजापतिसत्त्वादेतेन वै गावः प्रजातिं भूमानमगच्छत् प्रजायन्ते वहवो भवन्तीति स्तोमतश्चैवमयनानां रोहो भविष्यतीति ॥ ३ ॥

इति ताण्डामहाब्राह्मणे पञ्चविंशाध्यायस्य षोड़शः खण्डः ॥

अथ सप्तदशः खण्डः।

अथ सर्व्वर्द्धिसाधनं प्रजापतेः सहस्रसंवत्सरसत्रमाह।

अतिरात्रः सहस्रं त्रिवृतः संवत्सरा अतिरात्रः प्रजापतेः सहस्रसंवत्सरं ॥ १ ॥

स्पष्टं ॥ १ ॥

अथैतत् प्रसवसाधनत्वेन प्रशंसति।

एतेन वै प्रजापतिः सर्व्वस्य प्रसवमगच्छत्सर्व्वस्य प्रसवं गच्छन्ति य एतदुपयन्ति ॥ २ ॥

स्पष्टं ॥ २ ॥

पुनरपि जरानिवृत्तिसाधनत्वेन प्रशंसति।

एतद्वै प्रजापतिर्ज्जीर्य्या मूरउपत्तेन जरामपाहतापजरां घ्नते य एतदुपयन्ति ॥ ३ ॥

जीर्य्या जरया मूरीमूढः प्रजापतिरेतत् सत्रमनुष्ठाय जरामपहतवान् जरामपघ्नत इत्येतत्सम्बन्धः ॥ ३ ॥

पुनरनूद्यैतस्य सर्वसमृद्धिसाधनं दर्शयति।

तदेतत्प्रजापतेः सहस्रसंवत्सरमेतेन वै प्रजापतिः सर्व्वामृद्धिमाप्नोत् सर्व्वामृद्धिमृध्नवन्ति य एतदुपयन्ति ॥ ४ ॥

स्पष्ट ॥ ४ ॥

इति ताण्डामहाब्राह्मणे पञ्चविंशाध्यायस्य
सप्तदशः खण्डः।

अथ अष्टादशः खण्डः।

अथ विश्वाधिक्यसाधनं विश्वसृजामयनाख्यं सहस्रसंवत्सरं सत्रमाह।

पञ्चपञ्चाशतस्त्रिवृतः संवत्सराः पञ्चपञ्चाशतः पञ्चदशाः पञ्चपञ्चाशतः सप्तदशाः पञ्चपञ्चाशत एकविꣳशा विश्वसृजाꣳ सहस्रꣳसंवत्सरं ॥१॥

पञ्चसंख्याकाः पञ्चाशतः सपञ्चाशद्गतसंवत्सरास्त्रिवृत्स्तोमकाभवेयुः एवं पञ्चदशादिष्वपि द्रष्टव्यं मिलित्वैतद्विश्वसृजान्देवानां सहस्रसंवत्सरं सत्रं ॥ १ ॥

अथास्याधिकारिसिद्धये विश्वसृज्सम्बन्धं दर्शयति।

एतेन वै विश्वसृजेष्ट्वा विश्वमसृजन्त यद्विश्वमसृजन्त तस्माद्विश्वसृजः ॥ २ ॥

पूर्वं सृष्ट्यादौ सृष्टिकामा देवा एतत् सत्रमनुष्ठाय सत्यसंकल्पाः सन्तः इदं विश्वमसृजन्त एतेषां विश्वसृजइति संज्ञाप्येतन्निमित्ता ॥ २ ॥

इदानीन्तनानामप्येतत्सत्रयाजिनां फलं दर्शयति।

विश्वमेवाननु प्रजायते यएतदुपयन्ति ॥ ३ ॥

एतदुपेयुषः एनान्विश्वञ्जगत् अनुप्रजायते एतदनुष्ठातृभ्योहीनमुपत्तोषं जायते विश्वमपि एते विश्वस्य स्वामिनोभवन्तीत्यर्थः हीनइत्येनोः कर्म्मप्रवचनीयत्वं अत एनानिति द्वितीया एतेन वै विश्वसृज इत्युक्तं ॥ ३ ॥

के ते विश्वसृजः कथमेतदुपायन्निति तदुभयं दर्शयति।

तपो गृहपतिर्ब्रह्म ब्रह्मोरापत्न्यमृतमुद्गाता भूतं प्रस्तो ता भविष्यत्प्रतिहर्त्तार्त्तव उपगातार आर्त्तवाः सदस्याः सत्यꣳ होतर्त्तम्मैत्रावरुण उजोब्राह्मणाच्छꣳसी त्विषिश्चापचितिश्च नेष्टापोतारौ यशोक्षावाकोग्निरेवाग्नीद्गो यावस्तदूर्गुन्नेता वाक्सब्रह्मण्यः प्राणोध्वर्य्युरपानः प्रतिप्रस्थाता दिष्टिर्विशास्तावलं ब्रुवगोपमाशाहविष्येष्यहोरात्राविडयावाचौ मृत्युः शमितेतेदीक्षन्ते ॥ ४ ॥

तपःप्रभृतिषु याः प्रमिदा देवतास्तास्तथैव गृह्यन्ते अप्रमिदास्तु तदभिमानिन्यो देवताः परिगृह्याः एतासां विभज्य सत्रे विनियोगोस्माभिस्तैत्तिरीयब्राह्मणात् ऋचां प्राचीत्यस्मिन्ननुवाके प्रपञ्चितः आर्त्तवास्तदनुसम्बन्धिनः शीतोष्णवर्षाभिमानिन इत्यर्थः दिष्टिर्ब्रह्मण आज्ञा शिष्टं निगदसिद्धं ॥ ४ ॥

उक्तसर्व्वाधिक्यफलसाधनत्वसमर्थनाय पूर्वं विश्वसृज्यर्थं सत्रमुपेयुषां देवानां स्वयम्भूः ब्रह्माविरभूदित्यस्मिन्नर्थे पूर्वतनं श्लोकमुदाहरति।

तदेषश्लोको विश्वसृजः प्रथमे सत्रमासत सहस्रसमं प्रसुतेन यन्तस्ते ह जज्ञे भुवनस्य गोपा हिरण्मयः शकुनो ब्रह्मनामेति ॥ ५ ॥

विश्वसृजो विश्वसृष्टिकर्त्तारस्तदर्थं प्रथमे सृष्टेः पूर्वभूताः सत्रमासत कथमिति तदुच्यते सहस्रसमं सहस्रसंवत्सरं प्रसुतेन

सोमाभिषवेण यन्तः सन्त आसत ते ह त एव हेति विनिग्रहार्थीयः एवकारसमानार्थः भुवनस्य गोपा क्रत्स्नस्य भूतजातस्य पालयिता एतत् सृष्टिप्रलयस्याप्युपलक्षणं अनेन स्वरूपं लक्षितं भवति हिरण्मयः हिरण्मयः शरीरः हिरण्मयः पुरुषोदृश्यते हिरण्यश्मश्रुर्हिरण्यकेश इति हि श्रुत्यन्तरं शकुनः पक्षिरूपः अस्ति पक्षित्वेन श्रुतिषु सर्व्वत्र व्यपदेशः एकः सुपर्णः समुद्रं सुपर्णं विप्राः कवयः पुरः सपक्षीभूत्वेत्यादिषु ब्रह्मनाम ब्रह्मेति प्रसिद्धं यज्ञे प्रादुरभूदिति सम्बन्धः ॥ ५ ॥

एतत् सत्रफलभूतं ब्रह्मणः साक्षात्कारं प्रतिपाद्येदानीन्तनानुष्ठायिनामपि ब्रह्मणः सालोक्यादिफलं दर्शयति ।

ब्रह्मणः सलोकताꣳ सार्ष्टिताꣳ सायुज्यं गच्छन्ति य एतदुपयन्ति ॥ ६ ॥

सार्ष्टिः साम्यप्राप्तिः समानैश्वर्य्ययोग इत्यर्थः शिष्टं स्पष्टं अनेन प्रसङ्गात् अध्ययनादिप्रवर्त्तकानां श्रेयोनिमित्तं परदेवतास्मरणमपि कृतं भवति ॥ ६ ॥

अथ सर्व्वाधिकलक्षणं फलं दर्शयति ।

तदेतद्विश्वसृजाꣳ सहस्रसंवत्सरमेतेन वै विश्वसृजः सर्व्वामृद्धिमृध्नुवन्ति य एतदुपयन्ति ॥ ७ ॥

एतन्निगदसिद्धं इतिवातवतोरयनेन क्लृप्तं विश्वसृजामयनं ज्योतिष्टोमेन वा विक्लृप्तेन ज्योतिष्टोमेन वा यथा स्तोमक्लृप्तेनेति कल्पो द्रष्टव्य इति अत्र विश्वसृजामपरिमितायुःसङ्गावादधिकारः

इदानीमेतेषामपि कथमत्राधिकार इत्ययं विचारः षष्ठस्य समाप्तपादान्ते चिन्तितः सोत्र विरच्यते।

सहस्रवत्सरं सत्रं गन्धर्वैर्देवैरगामुत।
रसायनेन सिद्धानां कुलकल्पोथ वोक्तितः॥
तदायुर्वाथ सार्द्धद्विशतानामुत मासगाः।
वत्सरोक्तिरुत द्वादशरात्रिषु दिनेषु वा॥
आद्योदीर्घायुषः सत्रान् नृणामेवाग्निसम्भवे।
द्वितीयोस्तु रसस्यायुरहेतुत्वे हतोयकः॥
क्रतुस्वकर्तुः फलित्वेस्तु तूर्य्यार्थामम्भवे मतिः।
पञ्चमोस्तु चतुर्विंशत्यत्तमाः सत्रिणोयदि॥
षष्ठोस्तु योमासएष संवत्सरइतीरणात्।
सहस्रमासानाधानादूर्द्ध्वं वेदस्तु सप्तमः॥
वत्सरप्रतिमा द्वादशरात्रय इति श्रुतेः।
न रात्रिषड्दशब्दोत्र प्रतिमायाविशेषणात्॥
स्यारस्यात्त्रिहृदा युक्तेरष्टमः पञ्चइष्यते।
त्रिहृदादिपदैः स्तोमविशिष्टमहरुच्यते॥
नाहःसङ्ख्यस्तोऽहःसु गौणो संवत्सराभिधा।
तस्माद्विश्वसृजां सत्रे सहस्रदिनमिष्यते॥

इदमाम्नायते पञ्चपञ्चाशतस्त्रिवृतः संवत्सराः पञ्चपञ्चाशतः पञ्चदशाः पञ्चपञ्चाशतः सप्तदशाः पञ्चपञ्चाशत एकविंशाविश्वसृजां सहस्रसंवत्सरसत्रे गन्धर्वादीनामेवाधिकारः तेषां दीर्घायुषः सङ्गावादित्याद्यः पञ्चः वसन्ते ब्राह्मणोग्निमादधीतेत्यादिविधानान्मनुष्याणामेवाहवनीयाद्यग्नयः सम्भवन्ति नान्येषां गन्धर्वादीना-

मिति चेत्तर्हि रसायनेन सिद्धानां दीर्घायुषां मनुष्याणामधिकार इत्यस्तु द्वितीयःपक्षः रसस्यारोग्यपुष्ट्यादिजनकत्वमेव नत्वायुष्यहेतुत्वमितिचेत् तर्ह्येकस्मिन् कुले समुत्पन्नानां पितृपुत्रपौत्रादीनां बहूनां सहस्रायुःसम्भवात् कुलाधिकारइति तृतीयः पक्षोस्तु कृत्स्नकर्तुः फलं भवति न च पितृपुत्रपौत्रादिष्वेकोपि कृत्स्नं करोति तस्मान्नास्ति फलमिति चेत् तर्हि सत्रविधायकवचनबलादेव सत्रिणां दीर्घायुर्भविष्यतीति चतुर्थः पक्षोस्तु नह्यस्य वचनस्य सोर्थः सम्भवति तद्वाचकपदाभावात् नच कल्पयितुं शक्यते सम्भावितायुष्काणामपि सत्रान्तरेषु प्रवृत्तानां दैवान्म्रियमाणानां तत्सत्रविधिबलादायुर्वृद्धादर्शनादिति चेत् तर्हि पञ्चपञ्चाशतइत्यस्य शब्दस्यपुरुषपरत्वमङ्गीकृत्य सार्द्धद्विशतानां पुरुषाणामधिकारेभिहिते वत्सरचतुष्टयेन सत्रस्य सहस्रसंवत्सरत्वं सम्पद्यत इति पञ्चमः पक्षोस्तु चतुर्विंशति परमाः सत्रमासोरात्रिति वचनाद्भ्यधिकानां न तत्राधिकार इति चेत् तर्हि योमासः ससंवत्सर इति वचनात् संवत्सरशब्दस्य मासपरत्वे सति सहस्रमासं सत्रमित्येषषष्ठः पक्षोस्तु अष्टमे वत्सरे उपनीतो द्वादशवर्षाणि वेदमधीत्य विंशतिवर्षवयस्को विवाहं कृत्वा जातपुत्रोग्निमादधीत तस्मादाधानादूर्द्धमस्यायुषि न सन्ति सहस्रमासा इति चेत्तर्हि संवत्सरस्य प्रतिमा वै द्वादशरात्रय इति वचनात् संवत्सरशब्दोद्वादशरात्रिपरः तथा सति रात्रीणां द्वादशसहस्राणि सम्पद्यन्ते तासु च रात्रिषु षष्ट्युत्तरशततत्रयदिवसरूपसंवत्सरत्वेन गण्यमानासु त्रयस्त्रिंशत् संवत्सरेभ्य ऊर्द्धं मासचतुष्टयं भवति तावत्परिमितञ्चायुराधानादूर्द्धमपि सम्भवन्तीति सप्तमः पक्षोस्तु संवत्सरप्रतिमा वै

द्वादशरात्रय इत्यस्मिन्वाक्ये संवत्सरशब्दो न रात्रिपरः किन्तु तेन शब्देन प्रतिमा विशिष्यते तस्मान्न सप्तमः पक्षोयुक्त इति चेत् एवन्तर्हि संवत्सरशब्दोदिनपरइत्यष्टमः पक्षोस्तु तथा सति त्रिवृतः संवत्सरा इत्यादिवाक्यानां स्वारस्यं भवति त्रिवृत् पञ्चदशसप्तदशएकविंश इत्येते शब्दाः स्तोमवाचकाः सन्तः स्तोमयुक्तएकैकस्मिन्नहनि यागरूपे लक्षणया वर्त्तते सत्रेषु तथाविधप्रयोगबाहुल्यान्न त्वहःसङ्गे क्वचिदपि त्रिवृदादिशब्दाः प्रयुक्ताः तैश्च शब्दैः सामानाधिकरण्यात् संवत्सरशब्दः स्वावयवभूतेऽहनि अवयवलक्षणया वर्त्तते त्रिवृतः संवत्सराइत्युक्ते त्रिवृत्स्तोमकयागयुक्तान्यहानीत्युक्तं भवति तस्मादिश्वसृजामृषीणामिदं सहस्रदिनमिति सिद्धान्तः ।

मध्ये पृष्ठं पूर्व्वमुक्तं पञ्चविंशे ततः परं ।
उक्तमङ्गिरसां सत्रं वृतिवातवतोस्ततः ॥
तृतीयमयनं प्रोक्तञ्चतुर्थं कुण्डपायिनां ।
तापश्चितं ततः प्रोक्तं ततो द्वादशवत्सरं ॥
षट्त्रिंशद्वत्सरं प्रोक्तं शाक्यानामिह सप्तमं ।
अष्टमं त्विह साध्यानां शतसंवत्सरं ततः ॥
अग्नेः सहस्रसाव्यन्तु परं सारस्वतन्त्रयं ।
दार्षदृतं ततः प्रोक्तन्तुरायणमतः परं ॥
एकैकोयजमानोऽत्र स्यादिष्टायनयोस्तयोः ।
सर्पसत्रन्ततः प्रोक्तं ततस्त्राय्यं प्रकीर्त्तितं ॥
द्वे सहस्रसमे पूर्व्वं तयोरुक्तं प्रजापतेः ।
ततोविश्वसृजामुक्तमुक्तान्यष्टादशत्विह ॥

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्।
पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥ ७॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीर-
बुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते
माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे
पञ्चविंशाध्यायस्य अष्टादशः खण्डः।
पञ्चविंशोध्यायः सम्पूर्णः।
सम्पूर्णश्च ग्रन्थः।

ताण्ड्यमहाब्राह्मणस्य सूची।

त्रयोदशाध्याये।

खण्डः १—१२ स्तोमसंस्थाविधानम्।

अथ प्रथमः खण्डः।

१ स्तोत्रीय ऋचः।
२ ऋच सङ्गतिः।
३ प्रकरणीयां हिरण्यादिलम्भकत्वं।
४ लिङ्गान्तरानुगुण्यं।
५ लिङ्गान्तर सङ्गतिः।
६ द्वितीय ऋचविधानं।
७ अहः सङ्गतिः।
८ आनुगुण्य प्रदर्शनं।
९ विग्रिष्टयज्ञ हेतुता।
१० सप्तर्च द्वय विधानं।
११ चतुर्ऋच विधानं।
१२ ऋचसूक्त विधानं।

इति प्रथमः खण्डः।

अथ द्वितीयः खण्डः।

१ स्तोत्रीय ऋचप्रदर्शनं।
२ ऋच सङ्गतिः।
३ आनुगुण्य कथनं।
४ द्वितीयाज्य स्तोत्रीय ऋचः।
५ तृतीयाज्यस्तोत्रं।
६ सङ्गति कथनं।
७ चतुर्थाज्य स्तोत्रं।
८ विग्रेष सङ्गति कथनं।

इति द्वितीयः खण्डः।

अथ तृतीयः खण्डः।

१ माध्यन्दिन पवमानस्य स्तोत्रीया ऋक्।
२ विश्वामित्र गायत्र्योः स्तुतिः।
३।४ पवमान ऋचान्तरं।
५ इतिकर्त्तव्यता प्रतिपादक ब्राह्मणातिदेशः।
६ सामान्तरविधानं।
७ सान्त्यविधानं।
८ अहः सङ्गतिः।
९।११ पुनरावृत्ति सामान्तरविधानं।
१० प्रतिष्ठा हेतुत्वेन स्तुतिः।
१२ प्राप्ति साधनत्वेन स्तुतिः।

१३ अनुरूप प्रदर्शनं ।
१४ सामान्तरविधानं ।
१५ स्तुतिः ।
१६ सामान्तरविधानं ।
१७ पशुवाङ्ख्य स्तुतिः ।
१८ सामान्तरविधानं ।
१९ अङ्गः प्रशंसा ।
२० अङ्गः सारूप्यं ।
२१ गेय सामान्तरं ।
२२ एतत् सामप्रशंसा ।
२३ गातव्य सामपदर्शनं ।
२४ आख्यायिका कथनं ।
२५ संख्याद्वारेण प्रशंसा ।
२६ माध्यन्दिनसवने गायत्रऋचः ।

इति तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

१ ओङ्कार सामस्य संज्ञाचतुष्टयं ।
२ एकार्थयोः पादसंख्यानं ।
३।४ एकार्थयोः प्रकारान्तरेण प्रशंसा ।
५ एकार्थयोः गान विधानं ।
६ गाने गुणविधानं ।
७ एकार्थयोः एथक स्तुतिः ।
८ गाने उद्घोषविधानं ।
९ एतद्देदन प्रशंसा ।
१० काम्य निधन प्रदर्शनं ।
११ प्रस्तावोद्गानयोः क्षिप्रत्वविधानं ।
१२ पञ्चपुरीषपदानां गानं ।
१३ तत् प्रशंसा ।
१४ ब्रह्मणस्य स्तोत्रीय ऋचः ।
१५ गेय सामविधानं ।
१६ विशिष्ट स्तोत्रीय सामान्तरं ।
१७ कामनाभेदे ब्रह्म सामविधानं ।
१८ कर्त्तृविशेषे व्यवस्थापनं ।

इति चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

१ आर्भव पवमानीयाद्य ऋचः ।
२।३।४ ऋचान्तरविधानं ।
५ ऋचान्तर प्रशंसा ।
६ पुनस्तृचान्तरविधानं ।
७ त्रैष्टुभ ऋच सङ्गतिः ।
८ ब्राह्मणातिदेशः ।
९ सामान्तरविधानं ।
१० सन्तानहेतुता कथनं ।
११ गेयसाम प्रदर्शनं ।

१२ तस्य स्तुतिः ।
१३ आवनस्य दृष्टिहेतुता ।
१४ गेयसाम प्रदर्शनं ।
१५ पशुप्राप्ति साधनता ।
१६ ब्राह्मणातिदेशः ।
१७ सामान्तरविधानं ।
१८ सामान्तर प्रशंसा ।
१९ पुनः सामान्तरं ।
२० पशुप्राप्ति साधनता ।
२१ आवृत्ते सामान्तरं ।
२२ गुणविधानं ।
२३ एतद्विवरणं ।
२४ पदस्तोम संज्ञा ।
२५ प्रतिष्ठा हेतुता कथनं ।
२६ अन्तिमऋचे गेय सामविधानं ।
२७ संज्ञाद्वारेण स्तुतिः ।
२८ पवमान स्तोत्रोपसंहारः ।

इति पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

१ उक्थीय प्रथम ऋचः ।
२ तत् प्रशंसा ।
३ द्वितीयोक्थ स्तोत्रं ।
४ प्रकारान्तर स्तुतिः ।
५ तृतीयोक्थ स्तोत्रं ।
६ प्रथम ऋच गेयसाम ।
७ अस्य पशु साधनता ।
८ द्वितीयोक्थ सामविधानं ।
९ अस्य सर्व्वप्राप्तिसाधनता ।
१० प्रकारान्तर स्तुतिः ।
११ तृतीयोक्थ सामविधानं ।
१२ संज्ञाविधानं ।
१३ स्तोभग्रहण स्तुतिः ।
१४ स्तोभग्रहणं ।
१५ इडाया गुणविशेषविधानं ।
१६ स्तोमलक्षण प्रदर्शनं ।

इति षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

१ वक्ष्यमाणीय स्तौत्रीयऋचः ।
२ ज्योतिः शब्दार्थ प्रदर्शनं ।
३ अन्त्य पदान्तरानुवादः ।
४ तस्य स्तुतिः ।
५ वक्ष्यमाणीय द्वितीयऋचः ।
६ अहः संगतिः ।
७ स्तोत्रीयानु रूप ऋचद्वयमेलनं ।

८ दशर्चं द्वयविधानं ।
९ दशर्चं गुणविधानं ।
१० दशर्चं पादावृत्ति कथनं ।
११ स्तोत्र चतुष्टय विधानं ।
१२ एतत् प्रशंसा ।
१३ एतत् वेदन प्रशंसा ।
१४ मन्त्रचतुष्टय स्तुतिः ।
१५ वक्ष्यमाणीयान्त्यत्रचः ।
१६ स्तोत्रविधान स्तुतिः ।

इति सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

१ प्रथमाज्य स्तोत्रं ।
२ द्वितीयाज्यस्तोत्रं ।
३ स्तोत्र प्रशंसा ।
४ तृतीयाज्यस्तोत्रं ।
५ चतुर्थाज्यस्तोत्रं ।

इति अष्टमः खण्डः ।

अथ नवमः खण्डः ।

१ माध्यन्दिनपवमानीयप्रथमत्रचः
२ माध्यन्दिन सवने सङ्गतिः ।
३ पृथक्त्रचविधानं ।
४ रैवतषष्ठाङ्गैः षष्ठाङ्गैः सङ्गति ।
५ त्रचान्तरविधानं ।
६ गायत्र त्रचसङ्गतिः ।
७ स्तावकब्राह्मणादिदेशः ।
८ आवृत्य सामान्तर विधानं ।
९ सामान्तरस्तुतिः ।
१० पुंनःसामान्तरविधानं ।
११ तस्यस्तुतिः ।
१२ सामान्तर विधानं ।
१३ सामान्तरप्रशंसनं ।
१४ त्रचसामान्तर विधानं ।
१५ गातव्यसामोपपत्तिः ।
१६ निधनसंख्यानुवादः ।
१७ विहितसामचतुष्टय स्तुतिः ।
१८ सामान्तरविधानं ।
१९ ऋषिसम्बन्ध प्रदर्शनं ।
२० आवृत्त सामान्तरविधानं ।
२१ एतद्विवरणं ।
२२ त्रच सामान्तरविधानं ।
२३ एतत् प्रशंसनं ।
२४ सामान्तरविधानं ।
२५ एतत् प्रशंसनं ।
२६ गातव्यसाम प्रदर्शनं ।

२७ अन्न प्राप्ति साधनता ।
२८ छन्दोद्वारा स्तुतिः ।
२९ ज्योतिष्टोमीय गायत्र सङ्गतिः ।

इति नवमः खण्डः ।

अथ दशमः खण्डः ।

१ एकस्तोत्रीय छन्दोविशेषविधानं ।
२ ब्रह्मण्यीय स्तोत्रीया ऋक् ।
३ अच्छावाक एकस्तोत्रीया ऋक् ।
४ आद्यएक स्तोत्र सामविधानं ।
५ पशूनां अग्निकारत्वं ।
६ धनप्राप्ति हेतुता ।
७ एतद्वेदन प्रशंसा ।
८ आख्यायिका कथनं ।
९ प्रतिष्ठा हेतुता कथनं ।
१० गातत्र साम प्रदर्शनं ।
११ अस्य प्रजापति हेतुता ।
१२ अच्छावाकस्य स्तोत्रसामप्रदर्शनं ।
१३ एतस्य क्षिप्रकारिता ।
१४ षष्ठाहस्य पारप्राप्ति साधनता ।
१५ ब्रह्मवादिनां कथनं ।
१६ तत् कथनोत्तरं ।
१७ दृष्टती गानं ।
१८ एतस्मिन् याज्यायुपादसंख्या विधानं ।

इति दशमः खण्डः ।

अथ एकादशः खण्डः ।

१ आर्भव पवमानीय प्रथमस्तोभीया ऋक् ।
२ लक्षान्तर प्रदर्शनं ।
३ लक्षान्तर विधानं ।
४ चतुर्थलक्ष संयोगद्वारेणानुवादः ।
५ फलितार्थ कथनं ।
६ अपर लक्ष प्रदर्शनं ।
७ लक्षान्तर प्रदर्शनं ।
८ पूर्वकथित ब्राह्मणातिदेशः ।
९ गातत्र सामत्रय विधानं ।
१० विशिष्टफल साधनता कथनं ।
११ गेयसाम प्रदर्शनं ।
१२ एतस्य आयुष्कारिता ।
१३ सामान्तरविधानं ।
१४ पशुसाधनता ।
१५ ब्राह्मणातिदेशः ।
१६ आदत्तौ सामान्तरविधानं ।
१७ एतत् प्रशंसा ।

१८ निधनाख्य साम प्रशंसा ।
१९ एतत्तच्च सामद्वय विधानं ।
२० एतयोः स्तुतिः ।
२१ अन्तिमटचस्य सामान्तरविधानं ।
२२ एतस्य स्तुतिः ।
२३ निधन विधानं ।
२४ पवमान स्तोत्रोपसंहारः ।

इति एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

१ ब्रह्मवादिकृत विचारः ।
२ निर्नीतपक्ष कथनं ।
३ प्रकारान्तर स्तुतिः ।
४ मैत्रावरुणोक्थ सामप्रदर्शनं ।
५ अस्य सर्व्वकाम साधनता ।
६ उक्थ स्तोत्र साम प्रदर्शनं ।
७ एतस्य आशीःप्रापकता ।
८ एतस्य महत्त्व प्रापकता ।
९ अच्छावाकोक्थ साभप्रदर्शनं ।
१० उद्गेतृ पुत्रस्यातिदेशः ।
११ तस्य धर्म्म कथनं ।
१२ एतस्य स्तुतिः ।
१३ सप्तमस्याशः संसारहेतुता ।
१४ षडहः समाप्तनन्तरं वह्नभाषण-
विधानं ।
१५ अस्मिन समये ऋत्विजो वह्नभो-
जनविधानं ।
१६ उक्थ त्रयस्तोमविधानं ।

इति द्वादशः खण्डः ।

इति त्रयोदशोऽध्यायः ।

चतुर्दशाध्याये ।

खण्डः १——१२ । छन्दोम-
स्तोमलक्षणिः ।

अथ प्रथमः खण्डः ।

१ प्रथम छन्दोमस्तोमलक्षणिः ।
२ छन्दोमकल्पनं ।
३ स्तोत्रीयटचविधानं ।
४ गायत्री स्वीकारकारणं ।
५ मुख्य गायत्रयग्रहणकारणं ।
६।७ तत् प्रसंशनं ।
८ छन्दोम विनियोगहेतुः ।
९।१०।११ एकविंशति स्तोत्रीयः ।
१२ चतुर्विंशस्तोम दृष्टान्तः ।

१३ पक्ष पक्ष रहित कथनं।
१४ प्रत्यक्ष चतुर्विंशः।

इति प्रथमः खण्डः।

अथ द्वितीयः खण्डः।

१ सप्तमाहः प्रथमाज्य स्तोत्रं।
२। ३ ऋच सङ्गतिः।
४ द्वितीयाज्यस्तोत्रं।
५ तृतीयस्य स्तुतिः।
६ चतुर्थाज्यस्तोत्रविधानं।

इति द्वितीयः खण्डः।

अथ तृतीयः खण्डः।

१ माध्यन्दिन पवमान प्रथमऋचः।
२ ऋचसङ्गतिः।
३। ४ ऋचान्तरं।
५ जागतऋच सङ्गतिः।
६ ब्राह्मणातिदेशः।
७ सामान्तर विधानं।
८ दृष्टान्त प्रदर्शनं।
९।१०। ११।१२। १३ अपरसाम विधानं।
१४ द्वादशाहः सङ्गतिः।
१५ अन्यसाम विधानं।
१६। १७। तस्यस्तुतिः।
१८। १९। २० ऋचसामान्तरं।
२१। २२ अन्यतसाम विधानं।
२३। २४। अन्तिम सामान्तरं।
२५ स्तोत्रोपसंहारः।

इति तृतीयः खण्डः।

अथ चतुर्थः खण्डः।

१ एकस्तोत्र तृतीय ऋचः।
२ स्तोत्रीय ऋचः।
३ जगती सम्पादन लाभः।
४ एकस्तोत्रनिवर्त्तक साम।
५ भ्रातृव्यहननहेतुता।
६ अच्छावाकनिवर्त्तक साम।
७ सर्व्वकामप्राप्ति साधनं।

इति चतुर्थः खण्डः।

अथ पञ्चमः खण्डः।

१।२ आर्भवपवमान प्रतिपत्तऋचः।
३।४।५।६ त्रिष्टुप् सम्पादनं।

७ अक्षरपंक्तिश्छन्दः सङ्गतिः ।
८ तस्य विवरणं ।
९ तस्यर्चान्तरं ।
१० लक्षणया जगती सङ्गतिः ।
११ सामान्तर विधानं ।
१२ ब्राह्मणातिदेशः ।
१३ ब्रह्महेतुत्वेन स्तुतिः ।
१४।१९ ऋचान्तरे सामान्तरं ।
१५ सर्व्वकाम प्राप्तिहेतुता ।
१७ द्वादशाहस्य समद्रसंपता ।
१८ निधनानुवादः ।
१९ निधन संख्यया स्तुतिः ।
२० ब्राह्मणातिदेशः ।
२१ ।२२ ऋच साम विधानं ।
२३ ।२४। २५ स्तोतुः फल कथनं ।
२६ छन्दोद्वारा स्तुतिः ।
२७ ऋचान्तरे सामान्तरं ।
२८ तस्य व्याख्यानं ।
२९ छान्दोम वेदन फलं ।
३० गाथी स्तोत्रानुवादः ।
३१ स्तोत्रोपसंहारः ।

इति पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

१ उक्थ स्तोत्रीय प्रथम ऋचः ।
२ द्वितीयोक्थ स्तोत्रीय ऋचः ।
३ अपभ्रंश परिहारः ।
४ तृतीयोक्थ स्तोत्रीय ऋचः ।
५ प्रथमोक्थ साम ।
६ सर्व्वकाम प्राप्ति साधनता ।
७ । ९ द्वितीयोक्थ साम ।
८ । १० तत् प्रशंसनं ।
११ स्तोम क्रमि विधानं ।

इति षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

१ अष्टमस्याङ्गः स्तोम क्रमिः ।
२ । ३ अष्टमाङ्गः स्तुतिः ।
४ अङ्गां यातयामत्वं ।
५ नवर्च त्रितय विधानं ।
६ । ७ नवसंख्यास्तुतिः ।
८ अष्टमाङ्गः सङ्गतिः ।
९ ऋचत्रय विधानं ।
१० स्तोमविधान स्तुतिः ।

इति सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

१।२ अष्टमेऽहनि प्रथमाज्यस्तोत्रं
३ द्वितीयाज्यस्तोत्रं ।
४ विनियुक्तादिदोषः ।
५।६ तृतीयमाज्यस्तोत्रं ।
७ चतुर्थाज्यस्तोत्रं ।
८ दोषसमाधानं ।

इति अष्टमः खण्डः ।

अथ नवमः खण्डः ।

१ स्तोत्रीय ऋच विधानं ।
२ गायत्र सङ्गतिः ।
३।४ अपर ऋचविधानं ।
५ धृतिधारण सङ्गतिः ।
६ ब्राह्मणातिदेशः ।
७ सामान्तरविधानं ।
८ वैरूप साम प्रशंसनं ।
९।११।१२ ऋच सामान्तर विधानं ।
१० सामनिर्वचनं ।
१३।१९ सामान्तर प्रदर्शनं ।
१४।१५।१६ स्तावक सामान्तरं ।
१७ ब्राह्मनातिदेशः ।
१८।२०।२१ प्रकारान्तर स्तुतिः ।
२२ ऋचान्तरे सामान्तर विधानं ।
२३ ऋक्संख्यापूरकसम्बन्धः ।
२४ पशुसम्बन्धिहेतुता ।
२५।२८।२९ अन्यसामविधिः ।
२६ तत् विधानस्तुतिः ।
२७ तद्व्याख्यानं ।
३० सामगानरूपं ।
३१।३२।३५ सामान्तरं ।
३२ द्विविध फलप्राप्तिहेतुता ।
३३ सामस्तुति विधानं ।
३४ अक्षिद्र संज्ञा ।
३७ ऋथास्यायां गेयं साम ।
३८ गेयसाम स्तुतिः ।
३९ अन्तिमऋचगेयसाम ।
४० प्रवर्ग्यार्गव संहतिः ।
४१ प्रवमानस्तोत्रोपसंहारः ।

इति नवमः खण्डः ।

अथ दशमः खण्डः ।

१ ब्रह्म एष साम ।
२ सतोऽहर्तीविधानं ।
३ सिद्धान्त कथनं ।
४ गातव्यं ब्रह्मसाम ।

५ स्वर्ग हेतुता ।
६ चतुर्थ पृष्ठ स्तोत्रीयऋचः ।
७ सन्तान हेतुता ।
८ गातव्यसाम प्रदर्शनं ।
९ अच्छावाक साम कार्यंच ।

इति दशमः खण्डः ।

अथ एकादशः खण्डः ।

१ प्रतिपत्तृ च सवन सङ्गतिः ।
२।३।६ ऋचान्तर विधानं ।
४ अष्टमाहः सङ्गतिः ।
५ अक्षर पंक्तिच्छन्दोविधानं ।
७ गायत्र साम ब्राह्मणातिदेशः ।
८ विच्छितऋच सामान्तरं ।
९ सामसाध्यं पक्षं ।
१०।१२।१६।१८।२०।२१।२४।२५ सामान्तर विधानं ।
११।१७।१९।१।२२९ सामान्तरस्तुतिः ।
१३।२२ अहः सङ्गतिः ।
१४ संज्ञानिर्व्वचनं ।
१५ तत्फलकथनं ।
२७ आर्ऋत्त सामान्तरं ।
२८ गुह्यागुह्यीय निर्व्वचनं ।
२९ ब्राह्मणातिदेशः ।
३० । ३२।३४।३९ सामान्तरकथनं ।
३१।३३।३५।३७।३८ तद्विधान स्तोत्रं ।
३९ स्तोत्रोपसंहारः ।

इति एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

१ उक्थ प्रथम स्तोत्रीय ऋचः ।
२ द्वितीयोक्थ स्तोत्रीय ऋचः ।
३ तृतीयोक्थ स्तोत्रीय ऋचः ।
४ प्रथमोक्थ साम ।
५।६ तस्य स्तुतिः ।
९ द्वितीयोक्थ साम ।
७ प्रापत्त्यहेतुता ।
८ तृतीयोक्थ साम ।
१० स्तोम विधानं ।

इति द्वादशः खण्डः ।

चतुर्दशाध्यायः समाप्तः ।

पञ्चदशाध्याये ।

खण्डः १—१२ अष्टाचत्वारिंश स्तोम क्लृप्तिः ।

अथ प्रथमः खण्डः ।

१ वह्निष्यवमान प्रतिपत्तृचः ।
२ नवमाहः सङ्गतिः ।
३।४ द्वितीयानुवाद स्तुतिः ।
५ दशस्तोत्रीयविधानं ।
६ तस्य स्तुतिः ।
७ अष्टर्चस्तोत्रीय विधानं ।
८ अष्ट संख्यास्तवनं ।
९ चतुः षड्ऋच विधानं ।
१०।११।१२ चतुः संख्या स्तुतिः ।
१३ वह्निष्यवमान स्तोम विधानं ।

इति प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

१ नवमाहः प्रथमाज्यस्तोत्रं ।
२ नवमाहः सङ्गतिः ।
३ सङ्गति प्रदर्शनं ।
४ लिङ्गं प्रदर्श्य स्तौति ।
५ द्वितीयाज्य स्तोत्रं ।
६ राथन्तर प्रयोग कारणं ।
७ तृतीयाज्यस्तोत्रं ।
८ चतुर्थाज्य स्तोत्रं ।
९ दोषोपपादनं ।

इति द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

१ माध्यन्दिन पवमान प्रथम ऋचः ।
२ ऋचः स्तुतिः ।
३।४ स्तोत्रीय विधानं ।
५।६ गायत्र साम विधानं ।
७ संज्ञानिर्व्वचनं ।
८।९।११।१२।१३।१६ सामान्तर विधानं ।
१०।१५ सामान्तर स्तुतिः ।
१४ स्वर्ग साधनता ।
१७ पशुजन्मता ।
१८।२०।२२।२४ अन्यत् साम विधानं ।
१९।२१।२३।२६ तस्य स्तुतिः ।
२५ ऋचिगेयं साम ।
२७।३३ ब्राह्मणातिदेशः ।
२८।३२ सामद्वय विधानं
२९ उभयं संयुज्य स्तौति ।
३० ज्येष्ठ हेतुता ।
३१ तद्वेदन फलं ।
३४।३५ अन्यत् साम विधानं ।

१६ एतदपि स्वर्ग साधनं ।
१७ पवमान स्तोत्रोपसंहारः ।

इति तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

१ तृतीय स्तोत्रीय ऋचः ।
२ अहः सङ्गतिः ।
३ अच्छावाक स्तोत्रीय ऋचः ।
४ ब्रह्मवृष्ठनिवर्त्तकं साम ।
५ एतस्य स्तुतिः ।
६ अच्छावाक निवर्त्तकं साम ।
७ फलद्वय साधनता ।

इति चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

१ आर्भव पवमान प्रथम ऋचः ।
२।३।४।६ ऋचान्तर सङ्गतिः ।
५ अक्षर पंक्ति प्रशंसा ।
७।८ साम विधानं ।
९ पदद्वय स्तुतिः ।
१०।१२।१५।१७।१९ सामान्तर विधानं ।
११ स्वर्ग साधनता ।
१३ तस्य स्तुतिः ।
१४ यस्योपरहैतौ स्तुतिः ।
१६ पुत्रादि फलं ।
१८।२१ ब्राह्मणातिदेशः ।
२०।२४ आख्यायिका कथनं ।
२२।२५ अन्यत्साम विधानं ।
२३ तत् कारणं ।
२६।३० तस्य प्रशंसा ।
२७ स्तोवक ब्राह्मणं ।
२८।२९ ऋच साम कथनं ।
३१।३३ सामान्तर विधानं ।
३२ प्रश्नोत्तरं ।
३४ यस्य साधनता ।
३५ तस्य व्याख्यानं ।
३६ वेदन फलं ।
३७ पवमानस्तोत्रोपसंहारः ।

इति पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

१ स्तोत्रीय ऋचः ।
२।४ स्तोत्र निवर्त्तकं साम ।
३।५ तस्य स्तुतिः ।

६ ब्राह्मणातिदेशः ।
७ स्तोत्रीय स्तुतिः ।

इति षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

१ छन्दः प्रसक्तिः ।
२ दोष सद्भावः ।
३।४।५ विस्मृति प्रबोधनं ।
६ वक्ष्यमाण स्तोत्रीया ।
७ सवर्च लिङ्गानुवादः ।
८ स्तोम विधानं ।

इति सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

१ प्रथमाज्य स्तोत्रं ।
२।३ अग्नी संज्ञा निर्वचनं ।
४ चतुर्थाज्य स्तोत्रं ।

इति अष्टमः खण्डः ।

अथ नवमः खण्डः ।

१।२ दशमाद्यः स्तोत्रीय ऋचः ।
३ अन्य ऋचः ।
४।५।६।८ प्रथमे गायत्र साम ।
७ तदाख्यानं ।
९ शोकोपशमनं ।
१० ऋचान्तर विधानं ।
११ तस्य स्तुतिः ।
१२ सामान्तर गानं ।
१३ कारण स्तुतिः ।
१४ स्वर्ग साधनता ।
१५ परोक्ष सिद्धिः ।
१६ गेयसाम प्रदर्शनं ।
१७ माध्यन्दिन कारणं ।

इति नवमः खण्डः ।

अथ दशमः खण्डः ।

१ प्रथम पृष्ठ स्तोत्रीय ऋचः ।
२ द्वितीय पृष्ठ स्तोत्रीय ऋचः ।
३ तृतीय पृष्ठ स्तोत्रीय ऋचः ।
४ चतुर्थ पृष्ठ स्तोत्रीय ऋचः ।
५ प्रथमस्तोभ निवर्त्तकं ।
६ समुदाय प्रशंसा ।
७।८ अनुवाद स्तुतिः ।
९ ऋद्धि साधनता ।
१० मैत्रावरुण पृष्ठं ।

११ पशु प्राप्तिः ।
१२।१४ एष्ठ निवर्त्तकं ।
१३ प्रतिष्ठा कारणं ।
१५ संहत्य स्तुतिः ।

इति दशमः खण्डः ।

अथ एकादशः खण्डः ।

१।२ स्तोत्रीय प्रथमऋचः ।
३ गायत्रं साम ।
४।५ सामान्तर विधानं ।
६ स्तावक ब्राह्मणं ।
७ सामद्वय विधानं
८ ऋच विधानं ।
९ गान प्रशंसा ।
१०।११।१२ सामान्तरविधानं ।
१३ निर्व्वचनाभिप्रायस्तुतिः ।
१४ परिमाण विधानं ।
१५ जिङ्गद्वय विधानं ।
१६ पवमानस्तोमः ।

इति एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

१ अग्निमस्तोचीयं ।
२ सामस्तोम स्तुतिः ।
३।४ पूर्व्वपक्ष सिद्धान्तौ ।
५ वामदेवस्य पूर्णत्वं ।
६ सद्यहि हेतुता ।
७।८ ऋचः स्तुतिः ।

इति द्वादशः खण्डः ।

पञ्च दशाध्यायः समाप्तः ।

षोड़शाध्याये ।

खण्डः १—१६ अग्निष्टोम विकृतयः ।

अथ प्रथमः खण्डः ।

१ ज्योतिः संज्ञानिर्व्वचनं ।
२ प्रथमानुष्ठान स्तुतिः ।
३ दृष्टान्तोपादानं ।
४ स्तोमानां ज्योतीरूपत्वं ।
५ तदभावत्व प्रतिपादनं ।
६ त्रिवृदादीनां ज्योतिष्टोमता ।
७ ज्योतिष्टोमस्य प्राथम्यं ।
८।९।१० स्तोत्रीय संख्यायास्तुतिः ।
११।१२।१३।१४ दक्षिणाविधानं ।

इति प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

१ अपरकाण्ड विधानं ।
२ आदित्य जय हेतुता ।
३ गौरिति संज्ञा निर्व्वचनं ।
४ तद्देदन फलं ।
५ वक्ष्यमाण स्तोमः ।
६ पञ्चदशस्य प्राथम्यं ।
७ गवादिसाम्यं ।
८ पशुपुच्छस्थानीयता ।

इति द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

१ अपरैकाह विधानं ।
२ आयुः संज्ञा निर्व्वचनं ।
३ अधिकारि निरूपणं ।
४ स्तोम क्लृप्तिः ।
५ अधिकारिणि संस्थान्तरं ।
६ अतिरात्रसंस्थानुकूल्यं ।
७।८ एकाह क्रयसंहतिः ।
९ तद्देदन फलं ।

इति तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

१ अभिजिदिश्वजिदेकाहः ।
२ तद्देहितुः फलं ।
३।४।५ प्रजापति कर्म्म ।
६ अभिजित् संज्ञा निर्व्वचनं ।
७।८।९ अभिजिदिश्वजिदिधानं ।
१० प्रयोग प्रकारः ।
११ स्तोमावृत्ति विधानं ।
१२।१३ अभ्यावृत्ति विवरणं ।

इति चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

१ वक्ष्यमाण प्रथमस्तोभीया ।
२ तत्प्रशंसनं ।
३।४ उत्तर विधानं ।
५।६।७।८।९ अपरस्तोभीया ।
१० उत्तमस्य च विधानं ।
११।१२ तत्परिहारः ।
१३।१४ स्वन्तरादि षष्ठ योगः ।
१५ वृहतो योगः ।
१६ वैरूप योगः ।
१७ वैराजयोगः ।
१८ शाक्वर सामयोगः ।

१९ रैवत साम योगः ।
२० रथन्तरादीनामन्तर्भावः ।
२१।२२ दोष समाधानं ।
२३ आग्नीध्रामाध्यत्वं ।
२४ रथन्तरादीनां स्थानं ।
२५ दोष परिहारः ।
२६ अजामिस्तोपपादनं ।
२७ तत्समाधानं ।

इति पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

१।२।३।४।५ यजमान व्रत प्रदर्शनं ।
६ खलिन विवरणं ।
७।८।९ निषाद कुले निवासः ।
१० रात्रिसंस्तुति स्तुतिः ।
११।१२ अपरव्रत प्रदर्शनं ।
१३ उष्णीष धारणं ।
१४ अन्य व्यवहार निषेधः ।

इति षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

१।२ अभिजित् स्तोम संख्या ।
३ प्रथमस्तुत स्तोत्रं ।
४ शस्त्रविधानं ।
५ पञ्चविंशस्तोमः ।
६।७ तद्वेदितुः फलं ।

इति सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

१ त्र्योविंशस्तोमः ।
२ अग्निष्टोम संस्था ।
३।४।५।६ प्रतिष्ठा हेतुता ।
७ पंक्तिछन्दस्त्वाऋचः ।
८ आयुः स्तोभीयासम्पत्तिः ।
९ दशस्तोभीयाएकाविंराट् ।

इति अष्टमः खण्डः ।

अथ नवमः खण्डः ।

१ सप्तदशैकाहः ।
२।३।४।५।६ सप्तदश दक्षिणा ।

इति नवमः खण्डः ।

अथ दशमः खण्डः ।

१।२।३ विश्वज्योतिः संज्ञैकाहः ।

४ सवनानां उत्तरोत्तराधिक्यं।
५ द्वौ द्वौ स्तोमौ।
६ सहस्र दानं।
७।८ समुच्चय विधानं।
९।१०।११।१२ अन्यसाम विधानं।

इति दशमः खण्डः।

अथ एकादशः खण्डः।

१ चतुर्थ साह्नैकाहः।
२ प्रतिपत् कर्त्तव्यता।
३ एकसाम निरूपणं।
४ संघात करणं।
५।६ तृतीय सवन प्रयोगः।
७ कर्त्तभिर्गेयं साम।
८।९ स्तोत्रीया विधानं।
१०।११ सर्व्व प्रसु साधनता।
१२।१३ ब्रह्मसाम विधानं।
१४।१५।१६।१७ सहस्र प्रतिष्टुतिः।

इति एकादशः खण्डः।

अथ द्वादशः खण्डः।

१ साह्नैकाहां सद्योनक्तेयता।
२ अधिकारि निरूपणं।
३ तद्धेतुः फलं।
४ दक्षिणा विधानं।
५ आयास्य प्रयोगः।
६ अधिकारि विशेषः।
७ स्वर्गसाधनत्वोपपादनं।
८ अधिकारि विशेषेपि विधिः।
९ प्रसु साधनता।

इति द्वादशः खण्डः।

अथ त्रयोदशः खण्डः।

१ द्वितीय साह्नैकाहः।
२ व्याधिनिर्हरण हेतुता।
३ आमयाव्यधिकारः।
४ आमयाविनः प्रतिष्ठाहेतुता।
५ अपराधिकारिणौ।
६ वेदि विधानं।
७ उत्तर वेदिस्थानं।
८ यूपविधानं।
९ सोमक्रय साधन द्रव्यविधानं।
१०।११।१२।१३ सोमप्रवाकानांगमनं।

इति त्रयोदशः खण्डः।

अथ चतुर्दशः खण्डः ।

१ अन्यसाद्यःकैकाहः ।

२ अधिकारि निर्णयः ।

३।४।५। स्तोमसंख्याः

६।७।८। प्रजासाधनता ।

इति चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः ।

१ चतुर्थ साद्यःकैकाहः ।

२ वेदितुः फलं ।

३।४ स्तोम विधानं ।

५ अधिकारि निरूपणं ।

६ स्वर्गफल साधनता ।

७।८ सर्व्व एष्टता स्तुतिः ।

९ स्तोम विधानं ।

१० दोषपरिहारः ।

११ तस्य स्तुतिः ।

इति पञ्चदशः खण्डः ।

अथ षोडशः खण्डः ।

१ षष्ठ साद्यःक्रः ।

२।३।४।५।६।७। प्रजापतेरद्भित्त्वं ।

८ स्तोमीया विधानं ।

९।१०। तस्याः स्तुतिः ।

इति षोडशः खण्डः ।

इति षोडशाध्यायः ।

सप्तदशाध्याये

खण्डः १—१४ व्रात्य यज्ञाद्यग्निहोत्र समाप्तिः ।

अथ प्रथमः खण्डः ।

१ साधारण स्तोम विधानं ।

२।३।४ प्रकृते तद्योजनं ।

५ ब्रह्मसाम्नः स्तोमीया विधानं ।

६ गातव्य सामविधानं ।

७ सम्पद्धि हेतुता ।

८ निधन कार्यत्रं ।

९।१० षोडशस्तोम प्रशंसा ।

११ शाखान्तरीय मतोपन्यासः ।

१२ स्वपक्ष निगमनं ।

१३ दोष वैलक्षण्यं ।

१४।१५ दक्षिणाश्रव्यं ।

१६ व्रात्यता निर्हरण हेतुता ।

१७ गावोपि दक्षिणार्हाः ।

इति प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

१ व्रात्यस्तोम प्रस्तुतिः ।
२ पापसद्भावमाह ।
३ अग्निष्टोम स्तोमः ।
४ उक्थ संस्थाविधानं ।

इति द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

१ वयः कनिष्ठ व्रात्य यागः ।
२ त्रिवृत् स्तोमः ।
३ षोडश स्तोमः ।
४ एकविंश स्तोमः ।

इति तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

१ स्थविर व्रात्य यज्ञः ।
२ ऊर्ध्वतम स्तोमता ।
३ प्रकारान्तरे दोषः ।

इति चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

१ आख्यायिका कथनं ।
२ वेदितुः यज्ञं ।
३ अग्निष्टुत विधानं ।
४ दोष प्रदर्शनं ।
५ प्रायश्चित्त निरूपणं ।
६ पापनिवारण कारणं ।
७ वारवन्तीयाग्निष्टोमः ।

इति पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

१ तृतीयाग्नि स्तुतः ।
२ अधिकारि निरूपणं ।
३।४ अग्निष्टोम साम करणं ।

इति षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

१ पशुकामाग्निष्टुतः ।
२ पशुसाधनत्वोपपादनं ।
३ तद्देवन प्रशंसा ।
४ पशुदाक्षसेकाग्निजक्षनिर्णयः ।

इति सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

१।२।३।४ ज्योतिष्टोमाभिष्टुत् ।

इति अष्टमः खण्डः ।

अथ नवमः खण्डः ।

१ अन्याभिष्टुत् ।
२ अन्न साधनत्वं ।
३ वेदितुः फलं ।
४ स्तोमानुवाद स्तुतिः ।

इति नवमः खण्डः ।

अथ दशमः खण्डः ।

१ बृहस्पति सवः ।
२ अनिरुक्त स्तुतिः ।
३ अधिकारि निर्णयः ।
४ वेदितुः फलं ।

इति दशमः खण्डः ।

अथ एकादशः खण्डः ।

१ बृहस्पति सवैकाहः ।
२ दक्षिणाविभागः ।
३ संहत्य स्तुतिः ।
४ संज्ञानिर्व्वचनं ।
५ वेदन फलं ।
६ प्राप्त ज्ञापत्यानुष्ठेयः ।
७ तद्वेदन प्रशंसा ।
८ यजमानाभिषेकः ।
९ अभिषेक द्रव्याणि ।

इति एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

१ त्रिवृदभिष्टुतैकाहः ।
२ उत्पत्ति फलानुगुण्यं ।
३ स्तोम स्वरस्तुतिः ।
४ स्तोत्रीया विधान स्तुतिः ।
५ मरुत्वीय सम्वेशनं ।
६ यागनाम प्रदर्शनं ।

इति द्वादशः खण्डः ।

अथ त्रयोदशः खण्डः ।

१ वैश्वदेवपर्व्वीय सोमयागः ।
२ पशुदेवता विशेषः ।
३ प्राप्त प्रतिषेधः ।

४ यूपाभावे पशुनियोजनं ।
५ दक्षिणापरिमाणं ।
६ यजमानानुष्ठेय व्रतं ।
७ वसन्त प्रघास पर्व्वसोमयागः ।
८।९ प्रतिपत् पशुदेवते ।
१० अङ्गानिरासः ।
११ दक्षिणाव्रते ।
१२ साकमेध पर्व्व सोमयागः ।
१३ प्रतिपत् पशुदेवतादि ।
१४ यजमान व्रत निर्णयः ।
१५ शुनासीरी पर्व्व सोमयागः ।
१६ प्रतिपत् पशु देवतादि ।
१७।१८ चातुर्म्मास्य याग फलं ।

इति त्रयोदशः खण्डः ।

अथ चतुर्दशः खण्डः ।

१।२ अग्निहोत्रादेः फलं ।
३ वैश्वदेवाद्यस्य फलं ।
४ तद्देहितुः फलं ।

इति चतुर्दशः खण्डः ।

इति षष्ठदशाध्यायः ।

अष्टादशाध्याये ।

खण्डः १——११ उपहव्य, ऋतपेय, शुनासीर्य, वैश्यस्तोम, तीव्रसुत, वाजपेय, राजसूय विधिः ।

अथ प्रथमः खण्डः ।

१ उपहव्यैकाहः ।
२ आख्यायिका कथनं ।
३ उपहव्य निरुक्त प्रयोगः ।
४।५ प्रजापते र्देवताभिमुखं ।
६ तद्देवन प्रशंसा ।
७।८ यज्ञायज्ञीय कार्यता ।
९ उपहव्य शब्द प्रवृत्ति निमित्तं ।
१०।११।१२।१३।१४।१५ अधिकारि निरूपणं ।
१६ यूपाः पशोश्च सम्बन्धः ।
१७ वैश्वदेवी प्रशंसा ।
१८।१९ होतुः पृष्ठे पृष्ठत् सामता ।
२० दक्षिणा विशेषः ।
२१।२२।२३ अश्वान्वयः ।
२४ उत्सार्थं प्रशंसा ।

इति प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

१ अन्वैकाहः ।
२ दीक्षोपसदोर्विशेषः ।
३ अधिकारि निरूपणं ।
४ स्वर्गार्थिनः सम्बन्धः ।
५ व्रत विशेषः ।
६ घृत व्रत प्रशंसा ।
७ घृत प्राशनं ।
८ बृहत् साम विधानं ।
९ सदः प्रशंसायां विशेषः ।
१० ऋतपेय दक्षिणा विशेषः ।
११ चमसस्यैतुम्बरत्वं ।
१२ चमस दान विधिः ।
१३।१४ सोम नियमः ।

इति द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

१ अग्निष्टोम संस्थैकाहः ।
२ दक्षिणा नियमः ।
३।४ अनुष्ठानवतः फलं ।

इति तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

१ वैश्य स्तोमाग्नि स्तोमैकाहः ।
२ सोम क्रयणं ।
३ अधिकारि निर्णयः ।
४ क्रयण द्रव्य व्यवस्था ।
५।६ वैश्याधिकारः ।
७ होतुः पृष्ठे विशेषः ।
८ ब्राह्मणाच्छंसि पृष्ठे विशेषः ।
९ तदुभय योगः ।
१०।११ सप्तदश स्तोमत्वं ।

इति चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

१ तीव्रसोमैकाहः ।
२।३।४।५।७ सोमातिपवितादिकारः ।
६ अतिपवनयोजनं ।
८।९।१०।११ अधिकारि विशेषः ।
१२।१३।१५ सोम तीव्र प्रकारः ।
१३ दक्षिणा नियमः ।
१६ भक्षयष्टीकरणं ।
१७ होतुः पृष्ठस्य रथन्तरत्वं ।
१८ रथन्तरयोगः ।
१९ ब्राह्मणाच्छंसि पृष्ठः ।

२०।२१ यज्ञायज्ञीयापकर्षः ।
२२ सामान्तर विधानं ।
२३ उद्गंग्रीय प्रशंसा ।
२३ तीव्रसोमोक्थसंस्थता ।

इति पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

१ वाजपेयैकाहः ।
२ स्तोतृणां सामदृश्यं ।
३।४ आयाम विस्तारः ।
५ प्राजापत्य स्तोमः ।
६ वैचित्र्य प्रशंसा ।
७।८ नाना वीर्यत्वं ।
९ अनिरुक्त प्रशंसा ।
१०।११ स्तोतुः पृष्ठस्य रथन्तरत्वं ।
१२।१३ वाजपेययाजि व्रतं ।
१४ ब्राह्मणाच्छंसिपृष्ठे विग्रहः ।
१५ आर्भवपवकर्षणं ।
१६।१७ अग्निष्टोमे साम प्रदर्शनं ।
१८।१९ षोडशिसाम ।
२०।२१।२२।२३ जामित्वाग्रह्य परिहारः ।
२४।२५।२६।२७ दोषाग्रह्य परिहारः ।

इति षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

१ वाजपेय शब्द निर्वचनं ।
२ शुक्रवत्यत्वानुवादः ।
३।४ वाजत्वानुवादः ।
५ सप्तदशस्तोमानुवादः ।
६।७।८ ऋत्विजां हिरण्यमालित्वं ।
९ यजमानस्य लोकजयः ।
१०।११ यजमानारोहणं ।
१२ ब्रह्मणो वाजिसाम गानं ।
१३ बृहट् गान प्रशंसा ।

इति सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

१ पवित्राग्निष्टोम विधानं ।
२ द्वितीय सोमयागः ।
३ सोम विग्रह विधानं ।
४ ब्रह्मवादि दर्शित दोषः ।
५ दोष समाधानं ।

६ अभिषेचनीयस्योक्थसंस्थात्वं ।
७ मन्त्रान्तर विधानं ।
८ सम्भार्यत्र ऋचविधानं ।
९।१० दोषः समाधानञ्च ।
११।१२।१३ ऋचान्तर विधानं ।
१४।१५।१६ पवमानसूक्त विधानं ।
१७ ऋचद्वय प्रशंसा ।
१८ अन्तिम ऋच प्रशंसा ।

इति अष्टमः खण्डः ।

अथ नवमः खण्डः ।

१।२ दशपेये वक्तव्यता ।
३।४।५ काम विशेष प्रदर्शनं ।
६ पुष्कर स्रज स्तुतिः ।
७ पुष्कर संख्या विधानं ।
८ सुवर्ण स्रज विधानं ।
९ रुक्माभरणं ।
१० द्रव्यान्तर विधानं ।
११ अश्वदान विधिः ।
१२ धेनुदान विधिः ।
१३ वन्ध्या गोदानं ।
१४ ऋषभ दानं ।
१५ वस्त्र दानं ।
१६ स्थूल शाटी दानं ।
१७ यवपूर्ण शकट दानं ।
१८ वलीवर्द दानं ।
१९ अजदान विधानं ।
२० स्त्रीपुंयोग गोदानं ।
२१ गर्भिनी गोदानं ।

इति नवमः खण्डः ।

अथ दशमः खण्डः ।

१ केशवपनीयादि धर्माः ।
२ सम्भार्यत्र विध्यनुवादः ।
३ सामसम्मादनं ।
४ दोष परिहारः ।
५ साम विशेष प्रशंसा ।
६ साम संख्या ।
७ त्रिवृत्स्तोमोपचारः ।
८ त्रिवृत्स्तोमोपचार राहित्यं ।
९ स्तोम व्यवस्था ।
१० केशवपन विधानं ।

इति दशमः खण्डः ।

अथ एकादशः खण्डः ।

१ आयन्तीय साम स्तुतिः ।
२ यज्ञायज्ञीय साम स्तुतिः ।
३ वारवन्तीय साम स्तुतिः ।
४ स्तुत्युपसंहारः ।
५ व्युष्टिद्विरात्र विधानं ।
६ प्रतिलोमपादनं ।
७ द्विरात्रावयवाद्दनी ।
८ द्विरात्र काल विधानं ।
९।१० दोषग्रहण परिहारः ।
११ द्विरात्र संज्ञा फलं ।

इति एकादशः खण्डः ।

अष्टादशाध्यायः समाप्तः ।

ऊनविंशाध्याये

खण्डः १—१९ । क्रतुछन्द विधानं ।

अथ प्रथमः खण्डः ।

१।२।३ राट् क्रतु विधिः ।
४ राट्क्रतु स्तोमः ।

इति प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

१।२ राट् क्रतु विशेषः ।
३ तद्दैवत प्रशंसा ।
४ प्रति स्तोम दक्षसंख्या विधानं ।
५ सम भागेन विभागः ।
६ अधिकारि निर्णयः ।

इति द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

१ औपसद क्रतु विधानं ।
२ प्रजोत्पादन फलं ।
३।४।५ क्रतु विशेष विधिः ।
६ आवन साम विधानं ।
७ तद्दैवत प्रशंसनं ।
८ सामद्वय विधानं ।
९ स्तोत्रीया संख्या प्रशंसा ।

इति तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

१ स्तोम क्रतु विधानं ।
२ अधिकारि प्रदर्शनं ।
३।४।५ स्तोत्रीया फलं ।

६।७।८।९ साम द्वय विधानं ।
१० सामद्वय प्रशंसा ।
११ उक्थ संख्या विधानं ।

इति चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

१ चतुष्टोम क्रतु विधानं ।
२ अधिकारि निरूपणं ।
३।४।५।६।७।८।९।१०।११ स्तोम संख्या प्रशंसा ।

इति पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

१ द्वितीय चतुष्टोम क्रतुः ।
२ षोडशसंख्या प्रशंसा ।
३ उपरितन संख्या प्रशंसा ।

इति षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

१ उद्भिदलभित क्रतुः ।
२ उभयोरधिकारि निर्णयः ।
३ उभयोरुपयोगः ।
४ पशुलाभाय सामद्वय विधानं ।
५ यजमानार्थमन्यत् सामद्वयं ।
६ संज्ञा विशेष सम्पादनं ।
७ संख्याद्वय प्रशंसा ।

इति सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

१ अपचित्याख्य क्रतु विधानं ।
२ स्तोम विशेषविधानं ।
३।४ पृष्ठ स्तोत्रे सामद्वयं ।
५ स्तोम प्रशंसा ।
६।७ ब्रह्मवादिनामाक्षेप समाधानं ।

इति अष्टमः खण्डः ।

अथ नवमः खण्डः ।

१ द्वितीयापचितिः ।
२ स्तोभीया संख्या प्रशंसा ।
३ साम युग्म विधानं ।
४ स्तोम प्रशंसा ।

५।६ ब्रह्मवाद्याक्षेप परिहारौ।

इति नवमः खण्डः।

अथ दशमः खण्डः।

१ पक्ष्याख्य क्रतु विधानं।
२ पक्षि नामानुकूलं साम।
३ सम्बन्धोपपादनं।
४ तद्वेदन प्रशंसा।
५ स्तोम विधानं।
६ स्तोत्र विशेषः।
७।८।९।१० स्तोम विशेषः।
११ तद्वेदन कथनं।
१२ त्रयस्त्रिंश प्रशंसा।
१३।१४ स्तोम प्रशंसा।

इति दशमः खण्डः।

अथ एकादशः खण्डः।

१ ज्योतिः क्रतु विधानं।
२ स्तोम विधानं।
३।४ स्तोम प्रशंसा।
५ वेदन प्रशंसा।
६ माध्यन्दिन पवमान स्तोमः।
७ सर्व्वस्तोम मेलनं।
८ सौपर्णस्य पक्षित्वं।
९।१० प्रौढत्वं।
११ अस्य ज्योति र्नामत्वं।

इति एकादशः खण्डः।

अथ द्वादशः खण्डः।

१।२ ऋषभाख्य क्रतु विधानं।
३ अधिकारि निरूपणं।
४ विघ्नं परित्यज्य पक्षघातकारणं।
५।६।७ साम विशेषविधानं।
८ बृहत् सामाश्रय विधानं।

इति द्वादशः खण्डः।

अथ त्रयोदशः खण्डः।

१ गोसवक्रतु विधानं।
२ तद्वेदन प्रशंसा।
३ स्वाराज्य शब्दार्थः।
४ प्रजापति परमेष्ठ्याख्यभेदः।
५ एष स्तोत्रेसामद्वयं।
६ दक्षिणा विशेषः।
७ अभिषेक साधन द्रव्यं।
८ अभिषेक कालः।

९ अभिषेक देशः ।
१० स्तोम विशेष विधानं ।

इति त्रयोदशः खण्डः ।

अथ चतुर्दशः खण्डः ।

१ मरुत् स्तोम क्रतुः ।
२ स्तोम विशेषः ।
३ तत्राधिकारि निरूपणं ।
४ प्रथम स्तोम संघः ।
५ द्वितीय स्तोम संघः ।
६ तृतीय स्तोम संघः ।
७ चतुर्थ स्तोम संघः ।
८ वेदन प्रशंसा ।

इति चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः ।

१ कुलायाख्य क्रतुविधानं ।
२ अधिकारि निर्णयः ।
३ स्तोमसंख्य विधानं ।

इति पञ्चदशः खण्डः ।

अथ षोडशः खण्डः ।

१ इन्द्र स्तोम क्रतुः ।
२ वेदन प्रशंसा ।
३ अधिकारि निरूपणं ।
४ पञ्चदशस्तोमानुवादः ।
५ ऋग्विशेष विधानं ।
६ उक्थ संख्यारूपत्वं ।
७ पञ्चदश संख्याविधानं ।

इति षोडशः खण्डः ।

अथ सप्तदशः खण्डः ।

१ इन्द्राग्नि स्तोम क्रतुः ।
२ स्तोमद्वय विधानं ।
३ वेदन प्रशंसा ।
४ अधिकारि निरूपणं ।
५ ब्रह्मक्षत्रियाभिरूप्यं ।
६ उभय प्रयुक्त फलं ।
७ अन्योऽप्यधिकारी ।
८ अधिकारि प्रशंसा ।

इति सप्तदशः खण्डः ।

अथ अष्टादशः खण्डः ।

१ निधनक्रतु विधानं ।
२ साम निमित्तं ।
३ स्तोम प्रशंसा ।
४ अधिकारि निरूपणं ।
५ पशुप्राप्तिः ।

इति अष्टादशः खण्डः ।

अथ ऊनविंशः खण्डः ।

१ द्वितीय निधनक्रतुः ।
२।३ यजमान फलं ।

इति ऊनविंशः खण्डः ।

इति ऊनविंशाध्यायः समाप्तः ।

विंशाध्याये
खण्डः १—१६ अहीनादि
कल्पनं ।

अथ प्रथमः खण्डः ।

१ अतिरात्रस्तोम स्तुतिः ।
२ अतिरात्र विधानं ।
३ प्रकार त्रय कथनं ।
४ सन्धिस्तोत्रं ।
५ स्तोत्रीया संख्या ।
६ सन्धिस्तोत्रगत स्तोमः ।

इति प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

१ सर्व्व स्तोमातिरात्रः ।
२ अधिकारि निरूपणं ।
३ स्तोमच्छन्दोमो ।
४ पश्वैकादशिनी ।
५ अनुष्ठायि वेदिनोः फलं ।

इति द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

१ आप्तोर्याम क्रतुस्तोमः ।
२ आप्तोर्याम नाम निर्व्वचनं ।
३ अधिकारि निरूपणं ।
४ सर्व्वकाम प्राप्ति हेतुता ।

५ क्रतुनाम निर्व्वचनं ।

इति तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

१ नवसप्तदशप्रातिराचः ।
२ अधिकारि निर्णयः ।
३ स्तोभीयाविशेषः ।
४।५ साकमश्व सामविशेषः ।
६ वेदन प्रशंसा ।
७ द्विपदाऋच विधानं ।
८ अतिरात्रत्व प्रशंसा ।

इति चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

१ विषुवदतिरात्र क्रतुः ।
२ अधिकारि निर्णयः ।
३ एकविंशस्तोम प्रशंसा ।
४ संख्यासाम्नेनादित्यमहिमा ।
५ आदित्य महिमा वेदनं ।

इति पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

१ गोष्टोमातिरात्रः क्रतुः ।

इति षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

१ आयुष्टोमातिरात्र क्रतुः ।

इति सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

१ अभिजिदतिरात्र क्रतुः ।

इति अष्टमः खण्डः ।

अथ नवमः खण्डः ।

१ विश्वजिदतिरात्र क्रतुः ।
२ शस्त्रद्वारा पशुप्राप्तिः ।

इति नवमः खण्डः ।

अथ दशमः खण्डः ।

१ चतुरोतिरात्राः ।

इति दशमः खण्डः ।

अथ एकादशः खण्डः ।

१ अङ्गिरसां द्विरात्र क्रतुः ।
२ उत्तरार्द्ध स्तोम क्लृप्तिः ।
३ सामद्वय विधानं ।
४ अधिकारि निरूपणं ।
५।६ फलान्तर कथनं ।
७।८ आक्षेप परिहारौ ।
९ उत्तरार्द्ध प्रथम स्तोमः ।
१० सर्व्वस्तोम प्रशंसा ।
११ त्रिवृदादि स्तोमः ।

इति एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

१ चैत्ररथ द्विरात्रक्रतुः ।
२ प्रजोत्पत्ति हेतुता ।
३।४ वेदन प्रशंसा ।
५ चैरथत्व सम्पादनं ।

इति द्वादशः खण्डः ।

अथ त्रयोदशः खण्डः ।

१ कापिवन द्विरात्र क्रतुः ।
२ प्रथमार्द्ध प्रशंसा ।
३ द्वितीयार्द्ध प्रशंसा ।
४ कापिवनत्व प्रदर्शनं ।
५ अनुष्ठान फलं ।

इति त्रयोदशः खण्डः ।

अथ चतुर्दशः खण्डः ।

१ गर्गत्रिरात्र क्रतुः ।
२ अहस्त्रय सृष्टिः ।
३ अक्षर च्छेदः ।
४ अक्षरत्रय सृष्टि प्रशंसा ।
५ पुष्टि हेतुता ।
६ वेदन प्रशंसा ।
७ अक्षर शब्देन प्रशंसा ।
८ पुरुषसादृश्य सम्पादनं ।

इति चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः ।

१ गर्गत्रिरात्र क्लृप्तिः ।
२ अक्षरादग्न्यादेवतोत्पत्तिः ।
३ मन्त्रार्थ विवेचनं ।
४।५ प्रसिद्धि कथनं ।
६ सहस्र दक्षिणा ।

७ ऋगुदाहरणं ।
८ वैयधिकरण्य निराशः ।
९ प्रथमदिने प्रतिगृहीता ।
१० द्वितीयदिने प्रतिगृहीता ।
११ तृतीयदिने प्रतिगृहीता ।
१२ संख्या प्रशंसा ।
१३ गवां दिनत्रय साम्यं ।
१४ सहस्रतम्यां गोदानं ।
१५ अनुमत्वय मत्वः ।

इति पञ्चदशः खण्डः ।

अथ षोडशः खण्डः ।

१ पदार्थ हेतुत्वेन त्रिरात्र स्तुतिः ।
२ सङ्ख्याप्रतरूपतापादनं ।
३।४ मुखपुच्छ निरूपणं ।
५। त्रिरात्र भावना प्रदर्शनं ।
६ त्रिरात्र महिमा ।
७ एकदेश वैगुण्यं ।
८ प्रकारान्तरेण प्रशंसा ।
९ आदित्य रूपेण ध्यानं ।

इति षोडशः खण्डः ।

इति विंशोध्यायः समाप्तः ।

एकविंशाध्याये

खण्डः १—१५ गर्गत्रिरात्रशेष चतूरात्र पञ्चरात्र वर्णनं ।

अथ प्रथमः खण्डः ।

१ गर्गत्रिरात्रस्य दक्षिणादिस्तुतिः
२ दक्षिणासमर्विभाग प्रकारः ।
३ भागत्रयसाम्ये सोम प्राप्तिः ।
४ सोम क्रयस्य प्रशंसा ।
५ इन्द्र भाग प्राप्तिः ।
६ इन्द्रियेष्या दानं ।
७ यमांश प्राप्तिः ।
८ अनुस्तरणी करणं ।
९ त्रिरात्र गत दानं ।
१० परितार्यग्राच्छादानं ।

इति प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

१ आज्यदोह प्रशंसा ।
२।३।४।५ उक्तार्थ वेदन प्रशंसा ।
६ साम प्रयोगः ।
७ साम्नां लोकमय रूपता ।

८ उक्तार्थं स्तान प्रशंसा।
९ गानेऽग्निसाम्निध्यं।

इति द्वितीयः खण्डः।

अथ तृतीयः खण्डः।

१ अवभृथेष्टिः।
२ तदेदम प्रशंसा।
३ तत्पात्र विधानं।
४ अवभृथेष्टेमाङ्ग व्रतं।
५ अवभृथे आक्षानं।
६ प्रतिवासनाभावे उपायः।
७ इष्टेम मन्त्रः।

इति तृतीयः खण्डः।

अथ चतुर्थः खण्डः।

१ अश्वशिराव विधिः।
२ प्रजापतेरश्विसमाधानं।
३ अश्वमेध याजिनः प्रशंसा।
४ चतुष्टोममन्त्रः।
५ गायत्री चतुष्टयः।
६ अनुष्टुभ वैभुवत्वं।
७ मध्यमैकविंशाहः।
८ मध्यमाह एष्टः।
९ देवानां छन्दः प्रशंसा।
१०।११ ब्रह्मसाम विधानं।
१२ सर्वे स्तोमोतिरात्रः।
१३ यूपविधयः।

इति चतुर्थः खण्डः।

अथ पञ्चमः खण्डः।

१ वैदशिराः।
२ अधिकारि निर्णयः।
३ राजपात्र संयोगः।
४ पदाक्षर साम।
५ पदनिधनाख्य दोहः।
६ त्रिष्टुब्दोषु तद्विधानं।

इति पञ्चमः खण्डः।

अथ षष्ठः खण्डः।

१ वाजपेय प्रथमान तिरात्रः।
२ अधिकारिनिर्णयः।
३।४ पशुसाधनता।

इति षष्ठः खण्डः।

अथ सप्तमः खण्डः ।

१ तुर्व्वसु त्रिरात्रः ।
२ लोकत्रयात्मकत्वं ।
३ त्रिरात्र स्वरूपं ।
४ अक्षां लोक साम्यता ।
५ उक्त दोष परिहारः ।

इति सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

१ यराक त्रिरात्रः ।
२ अधिकारि निरूपणं ।
३।४ त्रिरात्र नाम निर्व्वचनं ।
५ उक्तार्थ वेदन फलं ।
६ त्रिवृत् स्तोमकत्वं ।

इति अष्टमः खण्डः ।

अथ नवमः खण्डः ।

१ चतुर्व्वीराख्य चतूरात्रः ।
२।३ प्रयोग क्रतो वीरसाधनत्वं ।
४ पवमान चतुर्ब्बिंशत्वं ।
५ प्रजनन साधनता ।
६ अहः संख्यान विधानं ।
७ नाना वीर्यत्वं ।
८ प्रसिद्धाहस्थित्यनुवादः ।
९।१० पूर्व्वपक्षसिद्धान्तौ ।
११ नानावीर्यप्राप्त करणं ।
१२ ब्रह्म साम विधानं ।
१३।१४ आक्षेपसमाधाने ।
१५ अच्छावाक साम विधानं ।
१६ मैत्रावरुण साम ।

इति नवमः खण्डः ।

अथ दशमः खण्डः ।

१ यमदग्ने खतूरात्रः ।
२।३।४ अह क्रमिः ।
५ पुष्टि लक्षण फलं ।
६ सन्तान मानिनो भवितव्यता ।
७ अनुष्ठातुर्व्वाक्यं ।
८।९ छन्दःसम्पत्तिः ।
१० साम रोचन विधानं ।
११ रोचन विधाम मन्त्रः ।
१२ अश्विनोर्द्विकपाल मन्त्रः ।
१३ वैश्वानरिकपाल मन्त्रः ।
१४ सौम्यचतुष्कपाल मन्त्रः ।

१५ सावित्रपञ्चकपाल मन्त्रः ।
१६ धातुःषट्कपाल मन्त्रः ।
१७ मारुतसप्तकपाल मन्त्रः ।
१८ वार्हस्पत्याष्टाकपाल मन्त्रः ।
१९ मैत्रनवकपाल मन्त्रः ।
२० वारुणदशकपाल मन्त्रः ।
२१ इन्द्राग्नैकादशकपाल मन्त्रः ।
२२ वैश्वदेवद्वादश कपाल मन्त्रः ।
२३ पुरोडाश विधानं ।

इति दशमः खण्डः ।

अथ एकादशः खण्डः ।

१ वग्निष्ठ चतूरात्रः ।
२ सन्दंहि पशता ।
३ स्तोमान्तरारम्भः ।
४ प्रत्यवरोहोक्थ प्रशंसा ।

इति एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

१ विश्वामित्र सङ्गय चतूरात्रः ।
२ नामसम्यक्त्वसंपादनं ।
३ अधिकारि निरूपणं ।
४।६ वेदन प्रशंसा ।
५ त्रिवृदादि स्तोम चतुष्टयः ।
७ चतूरात्र प्रशंसा ।
८ एकविंशति क्रमणं ।

इति द्वादशः खण्डः ।

अथ त्रयोदशः खण्डः ।

१ अभ्यासङ्ग पञ्चरात्रः ।
२ पञ्चरात्रत्व प्रशंसा ।
३।४।५।६। वेदन प्रशंसा ।
७ सवनत्रय स्तोम द्विलसंख्या ।
८।९ तत् प्रसिद्धि करणं ।
१० प्रत्यवरोह प्रयोगः ।

इति त्रयोदशः खण्डः ।

अथ चतुर्दशः खण्डः ।

१ प्रकृतिसादृश्य पञ्चरात्रः ।
२ अधिकारि निरूपणं ।
३ फल प्रशंसा ।
४ सप्तदशातिक्रमणं ।
५।६ पुराकल्प कथनं ।
७ अनुबन्धन करणं ।

८ संवत्सर चतुष्टयैकत्वं ।
९ पञ्चरात्र कालः ।
१० सप्तदशे ऽह्नि आलभ्यः ।
११ पापदेवताया अजः ।
१२ वत्सतरी देवता ।
१३ राज्ञोऽतिगमनेऽपायः ।
१४ स्त्रीणां पशौ विशेषः ।
१५ अत्यन्त क्षुद्रे पशौ कर्त्तव्यता ।
१६ त्वक्पुच्छकर्णदोषादौ विशेषः ।
१७ पलायमाने पशौ विशेषः ।
१८ वसादिपहारे विशेषः ।
१९ मृते पशौ विशेषः ।
२० सर्व्वसिद्धि साधनं ।
२१ वेदन फलं ।

इति चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः ।

१ अन्तर्म्महाव्रत पञ्चरात्रः ।
२ महाव्रत मध्यमाहः ।
३ प्रारम्भमध्ये ऽपपादनं ।
४।५ महाव्रताक्षेप समाधाने ।
६ वेदन प्रशंसा ।

इति पञ्चदशः खण्डः ।

इति एकविंशोऽध्यायः ।

द्वाविंशाध्याये

खण्डः १—१८ । षड्रात्रादि एकादशरात्रपर्य्यन्त वर्णनं ।

अथ प्रथमः खण्डः ।

१ ऋतूनां षड्रात्रः ।
२ अधिकारि निरूपणं ।
३ तत्प्रशंसनं ।
४ प्रत्यवर्द्धिहेतुता ।

इति प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

१ त्रिकद्रुक षड्रात्रः ।
२ अधिकारिनिर्णयः ।
३।४ फलवैलक्षण्ये विशेषः ।
५ पशुसाधनता ।
६ अभ्यासङ्कृत्वं ।
७ विश्वजिदतिरात्रः ।

इति द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

१ अभ्यासकृत षड्रात्रः ।

२।४ पञ्चवैलक्षण्य प्रदर्शनं ।
५ पशुसाधनता ।
६ अभ्यासकृत्वं ।
७ विश्वजिदतिरात्रत्वं ।

इति तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

१ सप्तर्षि सप्तरात्रः ।
२ सप्तर्षिसम्बन्धः ।
३ अहर्गत सप्तसंख्या ।
४ सप्तसंख्याद्वारा प्रशंसा ।
५ महाव्रत पृष्ठत्वं ।
६ महाव्रतातिरिक्ताहः ।
७ ऋद्धेः प्रत्यक्षत्वं ।

इति चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

१ प्रजापति सप्तरात्रः ।
२ अङ्ग स्तोम व्यवस्था ।
३ प्रजासृष्टि साधनता ।
४ उक्थार्थ प्रशंसा ।
५ सप्तदश स्तोमः ।
६ प्रजापतेः सप्तदशत्वं ।
७ पञ्च पञ्चदशत्वं ।
८ आत्मभाग सप्तदशत्वं ।
९ पुच्छस्यैकविंशत्वं ।

इति पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

१ कुन्दोम पवमान सप्तरात्रः ।
२ अधिकारि निर्णयः ।
३।४ पशुसाधनता ।
५ स्तोमदैविध्यं ।

इति षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

१ यामदग्न्य सप्त रात्रः ।
२ पुष्टिसाधनत्वं ।
३ त्रयस्त्रिंश स्तोमः ।
४ पञ्चाहः प्रशंसा ।
५ चतुस्त्रिंशता ।
६।७ स्तोमसंख्या ।
८ युग्मायुग्मस्तोमता ।

इति सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

१ ऐन्द्र सप्तरात्रः ।
२ तत्फल कथनं ।
३ आद्याहः प्रशंसा ।
४ तृतीयहः प्रशंसा ।
५ अन्तिमाहः प्रशंसा ।

इति अष्टमः खण्डः ।

अथ नवमः खण्डः ।

१ जनक सप्तरात्रः ।
२ फल प्रयोजने ।
३ वेदन प्रशंसा ।
४ स्थानीयत्व निर्णयः ।
५ महाव्रताङ्गत्वं ।
६ सर्व्वभोगस्थानीयत्वं ।

इति नवमः खण्डः ।

अथ दशमः खण्डः ।

१ एकस्तोम सप्तरात्रः ।
२ प्रशंसा ।
३।४ महाव्रत परोक्षत्वं ।

इति दशमः खण्डः ।

अथ एकादशः खण्डः ।

१ देवत्व साधनाष्टरात्रः ।
२ सप्रयोजन फलं ।
३ अर्थज्ञान प्रशंसा ।
४ अग्निष्टोम संस्थात्मकत्वं ।
५ अतिरात्र संस्थात्वं ।
६ सर्व्वाभि फलं ।
७ उक्तार्थस्य प्रशंसा ।

इति एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

१ देव नवरात्रः ।
२ मनुष्योचिताभ्यत्वं ।
३ उक्तार्थ ज्ञान प्रशंसा ।
४ प्रतिष्ठाफलं ।

इति द्वादशः खण्डः ।

अथ त्रयोदशः खण्डः ।

१ पशुसाधन नवरात्रः ।
२ विराज प्रशंसा ।
३ पञ्चाहः प्रशंसा ।

४ अन्तराहः प्रशंसा ।

इति त्रयोदशः खण्डः ।

अथ चतुर्दशः खण्डः ।

१ त्रिकद्रुक दशरात्रः ।
२ अस्य प्रशंसा ।
३ यथायजमे निवन्धः ।
४ संख्यायोगः ।
५ अग्निष्टोम त्रय कथनं ।
६ उक्थ्यानुष्ठानं ।
७ फल कथनं ।

इति चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः ।

१ कुसुरविन्द दशरात्रः ।
२ अधिकारि विधयः ।
३ वज्रस्य साधनत्वं ।
४ गवां स्तोमत्वं ।
५ अश्व एकविंशत्वं ।
६ ज्योतिष्टोमत्वं ।
७ उक्तार्थस्य प्रशंसा ।
८।९ चतुष्टोमत्वं ।
१० सप्रयोजन मन्त्रं ।
११ उक्तार्थ प्रशंसा ।

इति पञ्चदशः खण्डः ।

अथ षोडशः खण्डः ।

१ पशुसाधन दशरात्रः ।
२ प्रथमाहः स्तुतिः ।
३ चतुरहः प्रशंसा ।
४ अन्याङ्ग प्रशंसा ।

इति षोडशः खण्डः ।

अथ सप्तदशः खण्डः ।

१ देवसुर दशरात्रः ।
२।३ तस्य प्रशंसनं ।

इति सप्तदशः खण्डः ।

अथ अष्टादशः खण्डः ।

१ विश्वजिदेकादश राजः ।
२ स्वाराज्य यज्ञं ।
३ वेदितुः फलं ।
४ स्वाराज्य पद व्याख्या ।

५।६ तद्देदितुः फलं ।
७ स्थान निर्णयः ।
८ फल कथनं ।

इति अष्टादशः खण्डः ।

इति द्वाविंशाध्यायः ।

त्रयोविंशाध्याये
खण्डः । १—१८ द्वादशरात्रादि द्वात्रिंशद्रात्र शब्दं ।

अथ प्रथमः खण्डः ।

१ आद्यद्वादश रात्रयः ।
२ तत् प्रशंसा ।
३ आद्यन्तेऽतिरात्रः ।
४ मध्यमस्य सर्व्व स्तोमत्वं ।
५ सर्व्वेषां फल साधनत्वं ।

इति प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

१ प्रतिष्ठासाधन त्रयोदशरात्रः ।
२ पूर्व्ववेषलक्षणं ।
३ आद्यङ्गापरिहारः ।
४ फल कथनं ।

इति द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

१ सर्व्वफल साधन चतुर्दशरात्रः ।
२ तत् प्रशंसा ।
३ विभागेन प्रदर्शनं ।
४ सर्व्वकामसिद्धिः ।
५ आरोह प्रशंसा ।
६।७ द्विरावर्त्तन प्रशंसा ।
८ आद्यन्तावतिरात्रौ ।

इति तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

१ द्वितीय चतुर्दशरात्रः ।
२ अधिकारि निर्णयः ।
३ आद्यग्रहः प्रशंसा ।
४ प्रजातत्वोपपत्तिः ।
५।६ अनन्तर भाविषड्हः ।
७ त्रिकद्रुक प्रशंसा ।

इति चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

१ तृतीय चतुर्दश रात्रः ।
२ अहर्हय प्रशंसा ।
३ दशाहः प्रशंसा ।
४ चतुर्दश रात्रीणां प्रशंसा ।

इति पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

१ प्रथम पञ्चदश रात्रः ।
२ तत्फल कथनं ।
३ देवता सम्बन्धः ।
४ अहर्निर्णयः ।
५ देवताभ्यारोहणं ।
६ दीक्षोपक्रमः ।

इति षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

१ द्वितीय पञ्चदशरात्रः ।
२ रात्रीणां प्रशंसा ।
३ सोमाधिकारि निर्णयः ।
४ प्रथमाहः प्रसंसा ।
५ क्षौम प्राह्मण सम्बन्धः ।
६ षडहः त्रिकमुक प्रशंसा ।

इति सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

१ तृतीय पञ्चत्रिंशतिरात्रः ।
२ अहीन वैलक्षण्यं ।
३ उभय लिङ्ग प्रदर्शनं ।
४ उभय लिङ्गत्व कारणं ।

इति अष्टमः खण्डः ।

अथ नवमः खण्डः ।

१ चतुर्थ पञ्चदशरात्रः ।
२ प्रजाफल साधनता ।
३ अग्रहः प्रशंसा ।
४ दशाहः प्रशंसा ।
५ समुच्चय प्रशंसा ।

इति नवमः खण्डः ।

अथ दशमः खण्डः ।

१ ऐन्द्रषोडश रात्रः ।
२ फल कथनं ।

३ वज्रधारण स्वामीयता ।

इति दशमः खण्डः ।

अथ एकादशः खण्डः ।

१ प्रजापति सप्तदशरात्रः ।
२ फल कथनं ।
३ आद्यपक्षाहः प्रशंसा ।
४ द्वादशाहः प्रशंसा ।
५ क्षत्त्रशरात्रि प्रशंसा ।

इति एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

१ देवासुरादश रात्रः ।
२ अमृतत्व साधनता ।
३ मनुष्योचिताऽमृतत्वं ।
४ अमृतत्वकामैरनुष्ठेयता ।
५ सर्व्वायुः साधनत्वं ।

इति द्वादशः खण्डः ।

अथ त्रयोदशः खण्डः ।

१ वायोरेकोनविंशति रात्रः ।
२ पशुसाधनता ।
३।४ तत्प्रशंसा ।
५ स्वर्गसाधनत्वं ।

इति त्रयोदशः खण्डः ।

अथ चतुर्दशः खण्डः ।

१ विंशति रात्रः ।
२ पुरुषफल साधनत्वं ।
३ अर्थवाद करणं ।
४।५।६ रात्रिसंख्या कथनं ।
७ रात्रि प्रशंसा ।

इति चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः ।

१ प्रथमैकविंशति रात्रः ।
२ पशुसाधनता ।
३ सप्तसंख्यासमर्थनं ।
४ पशुफलत्व करणं ।
५।६।७ लोकत्रय सम्बन्धिः ।

इति पञ्चदशः खण्डः ।

अथ षोड्शः खण्डः ।

१ द्वितीयैकविंशति रात्रः ।
२ फल प्रदर्शनं ।
३ अनुष्ठातॄणां तत्फलं ।
४ पशुविशेषालम्भनं ।
५ पशुदेवता कथनं ।
६ सामिधेन्यां विशेषः ।
७ मनुसम्बन्ध प्रशंसा ।
८ प्रत्रकाल विशेषः ।
९ काल प्रशंसा ।
१० प्रतिष्ठाभयत्वं ।
११ विलास साधनता ।
१२ प्रत्नानुष्ठान प्रशंसा ।

इति षोडशः खण्डः ।

अथ सप्तदशः खण्डः ।

१ द्वाविंशति रात्रः ।
२ उक्तफल साधनता ।

इति सप्तदशः खण्डः ।

अथ अष्टादशः खण्डः ।

१ त्रयोविंशति रात्रः ।
२।३ प्रतिष्ठा साधनता ।
४ प्रतिष्ठां प्रतिष्ठितत्वं ।

इति अष्टादशः खण्डः ।

अथ ऊनविंशः खण्डः ।

१ प्रथम चतुर्विंशति रात्रः ।
२।३ स्वर्गोपपत्ति साधनता ।
४ षड्हस्य प्रशंसा ।
५।६।७ सप्तधा विभागः ।
८ सप्ताहः प्रशंसा ।
९।१० दशरात्र व्यवधानं ।
११ सन्तत्यर्थत्वं ।

इति ऊनविंशः खण्डः ।

अथ विंशः खण्डः ।

१ द्वितीय चतुर्विंशति रात्रः ।
२ आद्य षड्हस्यं ।
३ दशाहः प्रशंसा ।
४ सर्वरात्रि प्रशंसा ।

इति विंशः खण्डः ।

अथ एकविंशः खण्डः ।

१ पञ्चविंशति रात्रः ।
२।३ अन्नाद्य फलं ।

इति एकविंशः खण्डः ।

अथ द्वाविंशः खण्डः ।

१ षड्विंशति रात्रः ।
२।३ प्रतिष्ठा साधनता ।
४ अहर्दय प्रशंसा ।
५ षडहः प्रशंसा ।
६ दशाहः प्रशंसा ।
७ सर्व्वेषां प्रशंसा ।

इति द्वाविंशः खण्डः ।

अथ त्रयोविंशः खण्डः ।

१ सप्तविंशति रात्रः ।
२ सप्तर्द्धि फलसाधनता ।
३ प्रयोक्तृसंख्या प्राग्वत् ।

इति त्रयोविंशः खण्डः ।

अथ चतुर्विंशः खण्डः ।

१ अष्टाविंशति रात्रः ।

इति चतुर्व्विंशः खण्डः ।

अथ पञ्चविंशः खण्डः ।

१ एकोनत्रिंश रात्रः ।
२।३ स्त्रीफल साधनता ।
४ प्रतिष्ठां फलं ।

इति पञ्चविंशः खण्डः ।

अथ षड्विंशः खण्डः ।

१ त्रिंशद्रात्रः क्रतुः ।
२ अन्नाद्य साधनता ।
३ प्रतिष्ठां फलं ।

इति षड्विंशः खण्डः ।

अथ सप्तविंशः खण्डः ।

१ एकत्रिंशद्रात्रः ।
२ अन्नाद्यस्याभिपूर्व्वता ।

२ अनुष्ठायिनां प्रशंसा ।

इति सप्तविंशः खण्डः ।

अथ अष्टाविंशः खण्डः ।

१ दात्रिंशद्दात्रः ।
२।३।४ अनुष्टुप सम्पादनं ।
५।६।७ पश्चात्मकत्वं ।
८ वाचाऽऽगमनादि अवहारः ।

इति अष्टाविंशः खण्डः ।

इति त्रयोविंशाध्यायः ।

चतुर्विंशाध्याये

खण्डः १—२० । त्रयस्त्रिंशद्दात्रा-
मारभ्य संवत्सर पर्य्यन्तानि
शत्राणि ।

अथ प्रथमः खण्डः ।

१ त्रयस्त्रिंशद्दात्रः ।
२ अधिकारि प्रदर्शनं ।
३ स्थानभ्रष्टयेनानुष्ठानं ।
४ दोष परिहारः ।
५ पशाद्दविच्छेदाभावः ।
६ रूपकल्पनोपन्यासः ।
७ ऊधस्यादि कल्पनं ।
८ विसस्यादिनी ऋक् ।
९ अनुकूला ऋक् ।
१० सर्व्वसम्पादनं ।
११ विश्वजिदभावेवाधः ।
१२ कर्त्तव्योपसंहारः ।
१३ सर्व्वादि हेतुता ।
१४ ब्रह्मसाम्नां नानाविधत्वं ।

इति प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

१ अपरत्रयस्त्रिंशद्दात्रः ।
२ समान फल प्रशंसनं ।

इति द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

१ तृतीय त्रयस्त्रिंशद्दात्रः ।
२ दोष परिहारः ।
३ सर्व्वकाम प्राप्ति हेतुता ।

४ त्रिंशत्संख्या प्रशंसा ।

इति तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

१ चतुस्त्रिंशद्रात्रः ।
२ सप्तदशफलत्वं ।
३ संख्या प्रशंसा ।

इति चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

१ पञ्चत्रिंशद्रात्रः ।
२ राशिसंख्या प्रशंसा ।

इति पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

१ षट्त्रिंशद्रात्रः ।
२।३ फलान्तर कथनं ।

इति षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

१ सप्तत्रिंशद्रात्रः ।
२ रात्रीणां फलं ।

इति सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

१ अष्टात्रिंशद्रात्रः ।
२ पशुसाधनता ।

इति अष्टमः खण्डः ।

अथ नवमः खण्डः ।

१ एकोनचत्वारिंशद्रात्रः ।
२ अनन्तश्रीजयफलं ।
३ यजमान फलं ।

इति नवमः खण्डः ।

अथ दशमः खण्डः ।

१ चत्वारिंशद्रात्रः ।
२ रात्रीणां विराड्रूपता ।
३ वैराज प्रतिष्ठाफलं ।

इति दशमः खण्डः ।

अथ एकादशः खण्डः ।

१ प्रथमैकोनपञ्चाशद्ब्राह्मणम् ।
२ अर्थवाद कथनं ।
३ पापव्याहत्ति फलं ।
४।५ एकत्रषड्डहः प्रशंसा ।
६ दोष परिहारः ।
७ साम प्रयोगः ।
८ गायत्रयादयुत्थानं ।
९ गायत्रादि प्रशंसा ।

इति एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

१ द्वितीयैकोन पञ्चाशद्ब्राह्मणम् ।
२ संज्ञा विशेषः ।
३।४ संज्ञानुकूलं फलं ।
५।६ वचनावतारः ।
७ सच्छब्दिपत्वं ।

इति द्वादशः खण्डः ।

अथ त्रयोदशः खण्डः ।

१ तृतीयैकोन पञ्चाशद्ब्राह्मणम् ।
२ स्तावकार्थवादः ।
३ मद्यवर्जनाभ्यञ्जनं ।
४ अञ्जनादि द्रव्याणि ।
५ गुग्गुल्वाद्युत्पत्तिः ।

इति त्रयोदशः खण्डः ।

अथ चतुर्दशः खण्डः ।

१ चतुर्थैकोन पञ्चाशद्ब्राह्मणम् ।
२ त्रिवृत् कार्यप्रसा ।
३ पक्षनिरासासिद्धान्तौ ।
४ उभय स्वर सामत्वं ।
५ गोआयुषी अहः प्रशंसा ।
६ दशाहः प्रशंसा ।
७ मद्यव्रत प्रशंसा ।
८ आद्यन्ताहः प्रशंसा ।

इति चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः ।

१ पञ्चमैकोन पञ्चाशद्ब्राह्मणम् ।
२ रात्रि प्रशंसा ।

३ अधिकारि निरूपणं ।
४ त्रिवृदादि स्तोम संघः ।
५ स्तोमसंघप्रयुक्त फलं ।

इति पञ्चदशः खण्डः ।

अथ षोड़शः खण्डः ।

१ षष्ठैकोन पञ्चाग्निरात्रः ।
२ अधिकारि निर्णयः ।
३ रात्रि प्रशंसा ।
४ मध्यव्रत मध्यमस्थानत्वं ।
५ षडह द्वयं ।
६ दशरात्रि प्रशंसा ।

इति षोड़शः खण्डः ।

अथ सप्तदशः खण्डः ।

१ सप्तमैकोन पञ्चाग्निरात्रः ।
२ अधिकारि निरूपणं ।
३ ओजोद्वारा प्रशंसा ।
४ षडहादि प्रशंसा ।

इति सप्तदशः खण्डः ।

अथ अष्टादशः खण्डः ।

१ एकषष्टिरात्रः क्रतुः ।
२ स्तोमार्थाख्यायिका ।
३ सर्व्वनिधि साधनता ।
४ ब्राह्मणोदाहरणं ।
५।६।७ श्लोकत्रय कथनं ।
८ स्तोम विधानं ।
९ अधिकारि निर्णयः ।

इति अष्टादशः खण्डः ।

अथ ऊनविंशः खण्डः ।

१ व्रतरात्र व्रतं ।
२ सार्थवाद फलं ।
३ अनुष्ठान नियमः ।

इति ऊनविंशः खण्डः ।

अथ विंशः खण्डः ।

१ सम्वत्सर व्रतं ।

२ गवामयनिक ब्राह्मणादेशः ।

इति विंशः खण्डः ।

इति चतुर्विंशोध्यायः ।

पञ्चविंशाध्याये

खण्डः १——१८ आदित्य-पृष्ठायनादि सहस्रसम्मत्-सरसत्रं ।

अथ प्रथमः खण्डः ।

१ आदित्यानां एष्ठत्रयनं ।
२ नाम प्रदर्शनं ।
३ फल कथनं ।
४।५ एष्ठ प्रशंसा ।
६ स्तोम प्रशंसा ।
७ बृहस्पति स्तोम स्तुतिः ।
८ खरसामादि प्रशंसा ।
९ इन्द्रस्तोम प्रशंसा ।
१० स्तोम संख्याधिकृति प्रशंसा ।
११ उद्भिदादि स्तुतिः ।
१२ गोआयुषी प्रशंसा ।
१३ क्रन्दोम दशाह स्तुतिः ।
१४ महाव्रत प्रशंसा ।
१५ आद्यन्ताहः प्रशंसा ।

इति प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

१ अङ्गिरसामयनं ।
२ तत्फल कथनं ।
३ पशुत्वेन एष्ठ प्रशंसा ।
४ आदित्यायनार्थवादः ।
५ क्रन्दोम दशाहः प्रशंसा ।
६ आद्यन्ताहः प्रशंसा ।

इति द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

१ वृतिवातवतोरयनं ।
२ तत्फल प्रदर्शनं ।
३ महाव्रताहः प्रशंसा ।
४ पक्षित्वेन प्रशंसा ।
५ आद्यन्तसामत्रिवृत्त्वं ।

६ अयन प्रशंसा।

इति तृतीयः खण्डः।

अथ चतुर्थः खण्डः।

१ कुण्डपायिनामयनं।
२ अग्निहोत्रादि चतुष्टयं।
३ तत् फल कथनं।
४ ऋषभत्वगविशेषः।
५ आर्त्तस्य समानता विधानं।

इति चतुर्थः खण्डः।

अथ पञ्चमः खण्डः।

१।२ तपस्तितामयनं।
३ तत् फल कथनं।

इति पञ्चमः खण्डः।

अथ षष्ठः खण्डः।

१ द्वादश संवत्सर सूत्रं।
२ तत् फल कथनं।
३ संवत्सर प्रशंसा।
४ सर्व्वसिद्धि फलं।
५ नववार्षिक प्रयोगः।

इति षष्ठः खण्डः।

अथ सप्तमः खण्डः।

१ षट्त्रिंशत् सम्वत्सर सूत्रं।
२ विशेष सङ्गति साधनं।
३ संवत्सर संख्या।
४ वज्र सूत्र साधनता।

इति सप्तमः खण्डः।

अथ अष्टमः खण्डः।

१ साध्यानां सम्वत्सरः।
२ स्वर्गसाधनता।
३ संख्याद्वारा प्रशंसा।
४ ऋगुदाहरणं।
५ ज्योतिष्टोम सादृश्यं।
६ अन्तद्वारा प्रशंसा।

इति अष्टमः खण्डः।

अथ नवमः खण्डः ।

१ सहस्र साध्य मन्त्रं ।
२।३ तत् फल कथनं ।
४ अन्तर्गत संख्या ।

इति नवमः खण्डः ।

अथ दशमः खण्डः ।

१ प्रथम सारस्वत मन्त्रं ।
२ दीक्षोपसदोरियत्ता ।
३ वत्सापाकरणं ।
४ गार्हपत्यादि निर्म्माणं ।
५ सदः प्रभृति निर्म्माणं ।
६ शुक्लपक्षे समापनं ।
७ पूर्णिमानुक्तेयता ।
८ गोष्टोमानन्तर भावि कार्य्यं ।
९ सत्रनाम प्रदर्शनं ।
१० मित्रावरुण सम्बन्धः ।
११।१२।१३।१४ सरस्वत्या नुक्तत्वं ।
१५ तदप्यये कर्त्तव्यता ।
१६ अनुष्ठान प्रशंसा ।
१७ उत्थान विवरणं ।
१८।१९ सत्रोत्थान विधिः ।
२० द्वितीयोत्थानं ।
२१ तृतीयोत्थानं ।
२२ अनुष्ठाने विशेषः ।
२३ अवभृथे विशेषः ।

इति दशमः खण्डः ।

अथ एकादशः खण्डः ।

१ द्वितीय सारस्वत सत्रं ।
२ तत्फल कथनं ।
३ विच्छित्त क्रमेनानुक्तेयता ।

इति एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

१ तृतीय सारस्वतः ।
२ स्वर्गप्राप्ति प्रदर्शनं ।
४ विदुषः फलं ।
५ देवयान प्राप्ति फलं ।

६ विहितानुष्ठानस्य प्रशंसा ।

इति द्वादशः खण्डः ।

अथ त्रयोदशः खण्डः ।

१ दार्ढ्यार्थतेष्टयजनं ।
२ इष्टयजनोपक्रमः ।
३ आख्यायिका कथनं ।
४ अवभृथ स्नान विधिः ।

इति त्रयोदशः खण्डः ।

अथ चतुर्दशः खण्डः ।

१ तुरायनेष्टयजनं ।
२ तदनुष्ठ प्रशंसा ।
३ प्रयोक्तृ फलकथनं ।

इति चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः ।

१ सर्पसत्र प्रकारः ।
२ तत्फल कथनं ।
३ गृहपत्यादि विभागः ।
४ फल कथनं ।

इति पञ्चदशः खण्डः ।

अथ षोडशः खण्डः ।

१ त्रिवत्सर सत्रं ।
२ विहित सत्र प्रशंसा ।
३ तन्मुख्य फलं ।

इति षोडशः खण्डः ।

अथ सप्तदशः खण्डः ।

१ सहस्रसंवत्सरसत्रं ।
२ प्रसव साधनता ।
३ अन्नाद्यवृत्ति साधनता ।
४ सर्व्वसम्पत्ति साधनता ।

इति सप्तदशः खण्डः ।

अथ अष्टादशः खण्डः ।

विश्वसृजामयनं ।
अधिकारि सिद्धिः ।
सत्र याजिफलं ।
विश्वसृजः उपायः ।
आख्यायिकार्थः श्लोकः ।
६ सालोक्यादि फलं ।
७ सर्व्वाधिक फलं ।

इति अष्टादशः खण्डः ।

इति पञ्चविंशाध्यायः समाप्तः ।

इति ताण्ड्यब्राह्मणसूची समाप्ता ।

15821
ROYAL ASIATIC SOCIETY OF BENGAL LIBRARY

Author Veda - Rig-veda

Title Tāṇḍya Mahābrāhmaṇa &c (Vol. 2.)

Call No.

Date of Issue	Issued to	Date of Return

Library of the
ROYAL ASIATIC SOCIETY OF BENGAL
Call No. 294.1/V414t.A.(V.2)
Accession No. 15821